THE
UNIVERSITY
OF CHICAGO
LIBRARY

॥श्री॥

श्रीकृष्णार्पणमस्तु

Krishnaji Vattatraya Painter

Date 26. 11. 1927

॥ श्रीः ॥

श्रीमत्कमलाकरभट्टकृत-

निर्णयसिन्धुः

गोखले इत्युपाह्वेन बाबूशास्त्रिणा संशोधितः

सच

मोहमय्यां

—:०*०:—

संतुरामात्मज सुंदरमल्लेन

'ज्ञानसागर' मुद्रणालये

मुद्रापितः

ज्येष्ठशुक्ल १ शकाब्दाः १८१४ खिस्त्यब्दाः १८९२

पुस्तक मिलनेका ठिकाणा.

मुंबई गोपालबाडीमें संतुरामजी सुंदरमल खेडवालके पास मिलेगा.

और

कलकत्तेमें. गोविंदरामजी सागरमलके पुस्तकालयमें मिलेगा.

निर्णयसिन्धोरनुक्रमणिकाप्रारभ्यते

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
१	मंगलाचरणम्	१२	क्वचित्तिसंहस्थेभ्यनुज्ञा
१	षोढाकालभेदः	१२	गुरुशुक्रयोर्बालवृद्धत्वं
१	अब्दःपंचधा	१३	अतिचारगतेजीवे०
१	चांद्रोऽब्दःषष्टिभेदः	१३	अस्तस्यदेशपर व्यवस्था
१	संवत्सरनामानि	१३	अस्तादेरपवादः
२	संवत्सरप्रवृत्तिः	१३	मलमासव्रतम्
२	अयनस्वरूपं	१३	पक्षनिर्णयः
२	अयनयोर्विनियोगः	१४	तिथिनिर्णयः
२	तत्रदेवता प्रतिष्ठानिर्णयः	१४	तिथेर्वेधनिर्णयः
२	दक्षिणायनेपिप्रतिष्ठा	१४	सायंप्रातर्वेधलक्षणम्
२	ऋतुमासभेदाः	१४	तिथिविशेषेवेधविशेषः
३	संक्रांतिनिर्णयः	१४	कर्मकालव्यापिनोति०
३	सर्वसंक्रांतिषुदानानि	१४	युग्मवाक्यलक्षणंद्वैधेनिर्णयः
४	संक्रांतौउपवासनिर्णयः	१५	सामान्यतोदशमी
४	संक्रांतौकैषुचिदुपवासनिर्णयः	१५	त्रयोदशी
४	संक्रांतौश्राद्धम्	१५	प्रतिपदा
५	विष्णुपदादिस्वरूपषडशीत्या०	१५	खर्वदर्पादिलक्षणं
५	विषुवलक्षणम्	१५	एकभक्तम्
५	कुत्रचित्पिंडरहितं श्राद्धम्	१५	कालः पंचधा
५	कुत्रचिद्रात्रौस्नानं	१६	अथनक्तं
६	जन्मर्क्षेसंक्रांतिश्चेतार्हितत्र	१६	प्रदोषलक्षणं
६	स्नानेविशेषः	१६	प्रदोषेनिषेधपदार्थाः
६	कुत्रचित्सांयंसंध्यानिषेधः	१६	संध्यालक्षणम्
६	चांद्रादिमासभेदाः	१६	यतिनक्तंविधवानक्तं
६	ब्राह्मणादीनांमासनिर्णयः	१६	विधुरनक्तंतल्लक्षणम्
६	मलमासे क्षयमासनिर्णयः	१६	सौरनक्तं
८	मलमासे कार्याकार्यनिर्णयः	१७	हरिनक्तं
८	क्षयमासे कार्याकार्यनिर्णयः	१७	नक्तेधर्माचरणम्
१२	गुरुशुक्रास्तादौवर्ज्यं	१७	अयाचितनिर्णयः
१२	सिंहस्थेवर्जविचारः	१७	नक्षत्रव्रतकालः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
१७	व्रतपरिभाषा	२०	क्षारपदार्थनिषेधः
१७	तदधिकारिणः	२०	क्षारस्वरूपनिर्णयः
१७	शूद्रवैश्य वर्णधर्माः	२०	गोधूमप्रतिप्रसवः
१७	स्त्रीणामनुज्ञैव	२१	व्रतेग्राह्यधान्यानि
१७	स्त्रीणांस्नानविशेषः	२१	कूष्मांडादि निषेधः प्रतिपदादिषु
१७	व्रतग्रहणप्रकारः	२१	हविष्यपदार्थाः
१८	व्रतारम्भकालः	२१	गृहीतव्रतत्यागे प्रायश्चित्तं
१८	भद्रानिर्णयः	२१	उपवासप्रत्याम्नायाः
१८	भद्रापुच्छनिर्णयः	२१	व्रतेनियमाः
१९	भद्रासर्पिणीवृश्चिकी	२१	स्त्रीव्रतेविशेषः
१९	दिनभद्रारात्रिभद्रा	२१	विधवाविशेषः
१९	व्रतारम्भेविशेषः	२१	एकादश्यां तांबूल निषेधः
१९	खण्डतिथिलक्षणम्	२२	अश्रुपातादिनिषेधः
१९	व्रतारम्भेधर्माः	२२	सूतकादौनिर्णयः
१९	व्रतेब्राह्मणभोजनम्	२२	जाताशौचेनिर्णयः
१९	सदस्यभोजनेविशेषः	२२	मृताशौचेनिर्णयः
२०	द्वित्रियजमानकर्तृके	२२	क्षतजाशौचेनिर्णयः
२०	शूद्रस्यविप्रद्वाराव्याहृतिहोमः	२२	गर्भिण्यादीनांव्रतेप्रतिनिर्णयः
२०	प्रतिमास्वरूपम्	२२	पूर्वसंकल्पितव्रते
२०	अनादेशद्रव्येआज्यं	२२	रजस्वलासु
२०	अनादेशमंत्रेसमस्तव्याहृतिहोमः	२२	प्रतिनिधयः
२०	अनादेशेदेवताप्रजापतिः	२३	स्त्रीशूद्रयोर्व्रतादौनि०
२०	ग्रहादिपूजायां होम संख्या	२३	ब्राह्मणास्य हीनवर्णकर्मकरण निषेधः
२०	अनुक्त संख्यायांनिर्णयः	२३	कुत्रचित्प्रतिनिधिनिषेधः
२०	व्रतोद्यापनानुक्तौ	२३	व्रतादिसन्निपाते
२०	व्रतोद्यापनाशक्तौ	२४	शिवरात्रौप्रातः पारणं
२०	वृथाविप्रवचनग्रहणं	२४	भूतोष्टम्यादौ दिवा भोजननिषेधः
२०	दक्षिणानिर्णयः	२४	संक्रांत्यादौरात्रिभोजननिषेधः
२०	रजतदक्षिणानिषेधः	२४	चांद्रायणेएकादश्यां भोजनंका०
२०	परान्नभोजननिषेधः		

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
२४	प्रतिपदादितिथिनिर्णयः	३७	प्रदोषादिसंकटेनि०
२५	सर्वतिथिषुवर्ज्यानि	३७	हरिवासरलक्षणं
२५	द्वितीयादिनिर्णयः	३८	उपवासातिक्रमे
२५	तृतीयानिर्णयः	३८	द्वादशीनिर्णयः
२५	चतुर्थीनिर्णयः	३८	त्रयोदशीनिर्णयः
२६	पंचमीनिर्णयः	३८	चतुर्दशीनिर्णयः
२६	षष्ठीनिर्णयः	३८	पूर्णिमा ऽमावास्यानिर्णयः
२७	सप्तमीनिर्णयः	३९	अमायांसोमवारादि
२७	अष्टमीनिर्णयः	३९	योगेसंयोग लक्षणोऽयतीपातः
२७	नवमीनिर्णयः	३९	अथेष्टिकालः
२७	दशमीनिर्णयः	३९	इष्ट्याद्यारंभः पौर्णमास्यामेव
२७	एकादशीनित्यकाम्य उपवासनिषेधेफलाहाराभ्यनुज्ञानि.	४०	अमायांविशेषः
		४१	मलमासादौनप्रथमारम्भइष्टेः
२८	एकादश्याअष्टादशभेदाः	४१	मतांतरेकर्त्तव्यम्
३१	एकादशी व्रतोपयुक्त धर्माः	४१	अथविकृतिः
३३	एकादशी व्रतेधि कारिणः	४१	अग्रयणविशेषः
३४	एकादशी व्रताकरणे प्रयाश्चितम्	४१	पशुयागकालाः
३५	काम्यव्रतविधिः	४२	आधानकालाः
३५	दशमीनियमः	४२	आधाननक्षत्राणि
३५	व्रतघ्नानि तस्यप्रायश्चितम्	४२	सोमयागकालः
३५	एकादश्यांश्राद्धप्राप्तौ	४३	अमावास्याश्राद्धका०
३६	अव्रतघ्नानि	४३	पिण्डपितृकालः
३६	सर्वव्रतेषुनियमः	४५	पिण्डपितृयज्ञाकरणेप्रा०
३६	उपवाससंकल्पः	४५	वैश्वदेवाकरणेप्राय०
३६	द्वादश्यांवर्जपदार्थाः	४६	पतितान्नभोजनेप्राय०
३६	द्वादश्यांनिवेदनमंत्रः	४६	निरग्निकस्यामानिर्णय०
३७	रजस्वलायाएकादशी	४६	साग्निकस्याऽमानि०
३७	अष्टौमहाद्वादश्यः	४६	स्त्रीशूद्राणाममानि०
३७	अथद्वादशीनिर्णयः	४६	श्राद्धांतरन्सन्निपाते
३७	आहनिकापकर्षः	४६	सिनीवालीलक्षणम्

पृष्ठम्	विषयाः
४६	कुहूलक्षणम्
४६	कुतुपकाललक्षणम्
४६	तुलादानम्
४७	अमाश्राद्धातिक्रमेप्रा०
४७	ग्रहणनिर्णयः
४७	वेधनिर्णयः
४७	चंद्रग्रहणेविशेषः
४७	चंद्रग्रस्तोदये
४७	चंद्रसुर्यग्रस्तास्ते
४८	ग्रहणेसंध्याहोमादौ
४८	बालवृद्धातुराणां
४८	शृतान्ननिषेधः
४८	तक्रघृत पाचितानांनिर्णयः
४९	वेधेभोजनादिप्राय०
४९	ग्रहणकाले भोजने प्रायश्चित्तम्
४९	उपवासो ग्रहणेकैः कार्यः
४९	पुत्रवतउपवासनि०
४९	ग्रहणेचूडामणियो०
४९	स्नानदानदि कालनिषेधः
४९	मुक्तिस्नानाकरणेदोषः
४९	ग्रहणस्नाने तीर्थानिषेधः
४९	उष्णोदकस्नानेतारतम्यं:
५०	तीर्थविशेषे दानविशेषः
५०	ग्रहणेश्राद्धविधिः
५१	ग्रहणेश्राद्ध भोजने दोषः
५१	सूतकेग्रहणोच
५१	कर्तव्याविशेषः
५१	रजस्वलास्नानं
५१	रात्रावपिश्राद्धादि
५१	चंद्रग्रहणंदिवाचत्
,,	ग्रहणंदिने वार्षिक श्रान्नप्राप्तौचत्
५२	तत्रमंत्रदीक्षाकाल
५२	जन्मराश्यदौग्रहणं
५२	ग्रहणेइष्टानिष्टफलं
५३	नागबिम्बदानेमंत्रः
५३	अत्रशांतिरुक्ता
५३	ग्रहणोहोमादि कर्तव्यता
५४	होमाशक्तौ चतुर्गुणो जपः
५४	गर्भिण्याग्रहणावलो कननिषेधः
५४	मंगलकृत्येषुवेधविचारः
५४	मंत्रदीक्षाहोमतर्पणं
५४	कुरुक्षेत्रेप्रतिग्रहेप्रा०
५५	पूर्वसंकल्पित द्रव्योप ग्रहणेविशेषः
५५	मेघाच्छादनेअंन्धादीनाम्
५८	इतिग्रहणानिर्णयः
५८	अथसमुद्रस्नानम्
५८	भृगु भौमवारे समुद्र स्नाननिषेधः
५८	अपर्वणिस्नाननि षेधः
५८	सेतुबन्धादौननिषेधः
५८	समुद्रस्नानविधिः
५८	समुद्रार्घ्यमन्त्रः
५८	समुद्रतर्पणम्
	अथद्वितीयपरिच्छेदानुक्रमणिका
५९	अथससंवत्सरप्रतिपदा
५९	मीनसंक्रांतिनिर्णयः
५९	अथतिथिनिर्णयः
६०	अपितुसंवत्सरारम्भः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
६०	अस्यामेवनवरात्रारम्भः	७१	एवंसम्पूर्णस्नानाशक्तौ
६०	जत्रप्रपादानम्	७१	वैशाखशुक्ल तृतीयाअक्षय्यतृतीया
६०	कुम्भदानम्	७१	इयंयुगादिरपि
६०	चैत्रशुक्लतृतीयायां	७२	अत्रश्राद्धमुक्तंमात्स्ये
६०	गौरीदोलोत्सवः	७२	अत्रदानविशेषस्तत्रैवभविष्ये
६१	अत्रैवसौभाग्य शयनव्रतम्	७३	अत्रारात्रिभोजनेप्राय०
६१	इयंमन्वादिः	७३	अत्रश्राद्धाकरणोप्रा०
६१	प्रसंगात्सर्वमन्वादिनिर्णयः	७३	अत्रसमुद्रस्नानप्रशंसा
६१	अत्रैवश्राद्धमुक्तंमात्स्ये	७४	इयमेवतृतीया परशुरामजहन्ती
६१	चैत्रशुक्लतृतीयायांमत्स्यजयन्ती	७४	वैशाखशुक्लसप्तम्यागंगोत्पत्तिः
६२	अत्रैवप्रसंगाद्दशावतारजयन्त्यः	७४	वैशखशुक्ल द्वादश्यांयोगविशेषः
६३	जन्माष्टम्यादौविशेषः	७५	वैशाखशुक्ल चतुर्दशीनरसिंह यन्ती
६३	तत्रैव शुक्लपंचमीकल्पादिः		
६३	चैत्रशुक्लाष्टम्यां भवान्युत्पत्तिः	७६	अथात्रविशेषः
६३	अत्रभवानीयात्रा	७६	वैशाखपौर्णमास्यांविशेषोपरार्के
६३	अत्रैवअशोककलिकाप्राशनम्	७६	अत्रकृष्णाजिनदानम्
६३	चैत्रशुक्ल नवमीरामनवमी	७६	इतिवैशाखः
६६	चैत्रशुक्लैकादश्यांदोलोत्सव.	७६	अथज्येष्ठः
६६	चैत्रशुक्लद्वादश्यांदमनोत्सवः	७६	वृषसंक्रांतौपुण्य०
६८	अथागमोक्तदीक्षावतांदमनोत्सवविधिः	७६	ज्येष्ठशुक्ल तृतीयायांरम्भाव्रतम्
		७७	ज्येष्ठशुक्लदशमीदशहराख्या
६८	चैशुक्ल त्रयोदश्यामंनंगव्रतम्	७८	अत्रविशेषःकाशीखंडे
६९	चैत्रशुक्लचतुर्दशीपूर्वाग्राह्याः	७८	अस्यामेवसेतुबन्धरामेश्वरपूजा
६९	चैत्रशुक्लपूर्णिमा	७८	ज्येष्ठशुक्लैकादशीनिर्जला
६९	अत्रविशोषोनिर्णयामृते	७८	ज्येष्ठपौर्णमास्यांसावित्रीव्रतम्
६९	अत्रसर्वदेवदमनपूजोक्ता	७९	इयंमन्वादिरपि
६९	इयंमन्वादिः	८०	इतिज्येष्ठःअथाषाढः
६९	इतिचैत्रः	८०	मिथुनसंक्रांतौपरा
६९	अथवैशाखःमेषसंक्रमः	८०	आषाढशुक्ल दशमीपौर्णमासीचमन्वादिः
७०	अथवैशाखस्नानं		

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
८१	अत्रैव विष्णुशयनोत्सवः	१०८	भाद्रशुक्लाष्टमीदुर्वाष्टमी
८१	आषाढशुक्लैकादशी	१०९	अत्रैवज्येष्ठा पूजोक्ता
८४	अत्रैवचातुर्मास्यारंभः	१०९	भाद्रशुक्लद्वादश्यांपारणम्
८६	अथनदीनांरजोदोषः	११०	इयमेव श्रवणद्वादशी
८६	इत्याषाढः	१११	वामनावतारनिमित्तोपवासव्रतम्
८७	अथश्रावणः	११४	भाद्रशुक्लचतुर्दश्यामनन्तव्रतम्
८८	श्रावणशुक्लतृतीयागमधुस्रवा	११५	अगस्त्यार्घः
८८	श्रावणशुक्लचतुर्थी	११६	भाद्रपदपौर्णमास्यांप्रपितामहात्पतां स्त्रीनुद्दिश्यश्राद्धम्
८८	श्रावणशुक्ल पंचमी	११६	इतिभाद्रपदः
८८	नागपंचमी	११६	अथाश्विनः
८९	अत्र विशेषोहेमद्रौभविष्ये	११६	कन्यासंक्रमेपराःषोडश
८९	अत्रैवविष्णोःपवित्रारोपणम्	११६	अथमहालयः
८९	श्रावणशुक्लचतुर्दशी पूर्वयुता	१२३	कपिलाषष्ठी
९१	अर्थीपाकर्म	१२३	इथमेवचंद्रषष्ठी
९८	अत्रैवहयग्रीवोत्पत्तिः	१२४	अष्टम्यांमहलक्ष्मी
९८	श्रावण्यांपौर्णमास्यःश्रवणाकर्म	१२५	नवम्यामन्वष्टका
९८	इतिश्रावणःअथभाद्रपदः	१२६	अथत्रयोदशीश्राद्धम्
९८	सिंहेपराःषोडशः	१२९	अथचतुर्दशी
९८	अत्रगोप्रसवेद्भुतसारेनारदः	१३०	अमायांविशेषः
९८	भाद्रपदकृष्णातृतीयाकज्जली संज्ञा	१३०	आश्विनशुक्ल प्रतिपदिदौहित्रश्राद्धम्
९९	भाद्रपदकृष्णचतुर्थीबहुलसंज्ञा	१३०	इतिमहालयनिर्णयः
९९	अत्रगोःपूजा	१३०	अथाश्विनप्रतिपदि
९९	अथजन्माष्टमी	१३१	अस्यामेवदेवीत्रिरात्रं
१०६	भाद्रकृष्णामावस्यायांकुशग्रहणम्	१३९	सप्तमीपूजाविधिः
१०६	भाद्रशुक्लतृतीयाहरितालिका	१४९	अथमहाष्टमी
१०७	भाद्रशुक्लचतुर्थीवरदचतुर्थी	१५१	महानवमी
१०७	अत्रचन्द्रदर्शननिषिद्धम्	१५१	अथबलिदानम्
१०७	भाद्रशुक्लपंचमीऋषिपंचमी	१५२	अथसहस्रचंडी
१०७	भाद्रशुक्लषष्ठीसूर्यषष्ठी		

पृष्ठम्	विषयाः
१५३	अथनवरात्रपारणम्
१५५	विजयादशमी आश्विनपौर्णमासी कोजागरी
१५८	अत्रैवाश्वयुजीकर्म
,,	इत्याश्विनमासः
,,	अथकार्तिकः
,,	तुलासंक्रमेपराःषोडश
१५८	अथकार्तिकस्नानम्
१५९	अथमालाधारणम्
१६१	आकाशदीपः
,,	कार्तिक शुक्लचतुर्थी करकचतुर्थी
,,	कार्तिककृष्णद्वादशी गोवत्सपूजा
१६२	कार्तिक कृष्णचतुर्दशी नरक चतुर्दशी
१६३	कार्तिकामावास्या माश्वयुजीकर्म
१६४	तत्रैवभीष्मव्रतम्
१६५	कार्तिक शुक्लप्रतिपदिगोःक्रीडा
,,	बलिप्रतिपदा
१६६	मार्गपालीबन्धनं
१६७	यमद्वितीया
१६८	कार्तिकशुक्लनवमी युगादिः
,,	अत्रैवविष्णुत्रिरात्रं
१६८	कार्तिकशुक्लदशमी भीष्मपंचक व्रतम्
,,	कार्तिक शुक्लद्वादश्यांरेवतीयोगर हितायांपारणं
,,	अस्यामेव देवोत्थापनम्
,,	चातुर्मास्यव्रतसमाप्तिः
१६९	बाराहोक्तो बोधनविधिः
,,	कार्तिकशुक्लद्वादशीपौर्णमा सीच मन्वादिः
,,	वैकुंण्ठचतुर्दशी
,,	कार्तिकव्रतोद्यापनं
१७१	कार्तिकपौर्णमासी
,,	अत्रत्रिपुरोत्सवः
,,	अत्रवृषोत्सर्गीति प्रशस्तः
,,	अत्रकार्तिकेयदर्शनं
१७२	इतिकार्तिकः
,,	अथमार्गशीर्षः
,,	वृश्चिके पुर्वाःषोडश
१७२	मार्गकृष्णाष्टमीकालाष्टमी
,,	अत्रकालभैरवपूजा
,,	मार्गशीर्षशुक्ल पंचम्यांनागपूजा
,,	मार्गशीर्षे शुक्लषष्ठीचम्याषष्ठी इ यमेवस्कन्दषष्ठीः
१७४	मार्गपूर्णिमायां दत्तोत्पत्तिः
१७४	इतिमार्गशीर्षः
,,	अथपौषः
,,	धनुःसंक्रमेपराःषोडश
,,	पौषशुक्लैकादशमीमन्वादिः
,,	पौषामावास्यायांअर्धोदयः
१७५	अत्रदानविशेषः
१७६	इतिपौषः
,,	अथमाघः
,,	माघस्नानम्
१७७	मकरसंक्रांतौपरतश्चत्वारिंशत्घटिकाः पुण्यकालः
१७८	मकरसंक्रान्तौदानविशेषः
१७९	माघामायां योगविशेषः
१८१	गाघकृष्ण चतुर्दश्यांयमतर्पणं

पृष्ठम्	विषयाः
,;	माघ शुक्ल चतुर्थीतिलचतुर्थी
,,	इयमेवकुन्दचतुर्थी
,,	माघशुक्लपंचमीश्री पंचमी
,,	रथसप्तमी
,,	अत्रदानविशेषः
,,	इयंमन्वादिः
१८२	माघशुक्लाष्टमीभीष्माष्टमी
१८३	माघ शुक्ल द्वादशीभीष्मद्वादशी
,,	माघीपूर्णिमा
,,	इतिमाघः
१८३	अथफाल्गुनः कुम्भेषाडेश
,,	फाल्गुन कृष्णाष्टम्यां बि०
१८४	शिवरात्रिः
,,	अस्यामेवग्रहणे विचारः
,.	इयंमन्वादिः
१८७	चैत्रकृष्ण प्रतिपदि वसन्तोत्सवः
,,	अत्रविशेषोहेमाद्रौ
१८९	अत्रचूतकुसुमप्रकाशनमुक्तम्
,,	चैत्रामावास्यामन्वादिः
,,	इतिफाल्गुनः
,,	इतिद्वितीयपरिच्छेदःसमाप्तः

अथतृतीयपरिच्छेद प्रारभ्यते

पृष्ठम्	विषयाः
१९०	मंगलाचरणम्
,,	प्रथमरजोदर्शने
,,	दुष्टतिथ्यादय
,,	दुष्टवाराः
,,	नक्षत्रफलम्
,,	लग्नफलम्
,,	वस्त्रफलम्
,,	रुधिर बिन्दुफलम्
,,	प्रथमतो दोषः स्त्रीगमने
,,	योगफलम्
१९१	दुष्टप्रथमर्त्तौशांतिः
१९२	प्रथमर्त्तौविशेषः
,,	प्रथमर्त्तौप्राक्स्त्री गमने निषेधः
,,	ऋतौगमने दिन संख्या
,,	ऋतौगमनेतिथ्यादिनियमाः
१९४	श्राद्धादौ स्त्रीगमनेनिषेधः
,,	अनेकभार्यस्यर्तुगमनं ऋतावगमनेदोषः
,,	गर्भाधानविध्यकरणे
,,	मलमासशुक्रास्तादै
१९५	स्त्रीगमनेशुद्धिः
,,	रात्रावाशौचेरजसि
,,	सप्तदशदिनमध्येरज
,,	सिचेत्
,,	रोगजेरजसि
,,	रजस्वलामन्योनृस्पर्शे
,,	सवर्णानांविशेष
१९५	रजस्वलायाश्चांडलादिस्पर्शे
,,	रजस्वलायांनैमित्तिक स्नानं
,,	रजस्वलायांरजसिज्वरोत्प०
,,	रजसोज्ञाने
,,	पुंसवनानवलोभनम्
,,	पुन्नक्षत्राणि
१९६	पुंसवनेतिथ्यादि
,,	अवनलोभनम्
१९७	सीमन्तोन्नययं

निर्णयसिन्धोरनुक्रमणिका ।

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
१९७	तत्रप्रतिगर्भकर्तव्यता	२०७	नामकर्म तत्कालविधिः
१९७	सीमन्ताभावे भोजनप्रायश्चितं	२०८	खट्वारोहप्रेंखारोहौ
१९८	गर्भिणीप्रतिधर्माः	२०८	दुग्धपानम्
१९८	पत्युः श्राद्धभोजननिषेधः	२०९	ताम्बूलभक्षणम्
१९९	सूतिकागृहप्रवेशः	२०९	निष्क्रमणम्
१९९	जातकर्म	२०९	अथोपवेशनम्
२००	वृद्धिश्राद्धेआमहेमविचारः	२०९	अन्नप्राशनम्
२००	आशौचांतरपातवृद्धिश्राद्धेविचारः	२१०	अब्दपूर्तिः
२००	जन्मदुष्ट कालगण्डांतस्तद्दानंच	२११	उष्णोदकस्नाननिषेधः
२०१	आश्लेषाफलम्	२११	कटिसूत्रम्
२०१	ज्येष्ठाफलम्	२११	चौलम्
२०१	मूलफलम्	२१२	मातरिगर्भिण्यां नि०
२०१	लग्नभेदात्फलम्	२१२	ज्वरोत्पत्तौ मातूरजासि
२०१	विशाखाफलम्	२१३	संकटेमुंडनोत्तरं विचारः
२०२	चित्राफलम्	२१३	सोदरयोराशौचं
२०२	व्यतीपातादिफलम्	२१३	चौलभोजने प्राय०
२०२	विकृतांगसहदन्तजातफलम्	२१३	शिखाविचारः
२०२	पितृभ्रात्रैकनक्षत्रजाते	२१३	चौलाचौलशास्त्रार्थश्च
२०३	ग्रहणजननेशांतिः	२१४	विद्यारम्भः
२०३	अकालप्रसवस्त्री युगलक्षणम्	२१४	धनुर्विद्या
२०३	उपरिदन्तजनने	२१४	अनुपनीतस्य विशेषः
२०३	त्रिकशांतिः	२१५	उपनयनंशिशुलशणं
२०४	बालत्रयजनने	२१५	उपनयनगौणकालः
२०४	षष्ठीपूजा	२१५	जन्ममासादि
२०५	दत्तपुत्रपरिग्रहविधिः	२१६	उपनयनेगुरुबलम्
२०५	स्त्रीशूद्रयोर्दत्तकेवि०	२१६	गलग्रहाः नैमित्तिकाः
२०५	शूद्रकर्तृकहोमेविचारः	२१६	ज्येष्ठमासादिविचारः
२०५	दत्तकेविशेषः	२१७	अक्षय्यतृतीयादौपुनरुपनयनम्
२०५	यमयोर्ज्येष्ठकनिष्ठविचारः	२१७	सोपपदाः
२०७	सूतिकास्नानम्	२१७	प्रदोषस्वरूपम्

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
२१७	भूकंपादौ	२२७	समावर्तनम्
२१७	शाखाधिपाः	२२७	बटोःपूर्वमृतानांत्र्यहाशौचं
२१८	प्रातःसंध्यागर्जिते	२२७	छुरिकाबन्धः
२१८	सायंसंध्यागर्जने शांतिः	२२८	अथविवाहः
२१८	उपनयनेनक्षत्राणि	२२८	सापिंड्यनिर्णयः
२१८	उपनयनाधिकारिणः	२३३	त्रिगोत्रात्ययेविशेषः
२१८	षंढमूकादीनांविशेषः	२३३	मातुलकन्यापरिणयः
२१८	कुण्डगोलकयोर्गायत्र्युपदेशः	२३३	जीवत्पित्रादित्रिकसापिंड्यं:
२१९	भिक्षायांविचारः	२३३	कंन्यासापिंड्यं
२१९	संस्कारलोपेप्रायश्चित्तम्	२३३	सापत्नमातामहकुले
२१९	अतीतसंस्काराणां	२३३	दत्तकस्यसापिंड्यम्
२२०	युगपदुपनीत्यासहचौलकरणम्	२३३	अनाचारः
२२०	युगपत्संस्कारे नांदीश्राद्धम्	२३६	गोत्रप्रवरनिर्णयः
२२०	उपनयनाग्निः	२३६	द्विगोत्राद्यज्ञाते
२२०	उपनयने मध्याह्नसन्ध्या	२४२	मातृगोत्रनिर्णयः
२२०	ब्रह्मयज्ञारम्भः	२४२	कन्याविवाहकालः
२२०	ब्रह्मचारीधर्माः	२४३	गुर्वर्कबलम्
२२०	गुरूच्छिष्टं	२४४	बृहस्पतिशांतिः
२२०	मेखला	२४४	शुक्रास्तादिनिमित्तं
२२१	दण्डाः	२४४	सिंहस्थगुरोरपवादः
२२१	अजिनम्	२४४	कन्यादातारः
२२१	यज्ञोपवीतम्	२४५	भ्रातॄणांसंकृतानाम्
२२१	तत्संख्या	२४५	स्वयंवरेनांदीश्राद्धम्
२२१	ब्रह्मचारीधर्मलोपे	२४५	परकीयकन्यादानम्
२२२	अग्निकार्यलोपे	२४५	गौर्यादिदानफलम्
२२२	सन्ध्यालोपे	२४५	मासनिर्णयः
२२२	उपवीतनाशे	२४६	ज्येष्ठमासानिर्णयः
२२२	पुनरुपनयनम्	२४६	दशदोषाः
२२४	अनध्यायाः	२४७	गुर्वतिचारे
२२६	महानाम्न्यादिव्रतम्	२४७	घातचंद्रे

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
२४७	अकालवृष्ट्यादौ	२५५	नूतनवस्त्र धारणे न दोषः
२४७	भूकंपादौ	२५५	स्त्रियासहभोजने न दोषः
२४८	नांदीश्राद्धेभूकंपादेरप०	२५५	विवाहनक्षत्राणि
२४८	कन्यावैधव्ययोगे	२५५	विरुद्धनक्षत्रेदानानि
२४८	कुम्भविवाहादि	२५५	विवाहमडपहरिद्रालेपः
२४८	विष्णुमूर्तिदानमुक्तम्	२५५	विवाहवेदिका
२४८	कार्यप्रतिकूलादि	२५५	चुल्यर्थमृत्तिकाहरणम्
२४९	पित्रादौमृतेविशेषः	२५५	वरवरणं
२४९	तत्रविनायकशांतिः	२५६	वाग्दानम्
२४९	प्रतिकूलापवादः	२५६	वाग्दानोत्तरंवरमृतौ
२४९	मातूरजोदर्शने	२५६	वरस्यदेशांतरगते
२५०	नांदीश्राद्धानंतरम्	२५६	वाग्दानोत्तर मरणेवरस्य
२५०	एकमातृकयोःक्रिया	२५६	दोषसत्वे अनेकेभ्यो वरेभ्यो दत्वाचनिर्णयः
२५०	श्रीपूजनम्		
२५०	तदपवादःसंकटे	२५७	द्वितीयविवाहेनांदीश्राद्धम्
२५१	विवाहमध्येश्राद्ध०	२५७	लग्नघटिकास्थापनम्
२५१	मुण्डनविचारः	२५७	मधुपर्कोऽन्यशाखीयः
२५१	मासिकापकर्षः	२५८	दातरिनिर्णयंइष्टलक्षणम्
२५१	भिन्नमातृजयोर्विवाहः	२५८	कन्यादानविधिः
२५२	प्रत्युद्वाहेविधिनिषेधौ	२५८	गृहप्रवेशनीयहोमोविशेषः
२५२	कन्यारजोदर्शने	२५८	औपासनेविशेषः
२५२	तत्रप्रायश्चितम्	२५८	देवकोत्थापनम्
२५२	तद्विवाहेवरस्यप्रायश्चितम्	२५८	नांदीश्राद्धोत्तरंसर्वेषां
२५३	गांधर्वादिविवाहाः	२५८	सपिण्डानांनियमाः
२५३	बलादपहरणीयाः	२५८	स्पृष्टारपृष्टदोषाभावः
२५३	विवाहमध्येआशौचे	२५८	उपनयनविवाहोत्तरस्नानम्
२५४	आशौचे नांदीश्राद्धविधिः	२५८	अपूर्वतीर्थयात्रानिषेधः
२५४	अन्नादौविशेषः	२५९	प्रथमवर्षे वध्वापितृगृहे
२५४	धर्मार्थंविवाहकरणे	२५९	गोपीचन्दनधारणनिषेधः
२५४	कन्यागृहभोजने	२५९	उपनयनविवाहोत्तरं

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
२५९	मुण्डननिषेधः	२६७	कूपस्योत्सर्गविधिः
२५९	भर्तृगृहेमासनिषेधः	२६७	वृक्षारोपणम्
२५९	विवाहोत्तरंपिण्डदानं	२६७	मूर्तिप्रतिष्ठा
२५९	तिलतर्पणनिषेधः	२६७	मासक्षाणि
२५९	वधूप्रवेशेवर्षानियमाः	२६७	प्रतिष्ठातिथयः
२५९	मासदिवसनिर्षनियमाः	२६७	नक्षत्राणि
२५९	प्रतिशुक्रविचारः	२६८	वारायनम्
२५९	ग्रहशुक्रास्तविचार	२६८	प्रतिष्ठाधिकारिणः
२५९	मांगलिकेप्राप्तश्राद्धादिनाचरत्	२६९	शूद्रादिस्थापनंलिंगादीनाम्
२६०	द्विरागमनम्	२६९	स्त्रीशूद्रैर्विष्णुशिवपूजनंकार्यम्
२६०	पुनर्विवाहेकारणम्	२६९	प्रतिमाकस्यपदार्थस्य
२६०	स्त्रीबाहुल्येककस्यधर्माधिकारः	२७०	प्रतिमायांप्राणप्रतिष्ठा
२६१	पुनर्विवाहेअग्निः	२७०	लिंगभेदेनार्चाभेदः
२६१	पुनर्विवाहे निषिद्धकालः	२७०	लिंगकस्यपदार्थस्यकार्यम्
२६१	अग्निद्वयसंसर्गः	२७०	अथपंचसूत्रीनिर्णयः
२६१	तृतीयविवाहनिषेधः	२७१	गृहेलिंगशालग्रामादिकाः कतिपूजनीयाः
२६२	अर्कीविवाहकालः		
२६२	आधानंतन्नक्षत्रादि	२७१	स्त्रीभिः शिवविष्णुस्पर्शोनकार्यः
२६३	उदितानुदितलक्षणं	२७१	ब्राह्मणादिभिःकतिसंख्याप्रतिमा
२६३	अग्निहोत्रकालः	२७१	नवधाद्रव्यस्यप्रतिमा
२६३	आवसथ्याधानम्	२७१	शालग्रामशिवनामभिःपरो०
२६३	ज्येष्ठभ्रातरिपितरिवासाग्निके	२७१	अथपार्थिवपूजा
२६४	कनिष्ठस्याग्न्यभावेनदोषः	२७२	अमुकदेवेअमुकवाद्यनिषेधः
२६४	ज्येष्ठअकृताधानआधानकार्यम्	२७३	शिवस्यपुष्पादिकमर्पणीयम्
२६४	परिवेत्तादिविचारः	२७३	त्रिपुंड्रधारणंरुद्राक्षधारणम्
२६४	परिवेत्ताद्यपवादः	२७३	रुद्राक्षमहिमा
२६४	शूद्रस्यसंस्कारः	२७४	रुद्राक्षाभिमंत्रणम्
२६६	अथक्षुद्रकालाः	२७४	कतिरुद्राक्षाणांमाला
२६६	जलाशयस्यकालः	२७४	रुद्राक्षमालादानम्
२६७	कूपदेशाः	२७४	रुद्राक्षमालाधारणं

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
२७४	शिवमहास्नानंपंचामृतंच	२९२	तैलस्नाननिषेधः
२७४	विष्ण्वादौमहास्नानंपंचामृतस्य	२९२	गृहारम्भःगृहप्रवेशः
२७४	विष्वक्सेनादीनांनैवेद्यादि	२९५	कलिवर्ज्यानि
२७४	पंचायतनस्थापनम्	२९८	अथश्राद्धनिर्णयः
२७५	केशवादिमूर्तीनांलक्षणम्	२९९	श्राद्धलक्षणम्
२७५	लिंगप्रतिष्ठा	२९९	श्राद्धभेदाः
२७५	केशवादिमूर्तीनांप्रतिष्ठा	२९९	घृतश्राद्धम्
२७५	सर्वतोभद्रदेवतास्थापनम्	३००	श्राद्धदेशाः
२८२	पुनःप्रतिष्ठा	३००	गयाश्राद्धम्
२८३	अथजीर्णोद्धारः	३००	गयाशिरःप्रमाणम्
२८४	मूर्तिप्रासादभेदने	३०१	सप्तगोत्राणि
२८४	अथतुलसी ग्रहणम्	३०१	एकोत्तरशतंकुलं
२८५	पुष्पादेःपुर्युषितत्वम्	३०१	श्राद्धेनिषिद्धदेशाः
२८६	शिवनिर्माल्यनिर्णयः	३०२	परगृहेश्राद्धं निषिद्धम्
२८६	तर्पणम्	३०२	श्राद्धकालः
२८७	अथकृषिः	३०२	नवान्नश्राद्धम्
२८९	राजदर्शनम्	३०३	शंखपद्मादियोगः
२८९	श्मश्रुकर्म	३०३	प्रतिकृष्णपक्षश्राद्धम्
२८९	इन्धनसंग्रहः	३०४	व्यातीपातेश्राद्धम्
२९०	नवान्नग्रहणम्	३०४	तिथिविशेषश्राद्धम्
२९०	नवभोजनपात्रमूनवपर्णफलादिल	३०४	नक्षत्रश्राद्धंयोगश्राद्धम्
२९०	क्षणम्	३०४	श्राद्धाधिकारिणः
२९०	होमेआहुतिपातःअत्रशांतिःरुक्ता	३०५	द्वादशपुत्रभेदाः
२९०	ज्वरादौफलम्	३०६	अनुपनीतश्च पुत्रोधिकारी
२९०	अत्रशांतिः	३०६	अपुत्रक्रियादिव्यवस्था
२९१	भेषजम्	३०७	भगिनीतत्सुतयोर्विशेषः
२९१	आरोग्यस्नानम्	३१०	ब्राह्मणस्यान्यक्रियानिषेधः
२९१	दन्तधावनम्	३१०	दत्तक्रीतकृत्रिमपुत्राणांश्राद्धादि
२९१	प्रोषितभर्तृकानियमाः	३१०	पत्न्यादेःसपिण्डनादावधिकारः
१९१	आमलकस्नानम्	३११	सपिण्डनाधिकारिणः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
३११	पुत्रक्रियाकरणेपुत्रादेरनधिकारः	३१९	वर्ज्याविप्राः
३१०	ब्रह्मचारिणः पित्रोःश्राद्धाधिकारः	६२०	लम्बकर्णलक्षणम्
३१२	विभक्तानां भ्रातृणांविचारः	३२१	सप्तविधाषंढाः
३१३	जारजानांविशेषः	३२२	कुष्ठिकाणादेरपवादः
३१३	धर्मार्थश्राद्धकरणे	३२२	गयास्थब्राह्मणः
३१३	गयायामपित्रैव	३२३	विप्रनिमंत्रणम्
३१३	अत्रस्त्रीशूद्राणाममंत्रकंशूद्राणांगो त्राभावेकाश्यपगोत्रम्	३२३	विप्रसंख्या
		३२३	ब्राह्मणाभावेएकोब्राह्मणः
३१४	राजाकार्यनियुक्तादीनांश्राद्धनि र्णयः	३२३	एकविप्रेसाग्नेर्विशेषः
		३२३	ब्राह्मणाभावेचटश्रा०
३१५	यवनादीनांश्राद्धनिर्णयः	३२४	श्राद्धकर्तृभोक्तृनिर्णयः
३१५	इतिश्राद्धाधिकारिणः	३२४	निमंत्रितातिकरणे
३१५	अथपितरः	३२५	गृहीतामन्त्रणत्यागे
३१६	पितृणांश्राद्धार्थंयथाउपतिष्ठति	३२५	श्राद्धभोजनेप्रायश्चितम्
३१६	वसुरुद्रादित्यस्वरूपं	३२६	अमायांनिषिद्धप्रकारः
३१७	ब्राह्मणादि वर्णपरः	३२६	वनस्पतिगतस्वरूपम्
३१७	पितरः	३२६	कर्तृरशक्त्या प्रतिनिधिः
३१७	विश्वेदेवाः	३२६	स्त्रीनियमाः
३१७	श्राद्धेक्रतूदक्षौदेवौ	३२६	पिण्डदानात्प्राक्स्वगृहेबालानांभो जनेनि०
३१७	नांदीमुखश्राद्धेसत्यौ		
३१७	नैमित्तिकेकामकालौ	३२६	अथश्राद्धवस्तूनि
३१८	काम्येधूरिलोचनौ	३२६	तत्रदर्भग्रहणप्रकारः
३१८	पार्वणेपुरूरवार्द्रवौ	३२७	पवित्रदर्भसंख्या
३१८	श्राद्धंत्रिविधम्	३२७	दर्भग्रहणेमन्त्रः
३१८	विश्वेदेवापवादः	३२७	दशदर्भाः
३१८	श्राद्धेविप्राः	२२७	निषिद्धदर्भाः
३१८	द्वयोर्भ्रात्रोरेक श्राद्धेनिषेधः	३२७	सुवर्णपवित्रंश्रेष्ठम्
३१८	श्राद्धभोजनेनिषिद्धम्	३२७	श्राद्धेहविः
३१८	मध्यमाः	३३०	शाकादिवस्तूनि
३१९	अत्रविशेषः	३३०	श्राद्धेमधुमांसग्रहणम्

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
३३०	श्राद्धेमांसनिषेधः	३४२	विभक्तविचारः
३३१	कालदेशाचारतोव्यस्था	३४२	अनुपनीतस्त्रीशूद्रादेरुत्तरीयेणस
३३१	क्षीरादौविशेषमाह	३४२	व्यापसव्यम्
३३२	श्राद्धेवर्ज्यवस्तूनि	३४२	सव्यापसव्यविचारः
३३२	ताम्रपात्रस्थंवर्ज्यक्षीरादि	३४२	आचमनविचारः
३३३	वर्ज्यजलम्	३४२	दानाध्ययनादिवर्ज्यं
३३३	शूद्राहृतंजलंवर्ज्यम्	३४२	पिण्डदानात्प्राक्नैवेद्यः
३३६	श्राद्धेतिलादिकुतुपाः	३४२	विश्वेदेव पितृणांपूजनम्
३३६	दौहित्रलक्षणम्	३४३	दर्भविसर्जनं कतिधा
३३६	श्राद्धदेशवर्ज्यानि	३४३	मन्त्रोहविचारः
३३७	श्राद्धदिनकृत्यं	३४३	वृद्धौविशेषः
३३७	श्राद्धपाकः केनकार्यः	३४३	आपस्तंबानांतु
३३७	श्राद्धेपाकभांडानि	३४४	मंडलादिपाद्यंकर्त्तव्यं
३३८	श्राद्धेपाकाग्निः	३४५	कस्यागैर्गोमयंग्राह्यं
३३८	श्राद्धोपक्रमः	३४५	विप्रानियमाः
३३९	वस्त्रेविशेषः	३४५	आसनानिकीदृशानि
३३९	ऊर्ध्वपुंड्रादिधारणम्	३४७	अर्घ्यपात्रम्
३३९	कर्तृभोक्तृरूर्ध्वपुंड्रनिषेधः	३४७	उत्तमान्यर्घ्यपात्राणि
३४०	गृहेरंगवल्लीनिषेधः	३४७	अधमान्यर्घ्यपात्राणि
३४०	तिलककरणसमये दर्भधारणं निषिद्धम्	३४८	विश्वेदेवावाहने
		३४८	ऊर्ध्वपुंड्रनिषेधः
३४४	श्राद्धारम्भकालः	३४९	तुलसीनिषेधः
३४०	श्राद्धपरिभाषा	३५०	पुष्पाणिग्राह्याणि
३४०	जानुपातनम्	३५०	वर्ज्यानिपुष्पाणि
३४०	गोत्रनामोच्चारः	३५०	उत्तमोधूपः
३४०	सम्बन्धिगोत्रोच्चारणम्	३५०	वर्ज्यधूपाः
३४१	सकारांतोगोत्रोच्चारः	३५०	अथदीपः
३४१	गोत्रापरिज्ञानेकाश्यपं	३५०	वस्त्रम्
३४१	नामोच्चारणेविशेषः	३५०	यज्ञोपवीतम्
३४१	पित्रादिनामाज्ञाने	३५०	दीपिकादिदानम्

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
३५०	स्त्रीश्राद्धे	३६२	अंगुष्ठनिवेशनं
३५१	कमण्डल्वादिदानम्	३६२	आपाशेनं
३५१	स्वर्णादिभोजनपात्रं	३६३	श्राद्धान्नसंकल्पः कुत्रचित्राह्यतिनिषेधः
३५१	बंदीगृहस्थमोचनेफलं	३६३	भोजनेलवणादिनपृच्छेत्
३५१	पित्र्यकाण्डेअर्चा	३६३	अभिश्रवणं
३५१	अथार्घ्यदानम्	३६३	भोक्तृनियमाः
३५२	अर्घ्येसव्यापसव्यम्	३६३	ब्राह्मणप्रार्थना
३५२	अर्घ्यपात्रस्थापनम्	३६४	ब्राह्मणपरस्परस्पर्शे
३५४	मण्डलानिपात्राणिच	३६४	विप्राणांगुदस्रावे
३५५	भाजनेकांस्यापात्रम्	३६४	विप्राणांवमने
३५५	श्राद्धे कांस्यपात्रनिषेधः	३६४	एवंविधे जपःपुनःश्राद्धं च
३५५	श्राद्धभोजनेपवित्रपात्राणि	३६४	तृप्तिप्रश्नः
३५५	कदलीपत्रनिषेधः	३६५	पिण्डदानात्प्राग्वमने
३५५	भस्ममर्यादा	३६५	विकिरं उच्छिष्टपिण्डः
३५५	अग्नौकरणम्	३६७	हस्तप्रक्षालनं गण्डूषकरणं
३५७	पाणिहोमश्राद्धमहालये	३६७	अथपिण्डदानंकुत्रकर्तव्यम्
३५७	तीर्थश्राद्धे पाणिहोमः	३६७	अष्टांगःपिंडः
३५८	विधुरस्यपाणिहोमः	३६८	पिंडेषुमाषावर्ज्याः
३५८	पाणिहोमे प्रश्नादि०	३६८	अथपिंडप्रमाणं
३५८	पित्र्यविप्रकरेहुतंसर्वपितृपात्रेषु निक्षेपः	३६८	एकोद्दिष्टेपिंडप्रमाणं
३६०	आपस्तंबानामग्नौकरणम्	३६८	सपिंडीकरणे पिंडप्रमाणम्
३६१	अथपरिवेषणम्	३६८	प्रत्यब्दोपिंडप्रमाणं
३६१	तत्स्वयं भार्ययाकर्यं	३६८	मासिकेपिंडप्रमाणं
३६१	आयसपात्रनिषेधः पवित्रपात्राणि	३६८	तीर्थेपिंडप्रमाणं
३६१	पंक्त्यां विषमान्नदानं	३६८	दर्शेपिंडप्रमाणं
३६१	भोजनपात्रेतिलपत्रनेनिषिद्धम्	३६८	महालयेपिंडप्रमाणं
३६१	हस्तेनस्नेहलवणादिनदेयं	३६८	पत्न्यापिंडकरणीयः
३६१	वृतपात्रस्थापनं	३६८	पित्रादीनांनामगोत्राज्ञाने
३६१	पात्रालम्भनं	३६८	कथमूहःकार्यः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
३६८	मात्रादीनांपिंडदेशाः	३७७	कुत्रचिदामश्राद्धनिषेधः
३६८	महालयश्राद्धे सर्वेषांपिंडादेयाः	३७८	आमश्राद्धेऊहःकथं
३६९	पश्चिमेदर्भलेपादि	३७८	आमश्राद्धेपिंडाःकथंकर्तव्याः
३६९	पिंडपूजनादि	३७८	आमश्राद्धेनिषिद्धपदार्थाः
३७०	पिंडानांसर्वान्नस्यनैवेद्यः	३७८	आमश्राद्धेशूद्रैःकथंकर्तव्यम्
३७०	उच्छिष्टपात्रचालनम्	३७८	आमश्राद्धे पूर्वाह्णेकथं
३७०	उच्छिष्टपात्राणिकेननिष्कास०	३७८	एकोद्दिष्टंमध्याह्ने
३७१	पिंडप्रवपणंकुत्रकार्यं	३७८	पार्वणमपराह्णे
३७१	पिंडविसर्जनं	३७९	वृद्धिश्राद्धंप्रातः
३७२	पिंडप्रतिपत्तिः	३७९	शूद्राणामपराह्णे
३७२	पिंडोपघातेप्रायश्चित्तम्	३७९	हेमश्राद्धम्
३७३	पिंडनिषेधकालः	३७९	हेमश्राद्धं कस्मिंस्थले
३७३	महालयादौपिंडदानं	३७९	हेमश्राद्धे पिंडाःकथंकार्याः
३७३	क्षयाहेविशेषः	३८०	हेमश्राद्धे पिण्डनिषेधः
३७४	उच्छिष्टोद्वासनं	३८०	हेमश्राद्धनिषिद्धपदार्थाः
३७४	श्राद्धदिनवैश्वदेवादि	३८०	शूद्रवेश्मनि भोजनादि
३७५	अथनित्यश्राद्धम्	३८०	शूद्रग्रहाद्ब्राह्मगृहेणआमंसमागतं
३७५	नित्यकर्मरात्रौकार्यं	३८०	पात्रांतर्गतंदुग्धंशुचिः
३७६	पात्राभावे	३८०	सांकल्पश्राद्धम्
३७६	श्राद्धशेषभोजनंतन्निषेधः	३८०	सांकल्पश्राद्धे किंकार्यं
३७६	विप्रस्य श्राद्धावशेषभोजननिषेधः	३८१	द्रव्याभावेद्विजाभावेअनुकल्पाः
३७६	कुत्रचिच्छ्राद्धावशेषभोजननिषेधः	३८१	अथश्राद्धभोजनेप्रायश्चित्तं
३७६	श्राद्धदिननियमाः	३८२	क्षयाहश्राद्धं तद्रूपंच
३७७	शूद्रस्यश्राद्धान्नशेषंनदेयं	३८२	अकरणेदोषमाह
३७७	इतिपार्वणश्राद्धम्	३८३	तत्रैकोद्दिष्टंपार्वणंच
३७७	श्राद्धानुसंकल्पः	३८३	श्राद्धे देशधर्मावंशधर्माः
३७७	विप्राभावेदर्भबटुः	३८३	अमायां प्रेतपक्षेचेत्क्षयः
३७७	आमश्राद्धं द्विजानां	३८३	संन्यासिनः किंकार्यं
३७७	शूद्रस्यआमश्राद्धम्	३८४	संग्रामेमृतानां कदाश्राद्धं
३७७	आमंकियत्परिमितंदेयं	३८४	ज्येष्ठभ्रात्रोः कनिष्ठेनकथंकार्यं

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
३८४	ज्येष्ठेनकनिष्ठस्यकथं		गमनंभर्तुराशौचम्
३८४	अपुत्रस्यपितृव्यस्यकिं		स्त्रीगमनंचेदनुगमनं
३८४	पत्न्याःकर्तृत्वेप्राप्ते	३९४	देशांतरेभर्तृमरणंश्रुत्वासहगमनं
३८४	अपुत्राणांकिंकार्यम्	३९४	सुवासिनीभोजनम्
३८४	एकोद्दिष्टेकेषांकार्यम्	३९५	अथश्राद्धसम्पातेनिर्णयः
३८५	क्षयाहद्वैधेनिर्णयः	३९६	गृहदाहादिनायुगपन्मरणे
३८५	एकोद्दिष्टेतिथिनिर्णयः	३९६	एकस्मिन्दिने श्राद्धत्रयम्
३८६	पार्वणेतिथिनिर्णयः	३९६	अस्यदेवताभेदेअपवादः
३८६	आब्दिकेतिथिनिर्णयः	३९७	श्राद्धांगतर्पणम्
३८६	मृताहातिक्रमेदोषः	३९७	तिलतर्पणनिषेधकालः
३८६	ग्रहणदिनेश्राद्धप्राप्तौ	३९८	पित्रोर्वार्षिकेनित्यतर्पणेनिषेधः
३८७	अपुत्राणांरात्रौकार्यम्	३९८	श्राद्धदिनेपिनित्यतर्पणम्
३८७	अधिकमासप्राप्तेश्राद्धनिषेधः	३९८	कार्यप्रत्यंजलिमंत्रश्च
३८७	एकादिनेदर्शश्राद्धंक्षयाहश्राद्धंचेन्नि	३९९	अथतर्पणनिषेधः
३८७	वृषोत्सर्गकालः	३९९	अथवृद्धिश्राद्धम्
३८८	अथशुद्धिश्राद्धम्	४०४	अत्राधिकारिणः
३८८	प्रथमवर्षादारभ्यवर्षत्रयपर्यंतंश्र०	४०४	जीवत्पितृकस्यवृद्धिश्राद्धम्
३८८	क्षयाहाज्ञाने	४०५	द्वितीयविवाहे वृद्धि श्राद्धंके
३८८	क्षयेदिनमासाज्ञाने		नकर्तव्यम्
३८९	श्राद्धविघ्नेनिर्णयः	४०६	वृद्धिश्राद्धे इतिकर्तव्यता
३८९	श्राद्धादि प्रारम्भेनदोषः	४०६	वृद्धिश्राद्धे दर्भस्थानेदूर्वाः
३८९	श्राद्धभोजनसमयेदातुराशौचंचेत्	४०६	वृद्धिश्राद्धेविप्राभावे
३९०	दातृभोक्त्रेराशौचंचेत्	४०६	नांदीश्राद्धकरणेक्रमः
३९०	तत्रभोजने प्रायश्चित्तम्	४०८	वैश्वदेवःकदाकर्तव्यः
३९०	आशौचमध्येश्राद्धंचेत्	४०८	जीवत्पितृकश्राद्धम्
३९१	अथभार्यारजोदर्शने	४१०	जीवत्पितृकस्यगयायां
३९२	अन्तरितश्राद्धं	४११	जीवत्पितामहश्राद्धं
३९३	अन्वारोहणनिर्णयः	४१२	विभक्ताविभक्तनिर्णयः
३९३	एकसमयेमृताः स्वामि	४१२	अविभक्तानांवैश्वदेवः
	सेवकास्तुस्त्रीभिः सह	४१३	विभक्तानां वर्षपर्यंतं श्राद्धनिर्णयः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
४१३	अथतीर्थश्राद्धम्	४२५	बाललक्षणं
४१४	विधवायाः पुत्राद्यनुतीर्थयात्रावि०	४२५	कुमारलक्षणं
४१५	यात्रामध्येआशौचेकथम्	४२५	पौगण्डलक्षणं
४१५	यात्रामध्येतीर्थान्तरप्राप्ते	४२५	बालानामनुपनीता-नांचक्रियाविधिः
४१५	वाणिज्यार्थंगतेसति	४२६	चतुर्वर्णेषु दशाहादिमहागुरवः
४१५	मार्गेमहानदीप्राप्तौ	४२७	सपिण्डलक्षणम्
४१५	प्रथमतीर्थेप्राप्ते प्रार्यना	४२७	सोदकलक्षणम्
४१६	तीर्थप्राप्तौ उपवासमुण्डनम्	४२७	गोत्रजलक्षणां
४१६	वर्षमध्ये पुनस्तीर्थप्राप्तौ	४२९	दत्तक्रीतपुत्राणामाशौचं
४१६	जीवपितृकस्यमुंडनं	४२९	व्यभिचारिणीमृतौ
४१६	तीर्थप्राप्तौसूतकंचेत्	४२९	अनौरसेषुपुत्रेषु
४१७	तीर्थश्राद्धे अर्घ्यादिवर्ज्यं	४२९	पुनर्भूषुस्त्रीषुदत्तस्यपूर्वपित्रोः
४१७	पिण्डाः सक्तवादिभिःकार्याः	४२९	दत्तकस्यसापिंडयं
४१७	यतीनांगयायांविशेषः	४२९	परपूर्वा भर्तृपत्न्योः पुत्रयोश्च
४१८	अथजननाशौचं	४३०	ऊढकन्याप्रसवमरणे
४१८	स्नावाशौचं	४३०	श्वशुरमातुलादीनां
४१८	पूर्णाशौवं	४३०	पितृमरणेकन्यानामाशौचं
४१८	जाताशौचेविप्रादीनां	४३१	भ्रातृभगिन्योःकन्यायाःपरस्परम्
४१९	सूतिकायाविशेषःकन्यापुत्रप्रसवे	४३१	मातामहादिमृतौ
४२०	प्रथमषष्ठदशमदिने०	४३१	स्वगृहेपरमृतौ
४२१	अथमृताशौचं	४३१	बन्धुत्रयमृतौ
४२१	दशाहमध्येबालोमृतश्चेत्	४३२	जमातृमृतौश्वशूद्रपतितद्विजगृ
४२२	अदंतमृताशौचंदाहे	४३२	हेमृतौगृहशुद्धिःग्राममध्यशवस्थि०
४२३	शूद्रबालाशौचं	४३३	क्रियाकर्तुर्दशाहादि
४२४	पितृवेश्मनिकन्या अनूढारजस्व०	४३३	युद्धमृतेआशौचं
४२४	अथानुपनीते	४३३	शवस्पर्शेआशौचं
४२४	त्र्यहाशौचेपिण्डदानविधिः	४३३	दंष्ट्रिकाभिर्मृतश्चेत्
४२४	नाम्नःपूर्वखननम्	४३४	निर्हाराद्याशौचम्
४२४	गर्भपातेसति		
४२५	शिशुलक्षणं		

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
४३४	प्रेतालंकरणेकृते	४४२	दशमेहह्नाशौचांतरपाते
४३४	अनाथप्रेतहरणे	४४२	पित्राशौचमध्येमात्राशौचम्
४३५	ब्रह्मचारिणोनिर्हरणे	४४२	अन्वारोहणेविशेषः
४३५	समोत्कृष्टानुगमने	४४३	भर्तुराशौचोत्तरमन्वारोहणेपुत्रज०
४३५	हीनवर्णस्यदाहादौ	४४३	आशौचापवादः
४३५	रोदनेआशौचम्	४४४	अथाशौचापवादः
४३५	आशौचान्नभक्षणे	४४३	पत्यादीनामाशौचाभावः
४३६	दासीदासाशौचम्	४४४	ब्रह्मचारिणे मातापित्रोर्ध्वदेहिकं०
४३६	दास्याविशेषः	४४४	संध्यादिलोपाभावश्च
४३६	दासभेदाःपंचदश	४४५	समावर्तनोत्तरंत्र्यहाशौचम्
४३७	रात्रौजननमरणे	४४५	आपद्गतस्य सूतकाभावः
४३७	अतिक्रांताशौचम्	४४६	आशौचे आकस्मिकतीर्थप्राप्तौ
४३७	देशांतरेअतिक्रांताशौचम्	४४६	सूतकिनः पूजाधिकारः
४३८	दशदिनमध्येश्रुतम्	४४७	श्रौतकर्माणि विशेषः
४३८	दशाहमध्येमासत्रयं	४४८	श्राद्धादौविशेषः
४३८	षण्मासमध्येश्रुतंचेत्	४४८	गृह्याग्निहोमेआशौचेसंध्यदीना०
४३८	नवमासमध्येश्रुतंचेदूर्ध्वंश्रुतंचेत्	४४८	आशौचे सतिग्रहणेश्राद्धम्
४३८	जननेअतिक्रांताशौचंश्रुतंचेत्	४४९	भोजनेआशौचश्रवणे
४३८	देशांतरलक्षणम्	४४९	लवणादिद्रव्येआशौचाभावः
४३८	मातापित्रोर्विशेषः		सत्रेआमान्ने दोषाभावः
४३८	स्त्रीपुत्रयोःपरस्परमाशौचम्	४४९	विवाहेसूतकंचेत्
४३८	सापत्नमातुराशौचं	४४९	पुस्तकशुद्धिः
४३८	आशौचसन्निपाते	४४९	आत्मघाते
४३९	जननेजननाशौचम्	४५०	प्रमादमरणे
४३९	मरणेमरणाशौचम्	४५०	चांडालादिभ्योमरणे
४३९	जननाशौचेमरणाशौचम्	४५०	पतितानां क्रियानास्ति
४४०	मरणाशौचेजननाशौचम्	४५१	आहिताग्नेर्विशेषमाह
४४०	स्वल्पाशौचमध्येदीर्घाशौचम्	४५१	प्रमादमरणे
४४१	दीर्घाशौचमध्ये स्वल्पाशौचम्	४५१	सर्पहतेविशेषः
४४१	जननाशौचस्यगुरुत्वं	४५२	दुर्मरणेदानादि

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
४५२	अवैधमरणे	४६६	कृतघटस्फोटस्यापि पुनःसंस्कारः
४५३	तीर्थमरणे	४६६	पतितानांचरितव्रतानांप्रेत्युद्धारः
४५४	अनशनविधिः	४६७	अथक्रियाविधिः
४५४	पतितानांविशेषः	४६७	तत्राधिकारिणः
४५५	आत्मघातप्रायश्चितम्	४६७	धर्मपुत्रः
४५७	नाराणबलिः	४६७	योग्निदः सदाशाहपर्यंतं
४५७	पतितोदकविधिः	४६७	मोक्षधेनुदानमंत्रः
४५८	नारायणबलिप्रयोगः	४६७	ऋणधेनुदानमंत्रः
४५९	सर्पहतेनागपूजनम्	४६७	पापधेनुदानमंत्रः
४५९	उदकमृतानांविशेषः	४६७	मरणस्यपुण्यकालः
४५९	व्युच्छिन्नसंततेर्विशेषःयुद्धेमृतौ	४६७	वैतरिणीधेनुः
४६०	संन्यासिमृतौसंस्कारः	४६७	उत्क्रांतधेनुः
४६०	अपरोनारायणबलिविधिः	४६७	दशदानानि
४६०	कृतजीवच्छ्राद्धे मृते	४६७	तिलपात्रदानम्
४६०	कृतजीवच्छ्राद्धे जीवति	४६८	मरणसमये पुण्यमंत्रादिश्रवणम्
४६१	आहिताग्नौ प्रोषितेमृते	४६८	अष्टौदानानि
४६१	पालाशविधिरस्थ्नाभावे	४६८	क्रियाकर्तुरधिकारप्राप्तिः
४६१	प्रोषितस्यकालविचारः	४६८	मुमूर्षोर्मधुपर्कदानम्
४६२	प्रोषितसंस्कारेकालः	४६८	दुर्मरणेप्रायश्चित्तम्
४६२	प्रेतसंस्कारेकालः	४६८	अस्पृश्यस्पर्शनेप्रायश्चित्तम्
४६२	आशौचमध्येसंस्कारः	४६९	रात्रौप्रेतदाहनिर्णयः
४६३	अस्यापवादमाह	४६९	रात्रौवपननिषेधः
४६३	निषिद्धकालेदाहेदानानि	४६९	प्रेतस्यवपनक्रिया
४६३	कृतौर्ध्वदेहिकेजीवन्नागच्छेत्	४६९	आशौचांते पुनर्वपनं
४६१	अमृतस्यदाहादि स्त्रीसगमने	४६९	रात्र्युषितेप्रेतेप्राय०
		४६९	साग्नेर्विशेषः
४६४	सर्पसंस्कारेविधिः	४७०	प्रेताधानम्
५६४	नागबलिविधिः	४७०	वृष्ट्यादिनाअग्निनाशे
४६५	घटस्फोटविधिः	४७०	पत्नीपरमणे
४६५	पतितसंस्कारविधिः	४७०	प्रथमायांजीवत्यां

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
४७०	द्वितीयायांमृतायांवैतानाग्निनादाहः	४७८	उत्तरीयाशिलापात्रम्
४७१	दम्पत्योर्मध्ये प्रथममृतस्य वैतानाग्निभिर्दाहः	४७९	कर्तुर्द्रव्यविपर्यये
		४७९	क्रियाकर्तुर्नाशे
४७१	पश्चान्मृतस्यलौकिकाग्निनादाहः	४७९	असंस्कृतानां पिण्डकुत्रदे०
४७१	अपत्नीकस्याधानम्	४७९	येनकेनापिक्रियाकृताचेत्
४७१	विधुरस्याग्निस्तस्यनाशः	४७९	पुत्रादिभिः पुनःकुर्यात्
४७१	ब्रह्मचारिपत्योर्दाहेग्निनाशे	४७९	पिण्डःकेनद्रव्येणकर्तव्यः
४७२	उत्तपनाग्नेर्लक्षणम्	४८०	दशपिण्डैर्देहोत्पतिः
४७२	निषिद्धाग्निः	४८०	दशदिनपर्यंतंपात्रद्वयेउदकंदेयम्
४७२	साग्नेःपात्रन्यासादि	४८०	मृतस्थानेतैलदीपः
४७२	शवनिर्हरणेनियमाः	४८१	ओदनपिण्डोदेयः
४७२	शवनिर्हरणप्रकारः	४८१	दशाहमध्येदर्शश्चेत्
४७३	शवसंस्कारविधिः	४८१	मातापित्रोस्तुविशेषः
४७३	शवेग्निदानमंत्रः	४८२	अथास्थिसंचयनम्
४७४	शवस्यषट्पिण्डदानमु०	४८२	वर्णपरंअस्थिसंचयनम्
४७४	शवस्यस्नानाद्यलंकाराः	४८२	अस्थिसंचयने श्राद्धत्रयम्
४७४	अग्निनाशे	४८२	चतुर्थदिवसेश्मशानयागःतद्विधिश्च
४७४	पर्णशरद्गधेतदेहाला०	४८३	तीर्थेअस्थिक्षेपः
४७४	दम्पत्योरेकदामृतौ	४८३	परस्यास्थिनयनेदोषः
४७५	उदकदानविधिः	४८३	अस्थिक्षेपांगंहेमश्राद्धं
४७५	प्रेतस्नानेविशेषः	४८४	अथास्थिशुद्धिः
४६९	क्लीवादिभिर्नोदकंदेयं	४८४	अथनवश्राद्धम्
४७६	आशौचेनियमाः	४८५	नवश्राद्धाकरणेदोषः
४७७	प्रेतदाहानंतरंगृहेआगत्यकिंकर्त्त०	४८५	अत्रशाखाभेदाद्व्यवस्था
४७७	क्रीतलब्धमन्नं भक्षणीयं	४८५	प्रेतश्राद्धेअष्टादशपदार्थावर्ज्याः
४७७	प्रत्यहंजातिभोजनकार्यम्	४८६	प्रतश्राद्धेअन्नादि
४७८	मृत्युस्थाने प्रत्यहंबलिः	४८६	अन्वारोहणेविशेषः
४७८	नग्नप्रच्छादनश्राद्धदानानि	४८६	आशौचांत्यदिनेकृत्यं दशमदिने
४७८	अथप्रेतपिण्डाः	४८७	एकादशाहः
४७८	वर्णभेदेन पिंडदानसंकल्पः	४८७	विप्रादीनामेतैःपदार्थैःशुद्धिः

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
४८८	आद्यश्राद्ध मेकादशेहनि	५०५	कोकिलमतानुसारिसपिण्डी
४८८	विप्रेगौणकालः	५०५	अपुत्राणां सपिण्डनं तद्विधिः
४८९	अग्नौएकोद्दिष्टं विप्राभावे	५०५	ब्रह्मचारिणा मनपत्यानांस्त्रिया सपिण्डनंकार्यम्
४९०	अथवृषोत्सर्गः	५०६	यतिमृतौपार्वणम्
४९०	नलिवृषभलक्षणम्	५०६	सपिण्डीकरणविधिः
४९०	मृदादिनावृषोत्सर्गः	५०६	ततःपुण्याहवाचनं वृद्धिश्राद्धं च
४९०	पतिपुत्रवत्या स्त्रियान०	५०६	पितृमृतौ प्रथमाब्दे निषिद्धानि
४९१	सूतकाप्राप्तौइदंकर्मक०	५०६	दैवपित्र्यकर्मणिअशुचिः
४९१	पददानंपदलक्षणंच	५०७	संघातमरणे
४९१	शय्यादानम्	५०७	पितुरब्दमाशौचम्
४९२	ललाटास्थि भोजने दोषः	५०७	मातुःषण्मासमाशौचम्
४९२	उदकुम्भदानम्	५०७	भार्यायास्त्रिमासमाशौचम्
४९३	अन्नदानं दीपदानं च	५०८	भ्रातृपुत्रयोःषण्मासं
४९३	अथमासिकानि	५०८	प्रथमाब्दे गयाश्राद्धनिषेधः
४९४	त्रिपुष्करलक्षणम्	५०९	पंचकमृतेविधानम्
४९४	षोडशश्राद्धानि	५०९	त्रिपाट्टक्षमरणे
४९५	ऊनमासिकानि	५१०	पंचरत्ननामानि
४९५	एककालेषोडशश्राद्धानि	५१०	त्रिपाट्टक्षाणि श्मशानाज्जीवनपुनरागमने
४९५	ऊनमासिकानिच	५१०	ब्रह्मचारिमृतौ
४९५	वृद्धिश्राद्धेसतिमासिकापकर्षः	५११	कुष्ठिमृतौ
४९६	अथसपिण्डीकरणम्	५११	कुष्ठिलक्षणान्यष्टौ
४९७	साग्निकनिर०	५११	अष्टौमहारोगाः
४९७	सपिण्डी करणाग्निकयोः	५११	रजस्वलामरणे
४९८	अन्तरितसपिण्डीकरणनक्षत्रम्	५१२	सूतिकामृतौ
४९८	सपिण्डीकरणेअष्टौकालाः	५१२	गर्भिणीमृतौ
४९९	सपिण्डीकरणज्येष्ठस्याधिकारः	५१२	अन्वारोहणे
४९९	वर्षांतेसपिण्डीकरणं	५१३	अन्वारोहणप्रयोगः
४९९	पितरिदेशांतरेमृतेसतिपुत्रैःकिंका	५१३	वायनमंत्रः
५००	सपिण्डीकरणेकनिष्ठस्याधिकारः	५१४	पंचरत्नानि मुखादिस्थाने
५०१	पुनःसपिण्डीकरणं विशेषः	५१४	ततोग्निप्रार्थना
५०२	व्युत्क्रममृतौसपिण्डनेगोत्रादिः	५१४	पृथक्चितिरोहणेनिषेधः
५०२	सपिण्डनाधिकारः	५१५	पृथक्चितिः क्षत्रियस्त्रियाः
५०३	स्त्रीसपिण्डनेविशेषः		
५०५	आसुरादिविवाहे सपिण्डनम्		

पृष्ठम्	विषयाः	पृष्ठम्	विषयाः
५१४	पत्यौदेशांतरमृतेगमनविधिः	५२३	यतीनांषट्कर्माणि
५१४	अस्थिदाहेपलाशदाहे	५२३	यतीनां षट्कर्माणिनिषिद्धानि
५१४	पृथक्चितिदोषः	५२३	अन्यानि पट्बन्धकाराणि
५१५	उदक्या अन्वारोहणं	५२३	यतिपात्राणि
५१५	चितिभ्रष्टायां प्रायश्चित्तम्	५२३	यतीनांनिषिद्धम्
५१५	अन्वारोहणेगर्भिण्यदीनांनिषेधः	५२३	यतीनांपुत्रादिनिधनेआशौचाभाव
५१६	सहगमने रजस्वलाशुद्धिः	५२३	अथयतिसंस्कार
५१६	विधवाधर्माः	५२३	संन्यासग्रहणे फलम्
५१६	विधिवायास्तर्पणवि०	५२३	आतुरसंन्यासः
५१६	वृषारोहणकुंचुकिनि०	५२३	अतुरसंन्यासप्रयोगः
५१६	अथसंन्यासः	५२३	अतुरेअप्सुहोमः
५१७	ब्राह्मणस्याधिकारः	५२३	विरजाहोमंकर्तुमशक्तश्चेदिष्टदे०
५१७	संन्यासश्चतुर्धा	५२३	समाधिसंस्कारादि
५१७	कुटीचकस्तल्लक्षणम्	५२३	कुटीचकस्य दहनम्
५१७	बहूदकस्तल्लक्षणम्	५२३	बहूदकस्यपूरणम्
५१७	त्रिदण्डीतल्लक्षणम्	५२३	हंसस्यजलेनिक्षेपः
५१८	संन्यासविधिः	५२३	परमहंसंपूरयेत्
५१८	तत्रादौप्रायश्चित्तविधिः	५२३	पलाशमूलेनदीतीरेपूरणम्
५१८	अष्टौश्राद्धानि तद्विषयः	५२३	यथास्थानं दण्डादिदानम्
५१८	संन्यासग्रहणेसामग्री	१२३	प्रोक्षणस्नानम्
५१८	पूर्वंनांदीश्राद्धंकार्यं	५२३	शंखेनमस्तकभेदनम्
५१८	साग्नेर्निरग्नेश्चलंन्यासः	५२३	लवणेनगतीपूरणम्
५१९	नवश्राद्धषोडशश्राद्धं	५२४	कुटीचकत्य दहनविधिः
५१९	सपिण्डौनामानि	५२४	अस्थीनांतीर्थेनिक्षेपः
५५९	संन्याससंग्रहणसंकल्पः	५२४	अस्यसूतकाभावः
५१९	ततोऽग्निसिद्धिः	५२४	एकादशेऽहनिपार्वणं
५२०	विरजाहोमादिः	५२४	परमहंसानांपार्वणं
५२१	अथयतिधर्माः	५२४	द्वादशेऽहनिनारायणबलिः
५२२	अथभिक्षा	५२४	वर्षांतेपार्वणश्राद्धं क०
५२२	यतिभिक्षादानेफलमं	इतितृतीयपरिच्छेदस्यानुक्रमणिका ॥	

इतिनिर्णयसिन्धोरनुक्रमणिकासमाप्ता ॥

श्रीगणेशाय नमः ।

॥ अथ निर्णयसिंधुः प्रारभ्यते ॥

कारुण्यैकनिकेतंरामंसीतालतायुक्तम् ॥ विश्वामित्रान्ववायव्रततिसमालंबिशाखिनंवंदे ॥ १ ॥ लक्ष्मीसहायंकल्पद्रुतरलंजितगोकुलम् ॥ बर्हापीडंघनश्यामंमहःकिंचिदुपास्महे ॥ २ ॥ वेदार्थधर्मरक्षायैमायामानुषरूपिणम् ॥ पितामहंहरिंवंदेभट्टनारायणाह्वयम् ॥ ३ ॥ यत्पादसंस्मृतिःसर्वमंगलप्रतिभूर्मता ॥ तान्भट्टरामकृष्णाख्यान्श्रीतातचरणान्नुमः ॥ ४ ॥ सर्वकल्याणसंदोहनिदानंयत्पदद्वयम् ॥ द्युनदीसोदरीमंबामुमाख्यांनौमिसादरम् ॥ ५ ॥ बिंदुमाधवपादाब्जलोलंबीकृतविग्रहम् ॥ ज्यायांसंभ्रातरंभट्टदिवाकरमुपास्महे ॥ ६ ॥ हेमाद्रिमाधवमतेप्रविचार्यसम्यगालोच्यतत्वमथतीर्थकृतांपरेषाम् ॥ श्रीरामकृष्णतनयःकमलाकराख्यःकालेयथामतिविनिर्णयमातनोति ॥ ७ ॥ संतियद्यपिविद्वांसस्तन्निबंधाश्चकोटिशः ॥ तथाप्यमुष्यवैदग्ध्यंकेचिद्विज्ञातुमीशते ॥ ८ ॥ **तत्रसंक्षेपतःकालःषोढा** अब्दोयनमृतुर्मासःपक्षोदिवसइति **तत्राब्दोमाधवमतेपंचधा** सावनःसौरश्चांद्रोनाक्षत्रोबार्हस्पत्यइति गुरोर्मध्यमराशिभोगेनबार्हस्पत्यः सचज्योतिःशास्त्रेप्रसिद्धः हेमाद्रिस्त्वंत्ययोर्धर्मशास्त्रे ऽनुपयोगात्तिस्रएवविधाआह तत्रवक्ष्यमाणैःसावनादिद्वादशमासैस्तत्तदब्दम् मलमासेतुसतिषष्टिदिनात्मकएकोमासइतिद्वादशमासत्वमविरुद्धम् (**तथाचव्यासः**) षष्ट्यातुदिवसैर्मासःकथितोबादरायणैरिति **तत्रचांद्रोब्दःषष्टिभेदः** तदाहगार्ग्यः प्रभवोविभवःशुक्लःप्रमोदोथप्रजापतिः ॥ अंगिराश्रीसुखोभावोयुवाधातेश्वरस्तथा ॥ बहुधान्यःप्रमाथीचविक्रमोऽथवृषस्तथा ॥ चित्रभानुःसुभानुश्चतारणःपार्थिवोव्ययः ॥

सर्वजित्सर्वधारीचविरोधीविकृतिःखरः ॥ नंदनोविजयश्चैवजयोमन्मथदु र्मुखौ ॥ हेमलंबोविलंबोथविकारीशार्वरीप्लवः ॥ शुभकृच्छोभनःक्रोधी वि श्वावसुपराभवौ ॥ प्लवंगःकीलकःसौम्यःसाधारणविरोधकृत् ॥ परिधावीप्र मादीचआनंदोराक्षसोनलः ॥ पिंगलःकालयुक्तश्चसिद्धार्थीरौद्रदुर्मती । दुंदु भीरुधिरोद्गारीरक्ताक्षीक्रोधनःक्षयइति **यद्यपिज्योतिषेगुरोर्मध्यमरा शिभोगेनप्रभवादीनांमाघादौप्रवृत्तिरुक्तातथापिप्रभवादीनांचांद्रत्वम प्यस्ति** चांद्राणांप्रभवादीनांपंचकेपंचकेयुगेइतिमाधवोक्तेः तेनचांद्रःप्रभ वादिश्चैत्रसितेप्रवर्ततेबार्हस्पत्यस्तुमाघादौ । **तयोर्विनियोगोज्योतिर्निबं धेब्रह्मसिद्धांते** व्यावहारिकसंज्ञोऽयंकालःस्मृत्यादिकर्मसु ॥ योज्यःसर्वत्र तत्रापिजैवोवानर्मदोत्तरे ॥ (आर्ष्टिषेणः) स्मरेत्सर्वत्रकर्मादौचांद्रंसंवत्स रंसदा ॥ नान्यंयस्माद्वत्सरादौप्रवृत्तिस्तस्यकीर्तितेति **अयनंतुसौरर्तुत्रया त्मकं** सौरर्तुत्रितयंप्रदिष्टमयनमितिदीपिकोक्तेः तद्द्विविधम् दक्षिणमुत्तरं चेति कर्कसंक्रांतिर्दक्षिणायनं मकरेत्यम् **अनयोर्विनियोगमाहमदनरत्नेस त्यव्रतः** देवतारामवाप्यादिप्रतिष्ठोदङ्मुखेरवौ ॥ दक्षिणाशामुखेकुर्वन्नत त्फलमवाप्नुयात् (वैखानसः) मात्स्यैरववाराहनरसिंहत्रिविक्रमाः ॥ म हिषासुरहंत्र्यश्रस्थाप्यावैदक्षिणायने ॥ वैशब्दोप्यर्थेनतुदक्षिणायनएवेतिनिय मः पूर्ववचनेदक्षिणायनेनिषिद्धायादेवप्रतिष्ठायादेवविषयेप्रतिप्रसवमात्रात् (रत्नमालायाम्) गृहप्रवेशस्त्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वम्॥सौम्या यनेकर्मशुभंविधेयंयद्गर्हितंतत्खलुदक्षिणेचेति (अस्यापवादः काशीखंडे) स दाकृतयुगंचास्तुसदाचास्तूत्तरायणम् ॥ सदामहोदयश्चास्तुकाश्यांनिवसतां सतां ॥ इत्ययनं । **ऋतुर्मासद्वयात्मा** मलमासेतुमासद्वयात्मकएकोमासस्ते न मासद्वयात्मकत्वमविरुद्धम् सद्वेधा चांद्रःसौरश्च चैत्रारंभोवसंतादिश्चांद्रः मीनारंभोमेषारंभोवासौरः मीनमेषयोर्मेषवृषयोर्वावसंतइतिबौधायनोक्तेः(अ नयोर्विनियोगमाहत्रिकांडमंडनः) श्रौतस्मार्तक्रियाःसर्वाःकुर्याच्चांद्रमसर्तुषु॥ तदभावेतुसौरर्तुष्वितिज्योतिर्विदांमतम् ॥ सद्विविधोपि षोढावसंतोग्रीष्मोव

र्षाःशरद्धेमंतःशिशिरइत्यृतुः मासश्चतुर्द्धा सावनःसौरश्चांद्रोनाक्षत्रइतित्रिंश द्दिनःसावनः अर्कसंक्रांतेःसंक्रांत्यवधिःसौरः यद्यपिहेमाद्रिमाधवकालादर्शा द्यालोचनेनमेषसंक्रांत्यासमाप्तामावास्यकत्वं चैत्रत्वमितिलक्षणाच्चमेषसंक्रां तेश्चैत्रत्वंप्रतीयते तथापिमेषसंक्रमेदर्शद्वयेसति वैशाखस्यैवाधिक्यात्तत्पू र्वभावित्वेनर्मानस्यैवचैत्रत्वंयुक्तंएवंमेषादयोवैशाखाः अतोमीनसंक्रान्त्यम ध्यस्यपौर्णमासिकत्वम्आद्यतिथिकत्वंवाचैत्रत्वमितिलक्षणात् मीनएवसौर श्चैत्रः एवंवैशाखादयोपिमेषाद्याज्ञेयाः **सौरमासप्रसंगात्संक्रांतिनिर्णयउ च्यते** तत्रपूर्वतोपिपरतोपिसंक्रमात्पुण्यकालघटिकास्तुषोडशेतिसामान्यतः पुण्यकालःसर्वैरुक्तः विशेषस्तूच्यते अत्रमामकाःसंग्रहश्लोकाः ॥ प्रागूर्ध्वाद शपूर्वतःषडवनिस्तद्वत्परःपूर्वतस्त्रिंशत्षोडशपूर्वतोथपरतःपूर्वाःपराःस्युर्दश॥ पूर्वाःषोडशचोत्तराऋतुभुवःपश्चात्खवेदाःपुनः पूर्वाःषोडशचोत्तराः पुनरथोपु ण्यास्तुमेषादितः अस्यार्थः ॥ मेषेप्रागूर्ध्वंचदशघटिकाःपुण्यकालः वृषेपूर्वाः षोडशमिथुनेपराःषोडशकर्केपूर्वास्त्रिंशत्सिंहेपूर्वाःषोडशकन्यायांपराः षोडश तुलायांप्रागूर्ध्वादशवृश्चिकेपूर्वाःषोडश धनुषिपराः षोडशमकरेचत्वारिंशत्प रा:इदंचहेमाद्रिमतेनोक्तम् माधवमतेत्वत्रपरार्विंशतिः पुण्याःकुंभेपूर्वाःषोडश मीनेपराःषोडशेति याप्युत्तरापुण्यतमामयोक्तासायंभवेत्सायदिसापिपूर्वा ॥ पूर्वातुयोक्तायदिसाविभाते साप्युत्तरारात्रिनिषेधतःस्यात् ॥ अर्वाङ्निशीथा द्यदिसंक्रमःस्यात्पूर्वेह्निपुण्यंपरतःपरेह्नि ॥ आसन्नयामद्वयमेवपुण्यंनिशीथम ध्येतुदिनद्वयंस्यात् ॥ कर्केझषेप्येवमितिह्युवाचहेमाद्रिसूरिश्चतथापरार्कः ॥ झ षप्रदोषेयदिवार्धरात्रेपरेह्निपुण्यंत्वथकर्कटश्चेत् ॥ प्रभातकालेयदिवानिशी थेपूर्वेह्निपुण्यंत्विति माधवार्यः ॥ अत्रमूलवचनानिमाधवापरार्कहेमाद्या दिषुद्रष्टव्यानि **सर्वासुसंक्रांतिषुदानविशेषोहेमाद्रौदानकांडेउक्तः । विश्वामित्रः** मेषसंक्रमणेभानोर्मेषदानंमहाफलं ॥ वृषसंक्रमणेदानंगवांप्रो क्तंतथैवच ॥ वस्त्रान्नपानदानानिमिथुनेविहितानितु ॥ घृतधेनुप्रदानंचकर्क टेपिविशिष्यते ॥ ससुवर्णछत्रदानंसिंहेपिविहितंसदा ॥ कन्याप्रवेशेवस्त्राणांचे

श्मनांदानमेवच ॥ तुलाप्रवेशेतिलानांगोरसानामपीष्टदम् ॥ अन्नकीचलि तेभानौदीपदानंमहाफलम् ॥ अन्नकीवृश्चिकःधनुः प्रवेशेवस्त्राणांयानानांच महाफलम् ॥ झषप्रवेशेदारूणांदानमग्नेस्तथैवच ॥ कुंभप्रवेशेदानंतुगवामं बुतृणस्यच ॥ मीनप्रवेशेस्थानानांमालानामपिचोत्तमंमिते **अत्रोपवास माहहेमाद्रावापस्तंबः** अयनेविषुवेचैवत्रिरात्रोपोषितोनरः ॥ स्नात्वायस्त्व र्चयेद्भानुंसर्वकामफलंलभेत् ॥ **अशक्तौतुवृद्धवसिष्ठः** अयनेसंक्रमेचैवग्र हणेचंद्रसूर्ययोः ॥ अहोरात्रोषितःस्नात्वासर्वपापैःप्रमुच्यते ॥ अत्रोपवासः संक्रमादिने दानादितुपुण्यकालदिनइत्याचार्यचूडामणिः विधिलाघवात्पुण्य कालदिनएवोभयमितिवृद्धाः इदंचपुत्रिगृहस्थातिरिक्तविषयम् ॥ आदित्येह निसंक्रांतौग्रहणेचंद्रसूर्ययोः ॥ उपवासोनकर्तव्यः पुत्रिणागृहिणातथेतिजै मिनिवचनात् **अत्रश्राद्धमुक्तंहेमाद्रौविष्णुधर्मे** श्राद्धंसंक्रमणेभानोःप्रश स्तंपृथिवीपते (अपरार्केपिविष्णुः) आदित्यसंक्रमंचैवविषुवंचायनद्वयम् ॥ व्यतीपातोथजन्मर्क्षंचंद्रसूर्यग्रहस्तथा ॥ इतिकालादर्शोधिकं ॥ जन्मभमभ्यु दयश्च एतांस्तुश्राद्धकालान्वैकाम्यानाहप्रजापतिरिति द्वादशादिदिनैरर्वाग यनांशप्रवृत्तावपिपुण्यंवक्तुमयनग्रहणम् अन्यथासंक्रमणेसिद्धेरयनग्रहणं व्यर्थंस्यादित्यपरार्कः (हेमाद्रावपिगालवः) अयनांशकतुल्येनकालेनैव स्फुटंभवेत् ॥ मृगकर्कादिगेसूर्येयाम्योदगयनेसति ॥ तदासंक्रांतिकालेस्यु रुक्ताविष्णुपदादयइति ॥ अयनांशच्युतिरूपेसंक्रांतिकालेपिविष्णुपदादयः प्रवर्तते तेनतत्प्रयुक्तंपुण्यकालादितत्रापिज्ञेयमितिसएवव्याचख्यौ तच्चमे षायनंवृषायनमित्यादिसर्वत्रज्ञेयं ॥ (माधवीयेपिजाबालिः) संक्रांतिषुय थाकालस्तदीयेष्ययनेतथा ॥ अयनेविंशतिःपूर्वामकरेविंशतिःपरेति ॥ मक रायनेपूर्वाः विंशतिघटिकाःपुण्याःमकरसंक्रांतौतुपश्चाद्विंशतिःपुण्याः अत्राय नेतत्संक्रांतिवदित्यर्थः **विष्णुपदादिस्वरूपंचदीपिकायामुक्तम्** हर्यैर्धिर्वृष सिंहवृश्चिकघटेष्वर्कस्ययःसंक्रमः कन्यामीनधनुर्नृयुक्षुषडशीत्याख्यंतुलामेष योः ॥ प्रोक्तंतद्विषुवंझषेयनमुदक्कर्कांटकेदक्षिणमिति ॥ हर्यैर्धिर्विष्णुपदम् ॥

नृयुक्मिथुनं अत्रचपिंडरहितंश्राद्धंकुर्यात् **तथाचापरार्केमात्स्ये** अयनद्वितयेश्राद्धंविषुवद्वितयेतथा ॥ संक्रांतिषुचसर्वासुपिंडनिर्वपणाद्दतइति॥ श्राद्धंशूलपाणिस्त्वस्यनिर्मूलत्वात्समूलत्वेपि ॥ ततःप्रभृतिसंक्रांतावुपरागादिपर्वसु । त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टंमृताहनि ॥ इतिमात्स्योक्तेर्ग्रहणाग्रहणवद्विकल्पएवेत्याह तन्न **अस्यपार्वणानुवादकत्वेनपिंडविधायकत्वात्पिंडोव्यक्तिः** अन्यथैकपदेपिंडानुवादेत्रित्वविधौचषट्कर्तुः प्रथमपक्षवद्वैरूप्यापत्तेः **तथाचोभयसमूलत्वेपिंडरहितंपार्वणंकर्तव्यमित्युभयवचनयोरर्थः** त्रिपिंडशब्देनैकोद्दिष्टव्यावर्तनमात्रं **मंगलकृत्येषुविशेषमाहज्योतिर्निबंधेनारदः** त्याज्याःसूर्यस्यसंक्रांतेः पूर्वतःपरतस्तथा ॥ विवाहादिषुकार्येषुनाड्यः षोडशषोडशेति ॥ एतत्पुण्यकालोपलक्षणं ॥ भानोःसंक्रांतिभोगश्चकुलिकश्चार्द्धयामकइति ज्योतिःप्रकाशे वर्ज्येषुपरिगणनात् **अयनव्यतिरिक्तासुदशसुसंक्रांतिषुरात्रौस्नानश्राद्धादिनकार्यं** अह्निसंक्रमणेकृत्स्नमहः पुण्यंप्रकीर्त्तितम् ॥ रात्रौसंक्रमणेभानोर्दिनार्धंस्नानदानयोः ॥ ॥ अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरिक्रिया ॥ ऊर्ध्वंसंक्रमणेचोर्ध्वमुदयात्प्रहरद्वयम् ॥ पूर्णेचेदर्धरात्रेतुयदासंक्रमतेरविः । प्राहुर्दिनद्वयंपुण्यंमुक्त्वामकरकर्कटौ ॥ इतिवृद्धवशिष्ठादिवचनैरहः पुण्यत्वोक्त्या रात्रौसंक्रमणेभानोर्दिवाकुर्यात्तुतत्क्रियाम् ॥ पूर्वस्मात्परतोवापिप्रत्यासन्नस्यतत्फलमितिवसिष्ठवचनाच्चार्थाद्रात्रौस्नानादिनिषेधप्रतीतेः यानितु ॥ विवाहव्रतसंक्रांतिप्रतिष्ठाऋतुजन्मसु ॥ तथोपरागपातादौस्नानेदानेनिशाशुभेति ॥ राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु ॥ स्नानदानादिकंकुर्युर्निशिकाम्यव्रतेषुचेत्यादीनिविष्णुगोभिलादिवचनानितानिमकरकर्कसंक्रांतिविषयाणिमुक्त्वामकरकर्कटावितितयोर्दिवानुष्ठानस्यपर्युदस्तत्वादितिहेमाद्रिमाधवादयः वस्तुतस्तुप्रागुक्तवचनेन तयोर्दिनद्वयपुण्यत्वादेरेवपर्युदासान्मकरकर्कटयोरपिस्नानंदानंपरेहनीत्यादिभिरहः पुण्यत्वोक्ते अहः पुण्यत्वानुपपत्त्याकल्परात्रिनिषेधस्यच प्रत्यक्षरात्रिविधिनाबाधात्सर्वसंक्रांतिषुरात्रावनुष्ठानविकल्पः स-

चदेशाचाराद्व्यवतिष्ठतइतियुक्तःपंथाः अयनयोस्तुवक्तव्योविशेषः श्रावणे माघेचवक्ष्यते **ज्योतिर्निबंधेगर्गः** यस्यजन्मर्क्षमासाद्यरविसंक्रमणंभवेत् ॥ तन्मासाभ्यंतरेतस्यवैरक्लेशधनक्षयाः ॥ तगरसरारुहपत्रैरंजनीसिद्धार्थलोध्रसंयुक्तैः ॥ स्नानंजन्मर्क्षगतेरविसंक्रमणेनृणांशुभदम् ॥ हेमाद्रौ ॥ अह्नि चेद्रात्रियुग्मंस्याद्रात्रौचेद्वासरद्वयं ॥ संक्रांतिःपक्षिणीज्ञेयादानाध्ययनकर्मसु ॥ **यत्तुगौडाः** संक्रांत्यांपक्षयोरंतेद्वादश्यांश्राद्धवासरे ॥ सायंसंध्यां नकुर्वीतकुर्वंश्चपितृहाभवेदिति ॥ कर्मोपदेशिन्यांव्यासोक्तेः सायंपुण्यकाले संध्यानिषेधमाहुस्तन्निर्मूलम् अन्यच्चबहुवक्तव्यं विस्तरभीतेर्नोच्यते इतिसंक्रांतिनिर्णयः ॥ पक्षयुगजश्चांद्रोमासः सद्वेधा शुक्लादिरमांतःकृष्णादिःपूर्णिमांतश्चेति **तथाचत्रिकांडमंडनः** चांद्रोपिशुक्लपक्षादिः कृष्णादिर्वेतिचद्विधा ॥ इत्युक्त्वादेशभेदेनतद्व्यवस्थामाह ॥ कृष्णपक्षादिकंमासंनांगीकुर्वंतिकेचन ॥ येपीच्छंतिनतेषामपीष्टोविंध्यस्यदक्षिणेइति ॥ विंध्यस्यदक्षिणेकृष्णादिनिषेधादुत्तरतोद्वयोरभ्यनुज्ञागम्यतेतत्रापिशुक्लादिर्मुख्यः कृष्णादिर्गौणःशास्त्रेषुचैत्रशुक्लप्रतिपदेवचांद्रसंवत्सरारंभोक्तेः तदुक्तं दीपिकायां॥ चांद्रोब्दोमधुशुक्लप्रतिपदारंभइति नहियेकृष्णादिंमन्यंतेतेषांवत्सरारंभोभिद्यते अतःशुक्लादिर्मुख्यः कृष्णादिनामलमासासंभवाच्चंद्रस्यसर्वनक्षत्रभोगेननाक्षत्रोमासः सावनादीनांव्यवस्थोक्ताहेमाद्रौब्रह्मसिद्धांते ॥ अमावास्यापरिच्छिन्नोमासःस्याद्ब्राह्मणस्यतु ॥ संक्रांतिपौर्णिमासीभ्यांतथैवनृपवैश्ययोः **अत्रब्राह्मणादीनांयत्रकर्मविशेषेवचनांतरेण वसंतेब्राह्मणोग्नीनादधीतेत्यादिवन्मासउक्तस्तत्रदर्शांतत्वमात्रंनियम्यते** नतुसर्वकर्मसुदर्शांतएवेतिवृष्ट्याद्यर्थसौभरेहीषादिनिधननियमवद्विधिलाघवात् त्रैवार्णिकानांसर्वकर्मसुमासविशेषविधेः सावनादीनांशूद्रानुलोमादिपरत्वापत्तेश्चेतिगुरुचरणाः (ज्योतिर्गर्गः) सौरोमासोविवाहादौयज्ञादौसावनःस्मृतः ॥ आब्दिकेपितृकार्येचचांद्रोमासःप्रशस्यते (ऋष्यशृंगः) विवाहव्रतयज्ञेषु सौरंमानंप्रशस्यते ॥ पार्वणेत्वष्टकाश्राद्धेचांद्रमिष्टंतथाब्दिके ॥ (स्मृत्यंतरे)

एकोद्दिष्टविवाहादौऋणादौसौरसावनौ (ज्योतिर्गर्गः) आयुर्दायविभाग श्चप्रायश्चित्तक्रियातथा ॥ सावनेनैवकर्त्तव्याशत्रूणांचाप्युपासना (विष्णु-धर्मे) नक्षत्रसत्राण्ययनानिचेंदोर्मासेनकुर्याद्भगणात्मकेनेति (ब्राह्मे) तिथिकृत्येचकृष्णादिव्रतेशुक्लादिमेवच ॥ विवाहादौचसौरादिंमासंकृत्वेविनि र्दिशेत् **अथमलमासः** तत्रैकमात्रसंक्रांतिरहितः सितादिश्चांद्रोमासोम लमासः एकमात्रसंक्रातिराहित्यमसंक्रांतत्त्वेनसंक्रांतिद्वयत्वेनचभवतीतिमल मासोद्वेधा अधिमासः क्षयमासश्चेति (तदुक्तंकाठकगृह्ये) यस्मिन्मासेन संक्रांतिः संक्रांतिद्वयमेववा ॥ मलमासः सविज्ञेयोमासःस्यात्तुत्रयोदशइति ॥ सत्यव्रतोपि राशिद्वयंयत्रमासेसंक्रमेतदिवाकरः ॥ नाधिमासोभवेदेषमलमास स्तुकेवलमिति (अधिकमासस्यकालनियममाहवशिष्ठः) द्वात्रिंशद्भिर्मितै र्मासैर्दिनैःषोडशभिस्तथा॥ घटिकाणांचतुष्केणपतत्यधिकमासकइति ॥ एतच्च सावनादिमानेनसंभवार्थं नतुनियमार्थम्अन्यथाषोडशदिनाधिकद्वात्रिंशन्मा सानंतरंकृष्णपक्षनियमेनशुक्लादित्वभंगापत्तेः तेनन्यूनाधिककालेमलमासपा तेपिनदोषःअतएवोक्तंमाधवीये॥ मासेत्रिंशत्तमेभवेदितिक्षयस्यापिज्योतिः शा स्त्रेअसंक्रांतिमासोधिमासःस्फुटंस्यात् द्विसंक्रांतिमासः क्षयाख्यः कदाचित्॥ क्षयःकार्त्तिकादित्रयेनान्यतःस्यात्तदावर्षमध्येधिमासद्वयंच ॥ एकःक्षयात्पू र्वपरतश्चेकइत्यधिमासद्वयंभवतीत्यर्थः अत्रविशेषमाह (जाबालिः) मास-द्वयेब्दमध्येतुसंक्रांतिर्नयदाभवेत् ॥ प्राकृतस्तत्रपूर्वःस्यादधिमासस्तथोत्तर इति ॥ उत्तरएवकालाधिक्यंनपूर्वस्मिन्नित्यर्थः ॥ यत्तुब्रह्मसिद्धांते ॥ चैत्रा दर्वाङ्नाधिमासःपरतस्त्वधिकोभवेदिति तत्रचैत्रात्पूर्वमसंक्रांतद्वयेपूर्वोनाधि कः किंतुपरइत्यर्थः यच्च ॥ ज्योतिः सिद्धांते ॥ घटकन्यागतेसूर्येवृश्चिकेवाथ धन्विनि ॥ मकरेवाथकुंभेवानाधिमासोविधीयतइति ॥ तद्वृश्चिकादिचतु ष्टयेमलमासेसतिपूर्वम् ॥ तुलाकन्यागतेसूर्येक्षयात्पूर्वकालाधिक्यनिषेधार्थं तत्वधिकमात्रस्यदशानांफाल्गुनादीनांप्रायोमाघस्यचक्वचित् ॥ नपुंसकत्वं भवतीत्येषशास्त्रविनिश्चयइतिहेमाद्रौविष्णुधर्मविरोधात् मलमासेष्टकादिनि

षेधानुपपत्तेश्चमकरेवाथकुंभेवेतिदृष्टांतार्थप्राप्त्यभावाच्च क्षयस्यागमनकालउक्तः (सिद्धांतशिरोमणौ) गतोब्ध्यद्रिनंदैर्गतेशाककालेतिथीशैर्भविष्यत्यथागाक्षसूर्यैः ॥ गजाद्यग्निभूभिस्तथाप्रायशोयंकुवेदेंदुवर्यैः क्वचिद्गोकुभिश्चेति ॥ अब्ध्यश्चत्वारः अद्रयःसप्त नंदाः नव एषांप्रातिलोम्येनपाते ९७४ तैर्मितेवर्षेकश्चित्क्षयमासः पूर्वजातइत्यर्थः तिथयःपंचदश १५ ईशाएकादश ११ १५ एवंमितेयातेकश्चिद्भविष्यतीत्यर्थः अंगा ६ क्ष ५ सूर्याः १२ एकत्र १२५६ गजाः ८ अद्रयः ७ अग्नयः ३ भूः १ एकत्र १३७८ कुः १ वेदाः ४ इंदुः १ एकत्र १४१ गावः ९ कुः १ एकत्र १९ एतैर्मितेवर्षेयातेकश्चिद्भविष्यतीत्यर्थः **अथमलमासेकार्याकार्यनिरूप्यते । तत्रजाबालिः** नित्यनैमित्तिकेकुर्याच्छ्राद्धंकुर्यान्मलिम्लुचे ॥ तिथिनक्षत्रवारोक्तंकाम्यंनैवकदाचन ॥ अयंचकाम्यनिषेधः आरंभसमाप्तिविषयः ॥ असूर्यानामयेमासानतेषु ममसंमताः ॥ व्रतानांचैवयज्ञानामारंभश्चसमापनमिति तेनैवोक्तत्वात्असूर्याअधिमासाइत्यर्थः तत्रमंडलंतपतेरविरितिवचनात्कारीर्यादेः काम्यस्यत्वारंभसमाप्तीभवतएवेत्यादिरस्त्यन्यत्रविस्तरः काठकगृह्येपि मलेऽन्यगतिंकुर्यान्नित्यांनैमित्तिकींक्रियामितितानिनौमित्तिकानिदर्शापिकायामुक्तानि यन्नैमित्तिकमग्निनष्ट्यनुगताग्न्याधानमर्चासुवा संस्काराादिविलोपनेसतिपुनःप्रोक्तंप्रतिष्ठादिकमिति गत्यंतरयुतंतुसोमादिकेयमेवतत्रकर्तव्यान्युक्तानि (कालादर्शे) द्वादशाहंसपिंडांतं कर्मग्रहणजन्मनोः ॥ सीमान्तेपुंसवेश्राद्धंद्वावेतौजातकर्मच ॥ रोगेशांतिरलभ्येच योगेश्राद्धव्रतानिच ॥ प्रायश्चित्तनिमित्तस्य वशात्पूर्वेपरत्रच ॥ अब्दोपकुंभमन्वादिमहालययुगादिषु ॥ श्राद्धंदर्शेप्यहरहःश्राद्धमूनादिमासिकं ॥ मलिम्लुचान्यमासेषुमृतानांश्राद्धमाब्दिकं ॥ श्राद्धन्तुपूर्वदृष्टेषुतीर्थेष्वेवयुगादिषु ॥ मन्वादिषुचयद्दानं दानंदैनंदिनंचयत् तिलगोभूहिरण्यानांसंध्योपासनयोःक्रिया ॥ पर्वहोमश्चाग्रयणंसाग्नेरिष्टिश्च पर्वणि ॥ नित्याग्निहोत्रहोमश्चदेवतातिथिपूजनं ॥ स्नानंचस्नानविधिनाप्यभक्ष्यापेयवर्जनं ॥ तर्पणंवानिमित्तस्य नित्यत्वादुभयत्रचेति ॥ सतौपुंसवनसी

मंतौएतच्चगर्भाधानाद्यन्नप्राशनांतसंस्करोपलक्षणं (तदुक्तंदीपिकायां) गर्भाधानमुखंचचौलविधितः प्राग्जातयागंविना कृच्छ्रेष्वाग्रयणं गजेंद्रपुरतश्छायामधानंगयोः ॥ तीर्थेन्टुक्षययोश्चपित्र्यमधिकेमास्येवमाद्याचरेदितिअलभ्ययोगेऽर्धोदयपद्मकादौकाम्यान्यपि व्रतादीनिकार्याणीत्यर्थः पूर्वेपरत्रमलेशुद्धेचेत्यर्थः महालयशब्देनमघात्रयोदश्युच्यतइतिमाधवः दर्शश्राद्धंमलेपिकार्यं **यत्तुऋष्यशृङ्गः** संवत्सरातिरेकेणमासोयःस्यान्मलिम्लुचः ॥ तस्मिन्त्रयोदशेश्राद्धंनकुर्यादिंदुसंक्षयइति ॥ तत्काम्यदर्शश्राद्धविषयं । काम्यंनैवकदाचनेतिवचनात् । दर्शेचकाम्यंश्राद्धंकन्यांकन्यावेदिनश्चेत्यादिनायाज्ञवल्क्येनोक्तं । नित्यंतुमलेपिभवत्येव । दर्शेप्यहरहः श्राद्धंदानंचप्रतिवासरं ॥ गोभूतिलहिरण्यानांमासेपिस्यान्मलिम्लुचे ॥ इतिमात्स्योक्तेरितिहेमाद्र्यादयः **दिवोदासीयेपि** अनिंदुरिंदुपूर्णाचहरिवारोबुधाष्टमी ॥ नाधिमासेपरित्याज्याःसीमंतान्नाशनेशिशोरिति ॥ अनिंदुर्दर्शः । द्विविधमप्यमाश्राद्धंनकार्यमित्यपरार्कः । अत्रयद्विहितंकर्मउत्तरेमासिकारयेदित्युक्तेः । षष्ट्यातुदिवसैर्मासैरितिशुक्लमासकरणेपिशास्त्रार्थोपपत्तेर्दर्शश्राद्धं मलेनकार्यमितिप्राचीनगौडाः **शूलपाणिश्चसंवत्सरप्रदीपेपि** एकराशिस्थितेसूर्येयदादर्शद्वयंभवेत् ॥ दर्शश्राद्धंतदादौस्यान्नपरत्रमलिम्लुचे ॥ अत्रापिनित्यकाम्यभेदेन प्राग्व्यवस्था । यद्यपिकालादर्शेसर्ववार्षिकंमासद्वयेकार्यमित्युक्तं तथापिहेमाद्रिमाधवापरार्कादिमतात्प्रथमाब्दिकंत्रयोदशेमलमासेद्वितीयाद्याब्दिकंतुशुद्धमासएवकार्यं । असंक्रांतेपिकर्त्तव्यमाब्दिकंप्रथमंद्विजैः ॥ तथैवमासिकंश्राद्धंसपिंडीकरणंतथेतिहारीतोक्तेः । आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे ॥ चतुर्दशेतुसंप्राप्तेकुर्वीतपुनराब्दिकमितिस्मृत्यंतरोक्तेश्चपुनराब्दिकंद्वितीयादिवार्षिकंत्रयोदशेमासेऽतीतेचतुर्दश्याद्यदिनेकुर्यादित्यर्थः **यत्तुसत्यव्रतः** वर्षेवर्षेतुयच्छ्राद्धंमातापित्रोर्मृतेहनि ॥ मलमासेनततत्कार्यंव्याघ्रस्यवचनंयथेति तद्द्वितीयादिवार्षिकविषयम् । आब्दिकंप्रथमंयत्स्यात्तत्कुर्वीतमलिम्लुचे ॥ इतिपूर्वोक्तवचनात् । यत्रद्वादशंमासिकंशुद्धमासेभवतितत्रत्रयोद

शेधिकएवाद्याब्दिकंकार्यं । यत्रत्वधिकमध्येद्वादशंमासिकंतत्रतस्यद्विरावृत्तिं कृत्वाचतुर्दशेशुद्धएवप्रथमाब्दिकमितिनिष्कर्षः **तेनद्वितीयादिशुद्धमास एवंपृथ्वीचंद्रोदयेदिवोदासीयेमदनपारिजातेचैवं** मलमासमृतानांतुयदा सएवाधिकःस्यात्तदातत्रैवकार्यं **यथापैठीनसिः** मलमासमृतानांतुश्राद्धं यत्प्रतिवत्सरम् ॥ मलमासेपिकर्त्तव्यंनान्येषांतुकथंचनेति **हेमाद्रौव्यासो पि** मलमासमृतानांतुसौरंमानंसमाश्रयेत् ॥ सएवदिवसस्तस्यश्राद्धपिंडोद कादिषु ॥ अत्राधिकमृतस्यनद्वितीयाद्यब्देपिसौरविधिः द्वितीयादावन्याधिके यापूर्वनियमविधिवैरूप्यात्किंतुप्रथमाब्दिकस्यमलेनियमात् । सत्यव्रतेनत द्भिन्नस्यसर्वस्याधिकेप्रतिप्रसवमात्रंलाघवात् । अतोनद्वितीयादौसौरमासप्र संगः । चांद्रमिष्टंतथाब्दिके मासपक्षतिथिस्पष्टेइत्यादिविरोधाच्च **यत्तुवृद्ध वशिष्ठः** श्राद्धीयाहनिसंप्राप्तेअधिमासोभवेद्यदि ॥ मासद्वयेपिकुर्वीतश्राद्ध मेवंनमुह्यति **यच्चव्यासःउत्तरेदेवकार्याणिपितृकार्याणिचोभयोरिति** तन्मा सिकादिविषयं ॥ यौगादिकंमासिकंचश्राद्धंचापरपक्षिकं । मन्वादिकंतैर्थिकं चकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः । तैर्थिकंतीर्थश्राद्धंतच्चमासद्वयेपि कार्यमितित्रिस्थलीसेतौभट्टः **केचित्तु** प्रतिमासंमृताहेचश्राद्धंयत्प्रतिवत्स रम् । मन्वादौचयुगादौचतन्मासोरुभयोरपीतिमरीचिवचनात् ॥ वर्षेवर्षेतु यच्छ्राद्धंमातापित्रोर्मृतेहनि ॥ मासद्वयेपितत्कुर्याद्व्याघ्रस्यवचनंयथेतिगाल वोक्तेश्च । प्रत्याब्दिकंमासद्वयेकार्यमित्याहुः तत्तुच्छंप्रतिमासं मृताहेक्रि यमाणंमासिकं । प्रतिसंवत्सरंक्रिकमाणं कल्पादिश्राद्धमितिमरीचिवचसो मदनरत्नेनव्याख्यानात् । गालवीयस्यचमासद्वयात्मकेक्षयमासइतिमाधवेन व्याख्यानात् । यच्चकैश्चिदुक्तम् । प्रथमाब्दिकंमासद्वयेकार्यं । आब्दिकंप्र थमंयत्स्यात्तत्कुर्वीतमलिम्लुचे । त्रयोदशेचसंप्राप्तेकुर्वीतपुनराब्दिकमिति यमोक्तेः तदपिचिंत्यं पुनराब्दिकंद्वितीयादिवार्षिकंत्रयोदशे ऽतीतेचतुर्दशेकु र्यात् । अन्यथा । सांवत्सरंनवर्धेतश्राद्धंतत्रमृतेहनीतिपैठीनसिविरोधःस्यादि ति **हेमाद्रौपृथ्वीचंद्रोदयेच** एतेननवर्धेतनच्छिद्याच्छुद्धेपिकुर्यादेवेत्यनंतभ

द्दव्याख्यामानाभावात्परास्ता पूर्वव्याख्यायांतुहारीतीयेप्रथमग्रहणमवसानं यदपिनिर्णयामृते पूर्वोक्तकालादर्शवचनात् । मलमासेश्राद्धादिनस्यवंध्यत्व निरासार्थंपित्रुद्देशेनब्राह्मणान्भोजयित्वाशुद्धमासेसपिंडकंश्राद्धंकुर्यात्। पिंड वर्जमसंक्रांतेसंक्रांतौपिंडसंयुतं ॥ प्रतिसंवत्सरंश्राद्धमेवंमासद्वयेपिचेतिवृद्धप राशरोक्तेः तदपिचिंत्यम् । पूर्वोक्तवचनस्यक्षयपूर्वभाव्यधिकमासविषयत्वा त् । तत्रहिमासद्वयेश्राद्धमुक्तं **तदाहसत्यतपाः** एकएवयदामासःसंक्रांतिद्व यसंयुतः॥मासद्वयगतंश्राद्धंमलमासेपिशस्यतइति॥ मासद्वयगतंपूर्वासंक्रांति गतंक्षयगतंच। मलमासेक्षयमासे **अपिशब्दात्पूर्वाधिमासेचेतिहेमाद्रिःदी पिकायामपि** तत्प्राक्संग्यधिमासकोयदिभवेत्तत्रत्यसांवत्सरंतस्मिन्छुद्धत याक्षयेचवचनात्कुर्याद्द्वयोःकोविदइति **कालादर्शेप्येतद्विषयएवेत्यलंब हुना । मलमासेवर्जानुक्तानिकालदर्शे** अनित्यमानिमित्तंचदानंचमहदा दिकं ॥ अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणं ॥ देवारामतडागादिप्रतिष्ठा मौंजिबंधनम् ॥ आश्रमस्वीकृतिःकाम्यवृषोत्सर्गश्चनिष्क्रमः ॥ राजाभिषेकः प्रथमश्चूडाकर्मव्रतानिच ॥ अन्नप्राशनमारंभोगृहाणांचप्रवेशनं ॥ स्नानंवि वाहोनामातिपन्नदेवमहोत्सवः ॥ व्रतारंभसमाप्तीचकर्मकाम्यंचपाप्मनाम् ॥ प्रायश्चित्तन्तुसर्वस्यमलमासेविवर्जयेत् ॥ उपाकर्मोत्सर्जनंच पवित्रदमनार्प णम् ॥ अवरोहश्चहैमंतःसर्पाणांबलिरष्टकाः ॥ ईशानस्यबलिर्विष्णोःशयनं परिवर्तनं ॥ दुर्गेन्द्रस्थापनोत्थानेध्वजोत्थानंचवज्रिणः ॥ पूर्वत्रप्रतिषिद्धानि परत्रान्यच्चदैविकमिति ॥ अत्रमूलवचनानिहेमाद्रिमाधवादिभ्योज्ञेयानि **दि वोदासीयेपि** यात्रोत्सवंचदेवादिशपथंदिव्यमेवच ॥ मलमासेनकुर्वीतव्या घस्यवचनंयथेति **अयंनिर्णयःक्षयमासेपिज्ञेयः** रविसंक्रमहीनेयोवर्ज्यावि र्ज्यविधिःस्मृतः॥ सएवतुद्विसंक्रांते मलमासेप्युदीरितइति॥ काठकगृह्योक्तेः **क्षयमासमृतानांप्रत्याब्दिकेविशेषोहेमाद्रौ** तिथ्यर्धेप्रथमेपूर्वोद्वितीयेर्द्धत थोत्तरः॥ मासावितिबुधैश्चित्यौ क्षयमासस्यमध्यगौ ॥ आब्दिकवर्ध्यापनेपिज्ञे यं । यन्मलमासेवर्ज्यमुक्तं तच्छुक्रगुर्वोरस्तादिष्वपिज्ञेयं **तदाहबृहस्पतिः**

बालेवायदिबावृद्धे शुक्रेवास्तंगतेगुरौ ॥ मलमासइवैतानि वर्जयेद्देवदर्शनमिति ॥ अनादिदेवतांदृष्ट्वा शुचःस्युर्नष्टभार्गवे ॥ मलमासेप्यनावृत्ततीर्थयात्रां विवर्जयेत् ॥ आवृततीर्थदोषाभावमात्रं नतुफलमितिवाचस्पतिमिश्राः । तन्न । असतिबाधकेफलहेतुत्वाक्षतेः **लल्लोपि** नीचस्थेवक्रसंस्थेप्यतिचरणगते बालवृद्धास्तगेवा संन्यासोदेवयात्राव्रतनियमविधिः कर्णवेधस्तुदीक्षा॥ मौंजीबंधोंगनानांपरिणयनविधिर्वास्तुदेवप्रतिष्ठा वर्ज्याःसद्भिःप्रयत्नात्त्रिदशपतिगुरौसिंहराशिस्थितेचेति॥दीक्षायागदीक्षाआगमदीक्षाचतथा॥उद्यानचूडाव्रतबंधदीक्षा विवाहयात्राचवधूप्रवेशः ॥ तडागकूपत्रिदशप्रतिष्ठाबृहस्पतौसिंहगतेनकुर्यात् ॥ **दिवोदासीये** गुर्वादित्येगुरौसिंहेनष्टेशुक्रमलिम्लुचे ॥ गृहकर्मव्रतंयात्रांमनसापिनचिंतयेत् **अस्यापवादस्तत्रैवब्राह्मे** मुंडनंचोपवासश्च गौतम्यांसिंहगेगुरौ॥कन्यागतेतुकृष्णायां नतुतत्तीरवासिनां **तथा** आद्यासौगौतमीगंगाद्वितीयाजाह्नवीस्मृता ॥ सर्वतीर्थफलंस्नानाद्गौतम्यांसिंहगेगुरौ **संहिताप्रदीपे** स्यात्सप्तरात्रंगुरुशुक्रयोश्चबालत्वमह्नांदशकंचवार्धम्॥वृद्धौसितेज्यावशुभौशिशुत्वेशस्तौयतस्तावुपचीयमानौ **वसिष्ठः** अतिचारगतेजीवेवर्जयेत्तदनंतरम् ॥ व्रतोद्वाहादिकार्येषुअष्टाविंशतिवासरान् **बाल्यादिलक्षणमुक्तंब्रह्मसिद्धांते** रविणासतिरन्येषांग्रहाणामस्तउच्यते ॥ ततोऽर्वाग्वार्धकंप्रोक्तमूर्ध्वंबाल्यंप्रकीर्तितमिति **बाल्यादिपरिमाणंचवृत्तशते** बालःशुक्रोदिवसदशकंपंचकंचैववृद्धः पश्चादह्नांत्रितयमुदितःपक्षमैंद्र्यांक्रमेण ॥ जीवोवृद्धःशुचिरपितथापक्षमन्यैःशिशूतौवृद्धौप्रोक्तौदिवसदशकंचापरैःसप्तरात्रम् ॥ पश्चिमतउदयेदशदिनानिबालः । अस्तेपंचदिनानिवृद्धः । पूर्वतोदिनत्रयंबालःपक्षंचवृद्धइत्यर्थः । जीवोगुरुः **अन्यत्रत्वन्यथोक्तं** प्राक्पश्चादुदितःशुक्रःपंचसप्तदिनंशिशुः ॥ विपरीतंतुवृद्धत्वंतद्वदेवगुरोरपीति **एषांचपक्षाणांव्यवस्थामाहामिहिरः** बहवोदर्शिताःकालायेबाल्येवार्द्धकेपिवा ॥ ग्राह्यास्तत्राधिकाःशेषादेशभेदादुतापदीति **देशभेदश्चमदनरत्नेगार्ग्यः** शुक्रोगुरुःप्राक्परावृक्बालोविंध्येदशार्वतिषुसप्तरा

त्रम् ॥ वंगेषुहूणेषुचषट्चपंचशेषेचदेशेत्रिदिनंवदंतीति ॥ अस्तादेरपवादः **काशीखंडेनग्रहास्तोदयकृतोदोषोविश्वेश्वरालये** ॥ त्रिस्थलीसेतौवायवीये गोदावर्यांगयायांचश्रीशैलेग्रहणद्वये ॥ सुरासुरगुरूणांचमौढ्यदोषोनविद्यते ॥ ग्रहणद्वयेतन्निमित्तककुरुक्षेत्रयात्रादानादावित्यर्थः । तदाहत्रिस्थलीसेतौलल्लःउपप्लवेशीतलभानुभान्वोरर्धोदयेवैकपिलाख्यषष्ठ्यां ॥ सुरासुरेज्यास्तमयेपितीर्थेयात्राविधिःसंक्रमणेचशस्तः ॥ नमूढदोषोनचरात्रिदोषो नचाधिमासोनमृतिर्नसूतिः ॥ एवमप्युत्तरार्द्धेपठंति । इत्यलंबहुना । **मलमासेचव्रतविशेषउक्तोहेमाद्रौपाद्मे** अधिमासेतुसंप्राप्तेगुडसर्पिर्युतानि च ॥ त्रयस्त्रिंशदपूपानिदातव्यानिदिनेदिने ॥ साज्यानिगुडमिश्राणिअधिमासेनृपोत्तम ॥ अधिमासेतुसंप्राप्तेत्रयस्त्रिंशत्तुदेवताः ॥ उद्दिश्यापूपदानेनपृथ्वीदानफलंलभेत् ॥ त्रयस्त्रिंशदपूपान्नंकांस्यपात्रेनिधायच ॥ सघृतंसहिरण्यंचब्राह्मणायनिवेदयेत् ॥ विष्णुरूपीसहस्रांशुःसर्वपापप्रणाशनः ॥ अपूपान्नप्रदानेनममपापंव्यपोहतु ॥ नारायणजगद्बीजभास्करप्रतिरूपक ॥ वृत्तेनानेनपुत्रांश्चसंपदंचाभिवर्धय ॥ यस्यहस्तेगदाचक्रेगरुडोयस्यवाहनं ॥ शंखःकरतलेयस्यसमेविष्णुःप्रसीदतु ॥ कलाकाष्टादिरूपेणनिमेषघटिकादिना ॥ योवंचयतिभूतानितस्मैकालात्मनेनमः ॥ कुरुक्षेत्रमयंदेशःकालःपर्वद्विजोहरिः ॥ पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम ॥ मलानांचविशुद्ध्यर्थं पापप्रशमनायच ॥ पुत्रपौत्राभिवृध्यर्थंतवदास्यामिभास्कर ॥ मंत्रेणानेनयोदद्यात्त्रयस्त्रिंशदपूपकान् ॥ प्राप्नोतिविपुलांलक्ष्मींपुत्रपौत्रादिसंपदइति ॥ इति निर्णयसिंधौमलमासनिर्णयः । **पक्षनिर्णयस्तु** दैवेमुख्यःशुक्लपक्षः कृष्णः पित्र्येविशिष्यतइतिमाधवेनोक्तः **अथतिथिनिर्णयः** तत्रतिथिर्द्वेधा । शुद्धाविद्धाच । दिनेतिथ्यंतरसंबंधरहिताशुद्धा । तद्रहिताविद्धा **तत्रशुद्धायामसंदेहाद्विद्धानिर्णीयते** तत्रसामान्यतोवेधमाहमाधवीयेपैठीनसिः । पक्षद्वयेपितिथयस्तिथिंपूर्वांतथोत्तराम् ॥ त्रिभिर्मुहूर्तैर्विध्यंतिसामान्योयंविधिःस्मृतइति ॥ हेमाद्रिमदनरत्नादौतुद्विमुहूर्तोप्युक्तः । उदितेदै

वतंभानौपित्र्यंचास्तमितेरवौ ॥ द्विमुहूर्त्तात्रिरह्नश्चसातिथिर्हव्यकव्ययोरि तिविष्णुधर्मोक्तेः द्विमुहूर्त्तत्वंचानुकल्पः द्विमुहूर्त्तापिकर्त्तव्यायातिथिर्वृद्धि गामिनीतिदक्षेणापिशब्दोक्तेः **अयंवेधःप्रातरेव । सायंतुत्रिमुहूर्तोवेध एव** यांतिथिंसमनुप्राप्ययात्यस्तंपद्मिनीपतिः ॥ सातिथिस्तद्दिनेप्रोक्तात्रिमु हूर्त्तेवयाभवेदितिस्कांदोक्तेः दीपिकापि त्रिमुहूर्त्तगातुसकलासायेति । या नितु व्रतोपवासस्नानादौघटिकैकापियाभवेत् ॥ उदयेसातिथिर्ग्राह्याविपरी तातुपैतृका ॥ इत्यादीनिस्कांदादिवचनानितानिवैश्वानराधिकरणन्यायेना वयवस्तुत्यात्रिमुहूर्त्तप्रशंसापराणि । **तिथिविशेषेवेधविशेषःस्कांदे** । ना गोद्वादशनाडीभिर्दिक्पंचदशभिस्तथा ॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिमिति ॥ अयंचोपवासातिरिक्तविषयइतिवक्ष्यतं । इतिवेधः **तत्रसर्वा तिथिर्यदहःकर्मकालव्यापिनीसैवग्राह्या** कर्मणोयस्ययःकालस्तत्का लव्यापिनीतिथिः ॥ तयाकर्माणिकुर्वीतह्रासवृद्धीनकारणमितिविष्णुधर्मोक्तेः **दिनद्वयेतद्व्याप्तावेकदेशव्याप्तौवायुग्मवाक्यान्निर्णयः** तस्यपूर्वाबाधे नोपपत्तेः । कर्मकालस्यप्रधानांगत्वाच्च । युग्मवाक्यंतुनिगमः । युग्माग्नि युगभूतानांषण्मुन्योर्वसुरंध्रयोः ॥ रुद्रेणद्वादशीयुक्ताचतुर्दश्याचपूर्णिमा ॥ प्रतिपद्यप्यमावास्यातिथ्योर्युग्मंमहाफलं ॥ एतद्व्यस्तंमहादोषंहंतिपुण्यंपुरा कृतमिति ॥ अत्ररंध्रांताःशब्दाः द्वितीयादिनवम्यंततिथिवाचकाः रुद्रए कादशीद्वितीयातृतीयायुतासाचद्वितीयायुतेतिसप्तयुग्मानीत्यर्थः । इदंचशु क्लपक्षे । अमाप्रतिपद्युग्मस्यपूर्णिमायाश्चतत्रैवसत्वादितिकेचित् । तत्वंत्व मावास्याप्रतिपद्युग्मात्कृष्णपक्षलिंगात्पक्षद्वयपरमिदंतत्तद्विशेषवाक्यैः कृ ष्णोतिथिविशेषेपोह्यतइति । **दशमीतूक्तापुराणसमुच्चये** संपूर्णेदशमी कार्यामिश्रितापूर्वयाथवेति ॥ **संपूर्णेशुक्लपक्षेत्रयोदशीतुसुमंतुनोक्ता** त्रयो दशीतुकर्त्तव्याद्वादशीसहितामुनेइति । **कृष्णपक्षेत्वास्तंवः** प्रतिपत्स द्वितीयास्यात्द्वितीयाप्रतिपद्युता ॥ चतुर्थीसंयुतायाचसातृतीयाफलप्रदा ॥ पंचमीचप्रकर्त्तव्याषष्ठ्यायुक्तातुनारद ॥ कृष्णपक्षेष्टमीचैवकृष्णपक्षेचतु

र्द्दशी ॥ पूर्वविद्धाप्रकर्त्तव्यापरविद्धानकुत्रचित् ॥ दशमीचप्रकर्त्तव्यास दुर्गाद्विजसत्तम ॥ षष्ठ्यष्टमीअमावास्याकृष्णपक्षेत्रयोदशी ॥ एताःपरयुताः पूज्याः पराः पूर्वेणसंयुताइति ॥ **यत्तु व्याघ्रः** खर्वोदर्पस्तथाहिंसात्रिविधंतिथि लक्षणम् ॥ खर्वदर्पौपरौपूज्यौहिंसास्यात्पूर्वकालिकीति ॥ खर्वःसाम्यम् । दर्पोवृद्धिः। तयोःपराहिंसाक्षयस्तत्रपूर्वेत्र्यर्यः। एतच्छ्राद्धादिविषयम्।द्वितीया दिषुयुग्मानांपूज्यतानियमादिषु ॥ एकोद्दिष्टादिवृध्यादौह्रासवृध्यादिचोदने तिव्यासोक्तेः ॥ नियमादिषुव्रतदानादिकर्मसु । एकोद्दिष्टादितिथेर्वृध्यादावि त्यर्थः कर्मकालव्याप्त्यभावेतुकर्मोपक्रमकालगैवग्राह्या॥ कर्मोपक्रमकालगा तुकृतिभिर्ग्राह्यानयुग्मादरइतिदीपिकोक्तेः। यानितु यांतिथिंसमनुप्राप्योदयं यातिभास्करः ॥ सातिथिः सकलाज्ञेयादानाध्ययनकर्मसु ॥ इत्यादीनितानि त्रिमूहूर्त्तादिस्तुतिरितिनिर्णयशैली **अथैकभक्तंतत्कालः पाद्मे** मध्याह्न व्यापिनीग्राह्याएकभक्तेसदातिथिरिति **मध्याह्नश्चपंचधाविवभक्तादिनतृ तीयांशः** तेनयद्यपिद्वादशदंडानंतरंप्राप्यतेतथापि दिनार्धसमयेतीतेभुज्य तेनियमेनयत् ॥ एकभक्तमितिप्रोक्तमतस्तत्स्याद्दिवैवहीतिस्कांदोक्तेः । षो डशसप्तदशादिदंडामुख्यःकालः **दीपिकायांतु** मध्याह्नांत्यदलेत्रिभागदि वसेस्यादेकभक्तमिति । ततःसूर्यास्तपर्यंतंगौणः । दिवैवहीत्यस्यवैयर्थ्यांप त्यैतत्परत्वात्अत्रपूर्वेद्युर्व्याप्तिःपरेद्युरुभयेद्युर्व्याप्तिस्तदभावोंशव्याप्तिस्तत्रा पिसाम्यंवैषम्यंचेतिषट्पक्षाः। तत्राद्ययोरसंदेहएवतृतीयेतुपूर्वेह्निगौणमुख्यप्रा प्तेःसत्वात्पूर्वेतिमाधवः । युग्मवाक्यान्निर्णयइतिहेमाद्रिः । चतुर्थपक्षेपूर्वे वगौणकालव्याप्तेःसत्वात् । वैषम्येणांशव्याप्तौयाधिकासाग्राह्या । सौम्येपू र्वाअयंचस्वतंत्रैकभक्तनिर्णयः । अन्यांगेउपवासप्रतिषेधस्तदनुसारेणनिर्ण यः **अथनक्तं** तच्चदिनानशनपूर्वरात्रिभोजनं । तत्रप्रदोषव्यापिनीग्राह्या । प्रदोषव्यापिनीग्राह्यातिथिर्नक्तव्रतेसदेतिवत्सोक्तेः **प्रदोषस्तु** त्रिमुहूर्त प्रदोषःस्याद्भानावस्तंगतेसति ॥ नक्तंतत्रतुकर्त्तव्यमितिशास्त्रविनिश्चयइति मदनरत्नेव्यासोक्तेः । तत्रापिदंडोत्तरंकार्यसायंसंध्यात्रिघटिकाअस्तादुपरि

भास्वतइति **स्कांदोक्तेर्दंडत्रयस्यसंध्यात्वात्तत्र** चत्वारीमानिकर्माणिसंध्यायांपरिवर्जयेत् आहारंमैथुनंनिद्रास्वाध्यायंचचतुर्थकमिति॥मार्कंडेयेनभोजननिषेधात् मुहूर्त्तोनंदिनंनक्तं प्रवदंतिमनीषिणः ॥ नक्षत्रदर्शनान्नक्तमहंमन्येगणधिपेतिमाधवीयेभविष्योक्तेश्च ॥ गौडास्तु॥ प्रदोषोस्तमयादूर्ध्वंघटिकाद्वयमिष्यतइति वत्सोक्तःप्रदोषः **संध्याचदिनरात्र्योःसंधौ मुहूर्त्तः** अर्धास्तमयासंध्याव्यक्तीभूतानतारकायावत्॥तेजःपरिहानिवशान्नारोर्धोदयंयावदितिवराहोक्तेरित्याहुः॥ तन्न अस्यसंध्यावंदनानध्यायादिपरत्वात्। अतएवतत्रखंडमंडलस्यसंध्यात्वमुक्तं विज्ञानेश्वरेण **यच्चमदनरत्ने** नक्तस्यवैधत्वाद्रागप्राप्तभोजनगोचरोनिषेधइत्युक्तं।तन्न।**विधेर्निषेधाविरोधात्अन्यथाकपिंजलानित्यत्रात्रिभ्योधिकानांहिंसनंस्यात्** सायंकालेनक्तन्तुदिनद्वयेप्रदोषस्पर्शेज्ञेयं **अतयात्वेपरत्रस्यादस्तादर्वाग्यतोहिसेतिजाबालिवचनात्** प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते॥आत्मनोद्विगुणाच्छायामंदीभवतिभास्करे ॥ तन्नक्तंनक्तमित्याहुर्ननक्तन्निशिभोजनमिति स्कांदाच्च। **यत्यादीनामपिसायाह्ने** नक्तन्निशायांकुर्वीतगृहस्थोविधिसंयुतः॥यतिश्चविधवाचैवकुर्यात्तत्सदिवाकरमितितत्रैवस्मृत्यंतरात् । इदमपुत्रविधुरोपलक्षणं। पुत्रवतस्तुरात्रावेव ॥ अनाश्रमोप्याश्रमीस्यादपत्नीकोपिपुत्रवानितिसंग्रहोक्तेः ॥ **सौरनक्तन्तुदिवैव** त्रिमुहुर्तस्पृगेवाह्निनिशिचैतावतीतिथिः ॥ तस्यांसौरंभवेन्नक्तमहन्येवतुभोजनमितिसुमंतूक्तेः **हारिनक्तंविशेषःकालादर्शेस्कांदे** उदयस्थासदापूज्याहारिनक्तव्रतेतिथिरिति ॥ अन्यनक्तन्तुसंक्रांत्यादावपिरात्रावेवानिषेधस्यरागप्राप्तंभोजनगोचरत्वेनवैधाबाधकत्वात् । दिनद्वयव्याप्तौपरा । उभयोर्यदिवातिथ्योः प्रदोषव्यापिनीतिथिः ॥ तत्रोक्तरत्रनक्तंस्यादुभयत्रापिसायतइति ॥ कालादर्शेजाबालिवचनात् । अन्यपक्षेषुएकभक्तवन्निर्णयः **अत्रविशेषोमदनरत्नेगारुडे** हविष्यभोजनंस्नानंसत्यमाहारलाघवं ॥ अग्निकार्यमधःशय्यांनक्तभोजीषडाचरेत्॥ अग्निकार्यव्याहृतिहोमः । इतिनक्तं **अयाचितेतुविशेषवचनाभावात्पक्षेउपवासेप्रा**

मेउपवासबनिर्णयः । अथनक्षत्रव्रतकालनिर्णयः विष्णुधर्मे उपोषितव्यं नक्षत्रंयस्मिन्नस्तमियाद्रविः ॥ युज्यतेयत्रवातारानिशीथेशनिनासहेति **मा धवीयेस्कांदे** तत्रैवोपवसेद्दक्षेयन्निशीथादधोभवेत् ॥ उपवासेयद्दक्षंस्यात्तद्धि नक्तैकभक्तयोः **अथव्रतपरिभाषा तत्राधिकारिणोमदनरत्नेभविष्ये** अ नग्नयस्तुयेविप्रास्तेषांश्रेयोविधीयते ॥ व्रतोपवासनियमैर्नानादानैस्तथानृप **अनग्निग्रहणमुपवासविषयम् अतएवदेवलः** आहिताग्निनरनड्वांश्चब्र ह्मचारीचतेत्रयः ॥ अश्नंतएवसिद्ध्यंतिनैषांसिद्धिरनश्नताम् ॥ एकादश्या दौतुवचनाद्भवतीतिवक्ष्यामः **शूद्रस्याप्यधिकारः** शूद्रोवर्णश्चतुर्थोपिवर्ण त्वाद्धर्ममर्हति ॥ वेदमन्त्रस्वधास्वाहावषट्कारादिभिर्विनेतिव्यासोक्तेः ॥ प्रा च्यास्तु वैश्यशूद्रयोर्द्विरात्राधिकोपवासनिषेधः । वैश्याःशूद्राश्चयेमोहादुपवा संप्रकुर्वते ॥ त्रिरात्रंपंचरात्रंवातेषांव्युष्टिर्नविद्यते ॥ चतुर्थभक्तक्षपणंवैश्येशू द्रेविधीयते ॥ त्रिरात्रंतुनधर्मज्ञैर्विहितंब्रह्मवादिभिरिति ॥ हेमाद्रौवचनादि त्याहुः । यावदुक्तनिषेधइत्यन्ये । तत्त्वंतुनिर्मूलमितिप्रकरणान्महातपोविषय इतियुक्तम् एवंस्त्रीणामपि यत्तुस्कांदे नास्तिस्त्रीणांपृथग्यज्ञोनव्रतंनाप्युपोष णम् ॥ भर्तृशुश्रूषयैवैतालोकानिष्टान्व्रजंतिहि ॥ यद्देवेभ्योयच्चपित्रादिके भ्यः कुर्याद्भर्ताभ्यर्चनंसत्क्रियांच ॥ तस्यार्धवैसाफलंनान्यचित्तानारीभुंक्ते भर्तृशुश्रूषयैव **आदित्यपुराणे** नारीखल्वननुज्ञाताभर्त्रावापिसुतेनवा ॥ विफलंतद्भवेत्तस्यायत्करोत्यौर्ध्वदेहिकमिति ॥ और्ध्वदेहिकंपारलौकिकंतद्भ र्त्राननुज्ञाविषयम् । भार्यापत्युर्मृतेनैवव्रतादीनाचरेत्सदेतिकात्यायनोक्तेः **अत्रविशेषोहरिवंशे** स्नानंचकार्यंशिरसस्ततःफलमवाप्नुयात् स्नात्वास्त्री प्रातरुत्थायपतिंविज्ञापयेत्सती **तथा** गृहीत्वौदुंबरंपात्रंसकुशंसाक्षतंतथा ॥ गोशृङ्गोन्दक्षिणांसिंच्यप्रगृह्णीयाच्चतज्जलम् औदुम्बरंताम्रमयम् ॥ ततोभ र्तुःसतीदद्यात्स्नातस्यप्रयतस्यच ॥ आत्मनश्चाभिषेक्तव्यंततःशिरसितज्ज लम् ॥ उपवासेषुकर्त्तव्यमेतद्धिव्रतकेषुचेति॥**सर्वव्रतेषुसंकल्पविधिश्चभार ते** गृहीत्वौदुंबरंपात्रं वारिपूर्णमुदङ्मुखः ॥ उपवासंतुगृह्णीयाद्यद्वासंक

ल्पयेद्बुधः ॥ हस्तेनैवेत्यर्थः **अत्रव्रतारंभकालः मदनरत्नेगार्ग्यः** अस्त गेचगुरौशुक्रेबालेवृद्धेमलिम्लुचे ॥ उद्यापनमुपारंभंव्रतानांनैवकारयेत् ॥ **रत्नमालायां** सोमसौम्यगुरुशुक्रवासराःसर्वकर्मसुभवंतिसिद्धिदाः ॥ भानु भौमशनिवासरेषुच प्रोक्तमेवखलुकर्मसिद्ध्यति **तथा** विरुद्धसंज्ञाइहयेच योगास्तेषामनिष्टःखलुपादआद्यः ॥ सवैधृतिस्तुव्यतिपातनामासर्वोप्यरिष्टः परिघस्यचार्द्धम् ॥ तिस्रस्तुयोगेप्रथमेसवज्रेव्याघातसंज्ञेनवपंचशूले ॥ गंडेऽति गंडेचषडेवनाड्यःशुभेषुकार्येषुविवर्जनीयाः **संग्रहे** कृष्णेभिदिशयोरूर्ध्वसप्त मीभूतयोरधःशुक्लेवेदेशयोरूर्ध्वभद्राप्राग्वसुपूर्णयोः **श्रीपतिः** नसिद्धिमा यातिकृतंचविष्टयांविषारिघातादिकमत्रसिद्धम् **व्यवहारसमुच्चये** दशम्या मष्टम्यांप्रथमघटिकापंचकपरंहरिद्युःसप्तम्यांद्विदशघटिकांतेत्रिघटिकं ॥ तृ तीयाराकायांखयमघटिकाभ्यःपरभवंशुभंविष्टेःपुच्छंशिवतिथिचतुर्थ्योस्तुविर मे **तत्रैव** सर्पिणीतुसितेपक्षेकृष्णेचैवतुवृश्चिकी ॥ सर्पिण्यास्तुमुखंत्याज्यंवृ श्चिक्याःपुच्छमेवच **माधवीये** विष्टिर्यदाहनितिथेरपरार्द्धजातापूर्वार्द्धजा निशितदाशुभदाचपुच्छे **ब्रह्मयामले** दिनभद्रायदारात्रौरात्रिभद्रायदादि वा ॥ नत्याज्याशुभकार्येषुप्राहुरेवंपुरातनाः **श्रीपतिः** षट्पौष्णतोद्वादश शांकराच्चपौरंदराद्भानिनवक्रमेण ॥ पूर्वार्द्धमध्यापरभागयुंजिचिरंतनंज्योति षिकैःस्मृतानि **व्रतारंभेचविशेषःमदनरत्नेसत्यव्रतेनोक्तः** उदयस्थाति थिर्याहिनभवेद्दिनमध्यभाक् ॥ साखंडानव्रतानांस्यादारंभश्चसमापनमिति । **देवलः** अभुक्त्वा प्रातराहारंस्नात्वाचम्यसमाहितः ॥ सूर्यायदेवताभ्यश्चनि वेद्यव्रतमाचरेत् ॥ **मदनरत्नेभविष्ये** क्षमासत्यंदयादानंशौचमिंद्रियनिग्र हः ॥ देवपूजाग्निहवनंसंतोषःस्तेयवर्जनं ॥ सर्वव्रतेष्वयंधर्मःसामान्योदश धास्मृतः ॥ अग्निहोमस्तद्दैवत्यः । व्याहृतिहोमोवेतिवर्धमानः । यत्तुतेनोक्त म्सर्वपदमेतत्पुराणोक्तप्रकृतव्रतपरम् । व्रतांतरेतुविध्यंतरसत्वेहोमोऽन्यथा न । अतएवैकादश्यांशिष्टानांहोमानाचरणमिति । तन्न । जपोहोमश्चेतिव क्ष्यमाणैकवाक्यत्वेनास्यकाम्यव्रतसमाप्तिपरत्वात् । तत्वंतुसाप्तदश्यस्यपशु

मित्रविंदादिप्रकरणस्थेनेवतत्तद्व्रतविशेषहोमविधिभिरस्योपसंहारइति॥**विष्णुधर्मे** ॥ तज्जप्यजपनंध्यानंतत्कथाश्रवणादिकम् ॥ तदर्चनंचतन्नामकीर्त्तनश्रवणादयः ॥ उपवासकृतामेतेगुणाःप्रोक्तामनीषिभिः ॥ **कौर्मे** ॥ बहिर्ग्रामांत्यजान्सूतिंपतितंच रजस्वलाम् ॥ नस्पृशेन्नाभिभाषेतनेक्षे तव्रतवासरे ॥ **पृथ्वीचंद्रोदयेअग्निपुराणे** ॥ स्नात्वाव्रतवतासर्वव्रतेषुव्रतमूर्त्तयः ॥ पूज्यासुवर्णमय्याद्याःशक्त्यावैभूमिशायिना ॥ जपोहोमश्चसामान्यंव्रतांतेदानमेवच ॥ चतुर्विंशद्दादशवापंचवाव्रतएवच ॥ विप्राभोज्यायथाशक्तितेभ्योदद्याच्चदक्षिणाम् ॥ अत्रविप्राइतिपुल्लिंगनिर्देशात्पुमांसएवभोज्याः । नतुस्त्रियः **एवंसहस्रभोजनादावपि** विरूपैकदेशस्य प्रमाणांतरंविनायुक्तत्वात् **अतएवद्वयोर्यजमानयोःप्रतिपदंकुर्यात्** बहुभ्योयजमानेभ्यइत्यादौविरूपैकशेषायोगात् । पत्न्यभिप्रायंद्वित्वंबहुत्वंवानसंभवतीत्युक्तमाचार्यैः । पार्थसारथिनाच । एतेनैकस्यब्राह्मणस्यावृत्त्याभोजनंपरास्तंबहुत्वस्यैकपदश्रुत्याब्राह्मणान्वितत्वेन भोजनान्वयाभावादित्यन्यत्राविस्तरःशूद्रस्यतुप्रतिष्ठादिवद्विप्रहाराव्याहृतिहोमइतिवर्धमानः व्रतमूर्त्तयोव्रतदेवताप्रतिमाः **प्रतिमास्वरूपंपंचमदनरत्नेभविष्ये** अनुक्तद्रव्यतत्संख्यादेवताप्रतिमानृप ॥ सौवर्णीराजतीताम्रीवृक्षजामार्तिकीतथा ॥ चित्रजापिष्टलेखोत्थानिजाधित्तानुरूपतः ॥ आमाषात्पलपर्यंतं कर्त्तव्याशाठ्यवर्जितैः **तत्रैवब्राह्मे** आज्यंद्रव्यमनादेशेजुहोतिषुविधीयते ॥ मंत्रस्यदेवतायाश्च प्रजापतिरितिस्थितिः । मंत्रानुक्तो समस्तव्याहृतिरूपोमंत्रः प्रजापतिश्चदेवतेतिकल्पतरुः । **वर्द्धमानधृतदेवीपुराणे** होमोग्रहादिपूजायांशतमष्टाधिकंभवेत् ॥ अष्टाविंशतिरष्टौवा यथाप्राप्तिविधीयते **मदनरत्ने** अनुक्तसंख्यायत्रस्याच्छतमष्टोत्तरंस्मृतम् **वर्द्धमानधृतवृद्धशातातपः** उपवासंद्विजःकृत्वा ततोब्राह्मणभोजनम् ॥ कुर्यात्तेनास्यसगुण उपवासोऽभिजायते **व्रतोद्यापनानुक्तौ पृथ्वीचंद्रोयेनंदिपुराणे** कुर्यादुद्यापनंतस्यसमासौयदुदीरितम् ॥ उद्यापनंविनाययत्तुतद्व्रतंनिष्फलंभवेत्॥यदिचोद्या

पनंनोक्तंव्रतानुगुणतश्चरेत् ॥ वित्तानुसारतोदद्यादनुक्तोद्यापनेव्रते ॥ गा-श्चैवकांचनंदद्याद्व्रतस्यपरिपूर्त्तये **अशक्तौनारदीये** सर्वेषामप्यलाभेतुय थोक्तकरणंविना ॥ विप्रवाक्यंस्मृतंशुद्धंव्रतस्यपरिपूर्त्तये ॥ यथाविप्रवचोयस्तु गृह्णातिमनुजःशुभम् ॥ अदत्वादक्षिणांपापःसयातिनरकंध्रुवम् ॥ **भारते** वेदोपनिषदंचैवसर्वकर्मसुदक्षिणा ॥ सर्वत्रतूभयोद्दिष्टा भूमिर्गावोथकांचनम् **वैजवापः** शिवनेत्रोद्भवंयस्माद्रजतंपितृवल्लभम् ॥ अमंगलंतद्यत्नेनदेवका र्येषुवर्जयेत् **टोडरानंददेवीपुराणे** व्रतेचतीर्थेऽध्ययनेश्राद्धेपिचविशेषतः ॥ परान्नभोजनाद्देवियस्यान्नंतस्यतत्फलम् ॥ **पृथ्वीचंद्रोदयेअग्निपुराणे** नित्यस्नायीमिताहारोगुरुदेवद्विजार्चकः ॥ क्षारंक्षौरंचलवणंमधुमांसंचवर्जयेत् ॥ **क्षारास्तुतत्रैवोक्ताः** । तिलमुद्गादतेशैब्यं सस्येगोधूमकोद्रवौ ॥ धान्यकंदेवधान्यंचशमीधान्यंतथैक्षवम् ॥ स्विन्नधान्यंतथापुण्यंमूलंक्षार गणःस्मृतः ॥ **गोधूमानांतुतत्रैवप्रतिप्रसवः** व्रीहिषष्टिकमुद्गाश्चकलापः सतिलंपयः ॥ श्यामाकाश्चैवनीवारागोधूमाद्याव्रतेहिताः ॥ कूष्मांडा लाबुवार्त्ताकपालंकीज्योत्स्निकास्त्यजेत् ॥ चतुर्भैक्षंसक्तुकणः शाकंद धिघृतंमधु ॥ श्यामाकाः शालिनीवारायावकंमूलतंदुलम् ॥ हविष्यव्रतन क्तादावग्निकार्यादिकेहितं ॥ मधुमांसंविहायान्यव्रतेवाहितमीरितमिति ॥ शमीधान्यंमाषादि । पालंकीमध्यदेशेपोईइतिप्रसिद्धः ॥ ज्योत्स्निकाकोशा तकी । **मिताक्षरायांगौतमः** । चतुर्भैक्षसक्तुकणयावकशाकपयोदधि घृतमूलफलोदकानिहवींष्युत्तरोत्तरंप्रशस्तानि पयोदधिघृतंचगव्यमिति । अन्येचविशेषाएकादशीचातुर्मास्यादिप्रकरणेवक्ष्यंते **गृहीतव्रतत्यागेतुम दनरत्नेछागलेयः** । पूर्वंव्रतंगृहीत्वायोनचरेत्काममोहितः ॥ जीवन्भव तिचांडालोमृतःश्वाचाभिजायते **तत्रप्रायश्चित्तमुक्तंपृथ्वीचंद्रोदयेअग्नि गारुडपुराणयोः** । क्रोधात्प्रमादाल्लोभाद्व्रतभंगोभवेद्यदि ॥ दिनत्र यंनभुंजीतमुंडनंशिरसोथवेति ॥ प्रायश्चित्तान्नानादतिक्रांतव्रतानुष्ठानंना स्तीतिगम्यते **यत्तु** प्रायश्चित्तंततःकृत्वापुनरेवव्रतीभवेदितिवचनात् ।

यच्चातिक्रांतमपिव्रतंकार्यमेवेतिशूलपाणिः । तन्मध्येलोपेव्रतशेषसत्वेज्ञेयं । एतच्चशक्तविषयं **अशक्तौतुकालहेमाद्रौपुराणांतरे** । उपवासासमर्थश्चेदेकंविप्रंतुभोजयेत् ॥ तावद्भनादिवादद्याद्भुक्तस्यद्विगुणंतथा ॥ भुक्तःकृतभोजनः । ब्राह्मणभोजनंविनेतिशेषः । सहस्रसंमितांदेवींजपेद्वाप्राणसंयमान् ॥ कुर्यात्द्वादशसंख्याकान्यथाशक्त्यातुरोनरइति **शुद्धितत्त्वेमात्स्ये** उपवासेष्वशक्तानांनक्तंभोजनमिष्यते **मदनरत्नेवायवीये** द्रव्यदातोपवासस्यफलंप्राप्नोत्यसंशयम् **तथापरार्केदेवलः** ब्रह्मचर्यंतथाशौचंसत्यमामिषवर्जनम् ॥ व्रतेष्वेतानिचत्वारिवरिष्ठानीतिनिश्चयः ॥ **मात्स्ये** तस्मात्कृतोपवासेनस्नानमभ्यंगपूर्वकम् ॥ वर्जनीयंप्रयत्नेनरूपघ्नं तत्परंनृप ॥ अन्येचनियमास्तत्रतत्रान्वेषणीयाः **अथस्त्रीव्रतेषुविशेषउच्यते** तत्रहेमाद्रौव्रतकांडेगारुडे गंधालंकारतांबूलपुष्पमालानुलेपनम् ॥ उपवासेनदुष्यंतिदन्तधावनमंजनमिति **इंदचसभर्तृकोपवासविषयम्** अंजनंचसतांबूलंकुंकुमंरक्तवाससी ॥ धारयेत्सोपवासापिअवैधव्यकरं यतः ॥ विधवायतिमार्गेणकुमारीवायदृच्छयेति तत्रैवभविष्योक्तेः **तथा विष्णुधर्मे** सर्वेषुतूपवासेषुपुमान्वाथसुवासिनी ॥ धारयेद्रक्तवस्त्राणिकुसुमानिसितानिच ॥ विधवाशुक्लवसनमेकमेवहिधारयेत् **मनुरपि** पुष्पालंकारवस्त्राणिगन्धधूपानुलेपनम् ॥ उपवासेनदुष्यंतिदन्तधावनमंजनम् ॥ **मदनरत्नेव्यासः** दन्तधावनपुष्पादिव्रतेप्यस्यानदुष्यतीति ॥ यद्यपीदंसर्वोपवासविषयंप्रतीयतेतथापिशिष्टाचारात्सौभाग्याद्यर्थंक्रियमाणनवरात्रंत्रिरात्राद्युपवासविषयमेव (**नत्वेकादश्यादिविषयम्**) असकृज्जलपानाच्चसकृत्तांबूलचर्वणात् ॥ उपवासः प्रणश्येतदिवास्वापाच्चमैथुनादित्यपरार्केदेवलेनतन्निषेधात् । नचास्यपुंविषयत्वेनसावकाशत्वात्स्त्रीणांतांबूलादिप्राप्नोतीतिवाच्यम् । तांबूलादिप्रापकस्यैवैकादशीतरविषयत्वेनवैपरीत्यस्यापिसुवचत्वात् **यत्तुहरिवंशे** अंजनंरोचनंचैवगन्धान्सुमनसस्तथा ॥ व्रतेचैवोपवासेचनित्यमेवविवर्जयेत् शिरसोभ्यंजनंसौम्येनैवमेतत्प्रशस्यते ॥

नपादयोर्नगात्रस्यस्नेहेनेतिस्थितिःस्मृतेति तत्तत्रैवोक्तपुण्यकव्रतविषयम् ॥ नतुसर्वत्र । पूर्वोक्तविरोधादिति **मदनरत्नेउक्तं** । **तत्रैव** अश्रुप्रपातो रोषश्चकलहस्यकृतिस्तथा ॥ उपवासाव्रताद्वापिसद्योभ्रंशयतिस्त्रियम् ॥ स्त्रियमित्युपलक्षणं । **मदनरत्नेशिवधर्मे** दानव्रतानिनियमाज्ञानंध्यानं हुतंजपः ॥ यत्नेनापिकृतंसर्वंक्रोधितस्यवृथाभवेत् ॥ **अथसूतकादौ निर्णयः** ॥ तत्रशावसूत्याशौचयोःसर्वस्मार्तकर्मनिवृत्तिनिबंधेषुस्पष्टैव ॥ **गौडास्तुशौचादावपितामाहुः** ॥ जानूर्ध्वंक्षतजेजातेनित्यकर्मनचाचरेत् ॥ नैमित्तिकंचतदधःस्रवद्रक्तोनवाचरेत् ॥ लौतकेचसमुत्पन्नेज्वरकर्मणिमैथुने ॥ धूमोद्गारेतथावांतौनित्यकर्माणिसंत्यजेत् ॥ द्रव्येभुक्तेत्वजीर्णेच नैवभुक्त्वापिकिंचन ॥ कर्मकुर्यान्नरोनित्यंसूतकेमृतकेतथेतिकालिकापुराणात् ॥ वस्तुतस्तु पूर्वंदेवीपूजोपक्रमात्तन्मात्रविषयत्वमस्येतियुक्तंप्रतीमः **तथाहेमाद्रौपाद्मे** गर्भिणीसूतिकादिश्च कुमारीवाथरोहिणी ॥ यदाशुद्धात दान्येनकारयेत्प्रयतास्वयमिति॥ पुंसोप्येषविधिः । लिंगस्याविवक्षितत्वात् तेनयस्मिन्व्रतेयत्पूजाद्युक्तंतदन्येनकारयेत् । शारीरनियमान्स्वयंकुर्यादिति हेमाद्रिव्याचख्यौ । नव्रतिनांव्रतेइतिविष्णूक्तेश्च । आरम्भस्तुनभवत्येव **शुद्धितत्वेविष्णुः** बहुकालिकसंकल्पोगृहीतश्चपुरायदि ॥ सूतकेमृतकेचैव व्रतंतन्नैवदुष्यति ॥ एतत्काम्यपरंनित्यंत्वनारब्धमपिकार्यमितिगौडाः **मदनरत्ने** पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः ॥ तत्कर्तव्यंनरैःशुद्धंदानार्चनविवर्जितम् **माधवीयेकौर्मे** काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके ॥ तत्रकाम्यं व्रतंकुर्याद्दानार्चनविवर्जितमिति ॥ एतेनसांगेविकाराद्व्रतांगदेवपूजादिकार्यमितिवर्धमानोक्तिःपरास्ता ।प्रारब्धंपूजादिकार्यमेव । नवरात्रेतुतत्रैवविशेषंवक्ष्यामः । एवंरजस्वलापि **यत्तुसत्यव्रतः** प्रारब्धदीर्घतपसांनारीणांयद्रजोभवेत् ॥ नतत्रापिव्रतस्यस्यादुपरोधःकथंचनेति ॥ तत्प्रतिनिधिनाकारयेदित्येतत्परं । **तदुक्तंमदनरत्नेमात्स्ये** अन्तरातुरजोयोगेपूजामन्येनकारयेदिति **प्रतिनिधयश्चनिर्णयामृते पैठीनसिः** भार्यापत्युर्व्रतंकुर्याद्भार्यायाः

श्चपतिव्रतम् ॥ असामर्थ्येपरस्ताभ्यांव्रतभंगोनजायते **स्कांदेपि** पुत्रंवा विनयोपेतंभगिनींभ्रातरंतथा ॥ एषामभावएवान्यंब्राह्मणंवानियोजयेत् **कात्यायनः** पितृमातृभ्रातृपतिगुर्वर्थेचविशेषतः ॥ उपवासंप्रकुर्वाणःपुण्यंशतगुणंलभेत् ॥ मातामहादीनुद्दिश्यएकादश्यामुपोषणे ॥ कृतेतेतुफलंविप्राः समग्रंसमवाप्नुयुः **मदनरत्नेप्रभासखण्डे** भर्त्तापुत्रःपुरोधाश्चभ्रातापत्नी सखापिच ॥ यात्रायांधर्मकार्येषुजायंतेप्रतिहस्तकाः ॥ एभिःकृतंमहादेवि स्वयमेवकृतंभवेत् **तत्रैववायवीये** स्वयंकर्तुमशक्तश्चेत्कारयीतपुरोधसा ॥ इदंचसर्ववर्णसाधारणं अविशेषात् **यत्तुकश्चिन्महोक्षआह** शूद्रस्यब्राह्मणादिरेवप्रतिनिधिर्युक्तोनशूद्रः। जपस्तपस्तीर्थसेवाप्रव्रजामन्त्रसाधनम् ॥ विप्रैः सम्पादितंयस्यसम्पन्नंतस्यतत्फलमिति ॥ मरीचिवचनादिति । तत्तुच्छम्। प्रव्रज्यादीनांशूद्रेऽसम्भवाद्विषयेप्रायदर्शनादितिन्यायेनास्यब्राह्मणादिगोचरत्वात् । यदपिउपवासोव्रतंहोमस्तीर्थस्नानजपादिकमितिपूर्वार्द्धेपाठस्तदपिसएवदोषः । स्त्रीशूद्रपतनानिषडितिमानवीयेजपनिषेधात् । वस्तुतस्तु । सम्पूर्णतावाचनमात्रमत्रोच्यतइतिप्रतिनिधेःकावार्त्तेत्यलम् **अत्रविशेषमाहत्रिकांडमंडनः** काम्येप्रनिधिर्नास्तिनित्येनैमित्तिकेचसः ॥ काम्येप्युपक्रमादूर्ध्वंकेचित्प्रतिनिधिंविदुः॥ नस्यात्प्रतिनिधिर्मैत्रस्वामिदेवाग्निकर्मसु॥सदेशकालयोर्नास्तिनारणेरग्निरेवसा । नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचित **हिरण्यकेशिसूत्रेपि** नस्वामित्वस्यभार्यायाः पुत्रस्यदेशस्यकालस्याग्नेर्दैवतायाःकर्मणःशब्दस्यचप्रतिनिधिर्विद्यतइति **अथव्रतादिसन्निपातेनिर्णयः**तत्रतिथिद्वयसन्निपातेतत्रोक्तंदानंहेमादिक्रमेणानुष्ठेयम्अविरोधात् इदंपूर्वारब्धेष्वेव। एकमध्येन्यकाम्यकर्मारंभस्तुभवत्येवगुणफलादृतेयस्ययज्ञेप्रततेतरायज्ञस्तायतेतंयज्ञंनिर्ऋतिर्गृह्णातीतिराणकधृतश्रुतेः। यज्ञःव्रतादिकर्ममात्रम् । अनंगेनव्यवधानदोषस्यसर्वत्रसाम्यात् । शिष्टास्तुमाघकार्तिकस्नानादिमध्येलक्षहोमतुलाभारतश्रवणाद्याचरंतितन्नित्यमध्येतु । काम्यमध्येतुचिंत्यम् यत्रतुनक्तैकभक्तादौविरोधस्तत्रप्राथम्यादेकभक्तंकार्यम् । नक्तंतुप

रेद्युस्तत्तिथौगौणकालेकार्यम् । समकालीनविरुद्धव्रतादौत्वेकंस्वयंकृत्वान्य ङ्कार्यादिनाकारयेदितिमाधवः । यत्तु शिवरात्र्यादौतिथिमध्येपारणयाऽह्नि भोजनंप्राप्तम् । भूताष्टम्योर्दिवाभुक्त्वारात्रौभुक्त्वाचपर्वणि ॥ एकादश्याम होरात्रंभुक्त्वाचांद्रायणंचरेदितितन्निषेधश्च ॥ तत्रपारणायावैधत्वाद्दिवैबभो जनम् । निषेधस्तुरागप्राप्तभोजनविषयः । एवमष्टम्यादिनक्तव्रतेसंक्रांत्यादौ रवौसंकष्टचतुर्थ्यांचरात्रौभोजनम् । यत्रत्वष्टम्यादौदिवाभुंजिनिषेधःसंक्रमे च्चरात्राविितिनिषेधद्वयंतत्रोपवासएवकार्यः । यद्यपिपुत्रिणउपवासोनिषिद्धस्त थाप्युपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेदितिवचनात्कंचिद्भक्षयित्वोपवा सःकार्यः । चांद्रायणमध्येएकादश्यादौतुभोजनंकार्यमेव । चांद्रायणस्यकाम्य त्वेननित्यबाधकत्वात् अबाधेनगत्यसंभवाच्च । एकादश्यामेकांतरोपवासा दिपारणायांजलपारणांकृत्वोपवसेत् । आपोवाअशितमनाशितंचेतिश्रुतेः । ए-वंद्वादश्यांमासोपवासश्राद्धदोषादिषुज्ञेयम् । एवंकाम्यनैमित्तिकनित्यत्वादि कृतंबलाबलंस्वयमूह्यमितिदिक् ।

इति कमलाकरभट्टकृते निर्णयसिंधौ परिभाषा समाप्ता ॥

अथप्रतिपदादिनिर्णयः शुक्लप्रतिपदपराह्णव्यापित्वेपूर्वाग्राह्या । युग्मवाक्यात् । प्रतिपत्संमुखीकार्यायाभवेदापराह्णिकीतिस्कांदोक्तेः ॥ शुक्ला स्यात्प्रतिपत्तिथिः प्रथमतश्चेत्सापराह्णेभवेदिति दीपिकोक्तेश्च । अपराह्णश्च पंचधाभक्तेदिनेचतुर्थोभागः । तदभावेसायाह्नव्यापिनीग्राह्या । तदभावेतु सायाह्नव्यापिनीपरिगृह्यतामितिमाधवोक्तेः । कृष्णातुपरा । कृष्णातूत्तरतो खिलेतिदीपिकोक्तेः **कृष्णापिपूर्वैवेत्यनंतभट्टाः सर्वतिथिषुवर्ज्यान्युक्ता निमुहूर्त्तदीपिकायां** कूष्मांडंवृहतीफलानिलवणंवर्ज्यंतिलाम्लंतथा तैलं चामलकंदिवंप्रवसताशीर्षकपालांत्रकम् ॥ निष्पावांश्चमसूरिकान्फलम थोवृन्ताकसंज्ञंमधुद्यूतंस्त्रीगमनंक्रमात्प्रतिपदादिष्वेवमाषोडश ॥ शीर्षनारि केलम् । कपालंअलाबु । अंत्रंपटोलकं **भूपालः** कूष्मांडंबृहतीक्षारंमूल कंपनसंफलम् ॥ धात्रीशिरःकपालांत्रं नखचर्मतिलानिच ॥ क्षुरकर्मागना

सेवांप्रतिपत्प्रभृतित्यजेत् ॥ नखंशिंबी । चर्ममसूरिका । द्वितीयातुकृष्णापूर्वाशुक्लोत्तरेतिहेमाद्रिः । कृष्णाद्वितीयादिमापूर्वाह्णेयदिसासितातुपरतःसतिदीपिकोक्तेः । माधवानंतभट्टमतेतुसर्वापिद्वितीयापरा **तथाचमाधवः** पूर्वेद्युरसतीप्राप्तःपरेद्युस्त्रिमुहूर्त्तगा ॥ साद्वितीयापरोपोष्यापूर्वविद्धाततोन्यथेति ॥ तृतीयातुसर्वमतेरंभाव्यतिरिक्तापरैव ॥ तेनयुग्मवाक्यंरंभाव्रतविषयम् ॥ रंभाख्यांवर्जयित्वातुतृतीयांद्विजसत्तम ॥ अन्येषुसर्वकार्येषुगणयुक्ता प्रशस्यतइतिब्रह्मवैवर्त्तात् **गौरीव्रतेतुविशेषमाहमाधवः** मुहूर्त्तमात्रसत्वेपिदिनेगौरीव्रतंपरे ॥ शुद्धाधिकायामप्येवंगणयोगप्रशंसनादिति ॥ चतुर्थ्यपिसर्वमतेगणेशव्रतातिरिक्तापरैव युग्मवाक्यात् । एकादशीतथाषष्ठीअमावास्याचतुर्थिका ॥ उपोष्याःपरसंयुक्तापराःपूर्वेणसंयुताइतिमाधवीये बृहद्वसिष्ठोक्तेश्च । नागचतुर्थीतुमध्याह्नव्यापिनीपंचमीयुताचग्राह्येति निर्णयामृतेमाधवीयेचोक्तं । युगंमध्यंदिनेयत्रतत्रोपोष्यफणिश्वरान् ॥ क्षीरेणाप्याय्यपंचम्यांपूजयेत्प्रयतोनरः ॥ विषाणितस्यनश्यंतिनतान्हिंसंतिपन्नगाः ॥ इतिमाधवीयेदेवलोक्तेः । युगंचतुर्थीपूर्वत्रमध्याह्नव्याप्तौपूर्वा । अन्यपक्षेषुपरैवपंचम्यांपूजोक्तेः । गणेशव्रतेतृतीयायुतैवचतुर्थी । चतुर्थीतुतृतीयायांमहापुण्यफलप्रदा ॥ कर्त्तव्याव्रतिभिर्वत्सगणनाथसुतोषिणीति ॥ हेमाद्रौब्रह्मवैवर्तात् । माधवीयेतुगणेशव्रते । मध्याह्नव्यापिनीमुख्या । चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते ॥ मध्याह्नव्यापिनीचेत्स्यात्परतश्चेत्पराह्णगीति **बृहस्पतिवचनात्** प्रातःशुक्लतिलैःस्नात्वामध्याह्ने पूजयेन्नृपेति तत्कल्पेभिधानाच्च । तेनपरदिनेतत्त्वेपरा **अन्यथापूर्वेत्युक्तम्** । **वस्तुतस्तु** यत्रभाद्रशुक्लचतुर्थ्यादौगणेशव्रतविशेषेमध्याह्नपूजोक्तातद्विषयाण्येवप्रागुक्तवचनानिनतुसार्वत्रिकाणि । संकष्टचतुर्थ्यादौबहूनांकर्मकालानांबाधापत्तेः । तेनसर्वत्रगणेशव्रतेपूर्वैवेतिसिद्धम् । संकष्टचतुर्थीतुचंद्रोदयव्यापिनीग्राह्या । दिनद्वयेतत्वेमातृयोगस्यसत्वात्पूर्वेतिकेचित् । अन्येतुदिनेमुहूर्त्तत्रयादिरूपस्यतृतीययोगस्याभावात्परदिने माधवोक्तमध्याह्नव्यासिपत्वा

त्संपूर्णत्वाच्चपरेत्याचक्षते **दिनद्वयेतदभावेतुपरैव । गौरीव्रतेतुपूर्वैव** गणेशगौरीबहुलाव्यतिरिक्ताःप्रकीर्तिताः ॥ चतुर्थ्यःपंचमीविद्धादेवतांतरयो गतइतिमदनरत्नेब्रह्मवैवर्तात् **पंचमीतुमाधवमतेसर्वापिपूर्वा** चतुर्थीसंयु ताकार्यापंचमीपरयानतु ॥ दैवेकर्मणिपित्र्येचशुक्लपक्षेतथासितेतिहारीतो क्तेः **हेमाद्रिमतेतुकृष्णापूर्वासितापरा** कृष्णापूर्वयुतासितापरयुतास्या त्पंचमीतिदीपिकोक्तेः । **वस्तुतस्तुहारीतोक्तिरुपवासविषया** । प्रति पत्पंचमीचैवसावित्रीभूतपूर्णिमा ॥ नवमीदशमीचैव नोपोष्याःपरसंयुता इतिब्रह्मवैवर्तात् **यत्तु** पंचमीतुप्रकर्त्तव्या षष्ठ्यायुक्तातुनारदेत्यापस्तंबी यम् **तत्स्कांदव्रतपरम्** स्कंदोपवासेस्वीकार्यापंचमीपरसंयुतेतिवाक्यशे षादितिमाधवः । तन्नागपूजाविषयमित्यनंतभट्टनिर्णयामृतादयः **चमत्का रचिंतामणौच** पंचमीनागपूजायांकार्याषष्ठीसमन्विता । तस्यांतुतुषिता नागाइतरासुचतुर्थिकेति ॥ तेननागपूजादौपरैव **यत्तुमदनरत्नादिवो दासीययोः श्रावणपंचम्यातिरिक्तापूर्वेत्युक्तम्** । श्रावणेपंचमीशु क्लासंप्रोक्तानागपंचमी ॥ तांपरित्यज्यपंचम्यश्चतुर्थीसहिताहिताइतिसंग्र होक्तेः गणेशस्कंदयोगाभ्यांक्रमान्नागःशुभाशुभः ॥ मित्रामित्रेतयोः प त्रे नागानामाखुर्बर्हिणौ ॥ इतिषट्त्रिंशन्मताच्चश्रावणपंचम्यतिरिक्तायाः नागपंचम्याश्चतुर्थीयुतत्वमुक्तंतदुपवासादिविषयम् पत्रेवाहने । **षष्ठीसर्व मतेस्कंदव्रतातिरिक्तापरैव । युग्मवाक्यात्** । नागविद्धानकर्त्तव्याषष्ठी चैवकदाचनेतिस्कांदाच्च **निर्णयामृते** षष्ठीचसप्तमीचैववारश्चेदंशुमालि नः ॥ योगोयंपद्मकोनामसूर्यकोटिग्रहैःसमः ॥ **सप्तमीपूर्वैवयुग्मवाक्या त्** षष्ठ्यायुतासप्तमीचकर्तव्यातातसर्वदेतिस्कांदाच्च **अष्टमीतुसर्वमतेकृष्णा पूर्वासितापरा** व्रतमात्रेष्टमीकृष्णापूर्वाशुक्लाष्टमीपरेतिमाधवोक्तेः ॥ प रयुक्शुक्लाष्टमीपूर्वयुक्कृष्णेतिदीपिकोक्तेश्च शिवशक्त्युत्सवेचकृष्णाप्युत्तरा पक्षद्वयेप्युत्तैरवशिवशक्तिमहोत्सवइतिमाधवोक्तेः **दिवोदासीयेभविष्ये** यदायदासिताष्टम्यांबुधवारोभवेत्कचित् ॥ तदातदाहिसाग्राह्याएकभक्ता

शनेनृप ॥ संध्याकालेतथाचैत्रेप्रसुप्तेचजनार्दने ॥ बुधाष्टमीनकर्त्तव्या हंतिपुण्यंपुरातनम् ॥ अंत्यंपद्मंहेमाद्रौनधृतम् । **नवमीतुसर्वमतेपूर्वा युग्मवाक्यात्** नकुर्यान्नवमींतातदशम्यांतुकदाचनेतिस्कांदाच्च **दशमीतुपूर्वापरावेतिहेमाद्रिः** कृष्णापूर्वोत्तराशुक्लादशम्येवंव्यवस्थितेतिमाधवः **वस्तुतस्तुमुख्यानवमीयुतैवग्राह्या** दशमीतुप्रकर्त्तव्यासदुर्गाद्विजसत्तमेत्यापस्तंबोक्तेः **यत्तु** संपूर्णादशमीकार्यापूर्वयापरयाथवेत्यंगिरसोक्तम् ॥ तन्नवमीयुक्तालाभेऔदयिकीग्राह्येत्येवंनेयम् **अथैकादशी** । **तत्रैकादश्युपवासोद्वेधा निषेधपरिपालनात्मकोव्रतरूपश्च** । **तत्राद्यः** नशंखेनपिबेत्तोयं नखादेत्कूर्मसूकरौ ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपीतिकौर्मदेवलाद्युक्तेः **अग्निपुराणेपि** गृहस्थोब्रह्मचारीचआहिताग्निस्तथैवच ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपीति ॥ नचात्रपर्युदासेन व्रतविधिः तद्धेतुत्रतादिशब्दाभावात् **व्रतरूपस्तुब्रह्मवैवर्ते** प्राप्तेहरिदिनेसम्यग्विधायनियमं निशि ॥ दशम्यामुपवासस्यप्रकुर्याद्वैष्णवंव्रतमिति **इदंचशिवभक्तादिभिरपिकार्यम्** वैष्णवोवाथशैवोवाकुर्यादेकादशीव्रतमिति शिवधर्मोक्तेः। वैष्णवोवाथशैवोवासौरोप्येतत्समाचरेदितिसौरपुराणाच्च **सोपिद्वेधानित्यःकाम्यश्च** उपोष्यैकादशीनित्यंपक्षयोरुभयोरपीतिगारुडोक्तेः । पक्षेपक्षेचकर्त्तव्यमेकादश्यामुपोषणमिति नारदोक्तेश्चनित्यता ॥ यदीच्छेद्विष्णुसायुज्यंश्रियं संततिमात्मनः ॥ एकादश्यांनभुंजीतपक्षयोरुभयोरपि ॥ इतिकौर्मादिषुफलश्रुतेश्चकाम्यता । उभयैकादशीव्रतंगृहस्थातिरिक्तानामेवनित्यम् । गृहस्थस्यतुशुक्लायामेवव्रतंनित्यंनकृष्णायाम्। एकादश्यांनभुंजीतपक्षयोरुभयोरपि॥ वनस्थयतिधर्मोयंशुक्लामेवसदागृहीतिदेवलोक्तेः ॥ नचानेननिषेधपालनमेव वनस्थयतिविषयेउपसंह्रियतेनतुव्रतमितिवाच्यम् । अस्यपर्युदासेनव्रतविधिपरत्वात् । अन्यथापूर्वोक्ताग्निपुराणवचने निषेधपालनेगृहस्थस्याधिकारोक्त्याविरोधःस्यात् । निषेधस्यनिवृत्तिमात्रफलत्वेनविशेषानपेक्षणादुपसंहारायोगात् । अभावस्यधर्मत्वाभावाच्च । तस्मादनेनसर्वेषामेकादशीव्र

तविधायिनांसामान्यवाक्यानांवनस्थयतिविषये उपसंहाराच्चगृहस्थस्यकृष्णा यांनित्यव्रतप्राप्तिः **कथंतर्हि** संक्रांत्यामुपवासंचकृष्णैकादशिवासरे ॥ चन्द्र सूर्यग्रहेचैवनकुर्यात्पुत्रवान्गृहीतिनारदादिवचनेषु कृष्णानिषेधः प्राप्त्य भावादितिचेच्छ्रुयताम् शयनीबोधिनीमध्ये याकृष्णैकादशीभवेत् ॥ सैवो पोष्यागृहस्थेननैान्याकृष्णाकदाचनेतिपाद्मे ॥ गृहस्थस्यआषाढीकार्त्ति कीमध्यस्थायाकृष्णाविहितासापुत्रवतोनिषिध्यते । अन्यकृष्णायांतुनविधिः सर्वविधीनांवनस्थयतिषूपसंहाराच्चनिषेधः प्राप्त्यभावात्शयन्यादिवाक्यंत्व पुत्रगृहिगोचरमित्यनंतभट्टहेमाद्र्यादिग्रन्थाः **दीपिकापि** असितातुशयनीबो धातरस्थाप्यथोनस्यात्सात्मजिनोपीति **मदनरत्नेभविष्ये** यथाशुक्लातथाकृ ष्णाद्वादशीमेसदाप्रिया ॥ शुक्लागृहस्थैःकर्त्तव्याभोगसंतानवर्धिनी ॥ मुमु क्षुभिस्तथाकृष्णानतेतेजोपदर्शितेति ॥ निषेधपालनंकाम्यव्रतंच सर्वकृष्णा यांसर्वगृहिणांभवत्येव । पुत्रवांश्चसभार्यश्चबंधुयुक्तस्तथैवच । उभयोःपक्षयोः काम्यव्रतंकुर्याच्चुवैष्णवमिति ॥ नारदोक्तेः **एतच्चसर्वंकालादर्शेउक्तम्** विध वायावनस्थस्ययतेश्चैकादशीद्वये ॥ उपवासोगृहस्थस्यशुक्लायामेवपुत्रिणः ॥ भुजेर्निषेधःकृष्णायांसिद्धिस्तस्यततोव्रतेइति ॥ प्राच्यास्तुवैष्णवगृहस्थानांकृ ष्णापिनित्या । नित्यंभक्तिसमायुक्तैर्नरैर्विष्णुपराणैः ॥ पक्षेपक्षेचकर्त्तव्यमेका दश्यामुपोषणम् ॥ सपुत्रश्चसभार्यश्चसुजनोभक्तिसंयुतः ॥ एकादश्यामुपवसे त्पक्षयोरुभयोरपीतिनारदोक्तेरित्याहुः ॥ पुत्रशब्दश्चापत्यमात्रबचनः**नारा यणवृत्तौ** पुमांसएवमेपुत्राजायेरन्नित्यत्रापत्यमात्रवाचित्वोक्तेः । जनयद्भद्रु पुत्राणीतिलिंगात् । पौत्रीमातामहस्तेनेतिमनूक्तेः । पुत्र्याअपत्यमित्यर्थेतु स्त्री भ्योढगितिपौत्रेयइत्यापत्तेः । पुमान्पुत्रोजायतइतिच **उपवासनिषेधेविशेषो वायवीयेउक्तः**उपवासनिषेधेतुभक्ष्यंकिंचित्प्रकल्पयेत्॥नदुष्यत्युपवासेनउ पवासफलंलभेत् **भक्ष्यंचतत्रैवोक्तम्** नक्तंहविष्यान्नमनोदनंवाफलंतिला क्षीरमथांबुचाज्यम् ॥ यत्पंचगव्ययंदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंचेत्य लम् ॥ तत्रदशमीवेधोद्वेधा अरुणोदयवेधः सूर्योदयवेधश्चेति **आद्योगा**

रुडे दशमीशेषसंयुक्तो यदिस्यादरुणोदयः ॥ नैवोपोष्यंवैष्णवेनताद्दिनै कादशीव्रतमिति । **अरुणोदयस्वरूपंचमाधवीयेस्कांदे** उदयात्प्राक्च तस्रस्तुघटिकाअरुणोदयइति **यदपि** उदयात्प्राग्यदाविप्रमुहूर्त्तद्वयसंयुता ॥ संपूर्णैकादशीनामतत्रैवोपवसेद्गृहीतिगारुडसौरधर्मादिवचनम् ॥ **यच्चभविष्ये** आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता ॥ एकादशीतुसंपूर्णाविद्धान्यापरिकीर्तितेति॥तदप्युपसंहारन्यायेनदंडचतुष्टयपरमेव । हेमाद्रावप्येवं **यत्तुब्रह्मवैवर्त्ते** चतस्रोघटिकाःप्रातररुणोदयनिश्चयः ॥ चतुष्टयविभागोत्रवेधादीनांकिलोदितः । अरुणोदयवेधःस्यात्सार्द्धतुघटिकात्रयम् ॥ अतिवेधोद्विघटिकःप्रभासंदर्शनाद्भवेः ॥ महावेधोपितत्रैवदृश्यते र्कोनदृश्यते ॥ तुरीयस्तत्रविहितोयोगःसूर्योदयेबुधैरिति ॥ तदप्यवयवद्वारारुणोदयवेधविशेषपरमेवेतिमाधवीयेमदनरत्नेच । अंत्यस्तूदयवेधः । **तथा न्येपिवेधाःहेमाद्रौमाधवीयेचगारुडे** उदयात्प्रक्त्रिघटि काव्यापिन्ये कादशीयदा ॥ संदिग्धैकादशीनामवर्ज्येयंधर्मकांक्षिभिः ॥ उदयात्प्राङ्मुहूर्त्तेनव्यापिन्येकादशींयदा ॥ संयुक्तैकादशीनामवर्ज्येयंधर्मवृद्धये **हेमाद्रौ** रात्रेरंत्योष्टमोभागोप्यरुणोदयउक्तः । निशःप्रांतेतुयामार्द्धेदेववादित्रवादने॥ सारस्वतानध्ययनेचारुणोदयउच्यतइतिस्मृतेः **अत्रैके** एषांसर्वपक्षाणांमुहूर्त्तद्वयेन क्रोडीकारान्निशःप्रांते इतिवचनाच्च रात्रिमानवशात्सार्द्धत्रिदंडादयोनेकेरुणोदयाः **तदाहहेमाद्रिः** सार्धघटिकात्रयोक्तिरष्टाविंशतिघटीमितरात्रिविषया । महत्तरास्तुरात्रीरपेक्ष्यचतस्रोघटिकाइत्युक्तमितीत्याहुः । तन्न । अरुणोदयशब्दस्यऽनेकार्थत्वापत्तेः । नचमुहूर्त्तद्वयमर्थः । दंडद्वयैकमुहूर्त्तादिवेधानांतथाप्यनुपपत्तेः ॥ नहितेषांयामार्धत्वमरुणोदयत्वंचास्ति । मुहूर्तद्वयस्ययामार्द्धस्यच चतस्रोघटिकात्यनेनोपसंहाराच्चनतदर्थः । नचसार्द्धतुघटिकात्रयमित्यनेनापितदापत्तिः शंक्या । तेनचतुर्दंडवेधस्यैवोक्तेः । चतुर्दंडेर्धघटीदशमीदशमीसत्त्वेहिवेधस्तदर्थः ॥ द्विघटिकादौतदयोगाच्च । यत्तुमतम् । कियतारुणोदयवेधइत्यपेक्षायांसार्द्धघटिकात्रयनियमादरुणोद

येर्धघटिकातोन्यूनदशमीसत्त्वेनदोषइति । तत्तुच्छम् । द्विदण्डादावपित दापत्तेः । दशमीशेषसंयुक्तोयदिस्यादरुणोदयः । नैवोपोष्यंवैष्णवेनतद्धि नैकादशीव्रतमितिगारुडेभविष्येचयोगमात्रनिषेधात् **नारदीयेपि** लववेधेपि विप्रेंद्रदशम्यैकादशींत्यजेत् ॥सुरायाविन्दुनास्पृष्टंगंगांभइवनिर्मलम् ॥ **स्कांदेपि** कलाकाष्ठादिगत्येवदृश्यतेदशमीविभो ॥ एकादश्यांनकर्तव्यंव्रतंराजन् कदाचनेतिमाधवोप्याह । सोऽयंकलादिवेधोऽरुणोदयवेधेसूर्योदयवेधेचसमा नइति **निगमेपि** सर्वप्रकारोवेधोऽयमुपवासस्यदूषकइति ॥ अतएवमाधवेन अरुणोदयाद्यदंडेऽल्पदशमीस्पर्शेसम्पूर्त्ताकृत्स्नघटीयोगेसंदिग्धा । मुहूर्तव्या प्तीसंयुक्ताउदयेसंकीर्णेत्युक्ता । अरुणोदयवेलायांदशमीयदिसंगता॥संपूर्क्तै कादशींतांतुमोहिन्यैदत्तवान्प्रभुरितिगोभिलाद्युक्तेः । पूर्वोक्तगारुडादेश्च । सामान्यतोविशेषतश्चारुणोदयवेधोनिषिद्धः। यत्त्वष्टमभागोरुणोदयइतिहेमा द्रिणोक्तम् । यच्चमहत्तरारात्रिरितितत्परमतंस्वयमेवदूषितम् । अन्तेप्युक्तम् । वेधतारतम्यंचदोषतारतम्यादुपपद्यतइति।दोषतारतम्यंचप्रायश्चित्ततारतम्या दवगम्यते **तच्चोक्तंहेमाद्रौस्मृत्यंतरे** अज्ञानाद्यदिवामोहात्कुर्वन्नेकादशींन रः॥दशमीशेषसंयुक्तांप्रायश्चित्तमिदंचरेत् ॥कृच्छ्रपादंनरश्रीत्वागांचदद्यात्स वत्सकाम्॥सुवर्णस्यार्धकंदेयंतिलद्रोणसमन्वितम् विधानांतरंतत्रैव ब्राह्मणा न्भोजयेत्त्रिंशद्गांचदद्यात्सवत्सकाम् ।धरणस्यार्धकंदेयंतिलद्रोणमथापिवेति॥ अत्रवेधतारतम्याद्व्यवस्थेतिहेमाद्रिः । निशःप्रांतइत्यपिदोषाधिक्यार्थमेव। तस्माच्चतुर्घटिकात्मकएवारुणोदयइतिसिद्धम् । तेनषट्पंचाशद्दण्डानंतरंद शमीप्रवेशेरुणोदयवेधउक्तोभवति **अंत्योपितत्रैवकण्वेनोक्तः** उदयोप रिविद्धातुदशम्येकादशीयदि ॥ दानवेभ्यःप्रीणनार्थंदत्तवान्पाकशासनइति **स्मृत्यंतरेपि** दशम्याःप्रांतमादाययदोदेतिदिवाकरः ॥ तेनस्पृष्टंहरीदिनं दत्तंजंभासुरायतदिति ॥ तत्रारुणोदयवेधोवैष्णवविषयः । तद्वाक्येषुवैष्णव ग्रहणात् **तत्स्वरूपंतुमाधवीयेस्कांदे** परमापदमापन्नोहर्षेवासमुपस्थिते॥ नैकादशींत्यजेद्यस्तुतस्यदीक्षास्तिवैष्णवी ॥ विष्ण्वर्पिताखिलाचारःस्महिवै

ष्णवउच्यतइति ॥ यद्यपिपित्रादेरागमदीक्षायांतन्मात्रस्यवैष्णवत्वंनतुपुत्रादे शस्तथापि स्वपारंपर्यप्रसिद्धमेववैष्णत्वंस्मार्त्तत्वंच मन्यंतेवृद्धाः **तत्त्वसाग रेभविष्ये** यथाशुक्लातथाकृष्णायथाकृष्णातथेतरा ॥ तुल्येतेमन्यतेयस्तुसवै वैष्णवउच्यते ॥ केचित्तुदशम्यांनवमीवेधमपित्यजंति तत्रमूलंमृग्यम् । उद यवेधस्तुपरिशेषात्स्मार्तगोचरः **तदाहमाधवः** अरुणोदयवेधोत्रवेधःसूर्यो दयेतथा ॥ उक्तौद्वौदशमीवेधौवैष्णवस्मार्त्तयोःक्रमात् ॥ **हेमाद्रिस्तुकेषां चिदर्धरात्रेपिदशमीवेधमाह** अर्द्धरात्रेतुकेषांचिद्दशम्यावेधउच्यते ॥ क पालवेधइत्याहुराचार्यायेहरिप्रियाः ॥ नैतन्मममतम् । यस्मात्त्रियामारात्रि रिष्यतइतिब्रह्मवैवर्तात् । अस्यार्थःअनद्यत्नेलङ् । इत्यत्रातीतायाःरात्रेःप श्चिमयामद्वयमागामिन्याःरात्रेः पूर्वयामद्वयंदिवसश्च सकालएषोद्यतनः **स-कालइत्युक्तंमहाभाष्ये** सएषवर्तमानःकालएकादश्यहोरात्रउपोष्यः । त-न्मध्येदशमीप्रवेशेविद्धासात्याज्या **अतएवहेमाद्रौ** दशम्याःसंगदोषेणअ र्द्धरात्रात्परेणतु ॥ वर्जयेच्चतुरोयामान्संकल्पार्चनयोःसदेति दोषउक्तः । च-तुरोयामान्दिवसस्येत्यर्थः । स्वमतेतुरात्रेस्त्रियामत्वात्प्रहरत्रयंपूर्वशेषः । ते-नचतुर्थप्रहरएववेधोयुक्तः । सोप्यरुणोदयएव । सूर्योदयंविनानैवस्नानदाना दिकःक्रमइति ॥ मार्कंडेयपुराणात् । प्रत्यूषोऽहर्मुखंकल्यइतिकोशादरुणोद यमारभ्यसूर्यांशुप्रवृत्तेस्तत्रैवनिषेधःतेनमतभेदाद्व्यवस्थेतिकेचित् । कैमुति कन्यायेनारुणोदयवेधस्यैवेयंस्तुतिरितितुमाधवः । यस्तुदिक्पंचदशभिस्तथे तिवेधः सउपवासातिरिक्तविषयइतिमाधवः सर्वप्रकारवेधोयमुपवासस्यदूष कः ॥ सार्द्धसप्तमुहूर्त्तस्तुयोगोयं बाधतेव्रतमितिनिगमादित्यलम् । अत्रंमाध वमतेवैष्णवैररुणोदयविद्धात्याज्या । यदात्वेकादश्येवशुद्धासतीवर्द्धते द्वाद शीवाउभयंघातदापरोपोष्या । एकादशीद्वादशीवाधिकाचेत्त्यज्यतांदिनम् ॥ पूर्वंग्राह्यंतूत्तरंस्यादितिवैष्णवनिर्णयः । इतिमाधवोक्तेः **स्मार्त्तैस्तु** सूर्योद यविद्धात्याज्या । यदात्वेकादशीशुद्धासतीवर्धतेद्वादशीचसमान्यूनावातदा गृहस्थैःपूर्वायतिभिरुत्तराकार्या । प्रथमेहनिसंपूर्णा व्याप्याहोरात्रसंयुता ॥

द्वादश्याचतथातातदृश्यतेपुनरेवच ॥ पूर्वाकार्यागृहस्थैश्चयतिभिश्चोत्तरावि
भोइतिस्कांदोक्तेः **वर्धमानोप्येवमेवाह उभयवृद्धौतुशुद्धाविद्धावास**
र्वेषांपरैव संपूर्णैकादशीयत्र प्रभातेपुनरेवसा ॥ सर्वैरेवोत्तराकार्यापर
तोद्वादशीयदीतिनारदोक्तेः ॥ द्वादशीमात्रवृद्धौतुशुद्धायांपूर्वैव । नचे
देकादशीविष्णोद्वादशीपरतःस्थिता ॥ उपोष्यैकादशीतत्रयदीच्छेत्परमं
पदमितिनारदोक्तेः द्वादशीमात्रवृद्धौत्रशुद्धाविद्धेव्यवस्थिते ॥ शुद्धापूर्वोत्त
राविद्धास्मार्तनिर्णयईदृशइतिमाधवोक्तेश्च ॥ **मदनरत्नेप्येवम् यत्तु** ॥ वि
द्धाप्यविद्धाविज्ञेयापरतो द्वादशीनचेत् ॥ अविद्धापिचविद्धास्यात्परतोद्वा
दशीयदीतिहेमाद्रौपाद्मवचनं तदेकादश्यावृद्धौज्ञेयम् **तदुक्तंमाधवेन** ए-
कादशीद्वादशीचेत्युभयंवर्द्धतेयदा ॥ तदापूर्वदिनंत्याज्यंस्मार्तैर्ग्राह्यंपरंदिन
मिति ॥ विद्धैकादश्यांद्वादशीमात्रवृद्धौचसर्वेषांपरैव तत्रैवैकादशीमात्रवृद्धौ
गृहिणःपूर्वायतेरुत्तरा । पूर्वोक्तपाद्मोक्तेः । एकादशीविवृद्धौचेच्छुक्लेकृष्णे
विशेषतः ॥ उत्तरांतुयतिःकुर्यात्पूर्वामुपवसेद्गृहीतिप्रचेतसोक्तेः । एत
च्छुद्धाविद्धातुल्यमितिमाधवः । त्रयोदश्यांनलभ्येतद्वादशीयदिकिंचन । उ-
पोष्यैकादशीतत्रदशमीमिश्रितापिचेतिस्कांदात्तु ॥ अविद्धानिनिषिद्धैश्चन
लभ्यंतेदिनानितु ॥ मुहूर्तैःपंचभिर्विद्धाग्राह्यैवैकादशीतिथिरित्यृष्यशृङ्गोक्ते
श्च ॥ मुहूर्तपंचकमरुणोदयमारभ्येज्ञेयम् । अन्यथोत्तरेऽह्निएकादश्यभावा
संभवात् **यदपिहेमाद्रिणा** शुद्धसमाशुद्धन्यूनावाअधिकद्वादशिकाचेत्सर्वे
षांपरैवेत्युक्तं तदपिवैष्णवविषयम् । स्मार्तानांतु पूर्वैवेत्यविरोधः **हेमाद्रि**
मतेतूच्यतेतत्र शुद्धाविद्धाद्वयनिंदात्रेधान्यूनसमाधिकैः ॥ षट्प्रकाराःपु-
नस्त्रेधाद्वादश्यूनसमाधिकैरित्यष्टादशैकादशीभेदाः ॥ तत्रशुद्धाधिकन्यूनद्वा
दशिकाशुद्धाधिकसमद्वादशिकाचसकामैःपूर्वानिष्कामैरुत्तराकार्या । प्रथमेह
निसंपूर्णेतिपूर्वोक्तस्कांदात् । ऊनद्वादशिकायांतुविष्णुप्रीतिकामैरुपवासद्व
यंकार्यम् । संपूर्णैकादशीयत्रप्रभातेपुनरेवसा ॥ लुप्यतेद्वादशीतस्मिन्नुपवा
सः कथंभवेत् ॥ उपोष्येद्वेतिथीतत्रविष्णुप्रीणनतत्परैरितिवृद्धवसिष्ठोक्तेः ॥

शुद्धन्यूनाशुद्धाधिकाशुद्धसमाविद्धन्यूनाविद्धसमावाधिकद्वादशिकाचेत्सर्वे षांपरैवेतिहेमाद्रिः मदनरत्नेतुशुद्धाधिकापरा । संपूर्णैकादशीयत्रेतिपुर्वो क्तेः । अन्यापूर्वा । शुद्धायदासमाहीनासमाहीनाधिकोत्तरा ॥ एकादशीमुप वसेन्नशुद्धांवैष्णवीमपीतिस्कांदात् ॥ शुद्धाएकादशीउत्तराद्वादशीनचेदेका दशीविष्णोइतिनारदोक्तेश्च **यत्तु** अविद्धापिचविद्धास्यादितिपाद्मंतच्छु द्धाधिकापरम् **यत्तु** संपूर्णैकादशीत्याज्यापरतोद्वादशीयदि ॥ उपोष्याद्वा दशीशुद्धाद्वादश्यामेवपारणमित्यादितद्वैष्णवपरम् । स्मार्तानांतुपूर्वैवेत्यु क्तंविद्धन्यूनासमद्वादशिकातुमुमुक्षूणांपुत्रवतांचपरा । अन्येषांपूर्वा **पुत्रव तोपिपूर्वेतिमदनरत्ने** विद्धन्यूनान्यूनद्वादशिकासैवसर्वैःकार्येतिहेमाद्रिः **मुमुक्षूणांपरान्येषांपूर्वेतिमदनरत्ने** विद्धसमासमद्वादशिकोनद्वादशि काचमुमुक्षुभिःपराऽन्यैःपूर्वाकार्या । दशमीमिश्रितापूर्वा द्वादशीयदि लुप्यते ॥ शुद्धैवद्वादशीराजन्नोपोष्यामोक्षकांक्षिभिरितिव्यासोक्तेः । मोक्ष कांक्षिग्रहणादन्येषांपूर्वैव । सर्वत्रैकादशीकार्याद्वादशीमिश्रितानरैः ॥ प्रात र्भवतुवामावायतोनित्यमुपोषणमितिपाद्मोक्तेः ॥ विद्धाधिकासमद्वादशिका सर्वेषांपूर्वैव । पारणाहेनलभ्येतद्वादशीकलयापिचेत् ॥ तदानींदशमीविद्धा प्युपोष्यैकादशीतिथिरितिऋष्यशृङ्गोक्तेश्च **माधवमतेतु** अत्रगृहिणःपूर्वा यतेरुत्तरा विद्धाधिकान्यूनद्वादशिकामोक्षपापक्षयविष्णुप्रीतिकामैः पराका र्या । गृहस्थेनतुनक्तंकार्यम् । एकादशीद्वादशीचरात्रिशेषेत्रयोदशी ॥ उपवा संनकुर्वीतपुत्रपौत्रसमन्वितइति ॥ कौर्मेदिनक्षयेउपवासनिषेधात् । दश म्यैकादशीविद्धाद्वादशीचक्षयंगता ॥ क्षीणासाद्वादशीज्ञेयानक्तंतुगृहिणः स्मृतमितिवृद्धशातातपोक्तेश्च । गृहिणःपूर्वत्रोपवासः एकादश्याः । शुद्ध न्यूनत्वे शुद्धसमत्वेवाद्वादश्याः न्यूनसमत्वयोरेकादश्यामुपवासः **यानितु** दशम्यनुगताहंतिद्वादशद्वादशीफलम् धर्मापत्यधनायूंषित्रयोदश्यांतुपारण मिति कौर्मादीनि दशमीवेधत्रयोदशीपारणयोःनिषेधकानितानिविहितभिन्न पराणि । अत्रमूलवचनानितद्व्यवस्थाचाकरेज्ञेया यत्तुकालहेमाद्रौ बहुवा

क्यविरोधेनसंदेहोजायतेयदा ॥ द्वादशीतुतदाग्राह्यात्रयोदश्यांतुपारणमिति मार्कंडेयोक्तेः । संदिग्धेषुचवाक्येषुद्वादशीसमुपोषयेत्॥तथा विवादेषुचसर्वेषुद्वादश्यांसमुपोषणम् ॥ पारणंचत्रयोदश्यामाज्ञेयंमामर्कीमुने इतिपाद्मोक्तेश्च । वेधसंदेहेज्योतिर्विदांप्रतिपत्तौवापराकार्येत्युक्तम् । तद्वैष्णवविषयमित्यलंबहुना । अथात्रोपयुक्तंकिंचिदुच्यते।तत्रदशम्यामेकादशीयोगेदशमीमध्येएवभोजनंकार्यम् । एकादश्यांनभुंजीतेतितस्याएवनिमित्तत्वात् ॥ निषेधस्तुनिवृत्त्यात्माकालमात्रमपेक्षेतइतिदेवलोक्तेश्च केचित्तु एकादशीव्रतांगत्वेन पूर्वेद्युरेकभक्तविधानाद्विधिस्पष्टेचनिषेधानवकाशान्नकाम्यव्रतांगेभोजननिषेधःप्रवर्तते । तेनैकादशीमध्येपिपूर्वदिनेभोजनमित्याहुः अत्राधिकारीमाधवीयेकात्यायनोक्तः अष्टवर्षाधिकोमर्त्योह्यशीतिन्यूनवत्सरः ॥ एकादश्यामुपवसेत्पक्षयोरुभयोरपीति **भविष्ये** ब्रह्मचारीचनारीचशुक्लामेवसदा गृहीति **यत्तुविष्णुः** पत्यौजीवतियानारीउपोष्यव्रतमाचरेत् ॥ आयुष्यं हरतेभर्तुर्नरकंचैवगच्छतीति ॥ तद्भर्त्रननुज्ञाविषयमितिप्रागुक्तम **उपवासासामर्थ्येतुमार्कंडेयकौर्मयोः** एकभक्तेननक्तेनतथैवायाचितेनच ॥ उपवासेनदानेननिर्द्वादशिकोभवेत् ॥ अत्रएकभक्तेनयोमर्त्यउपवासव्रतंचरेदित्येकभक्तादिषूपवासशब्दस्तद्धर्मातिदेशार्थः । तेनतत्प्रयुक्ताः सर्वेधर्माः संकल्पमन्त्रेचैकभक्तादिपदेनोहःकार्यइतिमदनरत्ने । तथाऽसामर्थ्ये प्रतिनिधिनाकारयेदितिप्रागुक्तम् **व्रताकरणेप्रायश्चित्तमाहमाधवीयेकात्यायनः** अर्केपर्वद्वयेरात्रौचतुर्दश्यष्टमीदिवा ॥ एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरोदिति ॥ अथकाम्यव्रतविधिः **लघुनारदीये** दशम्यादिमहीपालत्रिदिनंपरिवर्जयेत् ॥ गन्धतांबूलपुष्पादिस्त्रीसम्भोगंमहायशाः **तत्रदशम्यां विधिकौर्मे** काश्यंमांसंमसूरांश्चचणकान्कोरदूषकान् ॥ शाकंमधुपरान्नंच त्यजेदुपवसन्स्त्रियम् **तथा** शाकंमांसंमसूरांश्चपुनर्भोजनमैथुने ॥ द्यूतमत्यंबुपानंच दशम्यांवैष्णवस्त्यजेत् **मदरत्नेनारदीये** अक्षारलवणाः सर्वेहविष्यान्ननिषेविणः ॥ अवनीतल्पशयनाः प्रियासंगमवर्जिताः **व्रतघ्नान्या**

हहेमाद्रौदेवलः असकृज्जलपानाच्चसकृत्तांबूलचर्वणत् ॥ उपवासः प्रण श्येतदिवास्वापाच्चमैथुनात् ॥ अशक्तौतुमदनरत्नेदेवलः अत्ययेचांबुपानेननो पवासः प्रणश्यति॥अत्ययेकष्टे **विष्णुरहस्ये** गात्राभ्यंगंशिरोभ्यंगंतांबूलंचानु लेपनम् ॥ व्रतस्थोवर्जयेत्सर्वंयच्चान्यत्रनिराकृतम् **एषुप्रायश्चित्तमुक्तंनिर्ण यामृतेसंग्रहे** स्तेनहिंसकयोःसख्यंकृत्वास्तैन्यंचहिंसकम् ॥ प्रायश्चितंत्र तीकुर्याज्जपेन्नामशतत्रयम् ॥ मिथ्यावादेदिवास्वापेबहुशोंबुनिषेवणे ॥ अ ष्टाक्षरंव्रतीजप्त्वाशतमष्टोत्तरंशुचिः ॥ ओन्नमोनारायणायेत्यष्टाक्षरः **तत्रैवपै ठीनसिः** तांबूलचर्वणेस्त्रीसम्भोगेमांसनिषेवणे ॥ व्रतलोपेनचेत्कुर्यात्कृष्णा वह्निजिवर्जनमिति ॥ कृष्णैकादशीवद्भोजननिषेवमात्रपरिपालनेतुतांबूलच र्वणादावपिनदोषइत्यर्थः । सम्भोगोऋतुकालादन्यत्ररेतःसेकात्मसम्भोगमृ तेऽन्यत्रक्षयःस्मृतइतिकात्यायनोक्तेः **हेमाद्रौवसिष्ठः** उपवासेतथाश्राद्धे नकुर्याद्दन्तधावनम् ॥ दंतानांकाष्ठसंयोगोदहत्यासप्तमंकुलम् ॥ काष्ठग्रह णान्मृल्लोष्ठाद्यनिषेधइतिहेमाद्रिः **विष्णुरहस्ये** श्राद्धोपवासदिवसेखादित्वा दन्तधावनम् ॥ गायत्र्याशतसम्पूतमंबुप्राश्यविशुध्यति **निर्णयामृतेव्यासः** वर्जयेत्पारणेमांसंव्रताहेप्यौषधंसदेति **एकादश्यांश्राद्धप्राप्तौमाधवीयेका त्यायनआह** उपवासोयदानित्यः श्राद्धंनैमित्तिकंभवेत् ॥ उपवासंतदाकु र्यादाघ्रायपितृसेवितम् ॥ मातापित्रोः क्षयेप्राप्तेभवेदेकादशीयदि ॥ अभ्य र्च्यपितृदेवांश्चआजिघ्रेत्पितृसेवितमिति ॥ हेमाद्र्यादिसर्वनिबंधेष्वेवम् ॥ एतेनएकाशीनिमित्तकंश्राद्धंद्वादश्यांकार्यमितिवदन्तःपरास्तः। **किंचमहाल ये** सपक्षःसकलःपूज्यःश्राद्धषोडशकंप्रतीतिश्रुतंषोडशत्वं । पौषैकादश्यांचम न्वादिश्राद्धंक्षयाहापरिज्ञानेचतत्पक्षैकादश्यांविहितंश्राद्धंबाधितमेवस्यात् । यदपिस्मृतिचन्द्रिकास्थंपठंति । अन्नाश्रितानिपापानितद्भोक्तुर्दातुरेवच ॥ मज्जन्तिपितरस्तस्यनरकेशाश्वतीः समाइति ॥ तस्यापिरागप्राप्तभुजिगोचर स्यवैधंश्राद्धंगोचरयतांमहत्साहसमित्यलम् । योप्यकृतश्राद्धनिचयाज लपिंडंविनाकृताइतिलघुनारदीयेएकादश्यांश्राद्धादिनिषेधः । समातापितृ

भिन्नविषयः । पूर्ववाक्येतत्ग्रहणात् । निचयः प्रतिग्रहः **व्रतघ्नान्याहम दनरत्नेदेवलः** सर्वभूतभयंव्याधिः प्रमादोगुरुशासनम् ॥ अव्रतघ्नानिप ठ्यंतेसकृदेतानिशास्त्रतः **स्कांदेपि** अष्टौतान्यव्रतघ्नानिआपोमूलंफलंपयः ॥ हविर्ब्राह्मणकाम्याचगुरोर्वचनमौषधम् ॥ इदंचातिसंकटविषयम् **नारदीये** अनुकल्पोनृणांप्रोक्तः क्षीणानांवरवर्णिनि ॥ मूलंफलंपयस्तोयमुपभोज्यंभ वेच्छुभे ॥ नत्वेवंभोजनंकैश्चिदेकादश्यांबुधैःस्मृतमिति **अस्यापवादः** शयनेचमदुत्थानेमत्पार्श्वपरिवर्तने ॥ नरोमूलफलाहारी हृदिशल्यंममार्पये त् ॥ एतेचाविरोधिनोनिर्णयाःसर्वव्रतेषुज्ञेयाः **तत्रैकादश्यांसंकल्पः** गृही त्वौदुंबरंपात्रंवारिपूर्णमुदङ्मुखः ॥ उपवासंतुगृह्णीयाद्यद्वावार्येवधारयेदिति माधवीयेवाराहोक्तेः । **मंत्रस्तुविष्णूक्तः** एकादश्यांनिराहारःस्थित्वाहम परेहनि ॥ भोक्ष्यामिपुंडरीकाक्ष शरणंमेभवाच्युतेति **शैवादीनांतुहेमाद्रौ सौरपुराणे** सावित्र्याप्यथवानाम्नासंकल्पंतुसमाचरेत् **शिवादिगायत्र्यो यजुर्वेदेप्रसिद्धाःवाराहे** इत्युच्चार्यततोविद्वान्पुष्पांजलिमथार्पयेत् ॥ तत स्तज्जलंपिवेत् । अष्टाक्षरेणमंत्रेणत्रिर्जप्तेनाभिमंत्रितम् ॥ उपवासफलंप्रेप्सुः पिबेत्पात्रगतंजलमितिकात्यायनोक्तेः । मध्यरात्रेउदयेवादशमीवेधेरात्रौसं कल्पइतिमाधवः । दशम्याःसंगदोषेणअर्धरात्रात्परेणतु ॥ वर्जयेच्चतुरो यामान्संकल्पार्चनयोस्तदा॥विद्धोपवासेनक्षंस्तुदिनंत्यक्त्वासमाहितः॥ रा त्रौसंपूजयेद्विष्णुंसंकल्पंचतदाचरेदितिनारदीयोक्तेः ॥ तत्रैवपूजामभिधा य देवस्यपुरतःकुर्याज्जागरंनियतोव्रती **द्वादश्यानिवेदनमंत्रउक्तःका त्यायने** अज्ञानतिमिरांधस्यव्रतेनानेनकेशव ॥ प्रसीदसुमुखोनाथज्ञानदृ ष्टिप्रदोभवेति ॥ नारदीयेब्राह्मणान्भोजयेच्छक्त्यादद्याद्दक्षिणांततः **स्कांदेपि** कृत्वाचैवोपवासंतुयोक्षीयाद्दादशीदिने । नैवेद्यंतुलसीमिश्रंह त्याकोटिविनाशनम् **द्वादश्यांचवर्ज्यान्याहबृहस्पतिः** दिवानिद्रापरा न्नंचपुनर्भोजनमैथुने ॥ क्षौद्रंकांस्यामिषंतैलंद्वादस्यामष्टवर्जयेत् **हेमाद्रौब्र ह्मांडपुराणे** पुनर्भोजनमध्यायोभारआयासमैथुने ॥ उपवासफलंहन्युर्दिवा

निद्राच्चपंचमी **स्कांदे** परान्नंकांस्यतांबूलेलोभंवितथभाषणम् ॥ वर्जयेदितिशेषः **विष्णुधर्मे** असंभाष्याह्निसंभाष्यतुलस्यतसिकादलम् ॥ आमलक्याःफलंवापिपारणेप्राश्यशुद्ध्यति **बृहन्नारदीये** रजस्वलांचचांडालंमहापातकिनंतथा ॥ सूतिकांपतितंचैवउच्छिष्टंरजकादिकम् ॥ व्रतादिमध्येशृणुयाद्यद्येषांध्वनिमुत्तमः ॥ अष्टोत्तरसहस्रंतुजपेद्वैवेदमातरम् ॥ एतत्व्रतंसूतकेपिकार्यम् ॥ सूतकेमृतकेचैवनत्याज्यंद्वादशीव्रतमितिविष्णूक्तेः ॥ तत्रत्यक्तंदानादिसूतकांतेकार्यम् । सूतकांतेनरःस्नात्वापूजयित्वाजनार्दनम् ॥ दानंदत्वाविधानेनव्रतस्यफलमश्नुतइतिमात्स्योक्तेः ॥ रजोदर्शनेपिकार्यम् । एकादश्यांनभुंजीतनारीदृष्टेरजस्यपीतिपुलस्त्योक्तेः ॥ यदाद्वादश्यांश्रवणर्क्षंतदाशुद्धामप्येकादशींत्यक्त्वातत्रैवोपवासःकार्यः । शुक्लावायदिवाकृष्णाद्वादशीश्रवणान्विता ॥तयोरेवोपवासश्चत्रयोदश्यांचपारणमितिनारदीयोक्तेः॥एतेचनियमाःकाम्यव्रतेनियताःनित्यव्रतेसतिसंभवेकार्याः॥ शक्तिमांस्तुपुनःकुर्यान्नियमंसविशेषणमितिकात्यायनोक्तेः**अशक्तौतुमाधवीयेब्रह्मवैवर्ते** इतिविज्ञायकुर्वीतावश्यमेकादशीव्रतम्॥विशेषनियमाशक्तोऽहोरात्रंभुंजिवर्जितइति॥अथाष्टौमहाद्वादश्यः । तत्रशुद्धाधिकैकायुताद्वादशीउन्मीलिनीसंज्ञा द्वादश्येवशुद्धाधिकावर्धतेचेत्सावंजुली ॥ वासरत्रयस्पर्शिनीत्रिस्पृशा । अग्रेपर्वणःसंपूर्णाधिकत्वेपक्षवर्धिनी । पुष्यर्क्षयुताजया । श्रवणयुताविजया । पुनर्वसुयुताजयंती । रोहिणीयुतापापनाशिनी । एताःपापक्षयमुक्तिकाम उपवसेत् । अत्रमूलंहेमाद्रौज्ञेयम् ॥ एकादशीद्वादश्योरेकत्वेतंत्रेणोपवासः। पार्थक्येतुशक्तश्चोपवासद्वयम् । एकादशीमुपोष्यैवद्वादशींसमुपोषयेदिति विष्णुरहस्यात् । अशक्तौतुद्वादश्यामेव । एवमेकादशींत्यक्त्वाद्वादशींसमुपोषयेत् ॥ पूर्ववासरजंपुण्यंसर्वप्राप्तोत्यसंशयमितितत्रैवोक्तेः **यदात्वल्पाद्वादशीतदुक्तंमात्स्ये** यदाभवतिअल्पापिद्वादशीपारणादिने ॥ उषःकालेद्वयंकुर्यात्प्रातर्मध्याह्निकंतदा **नारदीयेपि** अल्पायामथविप्रेंद्रद्वादश्यामरुणोदये ॥ स्नानार्चनक्रियाःकार्यादानहोमादिसंयुताइति **संकेतेतुमाधव**

वीयेदेवलः संकटेविषमेप्राप्तेद्वादश्यांपारयेत्कथम् ॥ अद्भिस्तुपारणाकुर्यात्पुनर्भुक्तंनदोषकृदिति ॥ संकटेत्रयोयशीश्राद्धप्रदोषादौ **अत्रकेचिद्दाहुः** अपकर्षवाक्यान्यनाहिताग्निविषयाणि । अग्निहोत्रादीनांश्रौतत्वेनापकर्षायोगादिति । द्वादश्यांचप्रथमपादमतिक्रम्यपारणंकार्यम् । द्वादश्याः प्रथमःपादोहरिवासरसंज्ञितः ॥ तमातिक्रम्यकुर्वीतपारणंविष्णुतत्परइतिनिर्णयामृतेमदनरत्नेचविष्णुधर्मोक्तेः । अत्रकेचित्संगिरंते । यदाभूयसोद्वादशीतदापिप्रातर्मुहूर्तत्रयेपारणंकार्यम् । सर्वेषामुपवासानांप्रातरेवहिपारणमितिवचनात् **अस्मद्गुरवस्तु** बहूनांकर्मकालानां विनाकारणं बाधापत्तेः प्रागुदग्वचनैश्च । अल्पद्वादश्यामेवापकर्षविधानादपराह्णएवकार्यम् । प्रातःशब्दस्तुसायंप्रातर्द्विजातीनामशनंश्रुतिचोदितमितिवदपराह्णवाचित्वेप्युपपन्नः । नचवाक्यवैय्यर्थ्यंपुनर्भोजनं सायंपारणनिवृत्यर्थत्वात्तस्येत्याहुः **प्रमादेनएकादश्युपवासातिक्रमेअपरार्केवाराहे** एकादशीविद्धुताचेद्द्वादशीपरतःस्थिता ॥ उपोष्याद्वादशीतत्रयदीच्छेत्परमंपदमिति ॥ कैश्चित्तुविष्णुनाचेदितिपठितम् । अत्राविरोधिनोनियमाःसर्वव्रतेषुबोद्धव्याः । अन्येचनवरात्रेवक्ष्यंतेइतिदिक् ॥

इतिश्रीरामकृष्णभट्टात्मजकमलाकरभट्टकृतेनिर्णयसिंन्धौएकादशीनिर्णयः ॥

द्वादशीतुपूर्ववयुग्मवाक्यात् । द्वादशीतुप्रकर्तव्याएकादश्यायुताप्रभो इतिस्कांदाच्च । त्रयोदशीतुसर्वमतेशुक्लापूर्वाकृष्णोत्तरा । त्रयोदशीतिथिःपूर्वःसितोत्थाऽसितःपश्चादितिदीपिकोक्तेः । शुक्लात्रयोदशीपूर्वापराकृष्णात्रयोदशीतिमाधवाच्च । चतुर्दशीसर्वमते कृष्णापूर्वाशुक्लोत्तरा । उपवासेतुद्वावपिपरेतिमदनरत्ने । पौर्णमास्यमावास्येतु सावित्रीव्रतंविनापरेग्राह्ये । भूतविद्धेनकर्त्तव्येदर्शपूर्णेकदाचन ॥ वर्जयित्वामुनिश्रेष्ठसावित्रीव्रतमुत्तममिति । ब्रह्मवैवर्तात् **अमायांयोगविशेषमाहाऽपरार्के शातातपः** अमावास्यांभवेद्वारोयदाभूमिसुतस्यवै ॥ जाह्नवीस्नानमात्रेणगोसहस्रफलंलभेत् ॥ अमांवैसोमवारेणरविवारेणसप्तमी ॥ चतुर्थीभौमवारेण विषुवत्सदृशंफलम् त

त्रैवव्यासः सिनीवालीकुहुर्वापि यदिसोमदिनेभवेत् ॥ गोसहस्रफलंदद्या त्स्नानंवैमौनिनाकृतम् हेमाद्रौवृहन्मनुः श्रवणाश्विधनिष्ठार्द्रानागदैवतम स्तके ॥ यद्यमारविवारेणव्यतीपातःसउच्यते ॥ नागदैवतंआश्लेषा । मस्त कोमृगाशिरा प्रथमपादइत्यन्ये सचसर्वेषां । अथेष्टिकालःगोभिलः पक्षां ताउपवस्तव्याःपक्षादयोऽभियष्टव्याइति । उपवासोन्वाधानम् । तत्रमध्या ह्नेतत्पूर्ववापर्वप्रातिपत्संधौतद्दिनेयागः । पूर्वाह्नेवाथमध्याह्ने यदिपर्वसमाप्य ते ॥ उपोष्यतत्रपूर्वेद्युस्तदहर्यागइष्यतइतिलौगाक्षिवचनात् तत्रद्वेधावि भागः आवर्तनात्तुपूर्वाह्नोह्यपराह्णस्ततःपरः ॥ मध्याह्नस्तुतयोःसंधिर्यदाव र्तनमुच्यतइति ॥ मदनरत्नेवचनात् । मध्याह्नादूर्ध्वंसंधौमाधवमतेपरेऽह्नि यागः । अपराह्णेऽथवारात्रौयदिपर्वसमाप्यते ॥ उपोष्यतस्मिन्नहनिश्वोभूते यागइष्यतइतिलौगाक्षिणोक्तेः ॥ हेमाद्रिस्त्वपराह्णसंधावपिपरदिनेप्रतिपच्च तुर्थीशेचंद्रोदयेचसतिद्वितीयादिष्वत्यंतक्षयेसतिपूर्वेद्युर्यागः । पर्वणोंशेद्विती येतुयष्टव्यंतुद्विजातिभिः ॥ द्वितीयासहितंयस्माद्दूषयंत्याश्वलायनाइति ॥ द्वितीयेत्वितिकैमुतिकन्यायेनतुर्यांशपरम् तुर्यांयेत्वितिशूलपाणौ । पाठःस्प ष्टार्थएव तथा भूतापंचदशीपूर्णाद्वितीयाक्षयगामिनी ॥ चरुरिष्टिरमायांस्या द्भूतेकव्यादिकीक्रियेतिबौधायनवचनाच्चेत्यूचिवान् मदनरत्नेपि चतुर्दशी चतुर्यामाअमावास्यानदृश्यते ॥ श्वोभूतेप्रतिपच्चेत्स्यात्पूर्वांतत्रैवकारयेदिति यत्तु माधवः यस्तुवाजसनेयीस्यात्तस्यसंधिदिनात्पुरा नक्काप्यन्वाहितिः किंतुसदासंधिदिनोहिसेत्याह यच्चकालादर्शेप्युक्तम् आवर्तनादधःसंधि र्यद्यन्वाधायतद्दिने ॥ परेद्युरिष्टिरित्याहुर्विप्रावाजसनेयिनइति यच्चमदन रत्ने मध्यंदिनात्स्यादहनीहयस्मिन्प्राक्पर्वणःसंधिरियंतृतीया ॥ साखर्वि कावाजसनेयिमत्यातस्यामुपोष्याथपरेद्युरिष्टिरिति ॥ एतत्पौर्णमासीपरमि तितत्रैव ॥ आवर्तनोर्ध्वमर्वागस्ताद्रात्रौवासमासौद्दे । मध्याह्नादर्वाक्स मासातृतीयेत्यर्थः । तत्कर्कभाष्यादेवजानीश्चानंतभाष्यादिसकलतच्छा खीयग्रन्थविरोधात् । वृद्धानादराच्चोपेक्ष्यम् । पौर्णमास्यांविशेषमा

हकात्यायनः संधिश्चेत्संगवादूर्ध्वं प्राक्पर्यावर्तनाद्रवेः ॥ सापौर्णमासीविज्ञेयासद्यस्कालविधौनरैः **अमायांविशेषमाहबौधायनः** द्वितीयात्रिमुहूर्तीचेत्प्रतिपद्यापराह्णिकी ॥ अन्वाधानंचतुर्दश्यांपरतःसोमदर्शनात् **कात्यायनश्च** यजनीयेऽह्निसोमश्चेद्वारुण्यांदिशिदृश्यते ॥ तत्रव्याहृतिभिर्हुत्वादंडंदद्याद्द्विजातयइति ॥ एतद्बौधायनवाजसनेयिविषयम् तैत्तिरीयश्रुतौतुचंद्रदर्शनेऽपियागउक्तः । एषांवैसुमनानामेष्टिर्यामभ्यजानन् । पश्चाच्चंद्रमाअभ्युदेत्यस्मिन्नेवास्मैलोकेर्धुकंभवतीति । श्रुत्यंतरेऽपि । य दहःपश्चाच्चंद्रमाअभ्युदेतितदहर्यजन्निमांलोकानभ्युदेतीति । इदं बह्वृचापस्तंबविषयम् । मदनरत्नेप्येवम् । आपस्तंबभाष्यार्थसंग्रहेप्येवम् । अतः पक्षद्वयस्यस्वस्वसूत्राद्व्यवस्थेतितत्वम् । दूषयंत्याश्वलायनाइतितुपूर्वाह्णसंधिविषयमितिमाधवः शेषपर्वणीष्टौविशेषमाहमाधवीयेगार्ग्यः प्रतिपद्यप्रविष्टायांयदिचेष्टिःसमाप्यते ॥ पुनःप्रणीयकृत्स्नेष्टिःकर्तव्यायागवित्तमैः गृह्याग्नेर्नायंनियमइतिमदनपारिजातः । एवंपर्वांत्यांशःप्रतिपदश्चत्रयोऽशायागकालउक्तः । क्वचित्प्रतिपत्तुर्यांशेऽपियागः । संधिर्यद्यपराह्णेस्याद्यागंप्रातःपरेहनि कुर्वाणःप्रतिपद्भागेचतुर्थेपिनदुष्यतीतिवृद्धशातातपोक्तेः । एतत्पूर्णिमापरमितिमदनरत्ने । पर्वणिप्रतिपदःक्षयस्यवृद्धेश्चार्द्धंप्रक्षिप्यसंधिर्ज्ञेयः **तदाह माधवः** वृद्धिःप्रतिपदोयास्तितदर्धेपर्वणिक्षिपेत् ॥ क्षयस्यार्द्धंतथाक्षिप्त्वा संधिर्निर्णीयतांसदेति । **कात्यायनोपि** परेह्णिघटिकान्यूनास्तथैवाभ्यधिकाश्चयाः ॥ क्षिप्त्वातदर्धपूर्वस्मिन्ह्रासवृद्धीप्रकल्पयेदिति ॥ एवंस्मार्तस्थालीपाकेपिज्ञेयम् । तत्रेष्टिस्थालीपाकाबाधानगृहप्रवेशनीयहोमानंतरभाविन्यांपौर्णमास्यांप्रारंभणीयौनतुदर्शे । यद्यारंभेमलमासपौषमासगुरुशुक्रास्तादिभवतितदाप्यारंभःकार्यः यानितु उपरागोधिमासश्चयदिप्रथमपर्वणि ॥ तथामलिम्लुचेपौषेनान्वारंभणमिष्यते॥ गुरुभार्गवयोर्मौढ्येचंद्रसूर्यग्रहेतथेतिसंग्रहवचनानितानिआलस्यादिनातिक्रांतिशुद्धकालप्रारंभविषयाणि । नामकर्मचदर्शेष्टिंयथाकालंसमाचरेत् अतिपातेसतितयोःप्रशस्तेमासिपुण्यभइत्यपरार्के

गर्गवचनादितिप्रयोगपारिजाते । उक्तंचैतत्प्रयोगरत्नेभट्टैः कालादर्शेतु । नामकर्मचजातेष्टिमितिपाठः **याज्ञिकास्तु** आधानानंतरापौर्णमासीचेन्म लमासगा ॥ तस्यामारंभणीयादीन्नकुर्वीतकदाचनेतित्रिकांडमंडनवचनाच्छु द्धकालएवविभ्रष्टेष्टिंकृत्वारंभंकुर्यादित्याहुः **कालादर्शेस्मृतिसंग्रहेपि** आ रंभेदर्शपूर्णेष्ट्योरग्निहोत्रस्यचादिमम् ॥ प्रतिष्ठाःपंचकूर्माद्यामलमासेविवर्ज येदिति ॥ अथविकृतीष्टिः **तत्रापस्तंबः** यदीष्ट्यायादिपशुनायादिसोमेनयजे तसोमावास्यायांपौर्णमास्यांचेति । अत्रप्रकृतितःकालेसिद्धेपिसद्यस्कालता विधेया । तृतीयायांसांगेत्वेनोक्तेः । अत्रपौर्णमास्यमावास्याशब्दाभ्यांतदंत्य क्षणोगृह्यते । तेनतद्वत्यहोरात्रइत्यर्थमाहरामांडारः **माधवोपि** इष्ट्यादिवि कृतिःसर्वापर्वण्येवेतिनिर्णयइति **अत्रविशेषमाहत्रिकांडमंडनःकात्या यनश्च** आवर्तनात्प्राग्यदिपर्वसंधिःकृत्वातुतस्मिन्प्रकृतिंविकृत्याः ॥ तदै वयागःपरतोयदिस्यात्तस्मिन्विकृत्याःप्रकृतेपरेद्युरिति ॥ धूर्त्तस्वाम्यादयोप्ये वमाहुः । यदीष्ट्येतिसांगायाविकृतेःपर्वकालत्वादावर्तनात्प्राक्संधौसंधिम भितोयजेतेतिप्रकृतेःप्रतिपदिसमाप्तिनियमात् प्रकृत्यनंतरप्रतिपदिविकृत्य योगात्पूर्वेद्युर्विकृतिरित्युक्तं **तंत्ररत्नेपार्थसारथिना** यद्यपिप्रकृतेःपूर्वत्वाद पूर्वमंतेस्यादित्यापस्तंबेनोक्तम्।तथापिहेतुवादेनश्रुतिमूलत्वाभावादंगंवासम भिव्याहारादितिवदप्रामाण्यमितितदाशयः **आग्रयणेतु विशेषंवक्ष्यामः** अन्वारंभणीयाचतुर्दश्यांकार्येतिहिरण्यकेशिवृत्तौमातृदत्तीयेन्येषांपर्वण्येव। पशौसोमेचकालांतरमप्याहबौधायनः । अमावास्येनवाहविष्ट्यानक्षत्रे चेतिशुक्लपक्षेकृत्तिकादिविशाखांतेषुदेवनक्षत्रेष्वितिकेशवस्वामीव्याचख्यौ। चातुर्मास्येष्वपिद्वादशाहयथाप्रयोगपक्षयोर्नक्षत्रेष्वप्यारंभः । यावज्जीवसां वत्सरप्रयोगयोस्तुफाल्गुन्यांचैत्र्यांवारंभः **पशौतुविशेषमाहकात्यायनः** अर्धादह्नोभवतिनियतंपर्वसंधिःपरस्तात्कृत्वातस्मिन्नहनितुपशुंसद्यएवह्रद्य हंवा ॥ आरभ्याथप्रकृतिरथचेत्पर्वसंधिःपुरस्तात्कृत्वातस्मिन्प्रकृतिमथतु स्यात्पशुःसद्यएव ॥ अधिकारपशुस्त्वग्नीषोमीयेणसवनीयेनवा समान

तंत्रोक्तकार्यइतित्रिकांडमंडनः **सोमेत्वाहापस्तंबः** अमावास्यायादीक्षा यजनीयेवामावास्यायायजनीयेवासुत्यमहःपौर्णमास्यांदीक्षायजनीयेवापौर्णमास्यांयजनीयेवासुत्यमहरिति **लाट्यायनसूत्रेपि** पूर्वपक्षस्यप्रथमेहनि दीक्षेतदृष्ट्वावानक्षत्रयोगेचेतिपूर्वपक्षः शुक्लपक्षः नक्षत्रयोगेचेत्ययमर्थः । चैत्र्यादिपूर्णिमायाश्चित्रानक्षत्रयोगेदीक्षेतेति । आधानंतुपर्वणिनक्षत्रेषुचोक्तम् । तत्रपर्वनक्तंगार्हपत्यमादधीतेत्यादिकर्मकालव्यापिग्राह्यम् । दिनद्वये तत्त्वेपरंग्राह्यम् । संकल्पस्यपर्वणिलाभात् । पूर्वनक्षत्रयोगेतदेवग्राह्यम् । यत्रत्रीणिसन्निपतितान्यृतुर्नक्षत्रंचपर्वतत्समृद्धंविप्रतिषेधेऋतुर्नाक्षत्रंचबली यइति हिरण्यकेशिसूत्रात् । ऋतुर्वसंतेब्राह्मणोग्नीनादधीतेत्यदि **रेणुकारिकायांतु** माघादिपंचमासेषुश्रावणेवाश्विनेतथा ॥ मार्गशीर्षेशुक्लपक्षेआधानमथकारयेदित्युक्तम् । अत्रमूलंमृग्यम् । आधाननक्षत्राणित्वापस्तंबसूत्रेकृत्तिकारोहिणीमृगशीर्षपुनर्वसुपुष्यपूर्वोत्तरापूर्वाषाढोत्तराषाढाहस्तचित्राविशाखाऽनुराधाश्रवणोत्तराभाद्रपदाइति । **सोमपूर्वाधानेविशेषमाहापस्तंबः** सोमेनयक्ष्यमाणाआदधानोनर्तून्सूर्क्षेन्ननक्षत्रमिति अत्रप्रकरणादाधानकालबाधः तेनसोमस्यवसंतकालतानबाध्यतइतिरुद्रदत्तवृत्तौ नारायणवृत्तौचोक्तम् । तंत्ररत्नेवार्तिकेच । तेवाएतेउभयेअपहतपाप्मानोऋतवः। एषवाउद्यन्नादित्यएषांपाप्मनोपहंता। यदेवैनंकदाचनयज्ञमुपनमेदथादधीतेत्यत्रोत्तरायणरूपंदेवंदीक्षणायनरूपंचपित्र्यमित्युभयमृतुत्रयंसोमाधानेशतपथेविशिष्यविहितम्। तदेकवाक्यतयाशाखांतरेपिनर्तून् सूर्क्षेदित्यत्रसोमकालबाधएव । आधानकालबाधस्ययदेवैनंश्रद्धोपनमेत्तदादधीतेत्यस्यांशाखायांवाक्यांतरेण सिद्धत्वात्सोमकालबाधार्थमेवेदमित्युक्तम् । धूर्तस्वामीतुसोमस्यापियऋतुस्तस्यापिनसूर्क्षेदितिलिखनादुभयकालबाधंमन्यते श्रीरामांडारस्तुकालांतरविधानंवासर्वकालानादरोवेतिपक्षद्वयमुक्तवान् । तत्राद्यकृत्तिकादिकालांतरस्ययथाधानेवसंताद्यबाधेनविधानम्। तथासोमेप्युदगयनपूर्वपक्षपुण्याहसन्निपातेयज्ञकालानादेशइतिछंदोगसूत्रोक्तोदगयनबा

धेनसोमाभिसंधिरूपकालांतरविधानादुदगयनंत्वपेक्षतइत्युक्तम्।द्वितीयपक्षे तुयदैवैनंयज्ञउपनमेदिति सर्वकालानादरउक्तइतिभारद्वाजसूत्रात्सर्वशब्द स्यचविश्वजित्सर्वपृष्ठइतिवद्द्वयोरप्रयोगात् सर्वकालबाधइति । तेनदक्षि णायनेपिभवतीत्युक्तम् । षड्गुरुभाष्येदेवत्रातभाष्येतंत्ररत्नेचषट्स्वपिऋतु षुभवतीत्युक्तमितिदिक् । **श्राद्धेत्वमावास्यात्रेधा** विभक्तदिनतृतीयांशेयोप राह्णभागस्तद्व्यापिनीसाग्निकैर्ग्राह्या । पिंडान्वाहार्यकंश्राद्धंक्षीणेराजनिशस्य ते ॥ वासरस्यतृतीयेंशेनातिसंध्यासमीपतइतिकात्यायनोक्तेः ॥ दर्शश्राद्धं तुयत्प्रोक्तंपार्वणंतत्प्रकीर्तितम् ॥ अपराह्णेपितृणांचतत्रदानंप्रशस्यतइति ॥ शातातपोक्तेश्च । दिनद्वयेतत्रसत्त्वेसर्वापराह्णव्यापीदर्शोग्राह्यः । यदुभयेद्यु रेषविहितः सर्वाऽपराह्णस्थितइतिदीपिकोक्तेः **यत्तुकार्ष्णाजिनिः** भूत विद्धाममावास्यांमोहादज्ञानतोपिवा ॥ श्राद्धकर्मणियेकुर्युस्तेषामायुःप्रहीयते इतितदपराह्णेचतुर्दशीवेधपरमितिश्राद्धहेमाद्रिः । अपराह्णव्याप्तिपरमितिमा धवः दिनद्वयेऽपराह्णव्याप्त्यभावेंशतोव्याप्तौचतिथिक्षयेपूर्वेतिहेमाद्रिः । य-दाचतुर्दशीयामंतुरीयमनुपूरयेत् ॥ अमावास्याक्षीयमाणातदैवश्राद्धमिष्यत इतिकात्यायनोक्तेः ॥ चतुर्दश्याश्चतुर्थयामंदर्शःपूरयेत् । चतुर्दशीयामत्रयं स्यादित्यर्थःक्षीयमाणापरदिनेऽपराह्णव्यापिनीनेत्यर्थः **व्यतिरेकमाह** वर्ध मानाममावास्यांलक्षयेदपरेहनि ॥ यामांस्त्रीनधिकान्वापिपितृयज्ञस्ततोभवे त् ॥ ततःश्राद्धंच **दिनद्वयेऽपराह्णव्याप्त्यादौतिथिवृद्धौचहारीतः** त्रि-मुहूर्तीचकर्तव्यापूर्वाखर्वाचबह्वृचैः।कुहूरध्वर्युभिःकार्यायथेष्टंसामगीतिभिः ॥ त्रिमुहूर्ताभावेतुपूर्वानेत्यर्थः । पिंडपितृयज्ञस्तुकात्यायनैर्यागदिनात्पूर्वेद्युः कार्यः । पूर्वोवांगत्वात्पिंडपितृयज्ञइतितत्सूत्रात् । व्याख्यातंचैतत्कर्काचा र्यैः । पूर्वएवदर्शात्पिंडपितृयज्ञोनपश्चात् । कुतःअंगत्वात् । तथाचश्रुतिः त-स्मात्पूर्वेद्युःपितृभ्यःक्रियतउत्तरमहर्देवान्यजंतइति । पूर्वेद्युःपितृभ्योयज्ञंनि-पृणीयप्रातर्देवेभ्यःप्रतनुतइतिचतेनतन्मतेअंगमेवासौ।तदुक्तम्।अंगंवासम भिव्याहारादिति।तेनकर्कमतेचतुर्दशी युक्तदर्शेपिंडपितृयज्ञइति । श्रीअनंत

भाष्येतुपरेद्युरित्युक्तम्। अत्रद्वेधाप्याचारोदृश्यते।आपस्तंबानांतुपरदिनेमुहू र्त्तमपिदर्शसत्त्वेतत्रैवपितृयज्ञः **तदाहआपस्तंबः** अमावास्यायांयदहश्चंद्रम संनपश्यतितदहःपिंडपितृयज्ञंकुरुतइति।अस्यरुद्रदत्तीयाव्याख्यापिंडैर्युक्तः पितृयज्ञःपिंडापितृयज्ञःसचकर्मातरंनतुदर्शशेषः**यथावक्ष्यति** पितृयज्ञःस्वका लविधानादंगंस्यादिति। तंचयदहश्चंद्रमसंनपश्यतिपंचदश्यांप्रातिपदिवातद हःकुरुते। यदहस्तयोःसंधिस्तदरहरित्यर्थइति **रामांडारोप्याह** पिंडपितृयज्ञ स्तुपर्वसंधिमहोरात्रापराह्णइति । अतःपर्वसंधिदिनेपितृयज्ञः । शतपथश्रु तिरपियदैवैषनपुरस्तान्नपश्चाद्दृश्यतेथपितृभ्योददातीति । पर्वसंधिदिनेहि पूर्वतःपश्चाद्वाचंद्रोनदृश्यतएवेत्यर्थः**सत्याषाढोपि** पितृयज्ञंप्रक्रम्यदृश्यमाने तुपोष्यश्वोभूतेयजतइत्याह **हेमाद्रिस्तु** अमावास्याशब्दस्तिथिवचनएव। पू र्वोक्तापस्तंबसूत्रेयदुक्तम्नपश्यंतीतितत्रक्षयोरभिप्रेतः । अतश्चतुर्दश्यांचंद्र मसश्चक्षीणत्वात्तदुक्तदर्शेपितृयज्ञः। पितृयज्ञंतुनिर्वर्त्यविप्रश्चंद्रक्षयेऽग्निमानि तिमनूक्तेः । यदुक्तंयदहस्त्वेवदर्शनंनैतिचन्द्रमाः । तत्क्षयापेक्षयाज्ञेयंक्षी णेराजनिचेत्यपीति यदुक्तंदृश्यमानेपितच्चतुर्दश्यपेक्षयेतिचकात्यायनोक्तेः। दृश्यमानेप्येकइतिगोभिलोक्तेः। तस्यांसंध्यागतःसोमोमृणालमिवदृश्यते॥ अपराह्णेक्षयस्तस्यांपिंडानांकरणंध्रुवमितिहारीतोक्तेश्च **चंद्रक्षयकालश्चोक्तः कात्यायनेन** अष्टमेंशेचतुर्दश्याःक्षीणोभवतिचन्द्रमाः ॥ अमावास्याष्ट मेंशेतुपुनःकिलभवेदणुरिति ॥ तेनपूर्वेद्युरेवापितृयज्ञइत्यूचिवान् **कर्काचा र्यैरपि** अपराह्णेपिंडपितृयज्ञश्चंद्रादर्शनेमावास्यायामितिकात्यायनसूत्रेऽद र्शनेनक्षयएवोक्तः। तस्मिन्क्षीणेददातीतिश्रुतेः । अतस्त्वन्मतेचतुर्दशीयु क्तदर्शेपितृयज्ञेसतिपरदिनेयागोर्थात्सिद्धः । तदेतत्सर्वोत्कृष्टमपिहेमाद्रिक र्काद्रिव्याख्यानमापस्तंबैरनभ्युपगमात्कातीयबौधायनादिविषयम् । आश्व लायनानामपिशेषपर्वणिपिंडपितृयज्ञः **तथाचसूत्रम्** अमावास्यायामपराह्णे पिंडपितृयज्ञइति ॥ **अत्रनारायणवृत्तिः** अमावास्याशब्दः प्रतिपत्पंचद श्योःसन्धिवचनोप्यत्रापराह्णशब्दसमन्वयात्तद्वत्यहोरात्रेवर्तते । तस्यापरा

ह्नेह्नश्चतुर्थेभागेपिंडपितृयज्ञःकार्यः । औपवसथ्ययजनीयेवाहनियदात्वहो रात्रसंधौतिथिसंधिःस्यात्तदौपवसथ्येएवाहनिक्रियतइति । अतएवमुहूर्त मप्यमावास्याप्रतिपद्यपिचेद्भवेत् । तद्दत्तमक्षयंज्ञेयंपर्वशेषंतुपर्ववदितिहेमा द्रौवचनंपिंडपितृयज्ञपरमुक्तम् । प्रयोगपारिजातेअयंचस्मार्ताग्निमतासंपूर्णे दर्शेश्राद्धव्यतिषंगेणकार्यः । व्यतिषंगोनामोभयोःसहानुष्ठानम् । एतच्चस्था लीपाकेनसहपिंडार्थमुत्धृत्येतिसूत्रेवृत्तिकृतोक्तम् **खंडपर्वणितुकेचिदाहुः** पूर्वेह्निपिंडपितृयज्ञव्यतिषंगेणश्राद्धंकृत्वापरेह्निकेवलः पिण्डपितृयज्ञःकार्यः । वृत्तिकृतात्वान्वाष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणं ॥ काम्यामाभ्युदयेष्टम्या मेकोद्दिष्टमथाष्टममित्युदाहृत्य पूर्वेषुचतुर्षु स्थालीपाकादुद्धृत्याग्नौकरणमित्यु क्तेदर्शश्राद्धस्थालीपाकोनियतइतिगम्यते । स्थालीपाकश्चपितृयज्ञएवेतिपूर्व दिनेव्यतिषंगःप्रसिद्धः । प्रयोगपारिजातेतुवार्षिकश्राद्धादेरपिव्यतिषंगउक्तः । किमुतदर्शश्राद्धस्य । न्यायविदस्त्वाहुः । सूत्रस्यवृत्तेश्चसम्पूर्णदर्शविषयत्वा त् खंडपर्वणिपूर्वेदिनेकेवलंश्राद्धंपरदिनेचकेवलः पितृयज्ञःकार्यःअतएवोक्तं वृत्तिकृता । नात्रपूर्वस्थालीपाकश्चोद्यतेसर्वश्राद्धेषुप्रसंगादितिप्रयोगपारिजा तोक्तिरप्येतद्विषयैव । पूर्वदिनेचश्राद्धेग्नौकरणमेवनपाणिहोमः । चतुर्ष्वाद्ये षुसाग्नीनांवह्नौहोमोविधीयते ॥ पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीतिपरि शिष्टेनियमात् ॥ नचलौकिकाग्नौपक्वस्यकथंगृह्याग्नौहोमः । नान्याग्नौपक्व मन्याग्नौजुहुयादितिनिषेधात् । मैवं । श्राद्धस्यगृह्यत्वेनस्मार्ताग्नौपचनाग्नौवाक र्तव्यत्वात् । तस्मात्पूर्वेद्युःकेवलंश्राद्धंनव्यतिषंगः । इदमेवचयुक्तंआहिता ग्निनातुसर्वाधानिनार्धाधानिनावासंपूर्णेखंडेवादर्शे श्रौताग्नौपृथगेवपितृयज्ञः कार्योनतुदर्शश्राद्धव्यतिषंगेणेतिविस्तरभीतेर्विरामः । **सम्पूर्णेदर्शेचविशेषमा हुलौगाक्षिः** पक्षांतंकर्म्मनिर्वर्त्यवैश्वदेवंचसाग्निकः ॥ पिण्डयज्ञंततः कु र्यात्ततोन्वाहार्यकंबुधइति ॥ पक्षांतंकर्मान्वाधानम् । अन्वाहार्यकंदर्शे श्राद्धम् । अयमेवसाग्नेर्जीवत्पितृकस्यापिण्डपितृयज्ञकालोज्ञेयः । तस्या पिकात्यायनेनहोमांतमनारम्भोवेत्याम्नानात् **पिण्डपितृयज्ञाकरणेप्राय**

याश्चित्तमाहपराशरमाधवीयेकात्यायनः पितृयज्ञात्ययेचैववैश्वदेवात्ययेपिच ॥ भोजनेपतितान्नस्यचरुर्वैश्वानरोभवेदित्यलम् । **प्रकृतमनुसरामः** निरग्निकादिभिस्त्वमावास्यापराह्णव्याप्त्यभावेतुकुतुपकालव्यापिनीग्राह्या । भूतविद्धाप्यमावास्याप्रतिपन्मिश्रितापिवा ॥ पित्र्येकर्मणिविद्धाद्विर्ग्राह्या कुतुपकालिकीतिहारीतोक्तेःइदंचनिरग्निकादिविषयम् ।सिनीवालीद्विजैःकार्यासाग्निकैःपितृकर्मणि ॥ स्त्रीभिःशूद्रैःकुहूःकार्यातथाचानग्निकैर्द्विजैरितिलौगाक्षिवचनात्अत्रसाग्निरौपासनाग्निरपीतिमदनपारिजातेउक्तम् । कुतुपश्चापराह्णव्याप्त्यलाभेतुकल्पः । अपराह्णद्वयव्यापीयदिदर्शस्तिथिक्षये ॥ आहिताग्नेःसिनीवालीनिरग्न्यादेःकुहूर्मतेतिजाबालिनाभावेविधानात् ॥ तेनसाग्नीनांनिरग्नीनांवापराह्णव्यापिन्येमुख्या ॥ तिथिसाम्यवृद्धिक्षयैःसमव्याप्तौखर्वादिनानिर्णयः । वैषम्येधिकादिनद्वयेपराह्णस्पर्शकुतुपव्यापिनीतिमाधवः । इदमेवयुक्तम् । हेमाद्यादिमतेकुतुपव्यापिन्येवनिरग्न्यादेर्मुख्या । अत्रसाग्निरौपासनाग्निरपीतिमदनपारिजातेउक्तम् । सिनीवालीदृष्टचन्द्रा **तथाचव्यासः** दृष्टचंद्रासिनीवालीनष्टचंद्राकुहूस्मृतेति ॥ पूर्वदिनेपरदिनएववातद्व्याप्तित्वेसैवग्राह्या । अंशव्यापित्वेवैषम्येधिककालव्यापिनीग्राह्या । दिनद्वयेशतःसमव्याप्तौतिथिक्षयेपूर्वाबृद्धौसाम्येचपरा । तिथिक्षयेसिनीवालितिथिवृद्धौकुहूःस्मृता ॥ साम्येपिचकुहुर्ज्ञेयावेदवेदांगवेदिभिरितिप्रचेतोवचनात्दिनद्वयेसम्पूर्णकुतुपव्याप्तिस्तुतिथिवृद्धावेवभवतीत्यनन्तरवचनात्परैवेति । कुतुपस्त्वह्नोमुहूर्त्तावित्रेयादशपंचचसर्वदा तत्राष्टमोमुहुर्त्तोयःसकालःकुतुपःस्मृतइतिमात्स्योक्तेः । तुलादानपितृदेवप्रीत्यर्थोपवासादौतुपराग्राह्येत्यन्यत्रविस्तरःदर्शेचमासिकवार्षिकादिश्राद्धप्राप्तौकालादर्शेविशेषउक्तः दर्शस्यचोदकुंभस्य दर्शमासिकयोरपि ॥ नित्यस्यचाब्दिकस्यापिदार्शिकाब्दिकयोरपीत्युक्त्वा ॥ सम्पातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत् ॥ निमित्तानियतिश्चात्रपूर्वानुष्ठानकारणमिति **अत्रक्रमोनिर्णयदीपेउक्तः** नष्टचन्द्रेयदाकालेक्षयाहदिवसोभवेत् ॥ वैश्वदेवंक्षयश्राद्धंकुर्यात्प्राग्दर्शकर्मणः ॥ अमाश्रा

ङ्चानुपनीतोपिकुर्यात् **श्राद्धंशूलपाणौ** आमावास्याष्टकाकृष्णपक्षपंच दशीषुचेत्युपक्रम्य । एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वसु ॥ श्राद्धंसाधारणंनाम सर्वकामफलप्रदम् ॥ भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः शूद्रोप्यमन्त्रवत्कुर्यादनेनविधिनाबुधइतिमात्स्योक्तेः **अमाश्राद्धातिक्रमेप्रायश्चित्तमुक्तमृग्विधाने** न्यूषूवाचंजपेन्मंत्रंशतवारंदिनेदिने ॥ अमाश्राद्धंयदानास्तितदासम्पूर्णमेतितत् ॥ अत्रपूर्वोक्तसाग्निकपदेनाहिताग्निस्मार्ताग्निमांश्चगृह्यते । विच्छिन्नाग्निकादिश्चनिरग्निकः **तथाचहेमाद्रिरग्नौकरणप्रकरणे** साग्निरग्नावनग्निरतुद्विजपाणावथाप्सुवा ॥ कुर्यादग्नौक्रियांनित्यंलौकिकेनेतिनिश्चितमितिस्मृतिवाक्यमुदाहृत्य यस्तुस्वीकृतौपासनतयासमुच्छिन्नाग्नितया भार्याविधुरतयावाग्निरहितस्तस्यद्विजपाणौजलादौहोमइतिव्याचचक्षे । **मदनपारिजातेप्येवम्** इदमेवसाग्निकानग्निस्वरूपंससर्वत्रज्ञेयम् । **अथग्रहणंनिर्णीयते** तत्रचंद्रग्रहणेयस्मिन्यामेग्रहणंतस्मात्पूर्वप्रहरत्रयंनभुंजीत । सूर्यग्रहेतुप्रहरचतुष्टयेनभुंजीत । सूर्यग्रहेतुनाश्नीयात्पूर्वयामचतुष्टयम् ॥ चन्द्रग्रहेतुयामांस्त्रीन्बालवृद्धातुरैर्विनेति **माधवीयेवृद्धगौतमोक्तेः** ग्रहणंतुभवेदिंदोःप्रथमादधियामतः ॥ भुंजीतावर्तनात्पूर्वंप्रथमेप्रथमादधइतिमार्कंडेयोक्तेश्च ॥अधिऊर्ध्वंननुचंद्रग्रहेयामचतुष्टयनिषेधउचितोनतुसूर्यग्रहेसूर्योदयात्प्राग्भोजनाप्राप्तेः मैवंवचनस्य । प्रथमयामे सूर्यग्रहेसतिपूर्वेद्युःपूर्वरात्रे भोजननिषेधपरत्वात् **चंद्रग्रहेविशेषमाहमाधवीयेवृद्धवसिष्टः** ग्रस्तोदयेविधोःपूर्वनाहर्भोजनमाचरेदिति **द्वयोर्ग्रस्तास्तेतुमाधवीयेव्यासः** अमुक्तयोरस्तगयोरद्याट्टदृष्ट्वापरेहनीति । विष्णुधर्मेपि अहोरात्रंनभोक्तव्यंचंद्रसूर्यग्रहोयदा ॥ मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वाततःपरं ॥ **अहोरात्रनिषेधः सूर्यग्रस्तास्तेमदनरत्नेगार्ग्यः** संध्याकालेयदाराहुर्ग्रसतेशशिभास्करौ ॥ तदहेनैवभुंजीतरात्रावपिकदाचन ॥ सायंसंध्यायांसूर्यग्रस्तास्तेपूर्वेह्निरात्रौचनभोक्तव्यम् । प्रातःसंध्यायांचंद्रस्यग्रस्तास्तेपूर्वेरात्रावुत्तरेह्निचनभोक्तव्यमित्यर्थः । चंद्रग्रस्तास्तेउत्तरदिनेसंध्याहोमादौनदोषः **तदा**

होशनाः ग्रस्तेचास्तंगतेत्विंदौज्ञात्वामुक्त्यवधारणम् ॥ स्नानहोमादिकं कार्यंभुंजीतेंदूदयेपुनः ॥ एतदनाहिताग्निविषयम् । अपराह्णेव्रतोपायनीयम श्नीतेतिकात्यायनोक्तेर्व्रतस्यश्रौतत्वेनविहितत्वेनचप्रबलत्वात् **अद्भिर्व्रतं कुर्यादितिनिर्णयदीपः** रागप्राप्तभोजनेकालनियमोयम् ॥ तेनज्वरादा विवनभोजनमितिकर्कानुसारिणः ॥ बालवृद्धातुराणांतुग्रहयामात्पूर्वमेक यामोनिषिद्धः । सायाह्णेग्रहणंचेत्स्यादपराह्णेनभोजनम् ॥ अपराह्णेनमध्या ह्नेमध्याह्नेनतुसंगवे ॥ भुंजीतसंगवेचेत्स्यान्नपूर्वंभोजनक्रियेतिमार्कंडेयो क्तेः । इदंचबालादिविषयम् । बालवृद्धातुरैर्विनेतिपूर्वोक्तेः । वेधकालेग्र हणेवापक्वमन्नंत्याज्यम् । सर्वेषामेववर्णानांसूतकंराहुदर्शने ॥ स्नात्वाकर्माणि कुर्वीतशृतमन्नंविवर्जयेदिति ॥ हेमाद्रौषट्त्रिंशन्मतात्श्रुतमितितदंतरितस्यो पलक्षणम् । नवश्राद्धेषुयच्छिष्टंग्रहपर्युषितंचयदितिमिताक्षरायांवचनात् **भा र्गवार्चनदीपिकायांज्योतिर्निबंधेमेधातिथिः** आरनालंपयस्तक्रंदधिस्नेहाज्यपाचितम् । मणिकस्थोदकंचैवनदुष्येद्राहुसूतके **मन्वर्थमुक्तावल्या म्** अन्नंपक्वमिहत्याज्यंस्नानंसवसनंग्रहे ॥ वारितक्रारनालादितिलदर्भैर्नदु ष्यति **जलेत्वदोषोगांगविषयः** ग्रहोषितंजलंपीत्वापादकृच्छ्रंसमाचरे दिति **तत्रैवचतुर्विंशन्मतेऽन्यजलस्यदोषोक्तेः । वेधकालेग्रहणेवा भोजनेप्रायश्चित्तमुक्तम् माधवीयेकात्यायनेन** चंद्रसूर्यग्रहेभुक्त्वाप्रा जापत्येनशुद्ध्यति ॥ तस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुद्ध्यतीति । ग्रहणेच त्रिरात्रमेकरात्रंवोपवासःश्रेयोर्थिनाकार्यः । एकरात्रमुपोष्यैवस्नात्वादत्वाचश क्तितः ॥ कंचुकादिवसर्पस्यनिवृत्तिःपापकोशतः ॥ त्रिरात्रंसमुपोष्यैवग्रहणेचं द्रसूर्ययोः ॥ स्नात्वादत्वाचविधिवन्मोदतेब्रह्मणासहेतिहेमाद्रौलैंगोक्तेः **इदं चपुत्र्यतिरिक्तविषयम्** आदित्येहनिसंक्रांतौग्रहणेचंसूर्ययोः ॥ पारणंचो पवासंचनकुर्यात्पुत्रवान्गृहीतिजैमिनिवचनात् । यदातुरवेर्ग्रस्तास्तस्तदापुत्रि णःप्रहरद्वयंहित्वावाबालादिवद्भोजनंनंतूपवासः। सायाह्णेग्रहणंचेत्स्यादितिपू र्वोक्तमार्कंडेयवचनात्सायाह्णेसंगवेक्षीयाच्छारदेसंगवादधः ॥ मध्याह्णेपरतो

क्षीयान्नोपवासो रविग्रहइतिस्मृतेश्चेतिहेमाद्रिः । शारदोऽपसङ्गः । माधवमतेतुपुत्रिणोपितत्रोपवासएव । अहोरात्रंनभोक्तव्यमितिपूर्वोक्तनिषेधस्यतेनापिपालनीयत्वात्उपवासनिषेधस्तुव्रतरूपोपवासपरः । कृष्णैकादशीनिषेधवदिति **मदनरत्नेप्येवम्इदमेवचयुक्तम्वर्धमानस्तु** अहोरात्रंनभोक्तव्यमितिशातातपीयोक्तेः । सूर्याचंद्रमसोर्लोकानक्षयान्यातिमानवइतिफलश्रुतेर्मुक्त्यदर्शनेउपवासः काम्यः । नत्वयंनिषेधइत्याह । तन्न । अत्रव्रतत्वेपिप्रागुक्तविष्णुधर्मेनिषेधावश्यंभावात् **तथाचव्यासः** रविग्रहःसूर्यवारेसोमेसोमग्रहस्तथा ॥ चूडामणिरितिख्यातस्तत्रदत्तमनंतकम् ॥ वारेष्वन्येषुयत्पुण्यंग्रहणेचंद्रसूर्ययोः । तत्पुण्यंकोटिगुणितंयोगेचूडामणौस्मृतम् ॥ अत्रचाद्यंतयोःस्नानंकुर्यात् । ग्रस्यमानेभवेत्स्नानंग्रस्तेहोमोविधीयते ॥ मुच्यमानेभवेद्दानंमुक्तेस्नानंविधीयतइतिहेमाद्रौवचनात् । स्नानंस्यादुपरागादौ मध्येहोमःसुरार्चनमितिब्रह्मवैवर्ताच्च । सर्वेषामेववर्णानां सूतकंराहुदर्शने ॥ सचैलंतूभयेस्नानंसूतकान्नंचवर्जयेदितिवृद्धवसिष्ठोक्तेश्च **सचैलंमुक्तिस्नानपरमितिमदनरत्नेउक्तम्** भार्गवार्चनदीपिकायांचतुर्विंशतिमते मुक्तौयस्तुनकुर्वीतस्नानंग्रहणसूतके ॥ ससूतकीभवेत्तावद्यावत्स्यादपरोग्रहः इदं **चस्नानममंत्रकंकार्यमितिस्मृतिरत्नावल्याम्तत्रतीर्थविशेषोभारते** गंगास्नानंनकुर्वीतग्रहणेचन्द्रसूर्ययोः ॥ महानदीषुचान्यासुस्नानंकुर्याद्यथाविधि ॥ महानदीष्वपिमासविशेषेकाश्चिच्छ्रेष्ठाः । प्रयागंदोविकारेवासान्निहत्याचवारणम् ॥ सरस्वतीचन्द्रभागाकौशिकीतापिकातथा ॥ सिंधुर्गंडकिकाचैवशरयूःकार्तिकादितःमूलंहेमाद्रौस्पष्टम् **व्यासः** इंदोर्लक्षगुणंपुण्यंरवेर्दशगुणंततः ॥ गंगातोयेतुसंप्राप्तेइन्दोःकोटीरवेर्दश ॥ गवांकोटिसहस्रस्ययत्फलंलभतेनरः ॥ तत्फलंलभेतेमर्त्योग्रहणेचन्द्रसूर्ययोः **असंभवेतुमाधवीयेशंखः** वापीकूपतडागेषुगिरिप्रस्रवणेषुच ॥ नद्यांनदेदेवखातेसरसीषूद्धृतांबुनि ॥ उष्णोदकेनवास्नायाद्ग्रहणेचन्द्रसूर्ययोःअत्रतारतम्यमाहमार्कंडेयः शीतमुष्णोदकात्पुण्यमपारक्यंपरोदकात् ॥ भूमिष्ठमुद्

धृतात्पुण्यंततःप्रस्रवणोदकम् ॥ ततोपिसारसंपुण्यंततःपुण्यंनदीजलम् ॥ तीर्थतोयंततःपुण्यंमहानद्यंबुपावनम्॥ ततस्ततोपिगंगांबुपुण्यंपुण्यस्ततोंबुधिरिति॥ उष्णोदकमातुरविषयम् **तथा** गोदावरीमहापुण्याचन्द्रेराहुसमन्विते ॥ सूर्येचराहुणाग्रस्तेतमोभूतेमहामुने ॥ नर्मदातोयसंस्पर्शेकृतकृत्याभवंतिहि **पृथ्वीचन्द्रोदयेप्रभासखंडे** गावोनागास्तिलाधान्यंरत्नानिकनकंमही ॥ संप्रदायकुरुक्षेत्रेयत्फलंलभतेनरः ॥ तदिंदुग्रहणेंभोधौस्नानाद्भवति षड्गुणम् **तत्रैवसौरपुराणेंबुधिस्नानमुपक्रम्य** दानानियानिलोकेषुविख्यातानिमनीषिभिः॥तेषांफलमवाप्नोतिग्रहणेचन्द्रसूर्ययोः। **देवीपुराणे** गंगाकनखलंपुण्यंप्रयागःपुष्करंतथा ॥ कुरुक्षेत्रंमहापुण्यंराहुग्रस्तेदिवाकरे॥स्नानासंभवेस्मरणंवाकार्यम्॥स्मृत्वाशतक्रतुफलंदृष्ट्वासर्वाघनाशनं॥ स्पृष्ट्वागोमेधपुण्यंतु पीत्वासौत्रामणेर्लभेत्॥स्नात्वावाजिमखंपुण्यंप्राप्नुयादविचारतः॥रविचंद्रोपरागेचअयनेचोत्तरेतथेतिमार्कंडेयोक्तेः **अत्रश्राद्धमाहऋष्यशृङ्गः** चंद्रसूर्यग्रहेयस्तुश्राद्धंविधिवदाचरेत्॥तेनैवसकलापृथ्वीदत्ताविप्रस्यवैकरे **भारते** सर्वस्वेनापिकर्तव्यंश्राद्धंवैराहुदर्शने ॥ अकुर्वाणस्तुनास्तिक्यात्पंकेगौरिवसीदति **विष्णुः** राहुदर्शनदत्तंहिश्राद्धमाचन्द्रतारकम् ॥ इदंचामान्नेनहेम्नावाकार्यैनत्वन्नेन । आपद्यतन्नौतीर्थेचचंद्रसूर्यग्रहेतथा ॥ आमश्राद्धंप्रकुर्वीतहेमश्राद्धमथापिवेति **शातातपोक्तेरितिहेमाद्रिमाधवादयः। अपरार्कस्तु** एतद्द्विजातीनांपाकाभावेद्रष्टव्यंतीर्थश्राद्धवत्। पाकाभावेद्विजातीनामामश्राद्धं विधीयते ॥ इतिसुमंतूक्तेः । सैंहिकेयोयदासूर्यंग्रसतेपर्वसंधिषु ॥ गजच्छायातुसाप्रोक्तातस्यांश्राद्धंप्रकल्पयेत्॥घृतेनभोजयेद्विप्रान्घृतंभूमौसमुत्सृजेदिति **वायवीयोक्तेश्चेत्याह । विज्ञानेश्वरोप्याह** ग्रहणश्राद्धेभोक्तुर्दोषोदातुस्त्वभ्युदयइति । सूतकेमृतकेभुंक्तेगृहीतेशशिभास्करे ॥ छायायांहस्तिनश्चैवनभूयःपुरुषोभवेदित्यापस्तंबेनभोजननिषेधात् । अयंचनिषेधःश्राद्धभोक्तुर्हस्तिच्छायासाहचर्यात् । अत्रग्रहणनिमित्तकश्राद्धेनैवामासंक्रांत्यादिनैमित्तिकानांसिद्धिः। दार्शिकालभ्ययोरपीतिकालादर्शोक्तेः । अत्राशौचमध्येपिस्ना

नश्राद्धादिकार्यमेव । सूतकेमृतकेचैवनदोषोराहुदर्शने ॥ तावदेवभवेच्छुद्धि र्यावन्मुक्तिर्नदृश्यते ॥ इतिमाधवीयेवृद्धवसिष्ठोक्तेः । स्मार्तकर्मपरित्यागो राहोरन्यत्रसूतकइतिव्याघ्रपादोक्तेश्च **कालादर्शेआंगिराः** सर्वेवर्णाः सूत केपिमृतकेराहुदर्शने ॥ स्नात्वाश्राद्धंप्रकुर्वीरन्दानंशाठ्यविवर्जितम् **मदन पारिजातेप्येवम्**तेनस्नानमात्रंप्रकुर्वीतदानश्राद्धविवर्जितमितिनिर्मूलंवदंतो गौडाःपरास्ताः । इयंचशुद्धिरविशेषान्मंत्रदीक्षापुरश्चरणादिसर्वस्मार्तकर्मवि षया । मदनरत्नेप्येवम् ॥ रजस्वलायास्तुभार्गवार्चनदीपिकायाम् **सूर्योद यानिबन्धे** नसूतकादिदोषोस्तिग्रहेहोमजपादिषु ॥ ग्रस्तेस्नायादुदक्यापितीर्थादुद्धृतवारिणेति ॥ अत्रच स्नाननैमित्तिकेप्राप्तेनारीयदिरजस्वला ॥ पा त्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेदित्यादिमिताक्षरोक्तोविधिर्ज्ञेयः **तथाग्रहणे रात्रावपिश्राद्धादिकार्यम्** ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषुच ॥ दानंनै मित्तिकंज्ञेयंरात्रावपितदिष्यतइत्यपरार्केव्यासोक्तेः चंद्रग्रहेतथारात्रौस्नानं दानंप्रशस्यतइतिदेवलोक्तेश्च । यदातुज्योतिःशास्त्रगम्योदिनेचंद्रग्रहोरात्रौ चसूर्यग्रहस्तदास्नानादिनकार्यम् । सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा ॥ त त्रस्नानंनकुर्वीतदद्याद्दानंनचकचिदिति षट्त्रिंशन्मतात् **ग्रहणदिनेवार्षि कश्राद्धप्राप्तौतुप्रयोगपारिजातेगोभिलः** दर्शेरविग्रहेपित्रोःप्रत्याब्दिकमु पस्थितम्॥अन्नेनासंभवेहेम्नाकुर्यादामेनवासुतइति ॥ अत्रदर्शेरविपितृसुतश ब्दाःप्रदर्शनार्थाः।न्यायसाम्यात्। तेनचंद्रग्रहेपिसपिंडादिवार्षिकमन्नादिनात द्दिनएवकार्यमिति **मदनपारिजातेव्याख्यातम् पृथ्वीचंद्रोदयेप्येवम्**। तेन यानि आमश्राद्धंप्रकुर्वीतमाससंवत्सरादृतइति । अन्नेनैवाब्दिकंकुर्याद्धेम्नावा मेनन कचिदिति **मरीचिलौगाक्ष्यादिवचनानितानिग्रहणदिना तिरिक्त विषयाणियानितु** ग्रहणात्तुद्वितीयेऽह्निरजोदोषात्तुपंचमे **तथा** ग्रस्तोदयेय दाचंद्रेप्रत्यब्दंसमुमस्थितम्॥ तद्दिनेचोपवासःस्यात्प्रत्यब्दंतुपरेहनि ॥ तथा ग्रस्तावेवास्तमानंतुरवींदूप्राप्नुतोयदि ॥ प्रत्यब्दंतुतदाकार्यंपरेह्न्येवसर्वदा ॥ चंद्रसूर्योपरागेचतथाश्राद्धंपरेहनीत्यादीनिवचनानि । तानिमहानिबंधेषुक्ता

प्यनुलंभान्निर्मूलानि । प्रत्युक्तपूर्वोक्तनिबंधेषुतद्दिनएवश्राद्धमुक्तमित्यलम् ग्रहणादि सप्तदिनपर्यंतंरामगोपालाद्यागमदीक्षोक्ता **शिवार्चनचंद्रिकायां** । **ज्ञानार्णवे** मंत्राद्यारंभणंकुर्याद्ग्रहणेचंद्रसूर्ययोः ॥ ग्रहणाद्वापिदेवेशिकालः सप्तदिनावधीति **रत्नसागरे** सत्तीर्थैऽर्कविधुग्रासेतंतुदामनपर्वणि॥मंत्रदीक्षांप्र कुर्वाणोमासर्क्षादीन्नशोधयेत् **अत्रसूर्यग्रहणमेवंमुख्यम्** सूर्यग्रहणकालेतु नान्यदन्वेषितंभवेत् ॥ सूर्यग्रहणकालेनसमोनान्यःकदाचन॥नमासतिथिवा रादिशोधनंसूर्यपर्वणीति ॥ तत्रैवकालोत्तरवचनात् । चंद्रग्रहेतुयादीक्षायादी क्षाव्रतचारिणाम् ॥ वनस्थस्यचयादीक्षादारिद्र्यं सप्तजन्मस्वितितत्रैवयोगिनी तंत्रेनिषेधाच्च । ग्रहणंजन्मराश्यादौनिषिद्धम् **तदुक्तंज्योतिषे** त्रिषट्दश योपगतंनराणांशुभप्रदंस्याद्ग्रहणंरवींदोः ॥ द्विसप्तनंदेषुसुमध्यमंस्याच्छेषे ष्वनिष्टंकथितंमुनींद्रैरिति ॥ आयएकादश । नंदानव । इषुःपंच **मदनर त्नेगर्गः** जन्मसप्ताष्टरिःफांकदशमस्थेनिशाकरे ॥ दृष्टो रिष्टप्रदोराहुर्जन्म र्क्षेनिधनेपिच ॥ रिःफंद्वादशम् । अंकानव । निधनंसप्तमतारा **पृथ्वीचं द्रोदयेविष्णुधर्मे** यन्नक्षत्रगतोराहुर्ग्रसतेशशिभास्करौ ॥ तज्जातानांभवेत्पी डायेनराःशांतिवर्जिताः **तत्रैवपुराणांतरे** सूर्यस्यसंक्रमोवापिग्रहणंचंद्रसूर्य योः ॥ यस्यत्रिजन्मनक्षत्रेतस्यरोगोथवामृतिः ॥ तस्यदानंचहोमंचदेवार्च नजपौतथा ॥ उपरागाभिषेकंचकुर्याच्छांतिर्भविष्यति ॥ स्वर्णेनवाथपिष्टेन कृत्वासर्पस्यचाकृतिं ॥ ब्राह्मणायददेत्तस्यनरोगादिश्चतत्कृतः ॥ जन्मनक्ष त्रंतत्पूर्वोत्तरेचत्रिजन्मनक्षत्रमित्युच्यते । जन्मदशमैकोनविंशतिताराइति केचित् । सर्पस्यतदाकारस्यराहोरित्यर्थः **अद्भुतसागरेभार्गवः** यस्यराज्य स्यनक्षत्रेस्वर्भानुरुपरज्यते ॥ राज्यभंगंसुहृन्नाशंमरणंचात्रनिर्दिशेत् ॥ राज्य स्यनक्षत्रंअभिषेकनक्षत्रमिति ॥ तत्रैवव्याख्यातम् **भार्गवार्चनदीपिकायां ज्योतिःसागरे** सौवर्णकारयेन्नागंपलेनाथपलार्धतः ॥ तदर्धेनतदर्धेनफ णायांमौक्तिकंन्यसेत् ॥ ताम्रपात्रेनिधायाथघृतपूर्णेविशेषतः ॥ कांस्येवाक्रां तिलोहेवा न्यस्यदद्यात्सदक्षिणम्॥ चंद्रग्रहेतुरूप्यस्यबिंबंदद्यात्सदक्षिणम्॥

नागंरुक्ममयंसूर्यग्रहेबिंबंचहेमजम् ॥ तुरंगरथगोभूमितिलसर्पिश्चकांचनम् कालविवेकेपि सुवर्णनिर्मितंनागंसतिलंकांस्यभाजनम् ॥ सदक्षिणंसवस्त्रं चब्राह्मणायनिवेदयेत् ॥ सौवर्णराजतंवापिबिंबंकृत्वास्वशक्तितः ॥ उपरागभवक्लेशच्छिदेविप्रायकल्पयेत् मंत्रस्तु तमोमयमहाभीमसोमसूर्यविमर्दन॥ हेमतारप्रदानेनममशांतिप्रदोभव ॥ विधुंतुदनमस्तुभ्यंसिंहिकानंदनाच्युत ॥ दानेनाननागस्यरक्षमांवेधजाद्भयादिति अत्रशांतिरप्युक्तामात्स्ये यस्यराशिंसमासाद्यभवेद्ग्रहणसंभवः ॥ स्नानंतस्यप्रवक्ष्यामिमंत्रौषधिसमन्वितम् ॥ चंद्रोपरागंसंप्राप्यकृत्वाब्राह्मणवाचनम्॥ संपूज्यचतुरोविप्रांच्छुक्लमाल्यानुलेपनैः ॥ पूर्वमेवोपरागस्यसमानीयौषधादिकम् ॥ स्थापयेच्चतुरःकुंभानव्रणान्सलिलान्वितान् ॥ गजाश्वरथ्यावल्मीकसंगमाद्भदगोकुलात् ॥ राजद्वारप्रदेशाच्चमृदमानीयनिक्षिपेत् ॥ पंचगव्यंपंचरत्नंपंचत्वक्पंचपल्लवम् ॥ रोचनंपद्मकंशंखंकुंकुमंरक्तचंदनम् ॥ शुक्तिस्फटिकतीर्थाबुसितसर्षपगुग्गुलून् ॥ मधुकंदेवदारुंच विष्णुक्रांतांशतावरीं ॥ बलांचसहदेवींचनिशाद्वितयमेवच ॥ गजदंतंकुंकुमंचतथैवोशीरचंदनम् ॥ एतत्सर्वं विनिक्षिप्यकुंभेष्वावाहयेत्सुरान् ॥ सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः। आयांतुयजमानस्यदुरितक्षयकारकाः । योसौवज्रधरोदेवआदित्यानांप्रभुर्मतः । सहस्रनयनःशक्रोग्रहपीडांव्यपोहतु ॥ मुखंयःसर्वदेवानांसप्तार्चिरमितद्युतिः । चंद्रोपरागसंभूतामग्निः पीडांव्यपोहतु ॥ यःकर्मसाक्षीलोकानांधर्मोमहिषवाहनः ॥ यमश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु॥ रक्षोगणाधिपःसाक्षान्नीलांजनसमप्रभः॥खड्गहस्तोतिभीमश्चग्रहपीडांव्यपोहतु॥नागपाशधरोदेवःसदामकरवाहनः॥सजलाधिपतिर्देवोग्रहपीडांव्यपोहतु।प्राणरूपोहिलोकानांसदाकृष्णमृगप्रियः ॥ वायुश्चंद्रोपरागोत्थांग्रहपीडांव्यपोहतु ॥ योसौनिधिपतिर्देवः खड्गशूलगदाधरः ॥ चंद्रोपरागकलुषंधनदोत्रव्यपोहतु योसाविंदुधरोदेवःपिनाकीवृषवाहनः ॥ चंद्रोपरागपापानिसनाशयतुशंकरः त्रैलोक्येयानिभूतानिस्थावराणिचराणिच ॥ ब्रह्मविष्ण्वर्करुद्राश्चदहंतुममपा

तकम् ॥ एवमावाह्येद्देवान्मंत्रैरेभिश्चवारुणैः ॥ एतानेवतथामंत्रान्स्वर्णपट्टे विलेखयेत् । ताम्रपट्टेथवालिख्यनववस्त्रेतथैवच ॥ मस्तकेयजमानस्यनिद ध्युस्तेद्विजोत्तमाः । कलशान्द्रव्यसंयुक्तान्नानारूपसमन्वितान् ॥ गृहीत्वा स्नापयेद्गूढंभद्रपीठोपरिस्थितम् ॥ पूर्वैरेवतुमंत्रैश्चयजमानंद्विजोत्तमाः ॥ अभिषेकंततःकुर्यान्मत्रैर्वारुणसूक्तकैः ॥ आचार्यंवरयेत्पश्चात्स्वर्णपट्टंनिवेद येत् ॥ आचार्यदक्षिणांदद्याद्गोदानंचस्वशक्तिः ॥ होमंवापिप्रकुर्वीततिलै र्व्याहृतिभिस्तथा ॥ दानंचशक्तितोदद्याद्यदीच्छेदात्मनोहितम् । सूर्यग्रहेसू र्यनामयुक्तान्मंत्रांश्चकीर्तयेत् ॥ अनेनविधिनायस्तुग्रहणेस्नानमाचरेत् ॥ न-तस्यग्रहणेदोषःकदाचिदपिजायते ॥ **इतिग्रहणशांतिः ॥ भार्गवार्चनदी पिकायांब्रह्मसिद्धांते** सर्वैःपटस्थितंवीक्ष्यखस्थंतैलांबुदर्पणैः ॥ ग्रहणंगुर्वि णीजातुनपश्येतपटंविना **तथामंगलकृत्येषुवेधविशेषोहेमाद्रौ** त्रयोद श्यादितोवर्ज्यदिनानांनवकंध्रुवम् ॥ मांगल्येषुसमस्तेषुग्रहणेचंद्रसूर्ययोः **प्र-कारांतरंतत्रैवोक्तम्** द्वादश्यादितृतीयांतोवेधइंदुग्रहेस्मृतःएकादश्यादिकः सौरेचतुर्थ्यंतःप्रकीर्तितः **इदंचपूर्णग्रासे** त्र्यहंखण्डग्रहेतितत्रौवोक्तेः । इदं ग्रस्तास्तेत्रिदिनंपूर्वमितिनारदेनग्रस्तास्तेविशेषोक्तेर्ग्रस्तास्तभिन्नग्रहणपरम् **ज्योतिर्निबंधेच्यवनः** ग्रहणोत्पातभंत्याज्यंमंगलेषुऋतुत्रयम् ॥ यावच्चरवि णाभुक्त्वामुक्तंभंदग्धकाष्ठवत् ॥ अन्यानिचाग्नेयादिमंडलानितत्फलंवर्णविकारादिफलंचदैवज्ञेभ्योज्ञेयम् **पुरश्चरणचंद्रिकायाम्** चंद्रसूर्योपरागेचस्ना त्वाप्रयतमानसः स्पर्शादिमोक्षपर्यंतंजपेन्मंत्रंसमाहितः ॥ जपाद्दशांशतोहोम स्तथाहोमात्तुतर्पणम् ॥ तर्पणस्यदशांशेनमार्जनंकथितंकिल ॥ तत्रैवदेवतारू पंध्यात्वात्मानंप्रपूज्यच ॥ नमोंतंमंत्रमुच्चार्यतदंतेदेवताभिधाम् ॥ द्वितीयांता महंपश्चादभिषिंचाम्यनेनतु ॥ तोयैरंजलिनाशुद्धैरोभिःसिंचेत्स्वमूर्द्धनि ॥ मार्ज नस्यदशांशेनब्राह्मणानपिभोजयेत् ॥ जपोर्चापूर्वकोहोमस्तर्पणंचाभिषेचनम् भूदेवपूजनंपंचप्रकारोक्तापुरस्क्रिया **तथा** होमाशक्तौजपंकुर्याद्धोमसंख्याच तुर्गुणम् ॥ एवंकृतेतुमंत्रस्यजायतेसिद्धिरुत्तमा **ग्रहणप्रसंगात्कुरुक्षेत्रप्रति**

ग्रहेप्रायश्चित्तमुच्यते । तत्रारुणस्मृतौ प्रतिग्रहीकुरुक्षेत्रेनभूयःपुरुषोभवेत् ॥ तथापिमनसःशुद्ध्यैप्रायश्चित्तंसमाचरेत् ॥ तप्तकृच्छ्रद्वयंकुर्यादैंदवेन समन्वितम् ॥ सत्रेणवायजेताथजपेद्वालक्षसप्तकम् ॥ वापीकूपतडागादिखननैर्विसृजेद्धनमिति ॥ एतच्च । यद्गर्हितेनार्जयंतिकर्मणाब्राह्मणाधनम् ॥ तस्योत्सर्गेणशुद्ध्यंतिदानेनतपसैवचेतिमनूक्तेरुत्सर्गोत्तरंगेयमितिदिक् ग्रहणांतरितस्यपूर्वसंकल्पितद्रव्यस्यद्वैगुण्यंभवतीतिशिष्टाःपठंतिचलघुब्रह्मवैवर्ते दातव्यमितिनोकाश्यांवक्तव्यंकुत्रचित्कचित् ॥ अहोरात्रमतिक्रम्यतद्दानंद्विगुणंभवेत् । दर्शोत्तरंपर्वसुस्याच्छतंचंद्रग्रहेभवेत् ॥ सूर्यग्रहेसहस्रंतन्मरणेनंतकंस्मृतमिति ॥ अत्रमूलंचिंत्यम् । अत्रकेचिद्बौद्धतुल्याआहुः । ग्रहणस्यनिमित्तत्वेनतस्मिंस्वस्यप्रयोजकत्वात् ज्योतिःशास्त्रादिनाजातस्यज्ञानस्यानिमित्तत्वेप्राप्तेपि स्नानंदानंततःश्राद्धमनंतंराहुदर्शने ॥ चंद्रसूर्योपरागेतुयावद्दर्शनगोचरइतिजाबाल्यादिवचनेषु दृशिप्रयोगाच्चाक्षुषज्ञानस्यैवोपसंहारन्यायेननिमित्तत्त्वम्। अन्यथादृशौलक्षणास्यात् ।तेनमेघाच्छादनेंधादीनांजन्मसप्तष्टेत्यादिनिषिद्धदर्शनानांचस्नानश्राद्धादौनाधिकारइति कल्पतरुरप्याह दर्शनशब्देनचाक्षुषज्ञानंगृह्यतेनज्ञानमात्रम् । अज्ञातस्यनिमित्तत्वासंभवान्निमित्तमहिम्नैवज्ञानलाभेनदर्शपदवैयर्थ्यापत्तेः। तेनचाक्षुषधीयोग्यःकालःपुण्यः योग्यत्वंचप्रयत्नापनेयचाक्षुषज्ञानप्रतिबंधकराहित्यंतेनमेघच्छन्नेयोग्यताभावान्नस्नानादीति निर्णयामृतेप्येवम् । तदेतत्तुच्छम् । यदिचाक्षुषज्ञानंनिमित्तंस्यात्तदा सूर्यग्रहोयदारात्रौदिवाचंद्रग्रहस्तथा ॥ तत्रस्नानंनकुर्वीतदद्याद्दानंनचक्वचिदितिवाक्यंव्यर्थंस्यात् चाक्षुषज्ञानाभावेनप्राप्यभावात् । तत्पूर्वकत्वाच्चनिषेधस्य । नचेदंग्रस्तास्तपरम। रविचंद्रयोरस्तानंतरंरात्रिदिवाग्रहत्वादितिवाच्यम् । तत्रयदस्यग्रहपरत्वेऽधिकर्णत्वायोगान्निमित्तपरत्वेचतद्ग्रहनिमित्तकस्नानादेरस्तात्प्रागप्यभावापत्तेः । अथतत्रेतिरात्रिदिनेउच्यतेसावैश्वदेवीतिवद्गुणभूतेअपि तन्न तादृशंमंत्रलिंगाभावात् । तयोर्निमित्तत्त्वेऽधिकरणत्वेवाऽन्यप्रयुक्तस्नानाद्यभावाप

त्तेश्च किंच नेक्षेतोद्यंतमादित्यंनास्तंयंतंकदाचन ॥ नोपरक्तंनवारिस्थंन-मध्यंनभसोगतमिति मनुवचनंबाध्येत । दृष्टोरिष्टप्रदोराहुरित्यादिच । न-चात्रविहितेदर्शनेनिषेधाप्रवृत्तिवत्पर्युदासनीयतापिनियुक्तेतिवाच्यम् । द-र्शनस्यानुवादेनविधेयत्वाभावात् ।एतच्चाग्रेवक्ष्यामःतत्त्वेवाविरुद्धत्रिकद्वया-पत्तेः । अस्तु सकृद्दर्शनविधानेनसंकोचइतिचेन्न । मुक्तिंदृष्ट्वाततःस्नाया दिति । मुक्तिस्नानेपिचाक्षुषज्ञानस्यनिमित्तत्वापत्तेः । अस्तु। किंनाश्छिन्नमि तिचेत् । नग्रस्तास्तेतयोः परेद्युरुदयेदृष्ट्वाभ्यवहरेच्छुचीरतदर्शनोत्तरंभोज नविधानादंधस्यापूर्ववेधकालइवयावद्दर्शनंभोजननिषेधापत्तिः । मध्येंधीभूत स्यसुतरांयावच्चक्षुःप्राप्त्युपवासप्रसंगश्च । अथान्नलोलुपतयातत्रज्ञानमात्रं विवक्ष्यतेतत्पूर्वमपिनिर्लज्जेनस्वीक्रियताम्॥ एतेनयत्केनचिदुक्तंस्पर्शस्ना नंमुक्तिस्नानंचयस्यदर्शनंतेनैवकार्यम्नान्येन । क्त्वाप्रत्ययेनसमानकर्तृक त्वावगतेरितितन्निरस्तम् । कातार्हतस्यगतिः । दृशेरुद्देश्यविशेषणत्वात्गृ हैकत्ववदविवक्षयार्थतः । सिद्धज्ञानमात्रानुवादत्वेसर्वंसुस्थम् ॥ अंगुलाद्य नादेश्यग्रहव्यावृत्यावादर्शनस्यार्थवत्वम्। नचोक्तयोग्यतापिसाध्वीदर्शनोत्त रंमेघच्छन्नेयोग्यताभावापत्या दानाद्यभावापत्तेः । तेनतत्तद्रेखावच्छेदेनज्यो तिःशास्त्रावेद्यत्वमेवयोग्यता किंच रजसोदर्शनेनारीत्रिरात्रमशुचिर्भवेदित्य त्राप्यंधस्त्रीणामाशौचाभावप्रसंगः । यत्तुवर्धमानेनोक्तम् ज्ञानोत्तरंत्वधिकारो नज्ञानकाले । स्नानकालेज्ञानाभावात् । एवंदर्शनोत्तरंमुक्तिपर्यंतंअस्त्येवयो ग्यतेतितदपिप्रतिज्ञामात्रम् किंच ग्रस्तास्तेतयोःपरेद्युरुदयेदृष्ट्वाऽभ्यवहरेच्छु चिरित्यादिवाक्येवैयर्थ्यापत्तिः चाक्षुषज्ञानान्यथानुपपत्त्यैवार्थादुदयेस्नान सिद्धेः ननुमुक्तिस्नानेशास्त्रीयमेवज्ञानंनिमित्तंनचाक्षुषं । चंद्रसूर्यग्रहेनाऽ द्यात्तस्मिन्नहनिपूर्वतः ॥ राहोर्विमुक्तिंविज्ञायस्नात्वाकुर्वीतभोजनमिति वृ-द्धगौतमेनविज्ञायेतिज्ञानमात्रोक्तेः यत्तु मुक्तिंदृष्ट्वातुभोक्तव्यंस्नानंकृत्वात तःपरमितितदपिज्ञानमात्रपरम् । मेघमालादिदोषेणयदिमुक्तिर्नदृश्यते ॥ आ कलय्यतुतंकालंस्नात्वाभुंजीतवाग्यतः इतिगौडनिबंधेवचनात् । मैवम् ।

अज्ञातस्यनिमित्तत्त्वाभावेननिमित्तमहिम्नैवज्ञानलाभेवाक्यवैय्यर्थात् । ग्रस्ता स्तेपितदापत्तेश्चकिंचदर्शनंपुंसोविशेषणमुपलक्षणंवा । नाद्यः । दर्शनावच्छि न्नेकालेस्नानतुलादानादेर्बाधात् । दर्शनविच्छेदेकृतमपिस्नानादि नग्रहणनि मित्तंस्यात् । नांत्यः । यावद्दर्शनगोचरइतियावत्पदवैयर्थ्यप्रसंगात् । दृष्टग्र हस्यग्रहणोत्तरमपिस्नानाद्यापत्तेश्च । ज्ञानपक्षेप्येषदोषस्तुल्यइतिचेत् । मुर्खोसि । यदिज्ञानवाचकंपदंश्रूयेत । ततस्तस्यान्वयोविचार्येत । दृशिस्तुश्रू यतइतिवैषम्यम् । कथंतर्हिज्ञानंलभ्यते । संक्रांतौस्नायादितिवदर्थादित्यवेहि । अश्रुतत्वादेवनोद्देश्यविशेषणविवक्षाकृतोवाक्यभेदोपि । अस्तुतर्हिदृष्टंग्रहणं निमित्तमितिचेत् । ग्रस्तास्तेऽस्तोत्तरंस्नानापत्तेः । विशिष्टोद्देशेवाक्यभेदाच्च तवाप्येतत्तुल्यमितिचेत् । यावद्दर्शनगोचरइतिवचनेनतन्निषेधात् तत्त्व न्यग्रहइवग्रस्तास्तेपिस्यात् । किंचदर्शनस्यविधिरनुवादोवा । आद्ये । ग्रहणो द्देशेनदर्शनविधिरुतदर्शनविशिष्टस्नानविधिरुतस्नानोद्देशेनदर्शनविधिः । नाद्यः ग्रहोद्देशेनस्नानविधानेदर्शनविधानेचवाक्यभेदात् । एतेनाद्वितीयोपिपरास्तः । नतृतीयः । स्नानस्याप्राप्तेः । दर्शनस्यनिमितत्वेनाविधेयत्वाच्च । अन्यथासोमवमनादौप्रसज्जनविधिःकेनवार्येत । अथनानावाक्येषुक्वचिद्दर्शनविशिष्टस्नानविधिः । क्वचिच्चप्राप्तंदर्शनंनिमित्तीकृत्य स्नान मात्रविधिः । तन्न । स्नानस्याप्रधानस्य प्राप्तौतदंगदर्शनप्राप्तिः । तस्यांच निमित्तेसतिस्नानमित्यन्योन्याश्रयात् । एवंदर्शनविधौसतितन्निमित्तकस्ना नविधिः । सतिचप्रधानस्नानविधौतदंगदर्शनविधिःएवमधिकारेप्रयोजकत्वे चयोज्यम् । उक्तार्थपूर्वकालत्वविधौचास्त्वेववाक्यभेदःअन्यथास्नानोत्तरमपि दर्शनमंगंस्यात् । नद्वितीयः । तत्रापिदर्शनग्रहयोर्निमित्तत्त्वेस्नानद्वयापत्तेः । द र्शनावृत्तौनैमित्तिकावृत्तिप्रसंगाद्दर्शनविशिष्टग्रहस्यविशिष्टस्यानुवादेवाक्य भेदापत्तेः । नचहविरार्तिवद्विशिष्टंनिमित्तमितिवाच्यम् । आर्तिमात्रस्यनिमित्त त्वेनिर्निमेषाद्यार्तेरपितत्त्वापत्तेनैमित्तिकत्वभंगाद्युक्तंविशिष्टोद्देशत्वम् । इह तुग्रहणमात्रस्यनिमित्तत्वेनकाचित्क्षतिः । तस्माद्दर्शनवाक्याणांग्रस्तास्तवि

षयत्वादनादेशपरत्वाद्वाज्ञानस्यचार्थतः प्राप्तेस्तदेवनिमित्तं तेनमेघाद्याच्छादनेऽधादेश्चस्नानादिभवत्येवेत्यलंवेदबाह्यैःसंल्लापेन इतिग्रहणनिर्णयः। अथ समुद्रस्नानम् **आश्वलायनः** समुद्रेपर्वसुस्नायादमायांचविशेषतः ॥ पापैर्विमुच्यतेसर्वैरमायांस्नानमाचरन् ॥ भृगुभौमदिनेस्नानंनित्यमेवविवर्जयेत् **भारते** अश्वत्थसागरौसेव्यौनस्प्रष्टव्यौकदाचन ॥ अश्वत्थंमंदवारेतुसागरं पर्वणिस्पृशेत् **पृथ्वीचंद्रोदयेस्कांदे** पुनातिपर्वणिस्नानात्तर्पणैःसरितांपतिः॥ कदाचिदपिनैवात्रस्नानंकुर्यादपर्वणि ॥ **अस्यापवादस्तत्रैवप्रभासखंडे** पर्वकालेचसंप्राप्तेनदीनांचसमागमे ॥ सेतुबंधेतथासिंधौतीर्थेष्वन्येषुसंयुतः॥ एवमादिषुसर्वेषुमध्येन्येतुस्वकर्मणि **तथा** विनामंत्रंविनापर्वक्षुरकर्मविना नरैः ॥ कुशाग्रेणापिदेवेशिनस्प्रष्टव्योमहोदधिः **तथा** नकालनियमःसेतौ समुद्रस्नानकर्मणि **तद्विधिश्चतत्रैव** पिप्पलादसमुत्पन्नेकृत्येलोकभयंकरे ॥ पाषाणस्तेमयादत्तआहारार्थेप्रकल्प्यतामितिपाषाणंप्रक्षिप्यविश्वाचीचघृताचीचविश्वयोनेविशांपते ॥ सान्निध्यंकुरुमेदेवसागरेलवणांभसि नमस्तेविश्वगुप्तायनमोविष्णोअपांपते नमोजलधिरूपायनदीनांपतयेनमः॥ नमस्तेजगदाधारशंखचक्रगदाधर ॥ देवदेहिममानुज्ञांतवतीर्थनिषेवणे ॥ त्रितत्वात्मकमीशानंनमोविष्णुमुमापतिम् ॥ सान्निध्यंकुरुदेवेशसागरेलवणांभसि ॥ अग्निश्चयोनिरनिलश्चदेहोरेतोधाविष्णुरमृतस्यनाभिः एतद्ब्रुवन्पांडवसत्यवाक्यंततोऽवगाहेतपतिंनदीनामितिभारतोक्तमंत्रान्पठित्वा विधिवत्स्नात्वा सर्वरत्नोभवान्श्रीमान्सर्वरत्नाकरोयतः ॥ सर्वरत्नप्रधानस्त्वंगृहाणार्घंमहोदधे ॥ इत्यर्घ्यंदत्वातर्पयेत् **यथोक्तंपृथ्वीचंद्रोदयेस्कांदे** पिप्पलादंविकृष्णंचकृतांतंजीविकेश्वरम् । वसिष्ठंवामदेवंचपराशरमुमापतिं ॥ वाल्मीकिंनारदंचैववालखिल्यांस्तथैवच ॥ नलंनीलंगवाक्षंचगवयंगंधमादनम् ॥ जांबवंतंहनूमंतंसुग्रीवंचांगदंतथा॥ मैंदंचद्विविदंचैवऋषभंशरभंतथा ॥ रामंचलक्ष्मणंचैवसीतांचैवयशस्विनीम् ॥ एतांस्तुतर्पयेद्विद्वान्जलमध्येविशे

षतः ॥ आब्रह्मस्तंबपर्यंतंयत्किंचित्सचराचरम् ॥ मयादत्तेनतोयेनतृप्तिमे वाभिगच्छत्विति ॥

इतिश्रीमीमांसकनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिनक रभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौ प्रथमपरिच्छेदःसमाप्तः ॥

अथ निर्णयसिन्धौ द्वितीयपरिच्छेदः प्रारभ्यते ॥

———:०:———

श्रीगणेशायनमः ॥ अथसंवत्सरप्रतिपदमारभ्य तिथिकृत्येचकृष्णादिंद्र तेशुक्लादिमेवच ॥ विवाहादौचसौरादिमासंकृत्येविनिर्दिशेदितिब्राह्मंप्रायशो नुसृत्यतिथिनिर्णयस्तत्कृत्यंचनिरूप्यते । तत्रमीनसंक्रांतौपश्चात्षोडशघाटि काःपुण्यकालः । रात्रौतुनिशीथात्प्राक्परतश्चसंक्रमेपूर्वोत्तरदिनार्धपुण्यम् । निशीथेतुदिनद्वयंपुण्यमितिसामान्यनिर्णयादवसेयम् **अथतिथिनिर्णयः** तत्रचैत्रशुक्लप्रतिपदिवत्सरारंभः । तत्रौदयिकाग्राह्या । चैत्रेमासिजगद्ब्रह्मास सर्जप्रथमेहनि ॥ शुक्लपक्षेसमग्रन्तुतदासूर्योदयेसतीतिहेमाद्रौब्राह्मोक्तेः ॥ दिनद्वयेतद्व्याप्तावव्याप्तौवापूर्वैव **तदुक्तंज्योतिर्निबंधे** चैत्रेसितप्रतिपदि योवारोर्कोदयेसवर्षेशः॥उदयद्वितयेपूर्वोनोदययुगलेपिपूर्वःस्यात्॥ यस्माच्चैत्र सितादेरुदयाद्भानोःप्रवृत्तिरब्दादेरितिवत्सरादौवसंतादौबलिराज्येतथैवच॥ पूर्वविद्धैवकर्तव्याप्रतिपत्सर्वदाबुधैरितिवृद्धवसिष्ठोक्तेः ॥ चैत्रमासस्ययाशु क्लप्रथमाप्रतिपद्भवेत् ॥ तदह्निब्रह्मणःकृत्वासोपवासस्तुपूजनम् । संवत्सरम वाप्नोतिसौख्यानिभृगुनंदनेतिहेमाद्रौविष्णुधर्मोक्तेः । यदातुचैत्रोमलमासो भवतितदादैवकार्यस्यतत्रानिषिद्धत्वाच्छुद्धेमासिसंवत्सरारंभःकार्यइतिकेचि दाहुः । निष्कर्षस्तु । शुक्लादेर्मलमासस्यसोतर्भवतिचोत्तर इत्यादिवचनादग्नि मवर्षोतःपातान्मलमासमारभ्यैववर्षप्रवृत्तेःशुक्लास्तादाविवमलमासएवकार्य इतिवयंप्रतीमः । ननुशुक्लास्तदौचैत्रशुक्लप्रतिपदंतरस्याभावाद्युक्तंतन्मध्य

एवानुष्ठानं मलमासेतुशुद्धप्रतिपदंतरस्यसंभवात्। शुद्धएववत्सरारंभोयुक्तइ तिचेत्। भ्रांतोसि । नहिप्रतिपदंतरसत्वंप्रयोजकंद्विकरणापत्तेःवर्षशब्दत्वा पत्तेश्च अपितुवत्सरारंभः । सतुमलमासेपीत्युक्तंप्राक्। नहिचैत्रशुक्लादिर्म लमासःपूर्ववर्षेतर्भवतीतिब्रह्मणापिसुवचम्। तत्रतैलाभ्यंगोनित्यः । वत्सरा दौवसन्तादौबलिराज्येतथैवच । तैलाभ्यंगमकुर्वाणोनरकंप्रतिपद्यतइति व सिष्ठोक्तेः **अस्यामेवनवरात्रारम्भःतदुक्तंमार्कण्डेयपुराणे** शरत्कालेमहा पूजाक्रियतेयाचवार्षिकीति ॥ तत्रपरयुतैवग्राह्या । अमायुक्तानकर्त्तव्याप्रति पच्चण्डिकार्चने ॥ मुहूर्तमात्राकर्तव्याद्वितीयादिगुणान्वितेतिदेवीपुराणात् ॥ तिस्रोह्येताःपराः प्रोक्तास्तिथयःकुरुनन्दन ॥ कार्तिकाश्वयुजोर्मासोश्चैत्रेमा सिचभारतेतिहेमाद्रौब्राह्मोक्तेः ॥ परा परयुताः । अत्राविशेषः । पारणानि र्णयश्चशारदनवरात्रेवक्ष्यते **अत्रप्रपादानमुक्तमपरार्केभविष्ये** अतीतेफा ल्गुनेमासिप्राप्तेचैत्रमहोत्सवे ॥ पुण्येह्निविप्रकथितेप्रपादानंसमारभेदित्युप क्रम्य । ततश्चोत्सर्जयेद्विद्वान्मंत्रेणानेनमानवः ॥ प्रपेयंसर्वसामान्य भूतेभ्यः प्रतिपादिता ॥ अस्याःप्रदानात्पितरस्तृप्यंतुहिपितामहाः ॥ अनिवार्यततो देयंजलंमासचतुष्टयमिति **तथा** प्रपांदातुमशक्तेनविशेषाद्धर्ममीप्सुना ॥ प्र त्यहंधर्मघटकोवस्त्रसंवेष्टिताननः ॥ ब्राह्मणस्यगृहेदेयःशीतामलजलःशुचिः **तत्रमंत्रः** एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्सकलामम संतुमनोरथाः॥अनेनविधिनायस्तु धर्मकुम्भंप्रयच्छति ॥ प्रपादानफलंसोपि प्राप्नोतीहनसंशयइति ॥ चैत्रशुक्लतृतीयायांगौरीमीश्वरसंयुताम् ॥ सम्पूज्य दोलोत्सवंकुर्यात् **तदुक्तंनिर्णयामृतेदेवीपुराणे** तृतीयायांयजेद्देवींशंकरे णसमन्विताम् ॥ कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः ॥ स्रग्गंधधूपदीपैश्चद मनेनविशेषतः ॥ आंदोलयेत्ततोवत्सशिवोमातुष्टयेसदेति ॥ अत्रचतुर्थीयुता ग्राह्या। मुहूर्तमात्रसत्त्वेपिदिनेगौरीव्रतंपरइतिमाधवोक्तेः **अत्रैवसौभाग्य शयनव्रतमुक्तंमात्स्ये** वसंतमासमासाद्यतृतीयायांजनप्रिये ॥ सौभाग्याय सदास्त्रीभिःकार्यंपुत्रसुखेप्सुभिरितितत्रापिपरयुतैव। इयंचमन्वादिरपि **अत्रैव**

प्रसंगात्सर्वमन्वादिनिर्णयउच्यते ताश्चोक्तादीपिकायाम् तिथ्यग्नीनतिथिस्तिथ्याशेकृष्णेभोनलोग्रहः।तिथ्यर्कोनशिवोश्वोमातिथीमन्वादयोमधोरिति॥ तिथिःपूर्णिमा।अग्निस्तृतीया।नेतिवैशाखेनास्तीत्यर्थः।आशादशमी।कृष्णेभः कृष्णाष्टमी।अनलस्तृतीया।ग्रहोनवमी।अर्कोद्वादशी। नेतिमार्गशीर्षेनास्तीत्यर्थः। शिवएकादशी। अश्वःसप्तमी। मधोश्चैत्रादारभ्यैतामन्वादय इत्यर्थः। अत्रमूलवचनानिहेमाद्यादेर्ज्ञेयानि। एताश्चमन्वादयोहेमाद्रिमते शुक्लपक्षस्थाःपौर्वाह्णिकाः कृष्णपक्षस्थाः अपराह्णिकाग्राह्याः। पूर्वाह्णेतुसदाग्राह्याःशुक्लामनुयुगादयः॥ दैवेकर्मणिपत्र्येचकृष्णेचैवापराह्णिका इतिगारुडवचनात्। अथोमन्वादियुगादिकर्मतिथयः पूर्वाह्णिकाःस्युःसितेविज्ञेयाअपराह्णिकाश्चबहुलेइतिदीपिकोक्तेश्च। कालादर्शेत्वपराह्णव्यापित्वंमन्वादिषूक्तंतत्वयुक्तमितियुगादिनिर्णयेवक्ष्यामः **अत्रचश्राद्धमुक्तंमात्स्ये** कृतंश्राद्धंविधानेनमन्वादिषुयुगादिषु ॥ हायनानिद्विसाहस्रंपितॄणांतृप्तिदंभवेदिति ॥ मन्वादिश्राद्धंचमलमासेसतिमासद्वयेपिकार्यम्। मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रिकोक्तेः। अत्रपिंडरहितंश्राद्धंकुर्यात् **तदुक्तंकालादर्शे** विषुवायनसंक्रांतिमन्वादिषुयुगादिषु ॥ विहायपिंडनिर्वापंसर्वंश्राद्धंसमाचरेदिति ॥ मन्वादिश्राद्धंनित्यम् **अकरणेप्रायश्चित्तदर्शनात् तदुक्तम्भविधाने** त्वंभुवःप्रतिमंत्रंचशतवारंजलेजपेत् ॥ मन्वादयोयदान्यूनाःकुरुतेनैवचापियइति। एवंयत्रप्रायश्चित्तवीप्सादिदर्शनंतानि षण्णवतिश्राद्धानिनित्यानि। तानितु। अमायुगमनुक्रांतिधृतिपातमाहालयाः ॥ अन्वष्टक्यंचपूर्वेद्युःषण्णवत्यः प्रकीर्तिताइत्युक्तानि ॥ चकारादष्टकाग्रहणम् चैत्रशुक्लतृतीयैवमत्स्यजयंती। अत्रैवप्रसंगाद्दशावतारजयंत्योनिर्णीयंते **तत्रपुराणसमुच्चये** मत्स्योभूद्भुतभुग्दिनेमधुसितेकूर्मोविधौमाधवेवाराहोगिरिजासुतेनभसियद्भूतेसितेमाधवे ॥ सिंहोभाद्रपदेसितेहरितिथौ श्रीवामनोमाधवेरामोगौरितिथावतः परमभूद्रामोनवम्यांमधोः ॥ कृष्णोष्टम्यांनभसिसितपरे चाश्विनेयद्दशम्यांबुद्धःकल्कीनभसिसमभूच्छुक्लषष्ठ्यांक्रमेण॥

अह्नोमध्येवामनोरामरामौमत्स्यःक्रोडश्चापराह्णे विभागे ॥ कूर्मःसिंहोबौद्ध कल्कीचसायंकृष्णोरात्रौकालसाम्येचपूर्वेति **केचित्तु स्फुटान्श्लोकान्पठंतितथा** चैत्रेतुशुक्लपंचम्यांभगवान्मीनरूपधृक् ॥ ज्येष्ठेतुशुक्लद्वादश्यांकूर्मरूपधरोहरिः ॥ चैत्रेकृष्णेनवम्यांतुहरिर्वाराहरूपधृक् ॥ नारसिंहश्चतुर्दश्यां वैशाखेशुक्लपक्षके ॥ मासिभाद्रपदेशुक्लद्वादश्यांवामनोहरिः ॥ राधशुक्लतृतीयायांरामोभार्गवरूपधृक् ॥ चैत्रशुक्लनवम्यांतुरामोदशरथात्मजः ॥ नभस्येतुद्वितीयायांबलभद्रोभवद्धरिः ॥ श्रावणेबहुलेष्टम्यांकृष्णोभूल्लोकरक्षकः ॥ ज्येष्ठेशुक्लद्वितीयायांबौद्धःकल्कीभविष्यतीति **कौंकणास्तुवराहपुराणस्थानि वाक्यानिपठंति** आषाढेशुक्लपक्षेतुएकादश्यांमहातिथौ ॥ जयंतीमत्स्य नाम्नीतितस्यांकार्यमुपोषणम् । नभोमासितृतीयायांहरिःकमठरूपधृक् ॥ नभस्यशुक्लपंचम्यांवराहस्यजयंतिका । वैशाखेतुचतुर्दश्यांनृसिंहःसमपद्यत ॥ मासिभाद्रपदेशुक्लैकादश्यांवामनोहरिः ॥ वैशाखेशुक्लपक्षेतुतृतीयायांभृगूद्वहः । चैत्रेनवम्यांरामोभूत्कौशल्यायांपरःपुमान् ॥ श्रावणेबहुलेष्टम्यांवासुदेवोजनार्दनः ॥ पौषशुक्लेतुसप्तम्यांकुर्याद्बौद्धस्यपूजनं ॥ माघशुक्लतृतीयायां कल्किनःपूजनंहरेः ॥ प्रातःप्रातस्तुमध्याह्नेसायंसायंतथानिशि ॥ मध्याह्ने मध्यरात्रेचसायंप्रातरनुक्रमादिति ॥ तदत्रसमूलत्वनिर्णयेसतिकल्पभेदेन व्यवस्थाद्रष्टव्या । एताश्चतदुपासकानांनित्याः । अन्येषांतुकाम्याः । जन्माष्टम्यादौतुविशेषंवक्ष्यामः। चैत्रशुक्लपंचमीकल्पादिः **तदुक्तंहेमाद्रौमात्स्ये** ब्रह्मणोयादिनस्यादिःकल्पादिःसाप्रकीर्तिता॥ वैशाखस्यतृतीयायाकृष्णायाफाल्गुनस्यच ॥ पंचमीचैत्रमासस्यतथैवांत्यातथापरा ॥ शुक्लात्रयोदशीमाघे कार्तिकस्यतुसप्तमी ॥ नवमीमार्गशीर्षस्यसप्तैताः संस्मराम्यहम् ॥ कल्पानामादयोह्येतादत्तस्याक्षयकारकाः **अत्रसर्वोपिनिर्णयोमन्वादिवत्ज्ञेयः हेमाद्रौब्राह्मे** शुक्लायामथपंचचम्यांचैत्रेमासिशुभानना ॥ श्रीर्ब्रह्मलोकान्मानुष्यंसंप्राप्ताकेशवाज्ञया ॥ अतस्तांपूजयेत्तत्रयस्तंलक्ष्मीर्नमुंचति ॥ चैत्रशुक्लाष्टम्यांभवान्याउत्पत्तिः । तत्रनवमीयुताग्राह्या । अष्टमीनवमीयुक्तानवमीचा

ष्टमीयुतेतिब्रह्मवैवर्तात् **अत्रभवानीयात्रोक्ताकाशीखंडे** भवानींयस्तुप श्येतशुक्लाष्टम्यामधौनरः ॥ नजातुशोकंलभतेसदानंदमयोभवेदिति **अत्रैवा शोककलिकाप्राशनमुक्तंहेमाद्रौलैंगे** अशोककलिकाश्चाष्टौयेपिबंतिपुनर्व सौ ॥ चैत्रेमासिसितेष्टम्यांनतेशोकमवाप्नुयुः **प्राशनमंत्रस्तु** त्वामशोकव राभीष्टंमधुमाससमुद्भवम् ॥ पिबामिशोकसंतप्तोमामशोकंसदाकुर्विति **अत्र विशेषःपृथ्वीचंद्रोदयेविष्णुः** पुनर्वसुबुधोपेताचैत्रेमासिसिताष्टमी ॥ प्रात स्तुविधिवत्स्नात्वावाजपेयफलंलभेदिति **तिथितत्त्वेकालिकापुराणे** चैत्रे मासिसिताष्टम्यांयोनरोनियतेंद्रियः ॥ स्नायाल्लौहित्यतोयेषुसयातिब्रह्मणःप दम् ॥ चैत्रंतुसकलंमासंशुचिःप्रयतमानसः ॥ लौहित्यतोयेयःस्नायात्स कैवल्यमवाप्नुयात् ॥ लौहित्योब्रह्मपुत्रः **मंत्रस्तु** ब्रह्मपुत्रमहाभागशंतनोः कुलसंभव ॥ अमोघगर्भसंभूतंपापंलौहित्यमेहर **चैत्रशुक्लनवमीरामनव मी । तदुक्तमगस्त्यसंहितायाम्** चैत्रेनवम्यांप्राक्पक्षेदिवापुण्येपुनर्वसौ ॥ उदयेगुरुगौराश्वोःस्वोच्चस्थेग्रहपंचके ॥ मेषेपूषणिसंप्राप्तेलग्नेकर्कटकाह्वये ॥ आविरासीत्सकलयाकौशल्यायांपरःपुमान् ॥ तस्मिन्दिनेतुकर्तव्यमुपवास व्रतंसदा ॥ तत्रजागरणंकुर्याद्रघुनाथपरोभुवीति ॥ इयंचमध्याह्नयोगिनीग्रा ह्या ॥ चैत्रशुक्लेतुनवमीपुनर्वसुयुतायदि ॥ सैवमध्याह्नयोगेनमहापुण्यतमा भवेदितितत्रैवोक्तेः **तथा** चैत्रमासेनवम्यांतुजातोरामःस्वयंहरिः ॥ पुनर्व स्वृक्षसंयुक्तासातिथिः सर्वकामदा ॥ श्रीरामनमीप्रोक्ताकोटिसूर्यग्रहाधिका **तथा** केवलापिसदोपोष्यानवमीशब्दसंग्रहात् ॥ तस्मात्सर्वात्मनासर्वैःकार्यं वैनवमीव्रतम् ॥ पूर्वेद्युरेवमध्याह्नयोगेकर्मकालव्याप्तेः सैवग्राह्यादिनद्वये मध्याह्नव्याप्तौ तदभावेवापूर्वदिनेपुनर्वस्वृक्षयुक्तामपित्यक्त्वापरैवकार्या **तदु क्तंमाधवीयेऽगस्तिसंहितायाम्** नवमीचाष्टमीविद्धात्याज्याविष्णुपराय णैः ॥ उपोषणंनवम्यांचदशम्यांचैवपारणमिति ॥ अष्टमीविद्धासऋक्षापि नोपोष्येतिमाधवः **रामार्चनचंद्रिकायामपि** विद्धैवचेदृक्षयुक्ताव्रतंतत्रकथं भवेत् ॥ विद्धानिषिद्धश्रवणान्नवमीचेतिवाक्यतः ॥ वैष्णवानांविशेषात्तुत

त्रविष्णुपरैरपि ॥ दशम्यादिषुवृद्धिश्चेद्विद्धात्याज्यैववैष्णवैः ॥ तदन्येषांव्रतं तत्रैवनिश्चितामिति । अत्रदशम्यादिषुवृद्धिश्चेदिति । तदन्येषामितिचवदन्य दाप्रातस्त्रिमुहूर्तानवमीदशमीचक्षयवशात्सूर्योदयात्प्रागेवसमाप्यते तदा स्मार्त्तानांतत्रैव । एकादशीनिमित्तोपवासात् । नवमीव्रतांगपारणालोपः स्यात् । अतोष्टमीविद्धैवस्मार्तैःकार्या । वैष्णवानांत्वरुणोदयविद्धैकादश्या हेयत्वान्नपारणालोपप्रसंगइति । द्वितीयैवतैःकार्येतिसूचयति । दशमीवृद्ध्य भावेष्टमीविद्धायाएवमध्याह्नव्यापित्वेक्षयेचवैष्णवैरपिविद्धैवोपोष्येत्यर्थसिद्ध म् इदंचव्रतंसंयोगपृथक्त्वन्यायेनकाम्यंनित्यंच तदुक्तंहेमाद्रावगस्ति संहितायाम् उपोषणंजागरणंपितॄनुद्दिश्यतर्पणम् ॥ तस्मिन्दिनेतुकर्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः ॥ सर्वेषामप्ययंधर्मोभुक्तिमुक्त्यैकसाधनः ॥ अशुचि र्वापिपापिष्ठःकृत्वेदंव्रतमुत्तमम् ॥ पूज्यःस्यात्सर्वभूतानांयथारामस्तथैवसः॥ यस्तुरामनवम्यांतुभुक्तेमोहाद्विमूढधीः ॥ कुंभीपाकेषुघोरेषुपच्यतेनात्रसंश यः तथा अकृत्वारामनवमीव्रतंसर्वव्रतोत्तमम् ॥ व्रतान्यन्यानिकुरुतेनते षांफलभाग्भवेत् ॥ प्राप्तेश्रीरामनवमीदिनेमर्त्योविमूढधीः उपोषणंनकुरुते कुंभीपाकेषुपच्यते ॥ अत्रकेचित्तदुपासकानामेवेदंव्रतंनित्यंनत्वन्येषामित्याहुः अन्येतु अकरणेदोषश्रवणात्तस्मात्सर्वात्मनासर्वैःकार्यंवैनवमीव्रतमिति पूर्वोक्तवचनाच्च । जन्माष्टम्यादिवदिदमपिसर्वेषांनित्यम् अन्यथाजन्माष्ट म्यादावपितदुपासकानामेवनित्यतांवक्तुःकोवारयितेत्यहुः अत्रविशेषोहे माद्रावगस्त्यसंहितायाम् आचार्यंचैवसंपूज्यवृणुयात्प्रार्थयेन्निशि ॥ श्रीरा मप्रतिमादानंकरिष्येहंद्विजोत्तम ॥ भक्त्याचार्योभवप्रीतः श्रीरामोसित्यमे वच तथा स्वगृहेचोत्तरेदेशेदानस्योज्ज्वलमंडपम् ॥ शंखचक्रहनूमद्भिः प्राग्द्वारेसमलंकृतम् ॥ गरुत्तमच्छार्ङ्गबाणैश्चदक्षिणेसमलंकृतम् गदा खड्गांगदैश्चैवपश्चिमेसुबिभूषिमत ॥ पद्मस्वस्तिकनीलैश्चकौबेर्यांसमलंकृतम् मध्येहस्तचतुष्काढ्यंवेदिकामुक्तमायतम् ॥ ततःसंकल्पयेद्देवंराममेवस्मरन्मु ने ॥ अस्यांरामनवम्यांचरामाराधनतत्परः ॥ उपोष्याष्टसुयामेषुपूजयित्वाय

थाविधि ॥ इमांस्वर्णमयींरामप्रतिमांचप्रयत्नतः ॥ श्रीरामप्रीतयेदास्येराम भक्तायधीमते ॥ प्रीतोरामोहरत्याशुपापानिसुबहूनिमे ॥ अनेकजन्मसंसि द्धान्यभ्यस्तानिमहांतिच ॥ ततःस्वर्णमयींरामप्रतिमांपलमात्रतः ॥ निर्मिता द्विभुजांदिव्यांवामांकंस्थितजानकीम् ॥ बिभ्रतींदक्षिणकरेज्ञानमुद्रांमहामु ने ॥ वामेनाधःकरेणाराद्देवीमालिंग्यसंस्थिताम् ॥ सिंहासनेराजतेत्रपलद्वय विनिर्मिते तथा अशक्तोयोमहाभागसतुवित्तानुसारतः ॥ पलेनार्धतदर्धार्धत दर्धार्धेनवामुने ॥ सौवर्णराजतंवापिकारयेद्रघुनंदनम्॥पार्श्वेभरतशत्रुघ्नौधृतछ त्रकरावुभौ ॥ चापद्वयसमायुक्तंलक्ष्मणंचापिकारयेत् ॥ दक्षिणांगेदशरथंपु त्रावेक्षणतत्परम् ॥ मातुरंकगतंरामंमिंद्रनीलसमप्रभम् ॥ पंचामृतस्नानपू र्वैसंपूज्यविधिवत्ततः कौशल्यामंत्रस्तु रामस्यजननीचासिरामरूपमिदं जगत् ॥ अतस्त्वांपूजयिष्यामिलोकमातर्नमोस्तुते ॥ नमोदशरथायेतिपूज येतिपतरंततः ॥ अत्रदशावरणपंचावरणादिपूजाऽन्यत्रज्ञेया । अशोककु सुमैर्युक्तमर्घ्यंदद्याद्विचक्षणः ॥ दशाननबधार्थायधर्मसंस्थापनायच ॥ राक्ष सानांविनाशायदैत्यानांनिधनायच ॥ परित्राणायसाधूनांजातोरामःस्वयंहरिः गृहाणार्घ्यमयादत्तं भ्रातृभिःसहितोनघ ॥ पुष्पांजलिंपुनर्दत्वायामेयामेप्रपूज येत् ॥ दिवैवंविधिवत्कृत्वारात्रौजागरणंततः ॥ ततःप्रातःसमुत्थायस्नानसं ध्यादिकाःक्रियाः ॥ समाप्यविधिवद्रामंपूजयेद्विधिवन्मुने ॥ ततोहोमंप्रकुर्वी तमूलमंत्रेणमंत्रवित् ॥ पूर्वोक्तपद्मकुंडेवास्थंडिलेवासमाहितः ॥ लौकिकाग्नौ विधानेनशतमष्टोत्तरंततः ॥ साज्येनपायसेनैवस्मरन्राममनन्यधीः ॥ ततोभ क्त्यासुसंतोष्यआचार्यंपूजयेन्मुने ॥ ततोरामंस्मरन्दद्यादेवंमंत्रमुदीरयेत् ॥ इं मांस्वर्णमयींरामप्रतिमांसमलंकृताम् ॥ चित्रवस्त्रयुगच्छन्नांरामोहंराघवायते॥ श्रीरामप्रीतयेदास्येतुष्टोभवतुराघवः ॥ इतिदत्वाविधानेनदद्याद्वैदक्षिणांभुव म् ॥ ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयइति ॥ इयंमलमासेनकार्या । सु जप्तमप्यजप्तंस्यान्नोपवासःकृतोभवेदिति ॥ नकुर्यान्मलमासेतुमहादानव्रता निचेतिचमाधवीयेसंग्रहवचनात् ॥ ननुरामनवमीव्रतस्यनित्यत्वादेकादशी

वन्मलमासेपिकर्तव्यतास्यादितिचेत् । अत्रब्रूमः नैकादश्युपवासस्यव्रतत्वेन प्राप्तिः । किंतुएकादश्यांनभुंजीतपक्षयोरुभयोरपीत्यादिनिषेधस्यमलमासे पिपालनीयत्वात् कृष्णैएकादश्यांपुत्रवद्गृहिणइवार्थादुपवासःप्रसज्यते । नत्विहतथेतिव्रतत्वेनप्राप्तिर्वाच्या । साचनिषिद्धेप्रसंगः । स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलइतिनिषेधाच्च । एवंजन्माष्टम्यादावपिबोद्धव्यम् । इतिरामनवमी **चैत्रशुक्लैकादश्यांदोलोत्सवउक्तोब्राह्मे** चैत्रमासस्यशुक्लाया मेकादश्यांतुवैष्णवैः ॥ आंदोलनीयोदेवेशःसलक्ष्मीकोमहोत्सवैरिति ॥ **चैत्रशुक्लाद्वादश्यांदमनोत्सवः** । द्वादश्यांचैत्रमासस्यशुक्लायांदमनोत्सवः ॥ बौधायनादिभिःप्रोक्तःकर्तव्यःप्रतिवत्सरमिति रामार्चनचंद्रिकोक्तेः ऊर्जे व्रतंमधौदोलाश्रावणेतंतुपूजनम् ॥ चैत्रेचदमनारोपमकुर्वाणोव्रजत्यधः ॥ इतितत्रैवपाद्मवचनाच्च । शिवभक्तादिभिस्तुचतुर्दश्यादौकार्यम् । तत्रस्यात्स्वीयतिथिषुवह्न्यादेर्दमनार्पणमितितत्रैवोक्तेः **ज्योतिःप्रकाशेपि** स्वस्वदेवप्रतिष्ठायांमंत्रसंग्रहणेतथा ॥ पवित्रदमनारोपेग्राह्यातत्तत्तिथिर्बुधैः **तिथ्यस्तु** वह्निर्विरिंच्योगिरिजागणेशःफणीविशाखोदिनकृन्महेशः ॥ दुर्गांतकोविश्वहरिःस्मरश्चशर्बःशशीचेतितिथीषुपूज्याइत्युक्ताः॥ अथागमोक्तदीक्षावतोदमनारोपणविधिः **रामार्चनचंद्रिकायाम्** तत्रैकादश्याम् । क्रियालोपविघातार्थंयत्त्वयाविहितंप्रभो ॥ नमेविघ्नोभवेदत्रकुरुनाथदयांमयि ॥ सर्वथासर्वदाविष्णोममत्वंपरमागतिः ॥ उपवासेनत्वांदेवतोषयामिजगत्पते ॥ कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः॥अद्यप्रभृतिदेवेशयावद्वैशेषिकंदिनम्॥ तावद्रक्षात्वयाकार्यासर्वस्यास्यजगत्पते ॥ इतिदेवंसंप्रार्थ्यदमनमादायपंचगव्येनप्रोक्ष्यवारिणाप्रक्षाल्याशोकमूलेदेवाग्रेवा । अशोकायनस्तुभ्यंकामस्त्रीशोकनाशनः ॥ शोकार्त्तीहरमेनित्यमानंदंजनयस्वमे ॥ इत्यशोकम् । त्रुट्यादिकालपर्यंतःकालरूपोमहाबलः ॥ कलतेचैवयःसर्वंतस्मैकालात्मनेनमइतिकालम् ॥ वसंतायनमस्तुभ्यंवृक्षगुल्मलताश्रय ॥ सहस्रमुखसंवासकामरूपनमोस्तुतइतिवसंतम् ॥ कामभस्मसमुद्भूत रतिबाष्पपरिप्लुत ॥ ऋषिगंधर्वदेवा

दि बिमोहकनमोस्तुतइति दमनंचसंपूज्य । नमोस्तुपंचबाणायजगदाह्लाद कारिणे॥ मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायते॥इतिदमनमुपस्थाय। ओंकामा यनमइतिसंपूज्य। निशायांदेवताग्रेपंचवर्णैःचंदनेनवाअष्टदलंकृत्वाबहिश्चतु रस्रंतद्बहिर्वर्तुलत्रयंतद्बहिर्वृत्तंचतुरस्रंचकृत्वातत्रकुंभंसंस्थाप्योपरिदमनंपूज यित्वा। पूजार्थंदेवदेवस्यविष्णोर्लक्ष्मीपतेःप्रभोः॥मदनत्वमिहागच्छसान्निध्यं कुरुतेनमः॥ ओंक्लींकामदेवायनमःओंह्रींरत्यैनमइत्यावाह्य। दिक्षुपूर्वादितःस्म रशरीरायनमःअनंगाय०मन्मथाय०कामाय०क्लींवसंतसखाय०स्मराय० इक्षु चापाय०पुष्पास्त्रायनमइतिपूजयित्वा ओं तत्स्वरूपायविद्महेकामदेवायमधी महि॥तन्नोनंगःप्रचोदयात् ॥ इत्यष्टोत्तरशतंसंमंत्र्यपूजयित्वा । ह्रींनमइतिपु ष्पांजलिंदत्वा ।नमोस्तुपुष्पबाणायजगदाह्लादकारिणे॥मन्मथायजगन्नेत्रेरति प्रीतिप्रियायते॥ इतिनत्वा। आमंत्रितोसिदेवेशपुराणपुरुषोत्तम ॥ प्रातस्त्वांपू जयिष्यामिसान्निध्यंकुरुकेशव ॥ क्षीरोदधिमहानागशय्यावस्थितविग्रह॥ प्रा तस्त्वांपूजयिष्यामिसन्निधौभवतेनमः॥ निवेदयाम्यहंतुभ्यंप्रातर्दमनकंशुभम् ॥ सर्वदासर्वथाविष्णोनमस्तेस्तुप्रसीदमे॥इतिदेवंसंप्रार्थ्यपुष्पांजलिंदत्वा॥अ स्त्रेणचक्रमंत्रेणवारक्षांकुर्यात् । ततःप्रातर्नित्यपूजांकृत्वापुनर्देवंसंपूज्यगंधदू र्वाक्षतयुक्तंदमनमादायमूलमंत्रंपठित्वा। देवदेवजगन्नाथवांछितार्थप्रदायक ॥ हृदिस्थान्पूरयेःकामान्ममकामेश्वरीप्रिय ॥ इदंदमनकंदेवगृहाणमदनुग्र हात् ॥ इमांसांवत्सरीपूजांभगवन्परिपूरय इमिमंत्रांतेपुनर्मूलमंत्रेणदेवेसमर्प येत्।ततोअंगदेवताभ्यःस्वस्वमंत्रेणदत्वाप्रार्थयेत् ॥ मणिविद्रुममालाभिर्मंदा रकुसुमादिभिः ॥ इयंसांवत्सरीपूजा तवास्तुगरुडध्वज ॥ वनमालांयथावि ष्णौकौस्तुभंसततंहृदि ॥ तद्वदामनकींमालांपूजांचहृदयेवह ॥ जानताजान तावापिनकृतंयत्तवार्चनम् ॥ तत्सर्वंपूर्णतांयातुत्वत्प्रसादाद्रमापते ॥ जितंते पुंडरीकाक्षनमस्तेविश्वभावन ॥ नमस्तेस्तुहृषीकेशमहापुरुषपूर्वज ॥ मंत्रही नमितिचसंप्रार्थ्यपंचोपचारैः पुनःसंपूज्यनीराज्यपारयेदिति । दीक्षारहिता नांतुनाम्नैवसमर्पणम् ॥ अत्रचद्वादशीमतंत्रीकृत्यपारणाहोग्राह्यम् । पार

णाहेनलभ्येतद्दादशीघटिकापिचेत् ॥ तदात्रयोदशीग्राह्यापवित्रदमनार्पणइ तितत्रैवोक्तेः **गौणोपिकालउक्तस्तत्रैव** हरौनदमनारोपःस्यान्मधौविन्न तोयदि ॥ वैशाखेश्रावणेवापितत्तिथौस्यात्तदर्पणम् ॥ श्रावणावधिशुक्रास्ते कर्त्तव्यमितिनारदः ॥ इतिपाठांतरम् । इदंचमलमासेनकार्यं । उपाकर्मो त्सर्जनंचपवित्रदमनार्पणमितिकालादर्शेमलमासवर्ज्येषुपरिगणनात् । उपा कर्मचहव्यंचकव्यंपर्वोत्सवंतथा ॥ उत्तरेनियतंकुर्यात्पूर्वेतन्निष्फलंभवेदिति माधवीये प्रजापतिवचनाच्च । शुक्रास्तादौतुकार्यमेव । पूर्वोक्तवचनात् । उपाकर्मोत्सर्जनंचपवित्रदमनार्पणम् ॥ ईशानस्यबलिंविष्णोःशयनंपरिवर्त नम् ॥ कुर्याच्छुक्रस्यचगुरोर्मौढ्येपीतिविनिश्चयइतिज्योतिर्निबंधे वृद्धगा र्ग्यवचनाच्च ॥ इतिदमनारोपः । चैत्रशुक्लत्रयोदश्यामनंगव्रतम् ॥ तत्रसापू र्वाग्राह्या । त्रयोदशीतिथिःपूर्वासितइतिदीपिकोक्तेः चैत्रशुक्लचतुर्दशीपूर्वाग्रा ह्या । मधोःश्रावणमासस्यशुक्लायातुचतुर्दशी ॥ सारात्रिव्यापिनीग्राह्यानान्याशुक्लाकदाचनेतिहेमाद्रौबौधायनोक्तेः ॥ परापूर्वाह्लगामिनीतिवापाठः **अत्रकेचिद्यथाश्रुतमेवार्थंवर्णयंति** निशिभ्रमंतिभूतानिशक्तयःशूलभृ द्यतः ॥ अतस्तत्रचतुर्दश्यांसत्यांतत्पूजनंभवेदिति ब्रह्मवैवर्तात् । हेमा द्रिमाधवादिलिखनमप्येवम् । संप्रदायविदस्त्वाहुः । चतुर्दशीतुकर्तव्यात्र योदश्यायुताविभो ॥ इतिस्कांदमुत्सर्गः । तदपवादश्च । तृतीयैकादशीषष्ठी शुक्लपक्षेचतुर्दशी ॥ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेतिनारदीयवचनम् । तदपवादश्च । मधोःश्रावणमासस्येति । तत्रापवादाभावेपुनरुत्सर्गस्यस्थि तिरितिन्यायेनपूर्वविद्धैवग्राह्येतिसिद्धयति । ब्रह्मवैवर्ततुसामान्यरूपमन्यत्र सावकाशमितितेनपूर्वादिनेमुहूर्तत्रयवेधेपूर्वाअन्यथोत्तरेति। चैत्रपूर्णिमासामा न्यनिर्णयात्परैव **अत्रविशेषानिर्णयामृतेविष्णुस्मृतौ** चैत्रीचित्रायुताचे त्स्यात्तस्यांचित्रवस्त्रप्रदानेनसौभाग्यमाप्नोतीति **तथाब्राह्मे** मंदेवार्केगुरौवा पिवारेष्वेतेषुचैत्रिका ॥ तत्राश्वमेधजंपुण्यं स्नानश्राद्धादिभिर्लभेदिति ॥ अ त्रसर्वदेवानांदमनपूजोक्ता **तत्रैववायवीये** संवत्सरकृतार्चायाः साफल्या

याखिलान्सुरान् ॥ दमनेनार्चयेच्चैत्र्यांविशेषेणसदाशिवमिति ॥ अत्रस्वीय तिथ्यासमुच्चयइतिकेचित् । स्वीयतिथ्यामकरणेत्रदमनपूजनमित्यन्ये । दीक्षि ततदितरविषयत्वेनव्यवस्थेत्यपरे इयंमन्वादिरपि । साचपूर्वमुक्ता । चैत्रकृ ष्णत्रयोदश्यां महावारुणीसंज्ञोयोगोगौडेषुप्रसिद्धः **तदुक्तंवाचस्पतिकृतौ शूलपाणौचस्कांदे** वारुणेनसमायुक्तामधौकृष्णात्रयोदशी ॥ गंगायांय दिलभ्येतसूर्यग्रहशतैःसमा ॥ शनिवारसमायुक्तासामहावारुणीस्मृता ॥ गं गायांयदिलभ्येतकोटिसूर्यग्रहैःसमा ॥ शुभयोगसमायुक्ताशनौशतभिषाय दि ॥ महामहेतितिख्यातात्रिकोटिकुलमुद्धरेत् **तत्रैवज्योतिषे** चैत्रासिते वारुणऋक्षयुक्ता त्रयोदशीसूर्यसुतस्यवारे ॥ योगेशुभेसामहतीमहत्या गंगा जलेर्कग्रहकोटितुल्येति **त्रिस्थलीसेतौब्रह्मांडपुराणे** वारुणेनसमायुक्ताम धौकृष्णात्रयोदशी ॥ गंगायांयदिलभ्येतशतसूर्यग्रहैःसमेति **कल्पतरौब्राह्मे** मधौकृष्णत्रयोदश्यांशनौशतभिषायुता ॥ वारुणीतिसमाख्याताशुभेतुमहती स्मृता **चैत्रकृष्णचतुर्दश्यांविशेषःपृथ्वीचंद्रोदयेपुलस्त्यः** चैत्रकृष्णचतुर्द श्यांयःस्नायाच्छिवसन्निधौ ॥ नप्रेतत्वमवाप्नोतिगंगायांतुविशेषतइतिअत्र पूर्वाग्राह्या कृष्णपक्षत्वात् । गौडैस्त्वेतदेवशुक्लचतुर्दश्यामित्येवंदेवलीय त्वेनपठितम् ॥

॥ इतिश्रीकमलाकरभट्टकृतेकालनिर्णयसिंधौचैत्रमासः ॥

मेषसंक्रमेप्रागपरादशदशघटिकाःपुण्यकालः । रात्रौतुप्रागुक्तम् **अत्रधर्म घटादिदानमुक्तं पृथ्वीचंद्रोदयेपाद्मे** तीर्थेचानुदिनंस्नानंतिलैश्चपितृतर्प णम् ॥ दानंधर्मघटादीनांमधुसूदनपूजनम् ॥ माधवेमासिकुर्वीतमधुसूदन तुष्टिदं **अथवैशाखस्नानम् तत्रपृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः** तु लामकरमेषेषुप्रातःस्नानंविधीयते ॥ हविष्यंब्रह्मचर्यंचमहापातकनाशनमि ति सौरमासउक्तः **अन्यत्पक्षद्वयमुक्तंतत्रैवपाद्मे** मधुमासस्यशुक्लायामे कादश्यामुपोषितः ॥ पंचदश्यांचभोवीरमेषसंक्रमणेतुवा ॥ वैशाखस्नाननि यमंब्राह्मणानामनज्ञया ॥ मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकम् **तत्रमंत्रः**

वैशाखंसकलंमासंमेषसंक्रमणेरवेः ॥ प्रातःसनियमःस्नास्येप्रीयतांमधुसूदनः ॥ मधुहंतुःप्रसादेनब्राह्मणानामनुग्रहात् ॥ निर्विघ्नमस्तुमेपुण्यंवैशाखस्नानमन्वहं ॥ मांधवेमेषगेभानौमुरारेमधुसूदन ॥ प्रातःस्नानेनमेनाथफलदो भवपापहन्निति ॥ तीर्थविशेषोपितत्रैवोक्तः । मेषसंक्रमणेभानुर्माधवेमासि यत्नतः ॥ महानद्यांनदीतीर्थेनदेसरसिनिर्झरे देवखातेथवास्नायाद्यथाप्राप्ते जलाशये ॥ दीर्घिकाकूपवापीषुनियतात्माहरिंस्मरन्निति संकल्पेचतत्तत्तीर्थनामग्राह्यम् । अज्ञानेतुविष्णुतीर्थमितिवदेत् ॥ यदानज्ञायतेनामतस्यतीर्थस्यभोद्विजाः ॥ तत्रेत्युच्चारणंकार्यविष्णुतीर्थमिदंत्विति तीर्थस्यदेवताविष्णुः वर्सत्रापिनसंशयइति तत्रैवोक्तेः ॥ **तथान्योपिविशेषस्तत्रैवपाद्मे** तुलसीकृष्णगौराख्यातयाभ्यर्च्यमधुद्विषम् ॥ विशेषेणतुवैशाखेनरोनारायणोभवेत् ॥ माधवंसकलंमासंतुलस्यायोर्चयेन्नरः ॥ त्रिसंध्यंमधुहंतारंनास्तितस्य पुनर्भवः **तथा** प्रातःस्नात्वाविधानेनमाधवेमाधवप्रियम् ॥ योश्वत्थमूलमासिंचेत्तोयेनबहुनासदा ॥ कुर्यात्प्रदक्षिणंतंतुसर्वदेवमयंततः । पितृदेवमनुष्यांश्चतर्पयेत्सचराचरम् ॥ योश्वत्थमर्चयेद्देवमुदकेनसमंततः ॥ कुलानामयुतंतेनतारितंस्यान्नसंशयः ॥ कंडूयपृष्ठतोगांतुस्नात्वापिप्पलतर्पणम् ॥ कृत्वागोविंदमभ्यर्च्यनदुर्गातिमवाप्नुयुः **तथा** एकभक्तमथोनक्तमयाचितमतंद्रितः माधवेमासियःकुर्याल्लभतेसर्वमीप्सितम् ॥ वैशाखेविधिनास्नानंदेवनद्यादिकेबहिः हविष्यंब्रह्मचर्यंचभूशय्यानियमस्थितः॥ व्रतंदानंदमोदेवि मधुसूदनपूजनम् ॥ अपिजन्मसहस्रोत्थंपापंदहतिदारुणम् ॥ **मदनरत्ने स्कांदे** प्रपाकार्याचवैशाखेदेवेदेयागलंतिका ॥ उपानद्व्यजनच्छत्रसूक्ष्मवासांसिचंदनम्जलपात्राणिदेयानितथापुष्पगृहाणिच ॥ पानकानिच चित्राणिद्राक्षारंभाफलान्यपि **तिथितत्त्वे** ददातियोहिमेषादौ सक्तूनंबुघटान्वितान्॥पितॄनुद्दिश्यविप्रेभ्यःसर्वपापैःप्रमुच्यतइति **तथा** वैशाखेयोघटंपूर्णसभोज्यंवैद्विजन्मने ॥ ददातिसुरराजेंद्रसयातिपरमांगतिम्॥एवंसंपूर्णस्नानाशक्तौन्यहंवास्नायात् **तदुक्तंतत्रैवपाद्मे** त्रयोदश्शांचतुर्दश्यांवैशाख्यांवा

दिनत्रयम् । अपिसम्यग्विधानेननारीवापुरुषोपिवा ॥ प्रातःस्नातःसनियमः सर्वपापैःप्रमुच्यते ॥ यदातुवैशाखोमलमासोभवतितदाकाम्यानांतत्रसमाप्तिनिषेधात् । मासद्वयंस्नानंतन्नियमाश्चकर्तव्याःमासोपवासचांद्रायणादितुमलमासेएवसमापयेत् **तदुक्तंदीपिकायाम्** नियतत्रिंशद्दिनत्वाच्छुभेमास्यारभ्यसमापयेत्मलिनेमासोपवासव्रतमिति **अत्रदानविशेषउक्तोपरा र्केवामनपुराणे** गंधाश्चमाल्यानितथावैशाखेसुरभीणिच ॥ देयानिद्विजमुख्येभ्योमधुसूदनतुष्टये ॥ एवंस्नानेकृतेतस्योद्यापनंकार्यम् **तदुक्तंतत्रैव** मासमेवंबहिःस्नात्वानद्यादौविमलेजले ॥ एकादश्यांचद्वादश्यांपौर्णमास्यामथापिवा ॥ उपोष्यनियतोभूत्वाकुर्यादुद्यापनंबुधः ॥ मंडपंकारयेदादौकलशंतत्रविन्यसेत् ॥ निष्केणवातदर्धेनतदर्धार्धेनवापुनः ॥ शक्त्यावाकारयेद्वेबं सौवर्णलक्षणान्वितम् ॥ लक्ष्मीयुक्तंजगन्नाथंपूजयेदासनेबुधः ॥ भूषणैश्चंदनैःपुष्पैर्दीपैर्नैवेद्यसंचयैः ॥ एवंसंपूज्यविधिवद्रात्रौ जागरणंचरेत् ॥ श्वोभूतेकृतमैत्रोथग्रहवेद्यांगृहान्यजेत्॥होमंकुर्यात्प्रयत्नेन पायसेनविचक्षणः॥तिलाज्येनयवैर्वापिसर्वैर्वापिस्वशक्तितः ॥ अष्टोत्तरसहस्रं वाशतमष्टोत्तरंतुवा ॥ प्रतद्विष्णुरनेनैवइदंविष्णुरननेवा॥व्रतसंपूर्तिसिध्यर्थंधेनुमेकांपयस्विनीम्॥पादुकोपानहौछत्रंगुरवेव्यंजनंतथा ॥ शय्यांसोपस्करांदद्याद्दीपिकांदर्पणंतथा ॥ ब्राह्मणान्भोजयेत्त्रिंशत्तेभ्योदद्याच्चदक्षिणाम् ॥ कलशान्जलसंपूर्णांस्तेभ्योदद्याद्यवांस्तथा॥ एवंकृतेसाधवस्यचोद्यापनविधौशुभे फलमाप्नोतिसकलंविष्णुसायुज्यमाप्नुयात् **एतावत्यशक्तौतत्रैवोक्तम् वै** शाख्यांविधिनास्नात्वाभोजयेत्ब्राह्मणान्दश ॥ कृसरंसर्वपापेभ्योमुच्यतेनात्रसंशयइति॥ **वैशाखशुक्लतृतीयाअक्षय्यतृतीयोच्यते।** सापूर्वाह्लव्यापिनी ग्राह्या । दिनद्वयेपितद्व्याप्तौपरैव **तदुक्तंनिर्णयामृतेनारदीये** वैशाखेशुक्लपक्षेतुतृतीयारोहिणीयुता॥दुर्लभाबुधवारेणसोमेनापियुतातथा ॥ रोहिणीबुधयुक्तापिपूर्वविद्धाविवर्जिता ॥ भक्त्याकृतापिमांधातःपुण्यंहंतिपुराकृतम् ॥ गौरीविनायकोपेतारोहिणीबुधसंयुता ॥ विनापिरोहिणीयोगात्पुण्यकोटिप्र

दासदेति **इयंयुगादिरपि साचोक्तारत्नमालायाम्** माघेपंचदशीकृष्णा नभस्येचत्रयोदशी । तृतीयामाधवेशुक्लानवम्यूर्जेयुगादयइति **यत्तु गौडाः** माघस्यपौर्णमास्यांतुघोरंकलियुगंस्मृतमिति ब्राह्मोक्तेः । वैशाखमासस्यचया तृतीयानवम्यसौकार्तिकशुक्लपक्षे ॥ नभस्यमासस्यतमिस्रपक्षेत्रयोदशीपंचद शीचमाघे ॥ इतिविष्णुपुराणे । चकारेणतमिस्रपक्षानुषंगेपिपूर्वानुरोधात्पौ र्णमास्येवज्ञेया । द्वेशुक्लइत्यादिकंतुनिर्मूलमित्याहुः । तन्न । दर्शेतुमाघमास स्यप्रवृत्तंद्वापरंयुगमितिभविष्यविरोधात्एतेनब्राह्मानुसारात् पूर्णिमायामेवयु गादिश्राद्धंवदन्शूलपाणिःपरास्तः । तेनकल्पभेदाद्युगभेदाद्व्यवस्थेतितत्त्व म् । एतेनकार्तिकेनवमीशुक्लामाघमासेचपूर्णिमेतिबृहन्नारदीयेव्याख्यातम् । निर्मूलत्वोक्तिर्नारदीयाज्ञानकृता **अत्रश्राद्धमुक्तंमात्स्ये** कृतंश्राद्धंविधाने नमन्वादिषुयुगादिषु ॥ हायनानिद्विसाहस्रंपितॄणांतृप्तिदंभवेदिति **भारते पि** यामन्वाद्यायुगाद्याश्चतिथयस्तासुमानवः॥ स्नात्वाहुत्वाचदत्वाचजप्त्वा नंतफलंलभेदिति॥श्राद्धेपिपूर्वाह्णव्यापिनीग्राह्या । पूर्वाह्णेतुसदाकार्याःशुक्ला मनुयुगादयः ॥ दैवेकर्मणिपित्र्येचकृष्णेचैवापराह्णिकाइतिपाद्मोक्तेः ॥ द्वे शुक्लेद्वेतथाकृष्णेयुगादीकवयोविदुः ॥ शुक्लेपौर्वाह्णिकेग्राह्येकृष्णेचैवापराह्णि के ॥ इतिहेमाद्रौनारदीयवचनाच्च **दीपिकापि** अथोमन्वादियुगादिकर्मति थयःपूर्वाह्णिकास्युः सितेविज्ञेयाअपराह्णिकाश्चबहुलेइतिस्मृत्यर्थसारेपि । यु गादिमन्वादिश्राद्धेषुशुक्लपक्षेउदयव्यापिनीतिथिर्ग्राह्या । कृष्णपक्षेऽपराह्णव्या पिनीति **दिवोदासीयेगोभिलः** वैशाखस्यतृतीयांयःपूर्वविद्धांकरोतिवै॥ हव्यंदेवानगृह्णंतिकव्यंचपितरस्तथेति ॥ गोविंदार्णवेप्येवम् । तेनेयंपूर्वाह्ण व्यापिनी । दिनद्वयेतत्वेपरैवेति धर्मतत्त्वविदोहेमाद्र्यादयः । **अनंतभट्ट स्तु** सवैधृतिर्व्यतीपातोयुगमन्वादयस्तथा ॥ सन्मुखाउपवासेस्युर्दानादावं तिमाःस्मृताइत्याह । दानादाविति श्राद्धसंग्रहः । उपवासस्त्वग्रेवक्ष्यते **हेमा द्रावप्येवम्** माधवस्तुव्यतीपातःश्राद्धेपराह्णव्यापीग्राह्यइत्याह । स्मृत्यर्थ सारेतुकुतुपकालयोगीत्युक्तम् **यत्तुमार्कंडेयः** शुक्लपक्षस्यपूर्वाह्णेश्राद्धंकुर्याद्वि

चक्षणः ॥ कृष्णपक्षेपराह्णेहिरौहिणंतुनलंघयेत् ॥ रौहिणोनवमोमुहूर्त्तः । अत्रशुक्लपक्षयुगादिश्राद्धंपूर्वाह्णेकार्यमितिशूलपाणिः निर्णयामृतादयस्तुकालादर्शेऽमाश्राद्धमापराह्णिकमुक्त्वाएवमन्वंतरादीनांयुगादीनांविनिर्णयइत्युक्तत्वात्।द्वेशुक्लइत्यादिवचनंविष्णुपूजनविषयमश्राद्धेत्वापराह्णिक्येवेतिव्यवस्थांजगदुः। सेयंपूर्वोक्तानेकवचोविरोधात्पूर्वाह्णेदैविकंकुर्यादित्यादिवचनादेवसिद्धेवचनवैयर्थ्याच्चस्वाच्छंद्यविलसितमात्रमित्युपेक्षणीया किंच। कालादर्शोक्तिर्न्यायमूलावचोमूलावा।नाद्यःयुगादिश्राद्धस्यामाश्राद्धविकृतित्वेनन्यायतोपराह्णव्याप्तावपिवचनेनतस्यबाधात् । नांत्यः । अतिदेशादेवापराह्णप्राप्तेर्वचनवैयर्थ्यात् । अप्राप्तेशास्त्रमर्थवदितिन्यायात् । तेनयदिकालादर्शोक्तेःकथंचिच्छ्राद्धाजाड्येनसमाधित्सा तर्हि न्यायप्राप्तकृष्णपक्षयुगादिविषयत्वेनसाव्यवस्थापनीयेतिदिक् । पूर्वाह्णस्तत्रद्वेधाभक्तदिनपूर्वार्धःद्वेधाभक्तदिनांशकोत्रगदितःप्राह्णापराह्णाविति दीपकोक्तेः । माधवादयोप्येवम् **अत्रविशेषोहेमाद्रौभविष्ये** वैशाखेशुक्लपक्षेतुतृतीयायांतथैवच॥गंगातोयेनरःस्नात्वामुच्यतेसर्वकिल्बिषैः॥तस्यांकार्योयवैर्होमोयवैर्विष्णुंसमर्चयेत्॥ यवान्दद्याद्द्विजातिभ्यःप्रयतःप्राशयेद्यवानिति **अत्रदानविशेषस्तत्रैव भविष्येइमांप्रक्रम्य** उदकुंभान्त्सकनकान्त्सान्नान्त्सर्दरसैःसह ॥ यवगोधूमचणकान्सक्तुदध्योदनंतथा ॥ ग्रैष्मिकंसर्वमेवात्रसस्यंदानेप्रशस्यतइति। **देवी पुराणेपि** तृतीयायांतुवैशाखेरोहिण्यृक्षेप्रपूज्यतु ॥ उदकुंभप्रदानेमशिवलोकेमहीयते **मंत्रस्तु** एषधर्मघटोदत्तोब्रह्मविष्णुशिवात्मकः ॥ अस्यप्रदानात्तृप्यंतुपितरोपिपितामहाः ॥ गंधोदकतिलैर्मिश्रंसान्नंकुंभंफलान्वितं ॥ पितृभ्यःसंप्रदास्यामिअक्षय्यमुपतिष्ठत्विति अत्रचपिंडरहितंश्राद्धंकुर्यात् । अयनद्वितयेश्राद्धं विषुवद्द्वितयेतथा युगादिषुचसर्वेषुपिंडनिर्वपणादृतेइतिहेमाद्रौ पुलस्त्यवचनात् **अत्ररात्रिभोजनेप्रायश्चित्तमग्निविधाने** रात्रौभुक्ते वत्सरेतुमन्वादिषुयुगादिषु ॥ अभिस्ववृष्टिंमंत्रंच जपेदशनपातकइति **अपरार्के यमः**कृतोपवासाःसलिलयेयुगादिदिनेषुच ॥ दास्यंत्यन्नादिसहितंतेषांलोका

महोदयाइति ॥ वैशाखेमलमासेसतितत्रैवयुगादिःकार्यः **तथाचहेमाद्रौऋष्यशृङ्गः** दशहरासुनोत्कर्षश्चतुर्ष्वपियुगादिषु ॥ उपाकर्मणि चोत्सर्गेह्येतदिष्टंवृषादितइति ॥ एतद्दशहरादिकंवृषादिसंक्रमेइष्टम् । कन्याचंद्रे वृषेरवाविंत्यादि सौरमासोक्तेरित्यर्थः **कालादर्शेपि** अब्दोदकुंभमन्वादि महालय युगादिष्विति ॥ मलमासकर्तव्येषुपरिगणनाच्च । महालयशब्देनमघात्रयोदश्युच्यतइतिमाधवः **स्मृतिचंद्रिकायांतुमासद्वयेकर्तव्यमित्युक्तम्** यौगादिकंमासिकंचश्राद्धंचापरपक्षिकम् ॥ मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेति ॥ अपरपक्षःकृष्णपक्षःनतुमहालयः । तस्यतत्रनिषेधात् **मदनरत्नेपिमरीचिः** प्रतिमासंमृताहेचश्राद्धंयत्प्रतिवत्सरम् ॥ मन्वादौचयुगादौचतन्मासोरुभयोरपीति ॥ प्रतिवत्सरंक्रियमाणंकल्पादिश्राद्धमितिसएवव्याचख्यौ **अथश्राद्धाकरणेप्रायश्चित्तमुक्तमृग्विधाने** नयस्यद्यावामंत्रंचदशवारंतदाजपेत् ॥ युगादयोयदान्यूनाःकुरुतेनैवचापियइति ॥ अत्रसमुद्रस्नानंप्रशस्तम् **तदुक्तंपृथ्वीचन्द्रोदयेसौरपुराणे** युगादौतुनरःस्नात्वाविधिवल्लवणोदधौ ॥ गोसहस्रप्रदानस्यकुरुक्षेत्रेफलंहियत् ॥ तत्फलंलभतेमर्त्योभूमिदानस्यचध्रुवमिति ॥ अयंनिर्णयःसर्वयुगादिषुबोद्धव्यःइतियुगादिनिर्णयः। इयमेवतृतीयापरशुरामजयन्ती । साप्रदोषव्यापिनीग्राह्या **तदुक्तंभार्गवार्चनदीपिकायांस्कांदभविष्ययोः** वैशाखस्यसितेपक्षे तृतीयायांपुनर्वसौ ॥ निशायाःप्रथमेयामेरामाख्यसमयेहरिः ॥ स्वोच्चगैःषड्ग्रहैर्युक्तेमिथुनेराहुसंस्थिते ॥ रेणुकायास्तुयोगर्भादवतीर्णोहरिःस्वयमिति ॥ दिनद्वयेतद्व्याप्तावंशतःसमव्याप्तौचपरा ॥ अन्यथापूर्वैव तदुक्तंतत्रैवभविष्ये शुक्लतृतीयावैशाखेशुद्धोपोष्या दिनद्वयेनिशायाःपूर्वयामेचेदुत्तरान्यत्रपूर्विकेति **वैशाखशुक्लसप्तम्यांगंगोत्पत्तिस्तदुक्तंपृथ्वीचन्द्रोदयेब्राह्मे** वैशाखेशुक्लसप्तम्यांजन्हुनाजाह्नवीपुरा ॥ क्रोधात्पीतापुनस्त्यक्ताकर्णरंध्रात्तुदक्षिणात् ॥ तांतत्रपूजयेद्देवींगंगांगगनमेखलामिति ॥ अत्रशिष्टाचारात्मध्याह्नव्यापिनीग्राह्या । दिनद्वयेतद्व्याप्तावव्याप्तावेकदेशव्याप्तौवापूर्वा युग्मवाक्यत् **वैशाखशुक्लद्वादश्यांयोग**

विशेषोहेमाद्रौज्योतिःशास्त्रे पंचाननस्थौगुरुभूमिपुत्रौमेषेरविःस्याद्यदिशुक्लपक्षे ॥ पाशाभिधानाकरभेणयुक्तातिथिर्व्यतीपातहतीहयोगः ॥ अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेनसर्वपरिहायपापम् ॥ सुरत्वमिन्द्रत्वमनामयत्वंमर्त्याधिपत्यंलभतेमनुष्यइति पंचाननसिंहः । पाशाभिधानातिथिर्द्वादशी । करभोहस्तः । **वैशाखशुक्लचतुर्दशीनृसिंहजयंती** । साप्रदोषव्यापिनीग्राह्या **तदुक्तंहेमाद्रौनृसिंहपुराणे** वैशाखेशुक्लपक्षेतुचतुर्दश्यांनिशामुखे ॥ मज्जन्मसम्भवंपुण्यंव्रतंपापप्रणाशनम् ॥ वर्षेवर्षेतुकर्तव्यंममसंतुष्टिकारणमिति ॥ दिनद्वयेतद्व्याप्तावंशतः समव्याप्तौचपरा । विषमव्याप्तौत्वधिकव्याप्तिमती दिनद्वयेप्यव्याप्तौपरा । परदिनेगौणकालव्याप्तेःसत्वात्पूर्वदिनेचतदभावात् **यत्तु** ततोमध्याह्नवेलायांनद्यादौविमलेजले ॥ इत्युपक्रम्य परिधाययतोवासो व्रतकर्मसमारभेदितितत्रैवोक्तम्तत्संकल्परूपव्रतोपक्रमविषयम् ॥ नत्वेतावता मध्याह्नव्यापिनीग्राह्येतिभ्रमितव्यम् ॥ पूर्वोक्तवचनविरोधात् । वैशाखस्यचतुर्दश्यांसोमवारेनिलक्षके ॥ अवतारोनृसिंहस्यप्रदोषसमयेद्विजाइति टोडरानन्देस्कांदात् । कूर्मःसिंहोबौद्धकल्की सायमितिपूर्वोक्तपुराणसमुच्चयवचनाच्चेतिकेचित् **तत्त्वंतुपूर्ववचसामनाकरत्वेननिर्मूलत्वात्हेमाद्रौनृसिंहपुराणे** मज्जन्मसंभवंपुण्यंव्रतंपापप्रणाशनमित्युपक्रम्य । स्वातीनक्षयोगेचशनिवारेतुमद्व्रतम् ॥ सिद्धयोगस्यसंयोगेवणिजेकरणेतथा ॥ पुंसांसौभाग्ययोगेनलभ्यतेहैवयोगतः सर्वैरेतैस्तुसंयुक्तंहत्याकोटिविनाशनम् ॥ एतदन्यतरेयोगेमद्दिनंपापनाशनम् ॥ केवलेपिप्रकर्तव्यंमद्दिनेव्रतमुत्तमम् ॥ अन्यथानरकंयांतियावच्चंद्रदिवाकराविति उक्ता ॥ ततोमध्याह्नवेलायांनद्यादौ विमलेजलेइत्यादिनामध्याह्नएवव्रतविधानाच्चतुर्दश्युत्तरार्धे वणिजकरणेमध्याह्नेच स्पष्टंजन्मप्रतीयते । संध्यायांजन्मतुकाप्यनुक्तैर्मौर्ख्यकृतंतद्वशान्निर्णयश्चहेयएवेति तथाइयमेव । योगविशेषेणातिप्रशस्ता **तदुक्तंतत्रैव** स्वातीनक्षत्रयोगेचशनिवारेचमद्व्रतम् । सिद्धयोगस्यसंयोगेवणिजेकरणेतथा ॥ पुंसांसौभाग्ययोगेनलभतेदैवयोगतः ॥ एभिर्योगैर्विनापिस्यान्मद्दिनं

पापनाशनम् ॥ सर्वेषामेववर्णानामधिकारोस्तिमद्व्रते ॥ मद्भक्तैस्तुविशेषे णकर्तव्यंमत्परायणैः **तथा** सिंहःस्वर्णमयोदेयोममसंतोषकारकः **तथा** विज्ञायमद्दिनंयस्तुलंघयेत्पापकृन्नरः ॥ सयातिनरकंघोरंयावच्चंद्रदिवाकरौ॥ इदंचसंयोगपृथक्त्वन्यायेननित्यंकाम्यंच **अथात्रविशेषः** मध्याह्नेमृदगो मयतिलामलकस्नानंकृत्वा । नृसिंहदेवदेवेशतवजन्मदिनेशुभे॥ उपवासंक रिष्यामिसर्वभोगविवर्जितइतिमंत्रेणसंकल्पंकृत्वा **आचार्यंवृत्वासायंका ले** हैमीतुतत्रमृन्मूर्तिःस्थाप्यालक्ष्म्यास्तथैवच ॥ पलेनवातदर्धेनतदर्धार्धे नवापुनः ॥ यथाशक्तिस्तथाकुर्याद्वित्तशाठ्यविवर्जितइत्युक्तम् ॥ नृसिंहमू र्तिंशक्त्याकृतंसुवर्णसिंहंचकलशोपरिसंपूज्यरात्रौजागरणंकृत्वाप्रातः पुन संपूज्य । नृसिंहाच्युतदेवेशलक्ष्मीकांतजगत्पते ॥ अनेनार्चाप्रदानेनसफलाः स्युर्मनोरथाः ॥ इत्याचार्यायदत्वा । मद्वंशेयेनराजातायेजनिष्यंतिचापरे ॥ तांस्त्वमुद्धरदेवेशदुस्तराद्भवसागरात् ॥ पातकार्णवमग्नस्यव्याधिदुःखांबु वारिभिः ॥ तीव्रैश्चपरिभूतस्यमहादुःखगतस्यमे ॥ करावलंबनंदेहिशेषशा शियन्जगत्पते ॥ श्रीनृसिंहरमाकांतभक्तानांभयनाशन ॥ क्षीरांबुधिनिवासिं स्त्वंचक्रपाणेजनार्दन ॥व्रतेनानेनदेवेशभुक्तिमुक्तिप्रदोभवेतिप्रार्थयेदितिसंक्षे पः **वैशाखपौर्णमास्यांविशेषोपरार्केजाबालिः** श्रृताान्नमुदकुंभंचवैशाख्यां चविशेषतः॥ निर्दिश्यधर्मराजायगोदानफलमाप्नुयात् ॥सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्तपंचच ॥ तर्पयेदुदपात्रैस्तुब्रह्महत्याव्यपोहतीति **उदकुंभिदा नमंत्रस्त्वक्षय्यतृतीयाप्रकरणेउक्तः । भविष्येपि** वैशाखीकार्तिकीमाघी तिथयोतीवपूजिताः ॥ स्नानदानविहीनास्तानन्नेयाःपांडुनंदन ॥ अत्रकृष्णा जिनदानंकार्यम् **तथाचविष्णुः** कृष्णाजिनेतिलान्कृष्णान्हिरण्यंमधुस र्पिषी ॥ ददातियस्तुविप्रायसर्वंतरतिदुष्कृतमिति ॥

इति श्रीकमलाकरभट्टकृते कालनिर्णयसिंधौ वैशाखमासःसमाप्तः ॥

वृषसंक्रांतौपूर्वाःषोडशघटिकाःपुण्यकालः । रात्रौसंक्रमेसतिप्रागेचोक्तम् । **ज्येष्ठशुक्लतृतीयायांरंभाव्रतमुक्तंमाधवीयेभविष्ये** भद्रेकुरुष्वयत्नेनरं

भाख्यंव्रतमुत्तमम् ॥ ज्येष्ठशुक्लतृतीयायांस्नातानियमतत्परेति ॥ सापूर्व विद्धाग्राह्याबृहत्तपातथारंभासावित्रीबटपैतृकी ॥ कृष्णाष्टमीचभूताचकर्त व्यासंमुखीतिथिरितिस्कांदोक्तेः । ज्येष्ठशुक्लदशमीदशहरा **तदुक्तंहेमाद्रौ ब्राह्मे** ज्येष्ठेमासिसितेपक्षेदशमीहस्तसंयुता ॥ हरतेदशपापानितस्माद्दशहरा स्मृतेति **वाराहेपि** दशम्यांशुक्लपक्षेतुज्येष्ठेमासिकुजेहनि ॥ अवतीर्णायतः स्वर्गात्हस्तर्क्षेचसरिद्वरा ॥ हरतेदशपापानितस्माद्दशहरास्मृतेति **स्कांदे तुदशयोगाउक्ताः** । **तथा** ज्येष्ठेमासिसितेपक्षे दशम्यांबुधहस्तयोः ॥ व्य तीपातेगरानंदेकन्याचंद्रेवृषेरवौ ॥ दशयोगेनरःस्नात्वासर्वपापैः प्रमुच्यतइ ति ॥ अत्रबुधभौमयोः कल्पभेदेनव्यवस्था इयंचयत्रैवयोगबाहुल्यंसैवग्राह्या । योगाधिक्येफलाधिक्यात् । ज्येष्ठेमलमासेसतितत्रैवदशहराकार्या । नतुशु द्धे । दशहरासुनोत्कर्षश्चतुर्ष्वपियुगादिष्वितिहेमाद्रौऋष्यशृंगोक्तेः **तथा स्कांदे** यांकांचित्सरितंप्राप्यदद्यादर्घ्यंतिलोदकम् ॥ मुच्यतेदशभिःपापैःस महापातकोपमैः **अत्रविशेषःकाशीखंडे** ज्येष्ठेमासिसितेपक्षे प्राप्यप्रतिपदंति थिम् ॥ दशाश्वमेधकेस्नात्वामुच्यतेसर्वपातकैः॥एवंसर्वासुतिथिषुक्रमस्नायीन रोत्तमः ॥ आशुक्लपक्षदशमींप्रतिजन्माघमुत्सृजेत् **तथा** लिंगंदशाश्वमेधेशं दृष्ट्वादशहरातिथौ॥दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसंशयः **तथाचभविष्यो त्तरकाशीखंडयोः** निशायांजागरंकृत्वासमुपोष्यचभक्तितः ॥ पुष्पैर्गंधैश्चनै वेद्यैःफलैश्चदशसंख्यया॥तथादीपैश्चतांबूलैः पूजयेच्छ्रद्धयान्वितः ॥ स्नात्वा भक्त्यातुजाह्नव्यांदशकृत्वोविधानतः ॥ दशप्रसृतिकृष्णांश्चतिलान्सर्पिश्चवै जले सक्तुपिंडान्गुडपिंडान्दद्याच्चदशसंख्यया ततोगंगातटेरम्येहेम्नारूप्ये णवातथा ॥ गंगायाःप्रतिमांकृत्वावक्ष्यमाणस्वरूपिणीम् ॥ संस्थाप्यपूजयेद्दे वींतदलाभेमृदापिच॥अथतत्राप्यशक्तश्चेल्लिखेत्पिष्टेनवैभुवि ॥ वक्ष्यमाणेनमं त्रेणकुर्यात्पूजांविशेषतः॥नारायणंमहेशंचब्रह्माणंभास्करंतथा॥भगीरथंचन्र पतिंहिमवंतंनगेश्वरम्॥गंधपुष्पादिभिःसम्यग्यथाशक्तिप्रपूजयेत्॥दशप्रस्थां स्तिलान्दद्याद्दशविप्रेभ्यएवचदशप्रस्थान्यवान्दद्यात्दशसंख्यागवीस्तथा

प्रस्थःषोडशपलानि । पलंतु मुष्टिमात्रंपलंस्मृतमितिमहार्णवेउक्तम्। मत्स्य कच्छपमंडूकमकरादिजलेचरान् ॥ हंसकारंडवबकचक्राटिट्टिभसारसान् ॥ कारयित्वायथाशक्तिस्वर्णेनरजतेनवा ॥ तदलाभेपिष्टमयानभ्यर्च्यकुसुमादि भिः ॥ गंगायांप्रक्षिपेदाज्यदीपांश्चैवप्रवाहयेत् ॥ पुष्पाद्यैःपूजयेद्गंगांमंत्रेणा नेनभक्तितः ॥ ओंनमःशिवायैनारायण्यैदशहरायैगंगायैनमोनमः ॥ इति मंत्रंतुयोमर्त्योदिनेतस्मिन्दिवानिशम् ॥ जपेत्पंचसहस्राणिदशधर्मफलंल भेत् **काशीखंडेत्वन्योमंत्रउक्तः** नमःशिवायैप्रथमंनारायण्यैपदंततः ॥ दशहरायैपदमितिगंगायैमंत्रएषवै ॥ स्वाहांतःप्रणवादिश्चभवेद्दिशाक्षरोम नुः ॥ पूजादानंजपोहोमोतेनैवमनुनास्मृतमिति **अत्रगंगास्तोत्रपाठमपिद शवारंकुर्यात् तदुक्तंभविष्ये** तस्यांदशम्यामेतच्चस्तोत्रंगंगाजलेस्थितः॥ यः पठेद्दशकृत्वस्तुदरिद्रोवापिचाक्षमः॥ सोपितत्फलमाप्नोतिगंगांसंपूज्ययत्नत इति स्तोत्रंच प्रतिपदादिदशमीपर्यंतंदिनवृद्धिसंख्ययापाठनीयमितिशिष्टाः। अत्रचसर्वोविस्तरःस्तोत्रादिचभट्टकृतत्रिस्थलीसेतोरवधेयः। विस्तरभीतेस्तु नलिख्यते **एवंकुर्वतःफलमुक्तंकाशीखंडे** एवंकृत्वाविधानेनवित्तशाठ्य विवर्जितः ॥ उपवासीवक्ष्यमाणैर्दशपापैःप्रमुच्यते ॥ सर्वान्कामानवाप्नोति प्रेत्यब्रह्मणिलीयतइतिच॥ अस्यांसेतुबंधरामेश्वरस्यप्रतिष्ठादिनत्वाद्विशेषेणपू जाकार्या **तदुक्तंस्कांदेसेतुमाहात्म्ये** ज्येष्ठमासेसितेपक्षेदशम्यांबुधहस्त योः ॥ गरानंदेव्यतीपातेकन्याचंद्रे वृषेरवौ॥ दशयोगेसेतुमध्येलिंगरूपधरं हरम्॥ रामोवैस्थापयामासशिवलिंगमनुत्तममिति इतिदशहरा॥ ज्येष्ठशुक्लै कादशीनिर्जला । तत्रनिर्जलमुपोष्य । विप्रेभ्योजलकुंभान्दद्यादितिनिर्ण यामृतेउक्तम् **मदनरत्नेस्कांदे** ज्येष्ठमासिनृपश्रेष्ठयाशुक्लैकादशीशुभा॥ नि र्जलंसमुपोष्यात्रजलकुंभान्सशर्करान् ॥ प्रदायविप्रमुख्येभ्योमोदतेविष्णुस न्निधौ **ज्येष्ठपौर्णमास्यांसावित्रीव्रतम्। तदुक्तंस्कांदभविष्ययोः** ज्येष्ठमा सितेपक्षेद्वादश्यांरजनीमुखेइत्युपक्रम्य । व्रतंत्रिरात्रमुद्दिश्यदिवारात्रिंस्थिरा भवेदिति । अंतेप्युपसंहृतम्। ज्येष्ठमासिसितेपक्षेपूर्णिमायांतथाव्रतम् चीर्ण

पुरामहाभक्त्याकथितंतेमयानृपेति ॥ दाक्षिणात्याश्चैतदेवाद्रियंते **एतच्चामा वास्यायामप्युक्तंनिर्णयामृतेभविष्ये** अमायांचतथाज्येष्ठेवटमूलेमहासती। त्रिरात्रोपोषितानारीविधिनानेनपूजयेत् ॥ मदनरत्नेत्विदंवाक्यम् ॥ पंचद श्यांतथाज्येष्ठइतिपठित्वाज्येष्ठपौर्णमास्यामुक्तम् **तथा** अशक्तौतुत्रयोदश्यांन क्तंकुर्याज्जितेंद्रिया ॥ अयाचितंचतुर्दश्याममायांसमुपोषणमिति ॥ तत्तुपाश्चा त्याआद्रियंते । हेमाद्रिसमयोद्योतादिषुतुभाद्रपदपूर्णिमायामुक्तम् । तत्तुने दानींप्रचरति **गौडास्तु** मेषेवावृषभेवापिसावित्रींतांविनिर्दिशेत् ॥ ज्येष्ठ कृष्णचतुर्दश्यांसावित्रीमर्चयंतियाः ॥ वटमूलेसोपवासानतावैधव्यामाप्नु युरिति ॥ पराशरोक्तेश्चतुर्दश्यांप्रदोषेव्रतम् । दिनद्वयेतद्व्याप्तौपरैवेत्याहुः। तन्निमूर्लम् । अत्रपूर्णिमामावास्येपूर्वविद्धेग्राह्ये । भूतविद्धानकर्तव्याअमा वास्याचपूर्णिमा ॥ वर्जयित्वानरश्रेष्ठसावित्रीव्रतमुत्तमामितिब्रह्मवैवर्तात्**स्कां देपि** भूतविद्धासिनीवालीनतुव्रतव्रतंचरेत् ॥ वर्जयित्वातुसावित्रीव्रतंतुशि खिवाहनइति **मदनरत्नेब्रह्मवैवर्तेपि** प्रतिपत्पंचमीभूतसावित्रीवटपूर्णिमा नवमीदशमीचैवनोपोष्याःपरसंयुताइति ॥ यदात्वष्टादशघटिकाचतुर्दशीत दापराग्राह्या । पूर्वविद्धैवसाधित्रीव्रतेपंचदशीतिथिः॥नाड्योष्टादशभूतस्यस्यु श्चेत्तच्चपरेऽहनीतिमाधवः ॥ वस्तुतस्तुभूतोष्टादशनाडाडिभिर्दूषयत्युत्तरांति थिमित्यस्यव्रतांतरेसावकाशत्वाद्विशेषः प्रवृत्तपूर्वविद्धाविधायकवचनेनतस्य बाधादष्टादशनाडीवेधोपिपूर्वैवेत्ययंपंथाःसाधुः । अत्रपूर्णिमानुरोधेनैवयथा त्रिरात्रिसंपत्तिर्भवति तथा त्रयोदश्यादिग्राह्यम् । तस्याःप्रधानत्वात् । अयंनिर्णयोऽमायामपिज्ञेयः । पारणंतुपूर्णिमांतेकार्यम् **अथस्त्रीव्रतेषुविशे षाःपरिभाषायामुक्ताः। अत्रविशेषोभविष्ये** गृहीत्वावालुकांपात्रेप्रस्थमा त्रंयुधिष्ठिर । ततोवंशमयेपात्रेवस्त्रयुग्मेनवेष्टिते सावित्रीप्रतिमांकुर्यात्सौवर्णी वापिमृन्मयीम् सार्धसत्यवतासाध्वींफलनैवेद्यदीपकैः ॥ रजन्याकंठसूत्रैश्चशु भैःकुंकुमकेशरैःपूजयेदितिशेषः ॥ रजनीहारिद्रा । कंठसूत्रंसौभाग्यतंतुः । सावित्र्याख्यानकंवापिवाचयीतद्विजोत्तमैः ॥ रात्रौजागरणंकृत्वाप्रभातेविम

लेततः ॥ तामपिब्राह्मणेदत्वाप्रणिपत्यक्षमापयेत् मंत्रस्तु सावित्रीयंमयादत्ता सहिरण्यामहासती ॥ ब्रह्मणःप्रीणनार्थायब्राह्मणःप्रतिगृह्यताम् ॥ व्रतेनाने नराजेंद्रवैधव्यंनाप्नुयात्क्वचिदिति **ज्येष्ठपौर्णमास्यांविशेषआदित्यपुराणे** ज्येष्ठेमासितिलान्दद्यात्पौर्णमास्यांविशेषतः ॥ अश्वमेधस्ययत्पुण्यंतत्प्राप्नोतिनसंशयः **विष्णुरपि** ज्येष्ठीज्येष्ठायुताचेत्स्यात्तस्यांछत्रोपानतप्रदानेनन राधिपत्यमाप्नोतीति **हेमाद्रौज्योतिषे** ऐंद्रे गुरुःशशीचैवप्राजापत्येरविस्तथा॥ पूर्णिमाज्येष्ठमासस्यमहाज्येष्ठोप्रकीर्तितेति ॥ इयंमन्वादिरपि । सापौर्वाह्णिकीग्राह्या । विशेषस्तुचैत्रेउक्तः **तथाऽपरार्केवामनपुराणे** उदकुंभांबुदानंचतालवृंतंसचंदनम् ॥ त्रिविक्रमस्यप्रीत्यर्थंदातव्यंज्येष्ठमासित्विति ॥

इतिकमलाकरभट्टकृते निर्णयसिंधौ ज्येष्ठमासःसमाप्तः ॥

मिथुनसंक्रांतौपराः षोडशघटिकाःपुण्यकालःरात्रौतुप्रागेवोक्तम् । आषाढशुक्लद्वितीयायांरथोत्सवः **तदुक्तंतिथितत्त्वेस्कांदे** आषाढस्यसितेपक्षेद्वितीयापुष्यसंयुता ॥ तस्यांरथेसमारोप्यरामंवैभद्रयासह ॥ यात्रोत्सवंप्रवर्त्त्यार्थप्रीणयेतद्विजान्बहून् **तथा** ऋक्षाभावेतिथौकार्यायात्रासौममपुण्यदा ॥ आषाढशुक्लदशमीपौर्णमासीचमन्वादिःसाचपूर्वाह्णव्यापिनीग्राह्येति प्रागुक्तम् । आषाढशुक्लद्वादश्यामनुराधायोगरहितायांपारणंकुर्यात् **तदुक्तंभविष्ये** आभाकासितपक्षेषुमैत्रश्रवणरेवती ॥ संगमेनहिभोक्तव्यंद्वादशद्वादशीर्हरेत् **अस्यार्थः** आषाढभाद्रपदकार्तिकशुक्लद्वादशीष्वनुराधाश्रवणरेवतीयोगेपारणंनकुर्यादिति । अत्रयद्यप्येतावदेवोक्तम् । तथाप्यनुराधाप्रथमपादएववर्ज्यः **तदुक्तंविष्णुधर्मे** मैत्राद्यपादेस्वपितीहविष्णुःपौष्णांत्यपादेप्रतिबोधमेति ॥ श्रुतेश्चमध्येपरिवर्तमेतिसुप्तिप्रबोधपरिवर्तनमेववर्ज्यमिति ॥ वस्तुतस्तुपूर्ववचनमिदंचनिर्मूलम् **अत्रैवविष्णुशयनोत्सवउक्तोहेमाद्रौब्राह्मे** एकादश्यांतुशुक्लायामाषाढेभगवान्हरिः॥भुजंगशयनेशेतेक्षीरार्णवजलेसदेति **कल्पतरौयमः** क्षीराब्धौशेषपर्यंकेआषाढ्यांसंविशेद्धरिः ॥ निद्रांत्यजतिकार्तिक्यातयोःसंपूजयेत्सदा ॥ ब्रह्महत्यादिकंपापंक्षिप्रमेवव्यपोहति ॥ हिंसा

त्मकैस्तुकिंतस्ययज्ञैःकार्यंमहात्मनः ॥ प्रस्वापेचप्रबोधेचपूजितोयेनकेशवः **टोडरानंदेपिस्कांदे** आषाढशुक्लैकादश्यांकुर्यात्स्वप्नमहोत्सवम् ॥ अयंद्वाद श्यामप्युक्तः । आभाकासितपक्षेषुमैत्रश्रवणरेवती ॥ आदिमध्यावसानेषु प्रस्वापावर्तनोत्सवाः ॥ निशिस्वापोदिवोत्थानंसंध्यायांपरिवर्तनम् ॥ अत्रपा दयोगेपिद्वादश्यामेवकारयेत् ॥ आभाकाद्येषुमासेषुमिथुनेमाधवस्यच॥द्वाद श्यांशुक्लपक्षेचप्रस्वापावर्तनोत्सवाइतिभविष्योक्तेः । द्वादश्यांसंधिसमयेनक्ष त्राणामसंभवे ॥ आभाकासितपक्षेषुशयनावर्तनादिकमिति ॥ वाराहोक्तेश्च द्वादश्यामित्यत्रापिपारणाहोमात्रंविवक्षितम् । पारणाहेपूर्वरात्रेघंटादीन्वाद यन्तेमुहुरितिरामार्चनचंद्रिकोक्तेः । अत्रैकादशीद्वादश्योर्देशभेदेनव्यव स्था । इदंचमलमासेनकार्यम् । ईशानस्यबलिर्विष्णोःशयनंपरिवर्तनमिति कालादर्शेनिषेधात् । यदपिएकादश्यांतुगृह्णीयात्संक्रांतौकर्कटस्यच ॥ आषाढश्यांवानरोभक्त्याचातुर्मास्यव्रताक्रियामिति ॥ हेमाद्रौब्रह्मवैवर्तत दपिमलमासेसतिद्रष्टव्यम् । मिथुनस्थोयदाभानुरमावास्याद्वयंस्पृशेत् द्विराषाढःसविज्ञेयोविष्णुःस्वपितिकर्कटइति तत्रैवमोहमूलोत्तरोक्तेः **अत्रै वचातुर्मास्यव्रतारंभउक्तोभारते** आषाढेतुसितेपक्षेएकादश्यामुपोषितः ॥ चातुर्मास्यव्रतंकुर्याद्यत्किंचिन्नियतोनरइति ॥ **अस्यनित्यत्वंतत्रैवोक्तम्** वार्षिकांश्चतुरोमासान्वाहयेत्केनचिन्नरः ॥ व्रतेननोचेदाप्नोतिकिल्बिषं वत्सरोद्भवम् ॥ असंभवेतुलार्केपि कर्तव्यंतत्प्रयत्नइति ॥ तेनाषाढशुक्लै कादश्यां द्वादश्यांपौर्णमास्यांवारंभः । समाप्तिस्तुकार्तिकशुक्लद्वादश्यामेव **तदुक्तंहेमाद्रौभारते** चतुर्धागृह्यवैचीर्णंचातुर्मास्यव्रतंनरः ॥ कार्तिकेशु क्लपक्षेतुद्वादश्यांतत्समापयेदिति ॥ अस्यारंभः शुक्रास्तादावपिकार्यः ॥ न शैशवंनमौढ्यंचशुक्रगुर्वोर्नवातिथेः ॥ खंडत्वंचिंतयेदादौचातुर्मास्यविधौ नरइति ॥ हेमाद्रौवृद्धगार्ग्योक्तेः ॥ इदंचद्वितीयाद्यारंभविषयम् । प्रथमारं भस्तुनभवत्येव । आशौचमध्येपिद्वितीयाद्यारंभोभवति । अशुचिर्वाशुचिर्वा पियदिस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिरिति ॥ भार्ग

वार्चनदीपिकायांस्कादोक्तेः । आरब्धेसूतकंनस्यादनारब्धेतुसूतमितिवि ष्णुवचनाच्च । यत्तुअसंक्रांतंतथामासंदैवेपित्र्येचकर्मणि ॥ मलमासमशौचं चवर्जयेन्मतिमान्नरइति ॥ हेमाद्रौचातुर्मास्यप्रकरणे ॥ भविष्यवचनंतत्पू षानुमंत्रणमंत्रवदसंबद्धंमध्येपठितमितिज्ञेयम् । अन्यथापित्र्यस्यपूर्वोक्तस्यवि वाहादेश्चातुर्मास्यव्रतेकःप्रसंगः । प्रकरणनिवेशोपिवाप्रथमारंभविषयंज्ञेयम् । केचित्तुप्रतिवर्षंचातुर्मास्यव्रतप्रयोगानांभिन्नत्वादाशौचादिपातेद्वितीयादिप्र योगोनभवत्येवेत्याहुः तन्न । प्रतिवर्षंचयःकुर्यादेवंवैसंस्मरन्हरिम् ॥ देहां तेतिप्रदीप्तेनविमानेनार्कवर्चसा ॥ मोदतेविष्णुलोकेसौयावदाभूतसंप्लव मितिहेमाद्रौभविष्यवचनादित्यास्तांविस्तरः । इदंचशिवभक्तादिभिरपिका र्यम् । शिवेवाभक्तिसंयुक्तोभानौवागणनायके ॥ कृत्वाव्रतस्यानियमंयथोक्त फलभाग्भवेदिति ॥ ब्रह्मवैवर्तात् **व्रतग्रहणप्रकारस्तुहेमाद्रौभविष्ये** महा पूजांततःकुर्याद्देवदेवस्यचक्रिणः ॥ जातीकुसुममालाभिर्मंत्रेणानेनपूजयेत्॥ सुप्तेत्वयिजगन्नाथेजगत्सुप्तंभवेदिदम् ॥ विबुद्धेचविबुध्येतप्रसन्नोमेभवाच्यु त ॥ एवंतांप्रतिमांविष्णोःपूजयित्वास्वयंनरः ॥ प्रभाषेताग्रतोविष्णोःकृतांज लिपुटस्तथा ॥ चतुरोवार्षिकान्मासान्देवस्योत्थापनावधि ॥ इदंकरिष्येनि यमंनिर्विघ्नंकुरुमेच्युत ॥ इदंव्रतंमयादेवगृहीतंपुरतस्तव ॥ निर्विघ्नासिद्धिमाया तुप्रसादात्तवकेशव ॥ गृहीतेस्मिन्व्रतेदेवपंचत्वंयदिमेभवेत् ॥ तदाभवतु संपूर्णंत्वत्प्रसादाज्जनार्दन ॥ गृहीतेस्मिन्व्रतेदेवयद्यपूर्णेमृतोह्यहम् ॥ तन्मे भवतुसंपूर्णंत्वत्प्रसादाज्जनार्दनेति । **तत्रभार्गवार्चनदीपिकायाम् । नृ सिंहपरिचर्यायांचभविष्ये** श्रावणेवर्जयेच्छाकंदधिभाद्रपदेतथा ॥ दुग्ध माश्वयुजेमासिकार्तिकेद्विदलंत्यजेदिति **स्कांदेपिचातुर्मास्यकल्पे** चत्वा र्येतानिनित्यानिचतुराश्रमवर्णिनाम् ॥ प्रथमेमासिकर्तव्यांनित्यंशाकव्रतंनरैः॥ द्वितीयेमासिकर्तव्यंदधिव्रतमनुत्तमम् ॥ पयोव्रतंतृतीयेतुचतुर्थेपिनिशामय ॥ द्विदलंबहुबीजंचवृंताकंचविवर्जयेत् ॥ नित्यान्येतानिविप्रेंद्रव्रतान्याहुर्मनी षिणः॥जंबीररंराजमाषांश्चमूलकंरक्तमूलकं । कूष्मांडंचेक्षुदंडंचचार्तुमास्येत्यजे

द्रुधः ॥ **तथा** विशेषाद्बदरींधात्रींकूष्मांडंतिंतिणींत्यजेत् ॥जीर्णधात्रीफलंग्राह्यं कथंचित्कायशोधनमिति **तीर्थसौख्येस्कांदे** वार्षिकांश्चतुरोमासान्प्रसुप्तेवै जनार्दने ॥ मंचखट्वादिशयनंवर्जयेद्भक्तिमान्नरः ॥ अनृतौवर्जयेद्भार्यांमांसंम धुपरोदनम् ॥ पटोलंमूलकंचैववृंताकंचनभक्षयेत् ॥ अभक्ष्यंवर्जयेद्दूरान्मसू रंसितसर्षपम् ॥ राजमाषान्कुलित्थांश्चआशुधान्यंचसंत्यजेत् ॥ शाकंद धिपयोमाषान्श्रावणादिषुसंत्यजेत् ॥ अत्र त्यजेदितिवर्जनसंकल्परूपःपर्युदा सोज्ञेयः । व्रतोपक्रमात् । अत्रकेचिच्छाकाख्यंपत्रपुष्पादीत्यमरकोशस्य श क्यतेशितुमनेनेतिशाक इतिक्षीरस्वामिनाव्याख्यानात् । व्यंजनमात्रस्य निषेधमाचक्षते । अन्येतुशाकशब्दस्यपत्रादिदशविधशाकेयोगरूढत्वा त् । योगाच्चरूढेर्बलीयस्त्वात्सूपादीनामपित्यागापत्तेश्चतत्प्रत्याचक्षते । ते न मूलपत्रकरीराग्रफलकांडाधिरूढकाः त्वक्पुष्पं कवचंचेतिशाकंदशविधं स्मृतम् ॥ इतिक्षीरस्वामिनोक्तस्यशाकस्यनिषेधइति ॥ अधिरूढकअंकुरः। वस्तुतस्तु त्तत्कालोद्भवाः शाकावर्जनीयाःप्रयत्नतः ॥ बहुबीजमबीजंचवि कारीचविवर्जयेदिति ॥ भविष्यवचनात्तत्तत्कालोत्पन्नानांदशविधशाकानां निषेधः।अत्रतत्कालोद्भवजातीयत्वंविवक्षितम्। तेनातपादिशोषितानांवर्षा तरोद्भवानामपिनिषेधः। अत्रतत्कालोद्भवत्वमात्रं विवक्षितंनतुतन्मात्रका लोद्भवत्वंगौरवात् । तेनान्यकालोद्भवानांतत्कालोद्भवानांचबिंबादीनांनिषे धः । अत्रतत्कालोद्भवाइतिवीप्साबशात् स्वस्वकालोद्भवानांसर्वेषांनिषेधइ तिनिष्कर्षः । बहुबीजमित्यनेकबीजमितिकेचित् । इतरावयवापेक्षयाबीजाव यवायत्रबहवस्तदित्यन्ये । अबीजंकंदलादि । वस्तुतस्तु । इदंमहानिबंधे ष्वभावान्निर्मूलमेव **आचारप्रदीपे** वृंताकंचकलिंगंचबिल्वौदुंबरभिःसटाः ॥ उदरेयस्यजीर्यतेतस्यदूरतरोहरिः **तथापरार्केदेवलः** ब्रह्मचर्यंतथाशौचंस त्यमामिषवर्जनम् ॥ व्रतेष्वेतानिचत्वारिवरिष्ठानीतिनिश्चयः **आमिषानि चोक्तानिरामार्चनचंद्रिकायांपाद्मे** प्राण्यंगचूर्णंचर्मांबुजंबीरंबीजपूरकम् ॥ अयज्ञीशिष्टमाषादियद्विष्णोरनिवेदितम् ॥ दग्धमन्नंमसूरंचमांसंचेत्यष्टवा

मिषम् ॥ रुच्यं तत्तद्देशलभ्यंसुमेदेवेविवर्जयेत् **पाद्मेकार्तिकमाहात्म्ये** गो छागीमहिषीदुग्धादन्यत् दुग्धादिचामिषम् ॥ धान्येमसूरिकाःप्रोक्ताःअन्नंप र्युषितंतथा ॥ द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा ॥ ताम्रपात्रस्थितंगव्यंज लंपल्वलसंस्थितम् ॥ आत्मार्थंपाचितंचान्नंआमिषंतत्स्मृतंबुधैः **तथा** नि ष्पावान्राजमाषांश्चमसूरंसंधितानिच ॥ वृंताकंचकलिंगंचसुमेदेवेविवर्जयेत् संधितानिलवणशाकादीनि **तत्रैवविष्णुधर्मे** चतुर्ष्वपीहमासेषुहविष्याशीन पापभाक् **हविष्याणितुपृथ्वीचंद्रोदयेभविष्ये** हैमंतिकंसितास्विन्नंधान्यंमुद्ग यवास्तिलाः ॥ कलायकंगुनीवारवास्तुकंहिलमोचिका ॥ षष्टिकाकालशा कंचमूलकंकेमुकेतरत् ॥ कंदःसैंधवसामुद्रेगव्येचदधिसर्पिषी ॥ पयोनुद्धृत सारंचपनसाम्रहरीतकी ॥ पिप्पलीजीरकंचैवनागरंगंचतिन्तिणी ॥ कदलील वलीधात्रीफलान्यगुडमैक्षवम् ॥ अतैलपक्वंमुनयोहविष्याणिप्रचक्षतइति ॥ सितास्विन्नंअनूष्मपक्वंधान्यंचतंदुलाः ॥ केमुकंकेमुतइतिप्राच्येषुप्रसिद्धःकं दः ॥ कलायस्तुसतीनकइत्यमरः । बट्टुरीइतिप्रसिद्धंधान्यंमदनरत्नेप्येवम् **अगस्तिसंहितायाम्** हैमंताद्युक्त्वा । नारीकेलफलंचैवकदलीलवलीतथा आम्रमामलकंचैवपनसंचहरीतकी ॥ व्रतांतरप्रशस्तंचहविष्यंमन्यतेबुधाः **अन्यान्यपिव्रतान्युक्तानिहेमाद्रौभविष्ये** स्त्रीवा नरोवामद्भक्तोधर्मार्थसुदृढ व्रतः॥गृह्णीयान्नियमानेतान्दंतधावनपूर्वकान् ॥ तेषांफलानिवक्ष्यामितत्कर्तृ णांपृथक्पृथक् ॥ मधुरस्वरोभवेद्राजापुरुषोगुडवर्जनात् ॥ तैलस्यवर्जनाद्रा जन्सुंदरांगःप्रजायते ॥ कटुतैलपरित्यागाच्छत्रुनाशःप्रजायते ॥ योगाभ्या सीभवेद्यस्तुसब्रह्मपदमाप्नुयात् ॥ तांबूलवर्जनाद्भोगीरक्तकंठश्चजायते । घृत त्यागाच्चलावण्यंसर्वांस्निग्धतनुर्भवेत् ॥ शाकपत्राशनाद्भोगीअपक्वादोमलोभ वेत्भूमौप्रस्तरशायीचविप्रोमुनिवरोभवेत् ॥ एकांतरोपवासेनब्रह्मलोकेमही यते॥धारणान्नखरोम्णांचगंगास्नानफलंलभेत् ॥ मौनव्रतीभवेद्यस्तुतस्याज्ञा स्खलिताभवेत्॥भूमौभुंक्तेसदायस्तुसपृथिव्याःपतिर्भवेत् ॥ प्रदक्षिणाशतंय स्तुकरोतिस्तुतिपाठकः ॥ हंसयुक्तविमानेनसचविष्णुपुरंव्रजेत् ॥ अयाचिते

नप्राप्नोतिपुत्रान्धर्म्यान्विशेषतः ॥ षष्ठान्नकालभोक्तायःकल्पस्थायीभवेदिति पर्णेषुयोनरोभुंक्तेकुरुक्षेत्रफलंलभेत् ॥ गुडवर्जिनरोदद्यात्तद्धृतंताम्रभाजनम् ॥ सहिरण्यंनरश्रेष्ठलवणस्याप्ययंविधिः ॥ सुप्तेदेवेतुयोविष्णोःशिवस्यां गणमर्चयेत् ॥ पंचवर्णैस्तुयोनित्यंस्वस्तिकैःपद्मकैस्तथा सयातिरुद्रलोकार्हगाणपत्यमवाप्नुयात् ॥ अथैषांसमासौकार्तिक्यांदानानि । एकभुक्तव्रतेदंपतीसंपूज्यधेनुर्देया । नक्तेवस्त्रयुगं । एकांतरोपवासेगौः । भूशयनेशय्या । षष्ठकालभोजनेगौः । व्रीहिगोधूमादित्यागेहैमव्रीह्यादि । कृच्छ्रेगोयुग्मं । शाकाशनेगौःपयोव्रतेच । दधिमधुघृतव्रतेषुवासोगौश्च । ब्रह्मचर्येस्वर्णमूर्त्तिः तांबूलव्रतेवासोयुगं । मौनेघृतकुंभोवस्त्रयुगंघंटाच । देवाग्रेरंगमालिकाकरणेधेनुर्हेमपद्मंच । दीपिकाव्रतेदीपिकावासोयुगंच । भूमिभोजनेपर्णभोजनेचकांस्यपात्रंगौश्च । चतुष्पथदीपेगोग्रासेचगोवृषौ । प्रदक्षिणाशतेवस्त्रम् । अनुक्तेषुस्वर्णगोश्चेत्यादिहेमाद्रौज्ञेयम् **तथाचभार्गवार्चनदीपिकायांपाद्मे** शयनीबोधिनीमध्येशमीदूर्वापमार्गकैः ॥ भृंगिराजेनदेवांस्तुनार्चयीतकदाचन **हेमाद्रौपाद्मे** आषाढादिचतुर्मासानभ्यंगंवर्जयेन्नरः ॥ समाप्तौच पुनर्दद्यात्तिलतैलयुतंघटम् ॥ आषाढादिचतुर्मासंवर्जयेन्नखकृंतनम् ॥ वृंताकंगृंजनंचैवमधुसर्पिघटोचितम्॥कार्तिक्यांतत्पुनैंहमंब्राह्मणायनिवेदयेत् ॥ अन्यान्यपिकेशकर्त्तनादिवर्जनसंकल्पानुरूपाणि । पृथ्वीचंद्रोदयेज्ञेयानि **टोडरानंदेस्कांदे** एकांतरंद्वयंतरंवाकुर्यान्मासोपवासकम्॥अनोदनंफलाहारंनक्तव्रतमथापिवा **अत्रैवतप्तमुद्राधारणमुक्तंरामार्चनचंद्रिकायांभविष्ये** शयन्यांचैवबोधिन्यांचक्रतीर्थेतथैवच ॥ शंखचक्रविधानेनवह्निपूतोभवेन्नरइति । अतप्ततनूर्नतदामोअश्नुतइतिऋग्वेदात्सहोवाचयाज्ञवल्क्यस्तस्मात्पुमानात्महितायहरिंभजेत् । सुश्लोकमौलेर्वर्माण्यभिनासंदधतइतिशतपथश्रुतेः । प्रतद्विष्णोअब्जचक्रेसुतप्तेजन्मांभोधीतर्तवेचर्षणींद्राः ॥ मूलेबाह्वोर्दधन्येपुराणातुलिंगान्यंगेतप्तायुधान्यर्पयंतइतिसामवेदात् ॥ अग्निहोत्रंयथानित्यंवेदस्याध्ययनंयथा॥ ब्राह्मणस्यतथैवेदंतप्तमुद्रादिधारणमितिपद्मपुरा

णाच्चेति ॥ ब्राह्मणः क्षत्रियोवैश्यःशूद्रोवायदिवेतरः ॥ शंखमुद्रांकिततनुस्तु लसीमंजरीधरः ॥ गोपीचंदनलिप्तांगोदृष्टश्चेत्तदधंकुतः ॥ इतिकाशीखंडात् । तत्प्रकारस्तुरामार्चनचंद्रिकातोज्ञेयः **पृथ्वीचंद्रोदयादयस्तु** यस्तु संतप्तशंखादिलिंगचिह्नतनुर्नरः ॥ ससर्वयातनाभोगीचांडालोजन्मकोटिषु। द्विजंतुतप्तशंखादिलिंगांकिततनुर्नरः॥ संभाष्यरौरवंयातियावदिंद्राश्चतुर्दशे तिवृहन्नारदीयोक्तेः ॥ शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा ॥ एकजातेरयंधर्मोनजातुस्याद्द्विजन्मनः ॥ शंखचक्रेमृदायस्तुकुर्यात्तप्तायसेनवा ॥ सशूद्रवद्बहिःकार्यःसर्वस्माद्द्विजकर्मणः ॥ यथाश्मशानजंकाष्ठमनर्हंसर्वकर्मसु ॥ तथाचक्रांकितोविप्रःसर्वकर्मसुगर्हितः **तथा** शिवकेशवयोरंकांच्छूलचक्रादिकान्द्विजः ॥ नधारयेतमतिमान्वैदिकेवर्त्मनिस्थितइतिविष्णवाश्वलायनादिवचनात् । ऋग्वेदादिश्रुतीनामन्यार्थत्वादन्यश्रुतीनांचासत्वात्॥ चक्रादिधारणंशूद्रविषयमित्यूचुः । नृत्यंचोदरार्थंनिषिद्धमितिश्रीधरस्वामीयं यपिनिषेधस्यप्राप्तिसापेक्षत्वाद्विधिंविनाचतदयोगादुपजीव्यविरोधेननतौपशौकरोतीतिवद्विकल्पोयुक्तस्तथापिएकजातेरयंधर्मइत्यनेनसामान्यवाक्यानामुपसंहारात्द्विजातिनिषेधोनित्यानुवादइतितदाशयः । अत्रशिष्टाचारएवसंकटपाशनिःसरणसृणिरितिसंक्षेपः **आषाढपौर्णमास्यांकोकिलाव्रतमुक्तंहेमाद्रौभविष्ये** आषाढपौर्णमास्यांतुसंध्याकालेह्युपस्थिते ॥ संकल्पयेन्मासमेकंश्रावणेप्रत्यहंह्यहम् ॥ स्नानंकरिष्येनियताब्रह्मचर्यस्थितासती । भोक्ष्यामिनक्तंभूशय्यांकरिष्येप्राणिनांदयामिति॥अस्यनक्तव्रतत्वात्सायाह्नव्यापिनीग्राह्या **अत्रैवाशिवशयनोत्सवउक्तोहेमाद्रौवामनपुराणे** पौर्णमास्यामुमानाथः स्वपतेचर्मसंस्तरे ॥ वैय्याघ्रेचजटाभारंसमुद्वह्यंध्याहिवर्षाणा॥ मदनरत्नेप्येवम्॥ इयंचप्रदोषव्यापिनी । अत्रैवव्यासपूजोक्ता । तत्रत्रिमुहूर्ता चेत्परैवेतिसंन्यासपद्धतौत्रिमुहूर्ताधिकंग्राह्यंपर्वक्षौरप्रणामयोरितिवचनात् ।

इतिश्री रामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते
निर्णयसिंधौ आषाढः समाप्तः ॥

कर्कसंक्रांतौपूर्वत्रिंशद्दंडाःपुण्यकालः । सूर्योदयोत्तरंसंक्रमेतुपरतएवपुण्यं रात्रौतुनिशीथात् प्राक्परतश्चसंक्रमेऽपरार्केहेमाद्र्यनंतभट्टादिमतेपूर्वोत्तरदिन योःपंचनाड्यः पुण्यकालः । धनुर्मीनावतिक्रम्यकन्यांचमिथुनंतथा ॥ पूर्वापर विभागेनरात्रौसंक्रमतेरविः ॥ दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः॥उद येपितथापंचदैवेपित्र्येचकर्मणीतिस्कांदोक्तेः ॥ पूर्वापरविभागेनेतिमकरकर्क भिन्नसंक्रांतिपरम् **वक्ष्यमाणवचोविरोधादित्युक्तंमदनरत्नेतेनायमर्थः** रात्रौपूर्वभागेमकरेउदयेपंचनाड्यःपुण्यकालः। रात्रावपरभागेकर्कटेदिनांतेपं चनाड्यःपुण्यकालः । विषुवतोस्तुपूर्वदिने पंचापरदिनेचपंचेतिवाक्यांतरानु रोधात्तेनहेमाद्रिमाधवयोःसर्ववचनानांचाविरोधः । माधवमतेत्वर्धरात्रेतदूर्ध्व वासंक्रांतौदक्षिणायनेपूर्वमेवदिनंग्राह्यम् ।यावन्नोदयतेरविरितिवृद्धगार्ग्योक्तेः मिथुनात्कर्कसंक्रांतिर्यदिस्यादंशुमालिनः ॥ प्रभातेवानिशीथेवातदापुण्यंतुपू र्वतइति ॥ भविष्योक्तेश्चपूर्वदिनएवपुण्यं दाक्षिणात्यास्त्वेतदेवाद्रियंते । अत्र रात्रावपिस्नानादिभवतीत्युक्तंप्राक् । अत्रदानोपवासादिपूर्वमुक्तम् ।तथाकर्के केशादिकर्तनंनिषिद्धम् । कुंभेकर्कटकेवापिकन्यायांकार्मुकेरवौ॥ रोमखंडंगृह स्थस्यपितॄन्प्राशयतेयमइति ॥ सुमंतुवचनादित्युक्तंजीवत्पितृकनिर्णयेगुरु भिः । अथनदीनांरजोदोषः **हेमाद्रावत्रिः** सिंहककर्टयोर्मध्येसर्वानद्योरज स्वलाः ॥ नस्नानादीनिकर्माणितासुकुर्वीतमानवः ॥ इदंचक्षुद्रनदीषु । सिंह कर्कटयोर्मध्येसर्वानद्योरजस्वलाः ॥ तासुस्नानंनकुर्वीतवर्जयित्वासमुद्रगाइ ति । व्याघ्रोक्तेः । मात्स्येत्वगस्त्योदयावधित्वमुक्तम् । यावन्नोदेतिभगवान् दक्षिणाशाविभूषणः ॥ तावद्रजोमहानद्यःकरतोयाःप्रकीर्तिताः ॥ करतोया अल्पतोयाः **तथाकात्यायनः** याःशोषमुपगच्छंतिग्रीष्मेकुसरितोभुवि ॥ ता सुप्रावृषिनस्नायादपूर्णेदशवासरे ॥ इदंचापदि **स्मृतिसंग्रहे** धनुःसहस्रा ण्यष्टौतुगतिर्यासांनविद्यते ॥ नतानदीशब्दवहागतास्ताःपरिकीर्तिताः **म हानदीषुतुभविष्येउक्तम्** आदौतुकर्कटेदेविमहानद्योरजस्वलाः ॥ त्रिदिनं चचतुर्थेह्निशुद्धास्युर्जाह्नवीयथा **महानद्यश्चब्राह्मे** गोदावरीभीमरथीतुंगभद्रा

चवेणिका ॥ तापीपयोष्णीविंध्यस्यदक्षिणेतुप्रकीर्तिताः ॥ भागीरथीनर्मदा चयमुनाचसरस्वती ॥ विशोकाचविशस्ताचविंध्यस्योत्तरसंस्थिताः ॥ द्वादशैतामहानद्योदेवर्षिक्षेत्रसंभवाः ॥ **मदनरत्नेपुराणांतरे** महानद्योदेविका चकावेरीवंजरातथा ॥ रजसातुप्रदुष्टाःस्युःकर्कटादौन्यहंनृप **कात्यायनः** कर्कटादौरजोदुष्टागोमतीवासरत्रयम् ॥ चंद्रभागासतीसिंधुःशरयूनर्मदातथा ॥ इदंगंगाद्यतिरिक्तविषयम् । गंगाचयमुनाचैवप्लक्षजातासरस्वती ॥ रजसानाभिभूयंतेयेचान्येनदसंज्ञिताः ॥ शोणसिंधुहिरण्याख्याःकोकलोहितघर्घराः ॥ शतद्रूश्चनदाः सप्तपावनाःपरिकीर्तिताः ॥ इतिदेवलोक्तेःयत्तु प्रथमंकर्कटेदेवित्र्यहंगंगारजस्वलेत्यादिवचनंतज्जाह्नवीभिन्नगोदावर्यादिगंगांतरपरमितिमदनरत्ने । अन्यत्वंतर्गतरजोविषयम् । गंगाधर्मद्रवःपुण्या यमुनाचसरस्वती ॥ अंतर्गतरजोदोषाःसर्वावस्थासुचामलाइतिनिगमोक्तेःतीरवासिनांतुरजोदोषोनास्ति । नतुतत्तीरवासिनामितिनिगमोक्तेःरजोदुष्टमपिजलंगंगाजलयोगेपावनम्। गंगांभसामसमायोगाद्दुष्टमप्यंबुपावनमितिमात्स्योक्तेः **नूतनकूपादौतुयोगयाज्ञवल्क्यः** अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका ॥ भूमेर्नवोदकंचैवदशरात्रेणशुद्ध्यतीति **क्वचित्वदोषमाहव्याघ्रपादः** अभावेकूपवापीनामनपायिपयोभृताम् ॥ रजोदुष्टेपिपयसिग्रामभोगोनदुष्यति **गौडास्तु** अन्येनापिसमुद्धृतइतिद्वितीयपादेपाठः । तेनोद्धृतेनदोषः । तथाचतासुस्नानंनेतिप्रागुक्तमित्याहुः **वसिष्ठोपि** उपाकर्मणिचोत्सर्गेप्रेतस्नानेतथैवच॥चंद्रसूर्यग्रहेचैवरजोदोषोनविद्यतइत्यलंविस्तरेण । श्रावणशुक्लतृतीयामधुस्रवाख्यागुर्जरेषुप्रसिद्धा । सापरयुताग्राह्येतिदिवोदासः । श्रावणशुक्लचतुर्थीपूर्वयुतामातृविद्धागणेश्वरइत्यादिवचनात् । श्रावणशुक्लपंचमीनागपूजादौपरैवेतिसामान्यनिर्णयेउक्तम् **चमत्कारचिंतामणौ** पंचमीनागपूजायांकार्याषष्ठीसमन्विता ॥ तस्यांतुतुषितानागाइतरासचतुर्थिकेति ॥ श्रावणेपंचमीशुक्लासंप्रोक्तानागपंचमी॥तापरित्यज्यपंचम्यःचतुर्थीसहिताहिताइतिमदनरत्नेभिधानाच्च । तेनपरैवेति **अत्रविशेषोहेमाद्रौभविष्ये** श्रावणेमा

सिपंचम्यांशुक्लपक्षेनराधिप ॥ द्वारस्योभयतोलेख्यागोमयेनविषोल्बणाः ॥ पूजयेद्विधिवद्वीरदधिदूर्वाकुरैःकुशैः॥ गंधपुष्पोपहारैश्चब्राह्मणानांचतर्पणैः॥ येतस्यांपूजयंतीहनागान्भक्तिपुरःसराः ॥ नतेषांसर्वतोवीरभयंभवतिकुत्रचिदिति ॥ श्रावणशुक्लद्वादश्यांदधिव्रतंप्रागुक्तम् । तत्रादीनांत्वनिषेधः । तत्रदधिव्यवहाराभावादितिवक्ष्यते **अत्रैवविष्णोःपवित्रारोपणमुक्तंहेमाद्रौविष्णुरहस्ये** श्रावणस्यसितेपक्षेकर्कटस्थेदिवाकरे ॥ द्वादश्यांवासुदेवायपवित्रारोपणंस्मृतम् ॥ द्वादश्यांश्रवणेवापिपंचम्यामथवाद्विज ॥ आनुकूल्येषुकर्तव्यंपंचदश्यामथापिवेति **शिवेतुतत्रैवकालोत्तरे** आषाढांतेचतुर्दश्यांनभस्यनभसोस्तथा ॥ अष्टम्यांचचतुर्दश्यांपक्षयोरुभयोःसममिति अन्यदेवतानांतुवक्ष्यते **अधिवासनंतुदीपियाम्** गोदोहांतरितेकालेपूर्वेह्युर्वाधिवासनमिति **गौणकलेरामार्चनंद्रिकायाम्** पवित्रारोपणंविघ्नाच्छ्रावणेनभवेद्यदि॥कार्तिक्यवधिशुक्लास्तेकर्तव्यमितिनारदः॥हेमरौप्यताम्रक्षौमैःसूत्रैःकौशेयपद्मजैः॥कुशैःकाशैश्चकार्पासैर्ब्राह्मण्याकर्तितैःशुभैः॥ कृत्वात्रिगुणितंसूत्रंत्रिगुणीकृत्यशोधयेत् तत्रोत्तमंपवित्रंतुषष्ठ्यासहशतैस्त्रिभिः ॥ सप्तत्यासहितंद्वाभ्यांशताभ्यांमध्यमंस्मृतम् ॥ साशीतिनाशतेनैवकनिष्ठंतत्समाचरेत् ॥ साधारणपवित्राणित्रिभिःसूत्रैःसमाचरेत् ॥ उत्तमंतुशतग्रंथिपंचाशद्ग्रंथिमध्यमम् ॥ कनिष्ठंतुपवित्रंस्यात्षट्त्रिंशद्ग्रंथिशोभनम् ॥ षट्त्रिंशच्चचतुर्विंशत्द्वादशेतिचकेचन ॥ चतुर्विंशद्वादशाष्टावित्येकेमुनयोविदुः ॥ हेमाद्रौविष्णुरहस्येत्वन्यथोक्तम् । अष्टोत्तरशतंकुर्याच्चतुःपंचाशदेववा ॥ सप्तविंशतिरेवाथज्येष्ठमध्यकनीयसम् ॥ अधमंनाभिमात्रंस्यादूरुमात्रंद्वितीयकम् ॥ प्रलंबतोजानुमात्रंप्रतिमायां निगद्यते ॥ **शिवपवित्रंतुतत्रैवशैवागमे** एकाशीत्यथवासूत्रैस्त्रिंशतावाष्टयुक्तया ॥ पंचाशतावाकर्त्तव्यंतुल्यग्रंथ्यंतरालकम् ॥ द्वादशांगुलमानानिव्यासादष्टांगुलानिवा ॥ लिंगविस्तारमानानिचतुरंगुलकानिचेति **अधिकारिणोपितत्रैवविष्णुरहस्ये** ब्राह्मणःक्षत्रियोवैश्यस्तथास्त्रीशूद्रएवच ॥ स्वधर्मावस्थिताःसर्वेभक्त्याकुर्युःपवित्रकम् **तथा** अतोदेवेतिमंत्रेणद्विजो

विष्णौनिवेदयेत्॥शूद्रस्यमूलमंत्रोवायेनवापूजयेद्धरिम्एतच्चनित्यम् ॥ नकरो तिविधानेनपवित्रारोपणंतुयः ॥ तस्यसांवत्सरीपूजानिष्फलामुनिसत्तम ॥ तस्माद्भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः वर्षेवर्षेप्रकर्तव्यंपवित्रारोपणंहरेरितित त्रैवोक्तेः **देवताविशेषेतिथयोपितत्रैव** धनदश्चरमागौरीगणेशःसोमराट् गुहः ॥ भास्करश्चंडिकांबाचवासुकिश्चतथर्षयः । चक्रपाणिर्ह्यनंगश्चशिवोव्र ह्मातथैवच ॥ प्रतिपत्प्रभृतिष्वेताःपूज्यास्तिथिषुदेवताः ॥ यथोक्ताःशुक्लप क्षेतुतिथयःश्रावणस्यचेति ॥ **तथाहेमाद्रौकालोत्तरे** चतुर्दश्यामथाष्टम्यांसर्व साधारणंतुतदिति **तत्प्रकारस्तुरामार्चनचंद्रिकायाम् । यथा** ततस्तानि पवित्राणिवैष्णवेपटलेशुभे ॥ संस्थाप्यशुचिवस्त्रेणपिधायपुरतोन्यसेत् ॥ अ रत्निसंमितांवेणींकुर्यात्षट्त्रिंशताकुशैः ॥ क्रियालोपविघातार्थंयत्त्वयाविहि तंप्रभो ॥ मयैतत्क्रियतेदेवतवतुष्टयैपवित्रकम् ॥ नमेविघ्नोभवेद्देवकुरुनाथ दयांमयि ॥ सर्वथासर्वदाविष्णोममत्वंपरमागतिः ॥ उपवासेनदेवत्वांतोष यामिजगत्पते ॥ कामक्रोधादयोप्येतेनमेस्युर्व्रतघातकाः ॥ अद्यप्रभृतिदेवे शयावद्देशेषिकंदिनम् ॥ तावद्रक्षात्वयाकार्यासर्वस्यास्यनमोस्तुते ॥ इतिदे वंसंप्रार्थ्यकुंभं संस्थाप्यतत्रवंशपात्रे । ओंसांवत्सरस्ययागस्यपवित्रीकरणा यभो ॥ विष्णुलोकात्पवित्राद्यआगच्छेहनमोस्तुते ॥ अनेनमूलेनचावाह्यो त्तममध्यमकनिष्ठेषुविष्णुब्रह्मरुद्रान् सत्त्वरजस्तमांसिवेदत्रयं वनमालायांप्र कृतिंचावाह्यत्रिसूत्र्यांब्रह्मविष्णुरुद्रान् ग्रंथिषुक्रियापौरुषीवीराविजयाईशाअ पराजितामनोन्मनीजयाभद्रामुक्तिश्चेत्यावाह्यसंपूज्य । ओंसंवत्सरकृतार्चाया संपूर्णफलदोपियत् ॥ पवित्रारोपणायैतत्कुरुकंधरतेनमः ॥ विष्णुतेजोद्भवंर म्यंसर्वपातकनाशनम् ॥ सर्वकामप्रदंदेवतवांगेधारयाम्यहमितिदेवकरेमंग लसूत्रंबध्वादेवंसंपूज्यनिमंत्रयेत् । आमंत्रितोसिदेवेशपुराणपुरुषोत्तम ॥ प्रातस्त्वांपूजयिष्यामिसान्निध्यंकुरुकेशव ॥ क्षीरोदधिमहानागशय्यावस्थित विग्रहः ॥ प्रातस्त्वांपूजयिष्यामिसन्निधौभवतेनमः ॥ निवेदयाम्यहंतुभ्यंप्रा तरेतत्पवित्रकम् ॥ सर्वथासर्वदाविष्णोनमस्तेस्तुप्रसीदमे ॥ ततःपुष्पांज

लिंदत्वारात्रौजागरणंकुर्यादितिअधिवासनम् ॥ प्रातर्नित्यपूजांकृत्वागंधदूर्वा क्षतयुतंपवित्रमादायओंदेवदेवनमस्तुभ्यंगृहाणेदंपवित्रकम् ॥ पवित्रीकरणा र्थायवर्षपूजाफलप्रदम् ॥ पवित्रकंकुरुष्वाद्ययन्मयादुष्कृतंकृतम् ॥ शुद्धो भवाम्यहंदेवत्वत्प्रसादान्महेश्वर ॥ मूलसंपुटितेनानेनदत्वांगदेवताभ्योना म्नासमर्प्य महानैवेद्यंदत्वानीराज्यमणिविद्रुममालाभिरित्यादिभिर्दमनारोप णोक्तमंत्रैः प्रार्थयित्वागुरवेब्राह्मणेभ्यश्चदत्वास्वयंधारयेत् **तथा** मासंपक्ष महोरात्रंत्रिरात्रंधारयेत्तथा । देवेतंसूत्रसंदर्भेदेशकालविवक्षया **अकरणेतु तत्रैव** पवित्रारोपणंकालेनकरोतिकथंचन॥तदायुतंजपेन्मंत्रंस्तोत्रंवापिसमा हितइत्युक्तम् । इतिपवित्रारोपः । श्रावणशुक्लचतुर्दशीपूर्वयुताग्राह्या ॥ अ त्रवक्तव्योविशेषश्चैत्रचतुर्दश्यामुक्तः अथोपाकर्म्म **तत्रबह्वृचानांप्रयोग पारिजातेशौनकः** अथातःश्रावणेमासेश्रवणर्क्षयुतेदिने॥श्रावण्यांश्रावणेमा सिपंचम्यांहस्तसंयुते ॥ दिवसेविदधीतैतदुपाकर्म्मयथोदितम् ॥ अध्यायो पाकृतिंकुर्यात्तत्रोपासनवह्निनेति ॥ अत्रपौर्णमास्युपसंहारन्यायेनयजुर्वेदि परेतिहेमाद्रिः । अत्रहस्तयुक्तापंचम्युक्ता । **कारिकापि** तन्मासेहस्तयु क्तायांपंचम्यांवातदिष्यतइतिकेवलपंचम्यांहस्तयुतेन्यस्मिन्दिनेइतितु हेमा द्रिः । उपासनवह्निनेतितुकर्मेदमिदंकेचिल्लौकिकाग्नौप्रकुर्वतइति । कारि कोक्तलौकिकाग्निनाविकल्पते । तत्राप्यध्याप्यैरन्वारब्धइतिसूत्रात् । सशिष्य त्वेतदधिकारिकस्याचार्याग्नौ नान्यस्याग्नावन्योजुहुयादितिनिषेधाल्लौकिक एव । तदभावेतुस्मार्तइतिनिगर्वः **यद्यपिदीपिकायाम्** वेदोपाकृतिरोषधि प्रजननेपक्षेसितेश्रावणेइतिशुक्लपक्षोपिसर्वेषांमुख्यकालत्वेनोक्तः । वक्ष्यमा णगार्ग्यवचनेनछंदोगान्प्रतिविहितस्यतस्याविरोधिनःसर्वान्प्रतिप्रवृत्तिश्च । तथापिश्रावणमाससंबंधस्यसूत्रोक्तत्वात् । कृष्णपक्षेपिकार्यमितिवृद्धाः। तथा चसूत्रम् । अथातोध्यायोपाकरणमोषधीनांप्रादुर्भावेश्रवणेनश्रावणस्यपंच म्यांहस्तेनवा । अत्रश्रवणोमुख्योन्येगौणाः **तस्याहर्द्वययोगेहेमाद्रौव्यासः** धनिष्ठासंयुतंकुर्याच्छ्रावणंकर्म्मयद्भवेत् ॥ तत्कर्मसकलंज्ञेयमुपाकरणसंज्ञित

म् ॥ श्रबणेनतुयत्कर्मह्युत्तराषाढसंयुतम् ॥ संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यतीति **गार्ग्योपि** उदयव्यापिनीत्वेवविष्ण्वर्क्षेचंद्रिकाद्वयम् ॥ तत् कर्मसकलंज्ञेयंतस्यपुण्यंत्वनंतकम् ॥ इतिपूर्वेद्युरुत्तराषाढयोगेपरेद्युः । श्र वणाभावेघटिकाद्वयन्यूनेवापंचम्यादौकार्यम् । नतुपूर्वविद्धायांसंगवमात्रे । अपवादाभावत्॥किंच । परेद्युःसंगवास्पर्शेनिषिद्धपूर्वाग्रहणेकिंमानम् संगव वाक्यंश्रवणवाक्यंचेतिचेत् । तर्हिव्रीहिवाक्यादश्वशफवाक्याच्चमाषमिश्राणा मप्युपादानंस्यादितिमहत्पांडित्यंनिषेधानुप्रवेशान्नैरपेक्ष्यबाधानेतिचेत् इहा पितुल्यम् । एतेनपर्वाप्यौदयिकंव्याख्यातंनिषेधानुग्रवेशस्योभयत्रतुल्यत्वात् **श्रवणयुतदिनेसंक्रांत्यादौतु** उपाकर्मनकुर्वीतिक्रमात्सामग्र्यज्ञुर्विदः ॥ ग्रह संक्रांतियुक्तेषुहस्तश्रवणपर्वस्विति ॥ हेमाद्रौनिषेधात्पंचम्यादयोग्राह्याःमद नरत्नेपि यदिस्याच्छ्रवणंपर्वग्रहसंक्रांतिदूषितम् ॥ स्यादुपाकरणंशुक्लपंच म्यांश्रावणस्यतु **स्मृतिमहार्णवे** संक्रांतिग्रहणंवापियदिपर्वणिजायते ॥ त न्मासेहस्तयुक्तायांपंचम्यांवातदिष्यते **तत्रापिप्रयोगपारिजातेवृद्धमनुका त्यायनौ** अर्धरात्रादधस्ताच्चेत्संक्रांतिग्रहणंतदा ॥ उपाकर्मनकुर्वीतपरतश्चे न्नदोषकृदिति **मदनरत्नेगार्ग्येपि** यद्यर्धरात्रादर्वाक्तुग्रहःसंक्रमएवच ॥ नोपाकर्मतदाकुर्याच्छ्रावण्यांश्रवणेपिवा॥एतेनग्रहणसंक्रांतिकालेश्रवणसत्त्वे एवनिषेधोनार्वागितिमूर्खशंकापरास्ता । ग्रहविशिष्टानांहस्तश्रवणपर्वणांप्रत्ये कंनिषेधेतद्युतोपाकर्मनिषेधेचविशिष्टोद्देशेवाक्यभेदात् । पंचम्यांसंक्रांतौनि षेधाभावापत्तेश्चतेनार्धरात्रात्पूर्वग्रहसंक्रमसत्त्वेएवोपाकर्मनिषेधो नतद्योगेए व **यत्तु** प्रतिपन्मिश्रितेनैवनोत्तराषाढसंयुते ॥ श्रवणेश्रावणंकुर्युर्ग्रहसंक्रांति वर्जितइति॥प्रतिपन्मिश्रनिषेधकंवचनंतन्मूलम् । अत्रच । वेदोपाकरणेप्राप्ते कुलीरेसंस्थितेरवौ॥उपाकर्मनकर्त्तव्यंकर्तव्यंसिंहयुक्तकेइतिवचनंदेशांतरवि षयम् । नर्मदोत्तरभागेतुकर्तव्यंसिंहयुक्तके ॥ कर्कटेसंस्थितेभानावुपाकुर्या त्तुदक्षिणइति । बृहस्पतिवचनादितिप्रयोगपारिजातेनोक्तम् । पराशरमाध वीयेप्येवम् । सामगानांसिंहस्थरवावुक्तेस्ताद्विषयइदंपुरोडाशश्चतुर्धाकरणव

दुपसंहियते । तेषामेवदेशव्यवस्थानतुबह्वृचादिपरम् । तेषांसूत्रेचांद्रश्राव णोक्तेः । सौरेपंचम्ययोगात्इतितुवयंपश्यामः **यत्तुकालादर्शे** अध्यायाना मुपाकर्मश्रावण्यांतैत्तिरीयकाः ॥ वह्वृचाःश्रवणेकुर्युःसिंहस्थोर्कोभवेद्यदि ॥ सहस्तशुक्लपंचम्यांवातद्ग्रहणसंक्रमे ॥ असिंहार्केप्रौष्ठपद्यांश्रवणेनव्यवस्थये ति ॥ तन्मूलालेखनाच्चिंत्यम् । श्रावणेसस्यानुद्गमादौतुबह्वृचपरिशिष्टे । अवृष्ट्यौषधयस्तस्मिन्मासेतुनभवंतिचेत् ॥ तदाभाद्रपदेमासिश्रवणेनतादि ष्यतइति ॥ तत्राप्यनुद्गमेतुकुर्यादेवंतद्वार्षिकमित्याचक्षतइतिसूत्रात् । वर्ष तौभवंवार्षिकम् एतच्चशुक्लास्तादावपिकार्यम् । उपाकर्मोत्सर्जनंचपवित्रदम नार्पणमितिदमनारोपेलिखितवचनात् । नित्येनैमित्तिकेजप्येहोमेयज्ञक्रिया सुच ॥ उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यतइतिप्रयोगपारिजातेसंग्रहोक्तेः । पर्वणिग्रहणेसति पूर्वत्रिरात्रादिवेधाभावंवक्तुमिदंतेनपर्वणिग्रहणेपिचतुर्दश्या श्रवणेकार्यमितिहेमाद्रिः । अस्तेप्रथमारंभस्तुनभवति । गुरुभार्गवयोर्मौढ्येबा ल्येवावार्द्धकेपिवा॥तथाधिमाससंसर्पमलमासादिषुद्विजे॥प्रथमोपाकृतिर्नस्या त्कृतंकर्मविनाशकृदिति॥तत्रैवकश्यपोक्तेः **अत्रप्रथमारंभे वृद्धिश्राद्धंकुर्या दितिनारायणवृत्तौ एतच्चाधिमासेनकार्यम्** उपाकर्मतथोत्सर्गःप्रसवाहो त्सवाष्टकाःमासवृद्धौपरेकार्यावर्जयित्वातुपैतृकमितिज्योतिःपराशरोक्तेःउत्क र्षःकालवृद्धौस्यादुपाकर्मादिकर्मणि॥अभिषेकादिवृद्धीनांनतूत्कर्षोयुगादिष्वि तिकात्यायनोक्तेश्च **यत्तु** उपाकर्मणिचोत्सर्गेह्येतदिष्टंवृषादितइतिऋष्य शृङ्गवचनंतत्सामगविषयम् । तेषांसिंहार्कएवोक्तेः । एतच्चापराह्णेकार्यम् । उपाकर्मापराह्णेस्यादुत्सर्गःप्रातरेवत्विति । अध्यायानामुपाकर्मकुर्यात्कालेप राह्णके ॥ पूर्वाह्णेतुविसर्गःस्यादितिवेदविदोविदुरितिचहेमाद्रौगोभिलोक्तेः । वस्तुतस्तु । भवेदुपाकृतिःपौर्णमास्यांपूर्वाह्ण एवत्वितिप्रचेतसोवचनात् । पूर्व वाक्यंसामगविषयम् । तेषामपराह्ण एवोक्तेरित्यनुपदंवक्ष्यते **दीपिकापि** अस्यतुविधेःपूर्वाह्णकालःस्मृतइति । याजुषास्तुपर्वणिकुर्युः । तच्चापस्तंबैरौद यिकंग्राह्यमन्यैस्तुपूर्वम् । पर्वण्यौदयिकेकुर्युःश्रावणेतैत्तिरीयकाः ॥ वह्वृ

चाःश्रवणेकुर्युर्ग्रहसंक्रांतिवर्जितइति गार्ग्योक्तेः। संप्राप्तवाञ्छ्रुतीर्ब्रह्मापर्वण्यौ दयिकेपुनः ॥ अतोभूतादिनेतस्मिन्नोपाकरणमिष्यतइतिकालिकापुराणाच्च ॥ अथचेद्दोषसंयुक्तेपर्वणिस्यादुपाक्रिया ॥ दुःखशोकामयग्रस्ताराष्ट्रे तस्मिन्द्विजातयइति ॥ मदनरत्नेहेमाद्रौगार्ग्येणदोषोक्तेः **अत्रशिंगाभट्टीयविशेषः** श्रवणःश्रावणंपर्वसंगवस्पृग्यदाभवेत् ॥ तदैवौदयिकंकार्यंनान्यदौदयिकंभवेत् **पराशरमाधवीयेपिगार्ग्यः** श्रावणीपौर्णमासीतुसंगवात्परतोयदि ॥ तदैवौदयिकीग्राह्यानान्यदौदयिकीभवेत् **कर्मकालमाहकालादर्शेनियमः** श्रावण्यांप्रौष्ठपद्यांवाप्रतिपत्षण्मुहूर्तकैः ॥ विद्धास्याच्छंदसातत्रोपाकर्मोत्सर्जनंभवेत् ॥ अत्रपौर्णमासीश्रवणहस्तयोरुपलक्षणम् । तेनतावपिसंगवस्पृशौ । उदयेसंगवस्पर्शेश्रुतौपर्वणिचार्कभे ॥ कुर्युर्नभस्युपाकर्मऋग्यजुः सामगाःक्रमादितिपृथ्वीचन्द्रः। तेनोदयसंगवोभयव्यापिनीमुख्या। परेद्युःसंगवाभावेपूर्वेद्युरुभयाभावेचैकैकसत्वे पूर्वेद्युश्रुतुर्दशीवेधनिषेधात्सामान्यवाक्यादौदयिकीकर्मपर्यासाग्राह्या नपूर्वा । संगवनिमित्तपूर्वविद्धापवादाभावात् नान्यदौदयिकीत्यस्यपूर्वविद्धापरत्वाभावात् । तेनभाद्रादौकालांतरेस्यान्नतु निषिद्धेनहिव्रीह्यलाभेनिषिद्धमाषग्रहणंयुक्तम्।अतएवपरेद्युःसंगवव्याप्तौपूर्वविद्धानिषेधः । तदभावेतुनेतिमूर्खव्यवस्थाप्ययुक्ताविधिवैषम्यात् । मासनिषेधेपितथापत्तेश्च । पूर्वविद्धावचनसत्त्वेहिसायुज्यते । एवंश्रवणेपिज्ञेयम् । तन्न । विष्ण्वर्क्षेघटिकाद्वयमितिपूर्वोक्तविरोधात् । तेनप्राशस्त्यमात्रपरमिदम् । तत्वंतु एतच्छुद्धाधिकपरम् । तेनयथाग्निहोत्रादौसायंप्रातः कालबाधेसामान्येजीवनावच्छिन्नकालेदर्शादौवानुष्ठानम् । यथावाव्रीह्यश्वशफाद्यभावेयागाक्षिप्तनिषिद्धवर्जद्रव्येण । तथात्रसंगवाभावेनिषिद्धवर्जकर्मपर्यासौदयिकेकालांतरेवानुष्ठानंनतुकदाचिन्निषिद्धे ॥ अपवादाभावेउत्सर्गस्यैवप्राप्तेः । कात्यायनादीनांतुदिनद्वयेपूर्वाह्णव्याप्तौएकदेशस्पर्शेवापूर्वैवेतिहेमाद्रिः **यदपि** श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी ॥ पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमिति ब्रह्मवैवर्तं । तद्ब्रह्मपवित्रश्रवणकर्मादिदैवकर्मविषय

मितिहेमाद्रिः अतएववचनात्कुलधर्मव्रतादावपिपूर्वैव । मदनरत्नेप्येवम् । मदनपारिजातेपिपूर्वविद्धायांश्रावण्यांवाजसनेयिनामुपाकर्मेत्युक्तम् **मदन रत्नेतु** पर्वण्यौदयिकेकुर्युःश्रावणंतैत्तिरीयकाइति ॥ बह्वृचपरिशिष्टात् । बह्वृचान्प्रतिकर्मविधानार्थप्रवृत्तेः । तत्रतैत्तिरीयककर्मविध्ययोगात्पूर्वोक्त कालिकापुराणादौसामान्यतः । औदयिकपर्वप्राप्तेस्तन्निषेधेनबह्वृचानांश्रव णाविधानात्तैत्तिरीयकपदमनुवादत्वात् तस्यचप्राप्त्यधीनत्वात् । प्राप्तेश्चय जुर्वेदिमात्रपरत्वात्सर्वयजुर्वेद्युपलक्षणार्थं । अयुक्त्यानुवादोवानतुविधायकं येनविशेषविधिनोपसंहारःस्यात् । अनुवादत्वाल्लक्षणानदोषः । अन्यथात्वौ दयिकपर्वविशिष्टोपाकर्मोद्देशेनकर्तृविधौकर्तृविशिष्टंवा औदयिकपर्वविधौ वाक्यभेदापत्तेः । तस्मात्तैत्तिरीयकपदाविवक्षयासर्वयजुर्वेदिनामौदयिकमे वपर्वेत्युक्तम् तन्न । नतावत्पारिशिष्टेबह्वृचान्प्रत्येवविधिः । धनिष्ठाप्रतिप द्युक्तत्वाष्टर्क्षसमन्वितमित्यादितदुदाहृतेएवपरिशिष्टेवेदांतरधर्मविधीनांद र्शनात् । नाप्यनुवादोयंकालिकापुराणात् । बह्वृचादीनामपितदापत्तेः । कुर्यु रित्यस्यविधित्वेनतस्यैवार्थवादत्वेनैतत्प्राप्तानुवादित्वाच्च । नचतैत्तिरीयकाणां गृह्येतद्विधिरस्ति । येनानुवादःस्यात् । नचवाक्यभेदः । तैत्तिरीयकमात्रस्य कर्ममात्रस्यवाउद्देश्यत्वायोगेन हविरार्तिवदष्टवर्षब्राह्मणमुपनयीतेतिवच्चाग त्याविशिष्टस्योद्देश्यत्वात् । अन्यथोत्तरार्धेबह्वृचपदस्याप्यविवपक्षापत्त्याश्रव णस्यसर्वसाधारण्यापत्तेः । तस्माद्धेमाद्रिमतमेवयुक्तमितिदिक् । इदंचशिष्या नध्याप्येत् । आवसथ्येग्नौअनध्यापयतोनाधिकारइतिकर्कः । श्रावण्यामपि ग्रहणादिदुष्टायांकातीयभिन्नैःप्रोष्टपद्यांकार्यम् । तैस्तुश्रावणपंचम्याम् । संक्रां तिर्ग्रहणंवापिपौर्णमास्यांयदाभवेत् ॥ उपाकृतिस्तुपंचम्यांकार्यावाजसनेयि भिरिति ॥ स्मृतिमहार्णवेवाजसनेयिग्रहणादितिहेमाद्रिः । इदंचसूत्रोक्तकालपर त्वात् । बह्वृचपरमपिसांख्यायनैस्तुहस्तेकार्यं । आपस्तंबैराथर्वणैश्चप्रौष्ठपद्याम् । यत्तुबौधायनः । श्रावण्यांपौर्णमास्यामाषाढ्यांवोपाकृत्येत्यूचेतत्प्रौष्ठपद्यामपि दोषेआषाढ्यांकार्यमित्येवमर्थम् । तच्छाखीयविषयंवा । सामगास्तुश्रावणेहस्ते

कुर्युर्बह्वृचाः । श्रवणेचैवहस्तर्क्षेसामवेदिनइतिनिर्णयामृतेगोभिलोक्तेः । सोप्युत्तरः । धनिष्ठाप्रतिपक्च्युतंत्वाष्ट्रऋक्षसमन्वितम् ॥ श्रावणंकर्मकुर्वीरन्ऋग्यजुःसामपाठकाः ॥ इतिमदनरत्नपरिशिष्टोक्तेः **गार्ग्योपि** सिंहेरवौतुपुष्यर्क्षेपूर्वाह्णेविवरेबहिः ॥ छंदोगामिलिताःकुर्युरुत्सर्गंस्वस्वछंदसाम् । शुक्लपक्षेतुहस्तेनउपाकर्मापराह्णिकमिति ॥ अविवरेग्रहादिदोषहीने । विचरेदिति पाठोज्ञानकृतः । पुष्यर्क्षेपूर्वाह्णेउत्सर्गः । अपराह्णिकमुपाकर्मेत्यन्वयः। अन्यस्तुविशेषःपूर्वमेवोक्तः **प्रयोगपारिजातेगोभिलः** उपाकर्मोत्सर्जनंचवनस्थानामपीष्यते॥धारणाध्ययनांगत्वात्गृहिणांब्रह्मचारिणाम्॥ उत्सर्जनंचवेदानामुपाकरणकर्मच ॥ अकृत्वावेदजप्येनफलंनाप्नोतिमानवः ॥ सर्वथालोपेतुकृच्छ्रंउपवासश्च । वेदोदितानांनित्यानामितिमनुनाभोजनोक्तेः । एवमुत्सर्गेपि । अथप्रसंगादत्रैवोत्सर्जनमुच्यते । तच्चपौषमासेरोहिण्यांतत्कृष्णाष्टम्यांवाकार्यं । पौषमासस्यरोहिण्यामष्टकायामथापिवा ॥ जलांतेछंदसांकुर्यादुत्सर्गंविधिवद्बहिरितियाज्ञवल्क्योक्तेः । श्रावण्यांप्रौष्ठपद्यांचोपाकृतौक्रमेणपौषशुक्लप्रतिपदिवाकार्यम् । अर्धपंचमान्मासानधीर्यातेतितेनैवोक्तेः । अर्धःपंचमोयेषुसार्धचतुरइत्यर्थः । यत्तुहारीतःअर्धपंचमान्मसानधीत्योर्ध्वमुत्सृजेत् । पंचार्धषष्ठान्वेतितदाषाढ्युपाकर्मविषयम् । बौधायनास्तु । पौष्यांमाघ्यांवाकुर्युः । पौष्यांमाघ्यांचोत्सृजेदितितत्सूत्रात् । तैत्तिरीयैस्तुतैष्यांकार्यं तैष्यांपौर्णमास्यांरोहिण्यांवाविरमेदितितत्सूत्रात् । तैत्तिरीयैस्तुतेतैष्यांकार्यं तैष्यांपौर्णमास्यांरोहिण्यांवाविरमेदितितत्सूत्रात्बह्वृचैस्तुमाघ्यांकार्यम् । अध्यायोत्सर्जनंमाघ्यांपौर्णमास्यांविधीयतइतिकारिकोक्तेः । कातीयास्तुभाद्रपदेकुर्युः । उत्सर्गश्चेतिनंदादितिथ्यांप्रौष्ठपदेवेतिकात्यायनोक्तेः । सामगास्तुसिंहार्केपुष्येकुर्युः। तथाचसिंहेरवौइतिगार्ग्यवचनंपूर्वमुक्तम्। सर्वैरुपाकर्मदिनेवाकार्यम्। पुष्येउत्सर्जनंकुर्यादुपाकर्मदिनेथवेब्रिहेमाद्रौखादिरगृह्योक्तेः यदासिंहस्थेसूर्ये सतितन्मध्यहस्तनक्षत्रात्प्राक्पुष्यःकर्कटस्थोभवति । तदातस्मिन्पुष्येउत्सर्गंकृत्वातदुत्तरहस्तेउपाकर्मसामगाःकुर्युः । मासेप्रोष्ठ

पदेहस्तात्पुष्यःपूर्वोभवेद्यदा ॥ तदाचश्रावणेकुर्यादुत्सर्गंछंदसांद्विजइति तत्रैवपरिशिष्टोक्तेः । अत्रद्वावपिसौरौमासौज्ञेयौतेषांसौरस्यैवोक्तेः । **अत्र विशेषमाहकाष्णाजिनिः** उपाकर्मणिचोत्सर्गे यथाकालंसमेत्यच । ऋषीन् दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततइति॥उपाकर्मण्युत्सर्गेचत्रिरात्रम् । पक्षिणि महोरात्रंवानध्यायइति । मिताक्षरायामुक्तम् । अत्रनदीनांरजोदोषोनास्ति । उपाकर्मणिचोत्सर्गेरजोदोषोनविद्यते ॥ इतिगार्ग्योक्तेः **अत्रैवरक्षाबंधनमुक्तम् हेमाद्रौभविष्ये** संप्राप्तेश्रावणस्यांतेपौर्णमास्यांदिनोदये ॥ स्नानंकुर्वीत मतिमान्श्रुतिस्मृतिविधानतः ॥ उपाकर्मादिकंप्रोक्तमृषीणांचैवतर्पणम्॥शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते ॥ उपाकर्मणिकर्तव्यंऋषीणांचैवपूजनम् । ततोपराह्णसमयेरक्षापोटलिकांशुभाम् ॥ कारयेदक्षतैःशस्तैःसिद्धार्थैर्हेमभूषितैरिति ॥ अत्रोपाकर्मानंतर्यस्यपूर्णतिथौवार्षिकस्यानुवादोनतुविधिः । गौरवात्प्रयोगविधिभेदेचक्रमायोगाच्छूद्रादौतदयोगाच्च । तेनपरेद्युरुपाकरणेपिपूर्वेच्चरपाराह्णेतत्करणम्सिद्धम् । इदंभद्रायांनकार्यम् । भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा ॥ श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनीतिसंग्रहोक्तेः ॥ तत्सत्त्वेतुरात्रावपितदंतेकुर्यादितिनिर्णयामृते । इदंप्रतिपच्चतायांनकार्यम् । नंदायादर्शनेरक्षाबलिदानंदशासुच ॥ भद्रायांगोकुलक्रीडादेशनाशायजायते ॥ इतिमदनत्नेब्रह्मवैवर्तात् **भविष्ये** उपलिप्तेग्रहमध्येदत्तचतुष्केन्यसेत्कुंभम् ॥ पीठेतद्योपविशेद्राजामात्यैश्चसुमुहूर्त्ते ॥ तदनुपुरोधानृपतेरक्षांबध्नीतमंत्रेण॥इदंरक्षाबंधनंनियतकालत्वात्। भद्रावर्ज्यग्रहणादिनेपिकार्यं होलिकावत्।ग्रहसंक्रांत्यादौरक्षानिषेधाभावात्सर्वेषामेववर्णानांसूतकंराहुदर्शने॥इतितत्कालीनकर्मपरएवनत्वन्यत्र।अन्यथाहोलिकायांकागतिः।अतएव। नित्येनैमित्तिकेजप्येहोमयज्ञक्रियासुच॥ उपाकर्मणिचोत्सर्गेग्रहवेधोनविद्यत इति । नियतकालीनेतदभावइतिदिक् । उपाकर्मणितद्दिनभिन्नपरंतुव्रतान्निषेधादित्युक्तंप्राक् **मंत्रस्तु** येनबद्धोबलीराजादानवेंद्रोमहाबलः॥तेनत्वामपिबध्नामिरक्षेमाचलमाचल ॥ ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैरन्यैश्चमानवैः ॥ कर्तव्यो

रक्षिताचारोद्विजान्संपूज्यशक्तितइति **अत्रैवहयग्रीवोत्पत्तिः** । **तदुक्तंकल्पतरौ** श्रावण्यांश्रवणेजातःपूर्वंहयशिराहरिः ॥ जगादसामवेदंतुसर्वकल्मषनाशनम् ॥ स्नात्वासंपूजयेत्तंतुशंखचक्रगदाधरम् ॥ अत्राश्वलायनेनश्रवणाकर्मोक्तम् । श्रावण्यांपौर्णमास्यांश्रवणाकर्मेति । तत्रास्तमययोगिनीग्राह्या । अस्तमितेस्थालीपाकंश्रपयित्वेतिसूत्रात् । अतएवनिशीष्टेदर्शप्रयोगांतःपातनियमात्तदंगैः प्रसंगसिद्धिरुक्ताद्वादशे । अन्यथापरेद्युःप्राप्तौकःप्रसंगः । प्रसंगस्य याज्ञिकस्तुपौर्णमादर्शशब्दयोः पर्वार्त्यक्षणवदहोरात्रवाचित्वात्तत्रैवकर्मकालव्याप्तिर्ग्राह्येतिविकृतित्वाच्छेषपर्वेच्छंति । श्रावणादिमासचतुष्टयकृष्णपक्षद्वितीयासु अशून्यशयनव्रतम् । तत्रचंद्रोदयव्यापिनी । दिनद्वये तत्वेपरेतिनिर्णयामृते ॥

इति कमलाकर भट्टकृते निर्णयसिन्धौ श्रावणमासः ॥

सिंहेपराःषोडशघटिकाःपुण्यकालः । अन्यत्पूर्ववत् **अत्रगोप्रसवेद्धु तसागरेनारदः** भानौसिंहगतेचैवयस्यगौःसंप्रसूयते ॥ मरणंतस्यनिर्दिष्टंषड्भिर्मासैर्नसंशयः ॥ तत्रशांतिंप्रवक्ष्यामियेनसंपद्यतेशुभम् ॥ प्रसूतांततक्षणादेवतांगांविप्रायदापयेत् ॥ ततोहोमंप्रकुर्वीतघृताक्तैराजसर्षपैः । आहुतीनांघृताक्तानामयुतंजुहुयात्ततः ॥ व्याहृतिभिश्चायंहोमः । सोपवासःप्रयत्नेनदद्याद्विप्रायदक्षिणामिति ॥ तथा । सिंहराशौगतेसूर्येगोप्रसूतिर्यदाभवेत् । पौषेचमहिषीसूतेदिवैवाश्वतरीतथा ॥ तदानिष्टंभवेत्किंचित्तच्छांत्यैशांतिकंचरेत् ॥ अस्यवामेतिसूक्तेनतद्विष्णोरितिमंत्रतः ॥ जुहुयाच्चतिलाज्येनशतमष्टोत्तराधिकम् ॥ मृत्युंजयविधानेनजुहुयाच्चतथायुतम् ॥ श्रीसूक्तेनततःस्नायाच्छांतिसूक्तेनवापुनः ॥ मध्यरात्रेनिशीथेवायदागौःक्रंदतेसदा ॥ ग्रामेवास्वगृहेवापिशांतिकंपूर्ववद्दिशेत् ॥ एवंश्रावणेवडवाप्रसवोदिनेनिषिद्धः **तदुक्तमथर्ववेदिनांगार्ग्यपरिशिष्टे** माघेबुधेचमहिषीश्रावणेवडवादिवा ॥ सिंहेगावःप्रसूयंतेस्वामिनोमृत्युदायकाइति ॥ अत्रतदुक्तामृताख्याशांतिःकार्या । भाद्रकृष्णतृतीयाकज्जलीसंज्ञासापराग्राह्येतिदिवोदासीयेउक्तम् **वचनंतुह**

रितालिकाप्रकरणेवक्ष्यामः भाद्रकृष्णचतुर्थीबहुलाख्यामध्यदेशेप्रसिद्धा । सासायाह्नव्यापिनीग्राह्या । दिनद्वयेतत्त्वेपूर्वाग्राह्या गौर्याश्चतुर्थीवटधेनुपूजा दुर्गार्चनंदुर्भरहोलिकेच ॥ वत्सस्यपूजाशिवरात्रिरेताःपरान्विताश्चंतिनृपंस राष्ट्रमिति । दिवोदासीयेवचनात् । अत्रवत्सपूजायाःपृथगुपादानतधेनुपूजा शब्देनबहुलाख्यागृह्यतइति सएवव्याचख्यौ । मदनरत्नेप्येवम् । अत्रगोपू जायवान्नाशनंचतत्रैवोक्तम् । भाद्रकृष्णषष्ठीहलषष्ठीसाससमीयुतेतिदिवोदा सः । भाद्रकृष्णसप्तम्यांशीतलाव्रतम् । तत्रपूर्वाग्राह्येतिहेमाद्रौ अथजन्माष्ट मी साचकृष्णादिमासेनभाद्रपदकृष्णाष्टमी । तथाभाद्रपदेमासिकृष्णाष्टम्यां कलौयुगे॥अष्टाविंशतिमेजातःकृष्णोसौदेवकीसुतइतिकल्पतरौब्राह्मोक्तेः। अ त्रेदंमाधवमतम्।अष्टमीद्वेधा।जन्माष्टमीजयंतीचेति तत्राद्याकेवलाष्टमीयेनकु र्वंतिजानन्तःकृष्णजन्माष्टमीव्रतम्॥ तेभवंतिनराःप्राज्ञव्यालाव्याघ्राश्चकान नइतिस्कांदात् ॥दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला॥रात्रियुक्तांप्रकुर्वी तविशेषेणेंदुसंयुतामितिपुराणांतरात् ॥ श्रावणेबहुलेपक्षेकृष्णजन्माष्टमीव्रत म्॥नकरोतिनरोयस्तुभवतिक्रूरराक्षसइति ॥भविष्योक्तेश्चकेवलाष्टम्याएवोपो ष्यत्वावगतेःसैवरोहिणीयुक्ताजयंती । कृष्णाष्टम्यांभवेद्यत्रकलैकारोहिणीय दि॥जयंतीनामसाप्रोक्ताऽउपोष्यासाप्रयत्नतइति वह्निपुराणात्।अष्टमीकृष्णप क्षस्यरोहिणीऋक्षसंयुता ॥ भवेत्प्रौष्ठपदेमासिजयंतीनामसास्मृतेतिविष्णुरह स्यादिकवचनाच्च । ज्योतिरादिवत्संज्ञयाकर्मभेदः । रोहिणीयोगश्चाहोरात्रंमु ख्यः । निशीथमात्रेमध्यमः । दिवसादावधमः । अहोरात्रंतयोर्योगोह्यसंपू र्णोभवेद्यदि । मुहूर्तमप्यहोरात्रेयोगश्चेत्तामुपोषयेदितिवसिष्ठसंहितोक्तेः ।अर्ध रात्रेतुयोगोयंतारापत्युदयेसति॥ नियतात्माशुचिःस्नातःपूजांतत्रप्रवर्तयेदिति विष्णुधर्मोक्तेः । वासरेवानिशायांवायत्रस्वल्पापिरोहिणी ॥ विशेषेणानभो मासेसैवोपोष्यामनीषिभिरिति पुराणांतराच्च । विशेषेणेतिश्रुतेर्भाद्रपदेपीद म् । श्रावणेवानभस्येवेतिवक्ष्यमाणात् । गौडास्तुनिशीथएवरोहिणीयोगे जयंतीनान्यथेत्याहुः । तन्न । वासरेवानिशायांवेतिविरोधात् । योगविशेषा

द्रुणात्फलमित्यन्ये । तेप्यकरणेदोषश्रुतेरुपेक्ष्याः । तत्रजन्माष्टमीव्रतंनित्यं पूर्वोक्तवचनेषु । अकरणेनिंदाश्रुतेः । वर्षेवर्षेतुयानारीकृष्णजन्माष्टमीव्रतम् नकरोतिमहाप्राज्ञव्यालीभवतिकाननइतिस्कांदेवीप्साश्रुतेश्च। नकरोतिनरो यस्त्विातिपूर्वमुक्तेरत्रस्त्रीलिंगमतंत्रम्। मदनरत्नेस्कांदेत्वत्रफलमप्युक्तम्। ज न्माष्टीव्रतंयेवैप्रकुर्वंतिनरोत्तमाः । कारयंत्यथवालोकान्लक्ष्मीस्तेषांसदास्थिर ा॥सिध्यंतिसर्वकार्याणिकृतेजन्माष्टमीव्रतमिति॥ जयंतीव्रतंतुनित्यंकाम्यंच। महाजयार्थंकुरुतांजयंतींमुक्तयेनघ ॥ धर्ममर्थंचकामंचमोक्षंचमुनिपुंगव ॥ द दातिवांछितानर्थान्येचान्येप्यतिदुर्लभाइतिस्कांदादौफलश्रुतेः । शूद्रान्नेनतु यत्पापंशवहस्तस्यभोजने ॥ तत्पापंलभतेकुंतिजयंतीविमुखोनरः ॥ नकरो तियदाविष्णोर्जयंतीसंभवंव्रतम्॥ यमस्यवशमापन्नःसहतेनारकींव्यथामित्य करणेनिंदाश्रुतेश्च । यदाचपूर्वेद्युःपरेच्चर्वारोहिणीयोगस्तदाजन्माष्टमीजयंत्या मंतर्भूताज्ञेयानतुजन्माष्टमीव्रतंपृथक्कार्यम् विष्णुश्रृङ्खलवत् तदुक्तंमाधवे नैव यस्मिन्वर्षेजयंत्याख्योयोगोजन्माष्टमीतदा॥ अंतर्भूताजयंत्यांस्याद्दक्षयो गप्रशस्तितइति ॥ मदनरत्ननिर्णयामृतगौडमैथिलमतेप्येवम् हेमाद्रिस्तु रो हिणीसंयुतोपोष्यासर्वाघौघविनाशिनी ॥ अर्धरात्रादधश्चोर्ध्वंकलयावायदाभ वेत् ॥ जयंतीनामसाप्रोक्तासर्वपापप्रणाशिनीत्यग्निपुराणादर्धरात्रएवरोहि णीयोगस्यप्राशस्त्यात्मुहूर्तमषिलभ्यतेत्यादीनांचार्धरात्रयोगेप्युपपत्तेर्नजयं तीव्रतंभिन्नम् । तत्त्वंतुहेमाद्रिमतेपिजयंतीव्रतंभिन्नमेव । उदयेचाष्टमीत्यस्य तेजयंतीपरत्वोक्तेः । किंच । रोहिण्यामर्धरात्रेचयदाकृष्णाष्टमीभवेत् ॥ तस्यामभ्यर्चनंशौरेर्हतिपापंत्रिजन्मजमिति विष्णुधर्मोक्तेः । समायोगेतु रोहिण्यांनिशीथेराजसत्तम ॥ समजायतगोविंदोबालरूपीचतुर्भुजः ॥ तस्मा त्तंपूजयेत्तत्रयथावित्तानुरूपतइति ॥ वह्निपुराणाच्चार्द्धरात्रस्यकर्मकालत्वम वसीयते । अतःकर्मणोयस्ययः कालइत्यादिवचनात्पूर्वत्रैवप्राप्तेः । परदिने सतोहिणीयोगस्यनप्रयोजकत्वं । अन्यथाबुधवारादेरपितत्त्वापत्तेः। किंच। जयंतीशब्दोरात्रिविशेषवचनः । अभिजिन्नामनक्षत्रंजयंतीनामशर्वरी ॥

मुहूर्तोविजयोनामयत्रजातोजनार्दनइति । ब्रह्मांडपुराणात् । तेनतद्योगिरो हिण्यांगौणत्वान्नव्रतभेदः । यत्तुवासरेवानिशायांवेतिततत्कैमुतिकन्यायेननि शीथयोगस्यैव स्तुत्यर्थपूर्वदिनेर्धरात्रयोगाभावेप्राशस्त्यार्थं । यद्यपि । दि वावायदिवारात्रौनास्तिचेद्रोहिणीकला ॥ रात्रियुक्तांप्रकुर्वीतविशेर्णेदुसंयु तामित्यनेनरोहिणीयोगाभावेर्धरात्रव्याप्तेर्ग्राह्यतोक्ता । तथापियस्मिन्वर्षे जयंतीयोगोनास्तितत्रजयंतीव्रतलोपेप्राप्ते अष्टमीमात्रेपिजयंतीव्रतंकार्यइत्ये वंपरमितितदाशयः अत्रहिसत्रायापूर्वविश्वजितायजेत । एषामसंभवेकुर्यादि ष्टिंवैश्वानरींद्विजइतिवद्रोहिणीयोगाभावेविधानात्तत्कार्यापत्तिःस्यात् ॥ अतएवोक्तम् । जयंतीनामशर्वरीति । यच्च स्कांदे उदयेचाष्टमीकिंचिन्नवमी सकलायदि॥भवतेबुधसंयुक्ताप्राजापत्यर्क्षसंयुता ॥ अपिवर्षशतेनापिलभ्यते वाथवानवेति यच्चपाद्मे प्रेतयोनिगतानांतुप्रेतत्वंनाशितंतुतैः । यैःकृताश्राव णेमासिअष्टमीरोहिणीयुता ॥ किंपुनर्बुधवारेणसोमेनापिविशेषतः॥किंपुनर्न वमीयुक्ताकुलकोट्यास्तुमुक्तिदेति ॥ तद्दानादिविषयम्॥ उपवासाश्रवणादि त्यनंतभट्टः । जयंतीपरमितिहेमाद्रिः । उदयेचंद्रोदयइतिकेचित् । तन्न । चंद्रो दयसत्त्वसंदेहान्नवमीसकलेत्ययोगान्मानाभावाच्च । तेनपूर्वेद्युःसप्तमीवेधेप रदिनेसूर्योदयेघटिकापिग्राह्या।पूर्वविद्धाष्टमीतिपाद्मोक्तेः । इतियुक्तं । अतो नव्रतभेदोनाप्यंतर्भावइत्यूचिवान् । गौडास्तु । नवमीक्षयपरमिदंवचनं । नव मीसकलायदीतिविशिष्योक्तेः । एतत्पूर्वदिनेजयंत्यभावपरमित्याहुः जयंत्या दिसर्वोपवादोयमितिचूडामण्यादयःवयंतुसत्यंव्रतभेदः।लोकास्तुजन्माष्टमीमे वानुतिष्ठंति ॥नहिश्रावणेवानभस्येवारोहिणीसहिताष्टमीयदाकृष्णानरैर्लब्धा साजयंतीतिकीर्तिता॥ श्रावणेनभवेद्योगोनभस्येतुभवेद्ध्रुवमितिमाधवीये व सिष्ठसंहितोक्तावपिभाद्रेजयंतीनापिक्रियते।अतःपूर्वेद्युरेवोपवासः। यद्वागुणा त्फलं॥सप्तमेवर्षेब्रह्मवर्चसकाममुपनयेदितिवदित्यन्ये । तन्न।नित्यत्वानुपपत्तेः अत्रगौणमुख्यचांद्राभ्यामेकएवमासइत्यन्ये । तन्न । एकवाक्येउभयनिर्देशेवा शब्दद्वयायोगात्॥ अतोजयंतीव्रतस्यापिनित्यत्वादुपवासद्वयंकार्यमितिब्रूमः

अतएवहेमाद्रिमदनरत्नादौजन्माष्टमीव्रतंजयंतीव्रतंचभिन्नमुक्तम् । भिन्नकालत्वात्सर्वथातावदंतर्भावोनेतिसिद्धम् ॥ यद्यपिपूर्वापरावाल्पापिरोहिणीयुतैवकार्येतिग्रंथानांतत्त्वंप्रतीयतेतदपिजयंतीपरमेव । इदंचकाम्यमेवेत्यनंतभट्टः तद्दूषणंहेमाद्रौज्ञेयंनित्यंकाम्यमितितुबहवःननुयथाविष्णुशृङ्खलयोगेनश्रवणद्वादशीवामनजयंत्यादिसर्वसिद्धिर्यथाचैकादशीस्वल्पापिपरातथा ॥ कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः ॥ नवभ्यांसैवग्राह्यास्यात्सप्तमीसंयुतानहि ॥ इत्यादिवचनादर्धोदयादिवद्योगाधिक्येफलाधिक्यात्परैवजन्माष्टमीयुक्तेतिचेत् ॥ वार्तामात्थ नहितत्रव्रतभेदोद्वायोर्नित्यत्वंद्वयोरकरणेदोषोवाश्रुतः । इहत्वेतैस्त्रिभिर्हेतुभिः संज्ञाभेदाद्धर्मभेदात्कालभेदाच्चोपवासभेदःस्पष्टएव । एकदैवतत्त्वाच्छ्रवणद्वादशीवन्नपारणालोपदोषोपि ॥ तेनव्रतद्वयमेवयुक्तम् ॥ द्वयोरपिनित्यत्वात् केचित्तु । त्रेतायांद्वापरेचैवराजन्कृतयुगे तथा ॥ रोहिणीसहिताचेयंविद्धद्भिःसमुपोषिता ॥ अतःपरंमहीपालसंप्राप्तेतामसेकलौ॥जन्मनावासुदेवस्यभविताव्रतमुत्तममितिहेमाद्रौवह्निपुराणात् ॥ कलौजन्माष्टमीव्रतमेवनजयंतीव्रतमित्याहुः । तन्न । तामसेकलावित्युक्तेःपरमश्रेयोहेतोरस्यकलौपापिनांदुर्लभत्वमुच्यते ॥ तेनकलौतामसानकरिष्यंति । किंतुधन्याएवेत्यर्थः । अन्यथाशूद्राश्चब्राह्मणाचाराभविष्यंतियुगेकलौइत्यादौविधिकल्पनापत्तेःअत्रनिशीथवेधएवग्राह्यः । पूर्वोक्तवचनेषुतस्यैवमुख्यकालत्वोक्तेः । अष्टमीशिवरात्रिश्चह्यर्धरात्रादधोयदि ॥ दृश्यतेघटिकायासापूर्वविद्धाप्रकीर्तितेति । माधवीयेपुराणांतरात् । अर्धरात्रेतुरोहिण्यांयदाकृष्णाष्टमीभवेत् ॥ तस्यामभ्यर्चनंशौरेर्हतिपापांत्रिजन्मजामितिभविष्योक्तेःअष्टमीरोहिणीयुक्तानिश्यर्धेदृश्यतेयदि ॥ मुख्यकालइतिख्यातस्तत्रजातोहरिःस्वयमिति ॥ वसिष्ठसंहितोक्तेश्च । तत्राष्टमीद्वेधारोहिणीरहितातद्युताच । आद्यापिचतुर्धा । पूर्वेद्युरेवनिशीथयोगिनीपरेद्युरेवोभयेद्युरनुभयेद्युश्चेति । तत्राद्ययोरसंदेहएवकर्मकालव्याप्तेः । जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच ॥ पूर्वविद्धैवकर्त्तव्यातिथिभांतेचपारणमितिभृगूक्तेश्च । अस्मात्केवलरो

हिण्युपवासोपिसिद्धः । अंत्ययोःपरैव । प्रातःसंकल्पकालव्याप्तेराधिक्यात् । वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमीतिब्रह्मवैवर्ताच्च । एवमंशतःसमव्याप्तावपिविषमव्याप्तौत्वाधिक्येनिर्णयः । रोहिणीयुतापिचतुर्धा । पूर्वेद्युरेवनिशीथे रोहिणीयुतापरेच्चरेवोभयेच्चरनुभयेच्चश्च । अत्राप्याद्ययोरसंदेहःकार्याविद्धापि सप्तम्यारोहिणीसहिताष्टमीतिपाद्मोक्तेः । जयंत्यांपूर्वविद्धायामुपवासंसमाचरेदितिगारुडाच्य । सप्तमीसहिताष्टम्यांनिशीथेरोहिणीयदि ॥ भवितासाष्टमीपुण्यायावच्चंद्रदिवाकराविवितह्निपुराणाच्च ॥ द्वितीयेत्वसंदेहएवतृतीयपक्षेपरैव । वर्जनीयाप्रयत्नेनसप्तमीसंयुताष्टमी ॥ सऋक्षापिनकर्तव्यासप्तमीसंयुताष्टमीतिब्रह्मवैवर्तात् । चतुर्थ्यपित्रेधा । पूर्वेच्चर्निशीथेष्टमीपरेह्निरोहिणीपरेह्नयष्टमीपूर्वेह्निरोहिणी ॥ उभयेद्युरुभयस्यनिशीथसंबंधोवेति । आद्येपरेद्युर्जयंतीयोगस्यसत्त्वात्परैवेतिमाधवः । तदुक्तंतेनैव यस्मिन्वर्षेजयंत्याख्ययोगोजन्माष्टमीतदा ॥ अंतर्भूताजयंत्यांस्याद्दक्षयोगप्रशस्तितइति ॥ पूर्वविद्धाष्टमीयातुउदयेनवमीदिनेमुहूर्तमपिसंयुक्तासंपूर्णासाष्टमीभवेत् ॥ कलाकाष्ठामुहूर्तापियदाकृष्णाष्टमीतिथिः ॥ नवम्यांसैवग्राह्यास्यात्सप्तमीसंयुतानहीतिपाद्मोक्तेश्च । हेमाद्रिस्त्वाह । अष्टम्याःप्राधान्यात्तस्याश्चपूर्वेद्यःकर्मकालव्यापित्वात्पूर्वैव । पाद्मंतु पूर्वेह्निनिशीथेष्टम्याभावेज्ञेयम् । अंतर्भावोक्तिस्तुमूर्खदंभ्रहणमात्रमिति । अन्येतुपूर्वविद्धाष्टमीवाक्येनजन्माष्टम्यांसूर्योदयेसप्तमीवेधनिषेधात् । कलाघटीमात्राप्यौदयिकीग्राह्या । कार्याविद्धापिसप्तम्येतिजयंतीपरम् । जयंत्यांपूर्वाविद्धायामुपवासंसमाचरेदित्येकवाक्यत्वात् । तत्रापिद्वयोर्नित्यत्वात्कालभेदाच्चोपवासद्वयंभवत्येव यदातुकेवलाष्टामीशुद्धाधिका तदात्यागहेतोःसप्तमीवेधस्याभावात्पूर्वैव । यदिवाविद्धन्यूनातदापरदिनेग्राह्यातिथेरभावात्पूर्वैव । एवंसर्वाण्यौदयिकवाक्यानिसप्तमीवेधपराणि । जन्माष्टमींपूर्वविद्धांसऋक्षांसकलामपि ॥ विहायनवमींशुद्धामुपोष्यव्रतमाचरेदितिव्यासोक्तेर्विद्धायाःक्षयेशुद्धनवम्यामुपवासः । दशमीवेधेद्वादश्युपवासवदित्याहुः । तेनिर्मूलत्वादुपेक्ष्याः । मुहूर्तमपिसंयुतेतिरोहिणी

योगेत्याज्यत्वोक्तेः । तिथ्यंतपारणवाक्यानांनिर्विषयत्वापत्तेः । नचजयंतीपराणिशुद्धाधिकापराणिवातानि । भृग्वाद्यैःपूर्वविद्धाष्टम्यामपितिथ्यंतेपारणोक्तेः तेनकलाकाष्ठेतिवाक्यांतरवशाज्जयंतीपरमेतत् ।तत्त्वंतुअष्टम्याःकर्मकालव्याप्तेः । दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला॥ रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुतामिति ॥ पूर्वोक्तवाक्येरोहिणीयोगाभावेग्राह्यत्वोक्तेर्वचनात् कर्मकालव्यापिनींत्यक्त्वा पूर्वापरावाल्पापि रोहिणीयुताग्राह्या । माधवमदनरत्ननिर्णयामृतानंतभट्टगौडमैथिलग्रंथादिष्वप्येवमिति । युक्तंतुउपवासद्वयंकार्यम्।द्वयोर्नित्यत्वादितितुवयम् ।'अंत्ययोःपरैवासप्तमीसंयुताष्टम्यांभूत्वाऋक्षंद्विजोत्तम ॥ प्राजापत्यंद्वितीयेह्नि मुहूर्तार्द्धंभवेद्यदि ॥ तदाष्टयामिकंपुण्यं प्रोक्तंव्यासादिभिःपुरेतिस्कांदात् मुहूर्तेनापिसंयुक्तासंपूर्णासाष्टमीभवेत् ॥ ॥ किंपुनर्नवमीयुक्ताकुलकोट्यास्तुमुक्तिदेतिपाद्माच्चेतिदिक् ॥ निंबादित्योपासकास्तुजन्माष्टमीरामनवमी । शिवरात्र्यादौपूर्वेद्युःकर्मकालीनांतिथिंत्यक्त्वात्रिद्विमुहूर्तापरैवतिथिर्ग्राह्या । उदयव्यापिनीग्राह्याकुलेतिथिरुपोषणेनिंबार्कोभगवान्येषांवांछितार्थफलप्रदइति । हेमाद्रौमात्स्योक्तमुक्तिसप्तमीव्रतेभविष्योक्तेरित्याहुः । तन्न । यदिद्वितीयेदिवसेतुऋक्षतिथ्योर्युतिःस्यात्नतदोपवासः । पूर्वेप्रकुर्याद्दिवसेद्वितीयेदिनेशभक्तोथ तदाव्रताद्यमितिमात्स्यवाक्येनतत्रैवउपसंहारात्सर्वार्थत्वेनमानाभावात् । ऋक्षतिथ्योर्हस्तसप्तम्योःअन्यथाऋषिपंचम्यादौतदापत्तिः।शिष्टाचाराच्चेतिचेत् । नतस्यन्यायवचोविरोधेनहेयत्वात् इदानींकापिनिंबार्कोपासनाभावाच्चेतिसंक्षेपः॥ पारणंतु तिथिरष्टगुणंहंतिनक्षत्रंचचतुर्गुणं तस्मात्प्रयत्नतःकुर्यात्तिथिभांतेचपारणमितिब्रह्मवैवर्तात्। तिथ्यर्क्षयोर्यदाच्छेदोनक्षत्रांतमथापिवा॥अर्धरात्रेथवाकुर्यात्पारणंत्वपरेहनीति ॥ हेमाद्रौवचनाच्चार्धरात्रेप्युभयांतेन्यतरांतेवेतिमुख्यःपक्षः। सर्वेष्वेवोपवासेषुदिवापारणामिष्यतइतिब्रह्मवैवर्तेत्वन्यविषयं दिनेमुख्यकालालाभेन्यतरांतेवाज्ञेयम् गौडास्तु नरात्रौपारणंकुर्याद्दतेवैरोहिणीव्रतात् ॥ तत्रनिश्यपितत्कुर्याद्भंजयित्वामहानिशामिति ॥ ब्रह्मांडपुराणाद्रात्रौसार्धप्र

हरमध्येकार्यमित्याहुः । महानिशातुविज्ञेयामध्यमंमध्ययामयोः । तथा मध्य मप्रहरेरात्रेविज्ञेयातुमहानिशेतिस्मृत्यंतरात् । कल्पतरौमदनरत्नेचैवम् **काम धेनौगर्गस्तु** महानिशातुविज्ञेया मध्यमंप्रहरद्वयमित्याह **वृद्धशातातपस्तु** महानिशाद्वेघटिकेरात्रौमध्यमयामयोरित्याह । वेदपाठपरमेतदित्यन्ये । म हानिशायामन्यतरांतेतृतीयदिनेपारणम् । अपरेह्नीतिपारणोत्तरादिनपरत्वा त् । उभयांतापेक्षणादित्याहुः । तत्त्वंतुमहानिशातोर्वागन्यतरांतलाभेमहा निशानिषेधः । महानिशायामेवलाभेतत्रैवपारणामिति ॥ **दिवोदासस्तु** रजनिप्रहरंयावत्प्रवृत्तिःकर्मणोमता ॥ पारणंतावदेवेष्टंप्रसादान्नभवेद्यदीति स्कांदादूर्ध्वंनिषेधमाह तन्निर्मूलम् **अशक्तौतुवह्निपुराणे** भांतेकुर्यात्तिथेर्वा पिशस्तंभारतपारणमिति **गारुडेविष्णुधर्मेच** जयंत्यांपूर्वविद्धायामुपवासं समाचरेत् ॥ तिथ्यंतेवोत्सवांतेवा व्रतीकुर्वीतपारणम् **अशक्तौतु** तिथ्यंते तिथिभांतेवापारणंयत्रचोदितं ॥ यामद्वयोर्ध्वगामिन्याप्रातरेवहिपारणा ॥ सएवोत्सवांतइति।कालादर्शोक्तेश्चेतिसंक्षेपः **अष्टम्यांविशेषोहेमाद्रौभविष्ये** ततोष्टम्यांतिलैःस्नातोनद्यादौविमलेजले॥सुदेशेशोभनंकुर्याद्देवक्याःसूतिका गृहम् ॥ तन्मध्येप्रतिमास्थाप्यासाचाप्यष्टविधास्मृता ॥ कांचनीराजतीता म्रीपैत्तलीमृन्मयीतथा ॥ वार्क्षीमणिमयीचैववर्णकैर्लिखिताथवा ॥ सर्वलक्ष णसंपूर्णापर्यंकेचपटावृते ॥ देवकीतत्रचैकस्मिन्प्रदेशेसूतिकागृहे ॥ प्रस्तु तांचप्रसूतांचस्थापयेन्मंचकोपरि॥मांतत्रबालकंसुप्तंपर्यंकेस्तनपायिनम् ॥ य शोदांतत्रचैकस्मिन्प्रदेशेसूतिकागृहे ॥ तद्वच्चकल्पयेत्पार्थप्रसूतवरकन्य काम् ॥ कश्यपोवसुदेवोयमदितिश्चैवदेवकी ॥ शेषोवैबलभद्रोयंयशोदाक्षि तिरन्वभूत् ॥ नंदःप्रजापतिर्दक्षोगर्गश्चापिचतुर्मुखः॥गौर्धेनुःकुंजरश्चैवदान वाःशस्त्रपाणयः ॥ लेखनीयाश्चतत्रैवकालियोयमुनाह्रदे ॥ इत्येवमादिय त्किंचिच्छक्यतेचरितंमम ॥ लेखयित्वाप्रयत्नेनपूजयेद्भक्तितत्परः ॥ मं त्रेणानेनकौंतेयदेवकींपूजयेन्नरः ॥ गायद्भिःकिन्नराद्यैःसततपरिवृतावेणुवी णानिनादैःशृङ्गारादर्शकुंभप्रवरकृतकरैःकिंकरैःसेव्यमाना ॥ पर्यंकेस्वास्तृते

यामुदिततरमुखीपुत्रिणीसम्यगास्तेसादेवीदेवमाताजयतिसुतनयादेवकीका तरूपा॥पादौसंवाहयंतीश्रीर्देवक्याश्चरणांतिके ॥ निषण्णापंकजेपूज्यानमोदेव्यैश्रियेइति अर्धरात्रेवसोर्धारांपातयेद्गुडसर्पिषा॥नाडीवर्धापनंषष्ठीनामादेः करणंमम ॥ ततोमंत्रेणवैदद्याच्चंद्रायार्घ्यंसमाहितः ॥ शंखेतोयंसमादायसपुष्पकुशचंदनं ॥ जानुभ्यांधरणींगत्वाचंद्रायार्घ्यंनिवेदयेत् । क्षीरोदार्णवसंभूतअत्रिगोत्रसमुद्भव ॥ गृहाणार्घ्यंशशांकेदंरोहिण्यासहितोमम ॥ ज्योत्स्नापते नमस्तुभ्यंनमस्तेज्योतिषांपते ॥ नमस्तेरोहिणीकांतअर्घ्यंनःप्रतिगृह्यताम् ॥ यथापुत्रंहरिंलब्ध्वाप्राप्ततेनिर्वृतिःपरा ॥ तामेवनिर्वृतिंदेहिसुपुत्रंदर्शयस्वमे॥ इतिदेवक्यर्घः ॥ ततःपुष्पांजलिंदत्वायामेयामेप्रपूजयेत् ॥ प्रभातेब्राह्मणान् शक्त्याभोजयेद्भक्तिमान्नरः ॥ ओंनमोवासुदेवायगोब्राह्मणहितायच॥शांतिरस्तुशिवंचास्तुइत्युक्त्वामांविसर्जयेत्॥ इदंप्रतिमासकृष्णाष्टम्यामप्युक्तंमदनरत्नेवह्निपुराणेप्रतिमासंचतेपूजामष्टम्यांयःकरिष्यति॥ ममचैवाखिलान्कामान्ससंप्राप्स्यत्यसंशयम् तथा अनेनविधिनायस्तुप्रतिमासंनरेश्वरः ॥ करोतिवत्सरंपूर्णयावदागमनंहरेः ॥ दद्याच्छय्यांसुसंपूर्णांगोभीरत्नैरलंकृताम् ॥ इतिजन्माष्टमीव्रतम्॥ भाद्रामावास्यायांकुशग्रहणमुक्तंहेमाद्रौहारीते मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः॥अयातयामास्तेदर्भाविनियोज्याःपुनः पुनः ॥ नभःश्रावणःतेनदर्शीतमासेजन्माष्टम्यानंतरंदर्शोलभ्यते मदनरत्ने तु मासेनभस्येमावास्यातस्यांदर्भोच्चयोमतइतिमरीचिवाक्यमुक्तम् । नभस्योभाद्रपदः। तेनमहालयांतर्गतदर्शोलभ्यते। अत्रगौणमुख्यचांद्राभ्यामेक एवदर्शइत्यन्ये। भाद्रपदशुक्लतृतीयायांहरितालिकाव्रतं तत्रपराग्राह्या॥मुहूर्तमात्रसत्त्वेपिदिनेगौरीव्रतंपरे॥शुद्धाधिकायामप्येवंगणयोगप्रशंसनादिति माधवोक्तेः चतुर्थीयुक्तायांफलाधिक्यंमाधवीयेआपस्तंबः चतुर्थीसहितायातुसातृतीयाफलप्रदा ॥ अवैधव्यकरास्त्रीणांपुत्रपौत्रप्रवर्धिनी द्वितीया योगेप्रत्यवायमाहसएव द्वितीयाशेषसंयुक्तांयाकरोतिविमोहिता॥सावैधव्यमवाप्नोतिप्रवदंतिमनीषिणइति ॥ आद्यामधुश्रावणिकाकज्जलीहरितालिका

चतुर्थीमिश्रितास्त्रीभिर्दिवानक्तेविधीयते ॥ तृतीयानभसःशुक्लामधुश्रावणिकास्मृता ॥ भाद्रस्यकज्जलीकृष्णाशुक्लाचहरितालिकेति ॥ दिवोदासोदाहृतवचनाच्च ॥ भाद्रशुक्लचतुर्थीवरदचतुर्थी ॥ सामध्याह्नव्यापिनीग्राह्या । प्रातःशुक्लतिलैःस्नात्वामध्याह्नेपूजयेन्नृपेति ॥ हेमाद्रौभविष्ये । तत्रैवपूजोक्तेःमदनरत्नेप्येवम् । परदिनेएवांशेनसाकल्येनवामध्याह्नव्याप्त्यभावे सर्वपक्षेषुपूर्वाग्राह्या । तथाचबृहस्पतिः।चतुर्थीगणनाथस्यमातृविद्धाप्रशस्यते॥ मध्याह्नव्यापिनीचेत्स्यात्परतश्चेत्परेहनीति ॥ मातृविद्धाप्रशस्तास्याच्च तुर्थीगणनायके ॥ मध्याह्नेपरतश्चेत्स्यान्नागविद्धाप्रशस्यतइतिमाधवीयेस्मृत्यंतराच्च । तत्रगणेशरूपंस्कांदे । एकदंतंशूर्पकर्णीनागयज्ञोपवीतिनम् ॥ पाशांकुशधरंदेवंध्यायेत्सिद्धिविनायकमिति ॥ इयंरविभौमयोरतिप्रशस्ता । भाद्रशुक्लचतुर्थीयाभौमेनार्केणवायुता ॥ महतीसात्रविघ्नेशमर्चित्वेष्टंलभेन्नरइति ॥ निर्णयामृतेवाराहोक्तेः । अत्रचंद्रदर्शनंनिषिद्धम् । तथाचापरार्केमार्कंडेयः ॥ सिंहादित्येशुक्लपक्षेचतुर्थ्यांचंद्रदर्शनम् ॥ मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदेति ॥ चतुर्थ्यांनपश्येदित्यन्वयः । प्रधानक्रियान्यलाभात् । तेनचतुर्थ्यामुदितस्यपंचम्यांननिषेधः । गौडाअप्येवमाहुःपराशरोपि ॥ कन्यादित्येचतुर्थ्यांतुशुक्लेचंद्रस्यदर्शनम् ॥ मिथ्याभिदूषणंकुर्यात्तस्मात्पश्येन्नतंसदा ॥ तद्दोषशांतयेसिंहःप्रसेनमितिवैपठेदिति श्लोकस्तु विष्णुपुराणे सिंहःप्रसेनमवधीत्सिंहोजाम्बवताहतः ॥ सुकुमारकमारोदीस्तवैह्येषःस्यमंतकइति भाद्रपदशुक्लपंचमीऋषिपंचमी । सामध्याह्नव्यापिनीग्राह्या । पूजाव्रतेषुसर्वेषुमध्याह्नव्यापिनीतिथिरिति । माधवीयेहारीतोक्तेः । दिनद्वयेतत्वेहेमाद्रिमतेपरा।सितापरयुतास्यात्पंचमीतिदीपिकोक्तेःमाधवमतेपूर्वा । सर्वत्रपंचमीपूर्वेत्युक्तेः । युग्मवाक्यान्निर्णयस्तुयुक्तः । ऋषिपंचमीषष्ठीयुतैवेतिदिवोदासः । अत्रऋषीन्प्रतिमासुपूजयित्वाऽकृष्टभूमिजशाकेनवर्तनम् एवंसप्तवर्षाणिकृत्वासप्तकुंभेषुप्रतिमासुसंपूज्या । परेह्नितत्तन्मंत्रेणाष्टोत्तरशतंतिलान्हुत्वासप्तब्राह्मणान्भोजयेदितिनिर्णयामृते । भाद्रशुक्लषष्ठीसूर्य

षष्ठीसप्तमीयुतैवेतिदिवोदासः । शुक्लभाद्रपदेषष्ठ्यांस्नानंभास्करपूजनम्॥प्राश नंपंचगव्यस्यअश्वमेधफलाधिकमितिवचनात् कल्पतरौभविष्ये येयंभाद्रप देमासिषष्ठीस्याद्भरतर्षभ ॥ योस्यांपश्यतिगांगेयंदक्षिणापथवासिनम् ॥ ब्रह्म हत्यादिपापैस्तुमुच्यतेनात्रसंशयः॥ गांगेयः स्वामिकार्तिकेयः । भाद्रपदशुक्ल सप्तम्याममुक्ताभरणव्रतम् ॥ तत्रसप्तमीपूर्वयुताग्राह्या । षण्मुन्योरितियुग्मवा क्यात् । भाद्रपदशुक्लाष्टमीदूर्वाष्टमीसापूर्वाग्राह्या श्रावणीदुर्गनवमीदूर्वाचैव हुताशनी ॥ पूर्वविद्धातुकर्तव्याशिवरात्रिर्बलेर्दिनमितिहेमाद्रौवृहद्यमोक्तेः शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत् ॥ दूर्वाष्टमीतुसाज्ञेयानोत्तरासाविधी यतइति ॥ पुराणासमुच्चयाच्च यत्तु मुहूर्तैरौहिणेष्टम्यांपूर्वावायदिवापरा ॥ दूर्वाष्टमीतुसाकार्याज्येष्ठामूलंचवर्जयेदिति ॥ तत्रैवपराकार्येत्युक्तम् । तत्पूर्व दिनेज्येष्ठादियोगेद्रष्टव्यम् । दूर्वाष्टमीसदात्याज्याज्येष्ठामूलर्क्षसंयुता तथा ऐंद्रर्क्षेपूजितादूर्वाहंत्यपत्यानिनान्यथा ॥ भर्तुरायुर्हरामूलेतस्मात्तांपरिवर्जये दिति ॥ तत्रैवतन्निषेधात् । इदमगस्त्योदयेकन्यार्केचनकार्यम् । शुक्लेभा द्रपदेमासिदूर्वासंज्ञातथाष्टमी ॥ सिंहार्केएवकर्तव्यानकन्यार्केकदाचन ॥ सिंहस्थेसोत्तमासूर्येनुदितेमुनिसत्तमइति ॥ मदनरत्नेस्कांदोक्तेः ॥ अग स्त्येउदितेतातपूजयेदमृतोद्भवम् ॥ वैधव्यंपुत्रशोकंचदशवर्षाणिपंचचेति ॥ तत्रैवदोषोक्तेश्च । भाद्रपदशुक्लाष्टम्यामगस्त्योदयेभाविनिसतिपूर्वकृष्णाष्ट म्यामेवकुर्यादितिहेमाद्रिः । दीपिकाप्येवम् । इदंचव्रतंस्त्रीणांनित्यम् । या नपूजयतेदूर्वांमोहादिहयथाविधि ॥ त्रीणिजन्मानिवैधव्यंलभतेनात्रसंशयः ॥ तस्मात्संपूजनीयासाप्रतिवर्षवधूजनैरिति ॥ पुराणसमुच्चयात् । यदाज्ये ष्ठादिकंविनाष्टमीनलभ्यतेतदातत्रैवोक्तम् कर्तव्याचैकभक्तेनज्येष्ठामूलंयदा भवेत् ॥ दूर्वामभ्यर्च्ययेद्भक्त्यानवंध्यंदिवसंनयेदिति । अत्रविधिर्मदनरत्ने भविष्ये शुचौदेशेप्रजातायांदूर्वायांब्राह्मणोत्तम ॥ स्थाप्यलिंगंततोगंधैःपुष्पैर्धू पैःसमर्चयेत् ॥ दध्यक्षतैर्द्विजश्रेष्ठअर्घ्यंदद्याद्विलोचने ॥ दूर्वाशमीभ्यांवि धिवत्पूजयेच्छ्रद्धयान्वितः ॥ मंत्रस्तु त्वंदूर्वमृतजन्मासिवंदितासिसुरासुरैः॥

सौभाग्यंसंततिंदेहिसर्वकार्यकरीभव ॥ यथाशाखाप्रशाखाभिर्विस्तृतासिम हीतले ॥ तथाममापिसंतानंदेहित्वमजरामरमिति ॥ अत्रानग्निपक्वंभक्षयेत् अनग्निपक्वमश्नीयादन्नंदधिफलंतथा ॥ अक्षारलवणंब्रह्मन्नश्नीयान्मधुनान्वि तमितितत्रैवभविष्योक्तेः **भाद्रपदेधिमासेसतिनिर्णयदीपेस्कांदे** अधिमा सेतुसंप्राप्तेनभस्यउदयेमुनेः ॥ अर्वाग्दूर्वाव्रतंकार्यपरतोनैवकुत्रचित् अत्रैव ज्येष्ठर्क्षपूजोक्तामाधवीयेस्कांदे ॥ मासिभाद्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुता ॥ रा त्रिर्यस्मिन्दिनेकुर्याज्ज्येष्ठायाःपरिपूजनमिति ॥ इयंज्येष्ठायोगवशेनपूर्वापरा वाग्राह्या । दिनद्वययोगेपरा । पूर्वेह्निरात्रियोगेपूर्वैव । नवम्यासहकार्यास्या दष्टमीनात्रसंशयः ॥ मासिभाद्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुता ॥ रात्रिर्यस्मिन् दिनेकुर्याज्ज्येष्ठायाःपरिपूजनमितितत्रैवोक्तेः । अस्यापवादः । यस्मिन्दिने भवेज्ज्येष्ठामध्याह्नादूर्ध्वमप्यणुः ॥ तस्मिन्हविष्यंपूजाचन्यूनाचेत्पूर्ववासरइ ति ॥ इदंकेवलतिथौनक्षत्रेचोक्तम् । तत्राद्यंकेवलतिथौकार्यम् । अंत्यंकेव लर्क्षे । **तदुक्तंमात्स्ये** प्रत्याब्दिकंतिथावुक्तंयज्ज्येष्ठादैवतंव्रतम् ॥ प्रतिज्ये ष्ठाव्रतंयच्च विहितंकेवलोडुनि ॥ तिथावेवाचरेदाद्यंद्वितीयंकेवलर्क्षतइति ॥ अतएवमदनरत्नेभविष्येनक्षत्रमात्रेउक्तम् मासिभाद्रपदेपक्षेशुक्लेज्येष्ठायदा भवेत् । रात्रौजागरणंकृत्वाएभिर्मंत्रैश्चपूजयेदिति ॥ दाक्षिणात्यास्त्वृक्ष एवकुर्वंति **हेमाद्रौस्कांदेपि** मासिभाद्रपदेशुक्लपक्षेज्येष्ठर्क्षसंयुते ॥ यस्मि न्कस्मिन्दिनेकुर्याज्ज्येष्ठायाः परिपूजनमिति **तथा** मैत्रेणावाहयेद्देवींज्येष्ठा यांतुप्रपूजयेत् ॥ मूलेविसर्जयेद्देवींत्रिदिनंव्रतमुत्तममिति **मंत्रस्तु** एह्येहि त्वंमहाभागेसुरासुरनमस्कृते ॥ ज्येष्ठेत्वंसर्वदेवानांमत्समीपगताभवेत्यावा ह्य । तामग्निवर्णामितिसंपूज्य । ज्येष्ठायैतेनमस्तुभ्यंश्रेष्ठायैतेनमोनमः ॥ शर्वायैतेनमस्तुभ्यंशांकर्यैतनमोनमः ॥ ज्येष्ठश्रेष्ठेतपोनिष्ठेब्रह्मिष्ठेसत्यवादि नि ॥ एह्येहित्वंमहाभागेअर्घ्यंगृह्णसरस्वति इत्यर्घःभाद्रपदशुक्लद्वादश्यांश्र वणयोगरहितायांपारणंकुर्यात् । आभाकासितपक्षेष्वितिदिवोदासोदाहृतव चनाच्च । उपोष्यैकादशींमोहात्पारणंश्रवणेयदि ॥ करोतिहंतितत्पुण्यंद्वा

दशद्वायशीभवमिति ॥ तत्रैवस्कांदाच्च अस्यतत्रैवप्रतिप्रसवः **मार्कंडेयः** विशेषेणमहीपालश्रणंवर्धतेयदि ॥ तिथिक्षयेनभोक्तव्यंद्वादशींलंघयेन्नहीति **केचित्तु** यदात्वपरिहार्योयोगस्तदाश्रवणनक्षत्रे त्रेधाविभक्तेमध्यमविंशति घटिकायोगंत्यक्त्वापारणंकार्यम् । **तदुक्तंविष्णुधर्मे** श्रुतेश्चमध्येपरिवर्तमेति सुप्तिप्रबोधपरिवर्तनेमववर्ज्यमिति केचिच्चतुर्धाविभज्यमध्यपादद्वयंवर्ज्यमा हुःअत्रमूलंचिंत्यम् । अत्रैवविष्णुपरिवर्तनोत्सवंकुर्यात् । संध्यायांविष्णुंसं पूज्यप्रार्थयेत् । मंत्रस्तुतिथितत्वेउक्तः ओंवासुदेवजगन्नाथप्राप्तेयंद्वादशीतव पार्श्वेनपरिवर्तस्वसुखंस्वपिहिमाधवेति ॥ अत्रैवशक्रध्वजोत्थापनमुक्तमपरा र्केगर्गेण । द्वादश्यांतुसितेपक्षेमासिप्रौष्ठपदेतथा ॥ शक्रमुत्थापयेद्राजाविश्वश्र वणवासवे ॥ इयमेवश्रवणद्वादशी । तत्रैकादश्यांद्वादशीश्रवणयोगेसैवोपो ष्या । एकादशीद्वादशीचवैष्णव्यमपितत्रचेत् ॥ तद्विष्णुशृङ्खलंनामवि ष्णुसायुज्यकृद्भवेदितिविष्णुधर्मोक्तेः **नारदीयेपि** संस्पृश्यैकादशींराजन् द्वादशींयदिसंस्पृशेत्श्रवणंज्योतिषांश्रेष्ठंब्रह्महत्यांव्यपोहति ॥ द्वादशीश्रवण स्पृष्टास्पृशेदेकादशींयदि ॥ सएववैष्णवोयोगोविष्णुशृङ्खलसंज्ञितः ॥ इति हेमाद्रौमात्स्योक्तेश्च । दिनद्वयेद्वादशीश्रवणयोगेपिपूर्वा । निर्णयामृतेत्वस्य पूर्वार्धमन्यथापठितम् । द्वादशीश्रवणर्क्षंचस्पृशेदेकादशीयदिति तेनहेमाद्रि मतेएकादश्याःश्रवणयोगाभावेपितद्युक्तद्वादशीयोगमात्रेणविष्णुशृङ्खलंभ वति **निर्णयामृतमतेतु** श्रवणस्यैकादशीद्वादशीभ्यांयोगएवविष्णुशृङ्ख लंनान्यथेति । यदानिशीथानंतरंसूर्योदयावधिद्विकलामात्रमपिश्रवणर्क्षंभव ति तदापिपूर्वैव । तदुक्तंतत्रैवनारदीये इमांप्रकृत्य तिथिनक्षत्रयोर्योगोयोग श्चैवनराधिप ॥ द्विकलोयदिलभ्येतसज्ञेयोह्यष्टयामिकइति । द्वादशीश्रवणस्पृ ष्टाकृत्स्नापुण्यतमातिथिः ॥ नतुसातेनसंयुक्तावत्येवप्रशस्यतइति ॥ मदन रत्नेमात्स्याच्च **दिवोदासीयेतु** रात्रेःप्रथमपादेचेच्छ्रवणंहरिवासरे ॥ तदापू र्वामुपवसेत्प्रातर्भीतेचपारणमित्युक्तम् । इदंतुनिर्मूलत्वात्पूर्वविरोधाच्चोपेक्ष्य म् । इयंबुधवारेतिप्रशस्ता । बुधश्रवणसंयुक्तासैवचेद्द्वादशीभवेत् ॥ अत्यंत

महतीसास्याद्दत्तंभवतिचाक्षयमिति हेमाद्रौरकांदात् । यानितुपठंति उत्तरा षाढसंयुक्ताश्रोणामध्याह्नगापिवा ॥ आसुरीसैवतारास्याद्यंतिपुण्यंपुराकृतम् ॥ उदयव्यापिनीग्राह्याश्रोणाद्वादशिकायुता॥ विश्वर्क्षसंयुतासाचनैवोपोष्याशुभे प्सुभिरित्यादीनिविष्णुधर्मस्कांदभविष्यादीनिवचनानि तानिनिर्मूलानि । य दपिरमृत्यर्थसारेउदयव्यापिनीग्राह्येत्युक्तम् । यत्तुबृहन्नारदीयेउदयव्यापिनी ग्राह्याश्रवणद्वादशीव्रतइति । तद्यदाशुद्धाधिकाद्वादशीपरदिनएवोदयेश्रवण योगःपूर्वेह्निचतद्भिन्नेकालयोगस्तत्परम् । दिनद्वये उदययोगेपूर्वैव **बहुक र्मकालव्याप्तेरित्युक्तंमदनरत्ने** यदात्वेकादश्येवश्रणयुतानद्वादशीतदा पिपूर्वैवायदानप्राप्यतेऋक्षंद्वादश्यांवैष्णवःक्वचित्एकादशीतदोपोष्यापापघ्नी श्रवणान्विततेतिमदनरत्नेनारदीयोक्तेःयदापरैवर्क्षयुतातदापरा । तत्रशक्तेनो पवासद्वयंकार्यम् । एकादशीमुपोष्यैवद्वादशींसमुपोषयेत् । नचात्रविधिलो पःस्यादुभयोर्दैवतंहरिरितिभविष्योक्तेः **यत्तुविष्णुधर्मे** पारणांतंव्रतंज्ञेयंव्र तांतेविप्रभोजनम् ॥ असमाप्तेव्रतेपूर्वेनैकुर्याद्व्रतांतरामितितदेतद्भिन्नपरम् **अत्रगौडाः** शृणुराजन्परंकाम्यंश्रवणद्वादशीव्रतमितिस्थूलशीर्षवचनात्का म्यमेवेदम् । तेनाशक्तस्यनित्यैकादशीव्रतमेवेतिमन्यंते । द्वादश्यामुपवा सेनशुद्धात्मानृपसर्वशः चक्रवर्तित्वमतुलंसंप्राप्नोत्युत्तमांश्रियमितिगौडनिबं धेमार्कंडेयोक्तेश्च **दाक्षिणात्यास्तु** एकादश्यांनरोभुक्त्वाद्वादश्यांसमुपोष णात् ॥ व्रतद्वयकृतंपुण्यंसर्वंप्राप्नोत्यसंशयमितिवराहवामनपुराणोक्तेः ॥ श्रवणद्वादशीव्रतमेवेत्याहुः । भुक्त्वेतिफलाद्याहारपरम् । नत्वन्नपरम् । अ न्नाश्रितानिपापानीतिनिषेधात् । उपवासद्वयंकर्तुनशक्नोतिनरोयदि ॥ प्रथ मेह्निफलाहारीनिराहारोपरेहनीति ॥ दिवोदासीयेभविष्योक्तेश्च **अशक्तौतु गृहीतैकादशीव्रतोयस्तंप्रत्युक्तंमात्स्ये** द्वादश्यांशुक्लपक्षेतुनक्षत्रंश्रवणंय दि ॥ उपोष्यैकादशींतत्रद्वादश्यांपूजयेद्धरिमिति ॥ पूजयेन्नतूपवसेदित्यर्थः। अगृहीतैकादशीव्रतश्चेदेकादश्यांभुक्त्वाद्वादश्यामुपवसेत् । एवमेकादशीं भुक्त्वाद्वादशींसमुपोषयेत्पूर्ववासरजंपुण्यंसर्वंप्राप्नोत्यसंशयमिति ॥ नारदी

योक्तेः । पारणंतूभयांतेन्यतरांतेवाकुर्यात् । तिथिनक्षत्रनियमेतिथिभांतेचपा रणमिति स्कांदात् । तिथिनक्षत्रसंयोगेउपवासोयदाभवेत् ॥ पारणंतुनक र्तव्यंयावन्नैकस्यसंक्षयइति ॥ नारदीयादितिहेमाद्रिः । यद्यप्यत्रनक्षत्रमा त्रांतेपिपारणंप्रतिभातितथापितिथिमात्रांतेज्ञेयम् । नत्वृक्षांते । तिथिमध्ये पि । याःकाश्चित्तिथयः प्रोक्ताः पुण्यानक्षत्रयोगतः ॥ ऋक्षांतेपारणंकुर्या द्विनाश्रवणरोहिणीमिति **विष्णुधर्मे** श्रवणांतमात्रेपारणनिषेधात् **रोहि ण्यांतु** भांतेकुर्यात्तिथेर्वापिइतिवह्निपुराणात् । तदंतेप्यस्तुनत्वत्रैवमस्तीति नऋक्षांतोअनुकल्पइतिमदनरत्ने । असंभवेतुतिथ्यंतेतिथिभांतेवापारणंय त्रचोदितम् । यामत्रयोर्ध्वगामिन्यांप्रातरेवहिपारणेतिज्ञेयम् **यत्तुमदन रत्ने** द्वादशीवृद्धौश्रवणवृद्धौवाश्रवणांतएवपारणंकुर्यात्पारणंतिथिवृद्धौतु द्वादश्यामुडुसंक्षयात् ॥ वृद्धौकुर्यात्त्रयोदश्यांतत्रदोषोनविद्यतइति ॥ व ह्निपुराणादित्युक्तम् । तत्प्रकरणादेतस्यामेवश्रवणयुक्तैकादश्यांविहितंवि जैयकादशीव्रतपरंनतुश्रवणद्वादशीपरमितिमदनरत्ने । गौडास्तुश्रवण द्वादशीपरमाहुः **अत्रविधिर्मदनरत्नेविष्णुधर्मे** तस्मिन्दिनेतथास्नानं यत्रकचनसंगमे **तथा** दध्योदनयुतंतस्यांजलपूर्णघटंद्विजे॥वस्त्रसंवेष्टितंदत्वा छत्रोपानहमेवच॥नदुर्गतिमवाप्नोतिगतिमय्याचविंदति **मंत्रस्तुभविष्ये** घटे जनार्दनपूजामभिधाय ॥ नमोनमस्तेगोविंदबुधश्रवणसंज्ञक ॥ अघौघसंक्ष यंकृत्वासर्वसौख्यप्रदोभव ॥ प्रीयतांदेवदेवेशोममसंशयनाशनः **वामनाव तारनिमित्तोपवासस्तुव्रतहेमाद्रौभविष्ये** द्वादश्यास्तेविधिःप्रोक्तः श्रव णेनयुधिष्ठिर ॥ सर्वपापप्रशमनःसर्वसौख्यप्रदायकः ॥ एकादशीयदासा स्याच्छ्रवणेनसमन्विता ॥ विजयासातिथिःप्रोक्ताभक्तानांविजयप्रदेत्युपक्र म्य । अथकालेबहुतिथेगतेसागुर्विणीभवेत् ॥ सुषुवेनवमेमासिपुत्रंसावामनं हरिमित्युक्त्वा । एतत्सर्वंसमभवदेकादश्यांयुधिष्ठिर ॥ तेनेष्टादेवदेवस्यसर्व थाविजयातिथिः ॥ एषाव्युष्टिःसमाख्याताएकादश्यांमयातव ॥ पूर्वमेवसमा ख्याताद्वादशीश्रवणान्वितेत्युपसंहारादेकादश्यामेव । व्युष्टिःफलं **भागव**

तेष्टमस्कंधेतुद्वादश्यांवामनोत्पत्तिरुक्ता श्रोणायांश्रवणद्वादश्यांमुहूर्तेभि जितिप्रभुः ॥ ग्रहनक्षत्रतारादयाश्चक्रुस्तज्जन्मदक्षिणम् ॥ द्वादश्यांसवितातिष्ठन्मध्यंदिनगतोनृप ॥ बिजयानामसाप्रोक्तायस्यांजन्मविदुर्हरेः श्रोणायांचंद्रे अभिजिच्छ्रवणप्रथमोंशःगौडाअप्येवम् । अत्रकल्पभेदाद्व्यवस्था तद्विधिश्चहेमाद्रौवह्निपुराणे नदीनांसंगमेस्नायादर्चयेदत्रवामनम् ॥ सौवर्णवस्त्रसंयुक्तंद्वादशांगुलमुच्छ्रितम् ॥ ततोविधिवत्संपूज्याहिरण्मयेनपात्रेणदद्यादर्घ्यंप्रयत्नतः ॥ नमस्तेपद्मनाभायनमस्तेजलशायिने ॥ तुभ्यमर्घ्यंप्रयच्छामिबालवामनरूपिणे ॥ नमःकमलकिंजल्कपीतनिर्मलवाससे ॥ महाहवारिपुस्कंधधृतस्कंधायचक्रिणे ॥ नमःशार्ङ्गसीरबाणपाणयेवामनायच ॥ यज्ञभुक्कुलदात्रेचवामनायनमोनमः ॥ देवेश्वरायदेवायदेवसंभूतिकारिणे ॥ प्रभवेसर्वदेवानांवामनायनमोनमः ॥ एवंसंपूजयित्वातंद्वादश्यामुदयेरवेः ॥ शृङ्गारसहितंतंतुब्राह्मणायनिवेदयेत् ॥ वामनःप्रतिगृह्णातिवामनोहंददामि ते ॥ वामनंसर्वतोभद्रंद्विजायप्रतिपादये ॥ इतिअनंतभट्टोप्याह । श्रवणद्वादश्यांजनार्दननामाविष्णुःपूज्यते । श्रवणैकादश्यांवामनावतारइति । श्रवणयुतशुक्लैकादश्यलाभेतुदशमीविद्धापिश्रवणयुताकार्या । दशम्यैकादशीयत्रसानोपोष्याभवेत्तिथिः । श्रवणेनतुसंयुक्तासाचेत्स्यात्सर्वकामदेति । वह्निपुराणादित्युक्तं मदनरत्ने । पूजाचमध्याह्निकार्या । अह्नोमध्येवामनोरामरामावितिपूर्वोक्तवचनात् । अत्रैवदुग्धव्रतंसंकल्पयेत्तदुक्तं । दुग्धमाश्वयुजेमासीति । अत्रेदंचिंत्यते । दुग्धव्रतेपायसादिवर्ज्यंनवेति । नेतिकेचित् । नहिप्रकृतिवर्जनेविकारवर्जनंयुक्तम् । दधिघृतादीनामपिवर्जनापत्तेः । नचयत्रप्रकृतिरसोपलंभस्तद्वर्जनमितिवाच्यम् । मांसविकारस्यौष्ट्रदध्यादेश्चावर्जनापत्तेः । तस्माद्दध्यादिकम्पायसादिभक्ष्यमिति । अत्रप्रब्रूमः यत्रविकारेप्रकृतिरसोपलंभस्तत्प्रत्यभिज्ञावातत्रविकारस्यापिनिषेधः । अस्तिचमांसविकारेमांसप्रत्यभिज्ञामांसत्वानपायात् । यत्तु । औष्ट्रदध्यादेरनिषेधापत्तिरिति । तन्न । औष्ट्रमितिविकारतद्धितेननिषेधात् तथाचविज्ञानेश्वरः औष्ट्रमेक

शफंस्त्रैणमारण्यकमधाविकमित्यत्र औष्ट्रमितिविकारतद्धिताच्छकृन्मूत्रादी नामपिनिषेधइत्याह । नन्वेवंसंधिन्यनिर्देशावत्सागोपयःपरिवर्जयेदितिसं धिन्यादिक्षीरनिषेधेपिदध्यादिग्रहणंस्यात् । सत्यंप्राप्तं । वचनेनपरंनिषेधः तदाहापरार्केशंखः क्षीराणियान्यभक्ष्याणितद्विकाराश्नेबुधः ॥ सप्तरात्रं व्रतंकुर्यात्प्रयत्नेनसमाहितइति ॥ व्रतंगोमूत्रयावकम् । तस्मात्पायसेदुग्ध रसोपलंभाद्वर्जनम् । अतएवामिक्षायांदधिसत्त्वेपिमाधुर्योपलंभात् । पयोरूप त्वमुक्तंमीमांसकैः तदुक्तं पयएवघनीभूतमामिक्षेत्यभिधीयतइति॥दध्यादि षु तुतदभावादवर्जनमिति । एवंदध्यादिव्रतेनतक्रादीनांनिषेधउक्तोभयहेत्वभा वादितिकेचित्।पूर्वोक्तशंखवचनात्सर्वविकारनिषेधइतियुक्तंप्रतीमःइतिदुग्ध व्रतम्॥**भाद्रपदशुक्लचतुर्दश्यामनंतव्रतम्।** तत्रत्रिमुहूर्ताप्यौदयिकीग्राह्येति माधवःतदुक्तम्।उदयेत्रिमुहूर्त्तापिग्राह्यानंतव्रतेतिथिरिति॥मध्याह्नेभोज्यवेला यामितिकथायांश्रवणादुपरिहिदेवेभ्योधारयतीतिवाद्विधिकल्पनात् । पूजाव्रते षुसर्वेषुमध्याह्नव्यापिनीतिथिरितिमाधवीयवचनात् मध्याह्नव्यापिनीग्राह्येति तुदिवोदासः । प्रतापमार्तंडेप्येवम्।इदमेवचयुक्तम्।निर्णयामृतेतुघटिकामात्रा प्यौदयिकीत्युक्तम् । तथाभाद्रपदस्यांतेचतुर्दश्यांद्विजोत्तम॥पौर्णमास्याःसमा योगेव्रतंचानंतकंचरेदितिभविष्योक्तेः । मुहूर्तमपिचेद्भाद्रेपूर्णिमायांचतुर्द शी॥संपूर्णांतांविदुस्तस्यांपूजयेद्विष्णुमव्ययमितिस्कांदाच्चेति । अत्रमूलंचिंत्य म् । ह्यहेऔदयिकत्वेपूर्णत्वात्पूर्वेतियुक्तम् । तत्त्वंतुविध्यर्थवादयोर्भिन्नार्थ त्वेएकवाक्यतायोगात् । संदिग्धेषुएकवाक्यत्वादितिन्यायेनपूर्वापरावामध्या ह्नव्यापिन्येवमुख्या । माधवस्तुसामान्यवाक्यान्निर्णयंकुर्वन्भ्रांतएव । अनं तव्रतस्यपुराणांतरेष्वभावान्निबंधांतरेष्वभावाच्चवचनंनिर्मूलमेवेति अथाग स्त्यार्घ्यः तत्कालोव्रतहेमाद्रौभविष्ये कन्यायामागतेसूर्येअर्वाग्वैसप्तमेदि ने ॥ कन्यायांसमनुप्राप्तेह्यर्घकालोनिवर्तते ॥ तेनउदयोत्तरमपिसप्तदिनम ध्येइत्यर्थः यत्पाद्मे आसप्तरात्रादुदयाद्यमस्यदातव्यमेतत्सकलंनरेण ॥ यावत्समाःसप्तदशाथवास्युरथोर्ध्वमप्यत्रवदंतिकेचित् ॥ यमस्यागस्त्यस्य ॥

उदयकालश्चादिवोदासीयेउक्तः । उदेतियाम्यांहारिसंक्रमाद्बेरेकाधिकेविंशतिमेगद्यस्त्यः ॥ ससप्तमेस्तंवृषसंक्रनाच्चप्रयातिगर्गादिभिरभ्यभाणि **अत्रवि धिर्विष्णुरहस्ये** काशपुष्पमयींरम्यांकृत्वामूर्तिन्तुवारुणैः ॥ प्रदोषेविन्यसेत्तांतुपूर्णकुंभेस्वलंकृताम् ॥ कुंभस्यांपूजयेत्तांतुपुष्पधूपविलेपनैः ॥ दध्यक्षत बलिंदद्याद्रात्रौकुर्यात्प्रजागरम् ॥ पूजांचवक्ष्यमाणार्घ्यमंत्रेण कार्या । प्रभातेतांसमादाययायात्पुण्यं जलाशयम् ॥ निशावसानेतांपश्यन्जलांतेप्रतिमांमुनेः ॥ अर्घ्यंदद्यादगस्त्यायभक्त्यासंम्यगुपोषितः **मात्स्येतु** अंगुष्ठमात्रंपुरुषंतथैवसौवर्णमत्यायतबाहुदंडम् ॥ पूर्वंकाशमयीत्वमशक्तौ चतुर्भुजंकुंभमुखेनिधायधान्यानिसप्तांकुरसंयुतानि ॥ सकाशपुष्पाक्षतशुक्तियुक्तमंत्रेणदद्याद्द्विजपुंगवाय ॥ धेनुंबहुक्षीरवतींचदद्यात्सवस्त्रघंटाभरणांद्विजाय **भविष्ये** विरूढैःसप्तधान्यैश्चवंशपात्रनिधापितैः ॥ सौवर्णरूप्यपात्रेणताम्रवंशमयेनवा ॥ मूर्ध्निस्थितेननम्रेणजानुभ्यांधरणींगतः **विष्णुरहस्ये** अगस्त्यःखनमानेतिपठन्मंत्रमिमंमुनेः ॥ अर्घ्यंदद्यादगस्त्यायशूद्रेमंत्रविधिस्त्वयम् ॥ काशपुष्पप्रतीकाशवह्निमारुतसंभव ॥ मित्रावरुणयोः पुत्रकुंभयोने नमोस्तुते ॥ विंध्यवृद्धिक्षयकरमेघतोयविषापह ॥ रत्नवल्लभदेवेशलंकावासनमोस्तुते ॥ वातापीभक्षितोयेनसमुद्रःशोषितःपुरा ॥ लोपामुद्रापतिःश्रीमान्योसौतस्मैनमोनमः ॥ येनोदितेनपापानिविलयंयांतिव्याधयः । तस्मैनमोस्त्वगस्त्यायसशिष्यायचपुत्रिणे ॥ अगस्त्यःखनमानेतिविप्रोर्घ्यंविनिवेदयेत् ॥ राजपुत्रिमहाभागेऋषिपत्निवराननने ॥ लोपामुद्रेनमस्तुभ्यमर्घ्यमेप्रतिगृह्यताम् ॥ दत्वैवमर्घ्यंकौरव्यप्रणिपत्यविसर्जयेत् ॥ अर्चितस्त्वंयथाशक्त्यानमोगस्त्यमहर्षये ॥ ऐहिकामुष्मिकींदत्वाकार्यसिद्धिंव्रजस्वमे ॥ विसर्जयित्वागस्त्यंतंविप्रायप्रतिपादयेत् ॥ अगस्त्योमेमनस्थोस्तुअगस्त्योस्मिन्घटेस्थितः ॥ अगस्त्योद्विजरूपेणप्रतिगृह्णातुसत्कृतः **दानमंत्रः** अगस्त्यःसप्तजन्माघंनाशयित्वावयोरयम् ॥ अतुलंविमलंसौख्यंप्रयच्छत्वंमहामुने **प्रतिग्रहमंत्रः विष्णुरहस्ये** त्यजेदगस्त्यमुद्दिश्यधान्यमेकंफलंरसम् ॥ होमंकृ

त्वाततःपश्चाद्दर्जयेन्मानवःफलम् **होमश्चार्घ्यमंत्रेणाज्येनभविष्ये** दत्वा र्घ्यसप्तवर्षाणिक्रमेणानेनपांडव ॥ ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियःपृथिवीप तिः ॥ वैश्येचधान्यनिष्पत्तिःशूद्रश्चधनवान्भवेत्॥यावदायुश्चयःकुर्यात्सपरं ब्रह्मगच्छति ॥ इत्यगस्त्यार्घ्यः । भाद्रपौर्णमास्यांप्रपितामहात्परांस्त्रीनुद्दिश्य श्राद्धंकार्यम् **तद्भक्तंहेमाद्रौब्राह्ममार्कंडेययोः** नांदीमुखानांप्रत्यब्दंकन्या राशिगतेरवौ ॥ पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेति ॥ नांदीमुखत्वं चोक्तंब्राह्मे पितापितामहश्चैवतथैवप्रपितामहः ॥ त्रयोह्यश्रुमुखाह्येतेपित रः परिकीर्तिताः ॥ तेभ्यः पूर्वतरायेचप्रजावंतः सुखैधिताः ॥ तेतुनां दीमुखानान्दीसमृद्धिरितिकथ्यते ॥ एतच्चप्रत्यब्दमित्युक्तेः । पक्षश्राद्धपक्षे सकृन्महालयपक्षेचावश्यकमितिप्रयोगपारिजाते । अत्रमातामहाअपिका र्याः । पितरोयत्रपूज्यंतेतत्रमातामहाअपीतिधौम्योक्तेः । पितृशब्दस्यचज नकपरत्वेबहुवचनविरोधेनपितृभावान्नपरत्वात् । वार्षिकेतुवचनान्निवृत्तिः नचजीवत्पितृकस्यान्वष्टकायांमातृश्राद्धेतदापत्तिः । इष्टापत्तेः । अतएवस उक्तश्राद्धेषुस्वमातृमातामहयोर्दद्यादिति ॥ मदनरत्नकालादर्शौ । एतज्जीव त्पितृकश्राद्धेवक्ष्यामः **केचित्तु** अजहल्लक्षणयापित्रादयोयत्रतत्रमातामहास्ते नात्रनेत्याहुः । नचात्रनान्नानांदीश्राद्धधर्मातिदेशः । वैष्णवादिशब्दवद्देवता परस्यकर्मनामत्वाभावात् । नापिनांदीमुखत्वंपितृविशेषणम् । पारिभाषिक त्वादितिदिक् **तथानिर्णयदीपेगार्ग्यः** पौर्णमासीषुसर्वासुनिषिद्धंपिंडपातन म् ॥ वर्जयित्वाप्रौष्ठपदींयथादर्शस्तथैवसेति ॥

॥ इतिश्रीमीमांसकरामकृष्णभट्टात्मजभट्टकमलाकरकृते
निर्णयसिंधौ भाद्रपदमासः समाप्तः ॥

कन्यासंक्रमेपराःषोडशघटिकाःपुण्याःशेषंप्राग्वत्। **अथमहालयः**। तत्रपृ थिवीचंद्रोदयेवृद्धमनुःआषाढीमवधिंकृत्वापंचमंपक्षमाश्रिताः कांक्षंतिपितरः क्लिष्टाअन्नमप्यन्वहंजलम् ॥ कन्यायोगेपुण्यतमत्वमाह **शाट्यायनिः** कन्या स्थार्कान्वितःपक्षःसोत्यंतंपुण्यमुच्यतइति **अत्रविशेषमाहवृद्धमनुः** मध्येवा

यदिवाप्यंतेयत्रकन्यांव्रजेद्रविः ॥ सपक्षःसकलःश्रेष्ठःश्राद्धषोडशकंप्रति । **तथाब्रह्मांडमार्कंडेययोः** कन्यागतेसवितरि दिनानिदशपंचच ॥ पार्वणेने हविधिना श्राद्धंतत्रविधीयते ॥ तथातत्रैवषोडशदिनान्युक्तानि कन्यागतेस वितरियान्यहानितुषोडश ॥ ऋतुभिस्तानितुल्यानिदेवोनारायणोब्रवीत् ॥ अत्रहेमाद्रिःषोडशत्वंत्रेधाव्याचख्यौ । तिथिवृद्ध्यापक्षस्य षोडशदिनात्मक त्वंश्राद्धवृद्ध्यर्थमेकःपक्षः । भाद्रपदपूर्णिमयासहेतिद्वितीयः । आश्विनशुक्ल प्रतिपदासहेतितृतीयः । अंत्यएवतुयुक्तः । अहःषोडशकंयत्तुशुक्लप्रतिपदास ह । चंद्रक्षयाविशेषेणसापिदर्शात्मिकास्मृतेति देवलोक्तः तत्रपंचपक्षाः **तदुक्तंहेमाद्रौब्राह्मे** आश्वयुक्कृष्णपक्षेतुश्राद्धंकार्यदिनेदिने ॥ त्रिभागहीनं पक्षंवात्रिभागंत्वर्धमेववा ॥ दिनेदिनेइतिपक्षपर्यंतत्वमुक्तम् । त्रिभागहीन मितिपंचम्यादिपक्षः । त्रिभागमितिदशम्यादिपक्षः । त्रिभागहीनमितिचतु र्दशीसहितप्रतिपदादिचतुष्टयवर्जनाभिप्रायेणेतिकल्पतरुः । अत्रदिनपदंति थिपरंवीप्सयातत्पक्षीयतिथित्वंश्राद्धव्याप्यतावच्छेदकम् । तेनपंचदशतिथि व्यापिश्राद्धंसिद्ध्यति । तेनचतुर्दशीनिषेधोऽन्यकृष्णपक्षपरइतिगौडाः । त न्न । श्राद्धंशस्त्रहतस्यैवचतुर्दश्यांमहालये ॥ इत्यादिविरोधात् । यत्तुक श्चित्पूरणप्रत्ययलोपेनतृतीयभागहीनंषष्ठ्यादिपक्षतृतीयभागमेकादश्यादि तदर्धंत्रयोदश्यादिउत्तरोत्तरंलघुकालोक्तेरिति । तन्न । गौतमादिवचनेन मूलकल्पनालाघवात् । पक्षमित्यन्वयापत्तेश्च । पंचम्यूर्ध्वंचत्रापिदशम्यू र्ध्वंततोप्यतीति ॥ विष्णुधर्मोक्तेः । षष्ठ्याद्येकादश्यादिपक्षावपिज्ञेयाविति तत्त्वम् **कालादर्शेपि** पक्षाद्यादिवदर्शांतंपंचम्यादिदिगादिच । अष्टम्या दियथाशक्तिकुर्यादापरपक्षिम् ॥ पक्षादिःप्रतिपत् । दिक्दशमी । दर्शांत मितिसर्वत्र **गौतमोपि** अथापरपक्षेश्राद्धंपितृभ्योदद्यात्पंचम्यादिदर्शांतमष्ट म्यादिदशम्यादिसर्वस्मिंश्चेति **तथैकस्मिन्नपिदिनेश्राद्धमुक्तंहेमाद्रौना गरखंडे** आषाढद्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे ॥ योवैश्राद्धंनरःकुर्यादेक स्मिन्नपिवासरे ॥ तस्यसंवत्सरंयावत्संतृप्ताःपितरोध्रुवमिति ॥ अत्र

शक्ताशक्तपराव्यवस्थेतिप्रांचः । तन्न । तद्वाचकपदाभावात् । त्रयोदश्या दिपक्षएवनित्यः । तत्रैवनिंदाश्रुतेः ब्राह्मे एवकारेणतस्यैवपंचमपक्षायोग व्यवच्छेदोक्तेरितिगौडाः । तन्न । एकस्मिन्नपीतिविरोधात् । तेनफलभूया र्थिनान्यानिकार्याणीतितत्त्वम् । तत्रचतुर्दशीश्राद्धाभावेपंचम्यादि दशम्या दिपक्षौतत्सत्त्वेषष्ठ्याद्येकादश्यादिकौ । एवंचतुर्दश्यभावेद्वादश्यादिः । त त्सत्त्वेत्रयोदश्यादिरितिव्यवस्था । विधवायास्तुविशेषःस्मृतिसंग्रहे चत्वा रःपार्वणाःप्रोक्ता विधवायाःसदैवहि स्वभर्तृश्वशुरादीनांमातापित्रोस्तथैवच । ततोमातामहानांचश्राद्धदानमुपक्रमेत् तथा श्वश्रूणांचविशेषेणमातामह्यास्त थैवचेति अशक्तौतुस्मृतिरत्नावल्याम् स्वभर्तृप्रभृतित्रिभ्यःस्वपितृभ्यस्तथै वच ॥ विधवाकारयेच्छ्राद्धंयथाकालमतंद्रिता ॥ विधवास्वयंसंकल्पंकृत्वा न्यत्ब्राह्मणद्वाराकारयेदित्युक्तम् प्रयोगपारिजातेसकृन्महालयेचवर्ज्यंति थ्याद्युक्तम्पृविवीचंद्रोदयेप्रयोगपारिजातादिषु वासिष्ठः नंदायांभार्गवदिने चतुर्दश्यांत्रिजन्मसु ॥ एषुश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात् ॥ जन्मभंतत्पू र्वोत्तरेचत्रिजन्मानि । वृद्धगार्ग्यः प्राजापत्येचपौष्णेचपित्र्क्षेभार्गवेतथा ॥ यस्तुश्राद्धंप्रकुर्वीततस्यपुत्रोविनश्यति ॥ प्राजापत्यंरोहिणी । पौष्णंरेवती । पित्र्यंमघा । अन्यान्यपिप्रत्यरादीनितत्रैवज्ञेयानि केचित्तु नंदाश्चकामर व्यारभृग्वग्निपितृकालभे ॥ गंडेवैधृतपातेचपिंडास्त्याज्याःसुतेप्सुभिरितिसं ग्रहात् ॥ नंदाप्रतिपत्षष्ठ्येकादश्यः । अश्वःसप्तमी । कामस्त्रयोदशी । आरो भौमः । भृगुःशुक्रः । अग्निभंकृत्तिकाकालभंभरणी । तत्रपिंडास्त्याज्याइत्या हुः । तत्रमूलंमृग्यम् । एतच्चसकृन्महालयविषयम् । सकृन्महालयेकाम्ये पुनःश्राद्धेखिलेषुच ॥ अतीतविषयेचैवसर्वमेतद्विचिंतयेदिति ॥ पृथिवीचं द्रोदयेनारदोक्तेः अस्यापवादोहेमाद्रौपृथ्वीचंद्रोदयेच अमापातेभरण्यां चद्वादश्यांपक्षमध्यके ॥ तथातिथिंचनक्षत्रंवारंचनविचारयेत् ॥ पराशरमाध वीयेमदनपारिजातादिषुचैवम् निर्णयदीपिकायांतु पितृमृताहेनिषिद्धदिने पिसकृन्महालयःकार्यइत्युक्तम् । आषाढ्याःपंचमेपक्षेकन्यासंस्थेदिवाकरे ॥

मृताहनिपितुर्योवैश्राद्धंदास्यतिमानवः॥तस्यसंवत्सरंयावत्संतृप्ताःपितरोध्रुव मितिनागरखंडोक्तेः ॥ यातिथिर्यस्यमासस्यमृताहेतुप्रवर्तते ॥ सातिथिःपितृ पक्षेतुपूजनीयाप्रयत्नतः ॥ तिथिच्छेदोनकर्तव्योविनाशौचंयदृच्छया ॥ पिंडश्राद्धंचकर्तव्यंविच्छित्तिनैवकारयेत् ॥ अशक्तःपक्षमध्येतुकरोत्येकदिने यदा ॥ निषिद्धेपिदिनेकुर्यात्पिंडदानंयथाविधीतिकात्यायनोक्तेश्च । अत्रमू लंचिंत्यम् तथापक्षश्राद्धकरणेपिननंदादिषुपिंडनिषेधइत्याह **पराशरमाध वीयेकार्ष्णाजिनिः** नभस्यस्यापरेपक्षेश्राद्धंकार्यंदिनेदिने ॥ नैवनंदादिव र्ज्यस्यान्नैवनिंद्याचतुर्दशीति ॥ अत्रश्राद्धमित्येकवचनाद्दिनेदिनेइतिवीप्सावशाच्च । सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदम् । अतःप्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीमितियाज्ञवल्कीयंप्रयोगभेदपरंनतुपंचम्यादिपक्षविषयम । प्रतिपत्प्रभृतिष्वितिविशिष्योक्तेः निर्णयदीपेपृथ्वीचंद्रोदयेमदनपारिजातेचैवम्। अन्यकृष्णपक्षपरंयाज्ञवल्कीयम्।एतत्परत्वेनैवनिंद्याचतुर्दशीतिविरोधादितिगौडाः **तन्न** श्राद्धंशस्त्रहतस्यैवचतुर्दश्यांमहालयइतिविरोधात् **तत्त्वंतु** तिथिनक्षत्रवारादिनिषेधोयउदाहृतः ॥ सश्राद्धेतन्निमित्तेस्यान्नानुषंगकृतेह्यसाविति दिवोदासीये वृद्धगार्ग्योक्तेस्तन्निमित्तेपक्षांतरेचज्ञेयः सकृन्महालयेतुवचनान्निषेधःअन्यत्रकोपिनिषेधः। कार्ष्णाजिनिस्मृतिरेति । अतोनंदादौसपिंडकश्राद्धेपुत्रवतोप्यधिकारः **अत्रिरपि** महालयेक्षयाहेच दर्शेपुत्रस्यजन्मनि॥तीर्थेपिनिर्वपेत्पिंडान्रविवारादिकेष्वपि ॥ पूर्वोक्तनंदानिषेधस्तुमृताहातिक्रमेसकृन्महालयेपौर्णमास्यादिमृतश्राद्धेतन्निमित्तेचज्ञेयः **यत्तुस्मृत्यर्थसारे** विवाहव्रतचूडासुवर्षमर्धंतदर्धकं॥पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणमिति **तस्यात्रापवादोदिवोदासीयेबृहस्पतिः** तीर्थेसंवत्सरेप्रेतेपितृयागेमहालये॥पिंडदानंप्रकुर्वीतयुगादिभरणीमघे॥महालयेगयाश्राद्धेमातापित्रोःक्षयेहनि ॥ कृतोद्वाहोपिकुर्वीतापिंडनिर्वपणंसदेतिनिर्णयदीपेतुनंदानिषेधःप्रत्यहभिन्नश्राद्धविषयःषोडशाहव्यापिश्राद्धप्रयोगकृत्येतुप्रत्यहंपिंडदानंकार्यमेवेत्युक्तम् । तदयमर्थःसंपन्नः षोडशाहव्यापिश्राद्धैक्येनपिंडनिषे

धः।मृताहेसकृन्महालयेपितथाइतिकेचित्।तत्रापिनिषेधस्तुयुक्तः। प्रत्यहंश्राद्धभेदेपिव्यतीपातादौतथा।अन्यत्रमृताहातिक्रमेमहालयातिक्रमेचपिंडनिषेध इति॥संन्यासिनांतुद्वादश्यांश्राद्धंकार्यम् यतीनांचवनस्थानांवैष्णवानांविशेषतः॥द्वादश्यांविहितंश्राद्धंकृष्णपक्षेविशेषतइति ॥ पृथ्वीचंद्रोदयेसंग्रहोक्तेः। **अत्रपक्षेश्राद्धाकरणेगौणकालमाहहेमाद्रौयमः** हंसेकन्यासुवर्षास्थेशाकेनापिगृहेवसन् षंचम्योरंतरेदद्यादुभयोरपिपक्षयोः ॥ आश्विनकृष्णशुक्लपंचम्योर्मध्यइत्यर्थः **तत्राप्यसंभवेभविष्ये** येयंदीपान्वितेराजन्ख्यातापंचदशीभुवि ॥ तस्यांदद्यान्नचेद्दत्तंपितॄणांवैमहालये **तत्राप्यसंभवेभारते** यावच्चकन्यातुलयोः क्रमादास्तेदिवाकरः ॥ शून्यंप्रेतपुरंतावद्वृश्चिकेयावदागतः **ब्राह्मे** वृश्चिकेसमतिक्रांतेपितरौदैवतैःसह ॥ निश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणम् **यत्तुजातूकर्ण्यः** आकांक्षंतिस्मपितरःपंचमंपक्षमाश्रिताः ॥ तस्मात्तत्रैवदातव्यंदत्तमन्यत्रनिष्फलमितितत्फलातिशयहानिपरम्॥कन्यांगच्छतुवानवेतितुइयंपादेवापाठः तेनकन्यायोगेप्राशस्त्यमात्रंअतःश्राद्धविवेकोक्तंश्राद्धद्वयंहेयम्। इदंचश्राद्धमन्नेनैवकार्यंनामान्नादिना। मृताहंचसपिंडंचगयाश्राद्धंमहालयं॥आपन्नोपिनकुर्वीतश्राद्धमामेनकर्हिचिदिति। स्मृतिदर्पणेगालवोक्तेः**अथाजदेवताःसंग्रहे** तातांबात्रियंसपत्नजननीमाता महादित्रयंसस्त्रीस्त्रीतनयादितातजननीस्वभ्रातरस्तत्स्त्रियः॥ तातांबात्मभगिन्यपत्यधवयुक्जायापितासद्गुरुःशिष्यास्ताःपितरोमहालयविधौतीर्थेतथातर्पणे।अस्यार्थः। तातत्रयी। पितृत्रयी। अंबात्रयीच। स्मृत्यर्थसारेपिमहालयेमातृश्राद्धंपृथक्प्रशस्तमिति **अत्रविशेषःस्मृतिदर्पणेगालवः** अनेकामातरोयस्यश्राद्धेचापरपक्षिके॥ अर्घ्यदानंपृथक्कुर्यात्पिंडमेकंतुनिर्वपेत् ॥ जीवन्मातृकस्तुसापत्नमातुरेकोद्दिष्टंकुर्यान्नपार्वणम् । श्राद्धंदीपकलिकायांतुपार्वणमुक्तम्। अन्वष्टक्यंचयन्मातुर्गयाश्राद्धंमहालयम् ॥ पितृपत्नीषुचश्राद्धंकार्यंपार्वणवद्भवेदितिबृहन्मनूक्तेः। सस्त्रीतिमातामहानांसपत्नीकत्वेपिविभवेसतिमातामहीनांपृथक्कार्यं। महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच ॥ ज्ञेयंद्वा

दशदैवत्यंतीर्थेप्रौष्ठमघासुचेतिनिगमोक्तेः ॥ हेमाद्रिमतेत्वत्रनवदैवत्यमेव । महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच ॥ नवदैवत्यमंत्रेष्टंशेषंषट्पौरुषंविदुरिति ॥ विष्णुधर्मोक्तेः । तातभ्रातापितृव्यः । जननीभ्रातामातुलः । तत्स्त्रियः । पितृव्यस्त्री । मातुलानी । भ्रातृजायाःपितृष्वसृमातृष्वसृस्वभगिन्योपत्यभर्तृयुक्ताः । तेनसापत्न्यायैसधवायैइतिप्रयोगोज्ञेयः। एतासुसतीषुनतद्भर्तादेर्दानम् द्वारलोपात ॥ जायापिताश्वशुरःश्वश्रुरप्यत्रोपलक्ष्या । अत्रमूलंस्मृतिचंद्रिकायांज्ञेयम् **अत्रपार्वणैकोद्दिष्टव्यवस्थोक्ताहेमाद्रौपुराणांतरे** उपाध्यायगुरुश्वश्रूपितृव्याचार्यमातुलाः ॥ श्वशुराभ्रातृतत्पुत्रपुत्रर्त्विक्शिष्यपोषकाः॥भगिनीस्वामिदुहितृजामातृभगिनीसुताः ॥ पितरौपितृपत्नीनांपितुर्मातुश्चयास्वसा ॥ सखिद्रव्यदशिष्याद्यास्तीर्थेचैवमहालये॥एकोद्दिष्टविधानेनपूजनीयाःप्रयत्नतइति ॥ इतरेषांपित्रादीनांपार्वणमर्थसिद्धम् ॥ अत्रक्रमान्यत्वेप्याचाराद्व्यवस्था **अशक्तौतुपृथिवीचंद्रोदयेचतुर्विंशतिमते** एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत् ॥ दशद्वादशवापिंडान्दद्यादकरणंनतु **एकोद्दिष्टस्वरूपंचाहयाज्ञवल्क्यः** एकोद्दिष्टंदेवहीनमेकार्घ्यैकपवित्रकम् ॥ आवाहनाग्नौकरणरहितंत्वपसव्यवदिति । अत्रैकपाकोवैश्वदेवतंत्रपिंडंबर्हिश्चैकमितिस्मृत्यर्थसारेउक्तं। अत्रपाणिहोमः**पिंडाश्चद्विजांतिकइत्याह्प्रयोगपारिजातेआचार्यः** काम्यमभ्युदयेष्टम्यामेकोद्दिष्टमथाष्टमम् ॥ चतुर्ष्वेषुकरेहोमःपिंडाश्चात्रद्विजांतिकइति॥पार्वणैकोद्दिष्टयोःसमानतंत्रत्वेतुअग्निसमीपएव । अत्रधूरिलोचनौवैश्वदेवौ । अपिकन्यागतेसूर्येकाम्येचधूरिलोचनौ ॥ इतिहेमाद्रावादित्यपुराणात् । अत्रप्रतिदिनंभिन्नप्रयोगत्वाद्दक्षिणाभेदोवाप्रयोगैक्यादंतेएववादक्षिणेतिहेमाद्रौउक्तम् । एतच्चसंन्यस्तपितृकादिनाजीवत्पितृकेणापिकार्यम् । वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति ॥ येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइतिकात्यायनोक्तेः ॥ **यच्चकौंडिन्यः** दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकम् ॥ नजीवत्पितृकःकुर्यात्तिलैस्तर्पणमेवचेति ॥ तत्संन्यस्तपित्राद्यतिरिक्तविषयम् । काम्यश्राद्धपरंवा । अत्रबहु

वक्तव्यंश्रीपितृकृतजीवत्पितृकनिर्णयेज्ञेयम् । एतच्चजीवत्पितृकेणपिंडरहितं कार्यम् । मुंडनंपिंडदानंचप्रेतकर्मचसर्वशः॥ नजीवत्पितृकःकुर्याद्दुर्विणीपतिरेवचेतिदक्षेणतस्यपिंडनिषेधात् । अन्वष्टक्यंमातृवार्षिकादौतुवचनाद्भवतीतिवक्ष्यामः **तथाछागलेयः** पिंडोयत्रनिवर्तेतमघादिषुकथंचन ॥ सांकल्पंतुतदाकार्यंनियमात्ब्रह्मवादिभिः ॥ सांकल्पस्वरूपंचवक्ष्यते अत्रश्राद्धांगतर्पणंपक्षश्राद्धेप्रतिदिनंश्राद्धोत्तरम् ॥ सकृन्महालयेतुपरेह्निकार्यम् **तदुक्तं नारदीये** पक्षश्राद्धंयदाकुर्यात्तर्पणंतुदिनेदिने ॥ सकृन्महालयेचैवपरेहनितिलोदकम् **गर्गोपि** पक्षश्राद्धेहिरण्येचअनुव्रज्यतिलोदकमिति । **तथाप्रयोगपारिजातेगर्गः** कृष्णेभाद्रपदेमासिश्राद्धं प्रतिदिनंभवेत् ॥ पितॄणांप्रत्यहंकार्यंनिषिद्धाहेपितर्पणम् ॥ सकृन्महालयेश्वःस्यादष्टकास्वंतएवहि ॥ इदंनिषिद्धदिनेपिकार्यम् । तिथितीर्थविशेषुकार्यंप्रेतेचसर्वदेतिस्मृत्यर्थसारोक्तेः । तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके ॥ निषिद्धेपिदिनेकुर्यात्तर्पणंतिलमिश्रितमितिस्मृतिरत्नावल्यांवचनाच्च । एतच्छ्राद्धंमलमासेनकार्यं **तदाहभृगुः** वृद्धिश्राद्धंतथासोममग्न्याधेयंमहालयम् ॥ राजाभिषेकंकाम्यंचनकुर्याद्भानुलंबितइति । **हेमाद्रौनागरखंडे** नभोवाथनभस्योवामलमासोयदाभवेत् ॥ सप्तमः पितृपक्षःस्यादन्यत्रैवतुपंचमः ॥ एतच्चपित्रोर्मरणेप्रथमाब्देकृतमितित्रिस्थलीसेतौभट्टाः । इदंचनित्यंकाम्यंपुत्रानायुस्तथारोग्यमैश्वर्यमतुलंतथा ॥ प्राप्नोतिपंचमेदत्वाश्राद्धंकामान्सुपुष्कलानितिजाबाल्युक्तेः । वृश्चिकेसमतिक्रांतेपितरोदैवतैःसह । निश्वस्यप्रतिगच्छंतिशापंदत्वासुदारुणमिति **कार्ष्णाजिनिवचनाच्चतदतिक्रमेप्रायश्चित्तमुक्तमग्निविधाने** दुरोअश्वस्यमंत्रंचदशमासंद्विमासयोः । महालयंयदान्यूनंतदासंपूर्णमेतितदिति । द्विमासयोःकन्यातुलयोर्महालयश्राद्धंयदाहीनमित्यर्थः अत्रभरण्यांश्राद्धमतिप्रशस्तम् **तदुक्तंपृथिवीचंद्रोदयेमात्स्ये** भरणीपितृपक्षेतुमहतीपरिकीर्तिता॥अस्यांश्राद्धंकृतंयेनसगयाश्राद्धकृद्भवेत् **पृथिवीचंद्रोदयेश्रीधरीयेबृहस्पतिः** नभस्यापरपक्षस्यद्वितीयायदियाम्यभे ॥ तृतीयाचाग्नितारांभिःसहिताप्रीति

दापितुः ॥ एतत्पक्षेषष्ठीयोगविशेषेणकपिलासंज्ञा **तदुक्तंवाराहे** नभस्यकृ ष्णपक्षेतुरोहिणीपातभूसुतैः॥युक्ताषष्ठीपुराणज्ञैःकपिलापरिकीर्तिता ॥ व्रतोप वासनियमैर्भास्करंतत्रपूजयेत्॥कपिलांचद्विजाग्र्यायदत्वाक्रतुफलंलभेत् **पु राणसमुच्चये** भाद्रेमास्यसितेपक्षेभानौचैवकरेस्थिते॥ पातेकुजेचरोहिण्यांसा षष्ठीकपिलाभवेत् ॥ अत्रदर्शोतत्वेनमहालयोभाद्रपदकृष्णपक्षोज्ञेयइत्युक्तं निर्णयामृतेहेमाद्रौच । हस्तार्कस्तुफलातिशयार्थः । संयोगेतुचतुर्णांवैनिर्दि ष्टापरमेष्ठिनेतितत्रैवोक्तेः **अत्रविशेषोहेमाद्रौस्कांदे** देवदारुंतथोशीरंकुंकु मैलांमनःशिलाम् । पत्रकंपद्मकंयष्टिमधुगव्येनपेषयेत् ॥ क्षीरेणालोड्यक ल्केनस्नानंकुर्यात्समंत्रकम् ॥ आपस्त्वमसिदेवेशज्योतिषांपतिरेवच ॥ पापं नाशयमेदेववाङ्मनःकायकर्मजम्॥पंचगव्यकृतस्नानःपंचभंगैस्तुमार्जयेत् । पंचभंगैःपंचपल्लवैः । तथा । रत्नैर्नानाविधैर्युक्तंसौवर्णंकारयेद्वविम् ॥ श क्तितस्तुपलादूर्ध्वंतदर्धंकर्षतोपिवा ॥ सौवर्णमरुणंकुर्यान्नौकांचैवतथारथम् ॥ **तथा** अल्पवित्तोपियःकश्चित्सोपिकुर्यादिमंविधिम् **प्रभासखंडे** स्थापयेदत्र णंकुंभंचंदनोदकपूरितम् ॥ रक्तवस्त्रयुगच्छन्नंताम्रपात्रेणसंयुतम् ॥ रथोरौ क्मपलस्यैवएकचक्रःसुचित्रितः ॥ सौवर्णफलसंयुक्तांमूर्तिंसूर्यस्यकारयेत् ॥ ततःसूर्यकपिलांचषोडशोपचारैःसंपूज्यदद्यात् दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः॥कपिलासहितोदेवोमममुक्तिंप्रयच्छतु॥ यस्मात्त्वंकपिलेपुण्यासर्व लोकस्यपावनी ॥ प्रदत्तासहसूर्येणममामुक्तिप्रदाभवेति ॥ विशेषांतरंतत्रैव ज्ञेयमितिदिक् । इयमेवचंद्रषष्ठी । साचंद्रोदयव्यापिनीग्राह्या । उभयत्रत थात्वेपूर्वा **तदुक्तंभविष्ये** तद्वद्भाद्रपदेमासिषष्ठ्यांपक्षेसितेतरे॥ चंद्रषष्ठीव्रतं कुर्यात्पूर्ववेधःप्रशस्यते ॥ चन्द्रोदयेयदाषष्ठीपूर्वाह्णेचापरेहनि ॥ चंद्रषष्ठ्य सितेपक्षेसैवोपोष्याप्रयत्नतइति ॥ अष्टम्यामाश्वलायनेनमघावर्षसंज्ञंश्राद्धमु क्तम् । एतेनमाघ्यावर्षप्रौष्ठपद्याअपरपक्षेइति । इदंसप्तम्यादिषुत्रिष्वहःसुका र्यमितिनारायणावृत्तिः । हरदत्तस्तुमघायुक्तवर्षासुभवंत्रयोदशीश्राद्धमिति व्याचख्यौ **पृथ्वीचांद्रोदयेब्राह्मे** आषाढ्याःपंचमेपक्षेगयामाध्याष्टमीस्मृता॥

त्रयोदशीगजच्छायागयातुल्यातुपैतृके॥आश्विनकृष्णाष्टम्यांमहालक्ष्मीव्रतम् तत्रनिर्णयामृतेपुराणसमुच्चये श्रियोर्चनंभाद्रपदेसिताष्टमीप्रारभ्यकन्याम गतेचसूर्ये ॥ समापयेत्तत्रतिथौचयावत्सूर्यस्तुपूर्वार्धगतोयुवत्याइति तत्रैव कन्यागतेर्केप्रारभ्यकर्तव्यंनश्रियोर्चनम् ॥ हस्तप्रांतदलस्थेर्केतद्व्रतंनसमा पयेत् ॥ पूजनीयाग्रहस्थानामष्टमीप्रावृषिश्रियः ॥ दोषैश्चतुर्भिःसंयुक्तासर्व संपत्करीतिथिः तथा पुत्रसौभाग्यराज्यायुर्नाशिनीसाप्रकीर्तिता ॥ तस्मात्स र्वप्रयत्नेनत्याज्याकन्यागतेरवौ ॥ विशेषेणपरित्याज्यानवमीदूषितायदीति ॥ दोषचतुष्टयंतत्रैवोक्तम् ॥ त्रिदिनेचावमेचैवअष्टमींनोपवासयेत् ॥ पुत्रहान वमीविद्धास्वश्नीहस्तार्धगेरवाविति त्रिदिनावमदिनलक्षणंचरत्नमालाया म् यत्रैकस्पृशतितिथिद्वयावसानंवारश्चेदवमदिनंतदुक्तमार्यैः ॥ यःस्पर्शाद्भव तितिथित्रयस्यचाह्नात्त्रिद्युस्पृक्कथितमिदंद्वयंचनेष्टम् ॥ एतेचसर्वेनिषेधाःप्रथ मारंभविषयाः । मध्येतुसतिसंभवेज्ञेयाः । व्रतस्यषोडशाब्दसाध्यत्वेनमध्ये त्यागायोगात् । इयंचंद्रोदयव्यापिनीग्राह्या । तत्रैवपूजाधुक्तेःपरदिनेचं द्रोदयादूर्ध्वंत्रिमुहूर्तव्यापित्वेपरैवकार्या । अन्यथापूर्वैव । पूर्वाविद्धावाग्राह्याचंद्रोदयेसदा ॥ त्रिमुहूर्तापिसापूज्यापरतश्चोर्ध्वगामिनीतिमदनर त्नेनिर्णयामृतेचसंग्रहोक्तेः । अर्धरात्रमतिक्रम्यवर्ततेयोत्तरातिथिः॥तदातस्यां तिथौकार्यमहालक्ष्मीव्रतंसदेतिवचनाच्चेतिसंक्षेपः॥ इतिमहालक्ष्मीव्रतनिर्णयः अथनवम्यामन्वष्टकाश्राद्धम् तत्रकात्यायनः अन्वष्टकासुनवभिःपिंडैश्राद्ध मुदाहृतम् ॥ पित्रादिमातृमध्यंचततोमातामहांतकम् पृथ्वीचंद्रोदयेब्रह्मांडे पितॄणांप्रथमंदद्यान्मातॄणांतदनंतरम् । ततोमातामहानांचअन्वष्टक्येक्रमःस्मृ तः श्राद्धहेमाद्रौछागलेयः केवलास्तुक्षयेकार्यावृद्ध्यावादौप्रकीर्तिताः ॥ अन्वष्टकासुमध्यस्थानांत्याःकार्यास्तुमातरः॥दीपिकायांतुमातृश्राद्धमादौकार्य मित्युक्ताम् । मातृयजनंत्वन्वष्टकास्वादितइति हेमाद्रौब्राह्मेपि अन्वष्टकासु क्रमशोमातृपूर्वतदिष्यतइति अत्रशाखाभेदेनव्यवस्थेति पृथ्वीचन्द्रोद यः । जीवत्पितृकविषयमितिनिर्णयदीपः । इदंचजीवत्पितृकेणापिकार्यम्

तदुक्तंनिर्णयामृतेमैत्रायणीयपरिशिष्टे अन्वष्टक्यंगयाप्राप्तौसत्यांयच्चमृते हनि ॥ मातुःश्राद्धंसुतःकुर्यात्पितर्यपिचजीवति ॥ यद्यपिजीवत्पितृकस्य पंचान्वष्टकाअवश्यंकर्तव्याः । तथाप्यशक्तस्येयमावश्यकी ॥ प्रौष्ठपद्य ष्टकाभूयःपितृलोकेभविष्यतीतिहेमाद्रौपाद्मोक्तेः । सर्वासामेवमातॄणांश्रा द्धंकन्यागतेरवौ ॥ नवम्यांहिप्रदातव्यंब्रह्मलब्धवरायतइतिसूक्तेनावश्यक त्वोक्तेश्च । अत्रसर्वासामित्युक्तेःस्वमातरिजीवंत्यामपिसापत्नमातृभ्योदद्यत् तन्मरणेसति तस्यैताभ्यश्चदद्यादित्युक्तम् जीवत्पितृकनिर्णयेगुरुभिः । अत्रसर्वासांनामनिर्देशेनैकोब्राह्मणोर्घ्यःपिंडश्च । नामैक्येतुद्विवचनादिप्रयो गइत्युक्तंनारायणवृत्तौ । अन्वष्टकाश्राद्धंतद्यागश्चगोभिलीयानांमध्यमाया मेवनसर्वासु ॥ अन्वष्टक्यंमध्यमायामितिगोभिलगौतमाविंतिछंदोगपरिशि ष्टात् । अत्रभर्तृमरणोत्तरंपूर्वमृतमातृश्राद्धंनकार्यमितिकेचिदाहुःपठंतिच । श्राद्धंनवम्यांकुर्यात्तन्मृतेभर्तरिलुप्यतइति ॥ तदेतन्निर्मूलत्वान्मूर्खप्रतारणमा त्रं **श्राद्धदीपकलिकायांब्राह्मे** पितृमातृकुलोत्पन्नायाःकाश्चित्तुमृताःस्त्रियः॥ श्राद्धार्हामातरोज्ञेयाःश्राद्धंतत्रप्रदीयतइति ॥ अत्रदेशाचाराद्व्यवस्था । इ दंचानुपनीतेनापिकार्यम **तदुक्तंश्राद्धशूलपाणौमात्स्ये** अमावास्याष्टकाकृ ष्णपक्षपंचदशीषुचेत्यभिधाय । एतच्चानुपनीतोपिकुर्यात्सर्वेषुपर्वसु ॥ श्राद्धंसा धारणंनामसर्वकामफलप्रदम् ॥ भार्याविरहितोप्येतत्प्रवासस्थोपिनित्यशः ॥ शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबुधइति ॥ तेनसाग्नेरेवेदमितिपरास्तांअन्व ष्टकातःपृथगेवेदंमातुःश्राद्धमित्यपिपरास्तं । लाघवेनमूलैक्यादष्टकापदावि शेषाच्च । तेनान्यत्रान्वष्टकाश्राद्धस्यांगस्याप्यत्रप्रधानत्ववचनात् । अवेष्टेरि वराजसूयांतर्गतायाएतयान्नाद्यकामंयाजयेदितिफलार्थत्वम् । अत्राष्टकान्वष्ट कापूर्वानुरोधात् **तथाग्निपुराणे** अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि ॥ अ त्रमातुःपृथक्श्राद्धमन्यत्रपतिनासह ॥ आपस्तंबानांत्वष्टकासुचवृद्धौचेतिभा ष्यकारैःपाठादष्टकायांमातृकाश्राद्धम् । छंदोगैस्त्वत्रमातृमातामहश्राद्धेन कार्येकिंतुत्रिपुरुषमेव । नयोषिद्भ्यःपृथग्दद्यादवसानदिनादृते ॥ कुर्युःसम

न्वितमभक्त्यातथाद्यंश्राद्धषोडशं । प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थि तिरितिछंदोगपरिशिष्टात् । अन्वष्टकासुतेषांकुर्युर्विधानादितिशूलपाणिःयत्तु तमिस्रपक्षेनवमीपुण्याभाद्रपदेहिया ॥ चत्वारःपार्वणाःकार्याःपितृपक्षेमनी षिभिरितितद्देशाचारतोव्यवस्थितंज्ञेयम् । इदंजीवत्पितृकेणापिसपिंडंकार्य म् **हेमाद्रौविष्णुधर्मोत्तरे** अन्वष्टकासुचस्त्रीणांश्राद्धंकार्यतथैवचेत्युपक्रम्य पिंडनिर्वपणंकार्यंतस्यामपिनृसत्तमेति वचनंश्राद्धविधिनापिंडदानेप्राप्तेपुन स्तत्कर्तिनंयस्यजीवत्पितृकगर्भिणीपतित्वादिनापिंडदाननिषिद्धम् । त स्यतत्प्राप्त्यर्थमितिश्रीतातचरणाः **अत्रसुवासिनीभोजनमुक्तंमार्कंडेय पुराणे** मातुःश्राद्धेतुसंप्राप्तेब्राह्मणैःसहभोजनम् ॥ सुवासिन्यैप्रदातव्यमि तिशातातपोब्रवीत् ॥ भर्तुरग्रेगतानारीसहदाहेनवामृता ॥ तस्याःस्थानेनि युंजीतविप्रैःसहसुवासिनी **तत्रैवमदालसावाक्यम्** स्त्रीश्राद्धेपुत्रदेयास्युरलं काराश्चयोषिते ॥ मंजरीमेखलादामकर्णिकाकंकणादयइति **अत्राशक्तावनुकल्पमाहाश्वलायनः** अनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामेष्ट केतिनत्वेवानष्टकःस्यादिति **हेमाद्रौपितामहः** अमावास्याव्यतीपातपौर्ण मास्यष्टकासुच ॥ विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते **अकरणेचप्रा यश्चित्तमुक्तमृग्विधाने** एभिर्धुभिर्जपेन्मंत्रंशतवारंतुतद्दिने ॥ आन्वष्ट क्यंयदाशून्यंसंपूर्णंयातिसर्वथेति **एतत्पक्षेद्वादश्यांविशेषःपृथ्वीचंद्रोद येवायवीये** संन्यासिनोप्याब्दिकादिपुत्रःकुर्याद्यथाविधि ॥ महालयेतुय च्छ्राद्धंद्वादश्यांपार्वणंतुतदिति ॥ अथत्रयोदशीश्राद्धम् **तत्रचंद्रिका** त्रयोद शीभाद्रपदीकृष्णामुख्यापितृप्रिया ॥ तृप्यंतिपितरस्तस्यांस्वयंपंचशतंसमाः ॥ मघायुतायांतस्यांतुजलाद्यैरपितोषिताः ॥ तृप्यंतिपितरस्तद्वद्वर्षाणामयुतायुम् **प्रयोगपारिजातेशंखः** प्रौष्ठपद्यामतीतायांमघायुक्तांत्रयोदशीम् । प्राप्यश्रा द्धंतुकर्तव्यंमधुनापायसेनच ॥ प्रजामिष्टांयशःस्वर्गमारोग्यंचधनंतथा ॥ नृ णांश्राद्धेसदाप्रीताःप्रयच्छंतिपितामहाः **एतन्नित्यमपिपृथ्वीचंद्रोदयेविष्णु धर्मे** प्रौष्ठपद्यामतीतायंतथाकृष्णत्रयोदशीत्युक्ता । एतांस्तुश्राद्धकालान्वै

नित्यानाहप्रजापतिः ॥ श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइत्युक्तेः । एतच्चा विभक्तैरपिपृथक्कार्यं **तथाचहेमाद्रौ** विभक्तावाविभक्तावाकुर्युःश्राद्धंपृथ क्सुताः॥मघासुचततोन्यत्रनाधिकारःपृथग्विनेति **अपरार्केवायवीये** हंसेह स्तस्थितेयातुमघायुक्तात्रयोदशी ॥ तिथिर्वैवस्वतीनामसाछायाकुंजरस्यतु॥अ त्रच । अपिनःसंकुलेभूयाद्योनोदद्याच्चयोदशीं ॥ पायसंमधुसर्पिभ्यांप्राक्छा येकुंजरस्यचेति ॥ विष्णुमनुवचनेकेवलत्रयोदशीश्रुतेर्मघागुणइतिकल्पतरुः **शूलपाणिस्तु** केवलवाक्यानामर्थवादत्वाद्विधौचमघायोगश्रुतेर्विधिलाघवा त् । विशिष्टमेवनिमित्तमित्याह **वस्तुतस्तु** मधुमांसैश्चशाकैश्चपयसापायसे नच ॥ एषनोदास्यतिश्राद्धंवर्षासुचमघासुचेति ॥ वसिष्ठवचनेकेवलमघाश्रु तेर्विनिगमकाभावादुभयभिन्ननिमित्तं । पूर्वोक्तवचनाच्चयोगाधिक्येफलाधि क्यं **अतएवयाज्ञवल्क्यः** तथावर्षात्रयोदश्यांमघासुचविशेषतइति ॥ त्र योदशीश्राद्धंनित्यम् । अन्यत्काम्यं अत्रत्रयोदश्यांबहुपुत्रायुवमारिणस्तुभवं तीत्यापस्तंबोक्तेर्युवमारित्वमपत्यदोषसहिष्णोरपत्यमात्रार्थिनः । स्मृत्यंतरोक्त वनार्थिनोवाधिकारइतिकल्पतरुः । अपत्यनिंदयातदर्थीनांनाधिकारात् । फलांतरकामस्यैवाधिकारइतिहलायुधः । एतत्पिंडरहितंकार्यं । मघायुक्त त्रयोदश्यांपिंडानिर्वपणंद्विजः ॥ ससंतानोनैवकुर्यान्नित्यंतेकवयोविदुरितिबृ हत्पराशरोक्तेः । इदंमलमासेपिकार्यं । मघात्रयोदशीश्राद्धंप्रत्युपस्थितिहेतु कं ॥ अनन्यगतिकत्वेनकर्तव्यंस्यान्मलिम्लुचे ॥ इतिकाठकगृह्योक्तेः । या नितुआंगिराः त्रयोदश्यांकृष्णपक्षेयःश्राद्धंकुरुतेनरः ॥ पंचत्वंतस्यजानीया ज्ज्येष्ठपुत्रस्यनिश्चितं **वामनपुराणे** त्रयोदश्यांतुवैश्राद्धंनकुर्यात्पुत्रवान्गृ हीत्यादीनिवचनानितानिपुत्रवद्विषयाणिवामहालयस्थभिन्नत्रयोदशीविषया णिवाकाम्यश्राद्धविषयाणिवा सपिंडकश्राद्धविषयाणिवेतिकेचित् । हेमाद्रि प्रमुखास्त्वेकवर्गश्राद्धविषयाणि श्राद्धंनैवैकवर्गस्यत्रयोदश्यामुपक्रमेत् ॥ तृप्तास्तत्रयेयस्यप्रजाहिंसंतितस्यइतिकार्ष्णाजिनिस्मृतेः । यद्यपिपितरोयत्र पूज्यंतेतत्रमातामहाअपीतिधौम्योक्तेर्नकेवलपितृवर्गस्यप्राप्तिस्तथापिव्यामो

हादिप्राप्तनिषेधोयमित्याहुः । वयंतुपश्यामः पुत्रवद्विषयाण्येवेति । असं तानस्तुयस्तस्यश्राद्धेप्रोक्तात्रयोदशी ॥ संतानयुक्तोयःकुर्यात्तस्यवंशक्षयोभ वेदितिहेमाद्रौनागरखंडोक्तेः । पूर्ववाक्यमप्यसंतानस्यैवैकवर्गनिषेधकमिति अत्रमघात्रयोदशीमहालययुगादिश्राद्धानांतंत्रेणप्रयोगः ॥ नतुप्रसंगसिद्धि रित्यन्यत्रविस्तरः अथचतुर्दशी पृथ्वीचंद्रोदयेप्रचेताः वृक्षारोहणलोहाग्नैर्वि द्युज्जलविषाग्निभिः ॥ नखिदंष्ट्रिविपन्नायेतेषांशस्ताचतुर्दशी **ब्राह्मे** युवानः पितरोयस्यमृताःशस्त्रेणवाहताः ॥ तेनकार्यंचतुर्दश्यांतेषांतृप्तिमभीप्सता **नागरखंडे** अपमृत्युर्भवेद्येषांशस्त्रमृत्युरथापिवा ॥ श्राद्धंतेषांप्रकर्तव्यंचतुर्द श्यांनराधिप ॥ एतच्चप्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छता मिति ॥ गौतमोक्तदुर्मणोपलक्षणंएकयोगनिर्देशात् । सर्वेषांतुल्यधर्माणामे कस्यापियदुच्यते ॥ सर्वेषांतत्समंज्ञेयमेकरूपाहितेस्मृताइत्युशनसोक्तेश्च ॥ तच्चकृतक्रियाणामेवेतिवक्ष्यामः **मरीचिः** विषशस्त्रश्वापदाहितिर्यग्ब्राह्म णघातिनां ॥ चतुर्दश्यांक्रियाःकार्याअन्येषांतुविगर्हिताः ॥ अत्रब्राह्मण घातीतेनहतोनतुब्रह्महा । तस्यपतितत्त्वादितिशूलपाणिः । अत्रोद्देश्यविशे षणस्याविवक्षितत्वात् । स्त्रीणामपिशस्त्रादिहतानामेकोद्दिष्टंकार्यनपार्वणमि तिश्रीदत्तोपाध्यायः।इदंविषादिहतानामेवनप्रसवादिमृतानामितिवाचस्पतिः **यत्तुशाकटायनः** जलाग्निभ्यांविपन्नानांसंन्यासेवागृहेपथि ॥ श्राद्धंकुर्वी ततेषांवैवर्जयित्वाचतुर्दशीमिति ॥ तत्प्रायश्चित्तार्थजलादिमृतविषयमित्या करेउक्तम् । अतएववैधत्वात्सहगमनेपिनकार्यमितिहेमाद्रिः **एतच्चैव युक्तमेकोद्दिष्टंकार्यमित्युक्तंप्रयोगपारिजाते** प्रेतपक्षेचतुर्दश्यामेकोद्दिष्टं विधानतः ॥ दैवयुक्तंतुतच्छ्राद्धंपितॄणामक्षयंभवेत् ॥ तच्छ्राद्धंदैवहीनंचेत् पुत्रदारधनक्षयः ॥ एकोद्दिष्टंदैवयुक्तमित्येवंमनुरब्रीत् **भविष्येपि** समत्व मातरस्यापिपितुःशस्त्रहतस्यच ॥ चतुर्दश्यांतुकर्तव्यमेकोद्दिष्टंमहालये॥चतु र्दश्यांतुयच्छ्राद्धंसपिंडीकरणेकृते ॥ एकोद्दिष्टविधानेनततत्कार्यंशस्त्रघातिनइ ति **संवत्सरप्रदीपेहारीतः** विश्वेदेवांश्चतत्रापिपूजयित्वादितोमलान् ॥ येवै

शस्त्रहतास्तेषांश्राद्धंकुर्यादतंद्रितः ॥ अत्रैकोद्दिष्टवचनानांनिर्मूलत्वं । समूलत्वेपिपार्वणाशक्तपराणि । विष्ण्वादिवचनैःप्रकरणात्कृष्णपक्षीयपार्वणावगतेरितिशूलापाणिः । तन्न वाक्येनप्रकरणस्यबाधात् । पित्रादीनांपार्वणंभ्रात्रादीनामेकोद्दिष्टमितिगौडार्वाञ्चः । तन्नपितुरित्यनेनविरोधात् । विशेषवाक्यवैयर्थ्यापत्तेश्चात्रशस्त्रहतस्यैवचतुर्दश्यामितिनियमोनतुचतुर्दश्यामेवशस्त्रहतस्येति । श्राद्धंशस्त्रहतस्यैवचतुर्दश्यांमहालये ॥ इतिकालादर्शात् । वार्षिकादीनामकरणापत्तेश्च । तेनमहालयेएव । दिनांतरेपार्वणंमातामहादितुष्टयर्थंकार्यमेव । पितामहोपिशस्त्रहतश्चेदेकोद्दिष्टत्रयंकार्यं **तदुक्तंहेमाद्रौस्मृत्यंतरे** एकस्मिन्द्वयोर्वैकोद्दिष्टमिति । त्रिषुशस्त्रहतेषुपार्वणमेवकार्यं । यत्तुदेवस्वामिनोक्तं त्रिष्वपिशस्त्रहतेषुपृथगेकोद्दिष्टत्रयंकार्यं । नतुपार्वणमाहत्यवचनाभावादितितदयुक्तं । पित्रादयस्त्रयोयस्यशस्त्रैर्यातास्त्वनुक्रमात् ॥ सभूतेपार्वणंकुर्यादाब्दिकानिपृथक्पृथगितिबृहत्पराशरोक्तेः । एकस्मिन्वाद्वयोर्वापिविद्युच्छस्त्रेणवाहते ॥ एकोद्दिष्टंसुतःकुर्यात्त्रयाणांदर्शवद्भवेदितिस्मृत्यंतराच्चेति पृथिवीचंद्रोदयेउक्तं ॥ अपरार्केहेमाद्रौचैवं । यस्तुअत्रैवशस्त्रादिनाहतस्तस्यवार्षिकमेवपार्वणमेकोद्दिष्टंवाकार्यनतुश्राद्धद्वयं । प्रसंगसिद्धे **पृथिवीचंद्रोदये** अत्रश्राद्धाकरणेग्रिमापरपक्षेदिनांतरेपार्वणेनैवकार्यमितित्रैवोक्तं **यद्यपि** शस्त्रविप्रहतानांचशृङ्गिदंष्ट्रिसरीसृपैः ॥ आत्मनस्त्यागिनांचैवश्राद्धमेषांनकारयेदितिछागलेयाद्यैःशस्त्रादिहतानांश्राद्धंनिषिद्धं । तथापिप्रमादमृतानांश्राद्धार्हत्वात्कार्यवृद्धादिभिन्नबुद्धिपूर्वमृतानांतुनकार्यं **यत्तु** चतुर्दश्यांतर्पणीयालुप्तपिंडोदककक्रियाः ॥ इतिब्राह्मेतद्गौणमितिशूलपाणिः लक्षणायांमानाभावात् । पतितेनापिकर्तव्यंकर्तव्यंपतितस्यचेति ॥ गयादितुतद्विशेषविधिबलात् । पतितानामपिकार्यमितिनव्यगौडाः । तत्त्वंतुसमत्वमागतस्येत्यादिवशात्कृतक्रियाणांकार्यनान्येषामितिवयंप्रतीमः **यत्तुमनुः** नपैतृयज्ञियोहोमोलौकिकाग्नौविधीयते ॥ नदर्शेनविनाश्राद्धमाहिताग्नेर्विधीयतइति ॥ अत्रपूर्वार्द्धहेतुत्वेनोक्तं । तद्यथाश्रुतमेवमन्वतेपृथ्वीचंद्रोद

यादयः । आहिताग्नेःपिंडपितृयज्ञकल्पेनश्राद्धनिषेधार्थमिदंनतुसाकल्यादे रपीत्यस्मद्गुरवः । कृष्णपक्षश्राद्धमन्यदिनेषुप्राप्तयाहिताग्नेर्दर्शेनियम्यतइ तितुवयं । दर्शेनपार्वणेनविनाश्राद्धंन । तेनकापिवार्षिकादावेकोद्दिष्टंनेति हरिहरः । इतिचतुर्दशी **अमायांविशेषमाहापरार्केयमः** हंसेकरस्थितेया तुअमावास्याकरान्विता ॥ साज्ञेयाकुंजरच्छायाइतिबौधायानोब्रवीत् ॥ वन स्पतिगतेसोमेछायायाप्राङ्मुखीभवेत् ॥ गजच्छायातुसाप्रोक्तातस्यांश्राद्धंप्र कल्पयेत् **भारते** अजेनसर्वलोहेनवर्षासुनियतव्रतः॥हस्तिच्छायासुविधिवत् कर्णव्यजनवीजितं ॥ श्राद्धंदद्यादितिशेषः । आश्विनशुक्लप्रतिपदि दौहि त्रस्यमातामहश्राद्धमुक्तं **हेमाद्रौसंग्रहेच** जातमात्रोपिदौहित्रो विद्यमाने पितामातुले ॥ कुर्यान्मातामहश्राद्धंप्रतिपद्याश्विनेसितइति ॥ इयंसंगवव्यापि नीग्राह्येतिनिर्णयदीपेउक्तं । प्रतिपद्याश्विनेशुक्लेदौहित्रस्त्वेकपार्वणं ॥ श्रा द्धंमातामहंकुर्यात्सपितासंगवेसदा॥जातमात्रोपिदौहित्रोजीवत्यपिचमातुले॥ प्रातःसंगवयोर्मध्येआर्यस्यप्रतिपद्भवेदितिवचनात् । अत्रसमूलत्वंविमृश्यं इदंचमलमासेनकार्यं। स्पष्टमासविशेषाख्याविहितंवर्जयेन्मले इतिनिषेधात् इदंचजीवत्पितृकेणैवकार्यमितिशिष्टाः । इदंचशिष्टाचारात्सपिंडकंकार्य मितिकेचित् । पिंडरहितंतुयुक्तं **जीवत्पितृकस्य** मुंडनंपिंडदानंचप्रेतक र्मचसर्वशः ॥ नजीवत्पितृकःकुर्याद्वुर्विणीपतिरेवचेतिदक्षेणपिंडनिषेधात् आन्वष्टक्यवद्विशेषवचनाभावाच्चेतिसंक्षेपः ॥

॥ इतिकमलाकरभट्टकृते निर्णयसिंधौ महालयनिर्णयः ॥

अथाश्विनशुक्लप्रतिपदिनवरात्रारंभः तत्रभार्गवार्चनदीपिका यांदेवीपुराणे सुमेधाउवा । शुणुराजन्प्रवक्ष्यामि चंडिकापूजनक्रम म् ॥ आश्विनस्यसितेपक्षेप्रतिपत्सुशुभेदिनइत्युपक्रम्योक्तं । शुद्धेतिथौप्रकर्त व्यं प्रतिपच्चोर्ध्वगामिनी ॥ आद्यास्तुनाडिकास्त्यक्त्वाषोडशद्वादशापिवा ॥ अपराह्णेचकर्तव्यंशुद्धसंततिकांक्षिभिः॥ इदंचापराह्णयोगिन्याःप्राशस्त्यंद्वितीयदिनेप्रतिपदोभावेज्ञेयम् **तथातत्रैवदेवीपुराणे डामरतंत्रेचदेवीवचः** अमा

युक्तानकर्त्तव्दाप्रतिपत्पूजनेमम॥मुहूर्तमात्राकर्तव्याद्वितीयादिगुणान्विता॥ आद्याःषोडशनाडीस्तुलब्ध्वायःकुरुतेनरः ॥ कलशस्थापनंतत्रह्यरिष्टंजायते ध्रुवं॥**मार्कंडेयदेवीपुराणयो**:पूर्वाविद्धातुयाशुक्लाभवेत्प्रतिपदाश्विनी ॥ नव रात्रव्रतंतस्यांनकार्यंशुभमिच्छता॥देशभंगोभवेत्तत्रदुर्भिक्षंचोपचायते॥ नंदा यांदर्शयुक्तायांयत्रस्यान्ममपूजनमिति **स्कांदेपि** प्रतिपद्याश्विनेमासिसाशुद्धा शुभदाभवेत्॥भाद्रपंचदशीकृष्णातथायुक्तानशस्यते॥ विरुद्धफलदासाहि पुत्रदारभयावहेति **तथा** वर्जनीयाप्रयत्नेन अमायुक्तातुपार्थिव ॥ द्वितीयादिगुणैर्युक्ताप्रतिपत्सर्वकामदा **तथादेवीपुराणे** योमांपूजयतेनित्यं द्वितीयादिगुणान्विताम् प्रपिपच्छारदींज्ञात्वासोश्नुतेसुखमव्ययं ॥ यदिकुर्यादमायुक्तां प्रतिपत्स्थापनेमम ॥ तस्यशापायुतंदत्वाभस्मशेषंकरोम्यहं ॥ आग्रहात्कुरुतेयस्तुकलशस्थापनंमम ॥ तस्यसंपद्विनाशःस्याज्येष्ठःपुत्रोविनश्यति ॥ अमायुक्तानकर्तव्याप्रतिपच्चंडिकार्चने ॥ धनार्थिभिर्विशेषेणवंशहानिश्चजायते ॥ नदर्शकलयायुक्ताप्रतिपच्चंडिकार्चने ॥ उदयेद्विमुहूर्तापिग्राह्यासोदयदायिनी ति **देवीपुराणे** याचाश्वयुजिमासेस्यात् प्रतिपद्भद्रयान्विता ॥ शुद्धामभार्चनं तस्यांशतयज्ञफलप्रदं **रुद्रयामले** अमायुक्तासदाचैवप्रतिपन्निंदितामता तत्रचेत्स्थापयेत्कुंभंदुर्भिक्षंजायतेध्रुवं॥प्रतिपत्सद्वितीयातुकुंभारोपणकर्मणीति ॥ यद्यपिरुद्रयामलंडामरंचनिर्मूलंतथाप्यविरोधात्प्रचाराच्चतद्वचनानिलिख्यंते **तिथितत्त्वेदेवीपुराणेपि** प्रातरावाहयेद्देवींप्रातरेवप्रवेशयेत् ॥ प्रातःप्रातश्चसंपूज्यप्रातरेवविसर्जयेत् **तत्रैव** शरत्कालेमहापूजाक्रियतेयाचवार्षिकी ॥ साकार्योदयगामिन्यांनतत्रतिथियुग्मता **तथा** कुहूकाष्ठोपसंयुक्तांवर्जयेत्प्रतिपत्तिथिं ॥ राज्यनाशायसाप्रोक्तानिंदिताचाश्वपूजनइति ॥ एषुवचनेषुकलशस्थापनग्रहणात् तदेवप्रथमदिनेनिषिध्यते नतूपवासादि ॥ तस्यप्रतिपद्यप्यमावास्येतियुग्मवाक्यात्। शुक्लास्यात्प्रतिपत्तिथिःप्रथमतइति दीपिकोक्तेः । शुक्लपक्षेदर्शविद्धेतिमाधवोक्तेश्च **पूर्वदिनेप्राप्तस्यबाधे** मानाभावादितिकेचित् । वस्तुतस्तुपूर्वोक्तवाक्येषुचंडिकार्चनपुजाग्रहणादुपवासा

देश्चांगत्वात्प्रधानदेवीपूजादावपिपरेतियुक्तंकलशस्थापनग्रहणंतूपलक्षणं अतएवदेवलः व्रतोपवासनियमेघटिकैकापियाभवेत् ॥ सातिथिस्तद्दिनेपूज्याविपरीतातुपैतृकइति ॥ अत्रघटिकामुहूर्तइतिगौडाः ॥ यदातुपूर्वदिनेसंपूर्णाशुद्धाचभूत्वापरदिनेवर्धतेतदासंपूर्णत्वादमायोगाभावाच्चपूर्वैव ॥ यानिचाद्वितीयायेागनिषेधकानिवचनानिकेचित्पठंतितान्यपिशुद्धाधिकनिषेधपराणि । परदिनेप्रतिपदोत्यंतासत्त्वेतुदर्शयुतापिपूर्वैवग्राह्या तदाहलल्लःतिथिः शरीरंतिथिरेवकरणंतिथिःप्रमाणंतिथिरेवसाधनमिति ॥यानित्वमायुक्ताप्रकर्तव्येत्यादीनिनृसिंहप्रसादेवचनानितानिसमूलत्वेसत्येतद्विषयाणि ॥अत्रेदंतत्वम्।पूर्वोक्तवाक्यानांसर्वेषांहेमाद्याद्यलिखितत्वेननिर्मूलत्वात्तैश्चान्यनिर्णयस्यानुक्तेःसामान्यनिर्णयात्पूर्ववत्प्राप्तावपिगौडनिबंधेषुविशेषनिर्णयादौदयिकीग्राह्या।तत्रापिघटिकैकेत्यस्यद्विमुहूर्तस्तुतित्वोक्तेर्द्विमूहूर्ताग्राह्या। उदितेदैवतंभानावित्यत्रद्विमुहुर्तात्रिरद्धश्चेतिऔदयिक्याद्विमुहूर्तत्वनियमाच्च । तेनउदयेद्विमुहूर्तापीत्याद्यनुसारोपिमुहूर्तमात्राकर्तव्येतिद्विमुहूर्तस्तुतिः । अन्यथाद्विमुहूर्तविधिवैयर्थ्यात्। केचित्तुमुहूर्तमात्रेतिवचनात्ततोन्यूनत्वेपरानेत्याहुःगौडाअप्येवम्। अत्रदेवीपूजैवप्रधानम्।उपवासादित्वंगं । अष्टम्यांचनवम्यांचजगन्मातरमंबिकां ॥ पूजयित्वाश्विनेमासिविशोकोजायतेनरइतिहेमाद्रौभविष्येतस्याएवफलसंबंधात् । नवमीतिथिपर्यंतंवृध्यापूजाजपादिकमितितत्रैवदेवीपुराणात् । शरत्कालेमहापूजाक्रियतेयाचवार्षिकीतिमार्कंडेयपुराणाच्चपूर्ववचनादष्टमीनवमीपूजैवप्रधानमन्यत्सर्वमंगमितिगौडाः एकाहपक्षोपिकालिकापुराणे ॥ यस्त्वेकस्त्वामथाष्टम्यांनवम्यामथसाधकः ॥ पूजयेद्वरदांदेवींमहाविभवविस्तरैरिति ॥ तत्त्वंतुराजसूयेन्ययागैःसमप्रधानायाःसहिताअप्येवेष्टेरेतयान्नाद्यकामंयाजयेदित्येकत्वान्मध्येविधानाच्च यथाफलार्थोबहिःप्रयोगस्तथानवरात्रमध्यस्थायाअष्टम्यानवम्यावाफलार्थः पृथक्प्रयोगरूपनारायणधृतदेवीपुराणे । महानवम्यांपूजेयंसर्वकामप्रदायिका ॥ सर्वेषुवत्सवर्णेषुतवभक्त्याप्रकीर्तिता ॥ कृत्वाप्नोतियशोराज्यपुत्रायुर्धनसंपदः साचका

म्यानित्याच । एवमन्यैरपितथादेव्याःकार्यप्रपूजनम् ॥ विभूतिमतुलांलब्धु चतुर्वर्गप्रदायिकामिति ॥ योमोहादथवालस्याद्देवींदुर्गांमहोत्सवे ॥ नपूज तिदंभाद्वाद्वेषाद्वाप्यत्रभैरव ॥ क्रुद्धाभगवतीतस्यकामानिष्टान्निहंतिवै इति कालिकापुराणेफलनिंदाश्रुतेः । वर्षेवर्षेविधातव्यंस्थापनंचविसर्जनामितिति थितत्त्वेदेवीपुराणाच्च । अत्रोपवासादिकमुक्तंहेमाद्रौभविष्ये । एवंचविं ध्यवासिन्यांनवरात्रोपवासतः । एकभक्तेननक्तेनतथैवायाचितेनच ॥ पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरे ॥ गृहेगृहेशक्तिपरैर्ग्रामेग्रामेवनेवने ॥ स्नातैःप्रमुदितैर्हृष्टैर्ब्राह्मणैःक्षत्रियैर्नृपैः ॥ वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति ॥ यत्तुरूपनारायणीयेभविष्ये एवंनानाम्लेच्छगणैःपूज्यतेसर्व दस्युभिरितितत्तामसपूजापरं । विनामंत्रैस्तामसीस्यात्किरातानांतुसंमतेति तत्रैवोक्तेः ॥ मदनरत्नेदेवीपुराणेपि कन्यासंस्थेरवौशक्रशुक्लामारभ्यनंदि कां ॥ अयाचीह्यथवैकाशीनक्ताशीवाथवावदः ॥ भूमौशयीतचामंत्र्यकुमारी भोजयेन्मुदा ॥ वस्त्रालंकारदानैश्चसंतोष्याःप्रतिवासरं ॥ बलिंचप्रत्यहंदद्यादो दनंमांसमाषवत् ॥ त्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति ॥ नंदिकाप्रति पत्तिथिरिति मैथिलाः । षष्ठीतिगौडाः । तच्चपूजनंरात्रौकार्यम् । आश्विनेमा सिमेघांतेमहिषासुरमर्दिनीम् ॥ निशासुपूजयेद्भक्त्यासोपवासादिकःक्रमादि तिदेवीपुराणात् संग्रहेपि आश्विनेमासिमेघांतेप्रतिपद्यातिथिर्भवेत् ॥ त स्यांनक्तंप्रकुर्वीतरात्रौदेवींचपूजयेत् ॥ रात्रिरूपायतोदेवीदिवारूपोमहेश्वरः ॥ रात्रिव्रतमिदंदेविसर्वपापप्रणाशनम् ॥ सर्वकामप्रदंनृणांसर्वशत्रुनिबर्हणं ॥ रात्रिव्रताभिदंतस्यरात्रौकर्तव्यतेष्यते ॥ नक्तव्रतमिदं यस्मादन्यथानरकेगति रित्यादिवचनाच्चरात्रिव्रतत्वमेवाभिप्रेत्यमाधवेनोक्तम् । तस्यनक्तव्रतत्वादि ति नतुरात्रिभोजनात् । ननु । मासिचाश्वयुजेशुक्लेनवरात्रेविशेषतः ॥ संपूज्य नवदुर्गांचनक्तंकुर्यात्समाहितः ॥ नवरात्राभिधंकर्मनक्तव्रतमिदंस्मृतम् ॥ आरंभेनवरात्रस्येत्यादिस्कांदात् । माधवोक्तेश्चनक्तमेवप्रधानमितिचेन्न । न वरात्रोपवासतइत्यादेरनुपपत्तेः । तेनपाक्षिकनक्तानुवादोयम् । नित्यनित्या

संयोगविरोधात् । नह्यग्निहोत्रेदर्शमपक्षेप्रातस्यदध्नाजुहोतीत्यस्येंद्रियकाम होमेनुवादोघटते । नित्यवदनुवादायोगादित्युक्तंवार्तिकेतथात्रापि । तेनात्र तद्वदेवगुणात्फलमितिज्ञेयं । ननुरात्रेःकर्मकालत्वेतद्व्याप्तिनीपूर्वैवप्रतिपत् प्राप्नुयात् । मैवंन्यायतःप्राप्तावपिपूर्वोक्तवचनैर्बाधात् । यथापूर्वेद्युःकर्मका लव्याप्तिनीमपित्यक्त्वास्वल्पापिपरैवरामनवमीतिप्रागुक्तं । यथावानिशीथेस तीमपिपूर्वांजन्माष्टमींत्यक्त्वारोहिणीयुक्तापरैवेतिमाधवेनोक्तं । तथात्रापिव स्तुतस्तु रात्रेःकर्मकालत्ववचसांहेमाद्याद्यालिखनात् समूलत्वंविमृश्यमेव । त्रिकालंपूजयेदित्यादि पूर्वविरोधाच्चमाधवोक्तिस्तुपाक्षिकनक्तानुवादइत्युक्तं । तस्मात्सर्वपक्षेषुपरैवप्रतिपदितिसिद्धम् । अत्रकेचिन्नवरात्रशब्दोनवाहोरात्रप रःवृद्धौसमाप्तिरष्टम्यांह्रासेमाप्रतिपन्निशि ॥प्रारंभोनवचंड्यास्तुनवरात्रमतोर्थ वदितिदेवीपुराणादित्याहुः । तन्न अतिह्रासवृद्ध्योर्न्यूनाधिकत्वापत्तेः ॥अत्र मूलाभावाच्चतेनतिथिवाच्येवायं तदुक्तं तिथिवृद्धौतिथिह्रासेनवरात्रमपार्थक म्॥अष्टरात्रेनदोषोयंनवरात्रतिथिक्षयइति ॥सचनवरात्रशब्दः क्वचिल्लक्षणया कर्मवाची यथाप्रारंभोनवरात्रस्येत्यत्रेतिदिक् ॥ प्रतिपदिचवैधृत्यादियोग निषेधोभागवार्चनदीपिकायां देवीपुराणे त्वाष्ट्रवैधृतियुक्ताचेत्प्रपतिपच्चंडि कार्चने ॥तयोरंतेविधातव्यंकलशारोपणंगृहेति । चित्रावैधृतियुक्तापिद्वितीया युताचेत्सैवग्राह्येत्युक्तं। दुर्गोत्सवे भद्रान्विताचेत्प्रतिपच्चलभ्यतेविरुद्धयोगै रपिसंगतासती ॥ सैवापराह्णेविबुधैर्विधेयाश्रीपुत्रराज्यादिविवृद्धिहेतुरिति ॥ यदातुवैधृत्यादिपरिहारेणप्रतिपन्नलभ्यते तदुक्तंतत्रैवकात्यायनेन प्रति पद्याश्विनेमासिभवेद्वैधृतिचित्रयोः ॥ आद्यपादौपरित्यज्यप्रारभेन्नवरात्रक मिति भविष्येपि चित्रावैधृतिसंपूर्णाप्रतिपच्चेद्भवेन्नृप । त्याज्याद्यांशास्त्र यस्त्वाद्यास्तुरीयांशेतुपूजनमिति रुद्रयामलेपि वैधृतौपुत्रनाशःस्याच्चि त्रायांधननाशनम् ॥ तस्मान्नस्थापयेत्कुंभंचित्रायांवैधृतौतथा ॥ संपूर्णाप्र तिपद्देवचित्रायुक्तायदाभवेत् ॥ वैधृत्यावापियुक्तास्यात्तदामध्यंदिनेरवौ ॥ अभिजित्तुमुहूर्तंयत्तत्रस्थापनामिष्यतइति ॥ चित्रादिनिषेधेमूलंचिंत्यम् ।

इदंकलशस्थापनंरात्रौनकार्यं । नरात्रौस्थापनंकार्यनचकुंभाभिषेचनमिति मात्स्योक्तेः । भास्करोदयमारभ्ययावत्तुदशानडिकाः ॥ प्रातःकालइति प्रोक्तः स्थापनारोपणादिष्विति ॥ विष्णुधर्मोक्तेश्च रुद्रयामले स्नानं मांगलिकंकृत्वाततोदेवींप्रपूजयेत् ॥ शुभाभिर्मृत्तिकाभिश्चपूर्वंकृत्वातुवे दिकां ॥ यवान्वैवापयेत्तत्रगोधूमैश्चापिसंयुतान् ॥ तत्रसंस्थापयेत्कुम्भं विधिनामंत्रपूर्वकं ॥ सौवर्णराजतंवापिताम्रंमृन्मयजंतुवेति ॥ अथपूजाविधिः । सचजयंतीमंत्रेणनवाक्षरेणकार्यः तदुक्तंदुर्गाभक्तितरंगिण्यांदेवीपुराणे कुर्याद्देव्यास्तुमंत्रेणपूजांक्षीरघृतादिभिरित्युक्ता । जयंतीमंगलाकालीभद्रकालीकपालिनी ॥ दुर्गाक्षमाशिवाधात्रीस्वधास्वाहानमोस्तुते ॥ अनेनैवतुमंत्रेणजपहोमौतुकारयेदिति ॥ ॐदुर्गेदुर्गेरक्षिणिस्वाहेतिनवाक्षरः ॥ तत्रप्रतिपदिप्रातरभ्यंगंकृत्वा । देशकालौसंकीर्त्यममेहजन्मनिदुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्नसंततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रप्रतिपदिविहितकलशस्थापनं दुर्गापूजाकुमारीपूजादिकरिष्ये इतिसंकल्प्य महीद्यौरितिभूमिं स्पृष्ट्वाव । ओषधयःसमितियवान्निक्षिप्य । आकलशेष्वितिकुंभंस्थाप्य । इमंमेगंगेइतिजलेनापूर्य । गंधद्वारामितिगंधं । याओषधीरितिसर्वौषधीः । कांडात्कांडादितिदूर्वाः । अश्वत्थेवइतिपंचपल्लवान् । स्योनापृथिवीतिससमृदः याःफलिनीरितिफलं । सहिरत्नानीतिपंचरत्नानि हिरण्यंक्षिप्त्वा । युवासुवासाइतिवस्त्रेणावेष्टय । पूर्णदर्वीतिपूर्णपात्रंनिधाय । तत्रवरुणंसंपूज्य जीर्णायांनूतनायांवाप्रतिमायांदुर्गामावाह्यपूजयेत् । तद्यथा । पूर्वोक्तंमंत्रमुक्त्वा । आगच्छवरदेदेविदैत्यदर्पनिषूदनि ॥ पूजांगृहाणसुमुखिनमस्तेशंकरप्रिये ॥ सर्वतीर्थमयंवारिसर्वदेवसमन्वितम् ॥ इमंघटंसमागच्छतिष्ठदेवगणैःसह ॥ दुर्गेदेविसमागच्छसान्निध्यामिहकल्पय ॥ बलिंपूजांगृहाणत्वमष्टाभिःशक्तिभिःसहेत्यावाह्यपूर्वोक्तमंत्रेणषोडशोपचारैःपूजयित्वा । माषभक्तबलिंकूष्मांडादिबलिंवानिवेदयेत् । ततःकुमारीपूजा तदुक्तंहेमाद्रौस्कांदे

एकैकांपूजयेत्कन्यामेकवृद्ध्यातथैवच ॥ द्विगुणंत्रिगुणंवापिप्रत्येकंनवकंतुवा **तथा** नवभिर्लभतेभूमिमैश्वर्यंद्विगुणेनतु ॥ एकवृद्ध्यालभेत्क्षेममेकैकेनश्रियंलभेत् ॥ एकवर्षातुयाकन्यापूजार्थेतांविवर्जयेत् ॥ गंधपुष्पफलादीनांप्रीतिस्तस्यानविद्यते ॥ तेनद्विवर्षामारभ्यदशवर्षापर्यंताएवपूज्यानत्वन्याः । तासांचक्रमेणकुमारिकात्रिमूर्तिः । कल्याणीरोहिणीकालीचंडिकाशांभवीदुर्गासुभद्रेतिनामभिःपूजाकार्या । आसांचप्रत्येकंपूजामंत्राः फलविशेषाश्च तैत्रवेज्ञेयाः । सामान्यस्तु मंत्राक्षरमयींलक्ष्मींमातृणांरूपधारिणीं ॥ नवदुर्गात्मिकांसाक्षात्कन्यामावाहयाम्यहं ॥ एवमभ्यर्चनंकुर्यात्कुमारीणांप्रयत्नतः कंचुकैश्चैववस्त्रैश्चगंधपुष्पाक्षतादिभिः ॥ नानाविधिर्भक्ष्यभोज्यैर्भोजयेत्पायसादिभिः **तथा** ग्रंथिस्फुटितशीर्णांगींरक्तपूयव्रणांकितां ॥ जात्यंधांकेकरांकाणींकुरूपांतनुरोमशाम् ॥ संत्यजेद्रोगिणींकन्यांदासीगर्भसमुद्भवां **तथा** ब्राह्मणींसर्वकार्येषुजयार्थेनृपवंशजाम् ॥ लाभार्थेवैश्यवंशोत्थांसुतार्थेशूद्रवंशजाम् ॥ दारुणेचांत्यजातानांपूजयेद्विधिनानरइति **अत्रवेदपारायणमप्युक्तं रुद्रयामले** एवंचतुर्वेदविदोविप्रान्सर्चान्प्रसादयेत् ॥ तेषांचवरणंकार्यंवेवेदपारायणायवैइति **तथा** एकोत्तराभिवृद्ध्यातुनवमीयावदेवहि ॥ चंडीपाठंजपेच्चैवजापयेद्वाविधानतः **तिथितत्त्वेवाराहीतंत्रे** प्रणवंचादितोजप्त्वास्तोत्रंवासंहितांपठेत् ॥ अंतेचप्रणवंदद्यादित्युवाचादिपूरुषः ॥ आधारेस्थापयित्वातुपुस्तकंप्रजपेत्सुधीः ॥ हस्तसंस्थापनादेवयस्मा द्वैविफलंभवेत् ॥ स्वयंचलिखितंयच्चशूद्रेणलिखितंभवेत् ॥ अब्राह्मणेनलिखितंतच्चापिविफलंभवेत्॥ऋषिच्छंदादिकंन्यस्यपठेत्स्तोत्रंविचक्षणः ॥ स्तोत्रेनदृश्यतेयत्र प्रणवंतत्रविन्यसेत् ॥ सर्वत्रपाठेविज्ञेयस्त्वन्यथाविफलंभवेत् एवंनवमीपर्यंतंप्रत्यहंकुर्यात् **अत्रविशेषोहेमाद्रौदेवीपुराणे** यदाद्येदिवसेकुर्याच्चंडिकापूजनादिकं ॥ द्विगुणंतद्द्वितीयेह्नित्रिगुणंतत्परेहनि ॥ नवमीतिथिपर्यंतंवृद्ध्यापूजाजपादिकमिति ॥ एतेननवरात्रेपूजैवप्रधानं । उपवासादित्वंगमितिगम्यते । तिथिह्रासेतुतिथिद्वयनिमित्तंपूजादिमहालयश्राद्धवदेक

दिनेआवृत्त्याकार्यं । वृद्धौतद्वदेवावृत्तिःततोनवरात्रोपवासादिसंकल्पंकुर्यात् । स्वस्याशक्तावन्येनवापूजादिकारयेत् । स्वयंवाप्यन्यतोवापिपूजयेत् पूजयीतवेतितरंगिण्यांदेवीपुराणात् इदंचदेवीपूजनंशुक्रास्तादावपिकार्यं तदुक्तंधर्मप्रदीपे नष्टेशुक्रेतथाजीवेसिंहस्थेचबृहस्पतौ॥कार्याचैवस्वदेव्यर्च्याप्रत्यब्दंकुलधर्मतइति ॥मलमासेतुवचनाभावान्नभवतिअत्रसाश्वस्याश्वपूजनमुक्तम् मदनरत्नेदेवीपुराणे आश्वयुक्शुक्लप्रतिपत्स्वातीयोगेशुभेदिने ॥ पूर्वमुच्चैश्रवानामप्रथमंश्रियमावहत् ॥ तस्मात्साश्वैर्नरैस्तत्रपूज्योसौश्रद्धयासह ॥ पूजनीयाश्चतुरगानवमीयावदेवहि ॥ शांतिःस्वस्त्ययनंकार्यंतदातेषांदिनेदिने धान्यंभल्लातकंकुष्ठंवचासिद्धार्थकास्तथा ॥ पंचवर्णेनसूत्रेणग्रंथितेषांतुबंधयेत् ॥ वायव्यैर्वारुणैःसौरैःशाक्तैर्मंत्रैःसवैष्णवैः ॥ वैश्वदेवैस्तथाग्नेयैर्होमःकार्योदिनेदिने ॥ कल्पतरौत्वेतदग्रेन्यदपि ॥ ज्येष्ठयोगेपुरातत्रगजाश्चाष्टौमहाबलाः ॥ पृथिवीमवहन्पूर्वंसशैलवनकाननां ॥ कुमुदैरावणौपद्मःपुष्पदंतोथवामनः ॥ सुप्रतीकोंजनोनीलस्तस्मात्तांस्तत्रपूजयेत् ॥ शाक्रादृक्षात्समारभ्यनवम्यंतंचपूर्ववत् ॥ अश्ववद्धोमादीत्यर्थः अथप्रतिपदादिषुविशेषोदुर्गाभक्तितरंगिण्यांभविष्ये केशसंस्कारद्रव्याणिप्रदद्यात्प्रतिपदिने ॥ पक्कतैलंद्वितीयायांकेशसंयमहेतवे ॥ पट्टाडोरमितिगौडपादः । दर्पणंचतृतीयायांसिंदूरालक्तकंतथा ॥ मधुपर्कंचतुर्थ्यांतुतिलकंनेत्रमंडनं ॥ पंचम्यामंगरागंचशक्त्यालंकरणानिच ॥ षष्ठयांबिल्वतरौबोधंसायंसंध्यासुकारयेत् ॥ सप्तम्यांप्रातरानीयगृहमध्येप्रपूजयेत् ॥ उपोषणमथाष्टम्यामात्मशक्त्याचपूजनं॥नवम्यामुग्रचंडायाःपूजांकुर्याद्बलिंतथा ॥ संपूज्यप्रेषणंकुर्याद्दशम्यांसारवोत्सवैः ॥ अनेनविधिनायस्तुदेवींप्रीणयतेनरः ॥ स्कंदवत्पालयेद्देवीतंपुत्रधनकीर्तिभिः कृत्यतत्त्वार्णवेलिंगे कन्यायांकृष्णपक्षेतुपूजयित्वार्द्रभेपिवा॥ नवम्यांबोधयेद्देवींमहाविभवविस्तरैः॥शुक्लपक्षेचतुर्थ्यांतुदेवीकेशविमोक्षणं ॥ प्रातरेवतुपंचम्यांस्नापयेत्सुशुभैर्जलैः ॥ षष्ठयांसायमकुर्वीतबिल्ववृक्षेधिवासनं ॥ सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणं ॥ पूजाचजागरश्चैवनवम्या

विधिवद्बलिः ॥ विसर्जनंदशम्यांतुक्रीडाकौतुकमंगलैः ॥ अत्रनवम्यांबोध नासामर्थ्येषष्ठ्यांबोधनमितिस्मार्ताः ॥ फलभूमार्थिनःसमुच्चयइत्यन्ये **नव म्यांमंत्रःकालिकापुराणे** इषेमास्यासितेपक्षेनवम्यामार्द्रभेदिवा ॥ श्रीवृक्षेबोध यामित्वांयावत्पूजांकरोम्यहं ॥ अत्रस्त्रीव्रतेविशेषःपरिभाषायांज्ञेयः । **अथा शौचेविशेषानिर्णयामृतेविश्वरूपनिबंधे** आश्विनेशुक्लपक्षेतुप्रारब्धेनव रात्रके ॥ शावाशौचेसमुत्पन्नेक्रियाकार्याकथंबुधैः ॥ सूतकेवर्तमानेचतत्रोत्प न्नेसदाबुधैः॥देवीपूजाप्रकर्तव्यापशुयज्ञविधानतः ॥ सूतकेपूजनंप्रोक्तंदानंचै वविशेषतः ॥ देवीमुद्दिश्यकर्तव्यंतत्रदोषोनविद्यतइति **कालादर्शेविष्णुरह स्येपि** पूर्वसंकल्पितंयच्चव्रतंसुनियतव्रतैः ॥ तत्कर्तव्यंनरैःशुद्धंदानाचनर्नवि वर्जितमितिगौडनिबंधेतिथितत्वेप्युक्तं आश्विनकृष्णनवम्यादिशुक्लप्रतिपदा दिषष्ठ्यादिसप्तम्यादिचैकंकर्म अतश्चमध्येआशौचपातेपिनदोषः संकल्पोव्र तसत्रयोरितिविष्णूक्तेरिति आरब्धंस्वयमेवकार्यं अनारब्धंत्वन्येनकारये दितिदिवोदासःरजस्वलात्वन्येनकारयेत्सूतकादिवद्विशेषवचनाभावात्स्त्री णांचनवरात्रेतांबूलादिचर्वणंभवति **तदुक्तंव्रतहेमाद्रौगारुडे** गंधालंकारतां बूलपुष्पमालानुलेपनं ॥ उपवासेनदुष्यंतिदंतधावनमंजनमितिएतत्सभर्तृको पवासविषयं अन्यश्चात्रविशेषःपरिभाषायामुक्तःआश्विनशुक्लपचम्यामुपांगल लिताव्रतं महाराष्ट्रेषुप्रसिद्धं तत्रयद्यपिकथायांकालविशेषोनोक्तस्तथापिरात्रौ जागरणंकुर्याद्गीतवादित्रनिःस्वनैरितिरात्रौजागरोक्तेः शक्तिपूजायारात्रौप्रा शस्त्याच्च रात्रिव्यापिनीग्राह्येतिकेचित् वस्तुतस्तुवचनंविनारात्रिपूजायांमा नाभावाच्चजागरस्यचांगत्वाद्युग्मवाक्याच्च भुक्त्वाजागरणेनक्तेचंद्राद्यर्घ्यंव्र तेतथा ॥ तारात्रतेषुसर्वेषुरात्रियोगोविशिष्यतइतिकालहेमाद्रौवचनाच्चपूर्वावि द्धाग्राह्या रात्रिशब्दःपूर्वविद्धावचनइतिहेमाद्रिः अस्यचभुक्त्वाजागरणरूप त्वादितिसाधुप्रतीमः भुक्त्वाजागरणंयत्रेत्येकंपदं तस्मिन्व्रतेइत्यर्थःअन्य थाभुक्त्वेत्यसंगतेः दिवोदासीयेप्येवं आश्विनशुक्लपक्षेमूलनक्षत्रेसरस्वतीस्था पनं **यथोक्तंनिर्णयामृतेदेवीपुराणे** मूलेषुस्थापनंदेव्याःपूर्वाषाढासुपूजनं ॥

उत्तरासुबलिंदद्याच्छ्रवणेनविसर्जयेदिति **रुद्रयामलेपि** मूलऋक्षेसुराधीशपू जनीयासरस्वती ॥ पूजयेत्प्रत्यहंदेवयावद्वैष्णवमृक्षकं ॥ नाध्यापयेन्न चलिखेन्नाधीयीतकदाचन ॥ पुस्तकेस्थापितेदेवविद्याकामोद्विजोत्तमाः ॥ **संग्रहे** आश्विनस्यसितेपक्षेमेधाकामः सरस्वतीम् ॥ मूलेनावाहयेद्देवींश्रवणे नविसर्जयेत् ॥ मूलस्याद्यपादेआवाहनमितिशिष्टाः श्रवणाद्यपादेचविसर्जये त् आदिभागोनिशायांतुश्रवणस्ययदाभवेत् ॥ संप्रेषणंतदादेव्यादशम्यांचम होत्सवइति॥चिंतामणौब्रह्मांडपुराणात्अथषष्ठी **गौडनिबंधेदेवीपुराणे** ज्ये ष्ठानक्षत्रयुक्तायांषष्ठ्यांबिल्वाभिमंत्रणं ॥ सप्तम्यांमूलयुक्तायांपत्रिकायाःप्रवे शनं ॥ पूर्वाषाढायुताष्टम्यांपूजाहोमाद्युपोषणं ॥ उत्तरेणनवम्यांतुबलिभिः पूजयेच्छिवाम् ॥ श्रवणेनदशम्यांतुप्राणिपत्यविसर्जयेत् **कालिकापुराणे** बो धयेद्बिल्वशाखायांषष्ठ्यांदेवींफलेषुच ॥ सप्तम्यांबिल्वशाखांतामाहृत्यप्रति पूजयेत् ॥ पुनःपूजांतथाष्टम्यांविशेषेणसमाचरेत् ॥ जागरंचस्वयंकुर्याद्बलि दानंमहानिशि ॥ प्रभूतबलिदानंतुनवम्यांविधिवच्चरेत् ॥ विसर्जनंदशम्या तुकुर्याद्वैसारवोत्सवैः ॥ धूलिकर्दमनिक्षेपैःक्रीडाकौतुकमंगलैः ॥ अत्रसर्व त्रतिथिनक्षत्रयोगादरोमुख्यःकल्पः तदभावेतुतिथिरेवग्राह्या । तिथिःशरीरंदे वस्यतिथौनक्षत्रमाश्रितं । तस्मात्तिथिंप्रशंसंतिनक्षत्रंनतिथिंनेति विद्यापति लिखितवचनात् तिथिनक्षत्रयोर्योगेद्वयोरेवानुपालनं ॥ योगाभावेतिथिर्गाह्या देव्याःपूजनकर्मणीतितत्रैवदेवलोक्तेश्च अत्रचपत्रीप्रवेशात्पूर्वेद्युःसायंका लेषष्ठ्यभावेतत्पूर्वदिनेधिवासनंकार्यं सायंकालेत्संतासत्त्वेत्यधिवासनलोपः षष्ठ्यांसायंप्रकुर्वीतबिल्ववृक्षेधिवासनमितिपूर्ववचनादितिकल्पतरुः सायंश्रु तिः फलातिशयमात्रार्था नतुकर्मलोपइत्याचार्यचूडामणिः अत्रक्रमः बिल्व समीपंगत्वादेवींबिल्वंचसंपूज्यप्रार्थयेत् तत्रमंत्रः ॥ रावणस्यवधार्थायराम स्यानुग्रहायच ॥ अकालेब्रह्मणाबोधोदेव्यास्त्वयिकृतःपुराः ॥ अहमत्याश्रि तःषष्ठ्यांसायाह्नेबोधयाम्यतः ॥ श्रीशैलशिखरेजातःश्रीफलःश्रीनिकेतनः ॥ नेतव्योसिसमागच्छपूज्योदुर्गास्वरूपतइतिएवंदेवीमधिवास्यपरदिने निमंत्रि

तबिल्वशाखापत्रीप्रवेशपूजांकुर्यात् तदुक्तंहेमाद्रौलैंगे मूलाभावेतुसप्तम्यांके वलायांप्रवेशयेत् ॥ युग्माभ्यांनवबिल्वस्यफलाभ्यांशाखिकांतथा । तथैवप्र तिमांदेव्याःस्नात्वाभ्युक्ष्यप्रवेशयेत् ॥ अत्रचोपवासपूजादावौदयिकीसप्तमी ग्राह्या ॥ नतुयुग्मवाक्यात्पूर्वा । युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया ॥ रवेरुदयमीक्षंतेनतत्रतिथियुग्मतेतिकृत्यतत्त्वार्णवोदाहृतवचनात् ॥ भगव त्याःप्रवेशादिविसर्गांताश्चयाःक्रियाः ॥ तिथावुदयगामिन्यांसर्वास्ताःकारये द्बुधः ॥ इतितिथितत्त्वेनंदिकेश्वरपुराणाच्च । दुर्गाभक्तितरंगिण्यामप्येवम् ॥ तत्रापिघटिकातोन्यूनत्त्वेपरानकार्या । व्रतोपवासनियमेघटिकैकापियाभ वेदितिदेवलोक्तेरितिगौडाः ॥ दाक्षिणात्यास्तुपूर्ववचनमदृष्ट्वायुग्मवाक्यात् पूर्वाकुर्वंति ॥ पत्रिकापूजाचपूर्वाह्णेएवकार्या । नतुमूलानुरोधान्मध्याह्नादा वितिकृत्यतत्त्वार्णवेउक्तं । पत्रिकास्तु । रंभाकवीहरिद्राचजयंतीबिल्वदाडि मौ । अशोकोमानवृक्षश्चधान्यादिनवपत्रिकाइतितत्रैवोक्ताः ॥ अस्यामेवस प्तम्यांदेवीत्रिरात्रमुक्तंहेमाद्रौ ॥ प्रतिपदादिनवतिथिषुउपवासकरणासामर्थ्ये सप्तम्यादिदिनत्रयेवाकुर्यात् तदाहधौम्यः आश्विनेमासिशुक्लेतुकर्तव्यंनवरा त्रकं । प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् ॥ त्रिरात्रंवापिकर्तव्यंसप्तम्या दियथाक्रमं अतएवहेमाद्रौदेवीपुराणेमंगलव्रते आश्विनेवाथवामाघेचैत्रे वाश्रवणेपिवा । कृष्णाष्टम्यादिकर्तव्यंव्रतंशुक्लावधिंहरेः । यावत्शुक्लाष्टमी शक्रउपोष्यातुविधानतः । दानंहोमोजपःपूजाकन्याभोज्यास्तथान्वहम् ॥ म हाभैरवरूपेणअस्थिमालधराश्चये । पूजनीयाविशेषेणवस्त्रैर्ग्रामपुरादिषु ॥ इ तिमासचतुष्टयेभिधाय ॥ अन्यत्रापि । अथवानवरात्रंचसप्तमंचत्रिकंदिवा ॥ एकभक्तेननक्तेनायाचितोपोषितैःक्रमादिति ॥ पूजयेताश्विनेशक्रयावच्छु क्लाष्टमीभवेत् । सर्वकार्याणिसिद्ध्यंतिशक्रनास्त्यत्रसंशयइत्युक्तं ॥ दिवेत्येक रात्रमुक्तं देवीपुराणे नवरात्रव्रतेशक्तस्त्रिरात्रंचैकरात्रकं । व्रतंचरतियोभ क्तस्तस्मैदास्यामिवांछितमिति । तत्रापिसप्तम्याःपूजनेपूर्वोक्तोनिर्णयः ॥ अ त्रतिथियोगपक्षेतंत्रेणोपवासः । तिथिद्वयनिमित्तंपूजादिकंतुभेदेन अत्रवि

शेषोनिर्णयामृतेभविष्ये सप्तम्यांनवगेहानिदारुजानिनवानिच । एवंवा वित्तभावेनकारयेत्सुसमाहितः ॥ दुर्गागृहंप्रकर्तव्यंचतुरस्रंसुशोभनम् । तन्मध्येवेदिकांकुर्याच्चतुर्हस्तांसमांशुभां ॥ तस्यांसिंहासनंक्षौमंकंबलाजिनसंयुतम् ॥ तत्रदुर्गांप्रतिष्ठाप्यसर्वलक्षणसंयुताम् ॥ भुजैश्चतुर्भीरुचिरैर्दशभिर्वाविभूषिताम् ॥ तप्तहाटकवर्णाभांत्रिनेत्रांशशिशेखराम् ॥ अनेककुसुमाकीर्णांकपर्देनसुशोभिताम् ॥ नितंबबिंबसन्नद्धकिंकिणीक्वणनादिनी ॥ शूलचक्रदंडशक्तिवज्रचापासिधारिणी ॥ घंटाक्षमालाकरकपानपात्रलसत्करां तदग्रेछिन्नशिरसंमाहिषंरुधिराप्लुतम् ॥ निःसृतार्धतनुंकंठनालेचर्मासिधारिणम् ॥ देवीधृतकरग्रीवंशूलेनोरसिताडितम् । नागपाशेनविक्षिप्तंहर्यक्षेणापिविद्रुतम् ॥ वमद्रुधिरवक्त्रेणधुन्वतोर्ध्वसटारुषा ॥ सर्वतोमातृचक्रेणसेव्यमानांसुरैस्तथेति । तत्रदेवीप्रकर्तव्याहैमीवाराजतीतथा ॥ मृद्दारुक्षीलक्षणोपेताखड्गशूलेनपूजयेत् ॥ वारुक्षीदारुमयीदेवी **मूर्तिस्थापनेविशेषोदुर्गाभक्तितरंगिण्यांदेवीपुराणे** याम्यास्याशुभदादुर्गापूर्वास्याजयवर्धिनी । पश्चिमाभिमुखीनित्यंनरस्थाप्यासौम्यदिङ्मुखी **प्रतिमाभावेविशेषस्तत्रैव** हैमराजतमृद्धातुशैलचित्रार्पितापिवा ॥खड्गेशूलेर्चितादेवीसर्वकार्यफलप्रदा यद्यद्यस्यायुधंप्रोक्तंतस्मिंस्तांप्रतिपूजयेत् ॥ देवीभक्त्याऽर्चितापुंसांराज्यायुःसुतसौख्यदा॥ **कृत्यतत्वार्णवेकालिकापुराणे** लिंगस्थांपूजयेद्देवीमंडलस्थातथैवच ॥ पुस्तकस्थांमहादेवींपावकेप्रतिमासुच ॥ चित्रेचत्रिशिखेखड्गेजलस्थांवापिपूजयेत्॥बिल्वपत्रैर्यजेद्देवींतथाजातिप्रसूनकैः॥ नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः॥भगलिंगाभिधानैश्चभगलिंगप्रगीतकैः॥ भगलिंगक्रियाभिश्चप्रीणयेद्वरचंडिकाम्॥परैर्नाक्षिप्यतेयस्तुयः परान्नाक्षिपत्यपि॥तस्यक्रुद्धाभगवतीशापंदद्यात्सुदारुणम् ॥ चित्रमृन्मयादौस्नानाद्यसंभवेतत्रैवोक्तम् । अंतिकेस्थापितेखड्गेस्नापयेद्दर्पणेथवेति । अथसप्तमीपूजाविधिः।प्रतिपद्युक्तविधिनाफलसंकीर्तनांतेनवपत्रिकामृन्मयदुर्गापूजाबलिदानानिकरिष्यइतिसंकल्प्यपूर्वनिमंत्रितबिल्वसमीपंगत्वासंपूज्य ॥ आगच्छसर्वकल्याणीतिपूर्वोक्तमंत्रंप

ठित्वा बिल्ववृक्षमहाभागसदात्वंशंकरप्रिय॥गृहीत्वातवशाखांचदेवीपूजांकरोम्यहम् ॥ शाखाच्छेदोद्भवंदुःखंनचकार्यंत्वयाप्रभो । गृहीत्वातवशाखांच पूजादुर्गेतिचस्मृतिः ॥ उत्तिष्ठपत्रिकेदेविसर्वकल्याणहेतवे ॥ पूजांगृह्णसकलामस्माकंवरदाभव ॥ मेरुमांदारकैलासहिमवच्छिखरेगिरौ । जातश्रीफलवृक्षत्वमंबिकायाःसदाप्रियः इतिसंप्रार्थ्य ॥ ओं हुंछिधिफट्फट्फट्स्वाहेतिछित्वासंपूज्य ॥ ओं चामुंडेचलचलइतिवाद्यघोषेणदेवींतांचगृहंप्रवेश्य । आरोपितासिदुर्गेत्वंमृन्मय्यांश्रीफलेपिच । स्थिरानितांतंभूत्वाचगृहेत्वंकामदाभवेतिस्थिरीकृत्यरंभादिपत्रिकाः पंचगव्येनपंचामृतेनचस्नापयित्वावस्त्रेणावेष्टयस्थापयेत् । ततःपूर्ववत्संकल्पंकृत्वाऽक्षतानादायदेवीमावाहयेत् ॥ तत्रमंत्रः । आवाहयाम्यहंदेविमृन्मय्यांश्रीफलेतथा । कैलासशिखरादेविविंध्याद्रेर्हिमपर्वतात् ॥आगत्यबिल्वशाखायांचंडिकेकुरुसंनिधिं॥ स्थापितासिमयादुर्गेपूजयेत्वांप्रसीदमे॥आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते ॥ दुर्गेदुर्गस्वरूपासिसुरतेजोमयेर्चिते॥सदानंदकरेदेविप्रसीदममसिद्धये ॥ एह्येहिभगवत्यंबशत्रुक्षयजयप्रदे ॥ भक्तितःपूजयामित्वांदुर्गेदेविसुरार्चिते॥पल्लवैश्चफलोपेतैःपुष्पैश्चसुमनोहरैः ॥ पल्लवेसंस्थितेदेविपूजयेत्वांप्रसीदमे ॥ दुर्गेदेविइहागच्छसांनिध्यमिहकल्पय ॥ यज्ञभागान्गृहाणत्वंयोगिनीकोटिभिःसहेति ॥ ततोमूलमंत्रेणपाद्यादिगंधांतोपचारैः ॥ अमृतोद्भवंचश्रीवृक्षंशंकरस्यसदाप्रियम् ॥ बिल्वपत्रंप्रयच्छामि पवित्रंतेसुरेश्वरीतिबिल्वपत्रम् ॥ ब्रह्मविष्णुशिवादीनांद्रोणपुष्पंसदाप्रियम् । तत्तेदुर्गेप्रयच्छामिसर्वकामार्थसिद्धयेइतिद्रोणपुष्पंनिवेद्य धूपादिदक्षिणांतांपूजांमूलेनकृत्वा प्रार्थयेत् ॥ ओम् महिषघ्निमहामायेचामुंडेमुंडमालिनि ॥ आयुरारोग्यमैश्वर्यंदेहिदेविनमोस्तुते ॥ कुंकुमेनसमालब्धेचंदनेनविलेपिते ॥ बिल्वपत्रकृतापीडेदुर्गेहंशरणंगतः॥रूपंदेहियशोदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदेहिसर्वान्कामांश्चदेहिमे ॥ सर्वमंगलमांगल्ये इतिचसंप्रार्थ्यपत्रिकाःपूजयेत् ॥ कदल्यांब्रह्माणीं दाडिमेरक्तदंतिकां । धान्येलक्ष्मीं । हरिद्रायांदुर्गां । मानेचामुंडाम् ।

कवौकालिका । बिल्वेशिवां । अशोकेशोकरहितां । जयंत्यांकार्तिकींचा वाह्यसंपूज्यदुर्गायैबलिंदद्यात् । अत्रशस्त्रादिपूजावक्ष्यते ॥ ततस्तुातर्विंदेत् । तदुक्तंशिवरहस्ये । दुर्गांशिवांशांतिकरींब्रह्माणींब्रह्मणःप्रियाम् ॥ सर्वलोकप्रणेत्रींचप्रणमामिसदाशिवाम् ॥ मंगलांशोभनांशुद्धांनिष्कलांपरमांकलाम् । विश्वेश्वरींविश्वमातांचंडिकांप्रणमाम्यहम् ॥ सर्वदेवमयींसर्वदेवींरोगभयापहाम्।ब्रह्मेशविष्णुनमितांप्रणमामिसदाउमाम्॥ विंध्यस्थांविंध्यनिलयांदिव्यस्थानानिवासिनीम् । योगिनींयोगमातांचचंडिकांप्रणमाम्यहम् ॥ ईशानमातरंदेवीमीश्वरीमीश्वरप्रियाम् । प्रणतोस्मिसदादुर्गासंसारार्णवतारिणीम् ॥ यइमंपठतेस्तोत्रंशृणुयाद्वापियोनरः ॥ समुक्तःसर्वपापैस्तुमोदतेदुर्गयासह ॥ **अथमहाष्टमी** । साचपरयुता । शुक्लपक्षेष्टमीचैवशुक्लपक्षेचतुर्दशी ॥ पूर्वविद्धानकर्तव्याकर्तव्यापरसंयुतेतिब्रह्मवैवर्तात् ॥ मदनरत्नेस्मृतिसंग्रहे । शरन्महाष्टमीपूजानवमीसंयुतासदासप्तमीसंयुतानित्यंशोकसंतापकारिणी ॥ जंभेनसप्तमीयुक्तापूजितातुमहाष्टमी ॥ इंद्रेणनिहतोजंभस्तस्माद्दानवपुंगवः ॥ तस्मात्सर्वप्रयत्नेनसप्तमीमिश्रिताष्टमी ॥ वर्जनीयाप्रयत्नेनमनुजैःशुभकांक्षिभिः ॥ सप्तमींशल्यसंयुक्तांमोहादज्ञानतोपिवा ॥ महाष्टमींप्रकुर्वाणोनरकंप्रतिपद्यते ॥ सप्तमीकलयायत्रपरतश्चाष्टमीभवेत् ॥ तेनशल्यमिदंप्रोक्तंपुत्रपौत्रक्षयप्रदम् ॥ तथा । पुत्रान्हंतिपशून्हंतिहंतिराष्ट्रं सराजकम् । हंतिजातान जातांश्चसप्तमीसहिताष्टमी ॥ तेननात्रत्रिमुहूर्तवेधः तदाघटिकामात्राप्यौदयिकीग्राह्या । व्रतोपवासनियमेघटिकैकापियाभवेदितिदेवलोक्तेः । गौडा अप्येवमाहुः । अतएवोक्तंभोजराजेन । नचसप्तमीशल्यसमोपहतेतिइयंभौमेतिप्रशस्ता । अष्टम्यामुदितेसूर्येदिनांतेनवमीभवेत् । कुजवारोभवेत्तत्रपूजनीयाप्रयत्नतइति मदनरत्नेवचनात् । सप्तमीशल्यसंविद्धावर्जनीयासदाष्टमी ॥ स्तोकापिसामहापुण्यायस्यांसूर्योदयोभवेदिति ॥ मदनरत्नेस्मृतिसमुच्चयवचनात् । अष्टमीनवमीयुक्तानवमीचाष्टमीयुतेति । पाद्मवचनाच्च ॥ इयमेवमूलयुक्ताचेन्महानवमीसंज्ञा ॥ आश्वयुक्शुक्लपक्षेयाष्टमीमूलेन

संयुता ॥ सामहानवमीप्रोक्तात्रैलोक्येपिसुदुर्लभेतिहेमाद्रौस्कांदात् । मूलयु क्तापिसप्तमीयुताचेत्त्याज्यैवेत्युक्तंनिर्णयामृतेदुर्गोत्सवे मूलेनापिहिसंयुक्तास दात्याज्याष्टमीबुधैः॥लेशमात्रेणसप्तम्याअपिस्याद्यदिदूषितेति ॥ महाष्टमीपूर्वे द्युःपूर्वाह्णव्यापित्वे पूर्वान्यथापरैवेतिनिर्णयदीपमतम् । एतच्चतुच्छत्वादुपे क्ष्यम् । रूपनारायणधृतेदेवीपुराणे । सप्तमीवेधसंयुक्तायैःकृतातुमहाष्टमी ॥ पुत्रदारधनैर्हीनाभ्रमंतीहपिशाचवत्॥ यत्तु सप्तम्यामुदितेसूर्येपरतोयाष्टमीभ वेत् ॥ तत्रदुर्गोत्सवंकुर्यान्नकुर्यादपरेहनीति ॥ विश्वरूपनिबंधवचनंतदाश्वि नकृष्णाष्टमीविषयम् । कन्यायांकृष्णपक्षेतुपूयित्वाष्टमीदिने॥नवम्यांबोधयेद्दे वींगीतवादित्रनिःस्वनैरितिदेवीपुराणे ॥ तत्रापिपूजोक्तेरितिहेमाद्रौनिर्णया मृतेचोक्तम् ॥ यानितु । भद्रायांभद्रकाल्याश्चमध्येस्यादर्चनक्रिया । तस्मा द्दूरेसप्तमीविद्धाकार्यादुर्गाष्टमीबुधैरिति ॥ यच्च मोहचूलोत्तरेब्राह्मेच । आश्विनस्यसिताष्टम्यामर्धरात्रेतुपार्वती । भद्रकालीसमुत्पन्नापूर्वाषाढासमायु तेति ॥ तथा तत्राष्टम्यांभद्रकालीदक्षयज्ञविनाशिनी ॥ प्रादुर्भूतामहाघोरायो गिनीकोटिभिःसहेति यच्चमदनरत्ने । महाष्टम्याश्विनेमासिशुक्लाकल्याण कारिणी ॥ सप्तम्यायुताकार्यामूलेनतुविशेषतइति ॥ तानिपरदिनेष्टम्याभा वविषयाणीतिमदनरत्नेउक्तम् ॥ यत्तु तत्रैवपरदिनेष्टमीसत्त्वेपिपूर्वविद्धावि धायकंवचनम् ॥ यदाष्टमीतुसंप्राप्यह्यस्तंयातिदिवाकरः ॥ तत्रदुर्गोत्सवंकु र्यान्नकुर्यादपरेहनि ॥ दुर्भिक्षंतत्रजानीयान्नवम्यांयत्रपूज्यतइतितत्परदिने दशम्यानवम्याभावविषयम् । यदासूर्योदयेनस्यान्नवमीचापरेहनि । तदाष्ट मींप्रकुर्वीत सप्तम्यासहितांनृपेतितत्रौवस्मृतिसंग्रहोक्तेः ॥ उत्तरास्तिथयोय त्रक्षयंयांतिनराधिप । पूर्वाष्टमींतदाकुर्यादन्यथात्वशुभंभवेदितिदुर्गोत्सवोक्ते श्चेति मदनरत्ने ॥ वस्तुतस्तुइदंवचनद्वयंअष्टमीनवम्योः सूर्योदयद्वयसंबं धपरम् ॥ अतएवनवमीचेतिचकारादष्टमीचतिथयइतिबहुवचनादष्टमीनव मीदशम्युक्ता ॥ अन्यथापूर्वोक्तविरोधादितिदिक् ॥ यत्तु ॥ अहंभद्राचभ द्राहंनावयोरंतरंक्वचित् ॥ सर्वसिद्धिप्रदास्यामिभद्रायामर्चिताह्यहमितिदेवी

पुराणे । तद्विष्टिकरणमध्येपूजाविधानार्थम् । विष्टिंत्यक्त्वामहाष्टम्यांममपू जांकरोतियः ॥ तस्यपूजाफलंनस्यात्तेनाहमवमानितेतितत्रैवोक्तेरितिनिर्ण यामृते ॥ तथाकालिकापुराणे । सप्तम्यांपत्रिकापूजाअष्टम्यांचाप्युपोषणम् ॥ पूजाचजागरश्चैवनम्यांविधिवद्बलिरिति ॥ अष्टम्युपवासश्च पुत्रवतानकार्यः उपवासंमहाष्टम्यांपुत्रवान्नसमाचरेत् ॥ यथातथावापूतात्माव्रतीदेवींप्रपूज येदितितत्रैवोक्तेः ॥ रूपनारायणीयेब्राह्मे । अतोर्थपूजनीयासातस्मिन्नहनि मानवैः ॥ उपोषितैर्वस्त्रधूपमाल्यरत्नानुलेपनैः ॥ पशुभिःपानकैर्हृद्यैरात्रौजा गरणेनच ॥ दुर्गागृहेचशस्त्राणिपूजितव्यानिपंडितैः ॥ वाद्यभांडानिचिह्ना निकवचान्यायुधानिच ॥ अत्रविशेषोहेमाद्रौनिर्णयामृतेभविष्ये । आश्वयु क्शुक्लपक्षस्य अष्टमीमूलसंयुता ॥ सामहानवमीनामत्रैलोक्येपिसुदुर्लभा ॥ कन्यागतेसवितरिशुक्लपक्षेष्टमीयुता ॥ मूलनक्षत्रसंयुक्तासामहानवमीस्मृ ता ॥ नवम्यांपूजितादेवी ददात्यभिमतंफलम् ॥ सापुण्यासापवित्राचसा धन्यासुखदायिनि ॥ तस्यांसदापूजनीया चामुंडामुंडमालिनी ॥ सदेत्युक्तेर्नि त्यतापि ॥ तस्यांयेह्युपयुज्यंतेप्राणिनोमहिषादयः । सर्वेतेस्वर्गतिंयांतिन्नता पापंनविद्यते ॥ यावन्नचालयेद्वात्रंपशुस्तावन्नहन्यते ॥ नतथाबलिदानेनपुष्प धूपविलेपनैः ॥ यथासंतुष्यतेमेषैर्महिषैर्विध्यवासिनी ॥ एवंचविंध्यवासिन्यां नवरात्रोपवासतः॥एकभुक्तेननक्तेनस्वशक्त्यायाचितेनच ॥ पूजनीयाजनैर्दे वीस्थानेस्थानेपुरेपुरे ॥ गृहेगृहेभक्तिपरैर्ग्रामेग्रामेवनेवने ॥ स्नातैःप्रमुदितैर्हृष्टै र्ब्राह्मणैःक्षत्रियैर्नृपैः ॥ वैश्यैःशूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्चमानवैः ॥ स्त्रीभि श्चकुरुशार्दूलतद्विधानमिदंशृणु॥जयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्रमात् ॥ लौहाभिसारिकंकर्मकारयेद्यावदष्टमीति लौहाभिसारिकंकर्मविधानंतत्रैवो क्तं । प्रागुदक्प्रवणेदेशेपताकाभिरलंकृतम् ॥ मंडपंकारयेद्दिव्यंनवसप्त करंपरम् ॥ षोडशहस्तमित्यर्थः॥आग्नेय्यांकारयेत्कुंडंहस्तमात्रंसुशोभनम्॥ मेखलात्रयसंयुक्तंयोन्याश्वत्थदलाभया ॥ राजचिह्नानिसर्वाणि शस्त्राण्य स्त्राणियानिच । आनीयमंडपेतानि सर्वाण्यत्रविवासयेत् ॥ ततस्तुब्राह्मणः

स्नातःशुक्लांबरधरःशुचिः । ॐ कारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहयाद्घृतम् ॥ शस्त्रा स्त्रमंत्रैर्होतव्यंपायसंघृतसंयुतम् ॥ हुतशेषंतुरंगाणांराजानमुपहारयेत् ॥ लो हाभिसारिकंकर्मतेनैवऋषिभिःस्मृतम् । धृतपल्ययनानश्वान्गजांश्चसमलंकृ तान् ॥ भ्रामयेन्नगरेनित्यंबंदिघोषपुरःसरम् ॥ प्रत्यहंनृपतिःस्नात्वासंपूज्यपि तृदेवताः ॥ पूजयेद्राजचिह्नानि फलमाल्यविलेपनैः ॥ यस्याभिसरणाद्राज्ञो विजयःसमुदाहृतः ॥ पूजामंत्रान्प्रवक्ष्यामिपुराणोक्तानहंतव ॥ यैःपूजिताप्रय च्छंतिकीर्तिमायुर्यशोबलम् ॥ अथमंत्राविष्णुधर्मोत्तरोक्ताः छत्रस्ययथांबुदश्छा दयतिशिवायेमांवसुंधराम् ॥ तथाछादयराजानंविजयारोग्यवृद्धये ॥ चामर स्य । शशांककरसंकाशक्षीरडिंडीरपांडुर ॥ प्रोत्सारयाशुदुरितंचामरामरदु र्लभ ॥ अश्वानांवृद्ध्यर्थंरेवंतपूजनमहंकरिष्ये । सूर्यपुत्रमहाबाहोछायाहृद यनंदन । शांतिंकुरुतुरंगाणांरेवंतायनमोनमः ॥ अनेनमंत्रेणपूजा ॥ अथा श्वस्य गंधर्वकुलजातस्त्वंमाभूयाःकुलदूषकः ॥ ब्रह्मणःसत्यवाक्येनसोमस्यव रुणस्यच ॥ प्रभावाच्चहुताशस्यवर्धयत्वंतुरंगमान् । तेजसाचैवसूर्यस्यमुनी नांतपसातथा ॥ रुद्रस्यब्रह्मचर्येणपवनस्यबलेनच । स्मरत्वंराजपुत्रंत्वंकौ स्तुभंचमणिंस्मर ॥ यांगतिंब्रह्महागच्छेन्मातृहापितृहातथा ॥ भ्रूणहानृतवा दीचक्षत्रियश्चपराङ्मुखः ॥ सूर्याचंद्रमसौवायुर्यावत्पश्यंतिदुष्कृतम् ॥ व्र जाश्वतांगतिंक्षिप्रंतच्चपापंभवेत्तव ॥ निष्कृतोयदिगच्छेथायुद्धाध्वनितुरंगम । रिपून्विजित्यसमरेसहभ्रात्रासुखीभवेति ॥ अथध्वजस्य । शक्रकेतोमहावीर्य श्यामवर्णार्चयाम्यहम् । पत्रिराजनमस्तेस्तुतथानारायणध्वज ॥ काश्यपे यारुणभ्रातर्नागरेविष्णुवाहन ॥ अप्रमेयदुराधर्षरणेदेवारिसूदन ॥ गरुत्मा न्मारुतगतिस्त्वयिसन्निहितोयतः ॥ सारवंत्यायुधान्यत्ररक्षत्वंचरिपून्दह ॥ अथपताकायाः । हुतभुग्वसवोरुद्रावायुःसोमोमहर्षयः ॥ नागकिन्नरगंधर्व यक्षभूतगणग्रहाः ॥ प्रमथास्तुसहादित्यैर्भूतेशोमातृभिःसह ॥ शक्रः सेना पतिःस्कंदो वरुणश्चाश्रितास्त्वयि ॥ प्रदहंतुरिपून्सर्वान्राजाविजयमृच्छतु ॥ यानिप्रयुक्तान्यरिभिरायुधानिसमंततः ॥ पतंतूपरिशत्रूणांहतानितवते

जसा ॥ हिरण्यकशिपोर्युद्धेयुद्धेदेवासुरेतथा ॥ कालनेमिवधेयद्वद्वात्रिपुर घातने ॥ शोभितासितथैवाद्यशोभयास्मांश्चसंस्मर ॥ नीलान्श्वेतानिमान्दृष्ट्वा नश्यंत्वाशुनृपारयः ॥ व्याधिभिर्विविधैर्घोरैःशस्त्रैश्चयुधिनिर्जिताः ॥ पूतनारे वतीनाम्नाकालरात्रिश्चयास्मृता । दहत्वाशुरिपून्सर्वान्पताकेत्वंमयार्चिता ॥ अथगजस्य । कुमुदैरावणौपद्मःपुष्पदंतोथवामनः । सुप्रतीकोंजनोनीलएतेष्टौ देवयोनयः ॥ तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमाश्रिताः ॥ मंदोभद्रोमृगश्चैवग जःसंकीर्णएवच ॥ वनेवनेप्रसूतास्तेयूथानिसुमहांतिच । पांतुत्वांवसवोरुद्रा आदित्याःसमरुद्गणाः ॥ भर्तारंरक्षनागेंद्रस्वामिवत्प्रतिपाल्यताम् । अवाप्तु हिजयंयुद्धेगमनेस्वस्तिनोव्रज । श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनिला त् ॥ स्थैर्यमेरोर्जयंरुद्राद्यशोदेवात्पुरंदरात् ॥ युद्धेरक्षंतुनागास्त्वांदिशश्चस हदैवतैः । अश्विनौसहगंधर्वैः पांतुत्वांसर्वतःसदेति **अथखड्गमंत्रः** असि र्विशसनःखड्गस्तीक्ष्णधारोदुरासदः । श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच ॥ एतानितवनामानिस्वयमुक्तानिवेधसा ॥ नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्व रः ॥ रोहिण्यश्चशरीरंतेदैवतंचजनार्दनः । पितापितामहोदेवस्त्वंमांपालयस र्वदा ॥ नीलजीमूतसंकाशस्तीक्ष्णदंष्ट्रःकृशोदरः । भावशुद्धोमर्षणश्चअतिते जास्तथैवच ॥ इयंयेनधृताक्षोणीहतश्चमहिषासुरः । तीक्ष्णधारायशुद्धाय तस्मैखड्गायतेनमः **अथछुरिकायाः** सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना । शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहंशुभं ॥ चंडिकायाःप्रदत्तासिसर्वदुष्टनि र्बर्हिणी ॥ तयाविस्तारिताचासिदेवानांप्रतिपादिता ॥ सर्वसत्त्वांगभूतासि सर्वाशुभनिबर्हिणी ॥ छुरिकेरक्षमांनित्यंशांतियच्छनमोस्तुते **अथ कट्टार कपूजा** रक्षांगानिगजान्रक्षरक्षवाजिधनानिच ॥ ममदेहंसदारक्षकट्टारक नमोस्तुते ॥ कट्टारकोमध्यदेशेकटारीतिप्रसिद्धा **अथधनुःपूजा** सर्वायुध महामात्रसर्वदेवारिसूदन । चापमांसमरेरक्षसाकंशरवरैरिह ॥ धृतंकृष्णेन रक्षार्थंसंहारायहरेणच । त्रयीमूर्तिगतंदेवंधनुरस्त्रंनमाम्यहम् **अथकुंतपूजा** प्रासपातयशत्रूंस्त्वमनयानाकमायया । गृहाणजीवितंतेषांममसैन्यंचरक्ष

ताम् **अथचर्मपूजा** शर्मप्रदस्त्वंसमरेचर्मसैन्येयशोयमे ॥ रक्षमारक्षणीयो हंतापनेयनमोस्तुते **अथकनकदंडमंत्रः** प्रोत्सारणायदुष्टानांसाधुसंरक्षणा यच ॥ ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये ॥ यशोदेहिसुखंदेहिजयदो भवभूपतेः । ताडयस्वरिपून्सर्वान् हेमदंडनमोस्तुते **अथदुंदुभिमंत्रः** दुंदु भेत्वंसपत्नानां घोरोहृदयकंपनः । भवभूमिपसैन्यानांतथाविजयवर्धनः ॥ यथाजीमूतघोषेणप्रहृष्यंतिचबर्हिणः । तथास्तुतवशब्देनहर्षोस्माकंमुदावहः ॥ यथाजीमूतशब्देन स्त्रीणांत्रासोभिजायते । तथात्रतवशब्देनत्रस्यंत्वस्म द्विषोरणे **अथशंखमंत्रः** पुण्यस्त्वंशंखपुण्यानांमंगलानांचमंगलम् । विष्णुनाविधृतोनित्यमतःशांतिप्रदोभव **अथसिंहासनमंत्रः** विजयोजय दोजेतारिपुघातीशुभंकरः । दुःखहाधर्मदःशांतःसर्वारिष्टविनाशनः ॥ एते वैसन्निधौयस्मात्तवसिंहामहाबलाः । तेनसिंहासनेतित्वंदेवैर्मंत्रैश्चगीयसे ॥ त्वयिस्थितःशिवःशांतस्त्वयिशक्रःसुरेश्वरः । नमस्तेसर्वतोभद्रभद्रदोभवभू पतेः । त्रैलोक्यजयसर्वस्वसिंहासननमोस्तुते । तथैवकर्मचिह्नानिस्वानिपू ज्यानिशिल्पिभिः ॥ लोहाभिसारिकंकर्मकृत्वैवंमंत्रपूर्वकम् । नियमंकृत्वा तथाष्टम्यांपूर्वाह्णेस्नानमाचरेत् ॥ कुंकुमचंदनचंपकचतुःसमैःशैलपिष्टैश्च ॥ चर्चितगायत्रींदेवींकुसुमैरभ्यर्चयेद्बहुभिः कुमुदैःसपद्मपुष्पैःसधूपदीपैःसनैवे द्यैः॥मांसैर्बल्युपहारैर्मंगलशब्दैःसमुच्छलितैः॥विहितछत्रैर्यानैःस्यंदनसितश स्त्रधारिजनलोकैः ॥ तुष्टेःपश्चस्त्रादितुनिवेद्यतेसर्वमेवभगवत्यै । दुर्गासापूज नीयाचतद्दिनेद्रोणपुष्पकैः । ततःखड्गंनमस्कृत्यशत्रूणांवधसिद्धये ॥ इच्छे तविजयंराज्यंसुभिक्षंचात्मनेनृपः । पुनःपुनःप्रणम्यार्यांसंस्मरन्हृदयेशिवाम् सर्वंकृत्वेतिकौरव्यअष्टम्यांजागरंनिशि । नटनर्तकगीतैश्चकारयेच्चमहोत्सव म् ॥ एवंहृष्टैर्निशांनीत्वाप्रभातेह्यरुणोदये ॥ घातयेन्महिषान्मेषानग्रतोनत कंधरान् ॥ शतमर्धशतंवापितदर्धंवायथेच्छया । सुरासवघृतैःकुंभैस्तर्पयेत् परमेश्वरीम् ॥ कापालिकेभ्यस्तद्देयंदासीदासजनेतथा । ततोपराह्णसमयेन वम्यांवैरथेस्थिताम् ॥ भवानींभ्रामयेद्राष्ट्रेस्वयंराजासशब्दवान् । कश्चिच्चो

पोषितोवीरोविधृतोन्येनखड्गवान् ॥ भूतेभ्यस्तुबलिंदद्यान्मंत्रेणानेनसामि षम् । सरक्तंसजलंचान्नंगंधपुष्पाक्षतैर्युतम् । त्रींस्त्रीन्वारान्समूहेनदिग्विदि क्षुकिरेद्बलिम् **मंत्रश्च** बलिंगृह्णंत्विमंदेवाआदित्यावसवस्तथा । मरुतश्चा श्विनौरुद्राःसुपर्णाःपन्नगाग्रहाः ॥ असुरायातुधानाश्चपिशाचोरगराक्षसाः । डाकिन्योयक्षवेतालायोगिन्यःपूतनाशिवाः ॥ जंभकाःसिद्धगंधर्वामालावि द्याधरानगाः ॥ दिक्पाललोकपालाश्च येचविघ्नविनायकाः ॥ जगतांशां तिकर्तारोब्रह्माद्याश्चमहर्षयः । माविघ्नंमाचमेपापंमासंतुपरिपंथिनः ॥ सौ म्याभवंतुतृप्ताश्चभूतप्रेताःसुखावहाइति । इतिमहाष्टमी ॥ महानवमीतुपूर्व युताग्राह्या ॥ पूर्वोक्तवचनात् । नवमीदुर्गाव्रतेश्रावणीतिदीपिकोक्तेः । श्रा वणीदुर्गनवमीदूर्वाचैवहुताशनी ॥ पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमि तिहेमाद्रौपाद्मोक्तेश्च **भविष्येपि** आश्वयुक्शुक्लपक्षेतुअष्टमीमूलसंयुता ॥ सामहानवमीनामत्रैलोक्येपिसुदुर्लभेति ॥ मूलमुपलक्षणम् । दूर्गापूजातुन वमीमूलाद्यृक्षत्रयान्विता । महतीकीर्तितातस्यांदुर्गामहिषमर्दिनी इतिम दनरत्नेलैंगात् अत्रपूजयेदित्यग्रेशेषः यानितु । साकार्योदयगामिन्यांति थावुदयगामिन्यामित्यादिप्रागुक्तानितानिनवमीभिन्नतिथिपराणि । नवम्यां विशेषोक्तेः । वेधश्चमुहूर्तत्रयेणैवज्ञेयः । यद्यपिहेमाद्रिमतेमुहूर्तद्वयात्मापि वेधोस्ति । तथापिसूर्योदयएवसः ॥ सायंतुत्रिमुहूर्तएव **तदुक्तंदीपि कायां** त्रिमुहूर्तगातुसकलासायं इति ॥ माधवोपिसायंतूत्तरयातद्वन्न्यून यानतुविद्धयतइति ॥ तेनत्रिमुहूर्तयोगेपूर्वानवमी पूर्वोक्तवचनात् ॥ नकुर्यान्नवमीतातदशम्यांतुकदाचनेतिस्कांदेपरानिषेधाच्च ॥ त्रिमुहूर्तयो गाभावेतुनिषिद्धापिपरैवकार्येतिनिष्कर्षः **यत्तु** नवम्यांचजपंहोमंसमाप्य श्रवणेपिवेतिसंग्रहोक्तेः ॥ व्रतंचजागरश्चैवनवम्याविधिवद्बलिरितिदेवी पुराणाच्च ॥ नवम्यांहोमबल्यादिविहितंतत्राश्वयुक्शुक्लनवमीमुहूर्तवाक लायदि । सातिथिः सकलाज्ञेया लक्ष्मीविद्याजयार्थिभिरिति सौरपुरा णात् ॥ सुर्योदयेपरंरिक्तापूर्णास्यादपरायदि ॥ बलिदानंप्रकर्तव्यंतत्रदेशे

शुभावहम् ॥ बलिदानेकृतेष्टम्यांपुत्रभंगोभवेन्नृपेतिमदनरत्नेदेवीपुराणाच्च॥ बल्यादौपराकार्या ॥ उपवासादौतुपूर्वेतिमदनरत्नेउक्तम् ॥ प्रतापमार्तंडेप्येवम् यत्तु अष्टम्यांबलिदानेनपुत्रनाशोभवेद्ध्रुवमितिकालिकापुराणे । तत्संधिपूजापरं । अष्टमीनवमीसंधौतृतीयाखलुकथ्यतइतितत्रैवतदुक्तेः ॥ कामरूपनिबंधे । अष्टम्याःशेषदंडश्चनवम्याःपूर्वएवच । तत्रयाक्रियतेपूजाविज्ञेयासामहाफला ॥ अष्टमीमात्रेभवत्येव ॥ आश्विनेपूजयित्वातुअर्द्धरात्रेष्टमीषुच । घातयंतिपशून्भक्त्यातेभवंतिमहाबलाः ॥ तथा कन्यासंस्थेरवावीशेशुक्लाष्टम्यांप्रपूजयेत् । सोपवासोनिशार्द्धेतुमहाविभवविस्तरैः तथा पशुघातश्चकर्तव्योगवयाजवधस्तथेति । रूपनारायणीयेदेवीपुराणात् तत्रैवभविष्ये तस्मादियंमहापुण्यानवमीपापनाशिनी । उपोष्यासुप्रयत्नेनसततं सर्वपार्थिवैः निर्णयदीपेतु महानवमीपरदिनेपराह्णव्याप्तित्वेपराअन्यथापूर्वाआवर्तनात्पूर्वकालेनवमीस्यात्परेहनि ॥ दुर्गार्चातत्रपूर्वेद्युःपूर्वाह्णेत्वष्टमीयदीतिधौम्यवचनादित्युक्तम् । अस्यतुशारदानवमीविषयत्वंसमूलत्वंच विमृश्यम् ॥ यानितु नंदायांज्वलतेवह्निःपूर्णायांपशुघातनम् । भद्रायांगोकुलक्रीडातत्रराज्यंविनश्यतीति ॥ नवम्यामपराह्णेतुबलिदानंप्रशस्यते । दशमींवर्जयेत्तत्रनात्रकार्याविचारणेति ॥ नंदायांदर्शनेरक्षाबलिदानंदशासुच । भद्रायांगोकुलक्रीडादेशनाशायजायतइति ब्रह्मवैवर्तनारदादिवचनानिशुद्धाधिकनिषेधपराणीतिमदनरत्ने तथाकालिकापुराणे नवम्यांबलिदानंतुकर्त्तव्यंवैयथाविधि। जपंहोमंचविधिवत्कुर्यात्तत्रविभूतये॥ केचित्तु पूर्वाषाढायुताष्टम्यां पूजाहोमाद्युपोषणमितिपूर्वोक्तदेवीपुराणादष्टम्यांहोममाहुः ॥ अन्येतुद्विविधवाक्यवशादष्टम्यामारभ्यनवम्यांसमापयंति ॥ समुच्चयस्तुयुक्तः रुद्रयामलेतुविकल्पउक्तः तत्तुनिर्मूलं ॥ दुर्गाभक्तितरंगिण्यादिगौडग्रंथेष्वपिनवम्यांहोमउक्तः होमेचविशेषउक्तोडामरतंत्रे पायसंसर्पिषायुक्तंतिलैःशुक्लैर्विमिश्रितम् । होमयेद्विधिवद्भक्त्यादशांशेननृपोत्तम ॥ रुद्राध्यायेयथाहोमंमंत्रेणैकेनसाधयेत् । तथास्तोत्रजपेहोमंश्लोकेनैकेनसा

धयेत् ॥ यद्वासप्तशतींजप्यहोममंत्रोनवाक्षरः ऐंह्रींक्लींचामुंडायैविच्चे ॥ इतिन वाक्षरइतिकेचित् ॥ पूजोक्तोग्राह्यइतितुयुक्तम् **रुद्रयामलेपि** प्रधानद्रव्य मुद्दिष्टंपायसान्नंतिलास्तथा किंशुकैःसर्षपैःपूगैलाजदूर्वाकुरैरपि ॥ यवैर्वाश्री फलैर्दिव्यैर्नानाविधफलैस्तथा॥रक्तचंदनखंडैश्चगुग्गुलैश्चमनोहरैः ॥प्रतिश्लो कंचजुहुयात्सर्वद्रव्याणिचक्रमात् । नवाक्षरेणवाहुत्वानमोदेव्याइतीतिचेति **रहस्येतु** प्रतिश्लोकंचजुहुयात्पायसंतिलसर्पिषेत्युक्तम् । दुर्गाभक्तितरंगि ण्यांतु तिलैर्जयंतीमंत्रेणचहोमउक्तः ॥ पुरश्चरणकार्येतुबिल्वपत्रयुतैस्तिलै रिति ॥ कालिकापुराणाद्बिल्वपत्रैश्चेतिस्मार्ताः ॥ तन्न ॥ अन्यत्रमानाभा वात् **अथबलिदानम्** तत्राश्वमेषछागमहिषस्वमांसानामुत्तरोत्तरप्राशस्त्यं फलविशेषश्चान्यतोवसेयइतिदिक् **बलिप्रकारस्तुदेवीपुराणे** कन्यासंस्थे रवौशुक्रशुक्लाष्टम्यांप्रपूजयेत् । द्रोणपुष्पैश्चबिल्वाम्रजातीपुन्नागचंपकैः ॥ पंचाङ्गंलक्षणोपेतं गंधपुष्पसमन्वितम् । विधिवत्कालिकालीतिज प्त्वाखड्गेनघातयेत् ॥ ओं कालिकालियज्ञेश्वरिलोहदंडायैनमइतिमंत्रः ॥ तदुत्थरुधिरंमांसंगृहीत्वापूजनादिषु ॥ आदिशब्दात् चरकीविदारीपापरा क्षस्यःनैर्ऋतेभ्यःप्रदातव्यंमहाकौशिकमंत्रितम् **मंत्रस्तुवक्ष्यते तथा** तस्या ग्रतोनृपःस्नायात्कृत्वाशत्रुंतुपैष्टिकम् । खड्गेनघातयित्वातुदद्यात्स्कंदविशा खयोः ॥ अशक्तौब्राह्मणेनचकूष्मांडादिभिर्वलिदानं कार्यम् **तदुक्तंकालि कापुराणे** कूष्मांडमिक्षुदंडंचमांसंसारसमेवच । एतेबलिसमाःप्रोक्तास्तृप्तौ छागसमाःसदा **रुद्रयामलेपि** छागाभावेतुकूष्मांडश्रीफलंवामनोहरं । वस्त्र संवेष्टितंकृत्वाछेदयेच्छुरिकादिना **तथा** ब्राह्मणेनसदादेयंकूष्मांडंबलिकर्म णि । श्रीफलंदासुराधीशछेदंनैवतुकारयेत् **छेदेविकल्पः** माषान्नेनबलिर्दे योब्राह्मणेनविजानता **कालिकापुराणे** उत्तराभिमुखोभूत्वाबलिंपूर्वमुखंत था । निरीक्ष्यसाधकःपश्चादिमंमंत्रमुदीरयेत् ॥ पशुस्त्वंबलिरूपेणममभाग्या दुपस्थितः । प्रणमामिततःसर्वरूपिणेबलिरूपिणम् ॥ चंडिकाप्रीतिदानेनदा तुरापद्विनाशनम् । चामुंडाबलिरूपायबलेतुभ्यंनमोस्तुते । यज्ञार्थेबलयःसृ

ष्टास्वयमेवस्वयंभुवा ॥ अतस्त्वांघातयाम्यद्यतस्माद्यज्ञवधोऽवःध । ऐंह्रींश्री मितिमंत्रेणतंबलिमत्स्वरूपिणम् ॥ चिंतयित्वान्यसेत्पुष्पंमूर्ध्नितस्यतुभैरव । रसनात्वंचंडिकायाःसुरलोकप्रसाधकः॥ह्रींह्रींखड्गेतिमंत्रेणध्यात्वाखड्गंचपूजयेत् ॥ पूजयित्वाततःखड्गंओंहुंफडितिमंत्रकैः ॥ गृहीत्वाविमलंखड्गंछेदयेद्बलिमुत्तमम् । ओंह्रींऐंह्रींकौशिकीतिरुधिरेणाप्यायतामिति ॥ बलिदानेतुदुर्गायाः सर्वत्रायंविधिःस्मृतः ॥ मत्स्यसूक्ते । नवम्यांपूर्ववत्पूजाकर्तव्याभूतिमिच्छता । दक्षिणांवस्त्रयुग्मंचआचार्यायनिवेदयेत् ॥ **आथात्रप्रसंगाच्छतचंडीविधानमुच्यतेरुद्रयामले** शतचंडीविधानंचप्रोच्यमानंशृणुष्वतत् । सर्वोपद्रवनाशार्थेशतचंडींसमारभेत् ॥ षोडशस्तंभसंयुक्तंमंडलंपल्लवोज्ज्वलं । वसुकोणयुतांवेदींमध्येकुर्यात्त्रिभागतः॥ पक्केष्टकचितारम्यामुच्छ्रायेहस्तसंमिताम् । पंचवर्णरजोभिश्चकुर्यान्मंडलकंशुभम् ॥ पंचवर्णवितानंचकिंकिणीजालमंडितम् आचार्येणसमंविप्रान्वरयेद्दशसुव्रतान् ॥ ईशान्यांस्थापयेत्कुंभंपूर्वोक्तविधिनाचरेत् ॥ वारुण्यांचप्रकर्तव्यंकुंडंलक्षणलक्षितम् ॥ मूर्तिदेव्याः प्रकुर्वीत सुवर्णस्यपलेनवै । तदर्धेनतदर्धेनतदर्धेनमहामते ॥ अष्टादशभुजादेवींकुर्याद्वाष्टकरामपि ॥ पट्टकूलयुगच्छन्नांदेवींमध्येनिधापयेत् ॥ देवींसंपूज्यविधिवज्जपंकुर्युर्दशद्विजाः । शतमादौशतंचांतेजपेन्मंत्रंनवार्णवम् ॥ चंडींससप्तशतींमध्येसंपुटोयमुदाहृतः । एकंद्वेत्रीणिचत्वारिजपेद्दिनचतुष्टयम् ॥ रूपाणिक्रमशस्तद्वत्पूजनादिकमाचरेत् । पंचमेदिवसेप्रातर्होमंकुर्याद्विधानतः गुडूचीपायसंदूर्वातिलान्शुक्लान्यवानपि ॥ चंडीपाठस्यहोमंतुप्रतिश्लोकं दशांशतः ॥ होमंकुर्याद्ग्रहादिभ्यःसमिदाज्यचरून्क्रमात् । हुत्वापूर्णाहुतिंदद्याद्विप्रेभ्योदक्षिणांक्रमात् ॥ कपिलांगांनीलमणिंश्वेताश्वंछत्रचामरे ॥ अभिषेकंततःकुर्युर्यजमानस्यऋत्विजः ॥ एवंकृतेमरेशानसर्वसिद्धिःप्रजायते **अथसहस्रचंडी** ॥ साचतत्रैवोक्ता ॥ सहस्रचंडींविधिवच्छृणुविष्णोमहामते राज्यभ्रंशेमहोत्पातेजनागारेमहाभये ॥ गजमारेश्वमारेचपरचक्रभयेतथा । इत्यादिविविधेदुःखेक्षयरोगादिजेभये ॥ सहस्रचंडिकापाठंकुर्याद्वाकारयेत्तथा

जापकास्तुशतप्रोक्ताविंशद्धस्तश्चमंडपः ॥ भोज्याःसहस्रंविप्रेंद्रागोश तंदक्षिणांदिशेत् । गुरवेद्विगुणंदेयंशय्यादानंतथैवच ॥ सप्तधान्यंचभूदानं श्वेताश्वंचमनोहरं॥पंचनिष्कमितामूर्तिःकर्तव्यावार्धमानतः॥अष्टादशभुजादे बीसर्वायुधविभूषिता॥अवारितान्नंदातव्यंसहस्रंप्रत्यहंप्रभो॥शतंवानियताहा रःपयःपानेनवर्तयेत् । एवंयश्चंडिकापाठंसहस्रंतुसमाचरेत् ॥ तस्यस्यात्का र्यसिद्धिस्तुनात्रकार्याविचारणेति॥एतद्दूषंयद्यपिमहानिबंधेषुनास्तितथापि प्रचरद्रूपत्वादुक्तमितिदिक् ॥ वाराहीतंत्रे । संकटेसमनुप्राप्तेदुश्चिकित्स्याम येतथा । जातिभ्रंशेकुलोच्छेदेप्यायुषोनाशआगते ॥ वैरिवृद्धोव्याधिवृद्धोध ननाशेतथाक्षये । तथैवत्रिविधोत्पातेतथाचैवोपपातके ॥ कुर्याद्यत्नाच्छतावृ त्तंततःसंपद्यतेशुभम् । श्रेयोवृद्धिःशतावृत्त्याद्राज्यवृद्धिस्तथापरा ॥ मनसा चिंतितंदेविसिद्ध्येदष्टोत्तराच्छतात् ॥ सहस्रावर्तनाल्लक्ष्मीरावृणोतिस्वयंस्थि रा ॥ भुक्त्वामनोरथान्कामान्नरोमोक्षमवाप्नुयात् । चंड्याःशतावृत्तिपाठा त्सर्वाःसिद्ध्यंतिसिद्धयः ॥ इतिशतचंडीसहस्रचंडीविधिः **अथनवरात्रपा रणानिर्णयः** साचदशम्यांकार्या ॥ आश्विनेमासिशुक्लेतुकर्तव्यंनवरात्रक म् ॥ प्रतिपदादिक्रमेणैवयावच्चनवमीभवेत् ॥ त्रिरात्रंवापिकर्तव्यंसप्तम्यादि यथाक्रममिति हेमाद्रौधौम्यवचनात् ॥ नवमीतिथिपर्यंतंवृद्ध्यापूजाजपादि कमिति । प्रागुक्तवचनैर्नवमीपर्यंतंप्रधानभूतपूजाद्युक्तेरुपवासादेश्चांगत्वेन तत्पर्यंतत्वात् ॥ आदिशब्देनोपवासोक्तेः पूर्वोक्तत्रिरात्रव्रतेनवम्याअप्युपो ष्यत्वाच्चनचपारणांतत्त्वेनत्रिरात्रत्वं ॥ विष्णुत्रिरात्रादौतथाप्रसक्तेः ॥ न चात्रोपवासेमानाभावइतिवाच्यम् । एवंचविंध्यवासिन्यांनवरात्रोपवासतः। एकभक्तेननक्तेनतथैवायाचितेनच ॥ पूजनीयाजनैर्देवीस्थानेस्थानेपुरेपुरइ ति । हेमाद्रौभविष्योक्तेः ॥ नवरात्रसमाख्यातोनवम्याअप्युपोष्यत्वाच्च । नतुतिथिह्रासेऽष्टावप्युपवासाभवंतीतिकथंसमाख्या । तेनकर्मविशेषेनव रात्रशब्दोरूढः **अतएवोक्तंदेवीपुराणे** तिथिवृद्धौतिथिह्रासेनवरात्रमपार्थ कमितिचेन्नतिथिह्रासेपिनवतिथीनामुपोष्यत्वान्नवरात्रत्वाक्षतेः एतेनरात्रीणां

प्राधान्यात् । ह्रासेअमामादाय न नवत्वमिति मूर्खोक्तिःपरास्ता **यत्तुदेवीपुराणे** कन्यासंस्थेरवौशुक्रशुक्लामारभ्यनंदिकाम् अयाचीद्यथवैकाशीनक्ताशीवाथवावद । इतिव्रतचतुष्टयमुक्तंतल्लौहाभिसारिकवियषम् । तस्य । जयाभिलाषीनृपतिःप्रतिपत्प्रभृतिक्रमात् । लौहाभिसारिकंकर्मकारयेद्यावदष्टमीतिभविष्येऽष्टमीपर्यंतमेवोक्तेः ॥ रूपनारायणेनतुनंदादिव्रतप्रयोगंपृथगेवोक्त्वातस्यनवम्यांपारणमुक्तम् **यदपिनिर्णयदीपे** आश्विनेशुक्लपक्षेतुनवरात्रमुपोषितः । नवम्यांपारणंकुर्याद्दशमीमिश्रितानचेत् । दशमीमिश्रितायत्रपारणेनवमीभवेत् । दुःखदारिद्रदाज्ञेयातथाव्रतविनाशिनीतिब्राह्मनाम्नाभिलिखितंवचनम् ॥ यच्च रुद्रयामलइतिवदंति । अष्टम्यासहकार्यास्यान्नवमीपारणादिने । योमोहाद्दशमीवेधोनवम्यांचंडिकांयजेत् ॥ पारणंचप्रकुर्याद्वैतस्यपुण्यंनिरर्थकम् नवम्यांपारितादेवीकुलवृद्धिंप्रयच्छति । दशम्यांपारितादेवीकुलनाशंकरोतिवै तस्मात्तुपारणंकुर्यान्नवम्यांविबुधाधिपेत्यादीनि तानियदिसमूलानितदा लौहाभिसारिकनंदादिव्रतचतुष्टयविषयाणि ॥ तस्याऽष्टमीपर्यंतमेवोक्तेरित्युक्तंप्राक् ॥ अन्यथामहाष्टम्यांपरविद्धायांपारणाविधानेपूर्वनिबंधैर्विरोधोदुर्वारःस्यात् ॥ यानितुकैश्चिल्लिखितानिनवम्यांपारणाविधायकानिवचनानितानिहेमाद्र्यादिविरुद्धत्वान्निर्मूलानि ॥ समूलत्वेपियदादिनद्वयेनवमीतदाद्वितीयदिनउपोष्यतिथ्यंतेपारणानकिंतुनवमीमध्येकार्येत्येवंनेयानि शिवरात्रिपारणावत् ॥ अत्रकेचित्पारणाहेसूतकादिप्राप्तौतदतिक्रम्यपारणंकुर्यादित्याहुः ॥ तन्मंदम् ॥ काम्योपवासेप्रक्रांतेत्वंतरामृतसूतके । तत्रकाम्यव्रतंकुर्याद्दानार्चनविवर्जितमितिमाधवीयेकौर्मोक्तेः ॥ व्रतयज्ञविवाहेषुश्राद्धंहोमेर्चनेजपे । प्रारब्धेसूतकंनस्यादनारब्धेतुसूतकमितिविष्णुवचनाच्चाशौचमध्येपितत्कर्तव्यतावगतेः पारणांतत्त्वाद्व्रतस्य ॥ प्रारंभस्तुतेनैवोक्तःप्रारंभोवरणंयज्ञेसंकल्पोव्रतसत्रयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति **रुद्रयामलेपि** सूतकेपारणंकुर्यान्नवम्यांहोमपूर्वकम् । तदंतेभोजयेद्विप्रान्दानंदद्याच्छक्तितइति ॥ तदंतेसूतकांते ॥ एवंस्त्रीभिरपिरजोदर्शन

मध्ये कर्तव्यमेवपारणम् । संप्रवृत्तेपिरजसिनत्याज्यंद्वादशीव्रतमिति ॥ माधवीयेऋष्यशृङ्गवचनात् । द्वादशीव्रतमित्युपलक्षणम् ॥ प्रारब्धदीर्घतपसां नारीणांयद्रजोभवेत् । नतत्रापिव्रतस्यस्यादुपरोधःकदाचनेति ॥ तत्रैवसत्य व्रतवचनात् ॥ किंच । एकादश्यादौपंचधाशौचपातेमासांतेपारणापत्तिः ॥ मासोपवासांतेपंचधाशौचपातेजीवनासंभवश्च **यत्तु** नियमस्थायदानारीप्रप श्येदंतरारजः । उपोष्यैवतुतारात्रीःस्नात्वाशेषंचरेद्व्रतमित्यंगिरोवचनम् ॥ यच्चहारीतवचनम् । नियमस्थाव्रतस्थास्त्रीरजःपश्येत्कथंचन । त्रिरात्रांतु क्षिपेदूर्ध्वंव्रतशेषंसमापयेत् ॥ तद्विधवोपासविषयं । तासांतत्रभोजननिषेधा दितिकेचित् ॥ वयंतुप्रागुक्तसत्यव्रतवचनेदीर्घतपसामितिविशेषणोपादाना त्द्वादशीव्यतिरिक्तिसफलैकाहोपवासविषयोऽयंनिषेधः॥ त्रिरात्रनवरात्रादि दीर्घव्रतेषुतुरजोमध्येपारणेतिब्रूमः ॥ आशौचमध्येसर्वोपिपारणाभवतिप्रागु क्तकौर्मेवचनादितिसिद्धम् ॥ अथचोपवासपारणानिर्णयः ॥ सर्वव्रतेषुबोद्ध व्यइत्यलंभूयसा ॥ दशम्यांदेवींविसर्जयेत् **तदुक्तम्** दुर्गाभक्तितरंगिण्यांदेवी पुराणे ॥ ततःप्रातःपूजयित्वादशम्यांविधिपूर्वकम् । संप्रेषणंतुकर्तव्यंगीत वादित्रनिःस्वनैः ॥ रूपंदेहियशोदेहिभगंभगवतिदेहिमे ॥ पुत्रान्देहिधनंदे हिसर्वकामांश्चदेहिमे ॥ महिषघ्निमहामायेचामुंडेमुंडमालिनि । आयुरारोग्य मैश्वर्यंदेहिदेविनमोस्तुते ॥ इतिसंप्रार्थ्यदेवींतुततउत्थापयेद्बुधः । उतिष्ठ देविचंडेशिशुभांपूजांप्रगृह्यच । कुरुष्वममकल्याणमष्टाभिःशक्तिभिःसह । गच्छगच्छपरंस्थानंस्वस्थानंदेविचंडिके ॥ व्रजस्रोतोजलं वृद्धयैस्थीयतांचज लेत्विहेतिजलंनीत्वादुर्गेदेविजगन्मातःस्वस्थानंगच्छपूजिते। संवत्सरव्यतीते तुपुनरागमनायवै॥इमांपूजांमयादेवियथाशक्त्योपपादिताम्। रक्षार्थंत्वंसमादा यव्रजस्वस्थानमुत्तममितिजलेप्रवाहयेत् ॥ इयमेवविजयादशमी ॥ साचाद्वि तीयदिनेश्रवणयोगाभावेपूर्वाग्राह्या॥ **तदुक्तंहेमाद्रौस्कांदे** दशम्यांतुनरैःसम्य क्पूजनीयापराजिता ॥ ऐशानींदिशमाश्रित्यअपराह्णेप्रयत्नतः॥ यापूर्णानवमी युक्तात्रस्यांपूज्यापराजिता ॥ क्षेमार्थंविजयार्थंचपूर्वोक्तविधिनानरैः ॥ नवमीशे

षयुक्तायांदशम्यामपराजिता । ददातिविजयंदेवीपूजिताजयवर्धिनी ॥ तथा आश्विनेशुक्लपक्षेतुदशम्यांपूजयेन्नरः । एकादश्यांनकुर्वीत पूजनंचापराजितमिति । यदातुपूर्वदिनेश्रवणयोगाभावः ॥ परदिनेचाल्पापितद्योगिनी तदा परैव ॥ तथाचहेमाद्रौव्रतकांडेकश्यपः ॥ उदयेदशमीकिंचित्संपूर्णैकादशी यदि । श्रवणर्क्षंयदाकालेसातिथिर्विजयाभिधा ॥ श्रवणर्क्षेतुपूर्णायां काकुत्स्थःप्रस्थितोयतः । उल्लंघयेयुःसीमानंतदिनर्क्षेततोनराइति ॥ कालेपराह्णेपरदिनेअपराह्णेश्रवणाभावेतु सर्वपक्षेषुपूर्वैव ॥ मदनरत्नेप्येवम् । ज्योतिर्निबंधेरत्नकोशेचनारदः । ईषत्संध्यामतिक्रांतःकिंचिदुद्भिन्नतारकः । विजयो नामकालोयंसर्वकार्यार्थसिद्धिदः ॥ ईषत्यदशमींशुक्लांपूर्वविद्धांनकारयेत् । श्रवणेनापिसंयुक्तांराज्ञांपट्टाभिषेचने ॥ सूर्योदयेयदाराजन्दृश्यतेदशमीतिथिः । आश्विनेमासिशुक्लेतुविजयांतांविदुर्बुधाः ॥ अत्रायंनिर्गलितोर्थः ॥ अपराह्णोमुख्यःकर्मकालः ॥ तत्रैवपूजाद्युक्तेः ॥ प्रदोषेगौणः ॥ तत्रदिनद्वयेऽपराह्णव्यापित्वेपूर्वाप्रदोषव्याप्तेराधिक्यात् ॥ दिनद्वयेप्रदोषव्यापित्वेपरा । अपराह्णव्याप्तेराधिक्यात् ॥ इदंशुद्धतिथावन्यकाले ॥ श्रवणस्तुरोहिणीवदप्रयोजकः ॥ दिनद्वयेऽपराह्णस्पर्शेतुपूर्वा ॥ तत्रापिपरदिनेपराह्णेश्रवणसत्त्वेपरैवेतिदिक् **अत्रविशेषोभार्गवार्चनदीपिकायांभविष्ये** शमीयुक्तंजगन्नाथंभक्तानामभयंकरम् । अर्चयित्वाशमीवृक्षमर्चयेच्चततःपुनः **शमीमंत्रस्तुहेमाद्रौ । गोपथब्राह्मणे** अमंगलानांशमनींशमनींदुष्कृतस्यच । दुःस्वप्ननाशिनींधन्यांप्रपद्येहंशमींशुभाम् **तथाभविष्ये** शमीशमयतेपापंशमीलोहितकंटका । धारिण्यर्जुनबाणानांरामस्यप्रियवादिनी ॥ करिष्यमाणयात्रायांयथाकालंसुखंमया । तत्रनिर्विघ्नकर्त्रीत्वंभवश्रीरामपूजितेइति ॥ तथा ॥ गृहीत्वासाक्षतामार्द्रांशमीमूलगतामृदं । गीतवादित्रनिर्घोषैरानयेत्स्वगृहंप्रति ॥ ततोभूषणवस्त्रादिधारयेत्स्वजनैःसहेति ॥ अत्रैवबलनीराजनमुक्तंकृत्यरत्ने **तत्रमंत्रः** चतुरंगबलंमह्यंनिरारित्वंव्रजत्विह । सर्वत्रविजयोमेस्तुत्वत्प्रसादात्सुरेश्वरीति ॥ **गौडनिबंधेज्योतिषे** कृत्वानीराजनंराजाबलवृद्ध्यै

यथाक्रमं । शोभनंखंजनंपश्येज्जलंगोगोष्ठसन्निधौ ॥ अस्यफलानिशुभाशुभ देशाश्चतत्रैवज्ञेयाः ॥ आश्विनपौर्णमासीपराग्राह्या । सावित्रीव्रतमंतरेणभव तोमापौर्णमास्यौपरेइतिदीपिकोक्तेः **अत्रविशेषस्तिथितत्त्वेलैंगे** आश्विने पौर्णमास्यांतुचरेज्जागरणंनिशि ॥ कौमुदीसासमाख्याताकार्यालोकैर्विभूतये॥ कौमुद्यांपूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं । सुगंधिर्निशिसद्वेषअक्षैर्जागरणंचरेत् **तथा** निशीथेवरदालक्ष्मीःकोजागर्तीतिभाषिणी । तस्मैवित्तंप्रयच्छामिअक्षैः क्रीडांकरोतियइति ॥ अत्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन ॥ आश्वयुज्यामाश्व युजीकर्मेतितच्छेषपर्वणिकार्यम्विकृतित्वात् । तत्रपूर्वाह्णव्यापिनीग्राह्यादैव कर्मत्वात् । आग्रयणंतुपर्वणिकार्यं ॥ शरद्याग्रयणनामपर्वणिस्याच्चदुच्यतइ तिशौनकोक्तेः ॥ तत्रापिशेषपर्वणिकार्यमितिप्रागुक्तम् ॥ तच्चव्रीहिभिरिष्ट्वाव्री हिभिरेवयजेतयवेभ्योयवैरिष्ट्वायवैरेवजजेतव्रीहिभ्य इतिश्रुत्यादर्शपूर्णमासयो रेककर्मत्वेनैकद्रव्यनियमाद्दर्शेष्ट्याः परंपौर्णमासेष्ट्याश्चप्राग्भवतीतिहेमाद्या दयः । दर्शेष्ट्याःपरमुक्तमाग्रायणकंप्राक्पौर्णमासाच्चतदितिदीपिकोक्तेश्च । त च्चाग्रयणंत्रेधाव्रीह्याग्रयणंयवाग्रयणंश्यामाकाग्रयणंचेति **एषांकालःश्रुतौ ।** गृहमेधी व्रीहियवाभ्यांशरद्वसंतयोर्यजेतश्यामाकैर्नीवारैर्वर्षास्वापत्कालेना न्येपुराणैर्वेति **आपस्तंबोपि** वर्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैर्य थर्तूवेणूयवैरिति तत्रापिश्यामाकाग्रयणमनित्यमितरेतुअनाहिताग्नेर्नित्येयवा ग्रयणंचकार्यमितिस्मार्तवृत्तावुक्तत्वात्॥सूत्रेव्रीहियवदेवतासंबद्धानामेवमंत्रा णामाम्नानाच्च । आहिताग्नेस्तुयवाग्रयणस्याप्यनित्यत्वम् । अपिवाक्रियायवेष्ट्वि तिसूत्रात् । यद्वाव्रीह्याग्रयणेनसमानतंत्रता । श्यामाकैस्तुप्रस्तरंकुर्यान्नाग्रय णम् । यदिवातदपिसमानतंत्रमित्यादिनारायणवृत्तौपरिश्रमवतांसुलभमित्यल म् ॥ इदंचपर्वाभावेशुक्लपक्षेदेवनक्षत्रेकृत्तिकादिविशाखांतेकार्यमितिस्मृत्यर्थ सारेउक्तं॥ बौधायनीयेकेशवस्वामिनाप्येवमुक्तं ॥परिशिष्टे । श्यामाकैर्व्रीहिभि श्चैवयवैश्चान्योन्यकालतः॥ प्राग्यष्टुंयुज्यतेवश्यंनह्यत्राग्रयणाल्पयः **त्रिकांडमं डनोप्येवम्** यदात्वेतदाश्विनपौर्णमास्यांक्रियतेतदैककालत्वादाश्वयुजीकर्म

णस्यचसमानतंत्रताभवति तदेतत्वृत्तिकृताएकवर्हिरिध्माज्येतिसूत्रेस्पष्टमु क्तम् **अस्याकरणेप्रायश्चित्तमुक्तंस्मृतिचंद्रिकायांकात्यायनेन** नित्य यज्ञात्ययेचैववैश्वदेवद्वयस्यच । अनिष्ट्वानवयज्ञेननवान्नप्राशनेतथा ॥ भो जनेपतितान्नस्यचरुर्वैश्वानरोभवेत् **कारिकापि** अकृताग्रयणोऽश्नीयान्नवा न्नंयदिवैनरः । वैश्वानरायकर्तव्यश्चरुःपूर्णाहुतिस्तुवेति **ऋग्विधानेतु** समिं द्वरायामंत्रंचवर्षेवर्षेजपेच्छतं । आग्रयणंयदान्यूनंतदासंपूर्णमेतितदित्युक्तम् ॥ एतच्चापदिमलमासेकार्यमन्यथानेतिप्रागुक्तम् ॥ अन्योप्याहिताग्न्यादि विशेषः ॥ शौनकादेर्ज्ञेयइत्यलंवहुना ॥ इत्याश्विनमासः॥ **अथकार्तिकमा सः** तुलासंक्रमेप्रागपरादशघटीकाःपुण्याःरात्रौतुप्रागुक्तम् **अथकार्तिक स्नानं** तत्रपृथ्वीचंद्रोदये **विष्णुस्मृतिपाद्मयोः** तुलामकरमेषेषु प्रातःस्ना नंविधीयते । हविष्यंब्रह्मचर्यंच महापातकनाशनमितिसौरमासउक्तः । प्रा च्याश्चैतदेवाद्रियन्ते दाक्षिणात्यास्तु आश्विनस्यतुमासस्ययाशुक्लैकादशीभ वेत् । कार्तिकस्यव्रतानीहतस्यांवै प्रारभेत्सुधीरितिपाद्मोक्तेः **भार्गवार्चनेच** प्रारभ्यैकादशीशुक्लामाश्विनस्यतुमानवः । प्रातःस्नानंप्रकुर्वीतयावत्कार्तिक भास्करइति विष्णुरहस्योक्ते **हेमाद्रावादित्यपुराणे** पूर्णआश्वयुजेमासिपौ र्णमास्यांसमाहितइत्युक्त्वा मासंसमग्रंपरयाचभक्त्यासमाप्यतेकार्तिकपौर्ण मास्यामित्यंतेभिधानाच्चाश्विनशुक्लैकादश्यां पौर्णमास्यांवारभ्यकार्तिकशुक्ल द्वादश्यांपौर्णमास्यांवासमापयेदित्याहुः **मदनपारिजातेविष्णुः** कार्तिकं सकलंमासंनित्यस्नायीजितेन्द्रियः । जपन्हविष्यभुक्शांतः सर्वपापैःप्रमुच्य ते ॥ अत्रदेशविशेषः पाद्मेकार्तिकंप्रक्रम्य कुरुक्षेत्रेकोटिगुणोगंगायामपित त्समः । ततोधिकःपुष्करेस्यात्द्वारवत्यांचभार्गव । पुण्याःपुर्यश्चसप्तैवंमुनयो मथुराधिका । दुर्लभःकार्तिकोविप्रामथुरायांनृणामिह । यत्रार्चितःस्वकंरूपंभ क्तेभ्यःसंप्रयच्छतीति इदंचस्नानंकाशीस्थपंचनदेप्यतिप्रशस्तं । शतंसमास्त पस्तप्त्वाकृतेयत्प्राप्यतेफलम् । तत्कार्तिकेपंचनदेसकृत्स्नानेनलभ्यते ॥ कार्तिकेबिंदुतीर्थेयोब्रह्मचर्यपरायणः स्नास्यत्यनुदिनेभानौभानुजातस्यभीः

कृतइत्यादिकाशीखंडोक्तेः ॥ भानुजोयमः । इदंचप्रातःस्नानंसंध्यांचकृत्वा कार्यम् । तेनविनेतरकर्मानधिकारादितिवर्धमानः । यद्यपिप्रातःसंध्यायाःसूर्योदयेसमाप्तिस्तथापिवचनबलादनुदितहोमवद्भविष्यति **स्नानमंत्रश्चतत्रैव** कार्तिकेऽहंकरिष्यामिप्रातःस्नानंजनार्दन । प्रीत्यर्थंतवदेवेशदामोदरमया सह ॥ इमंमंत्रंसमुचार्यमौनीस्नायात्व्रतीनरइति ॥ अर्घ्यमंत्रोपितत्रैव । व्रतिनःकार्तिकेमासिस्नातस्यविधिवन्मम। गृहाणार्घ्यमयादत्तंदनुजेंद्रनिषूदन॥ नित्यनैमित्तिककृष्णकार्तिकेपापनाशने । गृहाणार्घ्यमयादत्तंराधयासहितो हरे। इमौमंत्रौसमुच्चार्ययोऽर्घ्यमह्यंप्रयच्छति । सुवर्णरत्नपुष्पांबुपूर्णशंखेनपुण्यवान् ॥ सुवर्णपूर्णापृथिवीतेनदत्तानसंशयइति । एवंसंपूर्णस्नानाशक्तौत्र्यहंस्नायात् । वाराणस्यांपंचनदेत्र्यहंस्नातास्तुकार्तिके । अमीतेपुण्यवपुषःपुण्यभाजोतिनिर्मलाइतिकाशीखंडोक्तेः ॥ **अथमालाधारणम् तत्रस्कांदे द्वारकामाहात्म्ये** निवेद्यकेशवेमालांतुलसीकाष्ठसंभवाम् । वहतेयोनरोभक्त्यातस्यवैनास्तिपातकम् । नजह्यात्तुलसीमालांधात्रीमालांविशेषतः । महापातकसंहर्त्रीं धर्मकामार्थदायिनीम् **विष्णुधर्मे** स्पृशेत्तुयानिलोमानिधात्रीमालाकलौनृणाम् । तावद्वर्षसहस्राणिवैकुंठेवसतिर्भवेत् । मालायुग्मंतुयोनित्यंधात्रीतुलसिसंभवम् वहतेकंठदेशेतुकल्पकोटिदिवंवसेत् । तुलसीकाष्ठसंभूतेमालेकृष्णजनप्रिये । बिभर्मित्वामहंकंठेकुरुमाकृष्णवल्लभं । एवंसंप्रार्थ्यविधिवन्मालांकृष्णगलेऽर्पिताम् ॥ धारयेत्कार्तिकेयोवैसगच्छेद्वैष्णवंपदमिति । अत्रमूलंचिंत्यम् **तथाकाशीखंडे** कार्तिकेमासिमेयात्रायैःकृताभक्तित्परैः । बिंदुतीर्थकृतस्नानैस्तेषांमुक्तिर्नदूरतः **भार्गवार्चनदीपिकायांनृसिंहपुराणे** अगस्तिकुसुमैर्देवंयोऽर्चयेच्चजनार्दनं । दर्शनात्तस्यदेवर्षेनरकंनाप्नुतेनरः ॥ विहायसर्वपुष्पाणिमुनिपुष्पेणकेशवम् । कार्तिकेयोऽर्चयेद्भक्त्यावाजपेयफलंलभेत् **स्कांदेकार्तिकमाहात्म्ये** मालतीमालयाविष्णुःकेतक्याचैवपूजितः । समाःसहस्रंसुप्रीतोभवेत्तेमधुसूदनः **पृथ्वीचंद्रोदयेपाद्मे** कार्तिकेनार्चितोयैस्तुकमलैःकमलेक्षणः जन्मकोटिषुविप्रेंद्रनतेषांकमलागृहे ॥

तथा कार्तिकेकेशवेपूजायेषांनाम्नासुतैःकृता । तेनिर्भर्त्स्यरवेःपुत्रंवसंति त्रिदिवेसदा ॥ तुलसीदललक्षेणकार्तिकेयोऽर्चयेद्धरिं । पत्रेपत्रेमुनि श्रेष्ठमौक्तिकंलभतेफलम् **तथास्कांदेकार्तिकमाहात्म्ये** धात्रीच्छायेतुयः कुर्यात्पिंडदानंमहामुने । मुक्तिंप्रयांतिपितरः प्रसादान्माधवस्यतु ॥ धात्रीफलविलिप्तांगोधात्रीफलविभूषितः । धात्रीफलकृताहारोनरोनारायणो भवेत् । धात्रीच्छायांसमाश्रित्ययोऽर्चयेच्चक्रधारिणं । पुष्पेपुष्पेश्वमेधस्यफलं प्राप्नोतिमानवः **तथास्कांदे** कार्तिकेमासिविप्रेंद्रधात्रीवृक्षोपशोभिते । वने दामोदरंविष्णुंचित्रान्नैस्तोषयेद्विभुं । मूलेन पायसेनाथ होमंकुर्याद्विचक्षणः ॥ ब्राह्मणान्भोजयेच्छक्त्यास्वयंभुंजीतबंधुभिरिति **तथा** कार्तिकेद्विदलव्रतं प्रागुक्तं कार्तिकेद्विदलंत्यजेदिति **पाद्मेपिकार्तिकमाहात्म्ये** राजिकामाढकंचैवनैवाद्यात्कार्तिकव्रती । द्विदलंतिलतैलंचतथान्यन्मतिदूषितम् **स्कांदेपि** कार्तिकेवर्जयेत्तद्वद्द्विदलंबहुबीजकं ॥ माषमुद्गमसूराश्चचणकाश्च कुलित्थकाः । निष्पावाराजमाषाश्चआढक्योद्विदलंस्मृतं । नूतनान्यपिजीर्णानिसर्वाण्येतानिवर्जयेत् ॥ अत्रकेचिदुत्पत्तिसमयेदलद्वयंयस्यभवति । तद्भूतपूर्वगत्याद्विदलमित्युच्यतइत्याहुःउदाहरंतिच । बीजमेवसमुद्भूतंद्विदलं चांकुरंविना । दृश्यतेयत्रसस्येषुद्विदलंतन्निगद्यतइति ॥ अन्येतुलक्षणायां मानाभावाद्वचनस्यनिमूर्लत्वाद्विदलात्मकंयस्यस्वरूपं तदेववर्जयेदित्याहुः **तथानारदीये** कार्तिकेवर्जयेत्तैलंकार्तिकेवर्जयेन्मधु । कार्तिकेवर्जयेत्कांस्यं कार्तिकेशुक्लसंधितं । कांस्यंतत्पात्रभोजनंशुक्लंपर्युषितं **संधितंलवणशाकः तत्रैव** कार्तिकेविष्णुमूर्त्यग्रेदीपदानाद्विवंव्रजेत् **तथा** कार्तिकेतुकृतादीक्षानृणां जन्मविमोचनी **तथा** कार्तिकेकृच्छ्रसेवीयःप्राजापत्यपरोथवा। एकांतरोपवासीवात्रिरात्रोपोषितोपिवा । षट्वाद्वादशपक्षेवामासंवावरवर्णिनि ॥ एकभक्तेननक्तेनतथैवायाचितेनच । उपवासेनभैक्षेणव्रजेतपरमंपदम् ॥ अन्येपिनियमाःप्रागुक्ताः **ग्राह्यमुक्तंस्कांदे** व्रीहयोयवगोधूमाःप्रियंगुतिलशालयः । एतेहिसात्त्विकाःप्रोक्ताःस्वर्गमोक्षफलप्रदाः **काशीखंडे** ऊर्जेयवान्नमश्नीया

देवान्नमथवापुनः । वृन्ताकंसूरणंचैवशूकशिंबीश्चवर्जयेत् **पृथ्वीचंद्रोदये पाद्मे** नोर्जोवंध्योविधातव्योव्रतिनाकेनचित्क्वचित् **तथानारदीये** अव्रते नक्षपेद्यस्तुमासंदामोदरप्रियं । तिर्यग्योनिमवाप्नोतिनात्रकार्याविचारणा ॥ अन्यान्यपि । तांबूलतैलकेशकर्तनादिवर्जनसंकल्परूपाणिप्रागुक्तानि ॥ **तथाकार्तिकेआकाशदीपउक्तोनिर्णयामृतेपुष्करपुराणे** तुलायांतिलतैलेनसायंकालेसमागते । आकाशदीपंयोदद्यान्मासमेकंहरिंप्रति । महतींश्रियमाप्नोतिरूपसौभाग्यसंपदमिति **तद्विधिश्चहेमाद्रावादित्यपुराणे** दिवाकरेस्ताचलमौलिभूतेगृहाददूरेपुरुषप्रमाणं । यूपाकृतिंयज्ञियवृक्षदारुमारोप्य भूमावथतस्यमूर्ध्नि । यवांगुलच्छिद्रयुतास्तुमध्येद्विहस्तदीर्घाअथपट्टिकासु ॥ कृत्वाचतस्रोऽष्टदलाकृतीस्तुयाभिर्भवेदष्टदिशानुसारी । तत्कर्णिकायांतुमहाप्रकाशोदीपःप्रदेयोदलगास्तथाष्टौ । निवेद्यधर्मायहरायभूम्यैदामोदरायाप्यथधर्मराज्ञे । प्रजापतिभ्यस्त्वथसत्पितृभ्यःप्रेतेभ्यएवाथतमस्थितेभ्यइति ॥ अपरार्केत्वन्योमंत्रउक्तः **यथा** दामोदरायनभसितुलायांलोलयासह ॥ प्रदीपंतेप्रयच्छामिनमोनंतायवेधसइति ॥ कार्तिककृष्णचतुर्थीकरकचतुर्थी । सा चंद्रोदयव्यापिनीग्राह्या । दिनद्वयेतत्त्वे पूर्वातत्रैवपूजाद्यास्नानात् । कार्तिककृष्णद्वादशीगोवत्ससंज्ञा । साप्रदोषव्यापिनीग्राह्या । दिनद्वयेतत्त्वेपूर्वा युग्मवाक्यात् । वत्सपूजावटश्चैवकर्तव्याप्रथमेहनीतिनिर्णयामृतेभिधानाच्च **अत्रविशेषोमदनरत्नेभविष्ये** सवत्सांतुल्यवर्णांचशीलिनींगांपयस्विनीं ॥ चंदनादिभिरालिप्यपुष्पमालाभिरर्चयेत् । अर्घ्यंताम्रमयेपात्रेकृत्वापुष्पाक्षतैस्तिलैः । पादमूलेतुदद्याद्वैमंत्रेणानेनपांडव । क्षीरोदार्णवसंभूतेसुरासुरनमस्कृते । सर्वदेवमयेमातर्गृहाणार्घ्यंनमोनमः ॥ ततोमाषादिसंसिद्धान्वटकान्विनिवेदयेत् । सुरभित्वंजगन्मातर्देवविष्णुपदेस्थिता । सर्वदेवमयेग्रासंमयादत्तमिमंग्रस । ततःसर्वमयेदेविसर्वदेवैरलंकृते । मातर्ममाभिलषितंसफलंकुरुनंदिनि ॥ इतिप्रार्थयेत् **तथा** तद्दिनेतैलपक्वंचस्थालीपक्वंयुधिष्ठिर ॥ गोक्षीरंगोघृतंचैवदधितक्रंचवर्जयेत् **ज्योतिर्निबंधेनारदः** आश्विनेकृष्ण

पक्षेतुद्वादश्यादिषुपंचसु । तिथिषूक्तःसर्वरात्रेनृणांनीराजनोविधिः ॥ नीराजयेयुर्देवांस्तुविप्रान्गाश्चतुरंगमान् । ज्येष्ठान्श्रेष्ठान्जघन्यांश्चमातृमुख्याश्चयोषितइति **निर्णयामृतेस्कांदे** कार्तिकस्यसितेपक्षेत्रयोदश्यांनिशामुखे ॥ यमदीपंबहिर्दद्यादपमृत्युर्विनश्यति **मंत्रस्तु** मृत्युनापाशदंडाभ्यांकालेन यमयासह । त्रयोदश्यांदीपदानात्सूर्यजःप्रीयतांममेति । कार्तिककृष्णचतुर्दश्याप्रभातेचंद्रोदयेऽभ्यंगंकुर्यात् **तदुक्तंहेमाद्रौनिर्णयामृतेचभविष्योत्तरे** कार्तिकेकृष्णपक्षेतुचतुर्दश्यामिनोदये । अवश्यमेवकर्तव्यंस्नानंनरकभीरुभिः ॥ इनश्चंद्रः । मदनरत्नेविधूदयइतिपाठः । दिनोदयइतिपाठात्सूर्योदयोत्तरंत्रिमुहूर्तेस्नानंवदतांगौडानांतदनुसारिणांचाज्ञतैव । पूर्वविद्धचतुर्दश्यांकार्तिकस्यसितेतरे । पक्षेप्रत्यूषसमयेस्नानंकुर्यात्प्रयत्नतइति **स्मृतिदर्पणेपि** चतुर्दशीचाश्वयुजश्चकृष्णास्वात्यर्क्षयुक्ताचभवेत्प्रभाते । स्नानंसमभ्यज्यनरैस्तुकार्यंसुगंधतैलेनविभूतिकामैरिति **पृथ्वीचंद्रोदयेपाद्मे** आश्वयुक्कृष्णपक्षस्यचतुर्दश्यांविधूदये । तिलतैलेनकर्तव्यंस्नानंनरकभीरुणेति ॥ कर्तव्यंमंगलस्नानंनरैर्नरयभीरुभिरितिकालादर्शेपाठः । उभयत्राश्वयुगित्यमावास्यांतंमासमभिप्रेत्योक्तं **तथा** तैलेलक्ष्मीर्जलेगंगा दीपावल्याश्चतुर्दशीं । प्रातेतिविशेषः । प्रातस्नानंतुयःकुर्याद्यमलोकंनपश्यतीति । दिनद्वयेपिचन्द्रोदयेचतुर्दशीसत्त्वेतदभावेप्यरुणोदयेसम्पूर्णेखण्डेवादिनद्वयेचतुर्दशीसमत्वेच पूर्वदिनेभ्यंगंकुर्यात् । पूर्वविद्धचतुर्दश्यामितिवचनात् । पूर्वदिनेपरदिनएववासत्त्वेसैवग्राह्या । दिनद्वयेप्यसत्त्वेअरुणोदयव्यापिनी ग्राह्या । पक्षेप्रत्यूषसममयइत्युक्तेः । वक्ष्यमाणवचनाच्च । तदभावेतुचतुर्दशीह्रासंपूर्वेद्युःप्रवेश्यपूर्वेह्नित्रयोदशीमध्यएवाभ्यंगंकुर्यादितिदिवोदासः ॥ केचिदत्रवचनमपिसाधकत्वेनवदंति । तिथ्यादौतुभवेद्यावान्ह्रासोवृद्धिःपरेहनि । तावान्ग्राह्यः सपूर्वेद्युरदृष्टोपिस्वकर्मणीतितन्मंदं । नहीदंवचनं पूर्वदिनस्यापूर्वग्राह्यत्वंविधत्ते ॥ नक्तैकभक्तजन्माष्टम्यादौदिनद्वयेकर्मकालव्याप्त्यभावेसर्वत्रपूर्वदिनस्यग्राह्यत्वप्रसंगात् ॥ किंतु । यत्रैकभक्तादौदिन

द्वयेकर्मकालव्याप्त्यभावेवाक्यांतरेणन्यायेनवा पूर्वदिनस्याग्राह्यत्वमुक्तं । तत्रमुख्यकालेतत्तिथेरभावेपियत्रैवानुष्ठानबोधकमिदं । नचात्रतदस्तीतियत् किंचिदेतत् । तेनचतुर्थयामगामिनीग्राह्या । अतएवसर्वज्ञनारायणः । तथाकृष्णचतुर्दश्यामाश्विनेऽर्कोदयात्पुरा ॥ यामिन्याःपश्चिमेयामेतैलाभ्यंगोविशिष्यतइति । मृगांकोदयवेलायांत्रयोदश्यांयदाभवेत् । दर्शेवामंगलस्नानंदुःखशोकभयप्रदमिति । कालादर्शेत्रयोदशीनिषेधाच्च । तेनायमर्थः । यथाग्निहोत्रेयावज्जीवंसायंप्रातःकालेषुव्याप्यकालस्यगुरुत्वम् । तथात्रचतुर्दशीचतुर्ध्यामारुणोदयचन्द्रोदयानामुत्तरोत्तरस्यव्याप्यत्वाद्गुरुत्वमिति यद् **पिदिवोदासीये** त्रयोदशीयदाप्रातःक्षयंयातिचतुर्दशी । रात्रिशेषेत्वमावास्यातदाभ्यंगेत्रयोदशीति वचनंतद्धेमाद्रिनिर्णयामृताद्यलिखितत्वेननिर्मूलं । समूलत्वेपिचतुर्दश्याःसूर्योदयद्वयासंबंधित्वरूपःक्षयोत्रविवक्षितः सूर्योदयात् प्राक्समाप्तौचन्द्रोदयकालसत्त्वेचतथैवांगीकारात् । किंतु । अभ्यंगकालात्प्राक्समाप्तिरूपोऽत्रह्रासः क्षयशब्देनविवक्षितः सचारुणोदयात्चतुर्थयामाद्याप्राक्यदाह्रासस्तत्परमिदं । अतएवसर्वज्ञनारायणेनचतुर्थयाममात्रेस्नानमुक्तं तथाचोदात्तं तथाकृष्णचतुर्दश्यामिति । **ज्योतिर्निबंधेनारदोपि** ईषासितचतुर्दश्यामिंदुक्षयतिथावपि । ऊर्जादौस्वातिसंयुक्तेतदादीपावलीभवेत् । कुर्यात्संलग्नमेतच्चदीपोत्सवदिनत्रयं । येतुत्रयोदशीमध्येस्नानमाहुस्तेषामाशयंनविद्मइत्यलं भूयसायदपि । अरुणोदयतोन्यत्ररिक्तायां स्नातियोनरः । तस्याब्दिकभवोधर्मोनश्यत्येवनसंशयइति दिवोदासीयेभविष्यवचनं तन्मुख्यकालेऽरुणोदयेचतुर्दश्यभावेपितत्रैवस्नातव्यमित्येवंपरमितिसर्वंसिद्धं । चतुर्घटिकात्मकोऽरुणोदयइतितत्रैवोक्तम् **मदनरत्नेपाद्मे** अपामार्गमथोतुंबी प्रपुन्नाटमथापरम् । भ्रामयेत्स्नानमध्येतुनरकस्यक्षयायवै । प्रपुन्नाटश्चक्रमर्दः **मंत्रस्तु** सितालोष्ठसमायुक्तसकंटकदलान्वित । हरपापमपामार्गभ्राम्यमाणःपुनःपुनरिति । अस्यामेवप्रदोषेदीपान्दद्यादित्युक्तं हे **माद्रौस्कांदे** ततःप्रदोषसमयेदीपान्दद्यान्मनोरमान् । ब्रह्मविष्णुशिवादी

नांभवनेषुमठेषुचेति **दिवोदासीयेब्राह्मे** अमावास्याचतुर्दश्योःप्रदोषेदीपदा नतः । यममार्गाधिकारेभ्योमुच्यतेकार्तिकेनरः । खण्डतिथौतुपूर्वेह्निप्रदोषेदी पान्दत्वापरेह्युःस्नायादितिदिवोदासीयेउक्तं । अत्रनरकोद्देशेनचतुर्वर्तियुक्तं दीपदानंकार्यम् **तत्रमंत्रः** दत्तोदीपश्चतुर्दश्यांनरकप्रीतयेमया । चतुर्वर्तिस मायुक्तःसर्वपापापनुत्तये **तत्रैवलैंगे** माषपत्रस्यशाकेनभुक्त्वातत्रदिनेनरः। प्रेताख्यायांचतुर्दश्यांसर्वपापैःप्रमुच्यते । **अत्रयमतर्पणमुक्तंमदनपारिजा तेवृद्धमनुना** दीपोत्सवचतुर्दश्यांकार्यंतुयमतर्पणन् **मदनरत्नेब्राह्मे** अपा मार्गस्यपत्राणिभ्रामयेच्छिरसोपरि । ततश्चतर्पणंकार्यंधर्मराजस्यनामभिः ॥ यमायधर्मराजायमृत्यवेचांतकायच । वैवस्वतायकालाय्सर्वभूतक्षयायच ॥ औदुंबरायदध्नायनीलायपरमेष्ठिने । वृकोदरायचित्रायचित्रगुप्तायवैनमइ ति **तर्पणप्रकारस्तुहेमाद्रौ** एकैकेनतिलैर्मिश्रान्दद्याच्चींस्त्रीन्जलांजलीन् । संवत्सरकृतंपापंतत्क्षणादेवनश्यति **तथामदनरत्नेस्कांदे** दक्षिणाभिमुखो भूत्वातिलैःसव्यंसमाहितः । देवतीर्थेनदेवत्वात्तिलैःप्रेताधिपोयतः । तथा। यज्ञोपवीतिनाथवेति । इदंजीवत्पितृकेणापिकार्यम् । जीवत्पितापिकुर्वी ततर्पणंयमभीष्मयोरितिपाद्मोक्तेः **अत्रभीष्मतर्पणमप्युक्तंदिवोदासीये** त त्प्रकारस्तुमाघेवक्ष्यते ॥ इतिनरकचतुर्दशी ॥ कार्तिकामावास्यायांप्रातर भ्यंगंकुर्यात् **तदुक्तंकालादर्शे** प्रत्यूषआश्वयुग्दर्शेकृताभ्यंगादिमंगलः । भ क्त्याप्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये । अस्यव्याख्यानेआदिशब्दात्पंचत्वगु दकस्नानादेरुपसंग्रहः **तदुक्तंपुष्करपुराणे** स्वातीस्थितेरवाविंदुर्यदिस्वा तिगतोभवेत् । पंचत्वगुदकस्नायीकृताभ्यंगविधिर्नरः । नीराजितोमहाल क्ष्मीमर्चयन्श्रियमश्नुते । आश्वयुग्दर्शइतिदर्शशब्दः । प्रत्यूषस्वातियुक्त तिथिपरः **तदुक्तंब्राह्मे** ऊर्जेशुक्लद्वितीयायां तिथिषुस्वातिऋक्षगे । मानवो मंगलस्नायीनैवलक्ष्म्याविमुज्यते । तत्रैव । इषेभूतेचदर्शेच कार्तिकप्रथमे दिने । यदास्वातीतदाभ्यंगस्नानंकुर्यादिनोदये **कश्यपसंहितायांतुदीपा वलिदर्शप्रक्रम्य** इंदुक्षयेपिसंक्रांतौरवौपातेदिनक्षये । तत्राभ्यंगोनदोषाय

प्रातःपापापनुत्तयइति **स्वातीयोगंविनाप्यभ्यंगउक्तःमात्स्ये** दीपैर्नीरा जनादत्रसैषादीपावलीस्मृता **अत्रविशेषोहेमाद्रौभविष्ये** दिवातत्रनभो क्तव्यमृतेबालातुराज्जन्नात् । प्रदोषसमयेलक्ष्मींपूजयित्वाततःक्रमात् । दी पवृक्षाश्चदातव्याःशक्त्यादेवगृहेषुच ॥ तत्रैवाभ्यंगमभिधाय ॥ एवंप्रभात समयेत्वमावास्यांनराधिप । कृत्वातुपार्वणश्राद्धं दधिक्षीरघृतादिभिः । दी पान्दत्वाप्रदोषेतुलक्ष्मींपूज्ययथाविधि । स्वलंकृतेनभोक्तव्यंसितवस्त्रोपशो भिना । अयंप्रदोषव्यापीग्राह्यः ॥ तुलासंस्थेसहस्रांशोप्रदोषेभूतदर्शयोः । उल्काहस्तानराःकुर्युः पितॄणांमार्गदर्शनमितिज्योतिषोक्तेः ॥ दिनद्वयेस त्त्वेपरः । दंडैकरजनीयोगेदर्शःस्यात्तुपरेऽहनि । तदाविहायपूर्वेद्युःपरेऽह्नि सुखरात्रिकेतितिथितत्त्वेज्योतिर्वचनात् । दिवोदासीयेतुप्रदोषस्यकर्मकाल त्वात् । अर्धरात्रेभवत्येवलक्ष्मीराश्रयितुंगृहान् । अतःस्वलंकृतालिप्तादीपै र्जाग्रज्जनोत्सवाः । सुधाधवलितःकार्याः पुष्पमालोपशोभिताइति । ब्राह्मो क्तेश्च । प्रदोषार्धरात्रव्यापिनीमुख्याएकैकव्याप्तौपरैव ॥ प्रदोषस्यमुख्यत्वा दर्धरात्रेनुष्ठेयाभावाच्च । **यत्तु** अपराह्णेप्रकर्तव्यंश्राद्धंपितृपरायणैः । प्रदोष समयेराजन्कर्तव्यादीपमालिकेतिक्रमः । ससंपूर्णतिथावेवप्राप्तेरनुवादोनवि धिः । तत्तत्कर्मकालव्याप्तेर्बलवत्वात्सम्पूर्णतिथौप्राप्त्याखण्डतिथावप्रा प्त्याविध्यनुवादविरोधाच्चेत्युक्तम् **अत्रैवदर्शेपरारात्रेऽलक्ष्मीनिःसारणमु क्तंमदनरत्नेभविष्ये** एवंगतेनिशीथेतु जनेनिद्रार्धलोचने । तावन्नगरना रीभिः शूर्पडिंडिमवादनैः । निष्काश्यतेप्रहृष्टाभिरलक्ष्मीःस्वगृहांगणात् **कार्तिकशुक्लप्रतिपदिगोक्रीडनमुक्तम् निर्णयामृतेअस्यामेवरात्रौबलेः पूजोक्ताहेमाद्रौभविष्ये** कृत्वैतत्सर्वमेवेहरात्रौदैत्यपतेर्बलेः । पूजांकुर्यान्नृ पःसाक्षाद्भूमौमंडलकेशुभे । बलिमालिख्यदैत्येंद्रंवर्णकैःपंचरंगकैः । गृहस्य मध्येशालायां विशालायांततोऽर्चयेत् । लोकश्चापिगृहस्यांतःशय्यायांशुक्ल तंडुलैः । संस्थाप्यबलिराजानं फलैःपुष्पैस्तुपूजयेत् **मंत्रास्तुपाद्मे** बलिरा जनमस्तुभ्यंदैत्यदानववंदित । इंद्रशत्रोमरारातेविष्णुसान्निध्यदोभवेति **तथा**

बलिमुद्दिश्यदीयंतेदानानिकुरुनंदन । यानितान्यक्षयाण्याहुर्मयैवंसंप्रदर्शितमिति ॥ तदेतत्पूर्वविद्धप्रतिपादिकर्तव्यं । पूर्वविद्धाप्रकर्तव्याशिवरात्रिर्बलेर्दिनमितिहेमाद्रौपाद्मोक्तेः **माधवोपि** बल्युत्सवंचपूर्वेद्युरुपवासवदाचरेदिति **निर्णयामृतेपि** याकुहूःप्रतिपन्मिश्रातत्रगाःपूजयेन्नृप । पूजनाच्चीणिवर्धतेप्रजागावोमहीपतिरिति **तथा** भद्रायांगोकुलक्रीडासदेशोवैविनश्यति। भद्रायांद्वितीयायां **तथा** प्रतिपद्यग्निकरणंद्वितीयायांतुगोर्चनम्।छत्रच्छेदंकरिष्येतेवित्तनाशंकुलक्षयमिति **तथा** प्रतिपद्दर्शसंयोगेक्रीडनंतुगवांमतम्। परविद्धेषुयःकुर्यात्पुत्रदारधनक्षयइतिदेवलवचनाच्च। एतेचविधिप्रतिषेधाः।पूर्वदिनेप्रतिपदःसायाह्नव्यापित्वेद्वितीयदिनेचंद्रदर्शनसंभवेचज्ञेयाः गवांक्रीडादिनेयत्ररात्रौदृश्येतचंद्रमाः। सोमोराजापशून्हंतिसुरभिः पूजकांस्तथेतिपुराणसमुच्चयात्।दिनद्वयेसायाह्नव्यापित्वेतुपरैवग्राह्या।वर्धमानतिथौनंदायदासार्धत्रियामिद्वितीयावृद्धिगामित्वादुत्तरातत्रचोच्यतइति । तथात्रियामगादर्शातिथिर्भवेच्चेत्सार्द्धत्रियामाप्रतिपद्विवृद्धौ । दीपोत्सवेतेमुनिभिःप्रदिष्टेअतोन्यथापूर्वयुतेविधेयइतिपुराणसमुच्चयादितिनिर्णयामृतकारः ॥ सार्द्धत्रियामिकेत्यनेनचंद्रदर्शनाभावउक्तः । द्वितीयायाःपंचधाविभक्तदिनचतुर्थांशरूपापराह्णव्याप्तावेवचंद्रदर्शनसंभवात् । वयंत्वेतद्वचनद्वयंपूर्वविद्धासंभवेवेदितव्यमितिब्रूमः ॥ दिनद्वयेप्रतिपदःसायाह्नव्याप्त्यभावेतुपूर्वैव । रात्रौबलिपूजाविधानेनकर्मकालव्यापित्वात् । परदिनेचंद्रोदयेतन्निषेधादितिविक् । मदनरत्नेतु पूर्वविद्धायांगोक्रीडा नीराजनमंगलमालिकेतूत्तरत्रकार्ये कार्तिकेशुक्लपक्षेतु विधानद्वितयंभवेत् । नारीनीराजनंप्रातःसायंमंगलमालिका । यदाचप्रतिपत्स्वल्पानारीनीराजनंभवेत्द्वितीयायांतदाकुर्यात्सायंमंगलमालिकामितिब्राह्मोक्तेः॥ लभ्यतेयदिवाप्रातःप्रतिपद्घटिकाद्वयम्। तस्यांनीराजनंकार्यंसायंमंगलमालिकेति । भविष्योक्तेःप्रातर्वायदिलभ्येतप्रतिपद्घटिकाशुभा । द्वितीयायांतदाकुर्यात्सायंमंगलमालिकामिति देवीपुराणाच्चेत्युक्तम् ॥ अत्रविशेषोहेमाद्रौब्राह्मे॥बलिप्रतिदंप्रक्रम्य तास्मिन्द्यूतंप्रकर्तव्यंप्रभातेतत्रमानवैः ॥

तस्मिन्द्यूतेजयोयस्य तस्यसंवत्सरंजयः । पराजयोविरुद्धश्च लाभनाश करोभवेत् । दयिताभिश्चसहितैर्नेयासाचभवेन्निशीति **अत्रगोवर्धनपूजा दिचोक्तंहेमाद्रौ निर्णयामृतेचस्कांदे** प्रातर्गोवर्धनंपूज्यद्यूतंचापिसमाचरेत् । भूषणीयास्तयागावः पूज्याश्चावाहदोहनाः । गोवर्धनश्चगोमयेनकार्यश्चित्रेणवा ॥ मंत्रस्तु । गोवर्धनधराधारगोकुलत्राणकारण । बहुबाहुकृतच्छायगवांकोटिप्रदोभव ॥ गोमंत्रस्तु लक्ष्मीर्यालोकपालानांधेनुरूपेणसंस्थिता । घृतंवहतियज्ञार्थेममपापंव्यपोहतु ॥ तत्रैवस्कांदे । ततोऽपराह्णसमयेपूर्वस्यांदिशिभारत । मार्गपालींप्रबध्नीयात्तुंगेस्तंभेथपादपे । कुशकाशमयींदिव्यांलंबकैर्बहुभिर्मुने । दर्शयित्वागजानश्वान्सायमस्यास्तलेनयेत् । कृतहोमेद्विजेंद्रैस्तुबध्नीयान्मार्गपालिकाम् । नमस्कारंततःकुर्यान्मंत्रेणानेनसुव्रत । मार्गपालिनमस्तेस्तुसर्वलोकसुखप्रदे । विधेयैःपुत्रदाराद्यैःपुनरेहिव्रतस्यमे । नीराजनंचतत्रैवकार्यराष्ट्रजयप्रदम् । राजानोराजपुत्राश्चब्राह्मणाःशूद्रजातयः मार्गपालींसमुल्लंघ्यनीरुजःस्युःसुखान्विताः **तत्रैवादित्यपुराणे** कुशकाशमयींकुर्याद्यष्टिकांसुदृढांनवां ॥ तामेकतोराजपुत्राहीनवर्णास्थतान्यतः । गृहीत्वाकर्षयेयुस्तांयथासारंमुहुर्मुहुः । जयोत्रहीनजातीनांजयोराज्ञस्तुवत्सरमिति । **यमद्वितीयातुप्रतिपद्युताग्राह्येत्युक्तंनिर्णयामृतादौ** ॥ यमद्वितीयामध्याह्नव्यापिनीपूर्वविद्धाचेतिहेमाद्रिः । अत्रविशेषोहेमाद्रौस्कांदे । ऊर्जशुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं । स्नानंकृत्वाभानुजायांयमलोकंनपश्यतीति । ऊर्जेशुक्लेद्वितीयायांपूजितस्तर्पितोयमः ॥ वेष्टितःकिन्नरैर्हृष्टैस्तस्मैयच्छतिवांछितम् ॥ **तथाभविष्ये** प्रथमाश्रावणेमासितथाभाद्रपदेतरा । तृतीयाश्वयुजेमासिचतुर्थीकार्तिकेभवेत् । श्रावणेकलषानामुतथाभाद्रेचगौर्मला । आश्विनेप्रेतसंचाराकार्तिकेयाम्यकामतेत्युक्त्वाप्रथमायांव्रतंद्वितीयायांसरस्वतीपूजा तृतीयायांश्राद्धमुक्त्वाचतुर्थ्यामुक्तं । कार्तिकेशुक्लपक्षस्यद्वितीयायांयुधिष्ठिर । यमोयमुनयापूर्वंभोजितःस्वगृहेऽर्चितः । अतोयमद्वितीयेयं त्रिषुलोकेषुविश्रुता । अस्यांनिजगृहेविप्रनभोक्तव्यंततोनरैः । स्नेहेन

भगिनीहस्ताद्भोक्तव्यंपुष्टिवर्द्धनं । दानानिचप्रदेयानिभगिनीभ्योविधानतः स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः । सर्वाभगिन्यःसंपूज्याअभावेप्रतिपन्नकाः ॥ प्रतिपन्नाः माताभगिन्यइतिहेमाद्रिः । पितृव्यभगिनीहस्तात्प्रथमायांयुधिष्ठिर ॥ मातुलस्यसुताहस्ताद्द्वितीयायांतथानृप । पितुर्मातुःस्वसुःकन्येतृतीयायांतयोः करात् । भोक्तव्यंसहजायाश्चभगिन्याहस्ततःपरं । सर्वासुभगिनीहस्ताद्भोक्तव्यंबलवर्धनं यस्यांतिथौयमुनायायमराजदेवःसंभोजितःप्रतिजगत्स्वसृदौहृदेन।तस्यांस्वसुःकरतलादिहयोभुनक्तिप्राप्नोतिरत्नसुखधान्यमनुत्तमंसः।गौडास्तु॥ यमंचचित्रगुप्तंचयमदूतांश्चपूजयेत्।अर्घ्यश्चात्रप्रदातव्योयमायसहजद्वयैः।मंत्रः।एह्येहिमार्तंडजपाशहस्तयमांतकालोकधरामरेश। भ्रातृद्वितीयाकृतदेवपूजांगृहाणचार्घ्यंभगवन्नमस्ते। भ्रातस्तवानुजाताहंभुंक्ष्वभक्तमिदंशुभं । प्रीतयेयमराजस्ययमुनायांविशेषतः ज्येष्ठाप्रीतयेयमराजस्ययमुनायांविशेषतः। ज्येष्ठाग्रजातेतिवदेदितिस्मर्ताः ॥ इत्यन्नदानमित्यप्याहुः ब्रह्मांडपुराणेपि । यातुभोजयतेनारीभ्रातरंयुग्मकेतिथौ । अर्चयेच्चापितांबूलैर्नसावैधव्यमाप्नुयात् । भ्रातुरायुःक्षयोराजन्नभवेत्तत्रकर्हिचिदिति । कार्तिकशुक्लनवमीयुगादिःसापौर्वाह्णिकीग्राह्या । शुक्लपक्षस्थत्वात् । अत्रपिंडरहितंश्राद्धंकर्तव्यं । अन्यत्प्रागुक्तं । **अत्रैवविष्णुत्रिरात्रमुक्तंहेमाद्रौपाद्मे** कार्तिकेशुक्लनवमीमवाप्यविजितेंद्रियः ॥ हरिंविधायसौवर्णतुलस्यासहितंविभुम् । पूजयेद्विधिवद्भक्त्याव्रतीतत्रदिनत्रयम् एवंयथोक्तविधिनाकुर्याद्वैवाहिकंविधिमिति । कार्तिकशुक्लैकादश्यांभीष्मपंचकव्रतमुक्तम् । नारदीये अतोनरैःप्रयत्येनकर्त्तव्यंभीष्मपंचकं॥ कार्तिकस्यामलेपक्षेस्नात्वासम्यग्यतव्रतः । एकादश्यांतुगृह्णीयाद्व्रतंपंचदिनात्मकमिति । तद्विधिस्तुगोमेयनस्नात्वामौनीपंचामृतैः पंचगव्यैर्विष्णुंसंस्नाप्यसंपूज्यपायसंनिवेद्यद्वादशाक्षरमष्टोत्तरशतंजप्त्वा । ओंनमोविष्णवइति । षडक्षरेणघृताक्तान्यवान् व्रीहींश्चाष्टोत्तरशतंहुत्वाभूमौस्वपेत् । एवंपंचदिनेषुकुर्यात् । विशेषस्त्वाद्येऽह्निहरेःपादौकमलैःसंपूज्यत्रिर्गोमयंप्राश्यम् । द्वितीयेह्निबिल्वपत्रै

र्जानुनीसंपूज्यगोमूत्रम् । त्रयोदश्यांभृङ्गराजेननाभिंसंपूज्यक्षीरम् । चतुर्दश्यां करवीरैःस्कंधंसंपूज्यदधि । पौर्णमास्यांहोमांतेलौहींपापप्रतिमांखड्गचक्रहस्तां कृष्णवस्त्रेणवेष्टितांप्रस्थतिलोपरिस्थांकृत्वाधर्मराजनामभिः करवीरैःसंपूज्य यदन्यज्जन्मनिकृतमिहजन्मनिवापुनः ॥ तत्सर्वंप्रशमंयातुमत्पापंतवपूजना दिति।पुष्पांजलिंक्षिप्त्वाकृष्णप्रतिमांचसंपूज्यविप्रायदत्वाविप्रान्संभोज्य । द क्षिणांदत्वापंचगव्यंप्राश्य । पौर्णमास्यांनक्तंभुंजीतेतिलघुनारदीये । पंचगव्य प्राशनंषडक्षरेणेतिहेमाद्रिः ॥ हेमाद्रौभविष्येतु ॥ शाकैर्मुन्यन्नैर्वापंचाहंवर्तन मुक्तं ।अंतेप्युक्तं। यद्भीष्मपंचकमितिप्रथितंपृथिव्यामेकादशीप्रभृतिपंचदशी। निरुद्धं ॥ मुन्यन्नभोजनपरस्यनरस्यतस्मिन्निष्टंफलंदिशतिपांडवशार्ङ्गधन्वेति तथापाद्मेपंचाहंपंचगव्याशीभीष्मायार्घ्यंतुपंचसु । अहःस्वपितथादद्यान्मंत्रे णानेनसुव्रत । सत्यव्रतायशुचयेगांगेयायमहात्मने । भीष्मायैतद्ददाम्यर्घ्यं माजन्मब्रह्मचारिणे ॥ वैयाघ्रपद्यगोत्रायेतिच । सव्येनानेनमंत्रेणतर्पणंसा र्ववर्णिकमिति । कार्तिकशुक्लद्वादश्यांरेवतीनक्षत्रयोगरहितायांपारणंकार्यम् । तदुक्तं । आभाकासितपक्षेषुमैत्रश्रवणरेवती । संगमेनाहिभोक्तव्यंद्वादशद्वा दशीर्हरेदिति । यदातुरेवतीयोगरहिताद्वादशीसर्वथानलभ्यतेतदारेवत्याश्च तुर्थपादंवर्जयेत् । वचनंतुप्रागुक्तं **लघुनारदीये** कार्तिकेशुक्लपक्षस्यकृत्वाचै कादशींनरः । प्रातर्दत्वाशुभान्कुंभान्प्रयातिहरिमंदिरम् **मदनरत्नेवाराहे** एकादशीसोमयुक्ताकार्तिकेमासिभामिनि । उत्तराषाढसंयोगेअनंतासाप्रकी र्तिता । तस्यांयत्क्रियतेभद्रेसर्वमानंत्यमश्नुते । अस्यामेवरात्रौदेवोत्थापन मुक्तंहेमाद्रौब्राह्मे । एकादश्यांचशुक्लायांकार्तिकेमासिकेशवम् । प्रसुप्तंबोध येद्रात्रौश्रद्धाभक्तिसमन्वितइति **मदनरत्नेभविष्ये** कार्तिकेशुक्लपक्षेतुएकाद श्यांपृथासुत॥मंत्रेणानेनराजेंद्रदेवमुत्थापयेद्द्विजः।रामार्चनचंद्रिकादौतुद्वा दश्यामुक्तं । पारणाहेपूर्वरात्रेघंटादीन्वादयेन्मुहुरिति । अत्रदेशाचरतोन्यव स्था । तत्रैवदेवदेवस्यस्नानंपूर्वंमहद्भवेत् । महापूजांततःकृत्वादेवमुत्थापये त्सुधीः । मंत्रास्तुवाराहपुराणेउक्ताः ॥ ओंब्रह्मेंद्ररुद्राग्निकुबेरसूर्यसोमादिभि

र्वेदितवंदनांग । बुद्ध्यस्वदेवेशजगन्निवासमंत्रप्रभावेनसुखेनदेव । इयंतुद्वा दशीदेवप्रबोधार्थंविनिर्मिता । त्वयैवसर्वलोकानांहितार्थंशेषशायिना । उत्ति ष्ठोत्तिष्ठगोविंदत्यजनिद्रांजगत्पते॥त्वयिसुप्तेजगन्नाथजगत्सुप्तंभवेदिदं॥उत्थि तेचेष्टतेसर्वमुत्तिष्ठोत्तिष्ठमाधव ॥ गतामेघावियच्चैवानिर्मलंनिर्मलादिशः ॥ शा रदानिचपुष्पाणिगृहाणममकेशव॥इदंविष्णुरितिप्रोक्तोमंत्रउत्थापनेहरेरिति। एवंदेवमुत्थाप्यतदग्रेचातुर्मास्यव्रतसमाप्तिंकुर्यात् **तदुक्तंभारते** चतुर्थागृह्यं वैचीर्णंचातुर्मास्यव्रतंनरः । कार्तिकेशुक्लपक्षेतुद्वादश्यांतत्समापयेत् **लघुना रदीये** चातुर्मास्यव्रतानांचसमाप्तिःकार्तिकेस्मृता । मंत्रश्चनिर्णयामृतेसनत्कु मारेणोक्तः । इदंव्रतंमयादेवकृतंप्रीत्यैतवप्रभो । न्यूनंसंपूर्णतांयातुत्वत्प्रसा दाज्जनार्दनेति । अथवाराह्योक्तोबोधिनीविधिः । एकादश्यांरात्रौकुंभेघृतपा त्रोपरिहैमंमाषमितंमत्स्यंपंचामृतेनसंस्नाप्यकुंकुमपीतवस्त्रयुगपद्माद्यैःसंपूज्य मत्स्यादिदशावतारान्संपूज्यजागरंकृत्वा प्रातर्देवमाचार्यंचवस्त्राद्यैःसंपूज्य । जगदादिर्जगद्रूपोजगदादिरनादिमान् । जगदाद्योजगद्योनिःप्रीयतांमेजना र्दनइतिनत्वादक्षिणांदत्वाब्राह्मणान्भोजयेदिति।**तथाब्राह्मे** महातुर्यरवेरात्रौ भ्रामयेत्स्यंदनेस्थितम् । उत्थितंदेवदेवेशंनगरेपार्थिवःस्वयं । चतुरोवार्षिका न्मासान्नियमंयस्ययत्कृतम् । कथयित्वाद्विजेभ्यस्तद्दद्याद्भक्त्यासदक्षिणं । यस्यभक्ष्यस्यनियमःकृतस्तद्द्रव्यंदद्यादित्यर्थः । इदंशुक्लास्तादावपिकार्यं । आशौचेतु । पूजामन्येनकारयेत् । कार्तिकशुक्लद्वादशीपौर्णमासीचमन्वादिः सापौर्वाह्णिकीग्राह्या । अन्यत्प्रागुक्तम् । कार्तिकशुक्लचतुर्दशीवैकुंठसंज्ञासा विष्णुपूजायांरात्रिव्यापिनीग्राह्यादिनद्वयेतद्व्याप्तौ निशीथप्रदोषोभयव्यापि नाग्राह्या **तदुक्तंहेमाद्रौभविष्ये** कार्तिकस्यसितेपक्षेचतुर्दश्यांनराधिप । सो पवासस्तुसंपूज्यहरिंरात्रौजितेंद्रियइति । अस्याएवविश्वेश्वरप्रतिष्ठादिनत्वात्त त्प्रीत्यर्थंयदोपवासादिक्रियतेतदारुणोदयव्यापिनीग्राह्या । तदुक्तंत्रिस्थली सेतौ **सनत्कुमारसंहितायां** वर्षे चहेमलंबाख्येमासेश्रीमतिकार्तिके । शुक्ल पक्षेचतुर्दश्यामरुणाभ्युदयंप्रति । महादेवातिथौब्राह्मेमुहूर्तेमणिकर्णिके । स्ना

त्वाविश्वेश्वरोदेव्याविश्वेश्वरमपूजयदिति । तत्पूर्वदिनेचोपवासःकार्यःततःप्र भातेविमलेकृत्वापूजांमहाद्भुताम् ॥ दंडपाणेर्महाधाम्निवनेऽस्मिन्कृतपार णइतितत्रैवोक्तेः । शिवरहस्येपि । पूजाजागराद्युक्तम् । ततोऽरुणोदयेजाते स्नात्वास्नात्वाचभस्मना ॥ संध्यांसमाप्यविश्वेशंमामभ्यर्च्ययथाविधि । मद्भ क्तान्भोजयामासुर्ऋषयोबुभुजुस्ततइति । अत्रकार्तिकव्रतोद्यापनंपाद्मेउक्तम्। **कार्तिकमाहात्म्ये** अथोर्जव्रतिनःसम्यगुद्यापनविधिंशृणु । ऊर्जशुक्लचतुर्द श्यांकुर्यादुद्यापनंव्रती । तुलस्याउपरिष्टात्तुकुर्यान्मंडपिकांशुभाम् । तुलसी मूलदेशेचसर्वतोभद्रमेवच । तस्योपरिष्टात्कलशंपंचरत्नसमन्वितम् । पूज येत्तत्रदेवेशंसौवर्णगुर्वनुज्ञया । रात्रौजागरणंकुर्याद्गीतवाद्यादिमंगलैः । ततस्तुपौर्णमास्यांवैसपत्नीकान्द्विजोत्तमान् ।त्रिंशन्मितानथैकंवास्वशक्त्या वानिमंत्रयेत् ।अतोदेवाइतिद्वाभ्यांजुहुयात्तिलपायसं । ततोगांकपिलांदद्यात् पूजयेद्विधिवद्गुरुमिति । कार्तिकीपौर्णमासीपराग्राह्या । अमापौर्णमास्यौपरे इतिदीपिकोक्तेः । अत्रविशेषोहेमाद्रौब्राह्मे । पुण्यांमहाकार्तिकीस्याज्जीर्वे द्वोःकृत्तिकासुच । तथा । आग्नेयंतुयदाऋक्षंकार्तिक्यांभवतिक्वचित् । महती सातिथिर्ज्ञेयास्नानदानेषुचोत्तमा । यदातुयाम्यंभवतिऋक्षंतस्यांतिथौक्वचित्। तिथिःसापिमहापुण्यामुनिभिःपरिकीर्तिता । प्राजापत्यंयदाऋक्षंतिथौतस्यांन राधिप ।सामहाकार्तिकीप्रोक्तादेवानामपिदुर्लभेति ।**पाद्मे** विशाखासुयदाभा नुःकृत्तिकासुचचंद्रमाः । संयोगःपद्मकोनामपुष्करेष्वपिदुर्लभः । पद्मकंपुष्क रेप्राप्यकपिलांयःप्रयच्छति । सहित्वासर्वपापानिवैष्णवंलभतेपदम् । यमः । कार्तिक्यांपुष्करेस्नातःसर्वपापैःप्रमुच्यते । माघ्यांस्नातःप्रयागेतुमुच्यतेसर्व किल्बिषैः । अस्यामेवसायंकालेमत्स्यावतारोजातइत्युक्तम् **पाद्मेकार्तिकमा हात्म्ये** वरान्दत्वायतोविष्णुर्मत्स्यरूपीभवेत्ततः । तस्यांदत्तं हुतंजप्तंतदक्ष य्यफलंस्मृतमिति **अत्रत्रिपुरोत्सवउक्तोभार्गवार्चनदीपिकायां** पौर्णमा स्यांतुसंध्यायांकर्तव्यस्त्रिपुरोत्सवः॥दद्यादनेनमंत्रेणप्रदीपांश्चसुरालये। कीटाः पतंगामशकाश्चवृक्षाजलेस्थलेयेविचरंतिजीवाः । दृष्ट्वाप्रदीपंनचजन्मभागि

नोभवंतिनित्यंश्वपचाहिविप्राः । अत्रवृषोत्सर्गोतिप्रशस्तः । तदुक्तंमात्स्ये कार्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत् । शैवंपदमवाप्नोतिशिवव्रतामिदं स्मृतमिति **अत्रकार्तिकेयदर्शनमुक्तंकाशीखंडे** कार्तिक्यांकृत्तिकायोगेयः कुर्यात्स्वामिदर्शनम् । सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगः ॥

इतिश्रीकमलाकरभट्टकृते निर्णयसिंधौ द्वितीयपरिच्छेदे कार्तिकमासः ॥

वृश्चिकेपूर्वाःषोडशघटिकाःपुण्याःशेषंप्राग्वत् । मार्गशीर्षकृष्णाष्टमीकालाष्टमीसाचरात्रिव्यापिनीग्राह्या । मार्गशीर्षेसिताष्टम्यांकालभैरवसन्निधौ ॥ उपोष्यजागरंकुर्वन्सर्वपापैःप्रमुच्यते । इतिकाशीखंडात् । रात्रिव्रतत्वागतेः । रुद्रव्रतेषुसर्वेषुकर्तव्यासंमुखीतिथिरितिब्रह्मवैवर्ताच्च । दिनद्वयेंशतोरात्रिव्याप्तावुत्तरैव । भैरवोत्पत्तेःप्रदोषकालीनत्वादितिकेचित् । तन्न । शिवरहस्येमध्याह्ने भैरवोत्पत्तेःश्रवणात् । तथाचतत्रैव । नित्ययात्रादिकंकृत्वामध्याह्ने संस्थितेरवावित्युपक्रम्यब्रह्मणारुद्रेवज्ञातेउक्तं । तदोग्ररूपादनवद्यान्मत्तः श्रीकालभैरवः । आविरासीत्तदालोकान्भीषयन्नखिलानपीति । आत्रोपवास एवप्रधानमित्युक्तं।तत्रैव ।उपोषणस्यांगभूतमर्घ्यदानमिहस्मृतम्। तथाजागरणंरात्रौपूजायामचतुष्टये। संध्यायामपिपूजैवोक्ता। तेनमध्याह्नव्यापिनीयुक्ता। दिनद्वयेंऽशतःसंपूर्णायांवातद्व्याप्तौ पूर्वैव । पूर्वोक्तवचनात् पारणातुप्रातरेव । यामत्रयोर्ध्वगामिन्यांप्रातरेवाहिपारणेतिवचनात् **अत्रचकालभैरवपूजोक्तात्रिस्थलीसेतौ** कृत्वाचविविधांपूजांमहासंभारविस्तरैः। नरोमार्गसिताष्टम्यांवार्षिकंविघ्नमुत्सृजेत् । तथा । तीर्थेकालोदकेस्नात्वाकृत्वातर्पणमत्वरः । विलोक्यकालराजानंनिरयादुद्धरेत्पितॄनिति । इयंचकार्तिक्यनंतरागौणचांद्राभिप्रायेण । मार्गशीर्षशुक्लपंचम्यांनागपूजोक्ताहेमाद्रौस्कांदे। शुक्लामार्गशिरेपुण्याश्रावणेयाचपंचमी। स्नानदानैर्बहुफलानागलोकप्रदायिनीति। इयंनागपूजायांषष्ठीयुतैवग्राह्या । पंचमीनागपूजायांकार्याषष्ठीसमन्विता । तस्यांतुतुषितानागाइतरासचतुर्थिकेति। मदनरत्नेवचनात् । मार्गशीर्षशुक्लषष्ठीचंपाषष्ठीतिमहाराष्ट्रेषुप्रसिद्धा।सोत्तरयुताग्राह्या । षरामुन्योरितियुग्म

वाक्यात्। पूर्वाह्णेदैविकंकुर्यादितिवचनादस्यचदेवकर्मत्वात्। इयमेव योगविशेषेणचंपेत्युच्यते **तदुक्तंब्रह्मांडपुराणेमल्लारिमाहात्म्ये** मार्गेभाद्र पदेशुक्लाषष्ठीवैधृतिसंयुता। रविवारेणसंयुक्तासाचांपेतीहकीर्तितेति। वि शाखाभौमयोगेनसाचांपेतीहकीर्तितेति मदनरत्नेपाठः। मार्गशीर्षे मलेपक्षेषष्ठ्यांवारेऽशुमालिनः। शततारागतेचंद्रेलिंगंस्यादृष्टिगोचरमि ति। इयंचयोगवशेनपूर्वापरावाकार्या। चंपाषष्ठीसप्तमीयुतेतिदिवोदा सः। इयमेवस्कंदषष्ठी। कृष्णाष्टमीस्कंदषष्ठीशिवरात्रिश्चतुर्दशी। ए ताः पूर्वयुताः कार्यातिथ्यंतेपारणंभवेदितिभृगूक्तेः। परेह्निरात्रावाद्यया ममध्येपारणासंभवेइदं। अन्यथोत्तरैवेतिदिवोदासः। अब्दपर्यंतषष्ठीषु। सेनाविदारकस्कंदमहासेनमहाबल॥ रुद्रोमाभिजषड्वक्त्रगंगागर्भनमोस्तुते। इतिराजतंस्कंदंसंपूज्यविप्रायदद्यादितिदिवोदासः। मार्गशीर्षशुक्लचतुर्दश्यां पिशाचविमोचनीतीर्थेश्राद्धंत्रिस्थलीसेतौभट्टचरणैरुक्तम्। तस्यप्राप्तपैशा च्यस्वपित्राद्युद्देश्यकत्वेपार्वणत्वादपराह्णव्यापिनीग्राह्या। अज्ञातनामपिशा चाद्युद्देश्यकत्वैकोद्दिष्टत्वात् मध्याह्नव्यापिनीति। कुलधर्मव्रतादौतूत्तरै व। चैत्रनभोगतेतरसितास्यादूर्ध्वेतिदीपिकोक्तेः। मार्गशीर्षपौर्णमास्यांद त्तात्रेयोत्पत्तिः **तदुक्तंस्कांदेसह्याद्रिखंडे** मार्गशीर्षेतथामासिदशमेऽह्नि सुनिर्मले। मृगशीर्षयुतेपौर्णमास्यांयज्ञस्यवासरे। जनयामासदेदीप्यमा नंपुत्रंसतीशुभम्। तंविष्णुमागतंज्ञात्वाअत्रिर्नामाकरोत्स्वयम्। दत्तवान्स्व स्यपुत्रत्वाद्दत्तात्रेयइतीश्वरइति। इयंप्रदोषव्यापिनीग्राह्येतिवृद्धाः। मार्गशीर्ष पौर्णिमानंतराष्टमीअष्टकाएवंपौषादिमासत्रयेपि। हेमंतशिशिरयोश्चतुर्णामप रपक्षाणामष्टमीष्वष्टकाएकस्यांवेत्याश्वलायनोक्तेः। एकस्यामष्टम्यांवैकार्येति हरदत्तः क्वचित्पंचम्यप्युक्ता प्रौष्ठपद्यष्टकाभूयःपितृलोकेभविष्यतीति। पा द्मवचनात्। तत्पूर्वसप्तमीषुपूर्वेद्युः। तत्परनवमीष्वष्टकासुचश्राद्धमुक्तम् **कालादर्शे** मार्गशीर्षेचपौषेचमाघेप्रौष्ठेचफाल्गुने। कृष्णपक्षेचपूर्वेद्युरन्वष्ट क्यंतथाष्टकाइति **यत्तुविष्णुः** अमावास्यास्तिस्रोऽष्टकास्तिस्रोऽन्वष्टकाइति

यच्चकौर्मे अमावास्याष्टकास्तिस्रःपौषमासादिषुत्रिष्विति । तच्चतुर्थ्यामनाव श्यत्वार्थी। याचाप्यन्याचतुर्थीस्यात्तांचकुर्यात्प्रयत्नतइतिवायुब्रह्मांडपुराणात् श्राद्धमेतेष्वकुर्वाणोनरकंप्रतिपद्यतइविष्णूक्तेरितिशूलपाणिः । शाखाभेदाद्व्य वस्थेतितत्त्वम् वायुब्रह्मांडयोः आद्यापूपैःसदाकार्यामासैरन्यासदाभवेत्शा कैःकार्यातृतीयास्यादेषद्रव्यगतोविधिः । पौषादिक्रमः॥ अन्वष्टकातुप्रागेव निर्णीता । तत्राष्टम्यापराह्णव्यामिनीग्राह्या । अथाच्छादनपर्यंतंश्राद्धंपार्वण वद्भवेदित्याश्वलायनकारिकोक्तेरपराह्णकालत्वाच्चपार्वणस्य पूर्वेद्युरष्टकाश्रा द्धयोस्तुअष्टम्यनुरोधेननिर्णयः । अतएवसूत्रम् । पूर्वेद्युःपितृभ्योदद्यात् । अपरेद्युरन्वष्टक्यमितिच । अत्रकामकालौविश्वेदेवौ । इष्टिश्राद्धेक्रतुद क्षावष्टम्याकामकालावितिसायणीयेशंखोक्तेः । अत्रश्राद्धाकरणप्रायश्चित्तमु क्तमृग्विधाने एभिर्वुभिर्जपेन्मंत्रंशतवारंतुतद्दिने । अन्वष्टक्यंयदान्यू नंसंपूर्णयातिसर्वथेति । अशक्तौत्वाश्वलायनः अथश्वोभूतेष्टकाः पशुनास्था लीपाकेनचाप्यनडुहोयवसमाहरेदग्निनावाकक्षमुपोषेदेषामष्टकेतिनत्वेवांनष्ट कःस्यादिति । मार्गशीर्षादिषुमलमासेसतितत्राष्टकानकार्या । चतु र्णामितिग्रहणादित्युक्तंनारायणवृत्तौ । तथाकाठकगृह्येपिमहालयाष्टकश्रा द्धोपाकर्माद्यपिकर्मयत् । स्पष्टमासविशेषाख्याविहितंवर्जयेन्मलेइति । मार्गादिरविवारेषुकाम्यव्रतमुक्तम् हेमाद्रौ । तत्रभक्ष्याण्युक्तानिहंसे सौरधर्मे । पत्रत्रित्वंतुलस्यास्त्रिफलमथघृतंमार्गशीर्षादिभक्ष्यंमुष्टीनांत्रि स्तिलानांत्रिपलदधितथादुग्धकंगोमयंच । त्रित्वंतोयांजलीनांत्रिमरिचकम थोत्रिःपलाःसक्तवःस्युर्गोमूत्रंशर्करासद्धविरितिविधिनाभानुवारेक्रमेणेति ॥

इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ द्वितीयपरिच्छेदे मार्गशीर्षमासः ॥

धनुःसंक्रमेपराःषोडशघटिकाःपुण्याः । अन्यत्प्राग्वत् । अत्रोत्सर्जननि र्णयोवक्तव्योपाकर्मप्रसंगात्प्रागेवोक्तः कल्पतरौभविष्ये पौषेमासियदादे विशुक्लाष्टम्यांबुधोभवेत् । तस्यांस्नानंजपोहोमस्तर्पणंविप्रभोजनं । मत्प्री तयेकृतंदेविशतसाहस्रिकंभवेत् । अत्रैवरोहिण्यार्द्रायोगेपुण्यतमत्वंतत्रैव

ज्ञेयं । पौषशुक्लैकादशीमन्वादिः ॥ साचोक्ताप्राक्पौषपौर्णिमानंतराः सप्त म्यष्टमीनवम्योष्टकाद्याः प्रागुक्ताः । पौषामावास्यायांअर्धोदयोयोगविशेषः तदुक्तंमदनरत्नेमहाभारते अमार्कपातश्रवणैर्युक्ताचेत्पुष्यमाघयोः । अ र्धोदयःसविज्ञेयःकोटिसूर्यग्रहैः समइति । पुष्यमाघयोर्मध्यवर्तिनीपौर्णमास्यु त्तरामावास्येत्यर्थइतिभट्टाः । मदनरत्नेपुष्यस्यचमाघस्यचेत्यर्थउक्तः । तन्न । हेमाद्रिविरोधात् । तत्रहिमाघएवोक्तः । तथा । दिवैवयोगःशस्तोयंनतुरात्रौ कदाचनेति । इदमर्धमन्यनिबंधेष्वभावान्निर्णयामृतमात्रोक्तेर्निर्मूलमेव । ते नहेमाद्यादिमतेरात्रावर्धोदयोभवत्येव । केचित्तु । किंचिदूनोमहोदयेइत्या हुस्तन्निर्मूलम् । हेमाद्रौमदनरत्नेचस्कांदे । माघामायांव्यतीपातेआदित्ये विष्णुदैवते । अर्धोदयंतदित्याहुः सहस्रार्कग्रहैःसमम् । तत्रैव । माघमासे कृष्णपक्षेपंचदश्यांरवेर्दिने । वैष्णवेनतुऋक्षेणव्यतीपातेसुदुर्लभे । व्रतंकुर्या दित्यग्रेऽन्वयः । तत्रैव । ब्रह्मविष्णुमहेशानांसौवर्णीःपलसंख्यया । प्रति मारतुप्रकर्तव्यास्तदर्धेनद्विजोत्तम । सार्धेशतत्रयंशंभोर्द्रोणानांतिलपर्वतः । कर्तव्यौपर्वतौविष्णुःरुद्रयोःपूर्वसंख्यया । शंभुरत्रब्रह्मा । शय्यात्रयंततः कु र्यादुपस्करसमन्वितम् । तिलैर्होमंकृत्वाप्रतिमांदद्यादित्युक्तं ॥ स्कांदे । अर्धोदयेतुसंप्राप्तेसर्वेगंगासमंजलम् ॥ शुद्धात्मानोद्विजाः सर्वेभवेयुर्ब्रह्मसं मिताः ॥ यत्किंचिद्दीयतेदानंतद्दानंमेरुसन्निभमिति । अत्रदानविशेषोनिर्ण यामृतेस्कांदे । चतुःषष्टिपलंमुख्यममत्रंतत्रकारये । चत्वारिंशत्पलंवाथपं चविंशतिरेववा । अमत्रंपात्रम् । तच्चकांस्यमयमित्युक्तंतत्रैव । एवंसुघटि तंकार्यंकांस्यभाजनमुत्तममिति तथा निधायपायसंतत्रपद्ममष्टदलंलिखेत् । पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकम् । तदभावेतदर्धंवातदर्धंवापिकारयेत् । भूमौतुतंडुलैःशुद्धैःकृत्वाष्टदलमुत्तमम् । अमत्रंस्थापयेत्तत्रब्रह्मविष्णुशिवात्म कम् । तेषांपूजाततःकार्याश्चेतमाल्यैस्तुशोभनैः । वस्त्रादिभिरलंकृत्यब्राह्म णायनिवेदयेत् । मंत्रस्तु । सुवर्णपायसामत्रंयस्मादेतत्त्रयोमयम् । आपत्ते

स्तारकंयस्मात्तद्गृहाणद्विजोत्तम । समुद्रमेखलांपृथ्वींसम्यग्दातुश्चयत्फलम् । तत्फलंलभतेमर्त्यःकृत्वेदंदानमुत्तममिति ॥

इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ पौषमासःसमाप्तः ॥

अथमाघस्नानम् **तत्रविष्णुः** तुलामकरमेषेषुप्रातःस्नायीसदाभवेत् । ह विष्यंब्रह्मचर्यंचमाघस्नानेमहाफलमितिसौरमासउक्तः ब्राह्मेतुसावनउक्तः॥ एकादश्यांशुक्लपक्षेपौषमासेसमारभेत् । द्वादश्यांपौर्णमास्यांवाशुक्लपक्षेसमा पनमिति **पाद्मेपि** पुष्यस्यैकादशींशुक्लामारभ्यस्थंडिलेशयः । मासमात्रं निराहारस्त्रिकालंस्नानमाचरेत् । त्रिकालमर्चयेद्विष्णुंत्यक्तभोगोजितेंद्रियः । माघस्यैकादशींशुक्लांयावद्विद्याधरोत्तमेति । त्रिकालस्नानंमासोपवासविष यम् । निराहारइत्युक्ते । पृथ्वीचंद्रोदयेत्वन्यथोक्तम् । **विष्णुः** दर्शंवापौर्ण मासींवाप्रारभ्यस्नानमाचरेत् । पुण्यान्यहानित्रिंशच्चमकरस्थेदिवाकरइति । अत्रदर्शमितिशुक्लादिमुख्यंचांद्राभिप्रायेण । अयंतुपक्षोनेदानींप्रचरति अ त्राधिकारिणोभविष्ये । ब्रह्मचारीगृहस्थोवावानप्रस्थोथभिक्षुकः । बालवृद्ध युवानश्चनरनारीनपुंसकाः । स्नात्वामाघेशुभेतीर्थेप्राप्नुवंतीप्सितंफलम् **पाद्मे** सर्वेधिकारिणोह्यत्रविष्णुभक्तोयथानृप **ब्राह्मे** उष्णोदकेनवास्नानमशक्येस तिकुर्वतेाद्दढेषुसर्वगात्रेषुउष्णोदंनविशिष्यते **वैष्णवामृतेगौडनिबंधेचस्कां दे** पौष्यांतुसमतीतायांयावद्भवतिपूर्णिमा।माघमासस्यतावद्विपूजाविष्णोर्विधी यते । पितॄणांदेवतानांचमूलकंनैवदापयेत् ।ब्राह्मणोमूलकंभुक्त्वाचेरच्चांद्राय णव्रतम् । अन्यथायातिनरकंक्षत्रविट्शूद्रएवच । वर्जनीयंप्रयत्नेनमूलकंमदि रोपमम् । यदातुमाघोमलमासोभवति । तदाकाम्यानांतत्रसमाप्तिनिषेधान्मा सद्वयेस्नानंतन्नियमाश्चकार्याः । मासोपवासचांद्रायणादितुमलमासएवसमा पयेत् **तदुक्तंदीपिकायाम्** नियतत्रिंशद्दिनत्वाच्छुभेमास्यारभ्यसमापयेत् । मलिनेमासोपवासव्रतमिति । मासोपवासपदंचांद्रायणादेरुपलक्षणम् **स्नाना रंभेचमंत्रोविष्णुनोक्तः** तत्रचोत्थायानियमंगृह्णीयाद्विधिपूर्वकम् ।माघमासमि मंपूर्णस्नास्येहंदेवमाधव । तीर्थस्यास्यजलेनित्यमितिसंकल्प्यचेतसीति ।

प्रत्यहंमंत्रश्चपाद्मे दुःखदारिद्र्यनाशायश्रीविष्णोस्तोषणायच । प्रातःस्नानं करोम्यद्यमाघेपापविनाशनम् । मकरस्थेरवौमाघेगोविंदाच्युतमाधव । स्नानेनानेनमेदेवयथोक्तफलदोभव । इमंमंत्रंसमुच्चार्यस्नायान्मौनसमन्वितइति । प्रत्यहंसूर्यायार्घ्यम् मंत्रस्तुपृथ्वीचंद्रोदयेपाद्मे सवित्रेप्रसवित्रेचपरंधामेजलेमम । त्वत्तेजसापरिभ्रष्टंपापंयातुसहस्रधेति । स्नानकालश्चसूर्योदयः त्रिस्थलीसेतौ मकरस्थेरवौयोहिनस्नात्यभ्युदितेरवाविति । माघमासेरटंत्यापःकिंचिदभ्युदितेरवाविति चपाद्मवचनात् । संप्राप्तेमाघमासेतुतपस्विजनवल्लभे । क्रोशंतिसर्ववारीणिसमुद्रच्छतिभास्करे । पुनीमःसर्वपापानित्रिविधानिनसंशयइति नारदीयोक्तेः योमाघमास्युषसिसूर्यकराभितप्तंस्नानंसमाचरतिचारुनदीप्रवाहे । उद्धृत्यसप्तपुरुषान्पितृमातृवंश्यान्स्वर्गंप्रयात्यमरदेहधरोनरोसौ । इतिभविष्योत्तरवचनाच्च । ब्राह्मेत्वरुणोदयउक्तः अरुणोदयेतुसंप्राप्तेस्नानकालेविचक्षणः । माधवांघ्रियुगंध्यायन्यःस्नातिसुरपूजितइति तथा अरुणोदयमारभ्यप्रातःकालावधिप्रभो । माघस्नानवतांपुण्यंक्रमात्तत्रावधारणा । उत्तमंतुसनक्षत्रंमध्यमंलुप्ततारकम् । सवितर्युदितेभूपततोहीनंप्रकीर्तितमिति । तेनात्रशक्त्यपेक्षयाव्यवस्था । इदंचस्नानं प्रयागेऽतिप्रशस्तम् । काश्याःशतगुणंप्रोक्तंगंगायमुनसंगमे । सहस्रगुणितासापिभवेत्पश्चिमवाहिनी । पश्चिमाभिमुखीगंगाकालिंद्यासहसंगता । हंतिकल्पकृतंपापंसामाघेनृपदुर्लभेत्यादिपाद्मादिवचोभ्यः । विस्तरस्तुमत्पिताम्रहकृतप्रयागसेतौज्ञेयः ब्राह्मे यत्रकुत्रापियोमाघेप्रयागस्मरणान्वितः । करोतिमज्जनंतीर्थेसलभेद्गांगमजज्जनम् । तथासमुद्रेप्यतिप्रशस्तं तदुक्तंपृथ्वीचन्द्रोदयेप्रभासखण्डे माघेमासिचयःस्नायान्नैरंतर्येणभावतः । पौण्डरीकफलंतस्यदिवसेदिवसेभवेत् । माघस्नानंकाम्यमेवेतिभट्टाः । विष्ण्वादिवाक्येसदावश्यशब्दान्नित्यत्वावगतेर्नित्यकाम्यमितितुयुक्तं । मासपर्यंतंस्नानासंभवेतुत्र्यहमेकाहंवास्नायात् । महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयमितिलिङ्गात् । अस्मिन्योगेत्वशक्तोपिस्नायादपिदिनत्रयम् । प्रयागेमाघमासेतु

207

त्र्यहंस्नातस्ययत्फलम् । नाश्वमेधसहस्रेणतत्फलंलभतेभुवीतिपाद्मादिवच नात् । अत्रमकरसंक्रमेरथसप्तमीमाघीत्र्यहमित्येके । माघशुक्लदशम्यादीत्य न्ये । मकराद्यत्र्यहइत्यपरे । माघमासाद्यत्र्यहइतिकेचित् । त्रयोदश्यादीति बहवः । महामाघींपुरस्कृत्यसस्नौतत्रदिनत्रयमितिपाद्मोक्तेः । एतस्यार्थवा दत्वाद्यर्तिकचिद्दिनत्रयमितिभट्टाः तत्त्वंतुसंदिग्धेषुवाक्यशेषादितिन्यायात्त्रयो दश्याद्येवेतिप्रयागंविनापि **पाद्मे** अस्मिन्योगेत्वशक्तोपिस्नायादपिदिनत्रय मिति **माघस्नानेनियमास्तुनारदीये** नवह्निंसेवयेत्स्नातोह्यस्नातोपिवरा ननें ॥ होमार्थंसेवयेद्वह्निंशीतार्थनकदाचन ॥ अहन्यहनिदातव्यास्तिलाःश र्करयान्विताः ॥ त्रिभागस्तुतिलानांहिचतुर्थःशर्करान्वितः । अनभ्यंगीवरा रोहेसर्वमासंनयेद्व्रती **तथा** अप्रावृतशरीरस्तुयःकष्टंस्नानमाचरेत् । पदेप देश्वमेधस्यफलंप्राप्नोतिमानवः **तथा**शंखचक्रधरंदेवंमाधवंनामपूजयेत् । वह्निं हुत्वाविधानेनततस्त्वेकाशनोभवेत् । भूशय्याब्रह्मचर्येणशक्तःस्नानंसमाच रेत् ॥ अशक्तोब्रह्मचर्यादौस्वेच्छासर्वत्रकथ्यते **तथा** तिलस्नायीतिलोद्वर्ती तिलहोमीतिलोदकी ॥ तिलभुक्तिलदाताचषट्तिलाःपापनाशनाइति **प्रया गासंभवेकाश्यांदशाश्वमेधोत्तरस्थप्रयागतीर्थस्नानमुक्तंकाशीखंडे** । का श्युद्भवेप्रयागेयेतपसिस्नातिमानवाः । दशाश्वमेधजनितंफलंतेषांभवेद्ध्रुव मिति **स्नानोत्तरंमदनपारिजातेविष्णुः** काष्ठमौनान्नमस्कृत्यपूजयेत्पुरु षोत्तमम् । अवश्यमेवकर्तव्यंमाधस्नानमितिश्रुतिः **भविष्ये** तैलमामलका श्चैवतीर्थंदेयास्तुनित्यशः । ततःप्रज्वालयेद्वह्निंसेवनार्थंद्विजन्मनाम् । एवं स्नानावसानेतुभोज्यंदेयमवारितम् । भोजयेत्द्विजदांपत्यंभूषयेद्वस्त्रभूषणैः । कंबलाजिनरत्नानिवासांसिविविधानिच । चोलकानिचदेयानिप्रच्छादन पटास्तथा । उपानहौतथागुप्तमोचकौपापमोचकौ । अनेनविधिनादद्यान्मा धवः प्रीयतामिति **पाद्मे** भूमौशयीतहोतव्यमाज्यंतिलसमन्वितम् ॥ तथा ॥ अन्नंचैवयथाशक्त्यादेयंमाघेनराधिप ॥ सुवर्णरक्तिकामात्रंदद्याद्वेदविदे तथा **माघांतेतुविशेषोनारदीये** माघावसानेसुभगेषड्संभोजनंस्मृतम् ।

सूर्योमेप्रीयतांदेवोविष्णुर्मूर्तिनिरंजनः। दंपत्योर्वाससीसूक्ष्मेसप्तधान्यसमन्विते । त्रिंशत्तुमोदकादेयाःशर्करातिलसंयुताइति । अत्रैकादशीविधानेनव्रतस्योद्यापनंतथेति । पूर्वेह्निउपवासपूजनादि कृत्वापरेऽह्नितिलचर्वाज्यैरष्टोत्तरशतंहोमंकृत्वासवित्रेप्रसवित्रेचेति पूर्वोक्तंमंत्रमुक्त्वा । दिवाकरजगन्नाथप्रभाकरनमोस्तुते । परिपूर्णकुरुष्वेहमाघस्नानमुषःपते इतिसमापयेदितिसंक्षेपः । मकरसंक्रांतौहेमाद्रिमतेपरतःचत्वारिंशद्घटिकाःपुण्याः । त्रिंशत्कर्कटके नाड्योमकरेतुदशाधिकाइतिब्रह्मवैवर्तात्। माधवमतेतुविंशतिःत्रिंशत्कर्कटकेपूर्वामकरेविंशतिःपरेतिवृद्धवसिष्ठोक्तेः।यदातुसूर्यास्तात्पूर्वंसंक्रांतिर्भवतितदोभयमतेपूर्वमेवपुण्यकालः । रात्रौतुप्रदोषेनिशीथेवामकरसंक्रमेमाधवमतेद्वितीयदिनएवपुण्यम् । यद्यस्तमयवेलायांमकरंयातिभास्करः। प्रदोषेवार्धरात्रेवास्नानंदानंपरेहनीतिवृद्धगार्ग्यवचनात् । अस्तमयंप्रदोषः । प्रदोषेपूर्वरात्रे ॥ कार्मुकंतुपरित्यज्यझषंसंक्रमतेरविः । प्रदोषेवार्धरात्रेवास्नानंदानंपरेऽहनीति भविष्योक्तेश्च । तदाभोगःपरेऽहनीतिहेमाद्रौपाठः । कालादर्शेनिर्णयामृतमदनपारिजातादयोप्येवमूचुः । दाक्षिणात्यास्त्वाश्रौतदेवाद्रियंते । यत्तुहेमाद्रिणाद्योवाशब्दोयथार्थेद्वितीयस्तथार्थे । यथाप्रदोषेपूर्वेद्युस्तथार्धरात्रेपरेऽह्नीत्युक्तम् । तस्मैनमोस्तु । तेनपरेऽह्निपुण्यंवक्तुंप्रदोषेइति । दिनद्वयेपुण्यनिरासार्थंअर्धरात्रग्रहणम् । हेमाद्रिस्मृत्यर्थसारानंतभट्टादिमतेतुनिशीथात्पूर्वंपश्चाच्चसंक्रांतौपूर्वेपरदिनेवापुण्यं । धनुर्मीनावतिक्रम्यकन्यांचमिथुनंतथा । पूर्वापरविभागेनरात्रौसंक्रमणंयदा । दिनांतेपंचनाड्यस्तुतदापुण्यतमाःस्मृताः । उदयेपितथापंचदैवेपित्र्येचकर्मणीतिस्कांदवचनात् । पूर्वापरविभागेनेतिमकरकर्कभिन्नविषयम् । पूर्वोक्तवचोविरोधादितिमदनरत्नेउक्तम् । षडशीतिमुखेऽतीतेअतीतेचोत्तरायणेइत्यादिविरोधाच्च ॥ तेनपूर्वैकवाक्यतयायमर्थः । रात्रौपूर्वभागेमकरसंक्रमेपरेऽह्निउदयेपंचनाड्यःपुण्यःरात्रावपरभागेकर्कसंक्रमेपूर्वेदिनांतेपंचनाड्यइति । एवंसर्वेषामविरोधः । मकरेसामान्येनपरदिनेपुण्यत्वेपिपुण्यातिशयार्थमिदं यत्तुदेवलयज्ञपार्श्वौ आस्तेसंक्रमंपु

ण्यंदिनार्धस्नानदानयोः । रात्रौसंक्रमणेभानोर्विषुवत्यथनोदिवेति । अत्रमाधवः । अयनेदिवाजातेतदर्धपुण्यम् । कर्केपूर्वमकरेत्यम् । एतन्मध्यंदिनायनपरमिति । हेमाद्रिस्तुरात्रौविषुवत्यासन्नदिनार्धपुण्यम् । अयनेत्वासन्नदिनंपुण्यम् । दिनेइतिपाठेउभयत्रदिनार्धपुण्यमित्याह । एतदेवोक्तमदीपिकायाम् । अथायनमधःपश्चान्निशीथाद्धवेद्यासन्नमहस्तदर्धमथवापुण्यमिति । तत्वंतुआसन्नसंक्रममित्यस्यविषुवत्येवान्वयः । अयनेरात्रौसतिदिनेपुण्यं । कस्मिन्नित्यपेक्षायांकर्केपूर्वेऽह्निमकरेपरेऽह्निइतिवाक्यांतरवशादर्धेउच्यमानेनकोपिविरोधः । यत्त्वनंतभट्टः अथसंक्रमणंभानोर्निशीथात्प्राक्यदाभवेत् । अयनंविषुवंतत्रप्राग्दिनांतिमनाडिकाः । पंचपुण्यतमाःपश्चान्निशीथाच्चेद्भवेत्तथा । आद्याःपरदिनस्यापितद्वदित्येषनिर्णयइति **अपरार्केप्येवम्** अस्तंगतेयदासूर्येझषंयातिदिवाकरः ॥ प्रदोषेवार्धरात्रेवातदापुण्यंदिनद्वयमितिबौधायनवचनाद्दिनद्वयंवापुण्यकालः तदापुण्यंदिनांतरमितिमदनरत्नेपाठः । गुर्जरप्राच्योदीच्यास्त्विदमेवाद्रियंतेअत्रापिपूर्ववद्व्याख्येयम् । तिथित्वादयोगौडग्रंथास्तु प्रदोषार्धरात्रिभिन्नेरात्रेःपूर्वभागेपूर्वदिनेपरभागेचपरदिने पुण्यमन्यसंक्रांतिवत्विशिष्यतयोर्निर्देशात्प्रदोषश्च प्रदोषोस्तमयादूर्ध्वघटिकाद्वयमिष्यतइतिवत्सोक्तइत्याहुः । तन्न । अस्तंगतइतित्रितयवैयर्थ्यापत्तेः ॥ अतःप्रदोषपदेनतद्भिन्नैवरात्रिरुच्यते । अतएवयावन्नोदयतेरविरितिवृद्धगार्ग्यादिभिर्दक्षिणायने पूर्वरात्रौसंक्रमेपूर्वदिनमुक्तंवत्सोक्तिरप्यध्ययनादिपरा । इहतुत्रिमुहूर्तएवप्रदोषः । **मकरेदानविशेषोहेमाद्रौ स्कांदे** धेनुंतिलमयींराजन्दद्याद्यश्चोत्तरायणे । सर्वान्कामानवाप्नोतिविंदतेपरमंसुखम् । **विष्णुधर्मे** उत्तरेत्वयनेविप्रावस्त्रदानंमहत्फलम् । तिलपूर्णमनड्वाहंदत्वारोगैःप्रमुच्यतइति **शिवरहस्येपि** तस्यांकृष्णतिलैःस्नानंकार्यंचोद्वर्तनंशुभैः । तिलादेयाश्चविप्रेभ्यः सर्वदैवोत्तरायणे ॥ तिलतैलेनदीपाश्चदेयाःशिवगृहेशुभाः **कल्पतरौकालिकापुराणे** होमंतिलैःप्रकुर्वीतसर्वदैवोत्तरायणे । तान्योदेवायविप्रेभ्योहाटकेनसमंददेत् । उत्तरायणमासाद्य

नरःकस्मात्सशोचति । तथा ॥ मकरेरात्रावपिश्राद्धादिभवतीत्युक्तंप्राक् । माघामायांयोगविशेषोऽर्धोदयःप्रागेवोक्तः । माघचतुर्दश्यांयमतर्पणमुक्तंहेमाद्रौयमेन । अनर्काभ्युदितेकालेमाघकृष्णचतुर्दशीं । स्नातःसंतर्प्यतुयमंसर्वपापैः प्रमुच्यतइति माघशुक्लचतुर्थीतिलचतुर्थी साप्रदोषव्यापिनीग्राह्या । माघशुक्लचतुर्थ्यांतुनक्तव्रतपरायणः । येत्वांढुंढेर्चयिष्यंतितेर्च्याः स्युरसुरद्रुहामितिकाशीखंडात् । माघमासेचतुर्थ्यांतुतस्मिन्कालउपोषितः ॥ अर्चयित्वातुयोदेवि जागरंतत्रकारयेदिति त्रिस्थलीसेतौलैंगाच्च ॥ इयमेवकुंदचतुर्थी साप्रदोषव्यापिनीग्राह्या । माघशुक्ल चतुर्थ्यांतुकुंदपुष्पैः सदाशिवम् । संपूज्ययोहितःकाशींसमाप्नोतिश्रियंनरइतिकालादर्शेकौर्मोक्तेः । माघशुक्लपंचमीश्रीपंचमी तदुक्तंहेमाद्रौवाराहे माघशुक्लचतुर्थ्यांतुवरमाराध्यचश्रियः ॥ पंचम्यांकुंदकुसुमैःपूजांकुर्यात्समृद्धये । इयंमाधवमतेपूर्वा हेमाद्रिमतेपरा चैत्र शुक्लेश्रीपंचमीदिवोदासःमाघशुक्लसप्तमीरथसप्तमी । साअरुणोदयव्यापिनी ग्राह्या । सूर्यग्रहणतुल्यातुशुक्लामाघस्यसप्तमी । अरुणोदयवेलायांतस्यांस्नानं महाफलमितिचंद्रिकायां विष्णुवचनात् । अरुणोदयवेलायांशुक्लमाघस्यसप्तमी । प्रयागेयदिलभ्येतकोटिसूर्यग्रहैःसमेतिवचनाच्च यत्तुदिवोदासीये अचलासप्तमीदुर्गाशिवरात्रिर्महाभरः । द्वादशीवत्सपूजायांसुखदाप्राग्युतासदेतिषष्ठीयुतत्वमुक्तम् । तद्यदापूर्वेऽह्निघटिकाद्वयंषष्ठीसप्तमीचपरेद्युःक्षयवशारुणोदयात्पूर्वंसमाप्यते तत्परंज्ञेयम् । तत्रषष्ठ्यांसप्तमीक्षयंप्रवेश्यारुणोदयेस्नानंकार्यम् मदनरत्नेभविष्योत्तरे माघेमासिसितेपक्षेसप्तमीकोटिभास्करा । कुर्यात्स्नानार्घ्यदानाभ्यामायुरारोग्यसंपदः अत्रविधिर्भविष्येस्नात्वाषष्ठ्यामेकभुक्तंसप्तम्यांनिश्चलंजलं । रात्र्यंतेचालयेथास्त्वंदत्वाशिरसिदीपकम् तथाजलंप्रक्रम्य नकेनचाल्यतेयावत्तावत्स्नानंसमाचरेत् ॥ सौवर्णेराजतेपात्रेभक्त्यालाबुमयेथवा । तैलेनवर्तिंदीप्तव्यामहारजनरंजिता॥ महारजनंकुसुंभं । समाहितमनाभूत्वादत्वाशिरसिदीपकम् । भास्करंहृदये ध्यात्वाइमंमंत्रमुदीरयेत् । नमस्तेरुद्ररूपायरसानांपतयेनमः ॥ वरुणायनम

स्तेस्तुहरिवासनमोस्तुते । जलेपरिहरेद्दीपंध्यात्वासंतर्प्यदेवताइति । चंद नेनलिखेत्पद्ममष्टपत्रंसकर्णिकम् । मध्येशिवंसपत्नीकंप्रणवेनचसंयुतम् । पूर्वादिदलेषु ॥ रविभानुविवस्वद्भास्करसवित्रर्कसहस्रकिरणसर्वात्मकान् संपूज्यगृहंगच्छेदिति **स्नानमंत्रश्चकाशीखंडे** यद्यज्जन्मकृतंपापंमयासप्त सुजन्मसु। तन्मेरागंचशोकंच माकरीहंतुसप्तमी॥एतज्जन्मकृतंपापंयच्चजन्मां तरार्जितम् । मनोवाक्कायजंयच्चज्ञाताज्ञातेचयेपुनः । इतिसप्तविधंपापंस्ना नान्मेसप्तसप्तिके। सप्तव्याधिसमायुक्तंहरमाकरिसप्तमि। एतन्मंत्रत्रयंजप्त्वा स्नात्वापादोदकेनरः । केशवादित्यमालोक्यक्षणान्निष्कलुषोभवेत् । दि वोदासीयेमदनरत्नेनच । इक्षुदंडेनजलंचालयित्वासप्तार्कपत्राणिबदरीपत्रा णिचशिरसिनिधायपूर्वोक्तैर्मंत्रैःस्नात्वा । तिलपिष्टमयापूपैःहैमंसूर्यसंपूज्य विप्रायदद्यात् **अर्घ्यमंत्रोमदनरत्ने** सप्तसप्तिवहप्रीतसप्तलोकप्रदीपन । सप्तमीसहितोदेवगृहाणार्घ्यंदिवाकर **ततः** जननीसर्वलोकानांसप्तमीसप्तस प्तिके सप्तव्याहृतिकेदेविनमस्तेसूर्यमंडलइतिप्रार्थयेत् **सौरागमे** अर्कपत्रैः सबदरैर्दूर्वाक्षतसचंदनैः । अत्रांगविधिनाचार्घ्यंदद्यादादित्यतुष्टये **अत्रदा नविशेषोमदनरत्नेभविष्ये** ताम्रपात्रेयथाशक्त्यामृन्मयेवाथभक्तिमान् । स्थापयेत्तिलपिष्टंचसघृतंसगुडंतथा । कांचनंतालकंकृत्वाअशक्तस्तिलपिष्ट जं। संछाद्यरत्नवस्त्रेणपुष्पैर्धूपैरथार्चयेत् **दानमंत्रस्तु** आदित्यस्यप्रसादेनप्रा तःस्नानफलेनच । दुष्टदौर्भाग्यदुःखघ्नंमयादत्तंतुतालकं ॥ तालकंकर्णाभरण मितितत्रैवोक्तम् । दीपमात्रमितिहेमाद्रौ तत्रैवभविष्योत्तरे । एवंविधंरथ वरंरथवाजियुक्तं हैमंचहेमशतदीधितिनासमेतम् । दद्याच्चमाघसितसप्त मिवासरेयः सोसंगचक्रगतिरेवमहींभुनक्ति इयंमन्वादिरपि । इयंच शुक्लपक्षस्थत्वात्पौर्वाह्णिकीग्राह्या । यदामाघोमलमासोभवतितदामासद्व येमन्वादिश्राद्धंकुर्यात् मन्वादिकंतैर्थिकंचकुर्यान्मासद्वयेपिचेतिस्मृतिचंद्रि कोक्तेः । माघशुक्लाष्टमीभीष्माष्टमी **तदुक्तंहेमाद्रौपाद्मे** माघेमासिसिता ष्टम्यांसतिलंभीष्मतर्पणम् । श्राद्धंचयेनराः कुर्युस्तेस्युः संततिभागिनइति

भारतेपि शुक्लाष्टम्यांतुमाघस्यदद्याद्भीष्मायय्योजलम् । संवत्सरकृतंपापंतत् क्षणादेवनश्यतीति ध्वलनिबंधेस्मृतिः अष्टम्यांतुसितेपक्षेभीष्मायतुतिलोदकम् । अन्नंचविधिवद्दद्युः सर्ववर्णाद्विजातयः । सर्ववर्णोक्तेर्द्विजातयइतिसंबोधनम् तर्पणमंत्रस्तत्रैव भीष्मःशांतनवोवीरः सत्यवादीजितेंद्रियः । आभिरद्भिरवाप्नोतिपुत्रपौत्रोचितांक्रियाम् । वैय्याघ्रपद्यगोत्रायसांकृत्यप्रवरायच । अपुत्रायददाम्येतज्जलंभीष्मायवर्मिणे । वसूनामवतारायशंतनोरात्मजाय च ॥ अर्घ्यंददामिभीष्मायआबालब्रह्मचारिणेइति । एतज्जीवत्पितृकस्यापि भवति । जीवत्पितापिकुर्वीततर्पणंयमभीष्मयोरिति । पाद्मोक्तेरितिजीवत्पितृकनिर्णयेपितृचरणैरुक्तम् । एतच्चापसव्येनकार्यमितिदिवोदासीये । अत्र श्राद्धंकाम्यंतर्पणंचनित्यं ॥ ब्राह्मणाद्याश्चयेवर्णादद्युर्भीष्मायनोजलं । संवत्सरकृतंतेषांपुण्यंनश्यतिसत्तमेतिमदनरत्नेवचनात् । माघशुक्लद्वादशीभीष्मद्वादशी । त्वयाकृतमिदंवीरतवनाम्नाभविष्यति । साभीष्मद्वादशीत्येषासर्वपापहराशुभेतिहेमाद्रौपाद्मवचनात् । इयंपूर्वयुतायुग्मवाक्यात् । माघीपूर्णिमापरेत्युक्तंप्राक् तथाहेमाद्रौब्राह्मे माघस्थयोश्चजीवेंद्रोर्महामाघीतिकथ्यते तत्रैवज्योतिषे मेषपृष्ठेतथासौरिः सिंहेचगुरुचन्द्रमाः । भास्करःश्रवणर्क्षेचमहामाघीतिसास्मृता ॥ तथाभविष्ये वैशाखीकार्तिकीमाघीतिथयोऽतीवपूजिताः ॥ स्नानदानविहीनास्तानेनेयाःपांडुनन्दन ॥ तथा तिलपात्राणिदेयानिकंचुकाःकंबलास्तथेति ॥ माघपूर्णिमानंतराष्टमीमाघीअष्टकात न्निर्णयः । पूर्वेद्युरन्वष्टकानिर्णयश्चपूर्वमुक्तः । मलमासेचैतानभवंतीत्येतत्सर्वमार्गशीर्षप्रकरणेऽभिहितम् । तथाचतसृष्वष्टकास्वशक्तावेषाआवश्यकी । हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाएकस्यांवेत्याश्वलायनोक्तेः तथा माघाष्टकांप्रक्रम्यतामेकाष्टकेत्याचक्षतइत्यापस्तंबवचनाच्चेत्यादिप्रयोगपारिजातेज्ञेयम् ॥

इतिश्रीकमलाकरभट्टकृते निर्णयसिन्धौ द्वितीयपरिच्छेदे माघमासः ॥

कुंभेषोषशघटिकाःपुण्याः शेषंप्राग्वत् फाल्गुनकृष्णाष्टम्यांविशेषः क

रुपतरौ । फाल्गुनस्यचमासस्यकृष्णाष्टम्यांमहीपते इत्युपक्रम्य । जातादा शरथेःपत्नीतस्मिन्नहनिजानकी ॥ उपोषितोरघुपतिःसमुद्रस्यतटेतदा । राम पत्नीचसंपूज्यासीताजनकनन्दिनीति।**फाल्गुनकृष्णचतुर्दशीशिवरात्रिः** । साचकेषुक्वचिद्वचनेषुप्रदोषव्यापिनीग्राह्येत्युक्तं केषुचिन्निशीथव्यापिनी **तत्राद्यामाधवीये** त्रयोदश्यस्तगेसूर्येचतसृष्वेवनाडिषु ॥ भूतविद्धातुयातत्र शिवरात्रिव्रतंचरेत् ॥ **स्मृत्यंतरेपि** प्रदोषव्यापिनीग्राह्याशिवरात्रिश्चतुर्दशी॥ रात्रौजागरणंयस्मात्तस्मात्तांसमुपोषयेत् **अत्रप्रदोषोरात्रिः** उत्तरार्धेतस्याहे तुत्वोक्तेः । **कामिकेपि** आदित्यास्तमयेकालेअस्तिद्वेधाचतुर्दशी तद्रात्रिः शिवरात्रिःस्यात्साभवेदुत्तमोत्तमेति ॥ **द्वितीयापितत्रैवनारदसंहितायां** अर्धरात्रियुतायत्रमाघकृष्णचतुर्दशी ॥ शिवरात्रिव्रतंतत्रसोश्वमेधफलंलभेत् ॥ **स्मृत्यंतरेपि** भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशा ॥ शिवरात्रिव्रतं तत्रकुर्याज्जागरणंतथेति ॥ **ईशानसंहितायाम्** माघकृष्णचतुर्दश्यामादिदेवोमहानिशि ॥ शिवलिंगतयोद्भूतःकोटिसूर्यसमप्रभः ॥ तत्कालव्यापिनी ग्राह्याशिवरात्रिव्रतेतिथिरिति ॥ अर्धरात्रादधश्चोर्ध्वयुक्तायत्रचतुर्दशी ॥ तत्तिथावेवकुर्वीताशिवरात्रिव्रतंव्रती ॥ नार्धरात्रादधश्चोर्ध्वयुक्तायत्रचतुर्दशी॥ नैवतत्रव्रतंकुर्यादायुरैश्वर्यहानितः ॥ अर्धरात्रश्चद्वितीययामांत्यतृतीययामा द्यघटीद्वयरूपइतिमाधवः वचनंतूक्तंप्राक् । एवंसतिपूर्वेद्युरेवोभयव्याप्तौपूर्वैव ॥ त्रयोदशीयदादेविदिनभुक्तिप्रमाणतः ॥ जागरेशिवरात्रिः स्यान्निशिपूर्णाचतुर्दशीतिस्कांदोक्तेः । दिनभुक्तिरस्तमयः । जयंतीशिवरात्रिश्चकार्ये भद्रजयान्वितइतिस्कांदाच्च । दिनद्वयेनिशीथव्याप्तौहेमाद्रिमतेपूर्वाअर्धरात्रात्परस्ताच्चेज्जयायोगोयदाभवेत् । पूर्वविद्धैवकर्त्तव्याशिवरात्रिःशिवप्रियैरितिपाद्मवचनात् **मदनरत्नेप्येवम्** गौडाअप्येवमाहुः । निर्णयामृतेतुसर्वापिशिवरात्रिःप्रदोषव्यापिन्येव । अर्धरात्रवाक्यानिकैमुतिकन्यायेन प्रदोषस्तावकानीत्युक्तम् **तन्न** अर्धरात्रस्यपूर्वकर्मकालत्वोक्तेः । परदिनेप्रदोषनिशीथोभयव्याप्तिसत्वात्परैवेतितुमाधवः । इदमेवचयुक्तंप्रतीमः परेद्युः

प्रागुक्तार्धरात्रस्यैकदेशव्याप्तौपूर्वेद्युःसंपुर्णतद्व्याप्तौचसत्यापिपरेद्युः संपूर्णव्याप्तेःपूर्वैव । व्याप्यार्धरात्रंयस्यांतुलभ्यतेयाचतुर्दशी ॥ तस्यामेवव्रतंकार्यमत्प्रसादार्थिभिर्नरैः **तद्ऊर्ध्वार्धोनिताभूतासाकार्यात्रितिभिः सदेतिमाधवधृतेशानसंहितोक्तेः** पूर्वेद्युर्निशीथस्यपरेद्युःप्रदोषस्येत्येकैकव्याप्तौतुपूर्वैव । जयायोगस्यप्राशस्त्यात् **तच्चोक्तंनागरखंडे** माघफाल्गुनयोर्मध्येअसिताया चतुर्दशी ॥ अनंगेनसमायुक्ताकर्तव्यासासदातिथिरिति **पाद्मे** अर्धरात्रात् परस्ताच्चेज्जयायोगोयदाभवेत् ॥ पूर्वविद्धैवकर्तव्याशिवरात्रिःशिवप्रियैरिति **स्कांदेपि** भवेद्यत्रत्रयोदश्यांभूतव्याप्तामहानिशा ॥ शिवरात्रिव्रतंतत्रकुर्याज्जागरणंतथेति ॥ महतामपिपापानांदृष्टावैनिष्कृतीपरा ॥ नदृष्टाकुर्वतांपुंसांकुहूयुक्तांतिथिंशिवामितिस्कांदेदर्शयोगस्यनिंदितत्वाच्च। यदाचतुर्दशीपूर्वेद्युर्निशीथादूर्ध्वंप्रवृत्तापरेद्युश्चनिशीथादर्वागेवसमाप्तातदापरेद्युरेकव्याप्तिसत्वात्परैव। माघासितेभूतदिनंहिराजन्नुपैतियोगंयदिपंचदश्याः॥जयाप्रयुक्तांनतुजातुकुर्याच्छिवस्यरात्रिंप्रियकृच्छिवस्येतिवचनात् । एवंदिनद्वयेप्रदोषव्याप्त्यभावेनिशीथव्याप्तिसत्वात्पूर्वैव । तेनदिनद्वयेनिशीथव्याप्तौप्रदोषव्याप्त्यानिर्णयः । दिनद्वयेप्रदोषव्याप्तौनिशीथेननिर्णयः एकैकव्याप्तौतुनिशीथेननिर्णयइति । इयंचरविभौमसोमवारेषुशिवयोगेचातिप्रशस्ता **हेमाद्रौ तीर्थखण्डेलैंगे** फाल्गुनस्यचतुर्दश्यांकृष्णपक्षेसमाहिताः ॥ कृत्तिवासेश्वरं लिंगमर्चयन्तिशिवंशुभे ॥ तेयांतिपरमंस्थानंसदाशिवमनामयं ॥ शिवरात्रिपारणेतुविरुद्धवाक्यानिदृश्यंते **स्कांदे** कृष्णाष्टमीस्कांदषष्ठीशिवरात्रिचतुर्दशी ॥ एताःपूर्वयुताःकार्यास्तिथ्यंतेपारणम्भवेत् ॥ जन्माष्टमीरोहिणीचशिवरात्रिस्तथैवच ॥ पूर्वविद्धैवकर्तव्यातिथिभांतेचपारणमिति **तिथिमध्येपि पारणंस्कांदेउक्तम्** उपोषणंचतुर्दश्यांचतुर्दश्यांतुपारणम् ॥ कृतैःसुकृतलक्षैश्चलभ्यतेवाथवानवा ॥ ब्रह्माण्डोदरमध्येतुयानितीर्थानिसंतिवै ॥ संस्नातानिभवंतीहभूतायांपारणेकृते ॥ तिथीनामेवसर्वासामुपवासव्रतादिषु ॥ तिथ्यंतेपारणंकुर्याद्विनाशिवचतुर्दशीमिति । अत्रयामत्रयादर्वाक्चतुर्दशीसमा

215

सौतदंतेतदूर्ध्वगामिन्यांतु प्रातस्तिथिमध्यएवेतिहेमाद्रिमाधवादयोव्यवस्था माहुः **तन्न** तिथ्यन्तेतिथिभांतेवापारणंयत्रचोदितं ॥ यामत्रयोर्ध्वगामिन्यां प्रातरेवहि पारणेत्यादिसामान्यवचनैरेवव्यवस्थासिद्धे रुभयविधवाक्यवैय्य र्थ्यापत्तेः । कथमन्यथास्कांदेएवशून्यहृदयवाक्यवत्तिथिमध्येपारणविधानं घटते । तस्माद्दिनाशिवचतुर्दशीमितिपर्युदस्तत्वाच्छिवरात्र्याः सर्वप्रकारेषु तिथिमध्यएवपारणेतिब्रूमः । शिष्टाचारोप्येवमेव । दीपिकायांतुरात्रावपिति थ्यंतएवोक्तम् । व्रततिथेरंतेनिशीथेपिवाऽश्नीयादिति **मदनरत्नकालादर्श येास्तु** साह्यस्तमयपर्यंतंव्यापिनिचेत्परेहनि दिवैवपारणंकुर्यात्पारणेनैवदो षभागित्युक्तम् **तन्न** तिथिमध्येपारणविधानान्निषेधेफलायोगाच्च । तिथ्यंता नपेक्षणाद्दोषाप्रसक्त्याचतुर्थपादासंगतेः । तेनेदंशिवरात्रिभिन्नव्रतपरंज्ञेयम् । इदंचव्रतंसंयोगपृयक्त्वन्यायेननित्यंकाम्यंच **तथाचमाधवीयेस्कांदे** परा त्परतरंनास्तिशिवरात्रिःपरात्परम् ॥ नपूजयतिभक्तेशंरुद्रंत्रिभुवनेश्वरम् ॥ जंतुर्जन्मसहस्रेषुभ्रमतेनात्रसंशयइत्यकरणेप्रत्ववायश्रव णात् । वर्षेवर्षेमहा देविनरोनारीपतिव्रता ॥ शिवरात्रौमहादेवंनित्यंभक्त्याप्रपूजयेदितिवीप्सा श्रुतेः । अर्णवोयदिवाशुष्येत्क्षीयतेहिमवानपि ॥ चलंत्येतेकदाचिद्वै निश्चलंहिशिवव्रतामितिवचनाच्चनित्यता । ममभक्तस्तुयोदेविशिवरात्रिमु पोषकः ॥ गणत्वमक्षयंदिव्यमक्षयंशिवशासनम् ॥ सर्वान्भुक्त्वामहाभोगां स्ततोमोक्षमवाप्नुयादितिस्कांदात् । द्वादशाब्दादिकमेतत्स्याच्चतुर्विंशाब्दि केतुवेतितत्रैवेशानसंहितावचनात्काम्यता **तत्रैव** शिवरात्रिव्रतंनामसर्वपाप प्रणाशनम्॥आचांडालमनुष्याणांभुक्तिमुक्तिप्रदायकम् ॥ अत्रजागरोपवास पूजाःसमुदिताःव्रतंनतुप्रत्येकम् ॥ समुदितानांफलसंबंधात् **यत्तु** अथवाशि वरात्रिंचपूजाजागरणैर्नयेत् । **तथा** अखण्डितव्रतोयोहिशिवरात्रिमुपोषयेत् सर्वान्कामानवाप्नोतिशिवेनसहमोदते । कश्चित्पुण्यविशेषेणव्रतहीनोपिपयः पुमान् ॥ जागरंकुरुतेतत्रसरुद्रसमतांव्रजेदित्यादिस्कांदंतदनुकूल्यत्वादशक्त परम् । माघेतरप्रतिमासशिवरात्रिस्तु । शिवरात्रिशब्दस्यमाघकृष्णच

तुर्दश्यामेवरूढत्वान्माघमासस्यशेषेयाप्रथमाफाल्गुनस्यच।कृष्णाचतुर्दशीसा तुशिवरात्रिःप्रकीर्तितेतिहेमाद्रौवचनाच्च नायंनिर्णयस्तत्रेतिरात्रौयामचतुष्ट येपूजाविधानाद्यस्मिन्दिनेअधिकारात्रिव्याप्तिःसाग्राह्या। साम्येतुपूर्वैवेतिहेमा द्रिरूचितवान्। वस्तुतस्तुप्रतिमासकृष्णचतुर्दश्यामपिसर्वकामप्रदंकृष्णचतु र्दश्यांशिवव्रतमित्युपक्रम्य चतुर्दशाब्दंकर्तव्यंशिवरात्रिव्रतंशुभामितिहेमाद्रौ कालोत्तरेशिवरात्रिशब्दप्रयोगात्। कौण्डपायिनामयनाग्निहोत्रेनैत्यकाग्निहो त्रधर्माइवतद्धर्मप्राप्तिःस्यादेव। अतःप्रदोषनिशीथोभयव्याप्त्यैवनिर्णयइतिव यंप्रतीमःअस्यारंभोहेमाद्रौस्कांदे आदौमार्गशिरेमासिदीपोत्सवदिनेपिवा। गृह्णीयान्माघमासेवाद्वादशैवमुपोषयेत् ॥तथा दीपोत्सवेतथामाघेकृष्णायातु चतुर्दशी। द्वादशस्वपिमासेषुप्रकुर्यादिहजागरम् ॥ एवंद्वादशवर्षेषुद्वादशौ वतपोधनान्। वरयेदितिशेषः चतुर्दशवाविप्रान्आचार्यंचवृत्वा। कुंभोपरि न्यसेद्देवमुमयासहितंशिवम् ॥ सौवर्णेप्यथवारौप्येवृषभेसंस्थितंशुभेइत्युक्त म् ॥ हैमींमूर्तिंसंपूज्यस्थिरंचरंवालिंगंपंचामृतसहस्रशतपंचाशत्तदर्धान्यतर कुंभैः संस्नाप्यसंपूज्य जागरंकृत्वापरेह्युस्तिलान्सहस्रंशतंवाहुत्वाविप्रेभ्यो वस्त्राणिद्वादशगाश्चदत्वा आचार्यायधेनुंशय्यांचदत्वाविप्रान्भोजयेदितिम दनरत्नेउक्तम्। माघामावास्यायुगादिः। तदुक्तम्। माघमासेत्वमावास्ये ति। अन्यत्प्राग्वत् तथान्योपिविशेषोविष्णुपुराणे माघासितेपंचदशीक दाचिदुपैतियोगंयदिवारुणेन ॥ ऋक्षेणकालःसपरःपितॄणांनह्यल्पपुण्यैर्नृपल भ्यतेऽसाविति ॥ वारुणंशताभिषक्। इदंचकुंभादित्येज्ञेयमितिहेमाद्रिः भा रते कालेधनिष्ठायदिनामतस्मिन्भवेत्तुभूपालतदापितृभ्यः ॥ दत्तंतिलान्नं प्रददातितृप्तिंवर्षायुतंततकुलजैर्मनुष्यैरिति ॥फाल्गुनपौर्णमासीहोलिका। साचसायाह्नव्यापिनीग्राह्या सायाह्नेहोलिकांकुर्यात्पूर्वाह्णेक्रीडनंगवामितिव चनादितिनिर्णयामृतेउक्तम् ज्योतिर्निबंधेतु प्रतिपद्भूतभद्रासुयार्चिताहो लिकादिवा ॥ संवत्सरंचतद्राष्ट्रं पुरंदहतिसाद्भुतम् ॥ प्रदोषव्यापिनीग्राह्या पौर्णिमाफाल्गुनीसदा ॥ तस्यांभद्रामुखंत्यक्त्वापूज्याहोलानिशामुखइतिना

रदवचनात् प्रदोषव्यापिनीत्युक्तम् **हेमाद्रौमदनरत्नेचभविष्ये** अस्यांनिशागमेपार्थसंरक्ष्याःशिशवोगृहे ॥ गोमयेनोपलिप्तेचसचतुष्केगृहांगणेइत्यादिनातत्रैवतद्विधानाच्च तेनेयंपूर्वविद्धा । श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी ॥ पूर्वविद्धैवकर्तव्याशिवरात्रिर्बलेर्दिनमितिबृहद्यमब्रह्मवैर्तोक्तेश्च दिनद्वयेप्रदोषव्याप्तौपरैवपूर्वादिनेभद्रासत्त्वात्तत्रचहोलिकानिषेधात् **तदुक्तंनिर्णयामृतेमदनरत्नेचपुराणसमुच्चये** भद्रायांदीपिताहोलीराष्ट्रभंगंकरोतिवै॥ नगरस्यचनैवेष्टातस्मात्तांपरिवर्जयेत् **तथा** भद्रायांद्वेनकर्तव्येश्रावणीफाल्गुनीतथा ॥ श्रावणीनृपतिंहंतिग्रामंदहतिफाल्गुनी **तथा** दिनार्धात्परतोपिस्यात्फाल्गुनीपौर्णिमायदि ॥ रात्रौभद्रावसानेतुहोलिकादीप्यतेतदेति ॥ यदातुपूर्वदिनेचतुर्दशीप्रदोषव्यापिनीपरदिने चक्षयवशात्सायाह्नात्प्रागेवपूर्णिमासमाप्यतेतदा पूर्वदिनसंपूर्णरात्रौभद्रासत्त्वात्तत्रचतन्निषेधात्परेऽहनिप्रतिपद्येवकुर्यात् । सार्धयामत्रयंवास्यात्द्वितीयदिवसेयदा ॥ प्रतिपद्वर्धमानातुतदासाहोलिकास्मृतेतिभविष्यवचनादितिनिर्णयामृतकारःमदनरत्नेप्येवम् यत्तु । वह्नौवह्निं परित्यजेदितिभविष्यम् । वह्नौहोलिकायांवह्निं प्रतिपदं वर्जयेदित्यर्थःतदुक्तंभिन्नविषयमितितत्रैवोक्तम् । अन्येतुतस्यांभद्रामुखंत्यक्त्वेत्यर्थःप्रदोषव्यापिनीचेत्स्याद्यदापूर्वदिनेतदाभद्रामुखंवर्जयित्वाहोलिकायाःप्रदीपनमितिनारदवचनात् । निशागमेप्रपूज्येतहोलिकासर्वदाबुधैः ॥ न दिवापूजयेत्ढुंढां पूजितादुःखदाभवेदितिदिवोदासीयेवचनात् । यामत्रयोर्ध्वयुक्ताचेत्प्रतिपत्तुभवेत्तिथिः ॥ भद्रामुखंपरित्यज्यकार्याहोलीमनीषिभिरितिविद्याविनोदेऽभिधानाच्च ॥ भद्रामुखंविहायपूर्वदिनएवकार्येत्याहुः । भद्रामुखंतुनाड्यस्तुपंचवदनंगलकस्तथैकेतिरत्नमालोक्तंज्ञेयम् **शिष्टाचारोप्येवमेव** अत्रचेच्चंद्रग्रहणंतदाततोर्वाङ्निशिभद्रावर्ज्यपौर्णमास्यांहोलिकादीपनम् । अथपरेऽह्निग्रस्तोदयस्तदापूर्वदिनेभद्रावर्ज्यरात्रौचतुर्थयामेविष्टिपुच्छेवाहोलिकाकार्या । ग्रहोत्तरंप्रतिपत्सत्वात्तत्पूर्वंचदिवाहोलानिषेधादिति । दिवोदासचंद्रप्रकाशौवस्तुतस्तु । परदिनेप्रदोषेपौर्णमासीसत्त्वेकर्मकालस्पर्शे

चतुर्थयामादिगौणकालग्रहणे मानाभावाद्भद्राभावाच्चग्रहणकालएवहोलाकार्या । नच सर्वेषामेववर्णानासूतकंराहुदर्शने ॥ स्नात्वाकर्माणिकुर्वीतश्रुत मन्नंविवर्जयेदितिनिषेधात् । कथंसूतकेहोलेतिवाच्यम् । तस्योत्तरार्धशेषत्वात् **पूजामंत्रस्तु** असृक्पाभयसंत्रस्तैःकृतात्वंहोलिबालिशैः ॥ अतस्त्वांपूजयिष्यामिभूतेभूतिप्रदाभवेति ॥ यत्तुवार्तिककारैर्होलिकाआचारप्राप्तेत्युक्तम् । तत्रहेमाद्याद्युदाहृतभविष्यवचनान्यसिद्धानिकृत्वाचिंताज्ञेया । आर्त्यधिकारणवत् । हुताशिनीमलमासेनभवति । इयंमन्वादिरपि । सातुपौर्वाह्णिकीग्राह्या । मलमासेसतिमन्वादिश्राद्धंमासद्वयेकार्यमित्युक्तंप्राक् **कृत्यचिंतामणौब्राह्मे** नरोदोलागतंदृष्ट्वागोविंदंपुरुषोत्तमम् ॥ फाल्गुन्यांसंयतो भूत्वागोविंदस्यपुरंव्रजेत् ॥ चैत्रकृष्णप्रतिपदिवसंतोत्सवः । साचौदयिकीग्राह्या । प्रवृत्तेमधुमासेतु प्रतिपद्युदितेरवाविति भविष्योक्तेः । दिनद्वयेतथात्वेपूर्वा । वत्सरादौवसंतादौबलिराज्येतथैवच ॥ पूर्वविद्धैवकर्त्तव्याप्रतिपत्सर्वदाबुधैरिति वृद्धवशिष्ठवचनात् ॥ **अत्रविशेषोहेमाद्रौभविष्ये** चैत्रेमासि महाबाहोपुण्येतुप्रतिपद्दिने ॥ यस्तत्रश्वपचंस्पृष्ट्वास्नानंकुर्यान्नरोत्तमः ॥ नतस्य दुरितंकिंचिन्नाधयोव्याधयोनृपेति **तथा** प्रवृत्तेमधुमासेतु प्रतिपद्युदितेरवौ ॥ कृत्वाचावश्यकार्याणिसंतर्प्यपितृदेवताः ॥ वंदयेद्धोलिकाभूमिंसर्वदुःखोपशांतये **मंत्रश्च** वंदितासिसुरेंद्रेणब्रह्मणाशंकरेणच ॥ अतस्त्वंपाहिनोदेवि भूतेभूतिप्रदाभवेति **अत्रचूतकुसुमप्राशनमुक्तं तत्रैवपुराणसमुच्चये** वृत्तेतुषारसमयेसितपंचदश्यांप्रातर्वसंतसमयेसमुपस्थितेच ॥ संप्राश्यचूतकुसुमंसहचंदनेनसत्यंहिपार्थपुरुषोथसमाःसुखीस्यात् **मंत्रस्तु** चूतमञ्जंवसंतस्यमाकंदकुसुमंतव ॥ सचंदनंपिबाम्यद्यसर्वकामार्थसिद्धयइति । चैत्रामावास्यामन्वादिः । साचापराह्णव्यापिनिग्राह्या । कृष्णपक्षस्थत्वात् इतिफाल्गुनमासःसमाप्तः ॥ एवंनिरूपितमिदंगहनंतुकालतत्त्वंविचार्यवचनैश्चनयैश्चसम्यक् ॥ तद्दोषदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मितेषु ॥ १ ॥ मयासद्वासद्वायदिहगदितंमंदमतिनाकिमेतच्छक्यंवाध्यवसितुम

पिस्वल्पमतिना ॥ तदेवंयत्किंचिद्गदितमिह विख्यातमहिमाप्रतापोयंसर्वो विकसतितुपित्रोश्चरणयोः ॥ २ ॥ योभाट्टतंत्रगहनार्णवकर्णधारःशास्त्रांत रेषुनिखिलेष्वपिमर्मभेत्ता ॥ योत्रश्रमःकिलकृतःकमलाकरेणप्रीतोमुनातुसु कृतीबुधरामकृष्णाः ॥

इतिश्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टसुतादिनकरभट्टानु जभट्टकमलाकरकृतेनिर्णयसिंधौसंवत्सरकृत्यनिरुप णंनामद्वितीयपरिच्छेदःसमाप्तः ॥

अथ तृतीयपरिच्छेदःप्रारभ्यते.

श्रीगणेशायनमः ॥ अथप्रकीर्णकनिर्णयः ॥ श्रीरामकृष्णतनयःकमलाक रसंज्ञितः ॥ निरूप्यतिथिकृत्यंतुप्रकीर्णंवक्तुमुद्यतः ॥ १ ॥ तत्रादौसंस्कारेषु **गर्भाधानम्** । तत्रप्रथमरजोदर्शनेदुष्टमासग्रहणसंक्रमादिफलं तत्रशांत्या दिचपितृकृतभट्टकृतप्रयोगरत्नेज्ञेयम् ॥ किंचित्तूच्यते **मदनरत्नेनारदः** अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वयि ॥ परिघस्यतुपूर्वार्द्धेव्यतीपातेचवैधृ तौ ॥ संध्यासूपप्लवेविष्ट्यामशुभंप्रथमार्त्तवम् ॥ रोगीपतिव्रतादुःखीपुत्रिणीभोग भागिनी ॥ पतिव्रताक्लेशभागीसूर्यवारादिषुक्रमात् । वैधव्यंसुतलाभश्चमैत्रं शत्रुविवर्द्धनम् ॥ मित्रलाभःशत्रुवृद्धिःकुलर्द्धिर्बंधुनाशनम् ॥ मरणंवंशवृद्धि श्चनिराहारःकुलक्षयः ॥ तेजश्चसुतनाशश्चकुलहानिस्थितिक्रमात् **गर्गः** सुभगाचैवदुःशीलावंध्यापुत्रसमन्विता । धर्मयुक्ताव्रतघ्नीचपरसंतानमोदिनी ॥ सुपुत्राचैवदुष्पुत्रापितृवेश्मरतासदा ॥ दीनाप्रजावतीचैवपुत्राढ्याचित्रका रिणी ॥ साध्वीपतिप्रियानित्यंसुपुत्राकष्टचारिणी । स्वकर्मनिरताहिंस्रापुण्य पुत्रादिसंयुता ॥ नित्यंधनचयासक्तापुत्रधान्यसमन्विता ॥ मूर्खाचाज्ञापुण्यवती दस्रर्क्षादेःक्रमात्फलम् ॥ कुलीरवृषचापांत्यनृयुक्कन्यातुलाघटा ॥ राशयः

शुभदाज्ञेयानारीणाप्रथमार्तवे **गर्गः** सुभगाश्वेतवस्त्रास्यात्दृढवस्त्रापतिव्रता ॥ क्षौमवस्त्राक्षितीशास्यान्नववस्त्रासुखान्विता ॥ दुर्भगाजीर्णवस्त्रास्याद्रोगिणीरक्तवासना ॥ नीलांबरधरानारीपुष्पितावैधवाततः ॥ वस्त्रेस्युर्विषमारक्तबिंदवःपुत्रमाप्नुयात् ॥ समाश्वेत्कन्यकाश्वेतिफलंस्यात्प्रथमार्तवे ॥ अथस्त्रीसंसर्गवर्जनमाह **वसिष्ठः** प्रभूतदोषयदिदृश्यतेतत्पुष्पंतदाशांतिककर्मकार्यम् ॥ विवर्जयेदेवतदैकशय्यांयावद्रजोदर्शनमुत्तमेह्नि ॥ **ज्योतिर्निबंधेवसिष्ठः** आद्यतौपौषशुक्रोर्जमधुशुचिनभस्याः कुयुक्पापवारारिक्तामार्काष्टषष्ठ्यःपितृपरसदनेरात्रिसंध्यापराह्णे ॥ मिश्रोग्रामूलतीक्ष्णंविवरमनरुणाल्पाधिकास्रंगराष्ट्रोत्पातःपापस्यलग्नंनसदरुणजरन्नीलरक्तांबरंच । आद्यतौदुर्भगानारीविष्कुंभेचेद्रजस्वला ॥ वंध्याचैवातिगंडेचशूलेशूलवतीभवेत् ॥ गंडेतुपुंश्चलीनारीव्याघातेचात्मघातिनी । वज्रे चस्वैरिणीप्रोक्तापातेचपतिघातिनी ॥ परिघेमृतवंध्याचवैधृतौपतिमारिणी ॥ शेषाःशुभावहायोगायथानामफलप्रदाः **शांतिमाहप्रयोगपारिजातेशौनकः**सार्तवानांतुनारीणांशांतिंवक्ष्यामिशौनक ॥ पंचमेह्निचतुर्थेवाग्रहयज्ञपुरःसरम् ॥ द्रोणप्रमाणधान्येनव्रीहिराशित्रयंभवेत् ॥ कुंभत्रयंन्यसेद्राशौतंतुवस्त्रादिवेष्टितम् ॥ सूक्तेनाथनवर्चेनप्रसुवआपइत्यथ ॥ ऋचायाःप्रवतस्तद्वद्गायत्र्याचततः क्रमात् ॥ मध्यकुंभेक्षिपेद्धान्यमौषधानिचहेमच ॥ उदुंबरःकुशोदूर्वाराजीववटबिल्वकाः ॥ विष्णुक्रांताथतुलसीबार्हिषंशंखपुष्पिका ॥ शतावर्यश्वगंधाच निर्गुंडीसर्षपद्वयम् ॥ अपामार्गपलाशश्चपनसोजीवकस्तथा ॥ प्रियंगवश्चगोधूमाव्रीहयोऽश्वत्थएवच ॥ क्षीरंदधिचसर्पिश्चपद्मपत्रंतथोत्पलम् ॥ कुरंटकत्रयंगुंजावचाभद्रकमुस्तकाः ॥ द्वात्रिंशदौषधानीहयथासंभवमाहरेत् मृत्तिकाश्चौषधादीनितन्मंत्रेणाक्षिपेत्क्रमात् ॥ कुंभोपरिन्यसेत्पात्रकांस्यंमृद्वेणुताम्रजम् ॥ भुवनेश्वरींन्यसेत्तत्रइंद्राणींचपुरंदरम् ॥ जपेद्गायत्रिमाहोमाच्छ्रीसूक्तंचजपेत्ततः । स्पृशन्वैदक्षिणंकुंभंऋत्विगेकोजपेदथ ॥ चत्वारिरुद्रसूक्तानिचतुर्मंत्रोत्तराणिच ॥ संस्पृशन्नुत्तरंकुंभंश्रीसूक्तंरुद्रसंख्यया ॥ सन्नइंद्राग्निसू

क्तंचतत्रवसंस्पृशन्जपेत् ॥ कुंभस्यपश्चिमेदेशेशांतिहोमंसमाचरेत् ॥ दूर्वाभिस्तिलगोधूमैःपायसेनघृतेनच ॥ तिसृभिश्चैवदूर्वाभिरेकैकाचाहुतिर्भवेत् ॥ अष्टोत्तरसहस्रंवाशतमष्टोत्तरंतुवा॥गायत्र्यैवतुहोतव्यंहविरत्रचतुष्टयम्॥ततः स्विष्टकृतंहुत्वासमुद्रादूर्मिसूक्ततः ॥ संततामाज्यधारांतांपूर्णाहुतिमथाचरेत् अथाऽभिषेकंकुर्वीतप्रतिकुम्भस्थितोदकैः ॥ आपोहिष्ठेतिनवभिःसूक्तेनचततःपरम् ॥ इन्द्रोअंगतृचेनैवपावमानैःक्रमेणतु ॥ उभयंश्रृणवच्चैनंस्वस्तिदाविशएकया ॥ त्रैय्यंबकेनमंत्रेणजातवेदसएकया समुद्रज्येष्ठाइत्यादित्रायंतांचत्रिभिःकमात् इमाआपस्रयृचेनैवदेवस्यत्वेतिमंत्रतः ॥ मंत्रेणाथतमीशानंत्वमग्नेरुद्रइत्यथ ॥ तमुष्टुहीतिमंत्रेणभुवनस्यपितरंतथा ॥ यातेरुद्रेतिमंत्रेणाशिवसंकल्पमंत्रतः ॥ इन्द्रत्वावृषभंपंचमंत्रैश्चैवाभिषेचयेत् ॥ धेनुंपयस्विनींदद्यादाचार्यायचभूषणं ॥ सदक्षिणमनड्वाहंप्रदद्याद्रुद्रजापिने ॥ महाशांतिंप्रजप्याथब्राह्मणान्भोजयेदथ **नारदः**तत्रशांतिंप्रकुर्वीतघृतदूर्वातिलाक्षतैः ॥ प्रत्येकाष्टशतंचैवगायत्र्याजुहुयात्ततः ॥ स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये **प्रकारांतरंमदनरत्नेज्ञेयं** विस्तरान्नोच्यते ॥ ग्रहणेरजोदर्शनेतुजातकर्मप्रस्तावेशांतिंवक्ष्यामः **प्रथमतौविशेषःस्मृतिचन्द्रिकायां** प्रथमतौतुपुष्पिण्याःपतिपुत्रवतीक्रियाः ॥ अक्षतैरासनंकृत्वातस्मिंस्तामुपवेशयेत् ॥ हरिद्रागन्धपुष्पादीन्दद्युस्तांबूलकंस्रजं ॥ दीपैर्नीराजनं कुर्यात्सदीपेवासयेद्गृहे ॥ लवणापूपमुद्गादिदद्यात्ताभ्यः स्वशक्तितइति **द्वितीया** घृतुषुतान्नियममाहमदनपारिजातेदक्षः अंजनाभ्यंजनेस्नानंप्रवासंदंतधावनम् ॥ नकुर्यात्सार्त्तवानारीग्रहणामीक्षणंतथा **अत्रिरपि** वर्जयेन्मधुमांसंचपात्रेखर्वेचभोजनं ॥ गंधंमाल्यंदिवास्वापंतांबूलंचास्यशोधनं ॥ दग्धेशरावेभुंजीतपेयंचांजलिनापिबेत् **मदनरत्नेहारीतः** रजःप्राप्ताचेदधः शयीतभूमौकाष्णायसेपाणौमृन्मयेवाक्षीयात्इति **विष्णुधर्मे** आहारंगोरसानांचपुष्पालंकारधारणम् ॥ अंजनंकंकतंदंताःपीठशय्याधिरोहणम् ॥ अग्निसंस्पर्शनंचैववर्ज्जयेच्चदिनत्रं ॥तथात्रप्रथमर्तोःपूर्वस्त्रीसंगमनंनकार्यप्राग्रजोदर्श

नात्पर्वीनेयाद्वत्वापतत्यधः ॥ व्यर्थीकारेणशुक्रस्यब्रह्महत्यामवाप्नुयादिति तत्रैवाश्वलायनोक्तेः **तत्रऋतौगमनमाहयाज्ञवल्क्यः** षोडशर्त्तुनिशास्त्रीणां तासुयुग्मासुसंविशेदिति ॥ **अनृतावप्याहगौतमः**ऋतावुपेयात्सर्वत्रवाप्रतिषिद्धमिति ॥ **मनुः**ऋतुःस्वाभाविकःस्त्रीणांरात्रयःषोडशस्मृताः॥तासामाद्याश्चतस्रस्तुनिंदितैकादशीतुया ॥ त्रयोदशीचशेषास्युःप्रशस्तादशरात्रयः **मदनरत्नेदेवलः** तस्मात्त्रिरात्रंचांडालींपुष्पितांपारिवर्जयेत् ॥ **तत्रतिथ्यादीनाह श्रीधरः** षष्ठ्यष्टमींपंचदशींचतुर्थीं चतुर्दशीमप्युभयत्रहित्वा ॥ शेषाःशुभाःस्युस्तिथयोनिषेकेवाराःशशांकार्कसितेंदुजानां ॥ उभयत्रपक्षद्वये आर्योगुरुःसितःशुक्रः इंदुजोबुधः ॥ विष्णुप्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभानिनिषेककार्ये ॥ पूज्यानिपुष्यवसुशीतकराश्विचित्रादित्याश्चमध्यमफलाविफलाःस्युरन्ये **विष्ण्वादिदैवत्यनक्षत्राण्युपक्रांतानिरत्नमालायां** भेशादस्त्रयमाग्निधातृशशिनःशर्वोदितिर्वाक्पतिः ॥ कद्रूजाःपितरोभगोर्यमरवित्वष्टाव्हयामारुतः ॥ शक्राग्नीत्वथमित्रइंद्रनिर्ऋतीतोयंचविश्वेविधिर्गोविंदोवसर्वोंबुपाजचरणाहिर्बुध्न्यपूषाभिधाः ॥ उत्तराशब्देनोत्तरात्रयं ॥ अत्रमूलस्यपूज्यत्वमुक्तम् ॥ **याज्ञवल्क्येनतु** एवंगच्छन्स्त्रियंक्षामांमघांमूलंचवर्जयेदित्युक्तं ॥ तेनपूर्वत्रमूलंचिंत्यं ॥ अत्रसमासुपुत्राविषमासुकन्येतिज्ञेयंयुग्मासुपुत्राजायतेस्त्रियोयुग्मासुरात्रिष्वितिहेमाद्रौशंखोक्तेः तत्राप्युत्तरोत्तराःप्रशस्ताःतदाहापस्तंबः ॥ **तत्राप्युत्तराप्रशस्तेतितत्रैवव्यासः** रात्रौचतुर्थ्यांपुत्रःस्यादल्पायुर्धनवर्जितः ॥ पंचम्यांपुत्रिणीनारीषष्ठ्यांपुत्रस्तुमध्यमः ॥ सप्तम्यांसप्रजायोषिदष्टम्यामीश्वरःपुमान् ॥ नवम्यांसुभगानारीदशम्यांप्रवरःसुतः ॥ एकादश्यामधर्मास्त्रीद्वादश्यांपुरुषोत्तमः । त्रयोदश्यांसुतापापावर्णसंकरकारिणी ॥ धर्मज्ञश्चकृतज्ञश्चआत्मवेदीदृढव्रतः ॥ प्रजापतिश्चतुर्दश्यांपंचदश्यांपतिव्रता ॥ आश्रयःसर्वभूतानांषोडश्यांजायतेपुमानिति **अत्रचतुर्थदिननिषेधेपि स्नातांचतुर्थेदिवसेरात्रौगच्छेद्विचक्षणइतिभारतोक्तेः** ॥ चतुर्थेहनिस्नातायांयुग्मासुवागर्भंसंदधानीतिहारीतोक्तेर्विकल्पोज्ञेयः **तत्रापि स्नानंरजस्व**

लायास्तुचतुर्थेहनिशस्यते ॥ गम्यानिवृत्तेरजसिनानिवृत्तेकथंचनेत्यापस्तंबोक्तेर्व्यवस्थाज्ञेया **प्रभासखण्डेमरीचिः** शुद्धाभर्तुश्चतुर्थेह्निस्नानेनस्त्रीरजस्वला ॥ दैवेकर्मणिपित्र्येचपंचमेहनिशुद्ध्यति ॥ श्रौतकर्ममध्येरजस्वलाचेत्तत्रचतुर्थदिनेप्यधिकारः ॥ अथयदात्रिरात्रिणीस्यादथैतामुपहूयेदित्यापस्तंबसूत्रात् ॥ चतुर्थेहनिगोमूत्रमिश्राभिरद्भिः स्नातावासोयोक्त्रजालानिमंत्रैर्धारयेदितिसोमेप्युक्तं ॥ एवंसर्वत्रश्रौतकर्मणीतिधूर्तस्वामिरामाण्डारादयः ॥ अत्रसर्वासुयुग्मासुगमनमावश्यकंयुग्मास्वितिबहुवचननिर्देशादितिविज्ञानेश्वरः ॥ तच्चैकस्यांरात्रौसकृदेवकार्यं ॥ सुस्थइन्दौसकृत्पुत्रंलक्षण्यंजनयेत्पुमानितियाज्ञवल्क्योक्तेः ॥ इदंचतौगमनमन्यकालेप्रतिबन्धादिनागमनासम्भवेश्राद्धैकादश्यादावपिकार्यं ॥ ब्रह्मचर्येचपर्वण्याद्याश्चतस्रश्चवर्जयेदितियाज्ञवल्क्योक्तेःव्याख्यातंचेदंमिताक्षरायाम् ॥ यत्रश्राद्धादौब्रह्मचर्यंविहितंतत्राप्यृतौगच्छतोनब्रह्मचर्यस्खलनदोषइति ॥ पर्वाणीतिबहुत्वेनाष्टमीचतुर्दश्योर्ग्रहणमितिचमदनरत्नेप्येवं **यत्तुहेमाद्रौशिवरहस्ये** दिवाजन्मदिनेचैवनकुर्यान्मैथुनंव्रती ॥ श्राद्धंदत्वाचभुक्त्वाचश्रेयोर्थीनचपर्वस्वितितदनृतुविषयं ॥ ब्रह्मचार्येवभवतियत्रतत्राश्रमेवसन्नितिमनूक्तेः **दर्शादौतुनभवत्येव** पर्वाणांपर्युदस्तत्वात् ॥ ऋतुकालंनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् ॥ तत्रगच्छन्समाप्नोतिह्यनिष्टफलमेवत्वितिवृद्धमनूक्तेः **श्राद्धेब्रह्मचर्यंनियतमित्युक्तं** ॥ पृथ्वीचन्द्रोदयेप्येवं । एतत्सतिसम्भवेज्ञेयं ॥ अनेकभार्यस्यतुयौगपद्येहेमाद्रौकश्यपः ॥ यौगपद्येतुतीर्थानांविवाहक्रमशोव्रजेत् ॥ रक्षणार्थमपुत्रांवाग्रहणक्रमशोपिवेति ॥ **ग्रहणमृतुग्रहणं** ऋग्विधाने विष्णुर्योनिंजपेत्सूक्तंयोनिंस्पृष्ट्वात्रिभिर्व्रती ॥ गर्भाधानंततःकुर्यात्सुपुत्रोजायतेध्रुवम् ॥अगमनेदोषमाहपराशरः ॥ ऋतुस्नातांतुयोभार्यांसन्निधौनोपगच्छति ॥ घोरायांभ्रूणहत्यायांपच्यतेनात्रसंशयः ॥ अस्यापवादमाहमदनरत्नेव्यासःव्याधितोबन्धनस्थोवाप्रवासेष्वथपर्वसु । ऋतुकालेपिनारीणांभ्रूणहत्याप्रमुच्यते । वृद्धांवन्ध्यामसद्वृत्तामनपत्यामपुष्पिणीं । कन्यांचबहुपुत्रांचवर्ज्जयन्मुच्यतेभयात् ।

वृद्धाङ्गतरजस्काम् । गर्भाधानांगहोमाकरणेप्रायश्चित्तमाहपारिजातेआश्व लायनः ॥ गर्भाधानस्याकरणात्तस्यजातस्तुदुष्यति ॥ अकृत्वागांद्विजे दत्वाकुर्यात्पुंसवनंपतिः ॥ गर्भाधानंच मलमासशुक्रास्तादावपि कार्यं ॥ उत्सवेषुच सर्वेषु सीमंते ऋतुजन्मसु ॥ सुरासुरेज्ययोश्चैव मौढ्यदोषोन विद्यतइति ज्योतिर्निबन्धे भृगूक्तेः ॥ ऋतौगमने पराशरः ॥ ऋतौ तुगर्भ शंकित्वात्स्नानं मैथुनिनः स्मृतं ॥ अनृतौतु यदागच्छेच्छौचं मूत्रपुरीषवत् **स्त्रीणांतुनस्नानं** उभावप्यशुचीस्यातांदम्पतीशयनंगतौ ॥ शयनादुत्थिता नारीशुचिःस्यादशुचिः पुमानितिवृद्धशातातपोक्तेः ॥ अत्रकश्चिद्विशेषउच्य ते ॥ तत्ररात्रौरजसिजननादौचरात्रित्रिभागांकृत्वा आद्यभागद्वयंचेत्पूर्वदि नंग्राह्यं ॥ परतस्तूत्तरमितिमिताक्षरायाम् ॥ यत्तुप्रागर्धरात्रात्प्राग्वा सूर्योदया त्पूर्वदिनमित्युक्तं ॥ तत्रदेशाचाराद्व्यमस्था ॥ तथासप्तदशदिनपर्यंतंपुना रजोदृष्टौस्नानमात्रं अष्टादशेएकरात्रं ऊनविंशेद्यहः ॥ विंशतिप्रभृतित्रिरा त्रमितिततएवज्ञेयंयत्तुचतुर्दशदिनादर्वागशुचित्वंनविद्यते इतितत्रस्नानप्रभृ तित्वमभिप्रेतं ॥ एतच्चयस्याविंशतिदिनोत्तरंप्रायशोरजस्तत्रोक्तंस्मृत्यर्थसारे ॥ त्रयोदशदिनादूर्ध्वंप्रायोरजोवतीनामेकादशदिनात्प्रागशुचित्वंनास्ति ॥ ए कादशदिनेएकरात्रं ॥ द्वादशेद्विरात्रं । उर्ध्वंत्रिरात्रमिति ॥ प्रयोगपारिजा तेप्येवं ॥ रोगजेतुतत्रैवविशेषःसंग्रहे रोगेणयद्रजःस्त्रीणामन्वहंहिप्रवर्तते ॥ नाशुचिस्तुभवत्तेनयस्माद्वैकारिकंमतमिति ॥ कर्माधिकारस्तुरजोनिवृत्तावे व ॥ साध्वाचारानतावत्स्यात्स्नातापिस्त्रीरजस्वला ॥ यावत्प्रवर्तमानंहिरजोनै वनिवर्त्ततइतिश्राद्धहेमाद्रौशंखोक्तेः **तत्रापिस्वकालेऽशुचिरेवेत्याहऋष्य शृंगः** रोगजेवर्त्तमनेपिकाले निर्यातिकालिकं ॥ तस्मात्कालेप्रमत्तास्याद न्यथासंकरोभवेत् **तथा** रजस्वलायारजस्वलांतरस्पर्शेऽकामतःस्नानंकामत उपवासःपंचगव्याशनंच ॥ असवर्णानांतुब्राह्मण्याक्षत्रियादिस्पर्शे क्रमेणकृ च्छ्रार्द्धपादोनकृच्छ्रकृच्छ्राणि क्षत्रियादीनांतुकृच्छ्रपादएवक्षत्रियादीनांहीन वर्णस्पर्शेत्रिरात्रमुपवासः ॥ वैश्याशूद्र्योःपूर्वयास्पर्शेहोरात्रंद्विरात्रंच ॥ एतच्च

कामतः ॥ अकामतश्चप्राक्शुद्धेरनशनं ॥ अकामतश्चंडालादिस्पर्शेप्यनश
नमेवप्राक्शुद्धेः ॥ कामतस्तु ॥ प्रथमेह्नित्र्यहःद्वितीयेद्व्यहस्तृतीयेएकाहः ॥
श्वस्पर्शेतुद्व्यहएकाहोवा ॥ भुंजानायाश्चांडालादिस्पर्शेषड्रात्रं ॥ उच्छिष्टयोः
स्पर्शेतुकृच्छ्रइत्यादिमिताक्षरायांज्ञेयं ॥ स्मृत्यर्थसारेतुसर्वत्रबालापत्यायाः स्प
र्शेस्नानेकृतेभुक्तिः पश्चादशनप्रत्याम्नायइति **स्नानविधिंचाहपराशरः** स्ना
नेनैमित्तिकेप्राप्तेनारीयदिरजस्वला । पात्रांतरिततोयेनस्नानंकृत्वाव्रतंचरेत् ॥
सिक्तगात्राभवेदद्भिःसांगोपागाकथंचन ॥ नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधा
रयेत् ॥ अथरजस्वलास्नानं **दैवज्ञवल्लभः** ब्रह्मानुराधाश्विनसौम्यभेषुहस्ता
निलाखंडलवासवेषु ॥ विश्वार्यमर्क्षोत्तरभाद्रभेषुवरांगनास्नानविधिःप्रदिष्टः
ज्वरेतूशनाः ज्वराविभूतायानारीरजसाचपरिप्लुता ॥ कथंतस्याभवेच्छौचं
शुद्धिःस्यात्केनकर्मणा ॥ चतुर्थेहनिसंप्राप्तेस्पृशेदन्यातुतांस्त्रियं ॥ सासचैला
वगाह्यापःस्नात्वास्नात्वापुनःस्पृशेत् ॥ दशद्वादशकृत्वोवाआचामेच्चपुनः
पुनः ॥ अंतेचवाससांत्यागःततःशुद्धाभवेत्तुसेति ॥ इदंचातुरमात्रेज्ञेयं ॥
आतुरेस्नानउत्पन्नेदशकृत्वोह्यनातुरइतिपराशरोक्तेः ॥ रजसोऽज्ञानेतुपराश
रमाधवीयेप्रजापतिः ॥ अविज्ञातेमलेसाचमलवद्वसनायदि ॥ कृतंगृहेषुदु
ष्टंस्याच्छुद्धिर्नस्याद्त्रिरात्रतः **देवजानीयेकारिकायां** उच्छिष्टातुद्विजाती
नांरजःस्त्रीयदिपश्यति ॥ उपवासमधोच्छिष्टेऽध्वोंच्छिष्टेत्र्यहंक्षिपेत् **अथपुं**
सवनं प्रयोगपारिजातेजातूकर्ण्यः ॥ द्वितीयेवातृतीयेवामासिपुंसवनंभवेत्
व्यक्तेगर्भेभवेत्कार्यसीमंतेनसहाथवा **बृहस्पतिः** तृतीयेमासिकर्तव्यंगृष्टेरन्य
त्रशोभनं । गृष्टेश्चतुर्थेमासेतुषष्ठेमास्यथवाष्टमे ॥ सकृत्प्रसूतागृष्टिः ॥ एते
नप्रतिगर्भमपिभवतीतिज्ञायते ॥ बह्वृचकारिकापि ॥ कर्त्तास्याद्देवरस्तस्या
यस्याः पत्युरसंभवः । आवर्तातइदंकर्मप्रतिगर्भमितिस्थितिः **ब्राह्मे** गर्भा
धानादिसंस्कर्त्तापिताश्रेष्ठतमःस्मृतः॥अभावेस्वकुलीनःस्याद्बांधवोऽन्यत्रगो
त्रजः **मदनरत्नेसत्यव्रतः** मृतोदेशांतरगतोभर्त्तास्त्रीयद्यसंस्कृता॥देवरोवागुरु
र्वापिवंश्योवापिसमाचरेत् **हेमाद्रौयमः** प्रथमेमासिद्वितीयेवायदापुन्नक्षत्रेणचं

द्रमायुक्तःस्यादितिवराहः ॥ हस्तोमूलंश्रवणःपुनर्वसुर्मृगशिरस्तथापुष्यः ॥ पुंसंज्ञकेषुकार्येष्वेतानिशुभानिधिष्ण्यानि । अनुराधापिपुन्नक्षत्रंअनूराधान्हविषावर्धयंतइतिश्रुतेः **गर्गोपि** पुन्नामश्रवणस्तिष्योहस्तश्चैवपुनर्वसुः ॥ अभिजित्प्रोष्ठपाच्चैवअनुराधातथाश्वयुक् **नृसिंहः** रिक्तांपर्वचनवर्मीत्यक्त्वापुंसवनेशुभाः ॥ ज्योतिर्निबंधेवसिष्ठः ॥ मृत्युश्चसौरेस्तनुहानिरिंदोर्मृतप्रजापुंसवनेबुधस्य ॥ काकीचवंध्याभवतीहशुक्रेस्त्रीपुत्रलाभोरविभौमजीवैः ॥ अनवलोभनस्याप्ययमेवकालः ॥ दीपिकायांतुचतुर्थेऽनवलोभनमित्युक्तं ॥ अथसीमंतः ॥ हेमाद्रौवैजवापः ॥ **अथसीमंतोन्नयनं** ॥ चतुर्थेपंचमेषष्ठे चेतिवसिष्ठः चतुर्थेसप्तमेमासिषष्ठेवाप्यथवाष्टमे ॥ हेमाद्रौशंखः ॥ गर्भस्पंदनेसीमंतोन्नयनं **यावद्धानप्रसवः काष्णाजिनिः** गर्भलंभनमारभ्ययावन्नप्रसवस्तदा । सीमंतोन्नयनंकुर्याच्छंखस्यवचनंयथा **मासश्चात्रसौरःसावनो वाकालविधाने** चतुर्थषष्ठाष्टममासभाजिसौरेणगर्भेप्रथमंविधेयं ॥ सीमंतकर्मद्विजभामिनीनांमासेऽष्टमेविष्णुबलिंचकुर्यात् **वसिष्ठः** चतुर्थेसावनेमासिषष्ठेवाप्यथवाष्टमे **ज्योतिर्निबंधेनारदः** आरिक्तापर्वदिवसेकुजजीवार्कवासरे **कालविधाने** सीमंतेतिष्यहस्तादितिहरिशशभृत्पौष्णविध्युत्तराख्याप क्षछिद्रंचरिक्तांपितृतिथिमपहायापराःस्युःप्रशस्ताः ॥ अदितिःपुनर्वसुः **पक्षछिद्रंचाहवसिष्ठः** चतुर्दशीचतुर्थीचअष्टमीनवमीतथा ॥ षष्ठीचद्वादशीचैव पक्षछिद्राह्वयःस्मृताः ॥ क्रमादेतासुतिथिषु वर्जनीयाश्चनाडिकाः ॥ भूता ५ ष्ट ८ मनु १४ तत्त्वां २५ क ९ दश १० शेषास्तुशोभनाः **कालनिर्णये** शुभसंस्थेनिशानाथेचतुर्थीचचतुर्दशीं ॥ पौर्णमासींप्रशंसंतिकेचित्सीमंतकर्मणि **बृहस्पतिः** पूर्वपक्षःशुभःप्रोक्तःकृष्णश्चांत्यत्रिकंविना ॥ चतुर्दशीचतुर्थीचशुक्लपक्षेशुभप्रदे **नारदः** विप्रक्षत्रिययोःकुर्याद्दिवासीमंतकर्मत त् ॥ वैश्यशूद्रकयोरेतद्दिवानिश्यपिकेचन ॥ वाराःपूर्वोक्ताएव **एतच्चसकृत्प्रतिगर्भंवाकार्यमितिहेमाद्रिः** एतच्चकृतसंस्कारासीमंतेनद्विजस्त्रियःयंयं गर्भंप्रसूयंतेससर्वःसंस्कृतोभवेदितिहारीतोक्तेः ॥ सीमंतोन्नयनंकर्मनस्त्रीसं

स्कारइष्यते ॥ केचिद्गर्भस्यसंस्कारान्प्रतिगर्भप्रयुंजतइतिहेमाद्रौविष्णुवच नाच्च **सएव** स्त्रीयद्यकृतसीमंताप्रसवेत्तुकथंचन ॥ गृहीतपुत्राविधिवत्पुनः संस्कारमर्हति **सीमंतेभोजनेप्रायश्चित्तमुक्तंपराशरमाधवीयेधौम्येन** ब्रह्मौदनेचसोमेचसीमंतोन्नयनेतथा ॥ जातकर्मनवश्राद्धेभुक्त्वाचांद्रायणंचरेत् **ऋग्विधानेतु** आरइवेज्जपेन्मंत्रंशतवारंनसंशयः ॥ सीमंतेचयदाभुंक्ते मुच्यतेकिल्बिषात्तदेति **अथगर्भिणीतत्पतिधर्माः । वराहः** सामिषमशनं यत्नात्प्रमदापरिवर्ज्जयेदतःप्रभृति गृह्यकारिकायां ॥ अंगारभस्मास्थिकपाल चुल्लीशूर्पादिकेपूपविशेन्ननारी ॥ सोलूखलाढ्येदृषदादिकेवायंत्रेतुषाढ्येनतथोपविष्टा ॥ नोमार्ज्जनीगोमयपिंडकादौकुर्यान्नवारिण्यवगाहनंसा ॥ अंगारभूत्याननखैर्लिखेत्क्ष्मांकलिंवपुर्भगमथोनकुर्यात् ॥ नोमुक्तकेशीविवशा थवास्याद्भुक्तेनसंध्यावसरेनशेते ॥ नामंगलंवाचमुदीरयेत्साशून्यालयंवृक्षतलेनयायात् **विष्णुधर्मोत्तरे** कटुतीक्ष्णकषायाणिअत्युष्णलवणानिच ॥ आयासंचव्यवायंचगर्भिणीवर्जयेत्सदा **हेमाद्रौकौंडिन्यः** मुंडनंपिंडदानंच प्रेतकर्मचसर्वशः ॥ नजीवत्पितृकःकुर्याद्गुर्विणीपतिरेवच **मिताक्षरायां** उदन्वतोंभसिस्नाननखकेशादिकर्त्तनं ॥ अंतर्वत्न्याःपतिःकुर्वन्नप्रजाजायते ध्रुवं **पृथ्वीचंद्रोदयेगारुडे** गयायांपिंडदानस्यनकदाचिन्निराक्रिया ॥ अत्र कालेदानप्रत्ययस्मृतेर्निषिद्धकालस्यैवापवादो नतुजीवत्पितृकगर्भिणीपत्याशौचादिनिमित्तस्य ॥ अग्निहोत्रेयावज्जीवत्कालपरत्वाभावात् ॥ अन्यथा शौचेपिगयायात्राश्राद्धंचस्यात्यत्रतुनिमित्तसंयोगस्यापवादोयथाशौचेग्निहोत्रादेः यथावाजीवत्पितृकस्यमातुर्गयान्वष्टकादौतत्रतदेवभवतिनान्यदितिसंक्षेपः **प्रयोगपारिजातेकश्यपः** गर्भिणीकुंजराश्वादिशैलहर्म्याधिरोहणं ॥ व्यायामंशीघ्रगमनंशकटारोहणंत्यजेत् ॥ शोकंरक्तविमोक्षंचसाध्वसंकुक्कुटासनं । व्यवसायंदिवास्वापंरात्रौजागरणंत्यजेत् **मदनरत्नेस्कांदे** हरिद्रांकुंकुमंचैवसिंदूरंकज्जलंतथा॥कूर्पासकंचतांबूलंमांगल्याभरणंशुभं॥ केशसंस्कारकबरीकरकर्णविभूषणम् ॥भर्त्तुरायुष्यमिच्छंतीदूरयेद्गर्भिणीनहि **बृहस्पतिः**

चतुर्थेमासिषष्ठेवाप्यष्टमेगर्भिणीयदा ॥ यात्रानित्यंविवर्ज्यास्यादाषाढेतुविशेषतः **याज्ञवल्क्यः**दौर्हृदस्याप्रदानेनगर्भोदोषमवाप्नुयात् ॥ वैरूप्यंमरणंचापितस्मात्कार्यप्रियंस्त्रियः॥दौर्हृदंगर्भिणीप्रियं **तत्रैवाश्वलायनः**वपनंमैथुनंतीर्थवर्ज्जयेद्गर्भिणीपतिः॥श्राद्धंचसप्तमान्मासादूर्ध्वंचान्यत्रवेदवित् **श्राद्धंतद्गो जनमितिप्रयोगपारिजातःकालविधाने मुहूर्तदीपिकायांच** क्षौरंशवानुगमनंनखकृन्तनंचयुद्धादिवास्तुकरणंत्वतिदूरयानं ॥ उद्वाहमौपनयनंजलधेश्चगाहमायुःक्षयार्थमितिगर्भिणिकापतीनां **रत्नसंग्रहेगालवः** दहनंवपनंचैवचौलंवैगिरिरोहणं॥ नावआरोहणंचैववर्जयेद्गर्भिणीपतिः ॥ अव्यक्तगर्भापतिरब्धियानंमृतस्यवाहंक्षुरकर्मसंगं ॥ तस्यांतुयत्नेनगयादितीर्थयागादिकंवास्तुविधिंनकुर्यात्॥ अव्यक्तगर्भावनिताभवेन्मासत्रयात्परं॥ षण्मासात्परतःसूतिर्नवमेरिष्टवासिनी **अथसूतिकागृहप्रवेशः । गर्गः** रोहिण्यैंदवपौष्णेषुस्वातीवरुणयोरपि । पुनर्वसौपुष्यहस्तधनिष्ठात्र्युत्तरासुच ॥ मैत्रेत्वाष्ट्रे तथाश्विन्यांसूतिकागारवेशनम् **एतच्चसंभवे** प्रसूतिसमयेकालेसद्यएवप्रवेशयेदिति वसिष्ठोक्तेःतच्चनैर्ऋत्यांकार्यं । वारुण्यांभोजनगृहंनैर्ऋत्यांसूतिकागृहमितिवसिष्ठोक्तेः **विष्णुधर्मे** दशाहंसूतिकागारमायुधैश्चविशेषतः । वह्निनातिंदुकालातैःपूर्णकुंभैःप्रदीपकैः । मुसलेनतथावारिवर्णकैश्चित्रितेनचेति **अथजातकर्म । पारिजातेवसिष्ठः** श्रुत्वाजातंपितापुत्रंसचैलंस्नानमाचरेत् **मनुः** प्राङ्नाभिवर्धनात्पुंसोजातकर्मविधीयते । वर्द्धनंछेदनं **हेमाद्रौवैजवापः** जन्मनोनंतरंकार्यंजातकर्मयथाविधि । दैवादतीतकालंचेदतीतेसूतकेभवेत् **पृथ्वीचंद्रोदयेविष्णुधर्मे** अछिन्ननाभिकर्तव्यंश्राद्धंवैपुत्रजन्मनि ॥ पुत्रपदेनकन्यापिगृह्यते तदाहतत्रैवकार्ष्णाजिनिः प्रादुर्भावेपुत्रपुत्र्योर्ग्रहणेचंद्रसूर्ययोः ॥ स्नात्वानंतरमात्मीयान्पितॄन्श्राद्धेनतर्पयेत् **एतच्चरात्रावपिकार्यं** पुत्रजन्मनियात्रायांशर्वर्योदत्तमक्षयमितितत्रैवव्यासोक्तेः **वैजवापः** जातमात्रकुमारस्यजतकर्मविधीयते ॥ स्तनप्राशनतःपूर्वंनाभिकर्तनतोपिवा ॥ एतेननैमित्तिकमपीदंजातेष्टिवदाशौचांतेकार्यमितिशंकापरास्ता । जातेकुमारे

पितृणामामोदात्पुण्यंतदहरितिहारीतोक्तेश्च । अत्रश्राद्धमामेनहेम्नावाकार्यमित्युक्तं **पृथ्वीचंद्रोदयेआदित्यपुराणे** जातश्राद्धेतुपक्वान्नंनदद्याद्ब्राह्मणेष्वपीति ॥ हेमाद्रिस्तु ॥ पुत्रजन्मनिकुर्वीतश्राद्धंहेम्नैवबुद्धिमान् । नपक्वेनन चामेनकल्याणान्यभिकामयन्निति संवर्तोक्तेर्हेम्नैवेत्याह **एतच्चजननाशौचे मरणाशौचेचकार्यमित्याहमिताक्षरायांप्रजापतिः** आशौचेतुसमुत्पन्नेपुत्रजन्मयदाभवेत् ॥ कर्तुस्तात्कालिकीशुद्धिःपूर्वाशौचेनशुद्ध्यति ॥ **केचित्तु** मृताशौचस्यमध्येतुपुत्रजन्मयदाभवेत् ॥ आशौचावगमेकार्यंजातकर्मयथाविधीतिस्मृतिसंग्रहोक्तेराशौचांतेकार्यमित्याहुः **स्मृत्यर्थसारेपिविकल्पउक्तः** मृदुध्रुवचरक्षिप्रभेष्वेषामुदयेषुच ॥ गुरौशुक्रेथवार्केंद्रेजातकर्मचनामच **मृद्वादिलक्षणमाहश्रीधरः** रोहिण्युत्तरभांस्थिरंगिरिशमूलेंद्रोरगादारुणंक्षिप्रंचाश्विदिनेशपुष्यमनलेंद्राग्नीतुसाधारणं ॥ उग्रंपूर्वमघांतकंमृदुगतित्वाष्ट्रांत्यमैत्रंचरंविष्णुस्वातिशतोडुवस्वदितयःकुर्युःस्वसंज्ञाफलं । अत्रसर्वत्रजातकर्मनामकर्मादावुक्तकालातिक्रमेनक्षत्रादिकंज्ञेयम् । देशकालोपघाताद्यैःकालातिक्रमणंयदि ॥ अनस्तगेज्यैंदुसितेतत्कार्यंचोत्तरायणे । इतिमदनरत्नेनारदोक्तेः **बृहस्पतिरपि** मुख्यालाभेविधिज्ञेनविधिश्चित्योप्रमादतः ॥ नक्षत्रतिथिलग्नानांविचार्यैवंपुनःपुनः ॥ सूतकेसंध्यादौविशेषंवक्ष्यामः ॥ अथजन्मनिदुष्टकालाः **तत्रगंडांतः** । **ज्योतिर्निबंधेनारदः** पूर्णानंदाख्ययोस्तिथ्योःसंधिर्नाडीद्वयंतथा ॥ गंडांतंमृत्युदंजन्मयात्रोद्वाहव्रतादिषु ॥ कुलीरसिंहयोःकीटचापयोर्मीनमेषयोः । गंडांतमंतरालंस्याद्घटिकार्धंमृतिप्रदं ॥ सार्पेकपौष्णभेष्वंत्यषोडशांशाभसंधयः ॥ तदग्रभेष्वाद्यपादाभानांगंडांतसंज्ञकाः **रत्नमालायां** पौष्णाऽश्विन्योः सार्पपित्र्क्षयोश्चयच्चज्येष्ठामूलयोरंतरालं । स्याद्गंडांतं स्याच्चतुर्नाडिकंहियात्राजन्मोद्वाहकालेष्वनिष्टम् **रत्नसंग्रहेनवनीतारिष्टे** सर्वेषांगंडजातानांपरित्यागोविधीयते ॥ वर्जयेद्दर्शनंश्राद्धंतच्चषाण्मासिकंभवेत् ॥ तिथ्यर्क्षगंडेपितृमातृनाशोलग्नेतुसंधौतनयस्यनाशः ॥ सर्वेषुनोजीवतिहन्तिबन्धून्जीवन्पुनःस्याद्बहुवारणाश्वःअथैषांदा

नमुत्तरगार्ग्ये तिथिगंडेत्वनड्वाहंनक्षत्रेधेनुरुच्यते ॥ कांचनंलग्नगंडेतुगंडदोषोविनश्यति उत्तरेतिलपात्रंस्यात्पुष्येगोदानमुच्यते ॥ अजाप्रदानंत्वाष्ट्रे स्यात्पूर्वाषाढेचकांचनं। उत्तरापुष्यचित्रासुपूर्वाषाढोद्भवस्यच। कुर्याच्छांतिं प्रयत्नेननक्षत्राकारजांबुधः ॥ **अथाश्लेषाफलं** मूर्द्धास्यनेत्रगलकांसयुगं चबाहूहृज्जानुगुह्यपदमित्यहिदेहभागः । बाणाद्रिनेत्रहुतभुक्श्रुतिनागरुद्रषण्नंदपंचशिरसःक्रमशस्तुनाड्यः ॥ राज्यंपितृक्षयोमातृनाशः कामक्रियारतिः ॥ पितृभक्तोबलीस्वघ्नस्त्यागीभोगीधनीक्रमात् ॥ अथज्येष्ठाफलं ब्रह्मयामले ॥ ज्येष्ठादौजननीमाताद्वितीयेजननीपिता ॥ तृतीयेजननीभ्राता स्वयंमाताचतुर्थके ॥ आत्मानंपंचमेहन्तिषष्ठेगोत्रक्षयोभवेत्। सप्तमेचोभयकुलंज्येष्ठभ्रातरमष्टमे ॥ नवमेश्वशुरंहन्तिसर्वहन्तिदशांशकइति **अथमूलफलं—भल्लाटः** अभुक्तमूलसम्भवंपरित्यजेत्तुबालकं । समाष्टकंपिताथवानतन्मुखंविलोकयेत् ॥ तदाद्यपादकेपिताद्वितीयकेजनन्यथ । धनक्षयस्तृतीयकेचतुर्थकःशुभावहः ॥ प्रतीपमन्त्यपादतःफलंतदेवसार्पभे **अभुक्तमूलंत्वाहवृद्धवसिष्ठः** ज्येष्ठांतेघटिकाचैकामूलादौघटिकाद्वयं । अभुक्तमूलमित्याहुस्तत्रजातांशिशुंत्यजेत् ॥ केचिज्ज्येष्ठांत्यमूलाद्यंचपादमभुक्तमूलमाहुः **कश्यपसंहितायांत्वन्यथोक्तं** मूलाद्यपादजोहंतिपितरंतुद्वितीयजः । मातरंस्वंतृतीयोर्थान्सुहृदंतत्तुरीयजः ॥ फलंतदेवसार्पर्क्षेप्रतीपंत्वंत्यपादतः ॥ अथमूलवृक्षः **जयार्णवे** मूलस्तंभंस्त्वचाशाखापत्रंपुष्पंफलंशिखा । वेदाश्चमुनयश्चैवदिशश्चवसवस्तथा ॥ नन्दाबाणारसारुद्रामूलभेदःप्रकीर्तितः । मूलेमूलविनाशायस्तंभेहानिर्धनक्षयः ॥ त्वचिभ्रातृविनाशायशाखामातृविनाशकृत् ॥ पत्रेसपरिवारःस्यात्पुष्पेषुनृपवल्लभः । फलेषुलभतेराज्यंशिखायामल्पजीवितं ॥ अन्यत्रवान्यथोक्तं ॥ मूलेसप्तघटीषुमूलहननंस्तम्भेष्टसुस्वक्षयंत्वद्विग्बन्धुविनाशनंचविटपेरुद्रैर्हतोमातुलः ॥ पत्रकैःसुकृतीतुबाणकुसुमेमंत्रीफलेसागरेराजावह्निशिखाल्पमायुरितिसन्मूलांघ्रिपेस्यात्फलम् भूपालवल्लभः वृषालिसिंहेषुघटेचमूलंदिविस्थितंयुग्मतुलांगनांत्ये ॥ पातालगंमेषधनुःकुली

रनक्रेषुमर्त्येष्वितिसंस्मरंति ॥ स्वर्गेमूलेभवेद्राज्यंपातालेचेद्वनागमः । मर्त्य लोकेयदामूलंतदाशून्यंसमादिशेत् **वसिष्ठः** नैर्ऋत्यभोद्भूतमुतःसुतावाक्षिप्रा दवश्यंश्वशुरंनिहंति ॥ तदंत्यपादेजनितोनिहंतितस्योक्रमेणाहिभवेकलत्र म् ॥ सुरेशताराजनिताधवाग्रजंद्विदैवताराजनितातुदेवरम् ॥ पुरन्दरर्क्षेजनि तःसुतस्तथास्वस्याग्रजंहन्तिनपुत्रितायदि **प्रयोगपारिजाते** मूलजाश्वशुरंहं तिव्यालजाचतदङ्गनाम् ॥ माहेन्द्रजाग्रजहंन्तिदेवरन्तुद्विदैवजा **नृसिंहप्र सादे** धवाग्रजंहन्तिसुरेंद्रजातातथैवपत्न्याभगिनींपुमांश्च । द्विदैवजादेवरमा शुहन्याद्भार्यानुजामाशुनिहन्तिसूनुः ॥ पत्न्यग्रजामग्रजंवाहन्तिज्येष्ठर्क्षजः पुमान् । तथाभार्यास्वसारंवाशालकंवाद्विदैवजः ॥ कन्यकादेवरंहन्तिविशा खांत्यसमुद्भवा । आद्यपादत्रयेनैवआद्यभेतुपुमान्भवेत् ॥ नहन्याद्देवरंक न्यातुलामिश्राद्विदैवजा । तद्दक्षांतोद्भवावर्ज्यादुष्टावृश्चिकपुच्छवत् ॥ चित्रा द्यर्धेपुष्यमध्येद्विपादेपूर्वाषाढाधिष्ण्यपादेतृतीये । जातःपुत्रश्चोत्तराद्येविधत्ते मातापित्रोर्भ्रातरंबालनाशं ॥ द्विमासंचोत्तरादोषःपुष्येचैवत्रिमासकः । पूर्वा षाढाष्टमेमासिचित्राषाण्मासिकंफलं ॥ नवमासंतथाश्लेषामूलेचाष्टकवर्षकं । ज्येष्ठापंचदशेमासिपुत्रदर्शनवर्जिता ॥ **वसिष्ठः** व्यतीपातेङ्गहानिःस्यात्परि घेमृत्युमादिशेत् । वैधृतौपितृहानिःस्यान्नष्टेंदावंधतांव्रजेत् ॥ मूलेसमूलना शःस्यात्कुलनाशोधृतौभवेत् । विकृतांगश्चहीनश्चसंध्ययोरुभयोरपि ॥ पर्व ण्यपिप्रसूतौचसर्वारिष्टभयप्रदः । तद्वत्सदंतजातश्चपादजातस्तथैवच ॥ विपरीतप्रसूतौतुनाभिनालेनवेष्टितः । राष्ट्रस्यनृपतेश्चैवस्वस्यापिचविनाशकः ॥ तस्माच्छांतिंप्रकुर्वीतग्रहाणांक्रूरचेतसां **गर्गः** कृष्णाचतुर्दशीषोढांकुर्यादा दौशुभंस्मृतं । द्वितीयेपितरंहन्तितृतीयेहन्तिमातरम् ॥ चतुर्थेमातुलंहंतिपं चमेवंशनाशनम् ॥ षष्ठेतुधननाशःस्यादात्मनोवंशनाशनम् ॥ तस्मात्सर्व प्रयत्नेनशांतिंकुर्याद्विधानतः ॥ अथपित्रोर्नक्षत्रेजन्मदोषः ॥ **तत्रदेवकीर्तिः** यद्येकस्मिन्धिष्ण्येजायन्ते दुहितरौथवापुत्राः । पितुरंतकराद्येतेयद्यपरो प्रीतिरतुलास्यात् **गर्गः** एकस्मिन्नेवनक्षत्रेभ्रात्रोर्वापितृपुत्रयोः प्रसूतिश्चतयो

मृत्युर्भवेदेकस्यनिश्चितं **शौनकः** ग्रहणेचन्द्रसूर्यस्यप्रसूतिर्यदिजायते । व्याधिपीडातदास्त्रीणामादौतुऋतुदर्शनात् ॥ इत्थंसंजायतेयस्यतस्यमृत्युर्न संशयः **शांतिस्तु** तद्दक्षाधिपतेरूपंसुवर्णेनप्रकल्पयेत् । सूर्यग्रहेसूर्यरूपं हैमंचन्द्रन्तुराजतम् ॥ राहुरूपंप्रकुर्वीतनागेनैवविचक्षणः ॥ नागःसीसं ॥ त्रयाणांचैवरूपाणांस्थापनंतत्रकारयेत् ॥ आकृष्णेनाप्यायस्वभ्रान्नोरितिपूजा मंत्राःनक्षत्रदेवतायास्तन्मंत्रेण संपूज्यतुय जेत्सूर्यसमिद्भिश्चार्कसंभवैः ॥ चंद्रग्र हेचपालाशैर्दूर्वाभीराहुमेवच॥समिद्भिर्ब्रह्मवृक्षस्यभेशायजुहुयाद्बुधः ॥ आज्ये नचरुणाचैवतिलैश्चजुहुयात्ततः । पंचगव्यैःपंचरत्नैःपंचत्वक्पंचपल्लवैः । जलै रौषधिकल्कैश्चअभिषेकंसमाचरेत् । मंत्रैर्वारुणसंभूतैरापोहिष्ठादिभिस्त्रिभिः इमंमेगंगेपुरतस्तत्वायामीतिमंत्रकैः । यजमानस्ततो दद्याद्धेम्नाप्रतिकृति त्रयमिति **मात्स्ये** अकालप्रसवानार्यःकालातीतप्रजास्तथा । विकृतप्रसवा श्चैवयुग्मप्रसवकास्तथा ॥ अमानुषाअमुंडाश्चअजातव्यंजनास्तथा । हीनां गाअधिकांगाश्चजायंतेयदिवास्त्रियः ॥ पशवःपक्षिणश्चैव तथैवचसरीसृपाः विनाशंतस्यदेशस्यकुलस्यचविनिर्दिशेत् ॥ निर्वासयेत्तांनगरात्ततःशांतिंस माचरेत् **पाद्मे** उपरिप्रथमंयस्यजायंतेचशिशोर्द्विजाः । दंतैर्वासहयस्यस्या ज्जन्मभार्गवसत्तम ॥ द्वितीयेचतृतीयेचचतुर्थेपंचमेतथा । यदादंताश्चजायं तेमासेचैवमहद्भयं ॥ मातरंपितरंवाथखादेदात्मानमेवच।गजपृष्ठगतंबालंनौ स्थंवास्थापयेद्द्विज ॥ तदभावेतुधर्मज्ञकांचनेवावरासने । सर्वौषधैःसर्वगं धैर्बीजैःपुष्पैःफलैस्ततः॥पंचगव्येनरत्नैश्चपताकाभिश्चभार्गव । स्थालीपाकेन धातारंपूजयेत्तदनंतरं ॥ सप्ताहंचात्रकर्तव्यंतथाब्राह्मणभोजनं । भद्रासने निवेश्यैनंमृद्भिर्मूलैःफलैस्तथा ॥ सर्वौषधैःसर्वगंधैःसर्वबीजैस्तथैवच । स्ना पयेत्पूजयेच्चात्रवह्निं सोमंसमीरणं ॥ पर्वतांश्चतथाख्यातान्देवदेवंचकेशवं । एतेषामेवजुहुयाद्घृतमग्नौयथाविधि ॥ ब्राह्मणानांतुदातव्यातत:संपूज्यदक्षि णा **ब्रह्मयामले** प्रथमंदंतनिर्मुक्तिरूर्ध्वंबालस्यचेद्भवेत् ॥ क्लेशायमातुल स्येहतदाप्रोक्तामनीषिभिः ॥ सौवर्णराजतंवापिताम्रं कांस्यमयंतुवा । दध्यो

दनेनसंपूर्णपात्रंदद्याच्छिशोः करे ॥ समंत्रंभाजनंदत्वासपश्येन्मातुलः शिशुं ॥ सालंकारंसवस्त्रंचशिशुमालिंग्यसादरं **तत्रमंत्रः** रक्षमांभागिनेय त्वंरक्षमेसकलंकुलं ॥ गृहीत्वाभाजनंसान्नंप्रसन्नोभवसर्वदा ॥ निर्विघ्नंकुरुकल्याणंनिर्विघ्नांचस्वमातरं । मय्यात्मानमधिष्ठाप्यचिरंजीवमयासह ॥ एवंकृतेविधानेतुविघ्नःकोपिनजायतइति **अथत्रिकशांतिः शांतिसर्वस्वे** सुतत्रयेसुताचेत्स्यात्तत्रयेवासुतोयदि । मातापित्रोःकुलस्यापितदानिष्टंमहद्भवेत् ॥ ज्येष्ठनाशोधनेहानिर्दुःखंवासुमहद्भवेत् ॥ तत्रशांतिंप्रकुर्वीतवित्तशाठ्यविवर्जितः ॥ जातस्यैकादशाहेवाद्वादशाहेशुभेदिने । आचार्यमृत्विजोवृत्वाग्रहयज्ञपुरःसरं ॥ ब्रह्मविष्णुमहेशेंद्रप्रतिमाः स्वर्णतःकृताः । पूजयेद्धान्यराशिस्थंकलशोपरिशक्तितः ॥ पंचमेकलशेरुद्रं पूजयेद्रुद्रसंख्यया रुद्रसूक्तानिचत्वारिशांतिसूक्तानिसर्वशः ॥ द्विजएकोजपेद्धोमकालेशुचिसमाहितः ॥ आचार्योजुहुयात्तत्रसमिदाज्यतिलांश्चसं ॥ अष्टोत्तरसहस्रंवाशतं वात्रिंशतंतुवा । देवताभ्यश्चतुर्वक्त्रादिभ्योगृहपुरःसरं ॥ ब्रह्मादिमन्त्रैरिंद्रस्य यतइंद्रभयामहे । ततःस्विष्टकृतंहुत्वाबलिंपूर्णाहुतिंततः ॥ अभिषेकंकुटुंबस्यकृत्वाचार्यप्रपूजयेत् ॥ हिरण्यंधेनुरेकाचऋत्विजांदक्षिणाततः ॥ आज्यस्यवीक्षणंकृत्वाशांतिपाठंतुकारयेत् । प्रतिमांगुरवेदत्वाउपस्करसमन्वितः ॥ ब्राह्मणान्भोजयेच्छक्त्यादीनानाथांश्चतर्पयेत् । एवंशांतिविधानेनसर्वारिष्टंप्रलीयतइति ॥ अन्येषुमूलाद्यृक्षेषुशांत्यादिप्रयोगपारिजातेमत्कृतेशांतिरत्नेचज्ञेयं **मिताक्षरायांमार्कंडेयः** रक्षणीयातथाषष्ठीनिशातत्रविशेषतः ॥ रात्रौजागरणंकार्यंजन्मदानांतथाबलिः ॥ पुरुषाःशस्त्रहस्ताश्चनृत्यगीतैश्चयोषितः । रात्रौजागरणंकुर्युर्दशम्यांचैवसूतके ॥ **व्यासः** सूतिकावासनिलयाजन्मदानामदेवताः । तासांयागनिमित्तंतुशुद्धिर्जन्मनिकीर्तिता ॥ प्रथमेदिवसेषष्ठेदशमेचैवसर्वदा ॥ त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि **अपरार्केब्राह्मे** कन्याश्चतस्रोराकाद्यावातघ्नीचैवपंचमी । क्रीडनार्थाचबालानां षष्ठीचशिशुरक्षणी ॥ खड्गेतुपूजनीयावैवैश्यैर्व्रात्यैर्द्विजातिभिः ॥ राकानुम

तिःसिनीवालीकुहूरितिचतस्रःकन्याइत्यर्थः ॥ **अथदत्तकपरिग्रहविधिः पारिजातेशौनकः** अपुत्रोमृतपुत्रोवापुत्रार्थंसमुपोष्यच । वाससीकुंडलेदत्वाउष्णीषंचांगुलीयकं ॥ बंधूनन्नेनसंभोज्यब्राह्मणांश्चविशेषतः । अन्वाधानादियत्तत्रकृत्वाज्योत्पवनांतकं ॥ दातुःसमक्षंगत्वातुपुत्रंदेहीतियाचयेत् । दानेसमर्थोदातास्मैयेयज्ञेनेतिपंचभिः ॥ देवस्यत्वेतिमंत्रेणहस्ताभ्यांपरिगृह्यचाअंगादंगेत्यृचंजप्त्वाआघ्रायशिशुमूर्धनि ॥ गृहमध्येतमाधायचरुंहुत्वाविधानतः॥ यस्त्वाहृदात्यृचाचैवतुभ्यमग्रऋचैकया ॥ सोमोदददित्येताभिःप्रत्यृचंपंचभिस्तथा ॥ स्विष्टकृदादिहोमंचकृत्वाशेषंसमापयेत् ॥ सच ब्राह्मणानांसपिंडेषुकर्तव्यःपुत्रसंग्रहः ॥ तदभावेसपिंडोवाअन्यत्रतुनकारयेत् ॥ मिताक्षरादौतुव्याहृतिभिराज्येनहोमउक्तः । सचहोमोत्तरंजलपूर्वकंदेयः ॥ न वाङ्मात्रेण ॥ व्याहृतिभिर्हुत्वाप्रतिगृह्णीयादितिवसिष्ठोक्तेः मातापितावादद्यात्तांयमद्भिःपुत्रमापदि ॥ सदृशंप्रतिसंयुक्तंसज्ञेयोदत्रिमःसुतइतिमनूक्तेः **तत्रैववसिष्ठः** नत्वेवैकंपुत्रंदद्यात्प्रतिगृह्णीयाद्वानस्त्रीपुत्रंदद्यात् प्रतिगृह्णीयाद्वाअन्यत्रानुज्ञानाद्भर्तुरिति। इदंचभर्तृसत्वे अन्यथादद्यान्मातापितावायंसपुत्रोदत्रिमःस्मृतइतिचवत्सव्यासवचोविरोधःस्यात्॥ दानंप्रतिग्रहोपलक्षणं ॥ यत्तु । समंत्रकहोमस्यपुत्रप्रतिग्रहांगत्वात् ॥ व्याहृत्यादिमंत्रपाठेचस्त्रीशूद्रयोरनधिकारात् । तयोर्दत्तकपुत्रोनभवत्येवेतिशुद्धविवेकेरुद्रधरेणोक्तं ॥ वाचस्पतिश्चैवमेवाह । तन्न । भर्तुरनुज्ञयास्त्रियाअपिप्रतिग्रहोक्तेः । यद्यपिमेधातिथिनाभार्यात्ववदद्दष्टरूपंदत्तकत्वंहोमसाध्यमुक्तं । स्त्रियाश्चहोमासंभवस्तथापिव्रतादिवद्विप्रद्वाराहोमादिकारयेदितिहरिनाथादयः । संबंधतत्त्वेप्येवं । एवंशूद्रस्यापि ॥ स्त्रीशूद्राश्चसधर्माणंइतिस्मृतेः ॥ अतएवशूद्रकर्तृकहोमोविप्रद्वारैवपराशरेणोक्तः ॥ दक्षिणार्थंतुयोविप्रःशूद्रस्यजुहुयाद्धविः । ब्राह्मणस्तुभवेच्छूद्रःशूद्रस्तुब्राह्मणोभवेत् **अत्रमाधवाचार्यः** योविप्रःशूद्रदक्षिणामादायतदीयंहविःशांतिपुष्ट्यादिसिद्धयेवैदिकैर्मंत्रैर्जुहोति ॥ तस्यविप्रस्यैवदोषः ॥ शूद्रस्तुहोमफलंलभतैवेतिव्याचक्षते ॥ दत्तकेविशेषः **कालिकापु**

राणे पितुर्गोत्रेणयःपुत्रःसंस्कृतःपृथिवीपते ॥ आचूडांतंनपुत्रःसपुत्रतां यातिचान्यतः ॥ चूडोपायनसंस्कारानिजगोत्रेणवैकृताः॥दत्ताद्यास्तनयास्ते स्युरन्यथादासउच्यते ॥ ऊर्ध्वंतु पंचमाद्वर्षान्नदत्ताद्याःसुतान्नृप । गृहीत्वा पंचवर्षीयंपुत्रेष्टिंप्रथमंचरेत् ॥ पंचमोर्ध्वंस्वदानेच्छोरेवदानंनचान्यथा । विक्रयंचैवदानंचननेयाःस्युरनिच्छवः ॥ दाराःपुत्राश्चसर्वस्वमात्मनैवतुयोजये दितिहेमाद्रिमाधवधृतव्यासदक्षादिवचनात् **यच्चयाज्ञवल्क्यः** स्वकुटुंबविरोधेन देयंदारसुताद्दतइति ॥ तदूर्ध्वंस्वदानानिच्छुपुत्रपरम् ॥ तेनसर्वस्वदानेस्वदानेच्छुदारपुत्रदानंसिद्धम् ॥ **यत्तु** ॥ विश्वविदधिकरणंषष्ठे । तत्र पुत्रादीनांज्ञातित्वेनस्वशब्दवाच्यत्वात्पुत्रत्वेनदानमाशंकानिराकृतम्॥ जन्यपुंस्त्वस्यदानेनानिष्पत्तेः । दासत्वेनदानंभवत्येव । तस्माद्यथेष्टविनियोगार्हत्वंस्वत्वंभवत्येव ॥ पुत्रेस्वत्वाभावंवदन्पुत्रक्रयविक्रयादिशुनःशेपविक्रयादिश्रौतलिंगाद्दासक्रयविक्रयादिव्यवहारायोगात् ॥ मूर्खएव ॥ योनहिभ्रायारणःसुशेवोन्वोदर्योमनसामंतवाउइतिश्रुतौदत्तकनिषेधः॥सोप्यौरसातिशयार्थः ॥ अन्यथाशुनःशेपादिप्रतिग्रहश्रौतलिंगविरोधापत्तेः । उपेयांतव पुत्रतामित्युक्तेः ॥ इदंचश्रौतलिंगंस्वयंदत्तक्रीतपरं । नदत्तकपरं ॥ द्वादशविधपुत्रमध्येदत्तात्मातुस्वयंदत्तः । क्रीतश्चताभ्यांविक्रीतइतियाज्ञवल्क्येन तयोर्दत्तकाद्भेदोक्तेः ॥ तयोश्चदत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहइतिकलौनिषेधात्तेनसंस्कारोत्तरं स्वयंक्रीतोनभवति ॥ तदुत्तरं ॥ दत्तकोनभवत्येवेति सिद्धम्॥अथयमलयोःसंस्कारक्रमार्थज्येष्ठकनिष्ठभावउच्यते **मनुः** पुत्रःकनिष्ठोज्येष्ठायांकनिष्ठायांचपूर्वजः ॥ कथंतयोर्विभागःस्यादितिचेत्संशयोभवेत् ॥ सदृशःस्त्रीप्रजातानांपुत्राणामविशेषतः । नमातृतोज्यैष्ठ्यमस्तिजन्मतोज्यैष्ठ्यमुच्यते ॥ तेनकनिष्ठायांपूर्वजाएवज्येष्ठोनज्येष्ठायांपश्चाज्जातइत्यर्थः॥ सएवश्राद्धाधिकारी ॥ जन्मज्येष्ठेनचाह्वानंसुब्रह्मण्यास्वपिस्मृतं । यमयोश्चैवगर्भेषुजन्मतोज्येष्ठतामता **देवलः** यस्यजातस्ययमयोःपश्यंतिप्रथमंमुखं ॥ संतानःपितरश्चैवतस्मिन्ज्यैष्ठ्यं प्रतिष्ठितम् **भागवतेतु** द्वौतदाभवतोगर्भौस

तिर्वेशविपर्ययादित्युक्तेः ॥ पश्चादुत्पन्नस्यज्यैष्ठ्यमुक्तं ॥ अत्रदेशाचारतो व्यवस्था ॥ पूर्वमेवतुयुक्तंगर्भाष्टमइत्यादौविशेषनिर्देशेएवगर्भग्रहणंनान्यत्र ॥ अन्यथातद्वैयर्थ्यात् **अथसूतिकास्नानं॥ज्योतिषे** करेंद्रभाग्यानिलवास वांत्यमैत्रेंदवाश्विध्रुवभेह्निपुंसां ॥ तिथावरिक्तेशुभमामनंतिप्रसूतिकास्नानवि धिंमुनींद्राः ॥ **अथनामकर्म ॥ मदनरत्नेबृहस्पतिः**द्वादशेदशमेवापिजन्म तोपित्रयोदशे ॥ षोडशेविंशतौचैवद्वात्रिंशेवर्णतःक्रमात् ॥ **याज्ञवल्क्यः** अहन्येकादशेनाम **हेमाद्रौभविष्ये** नामध्येयंदशम्यांतुद्वादश्यामासिकेच न ॥ अष्टादशेहनितथावदंत्यन्येमनीषिणः ॥ दशम्यामतीतायामितिज्ञे यं ॥ आशौचापगमेनामधेयमितिविष्णूक्तेः **गृह्यपरिशिष्टेपि** जननाद्दशरा त्रेव्युष्टेशतरात्रे संवत्सरेवानामकरणं ॥ व्युष्टेतीते **ज्योतिर्निबन्धेगर्गः** अमासंक्रांतिविष्टद्यादौप्राप्तकालेपिनाचरेत् ॥ **श्रीधरः** मित्रादित्यमघोत्तराश ताभिषक्स्वातीधनिष्ठाच्युतप्राजेशाश्विशशांकपौष्णदिनकृत्पुष्येषुराशौस्थिरे॥ छिद्रांपंचदशींविहायनवमींशुद्धेष्टमेभार्गवज्ञाचार्यामृतपादभागदिवसेनामा निकुर्याच्छिशोः **मनुः** शर्मातंब्राह्मणस्यस्याद्वर्मातंक्षत्रियस्यतु । वैश्यस्यध नसंयुक्तं शूद्रस्यप्रेष्यसंयुतं **मदनरत्नेनारदीये** सूतक्रांतेनामकर्मविधेयं स्वकुलोचितं । नामपूर्वंतुमासस्यमंगलंसुसमाक्षरैः **तत्रैवगार्ग्यः** मासनाम गुरोर्नामद्यादाद्बालस्यवैपिता **स्मृतिसंग्रहे** कृष्णोनंतोच्युतश्चक्रीवैकुंठोथज नार्दनः । उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः ॥ योगीशःपुंडरीकाक्षोमासना मान्यनुक्रमात् ॥ अत्रमार्गशीर्षादिश्चैत्रादिर्वाक्रमइति **मदनरत्ने** तन्मास नामप्रथमंदद्यात्संबुध्यचैवहि । देवालयगजाश्वानांवृक्षाणांवापिकूपयोः ॥ स र्वापणानांपुण्यानांचिह्नार्थंयोषितांनृणां । काव्यानांचकवीनांचपश्वादीनांचस र्वशः ॥ राजप्रासादवास्तूनांनामकर्मविशिष्यते ॥ नाक्षत्रमपिनामकार्यं ॥ अ भिवादनीयंचसमीक्षेततन्मातापितरौविद्यातामोपनयनादित्याश्वलायनोक्तेः॥ कुलदेवतानक्षत्रसंबद्धं पितानामकुर्यादिति मदनरत्नेशंखोक्तेः तच्चनक्षत्रपा दाक्षराद्याक्षरंकुर्यादित्युक्तंपरिशिष्टे । तदक्षरादिकंनामयस्मिन्धिष्ण्येयदा

क्षरमिति **सुदर्शनभाष्येतु** रोरेममृज्येविषुवृद्धिरादौठांत्येचवांतेश्रवशाश्वयुक्षु ॥ शेषेषुनाम्वोःकपरःस्वरोंत्यःस्वाप्वारदीर्घःसविसर्गइष्टः ॥ इत्युक्तंठांत्येति प्रोष्ठपदेत्यत्रादौठात्परेचवृद्धिःप्रौष्ठपादइति ॥ अंत्यमपभरणीशब्दःश्रुतावुक्तः ॥ तत्रश्रवणादौचवादिवृद्धिः । अपभरणआपभरणइत्यादि **मदनरत्नेवसिष्ठः** जन्माहेद्वादशाहेवादशाहेवाविशेषतः । उत्तरारेवतीहस्तमूलपुष्यासवारुणाः ॥ श्रवणादितिमैत्रंचस्वातीमृगशिरस्तथा ॥ प्राजापत्यंधनिष्ठाचप्रशस्तानामकर्मणि **अथदोलारोहः** ॥ **पारिजातेबृहस्पतिः** दोलारोहस्तुकर्तव्योदशमेद्वादशेपिवा । षोडशेदिवसेवापिद्वाविंशेदिवसेपिवा **ज्योतिर्निबंधे** करत्रयेवैष्णवरेवतीषुदितिद्वयेवाश्विनकध्रुवेषु ॥ कुर्याच्छिशूनां नृपतेश्चतद्वदांदोलनंवैसुखिनोभवंति **तत्रैव** आंदोलाशयनेपुंसोद्वादशोदिवसःशुभः । त्रयोदशस्तुकन्यायाननक्षत्रविचारणा ॥ अन्यस्मिन्दिवसेचेत्स्यात्तिर्यगास्येप्रशस्यते **अथदुग्धपानम्** ॥ **नृसिंहः** एकत्रिंशद्दिनेचैवपयःशंखेनपाययेत् । अन्नप्राशननक्षत्रेदिवसोदयरात्रिषु **अथकर्णवेधःमदनरत्नेवसिष्ठश्रीधरौ** मासेषष्ठेसप्तमेवाष्टमेवाव्यौकर्णौद्वादशेषोडशेह्नि ॥ मध्येनाह्नःपूर्वभागेनरात्रौ नक्षत्रेद्वेद्वेतिथीवर्जयित्वा ॥ अत्रजन्ममासोवर्ज्यः **ज्योतिर्निबंधेगर्गः** मासषष्ठेसप्तमेवाप्यष्टमेमासिवत्सरे ॥ कर्णवेधंप्रशंसंति पुष्टयायुःश्रीविवृद्धये **मदनरत्ने** प्रथमेसप्तमेमासिअष्टमेदशमेथवा॥द्वादशेच तथाकुर्यात्कर्णवेधंशुभावहं **हेमाद्रौव्यासः** कार्तिकेपौषमासेवाचैत्रेवाफाल्गुनेपिवा ॥ कर्णवेधंप्रशंसंतिशुक्लपक्षेशुभेदिने **श्रीधरः** हरिहयकरचित्रासौम्यपौष्णोत्तरार्यादितिवसुषुघटालीसिंहवर्जेसुलग्ने ॥ शशिगुरुबुधकाव्यानांदिनेपर्वारिक्तारहिततिथिषुशुद्धेनैधनेकर्णवेधः **मदनरत्नेबृहस्पतिः** द्वितीयादशमीषष्ठीसप्तमीचत्रयोदशी । द्वादशीपंचमीशस्तातृतीयाकर्णवेधने । सौवर्णीराजपुत्रस्यराजतीविप्रवैश्ययोः । शूद्रस्यचायसीसूचीमध्यमाष्टांगुलात्मिका **हेमाद्रौदेवलः** कर्णरंध्रेरवेश्छायानविशेदग्रजन्मनः । तदृष्ट्वाविलयंयांतिपुण्यौघाश्चपुरातनाः **शंखः** अंगुष्ठमात्रसुषिरौकर्णौनभवतोयदि । तस्मै

श्राद्धंनदातव्यंदत्तंचेदासुरंभवेत् **अथतांबूलभक्षणं** ॥ चंडेश्वरःसार्धमासद्व येदद्यात्तांबूलंप्रथमांशिशोः ॥ कर्पूरादिकसंमिश्रंविलासायहितायच । मूला र्कचित्रकरतिष्यहरींद्रभेषुपौष्णेतथामृगशिरोदितिवासवेषु । अर्केन्दुजीवभृ गुबोधनवासरेषुतांबूलभक्षणविधिर्मुनिभिःप्रदिष्टः **अथनिष्क्रमणं ज्योति र्निबंधे** तृतीयेवाचतुर्थेवामासिनिष्क्रमणंभवेत् **यमः** ततस्तृतीयेकर्त्तव्यंमा सिसूर्यस्यदर्शनं । चतुर्थेमासिकर्तव्यंशिशोश्चंद्रस्यदर्शनं ॥ अत्रसूर्येंद्वोः कर्मणीयेचतयोःश्राद्धंनविद्यतइतिछंदोगपरिशिष्टात् छंदोगानांनिष्क्रमणेवृ द्धिश्राद्धंनास्तीतिकल्पतरुः **व्यासः** मैत्रेपुष्यपुनर्वसुप्रथमभेपौष्णेनुकूलेवि धौहस्तेचैवसुरेश्वरेचमृगभेतारासुशस्तासुच ॥ कुर्यान्निष्क्रमणंशिशोर्बुधगुरौ शुक्रेविरिक्तेतिथौ कन्याकुंभतुलामृगारिभवनेसौम्यग्रहालोकिते **मदनरत्ने** अन्नप्राशनकालेवाकुर्यान्निष्क्रमणक्रियां **विष्णुधर्मे** दिगीशानांदिनेतत्रतथा चंद्रार्कयोर्द्विजैः । पूजनंवासुदेवस्यगगनस्यचकारयेत् । बहिर्निष्कासयेद्गे हात्शंखपुण्याहनिःस्वनैः । चंद्रार्कयोर्दिगीशानांदिशांचगगनस्यच ॥ नि क्षेपार्थमिमंदद्मितेमेरक्षंतुसर्वदा ॥ अप्रमत्तंप्रमत्तंवा दिवारात्रमथापिवा॥रक्षंतु सततंसर्वेदेवाःशक्रपुरोगमाः **माधवीयेमार्कंडेयः** अग्रतोथप्राविन्यस्यशिल्प भांडानिसर्वशः । शस्त्राणिचैववस्त्राणितत:पश्येत्तुलक्षणं ॥ प्रथमंयत्स्पृशेद्बा लस्ततोभांडंस्वयंतदा ॥ जीविकातस्यबालस्यतेनैवतुभविष्यतीति **अथोप वेशनंप्रयोगपारिजातेपाद्मेविष्णुधर्मेच** पंचमेचतथामासि भूमौतमुपवेश येत् । तत्रसर्वेग्रहाःशस्ताभौमोप्यत्रविशेषतः ॥ उत्तरात्रितयंसौम्यपुष्यर्क्षंश क्रदैवतं । प्राजापत्यंचहस्तश्चशस्तमाश्विनमित्रभं ॥ वाराहंपूजयेद्देवंपृथिवीं चतथाद्विजं ॥ रक्षैनंवसुधेदेविसदासर्वगतंशुभे ॥ आयुःप्रमाणंसकलंनिक्षि पस्वहरिप्रिये । अचिरादायुषस्त्वस्ययेकेचित्परिपंथिनः ॥ जीवितारोग्यवि त्तेषुनिर्दहस्वाचिरेणतान् । वरेण्याशेषभूतानांमातात्वमसिकामधुक् ॥ अ जराचाप्रमेयाचसर्वभूतनमस्कृता ॥ चराचराणांभूतानांप्रतिष्ठानाव्ययाह्यसि ॥ कुमारंपाहिमातस्त्वं ब्रह्मातदनुमन्यतां **अथान्नप्राशनं** ॥ **पारिजातेना**

रुद्रः जन्मतोमासिषष्ठेस्यात्सौरेणान्नाशनंपरं । तदभावेष्टमेमासिनवमेदशमेपिवा ॥ द्वादशेवापिकुर्वीतप्रथमान्नाशनंपरं । संवत्सरेवासंपूर्णेकेचिदिच्छंतिपण्डिताः **मदनरत्नेलौगाक्षिः** षष्ठेन्नप्राशनंजातेषुदंतेषुवेति **शंखः** संवत्सरेन्नप्राशनमर्द्धसंवत्सरेवेति **ज्योतिर्निबंधेनारदः** षष्ठेवाप्यष्टमेमासिपुंसांस्त्रीणांतुपंचमे । सप्तमेमासिवाकार्यंनवान्नप्राशनंशुभं ॥ रिक्तांदिनक्षयंनंदांद्वादशीमष्टमीममां ॥ त्यक्त्वान्यतिथयःप्रोक्ताःसितजीवज्ञवासराः । चंद्रवारंप्रशंसंतिकृष्णेचांत्यत्रिकंविना **श्रीधरः** आदित्यतिष्यवसुसौम्यकरानिलाश्विचित्राजाविष्णुवरुणोत्तरपौष्णमित्राः । बालान्नभोजनविधौदशमेविशुद्धेछिद्रांविहायनवमींतिथयःशुभाःस्युः **वसिष्ठः** बालान्नभुक्तौव्रतबंधनेचराजाभिषेकेखलुजन्मधिष्ण्ये । शुभंत्वनिष्टंसततंविवाहेसीमंतयात्रादिषुमंगलेषु **मार्कंडेयविष्णुधर्मयोः** ब्रह्माणंशंकरंविष्णुंचंद्रार्कौचदिगीश्वरान् । भुवंदिशश्चसंपूज्यहुत्वावह्नौतथाचरुं ॥ देवतापुरतस्तस्यधाज्युत्संगगतस्यच । अलंकृतस्यदातव्यमन्नंपात्रेसकांचनं ॥ मध्वाज्यदधिसंयुक्तंप्राशयेत्पायसंतुवेति **अथाब्दपूर्तिः** ॥ **व्यवहारनिर्णये** नवांबरधरोभूत्वापूजयेच्चचिरायुषं । मार्कंडेयंनरोभक्त्य पूजयेत्प्रयतस्तथा ॥ ततोदीर्घायुषंव्यासं रामंद्रौणिंकृपं बलिं । प्रह्लादंचहनूमंतंविभीषणमथार्चयेत् ॥ स्वनक्षत्रंजन्मतिथिंप्राप्यसंपूजयेन्नरः । षष्ठींचदधिभक्तेन वर्षेवर्षेपुनःपुनः ॥ तिथितत्त्वेएतन्नामभिस्तिलहोमोप्युक्तः **आदित्यपुराणे** सर्वैश्चजन्मदिवसेस्नातैर्मङ्गलवारिभिः । गुरुदेवाग्निविप्राश्चपूजनीयाःप्रयत्नतः ॥ स्वनक्षत्रंचपितरौतथादेवःप्रजापतिः । प्रतिसंवत्सरंयत्नात्कर्त्तव्यश्चमहोत्सवः **कृत्यचिंतामणौ** गुडदुग्धतिलान्दद्याद्धस्तेग्रंथौचबन्धयेत् । गुग्गुलंनिंबसिद्धार्थदूर्वागोरोचनादिकं ॥ संपूज्य भानुविघ्नेशौमहर्षीन्प्रार्थयेदिदं । चिरंजीवीयथात्वंभोभविष्यामितथामुने ॥ रूपवान्वित्तवांश्चैवश्रिययायुक्तश्चसर्वदा । मार्कंडेयनमस्तेस्तुसप्तकल्पांतजीवन ॥ आयुरारोग्यसिद्ध्यर्थंप्रसीदभगवन्मुने । चिरजीवीयथात्वंतुमुनीनां प्रवरद्विज ॥ कुरुष्वमुनिशार्दूलतथामांचिरजीविनं ॥ मार्कंडेयमहाभागस

सप्तकल्पांतजीवन ॥ आयुरारोग्यसिद्ध्यर्थमस्माकंवरदोभव । सतिलंगुड संमिश्रमंजल्यर्घमितंपयः ॥ मार्कंडेयाद्वरंलब्ध्वापिबाम्यायुर्विवृद्धये ॥ इतिपयःपिबेत् **तिथितत्त्वेस्कांदे** खंडनंनखकेशानांमैथुनाध्वगमौतथा।आमिषं कलहंहिसांवर्षवृद्धौविवर्जयेत् **तत्रैवदीपिकायां** कृतांतकुजयोर्वीरे यस्यजन्मतिथिर्भवेत् । अनृक्षयोगसंप्राप्तौविघ्नस्तस्यपदेपदे ॥ कृतांतःशनिः ॥ तस्य सर्वौषधिस्नानंगुरुदेवाग्निपूजनं **वृद्धमनुः** मृतेजन्मनिसंक्रांतौश्राद्धेजन्मदिनेतथा।अस्पृश्यस्पर्शनेचैवनस्नायादुष्णवारिणा॥अत्रजन्मतिथिरौदयिकीग्राह्या युगाद्यावर्षवृद्धिश्चसप्तमीपार्वतीप्रिया ॥ रवेरुदयमीक्षंतेनतत्रतिथियुग्मतेतिकृत्यतत्त्वार्णवेवचनात् ॥ विशेषोमत्कृतशूद्रधर्मेज्ञेयः**अथकटिसूत्रं** ॥ **प्रयोगपारिजातेब्राह्मे** प्रतिसंवत्सरांतर्क्षेवक्ष्येनृणांविधिंपरं ॥ दत्वागोभूहिरण्यादितथा स्वर्णादिनिर्मितं ॥ बध्नीयात्कटिसूत्रंचवासःसंगृह्यनूतनं। दूर्वाकुरैरथाज्येनचरुणावापिनाविनं । आयुष्यहोमंकृत्वाचतर्पयेत्पितृदेवताः **अथचौलं** ॥ **प्रयोगपारिजातेषड्गुरुशिष्यः** जाताधिकाराज्जन्मादित्रितेब्देतुचौलकं । आद्येब्देकुर्वतेकेचित्पंचमेब्देद्वितीयके ॥ उपनीत्यासहैवेतिविकल्पाःकुलधर्मतः **बृहस्पतिः** तृतीयेब्देशिशोर्गर्भाज्जन्मतोवाविशेषतः॥पंचमेसप्तमेवापिस्त्रियापुंसोपिवासमं **तत्रैवनारदः** जन्मतस्तुतृतीयेब्देश्रेष्ठमिच्छंतिपंडिताः ॥ पंचमेसप्तमेवापिजन्मतोमध्यमंभवेत् ॥ अधमंगर्वतस्यात्तुनवमैकादशेपिवेति **पारिजातेबृहस्पतिः** उत्तरायणगेसूर्येविशेषात्सौम्यगोलके ॥ शुक्लपक्षेशुभं प्रोक्तंकृष्णपक्षेशुभेतरम् । अशुभान्यत्रिभागःस्यात्कृष्णपक्षेत्रिधाकृते **तत्रैववसिष्ठः** द्वित्रिपंचमसप्तम्यामेकादश्यांतथैवच । दशम्यांचत्रयोदश्यांकार्यं क्षौरंविजानता **नृसिंहीये** षष्ठ्यष्टमीचतुर्थीचनवमीचचतुर्दशी । द्वादशीदर्शपूर्णेद्वेप्रतिपच्चैवनिंदिताः **वासिष्ठः** रवेरंगारकस्यैवसूर्यपुत्रस्यचैवहि । निंदितादिवसाःक्षौरेशेषाःकार्यकराःस्मृताः **ज्योतिर्निबंधेबृहस्पतिः** पापग्रहाणांवारादौविप्राणांशुभदंरवौ॥क्षत्रियाणांतमासूनौविट्शूद्राणांशनौशुभं ॥ हस्ताश्विविष्णुपौष्णाश्चश्रविष्ठादित्यपुष्यभं । सौम्यचित्रेनवक्षौरेउत्तमानवतारकाः

॥ त्रीण्युत्तराणिवायव्यंरोहिणीवारुणंतथा । क्षौरेषण्मध्यमाःप्रोक्ताःशेषाद्वादशगर्हिताः ॥ निधनेजन्मनक्षत्रेवैनाशेचंद्रमेष्टमे । विपत्करेवधेक्षौरंप्रत्यरेचविवर्जयेत् ॥ अत्रलग्नशुद्धिरन्येचयोगाज्योतिर्विद्भ्योज्ञेयाः । अन्येचविशेषःश्मश्रुकर्मनिर्णयेवक्ष्यंते ॥ एतच्चशिशोर्मातरिगर्भिण्यांनकार्यम् **तदाह ज्योतिर्निबंधेमदनरत्नेचवृद्धगार्ग्यः** पुत्रचूडाकृतौमातायदिसागर्भिणीभवेत् । शस्त्रेणमृत्युमाप्नोतितस्मात्क्षौरंविवर्जयेत् ॥ अस्यापवादमाहतत्रैवनारदः ॥ सूनोर्मातरिगर्भिण्यांचूडाकर्मनकारयेत् पंचाब्दात्प्रागयोर्ध्वन्तु गर्भिण्यामपिकारयेत् ॥ यदिगर्भविपत्तिःस्याच्छिशोर्वामरणेयदि । सहोपनीत्याकुर्याच्चेत्तदादोषोनविद्यते **बृहस्पतिः** गर्भिण्यांमातरिशिशोःक्षौरकर्मनकारयेत् । व्रताभिषेकेप्येवंस्यात्कालोबेदव्रतेष्वपि ॥ अभिषेकःसमावर्तनं ॥ गर्भिण्यामपिपंचमासपर्यंतंनदोषइत्युक्तं **मुहूर्तदीपिकायांगर्गेण** पंचममासादूर्ध्वंमातुर्गर्भस्थजायतेमृत्युरिति **मदनरत्नेबृहस्पतिः** पुत्रचूडाकृतौमातागर्भिणीयदिवाभवेत् । विपद्यतेगुरुस्तत्रदंपतीशिशुरब्दतः ॥ गर्भमातुःकुमारस्यनकुर्याच्चौलकर्मतु॥ पंचमासादधःकुर्यादतऊर्ध्वंनकारयेत् **गर्गः** ज्वरस्योत्पादनंयस्यलग्नंतस्यनकारयेत् । दोषनिर्गमनात्पश्चात्स्वस्थोधर्मसमाचरेत् ॥ लग्नमितिमंगलोपलक्षणम् **ज्योतिर्गर्गः** विवाहोत्सवयज्ञेषुमाता यदिरजस्वला । तदासमृत्युमाप्नोतिपंचमंदिवसंविना **वसिष्ठः** यस्यमांगलिकंकार्यंतस्यमातारजस्वला । अर्धंतदेव **तत्रैवबृहस्पतिः** प्राप्तमभ्युदयश्राद्धं पुत्रसंस्कारकर्माणि ॥ पत्नीरजस्वलाचेत्स्यान्नकुर्यात्तत्पितातदा ॥ पितेतिकर्तृमात्रोपलक्षणं **संकटेतुवाक्यसारेउक्तं** अलाभेसुमुहूर्तस्यरजोदोषेष्वुपस्थिते । श्रियंसंपूज्यविधिवत्ततोमंगलमाचरेत् ॥ एतच्चमंडनोत्तरंनकार्यं ॥ नमंडनाच्चापिहिमुंडनंचगोत्रैक्यतायांयदिनाब्दभेदइतिमदनरत्नेवासिष्ठोक्तेः **तत्रैवकात्यायनः** कुलेऋतुत्रयादर्वाङ् मण्डनान्नतुमुंडनं ॥ प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंगलत्रयम् **तथावृद्धमनुः** एकमातृजयोरेकवत्सरेपुरुषस्त्रियोः । नसमानक्रियांकुर्यान्मातृभेदेविधीयते **आशौचेतुसंग्रहे** संकटेसमनुप्राप्ते

सूतकेसमुपागते । कूष्मांडाभिर्घृतंहुत्वागांचदद्यात्पयस्विनीं ॥ चूडोपनय नोद्वाहप्रतिष्ठादिकमाचरेदिति **ज्योतिर्निबंधे** षष्ठेब्देषोडशेवर्षेविवाहाब्दे तथैवच । अंतर्वत्न्यांचजायायांनेष्यतेमुंडनंक्वचित् ॥ अन्योपिविशेषोविवा हप्रकरणेवक्ष्यते **दीपिकायां** नचूडाजन्मभाग्नेयदारुणेषुशनौकुजे ॥ प्रति पद्भद्ररिक्तासुविद्यारंभस्तुपंचमे **प्रयोगरत्ने** मध्येशिरसिचूडास्याद्वाशिष्ठाना तुदक्षिणे । उभयोःपार्श्वयोरत्रिकश्यपानांशिखामता ॥ माधवीयेप्येवं ॥ आ पस्तंबस्त्वाह ॥ तूष्णींकेशान्विनीययथर्षिशिखानिदधाति ॥ यथर्षिप्रवरसं ख्ययातासांमध्यशिखावर्जमुपनयनेवपनंकार्यं ॥ प्रतिदिशंप्रवपतीत्युपनय नेतेनैवोक्तेःरिक्तोवाएषोनपिहितोयन्मुंडस्तस्मैतदपिधानंयच्छिखेतिश्रुतेः ॥ विशिखोव्युपवीतश्चयत्करोतिनसत्कृतमितिनिषेधाच्च । सत्रेतुवचनात्साशि खंवपनमितिसुदर्शनभाष्येउक्तं **यत्तु** कुमाराविशिखाइवेतिलिंगंतच्छंदोगपरं **अपरार्केमदनरत्नेचलौगाक्षिः** दक्षिणतः कमुंजावसिष्ठानामुभयतोत्रिक श्यपानांमुंडाभृगवः।पंचचूडाअंगिरसोवाजिमेके । मंगलार्थंशिखिनोऽन्येयथा कुलधर्मंवेति ॥ कमुंजाशिखा । वाजिःकेशपंक्तिः **स्मृतिदर्पणे** एकाशिखाद क्षिणतोवसिष्ठगोत्रस्यपंचांगिरसोभृगोस्तु ॥ नैकाशिखाकश्यपगोत्रजानाशि खोभयत्रापियथाकुलंच ॥ एतच्छूद्रातिरिक्तविषयंशूद्रस्यानियताःकेशवेषाइ तिवसिष्ठोक्तेः। **यत्तुपाद्मे** नशिखीनोपवीतीस्यान्नोच्चरेत्संस्कृतांगिरमितिशूद्रमु पक्रम्योक्तंतदसच्छूद्रस्येतिकेचित् ॥ विकल्पइतितुयुक्तं **अतएवहारितः** स्त्री शूद्रौतुशिखांछित्वाक्रोधाद्वैराग्यतोपिवा ।प्राजापत्यंप्रकुर्यातांनिष्कृतिर्नान्यथा भवेत् ॥ एततपरिग्रहपक्षे ॥ अत्रदेशभेदाद्व्यवस्थेतिदिक् **ज्योतिर्निबंधे** नर्मदोत्तरदेशेतुसिंहस्थेदेवमंत्रिणि ॥ शुभकर्मनकुर्वीतनिषेधोनास्तिदक्षिणे **अत्रभोजनेप्रायश्चित्तमुक्तंपराशरमाधवीये** निवृत्तेचूडहोमेतुप्राङ्नामक रणात्तथा । चरेत्सांतपनंभुक्त्वाजातकर्मणिचैवहि । अतोन्येषुतुसंस्कारेषूप वासेनशुद्ध्यति । एतेसंस्काराःस्त्रीणाममंत्रकाःकार्याः । होमस्तुसमंत्रकइ तिप्रयोगपारिजाते **आश्वलायनोपि** होमकृत्यंतुपुंवत्स्यात्स्त्रीणांचूडाकृता

वर्षीति **मनुरपि** अमंत्रकातुकार्येयंस्त्रीणामावृदशेषतइति । होमोप्यमंत्रक इत्येकेसंस्काराः । स्त्रीणामहोमकास्तूष्णींस्युरितिस्मृत्यर्थसारेहोमोनेतिवृत्तिकृतः **अथविद्यारंभःमदनरत्नेनृसिंहः** अक्षरस्वीकृतिंकुर्यात्प्राप्तेपंचमहायने । उत्तरायणगेसूर्येकुंभमासंविवर्जयेत् ॥ **दीपिकायाम्** वर्षेपर्जन्यकेकालेषष्ठीरिक्तांशनिकुजं । अनध्यायान्विनानत्वादेवंग्रन्थकृतंगुरुं **श्रीधरः** हस्तादित्यसमीरामित्रपुरुजित्पौष्णाश्विचित्राच्युतेष्वाराक्र्यंशादिनोदयाद्विरहितेरा शौस्थिरेचोभये ॥ पक्षेपूर्णनिशाकरेप्रतिपदंरिक्तांविहायाष्टमींषष्ठीमष्टमशुद्ध भाजिभवनेप्रोक्ताक्षरस्वीकृतिः **विष्णुधर्मोत्तरे** पूजयित्वाहरिंलक्ष्मींतथादेवींसरस्वतीं । स्वविद्यासूत्रकारांश्चस्वांयिद्यांचविशेषतः ॥ एतेषामेवदेवानां नाम्नातुजुहुयाद्धृतम् । दक्षिणाभिर्द्विजेंद्राणांकर्तव्यंचात्रपूजनमिति अथधनुर्विद्यादीपिकायां अदितिगुरुयमार्केस्वातिचित्राग्निपित्र्यध्रुवहरिवसुमूलेष्विंदुभागांत्यभेषु । शनिशशिबुधवारेविष्णुबोधेपिपौषेसुसमयतिथियोगेचापविद्याप्रदानं ॥ अथानुपनीतस्यविशेषः **गौतमः**प्रागुपनयनात्कामचारवादभक्षाइति । भक्षणंलशुनादेरपीतिहरदत्तः **अपरार्केवृद्धशातातपः** शिशोरभ्युक्षणंप्रोक्तंबालस्याचमनंस्मृतं । रजस्वलादिसंस्पर्शेस्नानमेवकुमारके । प्राक्चूडाकरणाद्बालःप्रागन्नप्राशनाच्छिशुः । कुमारकस्तुविज्ञेयोयावन्मौंजीनिबंधनं **आपस्तंबोपि** अन्नप्राशनात्प्रयतोभवत्यासंवत्सरादित्येकेइति ॥ गौतमोपि नतदुपस्पर्शनादाशौचम् । तस्यानुपनीतस्यचंडालादिस्पृष्टस्यापि स्पर्शान्नस्नानं । इदंचषष्ठवर्षात्प्राक्ऊर्ध्वंतुस्नानंभवत्येवबालस्यपंचमाद्वर्षाद्रक्षार्थंशौचमाचरेदितिस्मृतेः ॥ कामचारादिकेप्येवं । ऊनैकादशवर्षस्यपंचवर्षात्परस्यच । चरेद्गुरुःसुहृच्चैवप्रायश्चित्तंविशुद्धये ॥ अतोबालतरस्यास्यनापराधोनपातकमितिस्मृतेरितिहरदत्तः । स्मृत्यर्थसारेप्येवं ॥ **अथोपनयनं आश्वलायनः** गर्भाष्टमेष्टमेवाब्देपंचमेसप्तमेपिवा ॥ द्विजत्वंप्राप्नुयाद्विप्रोवर्षेत्वेकादशेनृपः **मनु** ब्रह्मवर्चसकामस्यकार्यविप्रस्यपंचमे ॥ राज्ञोबलार्थिनःषष्ठेवैश्यस्यार्थार्थिनोष्टमे **विष्णुः** षष्ठेतुधनकामस्यविद्याकामस्यस

समे । अष्टमेसर्वकामस्यनवमेकांतिमिच्छतः ॥ आपस्तंबः ॥ गर्भाष्टमेषुब्राह्मणमुपनयति । बहुवचनंगर्भषष्ठगर्भसप्तमयोःप्राप्त्यर्थमितिसुदर्शनभाष्ये । केचित्तु विप्रस्यषष्ठंनमन्यंते ॥ आपस्तंबःअथकाम्यानिसप्तमे ब्रह्मवर्चसकाममष्टमआयुष्कामं नवमेतेजस्कामंदशमेऽन्नाद्यकाममेकादशइंद्रियकामं द्वादशेपशुकाममुपनयेत् **गौणकालमहामनुः** आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्तते । आद्द्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः **ज्योतिर्निबंधे** अग्रजाबाहुजावैश्याःस्वावधेरूर्ध्वमब्दतः । अकृतोपनयाःसर्वेवृषलाएवते स्मृताः **गर्गः** विप्रंवसंतेक्षितिपंनिदाघेवैश्यंघनांतेव्रतिनंविदध्यात् ॥ माघादिशुक्लांतिकपंचमासाः साधारणावासकलद्विजानां **हेमाद्रौज्योतिषे** माघादिषुचमासेषु मौंजीपंचसुशस्यते **कालादर्शे वृद्धगार्ग्यः** माघादिमासषट्केतुमेखलाबंधनंमतं ॥ चूडाकरणमन्नेचश्रावणादौविवर्जयेत् ॥ मैत्रेयसूत्रेपि ॥ वसंतोग्रीष्मःशरदित्यृतवोवर्णानुपूर्व्वेणमाघादिषण्मासावा सर्ववर्णानामेतदुदगयनमनयोर्विकल्पइति ॥ अत्रेदंतत्त्वं ॥ नात्रवसंतेनोत्तरायणस्यसंकोचःश्राद्धदर्शस्यापराह्णेविधिनैवाधानेवसंतादेः । कृत्तिकादिनेवसायंप्रातर्विधिनायावज्जीवविधेरिवयुक्तः । आद्ययोः परस्परव्यभिचारान्नियमः । अत्येनिमित्तेसांगकर्मोक्तेःकालापेक्षा ॥ इहतूत्तरायणंविनावसंतस्याभावान्नानियमःनवानिमित्तत्त्वं । नचैकंवृणीतइतिवदवयुत्यानुवादःतद्वद्वाक्यभेदापरिहारात् । उत्तरायणविधिवैयर्थ्यात्त्वनुकल्पोयमिति । माघआदिर्येषांपंचानांएवंषट् **पारिजातेबृहस्पतिः** झषचापकुलीरस्थोजीवोप्यशुभगोचरःअतिशोभनतांदद्याद्विवाहोपनयादिषु **वृत्तशते** नजन्मधिष्ण्येनचजन्ममासेनजन्मकालीयदिनेविदध्यात् । ज्येष्ठेनमासिप्रथमस्यसूनोस्तथासुतायाअपिमंगलानि **राजमार्तंडः** जातंदिनंदूषयतेवसिष्ठोह्यष्टौचगर्गोनियतंदशात्रिः । जातस्यपक्षंकिलभागुरिश्चशेषाःप्रशस्ताःखलुजन्ममासि । जन्ममासेतिथौभेचविपरीतदलेसति । कार्यमंगलमित्याहुर्गर्गभार्गवशौनकाः । जन्ममासनिषेधेपिदिनानिदशवर्जयेत् । आरभ्यजन्मदिवसाच्छुभा

स्युस्तिथयोपरे ग्रंथांतरे व्रतेजन्मत्रिखारिस्थोजीवोपिष्टोऽर्चनात्सकृत् । शु भोतिकालेतुर्याष्टव्ययस्थोद्विगुणार्चनात् । शुद्धिर्नैवगुरोर्यस्यवर्षेप्राप्तेऽष्टमेय यदि । चैत्रेमीनगतेभानौतस्योपनयनंशुभं । जन्मभादष्टमेसिंहेनीचेवाशत्रु भेगुरौ । मौंजीबंधःशुभःप्रोक्तश्चैत्रेमीनगतेरवौ नारदः बालस्यबलहीनो पिशांत्याजीवोबलप्रदः ॥ यथोक्तवत्सरेकार्यमनुक्तेचोपनायनं । शांतिश्चाग्रेव क्ष्यते ज्योतिर्निबंधेनृसिंहः तृतीयापंचमीषष्ठीद्वितीयाचापिसप्तमी । पक्ष योरुभयोश्चैवविशेषेणसुपूजिताः ॥ धर्मकामौसितेपक्षेकृष्णेचप्रथमातथा ॥ शुक्लत्रयोदशींकेचिदिच्छंतिमुनयस्तथा टोडरानंदेवसिष्ठः नैमित्तिकमन ध्यायंकृष्णेचप्रतिपद्दिनम् । मेखलाबंधनेशस्तंचौलेवेदव्रतेष्वपि । प्रशस्ता प्रतिपत्कृष्णेनपूर्वापरसंयुता ॥ एतदतीतकालस्यार्तस्यबटोरुपनयनविषय म् । प्रशस्ताप्रतिपत्कृष्णेकदाचिच्छुभगेविधौ ॥ चंद्रेबलयुतेलग्नवर्षाणामपि लंघनइतिव्यासोक्तेरित्याहुः । एवंसप्तम्यपि । तस्यागलग्रहत्वोक्तेः बृहस्प तिः शुक्लपक्षःशुभःप्रोक्तःकृष्णश्चांत्यात्रिकंविना तथा मिथुनेसंस्थितेभानौ ज्येष्ठमासोनदोषकृत् मदनरत्नेनारदः विनर्तुनावसंतेनकृष्णपक्षेगलग्रहः। अपराह्णेचोपनीतःपुनःसंस्कारमर्हति ॥ अपराह्णेस्त्रिधाविभक्तदिनतृतीयांशइ त्युक्तं ॥ तत्रैव ॥ वसंतेगलग्रहोनदोषायेत्यर्थः नारदः कृष्णपक्षेचतुर्थींच सप्तम्यादिदिनत्रयम् । त्रयोदशीचतुष्कंचअष्टावेतेगलग्रहाः वसिष्ठः पापा शकगतेचंद्रेअरिनीचस्थितेपिच । अनध्यायेचोपनीतःपुनःसंस्कारमर्हति । अ नध्यायस्यपूर्वेद्युस्तस्यचैवापरेहनि । व्रतबंधंविसर्गंचविद्यारंभंनकारयेत् रा जमार्त्तंडः आरंभानंतरंयत्रप्रत्यारंभोनासिद्ध्यति । गर्गादिमुनयःसर्वेतमेवा हुर्गलग्रहम् ज्योतिर्निबंधे अष्टकासुचसर्वासुयुगमन्वंतरादिषु ॥ अनध्या यंप्रकुर्वीततथासोपपदास्वपि सोपपदास्तुस्मृत्यर्थसारे सिताज्येष्ठेद्वितीया चआश्विनेदशमीसिता ॥ चतुर्थीद्वादशीमाघेएताः सोपपदाःस्मृताःएवंप्रदो षस्वरूपमाहगोभिलः षष्ठीचद्वादशीचैवअर्धरात्रोननाडिका । प्रदोषमिह कुर्वीततृतीयातुनयामिका ज्योतिर्निबंधेव्यासः याचैत्रवैशाखसितातृतीया

माघस्यसप्तम्यथफाल्गुनस्य । कृष्णेतृतीयोपनयेप्रशस्ताप्रोक्ताभरद्वाजमुनींद्रमुख्यैः ॥ अत्रापिकृष्णप्रतिपज्ज्ञेयम् **यत्तुबृहद्गार्ग्यः** अनध्यायेप्रकुर्वीतयस्तुनैमित्तिकोभवेत् । सप्तमीमाघशुक्लेतुतृतीयाचाक्षयातथा । बुधत्रयेंदुवाराश्वशस्तानिव्रतबंधनइतितत्प्रायश्चित्तार्थोपनयनविषयम् ।स्वाध्यायवियुजोघस्राकृष्णप्रतिपदादयः । प्रायश्चित्तनिमित्तेतुमेखलाबंधनेमताइतितेनैवोक्तरितिनिर्णयामृतकालादर्शौ । यद्यप्यथोपेतपूर्वंस्येत्युक्त्वाअनिरुक्तंपरिदानंकालश्चेत्याश्वलायनेनपुनरुपनयनेकालानियमउक्तस्तथापि निमित्तांतरमेवसः । तदानीमकरणेतुपूर्वोक्तकालोज्ञेयःप्रतिवेदमुपनयनेकालानियमइतितुयुक्तम् **गर्गः** ग्रहेरवींद्वोरवनिप्रकंपेकेतूद्गमोल्कापतनादिदोषे । व्रतेदशाहानिवदंतितज्ज्ञास्त्रयोदशाहानिवदंतिकेचित् **संकटेतुचंडेश्वरः** दाहेदिशांचैवधराप्रकंपेवज्रप्रपातेथविदारणेच ॥ केतौतथोल्कांशुकणप्रपातेन्यहंनकुर्याद्व्रतमंगलानि **तत्रैव** वेदव्रतोपनयनेस्वाध्यायाध्ययनेतथा । नदोषोयजुषांसोपपदास्वध्ययनेपिच **हेमाद्रौज्योतिषे** हस्तत्रयेपुष्यधनिष्ठयोश्चपौष्णाश्विसौम्यादितिविष्णुभेषु ।शस्तेतिथौचंद्रबलेनयुक्तेकार्यौद्विजानांव्रतबंधमोक्षौ **ज्योतिर्निबंधेनारदः** श्रेष्ठांत्यर्कत्रयांत्येज्यचंद्रादित्युत्तराणिच ॥ विष्णुत्रयाश्विमित्राब्जेयोनिभात्युपनायने **बृहस्पतिः** त्रिपूत्तरेषुरोहिण्यांहस्तमैत्रेचवासवे ।त्वाष्ट्रेसौम्यपुनर्वस्वोरुत्तमंह्युपनायनम् **ज्योतिर्निबंधे** पूर्वाहस्तत्रयेसार्पश्रुतिमूलेषुबह्वृचां । यजुषांपौष्णमैत्रार्कादित्यपुष्यमृदुध्रुवैः॥सामगानांहरीशाकवसुपुष्योत्तराश्विभैः।धनिष्ठादितिमैत्रार्केष्विंदुपौष्णेष्वथर्वणां **राजमार्तंडस्तु ब्राह्मणस्यपुनर्वसुंनिषेधयति** ताराचंद्रानुकूलेषुग्रहाब्देषुशुभेष्वपि ॥ पुनर्वसौकृतोविप्रःपुनःसंस्कारमर्हति **ज्योतिर्निबंधेनारदः** सर्वेषांजीवशुक्रज्ञवाराःप्रोक्ताव्रतेशुभाः ॥ चंद्रार्कौमध्यमौज्ञेयौसामबाहुजयोःकुजः॥शाखाधिपतिवारश्चशाखाधिपबलंतथा ॥ शाखाधिपतिलग्नंचदुर्लभंत्रितयंव्रते **शाखाधिपाश्चरत्नसंग्रहे** ऋगथर्वसामयजुषामधिपागुरुभौमसिताः । जीवसितौविप्राणांक्षत्रस्यारोष्णगूविशांचंद्रेइति **पारिजातेबृहस्पतिः** बह्वृचानांगुरोर्वारेयजु

र्वेदजुषांबुधे॥सामगानांधरासूनोरथर्वविदुषांरवेःअत्रलग्नशुद्ध्यादिदैवज्ञेभ्योज्ञे यम् विस्तरभयान्नोच्यते **लल्लः** व्रतेह्निपूर्वसंध्यायांवारिदोयदिगर्जति ॥ तद्दि नेस्यादनध्यायोव्रतंतत्रविवर्जयेत् **ज्योतिर्निबंधे** नांदीश्राद्धंकृतंचेत्स्यादन ध्यायस्त्वकालिकः । तदोपनयनंकार्यंवेदारंभंनकारयेत् । एतद्बह्वृचाति रिक्तानां । तेषांतद्दिनेवेदारंभाभावात् । अतस्तेषामुपनयनंनभवत्येव । ऐ तरेयोपनिषदि । मृगादिज्येष्ठांतंवर्षर्तुः । तंविनावर्षादौत्रिरात्रमनध्यायइति वेदभाष्येउक्तं । एतच्चप्रातस्तनितेसायंस्तनितेतुदिवैवचरुंश्रपयित्वासायंस न्ध्योत्तरहोमंकुर्यात् । नसंध्यागर्जितेकालेनवृष्ट्युत्पातदूषिते । ब्रह्मौदनंप चेदग्नौपक्वंचेन्ननिवर्तते । ब्रह्मौदनंपचेदग्नौपक्वमन्नंनदुष्यतीतिसंग्रहोक्तेरिति प्रयोगरत्नेभट्टचरणाः **अत्रशांतिरप्युक्तानृसिंहप्रसादे** ब्रह्मौदनविधेःपूर्व प्रदोषेगर्जितंयदि ॥ तदाविघ्नकरंज्ञेयंबटोरध्ययनस्यतत् तस्यशांतिप्रकारंतु वक्ष्येशास्त्रानुसारतः ॥ प्रधानंपायसंसाज्यंद्रव्यंशांतियजौभवेत् । सूक्तंबृह स्पतेर्विद्वान्पठेत्प्रज्ञाविवृद्धये ॥ गायत्रीचैवमंत्रःस्यात्प्रायश्चित्तंतुसर्पिषा । धेनुंसवत्सकांदद्यादाचार्यायपयस्विनीं । ब्राह्मणान्भोजयेत्पश्चात्ततोब्र ह्मौदनंचरेत् **उपनयनेचाधिकारिणः माधवीयेवृद्धमनुनोक्ताः** पि तापितामहोभ्राताज्ञातयोगोत्रजाग्रजाः । उपायनेधिकारीस्यात्पूर्वाभावेपरः परः **प्रयोगरत्ने** पितैवोपनयेत्पुत्रंतदभावेपितुःपिता । तदभावेपितुर्भ्रातात दभावेतुसोदरः । पितेतिविप्रपरंनक्षत्रियादेः ॥ तेषांपुरोहितएव । उपनयनस्य दृष्टार्थत्वात् । तेषांचाध्यापनेऽनधिकारात् । अत्रपितृव्यस्यज्जेष्ठभ्रात्रभावे धिकारः । असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैरितियाज्ञवल्क्योक्तेः । तेनेदमविभक्तपरं । पूर्वंतुविभक्तपरं । मातूरजोदोषेतुप्रागुक्तं अथषंढमूकादी नांविशेषः **प्रयोगपारिजातेब्राह्मे** ब्राह्मण्यांब्राह्मणाज्जातोब्राह्मणःसइति श्रुतिः । तस्माच्चषंढबधिरकुब्जवामनपंगुषु ॥ जडगद्गदरोगार्तशुष्कांगवि कलांगिषु । मत्तोन्मतेषुमूकेषुशयनस्थेनिरिंद्रिये । ध्वस्तपुंस्त्वेषुचैतेषुसं स्काराःस्युर्यथोचितं । मत्तोन्मत्तोनसंस्कार्याविति केचित्प्रचक्षते । कर्मस्व

नधिकाराच्चपातित्यंनास्तिचैतयोः ॥ तदपत्यंचसंस्कार्यमपरेत्वाहुरन्यथा । संस्कारमंत्रहोमादीन्करोत्याचार्यएवतु । उपनेयांश्चविधिवदाचार्यस्यसमीपतः ॥ आनीयाग्निसमीपंवासावित्रींस्पृश्यवाजपेत् । कन्यास्वीकरणादन्यत्सर्वंविप्रेणकारयेत् ॥ एवमेवद्विजैर्जातौसंस्कार्यौकुंडगोलकौइति ॥ स्मृत्यर्थसारेप्येवं ॥ कुंडगेलोकयोःसंस्कार्यत्वंश्राद्धेनिषेधश्चक्षेत्रजपुत्रविषयः । अन्यस्यविन्नास्वेषविधिःस्मृतइतिवचनात् । अब्राह्मण्येनोपनयनाद्यप्राप्तेरित्यपरार्कः । उपनयनंचकुमारंभोजयित्वाकार्यम् । प्रागेवैनंतदहर्भोजयंतीतिमदनपारिजातेगोभिलोक्तेः । गायत्र्युपदेशश्चोत्तरतोग्नेःकार्यः । उत्तरेणाग्निमुपविशतः । प्राङ्मुखआचार्यः । प्रत्यङ्मुखइतरोऽधीहिभोइतिशांखायनसूत्रोक्तेः ॥ यद्यपिकात्यायनेनाथास्मैसावित्रीमन्वाहोत्तरतोग्नेःप्रत्यङ्मुखायेत्युक्त्वादक्षिणतस्तिष्ठतआसीनायवैकेइति विकल्पउक्तस्तथापिकातीयानामेवसः । बह्वृचनांतूत्तरएववेदैक्यात् **भिक्षायांविशेषमाहकात्यायनः** मातरमेवाग्रेभिक्षेत् **पराशरमाधवीये** मातरंवास्वसारंवामातुर्वाभगिनींनिजाम् । भिक्षेतभिक्षांप्रथमंयाचैनंनविमानयेत् **अथसंस्कारलोपेशौनकः** आरभ्याधानमाचौलात्कालेऽतीतेतुकर्मणां । व्याहृत्याग्निंसुसंस्कृत्यहुत्वाकर्मयथाक्रमम् । एतेष्वेकैकलोपेतुपादकृच्छ्रंसमाचरेत् । चूडायामर्धकृच्छ्रस्यादापदित्वेवमीरितं ॥ अनापदितुसर्वत्राद्विगुणंद्विगुणंचरेत् **पारिजातेकात्यायनः** लुप्तेकर्मणिसर्वत्रप्रायश्चित्तंविधीयते । प्रायश्चित्तकृतेपश्चाल्लुप्तंकर्मसमाचरेत् **स्मृत्यर्थसारेचैवं कारिकायांतु** प्रायश्चित्तेकृतेऽतीतेकर्मकृताकृतमित्युक्तं । प्रायश्चित्तकृतेपश्चादतीतमपिकर्मवै । कार्यमित्येकआचार्यानेत्यन्येतुविपश्चितइति । त्रिकांडमंडनेतु कालातीतेषुकार्येषुप्राप्तवत्स्वपरेषुच । कालातीतानिकृत्वैवविदध्यादुत्तराणितु । तत्रसर्वेषांतंत्रेणनांदीश्राद्धंकुर्यात् । देशकालकर्त्रैक्यात्गणशःक्रियमाणांमातॄणांपूजनंसकृत् । सकृदेवभवेच्छ्राद्धमादौनपृथगादिष्वितिछंदोगपरिशिष्टात् । एतद्बहूनामपत्यानांयुगपत्संस्कारकरणविषयमितिबोपदेवः । अतीतसंस्काराणांयुगपत्करणइत्यन्ये । तत्रापिचौल

स्योपनीत्यासहेतिपक्षेउपनीतिदिनएवानुष्ठानंनपूर्वदिने । सहत्वस्यदिवसैक्येसन्निकृष्टतरत्वात् । वृद्धाचारोप्येवं **उपनीतिदिनेमध्याह्नसंध्यामाह पारिजातेजैमिनिः** यावद्ब्रह्मोपदेशस्तुतावत्संध्यादिकंचन । ततोमध्याह्न संध्यादिसर्वंकर्मसमाचरेदिति ॥ ब्रह्मगायत्री ॥ यत्तुवचनम् ॥ उपायने तुकर्तव्यंसायंसंध्येउपासनं । आरभेद्ब्रह्मयज्ञंतुमध्याह्नेतुपरेहनीति । तच्छाखां तरविषयमितिपारिजातःविकल्पइतियुक्तंपश्यामः । उपनयनाग्निस्त्रिरात्रंधार्यः । त्र्यहमेतमग्निंधारयंतीत्यापस्तंबोक्तेः । बौधायनसूत्रेतुसदाधारणमप्युक्तं । उपनयनादिरग्निस्तोमौपासनमित्याचक्षते । पाणिग्रहणादित्येकेनित्योधार्योनुगतोनिर्मथ्यइति । इदंजातारणिपक्षे । अन्यथामंथनासंभवात् **ब्रह्मयज्ञेविशेषमाहतत्रैवजैमिनिः** अनुपाकृतवेदस्यकर्तव्योब्रह्मयज्ञकः । वेदस्थानेतुसावित्रीगृह्यतेतत्समासतइतियेषांतद्दिनएववेदारंभस्तेषांनेदमितिदिक् **अथब्रह्मचारिधर्माः ॥ याज्ञवल्क्यः** मधुमांसांजनोच्छिष्टंशुल्कस्त्रीप्राणिहिंसनं । भास्करालोकनाश्लीलपरिवादादिवर्जयेत् **मनुः** अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणं ॥ **वर्जयेदितिप्रकृतंपारिजातेकौर्मे** नादर्शंचैव वीक्षेतनाचरेद्वंतधावनं ॥ गुरूच्छिष्टंभेषजार्थंप्रयुंजीतनकामतः । एतन्निषिद्धमध्वादिविषयं । अन्यस्यगुरूच्छिष्टस्यसर्वदाप्राप्तेःसचेद्व्याधीयीतकामंगुरोरुच्छिष्टंभेषजार्थंसर्वंप्राश्नीयादितिवासिष्ठोक्तेः । ज्येष्ठभ्रातुरित्यपिज्ञेयम् । पितुर्ज्येष्ठस्यचभ्रातुरुच्छिष्टंभोज्यमित्यापस्तंबोक्तेः । गुरुपुत्रेतुस्मृत्यंतरेउक्तं । गुरुवद्गुरुपुत्रःस्यादन्यत्रोच्छिष्टभोजनात् **प्रचेताः** तांबूलाभ्यंजनंचैवकांस्यपात्रेचभोजनं । यतिश्चब्रह्मचारीचविधवाचाविवर्जयेत् **यमः** मेखलामजिनंदंडमुपवीतंचनित्यशः । कौपीनंकटिसूत्रंचब्रह्मचारीतुधारयेत् । अग्नींधनंभैक्ष्यचर्याभधःशय्यांगुरोर्हितं । कुर्यादितिशेषः **मेखलामाहाश्वलायनः** तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्येति **आचार्यः त्रिवृतामेखलाकार्यात्रिवारंस्यात्समावृता । तदग्रंग्रंथयस्त्रयःकार्याःपंचवासप्तवापुनः** **मनुः** मौंजीत्रिवृत्समाश्लक्ष्णाकार्याविप्रस्यमेखला । त्रिवृताग्रंथिनैके

नत्रिभिःपंचभिरेववा । मौञ्जभावेतुकर्तव्याकुशाश्मंतकबल्वजैः । अत्रप्रव रसंख्यानियमइतिवृद्धाः **अथदंडाःमनुः** ब्राह्मणोबैल्वपालाशौक्षत्रियोवाट खादिरौ । पैप्पलोदुंबरौवैश्योदंडानर्हतिधर्मतः **एषामभावेगौतमः** यज्ञि योवासर्वेषांमूर्द्धललाटनासाप्रमाणइति **अजिनमाहाश्वलायनः** अहतेनवा ससासंवीतमैणेयेनवाजिनेब्राह्मणंरौरवेणक्षत्रियमाजेनवैश्यमिति । यद्यप्यैणे यशब्देनमृगीचर्मैवोच्यतेएण्याढञितिपाणिनिस्मृतेः । ऐणेयमेण्याश्चर्माद्यमे णस्येणमुभेत्रिष्वितिअमरकोशाच्च । तथापिकृष्णरुरुबस्तान्यजिनानीतिशं खोक्तेः ॥ सर्वेषांवारौरवमितियमोक्तेश्चमृगचर्मणासहविकल्पोज्ञेयःवस्त्राजि नयोस्तुविकल्पः । कार्पासंवाविकृतमितिगौतमोक्तेः **अथयज्ञोपवीतं मनुः** कार्पासमुपवीतंस्याद्विप्रस्योर्ध्ववृतंत्रिवृत् **पारिजातेदेवलः** कार्पासक्षौमगो वासशणबल्वतृणादिकं । यथासंभवतोधार्यमुपवीतंद्विजातिभिः ॥ शुचौदे शेशुचिःसूत्रंसंहतांगुलिमूलके । आवर्त्यषण्णवत्यातत्त्रिगुणं कर्त्ययत्नतः ॥ अङ्गिलगकैस्त्रिभिःसम्यक्प्रक्षाल्योर्ध्ववृतंत्रिवृत् । अप्रदक्षिणमावृत्यसावित्र्या त्रिगुणीकृतं । ततःप्रदक्षिणावर्त्तसमंस्यान्नवसूत्रकं ॥ त्रिरावेष्टयदृढंबध्वा ब्रह्मविष्णवीश्वरान्नमेत् । तन्नवतंतुकार्यं । सावित्र्यात्रिगुणंकुर्यान्नवसूत्रंतुतद्ब वेदितितेनैवोक्तेः **छंदोगपरिशिष्टे** त्रिवृदूर्ध्ववृतंकार्यंतंतुत्रयमधोवृतं । त्रि वृतंचोपवीतंस्यात्तस्यैकोग्रन्थिरिष्यते । ऊर्ध्ववृतंदक्षिणंकरमूर्ध्वकृत्वावलितं भृगुः वामावर्तवलितांत्रिगुणकृत्वादक्षिणावर्तवलितांत्रिगुणंकार्यं ॥ सएकस्तंतु रेवंत्रितंतुकमित्यर्थः **कात्यायनः** पृष्ठदेशेचनाभ्यांचधृतंयद्विदतेकटिं ।तद्धा र्यमुपवीतंस्यान्नातिलंबंनचोच्छ्रितं **वसिष्ठः** नाभेरूर्ध्वमनायुष्यमधोनाभेस्तपः क्षयः ॥ तस्मान्नाभिसमंकुर्यादुपवीतंविचक्षणः **पारिजातेदेवलः** उपवीतं बटोरेकंद्वेतथेतरयोःस्मृतेः एकमेवयतीनांस्यादितिशास्त्रस्यनिश्चयः । सए व बहूनिवायुष्कामस्य । **तत्रमंत्रमाहसएव** यज्ञोपवीतमितिवाव्याहृत्या वापिधारयेत् **हेमाद्रौ** यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि । तृतीयमुत्तरी यार्थेवस्त्राभावेतदिष्यते **देवलः** सावित्र्यादशकृत्वाद्भिर्मंत्रिताभिस्तदुक्षयेत् ।

विच्छिन्नंचाप्यधोयातंभुक्त्वानिर्मितमुत्सृजेत् **मनुः** मेखलामजिनंदण्डमु पवीतंकममण्डलुं । अप्सुप्रास्यविनष्टानि गृह्णीतान्यानिमन्त्रतः **अथैतल्लो पेप्रायश्चितंमनुः** अकृत्वाभैक्ष्यचरणमसमिध्यचपावकं अनातुरःसप्तरात्रम वकीर्णीव्रतंचरेत् **अमत्याआपदित्यागेतुयाज्ञवल्क्यः** भक्ष्याग्निकार्येत्य क्त्वातुसप्तरात्रमनातुरः । कामावकीर्णइत्याभ्यांजुहुयादाहुतिद्वयं । उपस्था नंततःकुर्यात्समासिंचंत्यनेनतु । मन्त्रास्तुमिताक्षरायांज्ञेयाः **सकृल्लोपेतुऋ ग्विधाने** मानस्तोकेजपेन्मन्त्रंशतसंख्यंशिवालये । अग्निकार्यविनाभुक्तौन पापंब्रह्मचारिणः॥स्मृत्यर्थसारेतुसंध्याग्निकार्यलोपे स्नात्वाऽष्टसहस्रंजपः। भि क्षालोपेष्टशतं । अभ्यासेद्विगुणं । पुनःसंस्कारश्चेत्युक्तम् **अपरार्केसंवर्तः** यःसंध्यांचैवनोपास्तेअग्निकार्ययथाविधि । गायत्र्यष्टसहस्रंतुजपेत्स्नात्वास माहितः । अग्निकार्यसंध्याद्वयेकार्यं अग्निकार्यततःकुर्यात्संध्ययोरुभयोरपी तियाज्ञवल्क्योक्तेः । सायमेववा । सायमेववाग्निमिंधीतेत्येकेइतिलौगाक्षिणो क्तेः **पारिजातेवृद्धशातातपः** ब्रह्मचारीतुयोश्नीयान्मधुमांसंतथैवच । प्रा जापत्यंचरेत्कृच्छ्रं व्रतशेषंसमापयेत् **ऋग्विधाने** तंवोधियाजपेन्मंत्रं लक्षंचैव शिवालये । ब्रह्मचारिस्वधर्मेषुन्यूनंचेत्पूर्णमेतितत् **स्त्रीसंगेतु मनुः** अवकीर्णीतुकामेनगर्दभेनचतुष्पथे । स्थालीपाकविधानेनयजेद्वैनि र्ऋतिंनिशि । विस्तरस्तुमिताक्षरादौज्ञेयः **उपवीतनाशेतुहारीतः** मनो व्रतपतीभिश्चतस्रआज्याहुतीर्हुत्वापुनःप्रतीयात् **तत्रैवमरीचिः** ब्रह्मसूत्रंवि नाभुंक्तेविण्मूत्रंकुरुतेथवा । गायत्र्यष्टसहस्रेणप्राणायामेनशुद्ध्यति **मनुः** भोशब्दंकीर्तयेदंतेस्वस्यनाम्नोभिवादने । आयुष्मन्भवसौम्येतिवाच्योविप्रा भिवादने ।आकारश्चास्यनाम्नोंतेवाच्यःपूर्वाक्षरःस्ततः । शर्मेतिनकारात्पू र्वइत्यर्थः । अभिवादनेप्रत्यभिवादनादौविशेषःस्मृत्यर्थसारेपारिजातादौज्ञे यः **यमः** ज्यायानपिकनीयांससंध्यायामभिवादयेत् । विनाशिष्यंचपुत्रंच दौहित्रंदुहितुःपतिं **अथपुनरुपनयनंपारिजातेशातातपः** लशुनंगृंजनं जग्ध्वापलांडुंचतथाशुनम् ॥ उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात् । उपा

यनंपुनःकुर्यात्तप्तकृच्छ्रंचरेन्मुहुरिति **हेमाद्रौवृद्धमनुः** जीवन्यदिसमागच्छे द्घृतकुंभेनिमज्यच । उद्धृत्यस्नापयित्वास्यजातकर्मादिकारयेत् **तत्रैवपाद्मे** प्रेतशय्याप्रतिग्राहीपुनःसंस्कारमर्हति **चंद्रिकायांबौधायनः** सिंधुसौवीर सौराष्ट्रांस्तथाप्रत्यंतवासिनः । अंगवंगकलिंगांश्चगत्वासंस्कारमर्हति **हेमा द्रौप्रायश्चित्तकांडेवृद्धगौतमः** खरमुष्ट्रंचमहिषमनड्वाहमजंतथा । बस्त मारुह्यमुखजःक्रोशेचांद्रंविनिर्दिशेत् **मार्कंडेयः** खरमारुह्यविप्रस्तुयोजनं यदिगच्छति । तप्तकृच्छ्रत्रयंप्रोक्तंशरीरस्यविशोधनं । पुनर्जन्मप्रकुर्वीतघृत गर्भविधानतः **मदनरत्नेमिताक्षरायांचस्नानमात्रमुक्तं** ॥ **मनुः** अज्ञाना त्प्राश्यविण्मूत्रंसुरासंसृष्टमेवच ॥ पुनःसंस्कारमर्हतित्रयोवर्णाद्विजातयः **मिताक्षरायांपराशरः** यःप्रत्यवसितोविप्रःप्रव्रज्यातोविनिर्गतः । अनाशक निवृत्तश्चगार्हस्थ्यंचेच्चिकीर्षति ॥ संचरेत्त्रीणिकृच्छ्राणित्रीणिचांद्रायणानि च । जातकर्मादिभिःसर्वैःसंस्कृतःशुद्धिमाप्नुयात् **बौधायनसूत्रे** अथो पनीतस्यव्रत्यानिभवंतिनान्यस्योच्छिष्टंभुंजीतान्यत्रपितृज्येष्ठाभ्यांनस्त्रियासह भुंजीतमधुमांसश्राद्धसूतकान्नानिदशाहसंधिनीक्षीरंछत्राकनिर्यासौ विलाप नंगणान्नंगणिकान्नमित्येतेषुपुनःसंस्कारः **प्रतिषिद्धदेशगमनमित्येकेअ थाप्युदाहरंति** सौराष्ट्रसिंधुसौवीरमवंतींदक्षिणापथम् ॥ एतानिब्राह्मणोगत्वा पुनःसंस्कारमर्हति । अथपुनःसंस्कारंव्याख्यास्यामोदेवयजनप्रभृत्यग्निमु खात्कृत्वापालाशींसमिधमाज्येनाऽङ्क्त्वाभ्याधायवाचयति ॥ पुनस्त्वादि त्यारुद्रावसवःकामाःस्वाहेत्यथाव्रत्यप्रायश्चित्तेजुहोति यन्मआत्मनोमिंदाभू त्पुनरग्निश्चक्षुरदादिति । द्वाभ्यामथपक्वाज्जुहोति । सप्ततेअग्नेसमिधःसप्त जिह्वाःसप्त० । घृतेनस्वाहेत्यथाज्याहुतीरुपजुहोति ॥ येनदेवाःपवि त्रेणेतितिसृभिरनुच्छंदसंस्विष्टकृत्प्रभृति सिद्धमाधेनुवरदानादथापरमापरि धानात् कृत्वापालाशींसमिधमाधायाथाव्रत्यप्रायश्चित्तेजुहोत्यथव्याहृतिर्जु होति । अथापरोब्राह्मणवचनादेवसावित्र्याशतकृत्वोघृतमभिमंत्र्यप्राश्य कृतप्रायश्चित्तोभवति । गुरोर्वाप्युच्छिष्टंभुंजीताथाप्युदाहरंति ॥ वपनं

दक्षिणादानं मेखलादंडमजिनभैक्ष्यचर्याव्रतानिच निवर्तंतेपुनः संस्कारक र्म्मणीति **आश्वलायनगृह्येपि** अथोपेतपूर्वस्येत्यादिनापुनःसंस्कारउक्तःत थापित्रादिव्यतिरेकेणब्रह्मचारिणः प्रेतकर्म्मकरणेपुनरुपनयनमित्यपरार्कादय यः **त्रिस्थलीसेतौ** कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् । गंडकीवा हुतरणात्पुनःसंस्कारमर्हति **गौडास्तु** करतोयाजलस्पर्शात्कर्मनाशाविलं घनादितिपठंति ॥ तन्न **दानधर्मेषुकरतोयास्नानेप्राशस्त्योक्तेः** करतो येसदानीरेसारिच्छ्रेष्ठेतिविश्रुते । आप्लावयसिपौराणांपापंहरकरोऽवेतिस्मृति दर्पणचंद्रिकालिखितस्नानमंत्राच्च **पराशरः** अजिनंमेखलादंडोभैक्ष्यचर्याव्र तानिच ॥ निवर्तंतेद्विजातीनांपुनःसंस्कारकर्माणि **हरदत्तस्तु** यएकंवेदमधी त्यान्यंवेदमध्येतुमिच्छति ॥ तस्यपुनरुपनयनंतेनप्रतिवेदमुपनयनंकर्तव्य मित्याह । अन्येनैतन्मतेसर्वेभ्योवेदेभ्यःसावित्र्यनूच्यतइत्यापस्तंबोक्तेः **तद्विधिःकारिकायां** वेदांतरमधीत्यैवऋग्वेदंयेत्वधीयते । उपनीतिरियंतेषा मलंकरणवर्जिता । यद्वैतदुपनीतस्यप्रायश्चित्तंयदाभवेत् । कृताकृतंचवप नं मेधाजननमेवच । मेधाजननसद्भावे व्रतचर्याभवेदिह । अनुप्रवचनीय श्च तदभावेद्वयंनहि । परिदानंनकार्य्यंस्यान्निमित्तानंतरंत्विदं । पूर्व्वस्यांवा चयेत्स्थाने तत्सवितुर्वृणीमहइति **यत्तुहारीतः** द्विविधाःस्त्रियःब्रह्मवादिन्यः सद्योवध्वश्च । तत्रब्रह्मवादिनामुपनयनमग्नींधनंवेदाध्ययनंस्वगृहेचभैक्ष्य चर्येति । सद्योवधूनामुपनयनंकृत्वाविवाहःकार्यइतितद्युगांतरविषयं । पुरा कल्पेषुनारीणांमौंजीबंधनमिष्यते । अध्यापनंचवेदानांसावित्रीवाचनंतथे तियमोक्तेःआधानध्यायाः ॥ **पारिजातेबृहस्पतिः** प्रतिपत्सचतुर्दश्याम ष्टम्यांपर्वणोर्द्वयोः ॥ श्वोनध्यायेद्यशर्वर्योनाधीयीतकादाचन **नारदः** अय नेविषुवेचवैशयनेबोधनेहरेः । अनध्यायस्तुकर्तव्योमन्वादिषुयुगादिषु **नि र्णयामृते** चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु ॥ अनध्यायस्तुकर्त्तव्योया चसोपपदातिथिः **गर्गः** शुचावूर्जेतपस्येचयाद्वितीयाविधुक्षये । चातुर्मास्य द्वितीयास्ताःप्रवदंतिमनीषिणः **स्मृत्यर्थसारेपि** आषाढीकार्तिकीफाल्गुनी

समीपस्थद्वितीयाशुचेति **मनुः** उपाकर्मणिचोत्सर्गेत्रिरात्रंक्षपणंस्मृतं। अष्ट कासुत्वहोरात्रमृत्वंतासुचरात्रिष्विति । उत्सर्गेतुमनूक्तपक्षिण्यहोरात्राभ्यां त्र्यहस्याविकल्पइतिविज्ञानेश्वरः अष्टकाशब्देनसप्तम्यादित्रयंज्ञेयं। तिस्रोष्ट कास्त्रिरात्रमंत्यामेकेइतिगौतमोक्तेः । ऋत्वंतास्त्रितिसौरऋत्वंतासुचांद्रंत स्यपर्वत्वेनैवनिषेधासिद्धेरितिसर्वज्ञनारायणः। एतेनित्या **नैमित्तिकानप्या हयाज्ञवल्क्यः** त्र्यहंप्रेतेष्वनध्यायःशिष्यर्त्विग्गुरुबंधुषु । उपाकर्मणिचोत्स र्गेस्वशाखाश्रोत्रियेतथा । संध्यागर्जितनिर्घातभूकंपोल्कानिपातने । समा प्यवेदंद्युनिशमारण्यकमधीत्यच ॥ पंचदश्यांचतुर्दश्यामष्टम्यांराहुसूतके । ऋतुसंधिषुभुक्त्वावाश्राद्धिकंप्रतिगृह्यच । पशुमंडूकनकुलश्वाहिमार्जारमूष कैः। कृतेतरेत्वहोरात्रंशक्रपातेतथोच्छ्रये । ग्रहणेद्युनिशोक्तावपिग्रस्तास्ते त्र्यहमित्युक्तंप्राक् । स्मृत्यर्थसारेतुरात्रौतुगृहेतिस्रोरात्रीःदिवाचत्र्यहमित्युक्तं। ऋतुःसौरःभुक्त्वेत्युत्सवविषयं। ऊर्ध्वंभोजनादुत्सवेइतिगौतमोक्तेः। श्राद्धि कमहैकोद्दिष्टभिन्नं। तत्रतुत्र्यहमितिमनुः **स्मृत्यर्थसारेचैवं यत्तु** पश्चाद्यंतरा येत्र्यहमुपवासोविप्रवासश्चेतिगौतमोक्तंतत्प्रथमाध्ययने **याज्ञवल्क्यः** श्व कोष्ट्रगर्दभोलूकसामबाणार्तनिःस्वने । अमेध्यशवशूद्रांत्यश्मशानपतितांति के॥देशेशुचावात्मनिचविद्युत्स्तनितसंप्लवे भुक्त्वार्द्रपाणिरंभोंतरर्धरात्रेतिमा रुते । पांसुप्रवर्षेदिग्दाहेसंध्यानीहारभीतिषु । धावतःपूतिगंधेचशिष्टेचगृह मागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षागिरिरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात् कालिकान्विदुः । बाणोवंशःशततंतुर्वीणेतिहरदत्तः।अमेध्यासूतिकादयः।स्त नितंगर्जः।वर्षातोन्यत्रगर्जेवृष्टिविद्युतांयौगपद्येआकालिकः। वर्षासुतात्कालि कइतिनारायणः। संध्यागर्जेतुहारीतः।सायंसंध्यास्तनितेरात्रिः प्रातःसंध्यास्त नितेहोरात्ररात्रौविद्युत्यपररात्र्यवधिः ॥ विद्युतिनक्तंचापररात्रादितिगौतमो क्तेः।तृतीयादिनांशोत्तरंतुविद्युतिसर्वरात्रमित्याहसएव। त्रिभागादिप्रवृत्तौसर्व मिति॥ अर्धरात्रेमध्ययामद्वयमितिविज्ञानेश्वरः **मध्यदंडचतुष्टयइतिनिर्णया मृतेमनुः**नविवादेनकलहेनसेनायांनसंगरे। नभुक्तमात्रेनाजीर्णेनवमित्वानसू

तके । रुधिरेचस्रुतेगात्राच्छस्त्रेणचपरिक्षते **कौर्मे** श्लेष्मातकस्यछायायांशाल्म लेर्मधुकस्यच।कदाचिदपिनाध्येयंकोविदारकपित्थयोःमनुःशयानःप्रौढपाद श्चकृत्वाचैवावसक्थिकाम् । नाधीयीतामिषंजग्ध्वासूतकान्नाद्यमेवच।प्रौढपा दःपादोपरिपाददाता । आसनारूढपादोवेतिहरदत्तः । सोपपदास्वेतिप्रागु क्तंस्मृत्यर्थसारेश्रवणद्वादशीमहाभरण्योः । प्रेतद्वितीयायांरथसप्तम्यामाका शेशवदर्शनेचाहोरात्रं । असपिंडेगुरौमृतेत्रिरात्रम् । आचार्येउपाध्यायेचप क्षिणी । आचार्यभार्यापुत्रशिष्येष्वहोरात्रम् । अग्न्युत्पातेगोविप्रमृतौत्रिरा त्रम् । अयनेविषुवेचपक्षिणी । अकालवृष्टौच । आरण्यमार्जारसर्पनकुलपं चनखादेरंतरागमनेत्रिरात्रम् । आरण्यश्वसृगालादिवानररजकादौद्वादशरा त्रं । खरवराहोष्ट्रचांडालसूतिकोदक्याशवादौमासम् । गोगवयाजानास्ति कादौत्रिमासं । शशमेषश्वपाकादौषण्मासं । गजगंडसारससिंहव्याघ्रमहा पापिकृतश्राद्धावब्दमनध्यायः। शोभनदिनेचानध्यायः विवाहप्रतिष्ठोद्यापना दिष्वासमाप्तेःसगोत्राणामनध्यायः । उदयेस्तमयेचापिमुहूर्तत्रयगामियत् । तद्दिनंतदहोरात्रंचानध्यायविदोविदुः । केचिदाहुःक्वचिद्देशेयावत्तद्दिन नाडिकाः । तावदेवत्वनध्यायोतत्तन्मिश्रेदिनांतरे । प्रदोषंत्वाहप्रजापतिः । षष्ठीचद्वादशीचैव अर्धरात्रोननाडिका । प्रदोषेनत्वधीयीततृतीयानवनाडि का **निर्णयामृतेगर्गः** रात्रौयामत्रयादर्वाक्सप्तमीवात्रयोदशी ॥ प्रदोषः सतुविज्ञेयःसर्वविद्याविगर्हितः । रात्रौनवसुनाडीषुचतुर्थीयदिदृश्यते ॥ प्र दोषःसतुविज्ञेयःसर्वविद्याविगर्हितः **कौर्मे** अनध्यायस्तुनांगेषुनेतिहासपुरा णयोः ॥ नधर्मशास्त्रेष्वन्येषुपर्वण्येतानिवर्जयेत् **शौनकः** नित्येजपेचकाम्ये चक्रतौपारायणेपिच । नानध्यायोस्तिवेदानांग्रहणेग्राहणेस्मृतः । इत्यनध्या याः ॥ **अथमहानाम्न्यादिव्रतं ॥ श्रीधरः** तिथिनक्षत्रवारांशवर्गोदयनिरी क्षणं ॥ चैत्रलवत्सर्वमाख्यातंसगोदानव्रतेषुच **एषांलोपेशौनकः** व्रतानि विधिनाकृत्वास्वशाखाध्ययनंचरेत् ॥ अकृत्वाभ्यस्यतेयेनसपापीविधिघात कः । प्रत्येकंकृच्छ्रमेकैकंचरित्वाज्याहुतीःशतं । हुत्वाचैवतुगायत्र्याऋचा

दित्याहशौनकः **स्मृत्यर्थसारेतु** त्रीन्षट्द्वादशवाकृच्छ्रान्कृत्वापुनर्व्रतंच चरेदित्युक्तं **अथसमावर्तनंसुरेश्वरः** भौमभानुजयोर्वारेनक्षत्रेचव्रतोदिते। ताराचंद्रविशुद्धौचस्यात्समावर्तनक्रिया **बौधायनसूत्रेतु** रोहिण्यांतिष्येउत्तरयोःफाल्गुन्योर्हस्तेचित्रायामैंद्रे विशाखायांवारुणायादित्युक्तं **वसिष्ठः** स्नानंमध्याह्नकालेतुहोरायांकारयेच्छुभं । पूर्वाह्णेतदभावेतुकुर्यात्स्नानंयथाविधि॥ सर्वऋतवोविवाहस्येतिसूत्रात् । यदादक्षिणायनेविवाहस्तदासमावर्तनमपि तत्रैव। अन्यथोदगयनेसमावर्तने। अनाश्रमीनतिष्ठेतेतिविरोधःस्यादित्युक्तं सुदर्शनभाष्ये । एतच्चब्रह्मचारिव्रतलोपप्रायश्चित्तंकृत्वाकार्यं **तदाहबौधायनः** शौचसंध्यादर्भभिक्षाग्निकार्यराहित्यकौपीनोपवीतमेखलादंडाजिनधारणे दिवास्वापच्छत्रपादुकास्रग्विधारणांगोद्वर्तनानुलेपनांजनदूतनृत्यगीतवाद्यादिभिरतौब्रह्मचारीकृच्छ्रत्रयंचरेत् । महाव्याहृतिहोमंपाहित्रयोदशहोमं चकुर्यात् समावर्तनोत्तरंपूर्वमृतानांत्रिरात्रमाशौचंकार्यम् ॥ आदिष्टीनोदकं कुर्यादाव्रतस्यसमापनात्। समाप्तेतूदकंदत्वात्रिरात्रमशुचिर्भवेदितिमनूक्तेः। आदिष्टीब्रह्मचारीतिविज्ञानेश्वरः । ब्रह्मचर्येयदिकश्चिन्मृतस्तदात्रिरात्रमध्ये विवाहःकार्योऽन्यथानेतिसिद्ध्यति । जननेतुसत्यपिनत्रिरात्रम् । तत्रातिक्रांताशौचाभावादुदकंदत्वेतिवचनाच्चेतिदिक् **तत्रापिविकल्पः** पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित् । आशौचंकर्मणोंतेस्यात्त्र्यहंवाब्रह्मचारिणामिति छंदोगपरिशिष्टात् ॥ **स्नातकव्रतान्याहव्यासः** यज्ञोपवीतद्वितयंसोदकंचकमंडलुम् । छत्रंचोष्णीषममलंपादुकेचाप्युपानहौ । रौक्मेचकुंडले वेदःकृतकेशनखःशुचिः । वेदोदर्भबटुः **मनुः** उपानहौचवासश्चधृतमन्यैर्नधारयेत् । उपवीतमलंकारंस्रजंकरकमेवच । अन्यान्यपिबहूवृचगृह्य स्मृत्यादिभ्योज्ञेयानि **अथछुरिकाबंधः ज्योतिर्निबंधेनारदः** छुरिकाबंधनं वक्ष्येनृपाणांप्राक्करग्रहात् । विवाहोक्तेषुमासेषुशुक्लपक्षेप्यनस्तगे । जीवेशुक्रेचभूपुत्रेचंद्रताराबलान्विते । मौंजीबंधर्क्षतिथिषुकुजवर्जितवासरे **संग्रहे** शूद्राणांराजपुत्राणांमौंज्यभावेस्त्रबंधनं । मौंजीबंधोक्तितिथ्यादौका

र्यभौमादिनंविना **अथविवाहः याज्ञवल्क्यः** अविप्लुतब्रह्मचर्योलक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्विकांकांतामसपिंडांयवीयसीम् ॥ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् । लक्षण्यां बाह्याभ्यंतरलक्षणैर्युक्ताम् बाह्या निकाशीखंडादौ प्रसिद्धानि । आंतराण्याश्वलायनोक्तान्यष्टौ पिंडान्कृ त्वेत्यादीनि **मनुः** असपिंडाचयामातुरसगोत्राचयापितुः ॥ साप्रशस्ताद्वि जातीनांदारकर्मणिमैथुने ॥ दत्रिममातुर्गृहीताअपिसपिंडासगोत्रा ॥ तत्कु लनिवृत्तये चकारान्मातुरसगोत्रादत्तस्यपितुर्जनककुलेपितुरसगोत्रापिसपिंड त्वान्निषिद्धेत्यन्यश्चकारः असपिंडांसापिंडयरहिताम् । तच्चैकशरीरावय वान्वयेनभवतिएकस्यहिपितुर्मातुर्वाशरीरस्यावयवाः । पुत्रपौत्रादिषुसाक्षा त्परंपरयावाशुक्रशोणितादिरूपेणानुस्यूताः। यद्यपिपत्न्याःपत्यासहभ्रातृपत्नी नांचपरस्परंनैतत्संभवति । तथापिआधारत्वेनैकशरीरावयवान्वयोस्त्येव । अस्थिभिःअस्थीनीतिमंत्रलिंगात् । एकस्यहिपितृशरीरस्यावयवाः । पुत्र द्वारातास्वाहिताइतिमदनरत्नपारिजातविज्ञानेश्वरादयः । वाचस्पतिशुद्धि विवेकशूलपाण्यातिगौडमैथिलादयोप्येवम् । श्रुतावपि । एतत्षाट्कौशि कंशरीरं।त्रीणिपितृतस्त्रीणिमातृतोऽस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिरा णिमातृतइति । प्रजामनुप्रजायसइतिच । चंद्रिकापरार्कमेधातिथिमाधवाद यस्तु । एकपिंडदानक्रियान्वयित्वसापिंडयम् । लेपभाजश्चतुर्थाद्याःपित्राद्याः पिंडभागिनः । पिंडदःसप्तमस्तेषांसापिंडयंसप्तपौरुषमितिमात्स्योक्तेः । नच पितृव्यादिष्वेतन्नास्तीतिवाच्यम् । तत्कर्तृकश्राद्धेदैवतैक्येनतत्सत्वात् । दे वदत्तकर्तृकश्राद्धेहियेदेवताभूतास्तेषांमध्ये यःकश्चिदन्यकर्तृकश्राद्धेऽनुप्रवि शतितेषांसापिंडयं । तद्भार्याणामपिभर्तृकर्तृकश्राद्धेसहाधिकारित्वेनतदन्व यात् । एकत्वंसागताभर्तुःपिंडेगोत्रेचसूतकेइतिस्मृतेश्च । श्रुतीनांचवैराग्या र्थत्वात्तस्यसापिंडयनिमित्तत्त्वेमानाभावात् । नचमातुलादिष्वेतन्नास्तीति वाच्यम् । मातामहरूपदैवतैक्यात् । ननुगुरुशिष्यादेरपिश्राद्धदेवतात्वा त्सपिंडत्वंस्यात् । किंबहुनासर्वाभावेतुनृपतिःकारयेत्तस्यारिक्थतइतिमार्कंडे

यपुराणाद्राज्ञोपिश्राद्धकर्तृत्वात्सापिंड्यप्रसंगः सत्यम् पंचमात्सप्तमादूर्ध्वं मातृतःपितृतस्तथेतियाज्ञवल्क्यवचनेनमातापितृसंबंधएवतत्सत्वात् । उर्ध्वं सापिंड्यंनिवर्ततइतिशेषः। ननुपंचमत्वाद्यत्रनियम्यतेनमातृतइत्यादिवाक्य मेतत् । मैवं । मातृकुलेपंचमत्वस्यपितृकुलेसप्तमत्वस्यचबोधनेतुल्यत्वात् । पौरुषेयत्वाददोषइतिचेत् । तुल्यमन्यत्रापि अन्यकर्तृकेराज्ञस्ततःपितृणांवा देवतात्वाभावाच्च । किंच । अवयवान्वयपक्षेयथायोगरूढ्यापरिहारस्तथे हापितेनमातृकुलेपितृकुलेचैकपिंडदानक्रियान्वयित्वंसापिंड्यमित्याहुः। तेनै कस्यपित्रादयः षट्पुत्रादयश्च षट्सपिंडाभवंति । अत्रकेचिदुभयतःसापिं ड्यनिवृत्तावेवोद्वाहोनान्यथेत्याहुः । शुद्धचिंतामणिवाचस्पतिहरिदत्तादय स्तु । सगोत्रत्ववत्सापिंड्यस्यसप्रतियोगिकत्वेनसंयोगवदुभयनिरूप्यत्वा त् । एकतोनिवृत्तावन्यतोनिवृत्तेरावश्यकत्वान्मूलपुरुषमारभ्याष्टमोवरोमू लपुरुषमारभ्यद्वितीयातृतीयादिकांकन्यामुद्वहेदित्याहुः ॥ शिष्टास्तु ॥ नव धूवरयोःस्वतःसापिंड्यंकिंतुकूटस्थसंततित्वात्तत्सापिंड्येनैव । अतोष्टमवरंप्र तिकन्यायाअसापिंड्येपिकन्यायाः कूटस्थेनसापिंड्यात्तत्संततिस्थत्वाद्वरस्तां प्रतिसपिंडएवेत्यविवाहः । सापिंड्यासापिंड्ययोःप्रतियोगिभेदेनाविरोधादि त्याहुः । इदमेवचयुक्तंआशौचेप्येवंसापिंड्यंज्ञेयम् । यत्रतुमध्येविच्छिन्नम पिसापिंड्यंमंडूकप्लुतिवत्पुनरनुवर्तते ॥ यथा । कूटस्थात्पंचम्योः कन्ययोः पुत्रौतत्रनिवृत्तिः । तदपत्ययोस्त्वनुवृत्तिस्तत्रापिनसापिंड्यासापिंड्ययोर्दोषः संबंधिभेदात् । तेनतत्रनाविवाहः । अत्रकूटस्थमारभ्यगणनाकार्या तदु क्तं वध्वावरस्यवातातःकूटस्थाद्यदिसप्तमः । पंचमीचेत्तयोर्मातातत्सापिं ड्यंनिवर्ततइति । कूटस्थोमूलपुरुषः**विश्वरूपनिबंधे** एवमुक्तप्रकारेणपितृ बंधुष्वसप्तमात् । ऊर्ध्वमेवविवाह्यत्वंपंचमान्मातृबंधुतः । संतानोभिद्यतेयस्मा त्पूर्वजादुभयत्रच । तमादायगणेद्धीमान्वरंयावच्चकन्यकाम् **स्मृतितत्त्वे नारदः** आसप्तमात्पंचमाच्चबंधुभ्यःपितृमातृतः। अविवाह्यासगोत्राचसमान प्रवरातथा । अत्रबंधुभ्यइतिपंचमीनिर्देशात् । पितुःपितृष्वसृपुत्रात्सप्तमींमा

तुः पितृष्वसृपुत्राच्चपंचममिपित्यजेत् । एवमन्यबंधुष्वज्ञेयम् तत्रापि ॥ त्रिगो त्रात्ययेवागपिविवाहंकुर्यात् । वक्ष्यमाणवचनात् । त्रिगोत्रगणनाच्चमातामह गोत्रापेक्षयानतुस्वापेक्षया । अन्यथापितुःपितामहदुहितुर्दौहित्रीपुत्रीपरिणे यास्यात्वध्वाः मातामहगोत्रापेक्षयातुत्रिगोत्रांतर्गतेनविवाहप्रसंगइतिसं बंधतत्वादयोगौडग्रंथाः । संबंधविवेकेशूलपाणिरप्याह । पंचमात्सप्तमाच्चार्वा गपित्रिगोत्रांतरितावित्रिवाह्याः । असंबद्धाभवेन्मातुःपिंडेनैवोदकेनवा । सा विवाह्याद्विजातीनांत्रिगोत्रांतरिताचयेतिबृहन्मनूक्तेः सन्निकर्षेपिकर्तव्यंत्रि गोत्रात्परतोयदीतिदेवलोक्तेश्चेति । एतच्चदाक्षिणात्यानमन्यंते **यत्तुवसिष्ठः** पंचमींसप्तमींचैवमातृतःपितृतस्तथेति **यच्चविष्णुपुराणम्** पंचमींमातृपक्षाच्च पितृपक्षाच्चसप्तमीम् । गृहस्थउद्वहेत्कन्यांन्याय्येनविधिनानृपेतितत्पंचमीस प्तमीमतीत्येतिव्याख्येयम् । पंचमेसप्तमेचैवयेषांवैवाहिकीक्रिया । क्रियापरा अपिहितेपतिताःशूद्रतांगताइत्यपरार्केमरीचिवचनात् **हारलतायांशंखलि खितौ** सपिंडतातुसर्वेषांगोत्रतःसाप्तपौरुषी । पिंडश्चोदकदानंचआशौचंचत दानुगम् । गोत्रंसंतानं । आशौचंतानभिव्याप्यगच्छतीत्यर्थः **शुद्धिविवे केशुद्धिचिंतामणौचब्राह्मे** सर्वेषामेववर्णानांविज्ञेयासाप्तपौरुषी । सपिंडता ततःपश्चात्समानोदकधर्मता । ततःकालवशात्तत्रविस्मृतौनामगोत्रतः । स मानोदकसंज्ञातुतावन्मात्रापिनश्यति । सप्तोर्ध्वंत्रयःसोदकातोगोत्रजाःतत्रै वब्राह्मे अविभक्तधनास्त्वेतेसपिण्डाः परिकीर्तिताः ॥ तेनाविभक्तधनाभा वेविभक्तःसपिंडोधनहारीनान्यथेत्यर्थः तेनविवाहेआशौचेधनग्रहणेचत्रिधा सापिंड्यं सिद्धं ॥ यत्तु ॥ पंचमींमातृतः परिहरेत्सप्तमींपितृतस्त्रीन्मातृतःपं चपितृतोवेति पैठीनसिस्मृतौ । त्रीनित्यनुकल्पइतिमाधवोक्तेः । पंचमींसप्त मींचैवमातृतः पितृतस्तथा । दशभिःपुरुषैःख्याताच्छ्रोत्रियाणांमहाकुलात् । उद्वहेत्सप्तमादूर्ध्वंतदभावेतुसप्तमीम् ॥ पंचमींतदभावेतुपितृपक्षेष्वयंविधिः ॥ सप्तमींचतथाषष्ठींपंचमींचतथैवच । एवमुद्वाहयेत्कन्यांनदोषःशाकटायनः । तृतीयांवाचतुर्थीं वापक्षयोरुभयोरपि ॥ विवाहयेन्मनुःप्राहपाराशर्योंगिरायमः

यस्तुदेशानुरुपेणकुलमार्गेणचोद्वहेत् । नित्यंसव्यवहार्यःस्याद्वेदाश्चैतत्प्रदृश्य तइतिचतुर्विंशतिमतात् । चतुर्थीमुद्वहेत्कन्यांचतुर्थःपंचमोपिवा । पराशर मतेषष्ठींपंचमोनतुपंचमीमितिपराशरोक्तेश्चानुकल्पत्वेनापदिपञ्चम्यादिपरिण यनंकार्यमितिप्रतीयते । अत्रहितदभावेइतिस्पष्टमेवानुकल्पत्वमुक्तम् । त त्रयथाश्रुतंज्ञेयम् ॥ पूर्वोक्तमरीचिवचोरोधात् । वस्तुनिविकल्पासंभवात् । पंचमात्सप्तमाद्धीनांयःकन्यामुद्वहेद्द्विजः । गुरुतल्पीसविज्ञेयःसगोत्रांचैव मुद्वहन्निितिविष्णूक्तेः । पराशरस्यमूलाभावाच्च । तस्मान्मदनपारिजाताद्युक्त दिशादत्तकसापत्नसंबंधाद्यनुप्रवेशेब्राह्मणादीनां क्षत्रियादिसपिंडविषयेवापू र्वोक्तानिनेयानि । नत्वनुकल्पइतिभ्रामितव्यं । यत्तु स्मृतिचंद्रिकामाधवाद यआहुः । तृतीयेसंगच्छावहैचतुर्थेसंगच्छावहाइतिशतपथश्रुतेः । तृप्तांजहु र्मातुलस्येवयोषांभागस्तेपैतृष्वसेयीवपामिवेति । गर्भेनुनौजनिताद्पतीकारि तिचमंत्रवर्णात् । मातृष्वसृसुताकेचित्पितृष्वसृसुतांतथा । विवहंतिकचिद्देशे संकोच्यापिसपिण्डतामितिशातातपोक्तेश्चमातुलकन्योद्वाहःकार्यः यद्यपि पितृष्वसृकन्योद्वाहोपि प्राप्तस्तथाप्यस्वर्ग्यलोकविद्विष्टंधर्म्ममप्याचेरन्नत्वि तिनिषेधाद्वचनांतरेणतदुद्वाहस्याविधानाच्चनकार्यः । अयंतुदाक्षिणात्यशि ष्टाचारात्कार्यइति । नचपूर्वोक्तश्रुतीनामर्थवादमात्रता । मानान्तरेणासि द्धौउपरिहिदेवेभ्योधारयतीति वदनुवादनुपपत्याविधिकल्पनात् ॥ यत्तुशा तातपः मातुलस्यसुतामूढ्वामातृगोत्रान्तथैवच । समानप्रवरांचैवत्यक्त्वाचा न्द्रायणंचरेत् यच्चमनुः पैतृष्वसेयीभगिनींस्वस्त्रीयांमातुरेवच । मातुश्चभ्रातु राप्तस्यगत्वाचान्द्रायणंचरेत् । एतास्तिस्रास्तुभार्यार्थेनोपयच्छेतबुद्धिमान् यच्चव्यासः मातुःसपिण्डाद्यत्नेनवर्जनीयाद्विजातिभिरिति तद्गान्धर्वादि विवाहोढमातृविषयम्तत्रपितृगोत्रानिवृत्तेः अतएवमार्कंडेयपुराणम् गा न्धर्वादिविवाहेषुपितृगोत्रेणधर्मविदिति ॥ ब्राह्मादिविवाहेतुपरिणेयैवेति ॥ भट्टसोमेश्वरोपितृतीयेऽध्यायेवाक्यपादेमातुलकन्योद्वाहमुदाहृत्यस्मृतिविरोधे नाचारप्राप्तस्यास्यवार्तिके बाधोक्तावपिपूर्वोक्तश्रौतलिंगबलीयस्त्वादस्यक

र्तव्यतामाह । तदेतद्दत्तकस्यपालकदत्रिममातृसोदरकन्याविषयत्वेन । वर्णमातुलकन्या विषयत्वेनयुगांतरपरत्वेनचोपपन्नमपिअविचारितरमणीयंय थातथास्तु **तथापिकलौतावन्निषिद्धमेव** गोत्रान्मातुःसपिण्डाच्चविवाहोगो वधस्तथेत्यादिपुराणात् **माधवीये** बौधायनोप्यस्यनिन्दामाह । पंचधाविप्रति पत्तिर्दक्षिणतस्तथोत्तरतऊर्णाविक्रयोनुपेतेनस्त्रियाच सहभोजनंपर्युषितभोज नंमातुलपितृष्वसृदुहितृपरिणयनतिमि । अथोत्तरतःसीधुपानादिकमुक्त्वाइत रइतरस्मिन्कुर्वन्दुष्यति इतरइतरस्मिन्निति । भट्टसोमेश्वरेणापिस्मृतिविरु द्धानांमातुलकन्योद्वाहादीनामस्माद्वचनादप्रामाण्यमित्युक्तम् **बृहस्पतिरपि** उदूह्यतेदाक्षिणात्यैर्मातुलस्यसुताद्विजैः । मत्स्यादाश्चनराःपूर्वेव्यभिचाररताः स्त्रियः । उत्तरेमद्यपाश्चैवस्पृश्यनृणांरजस्वला ॥ इत्यनाचारत्वमाह **अतए वहेमाद्रौमात्स्ये** कर्नाटकादीनांतत्कारिणांश्राद्धेनिषेधः । वोपदेवेनापिलि खितंब्राह्मम् । यत्रमातुलजोद्वाहीयत्रवैवृषलीपतिः । श्राद्धंनगच्छेत्तद्विप्राः कृतंयच्चनिरामिषमिति । तस्मान्मातृतःपंचपितृतःसप्तत्यक्त्वोद्वहेदितिसिद्ध म् **सम्बन्धविवेकेसुमन्तुः** ब्राह्मणानामेकपिण्डस्वधानामादशमाद्धर्मवि च्छित्तिर्भवति । आसप्तमाद्रिक्थविच्छित्तिर्भवति । आतृतीयात्पिण्डविच्छि त्तिरन्यथा । पिण्डशौचक्रियाविच्छेदाद्ब्रह्मतुल्योभवति **अस्थार्थमहाशूल पाणिः** जीवत्पित्रादित्रिकस्यवृद्धप्रपितामहादयस्त्रयः । श्राद्धदेवतात्वात्पि ण्डभाजोभवंति । तदूर्ध्वंत्रयोनवपुरुषपर्यंतालेपभाजः । श्राद्धकर्त्ताचदशमइ ति दशमादूर्ध्वंसापिंड्यनिवृत्तिः । दशमादित्युपलक्षणं । तेनपितृपितामह जीवनेनवपुरुषपर्यंतंपितृजीवनेचाष्टपुरुषपर्यंतंसापिण्ड्यमितिज्ञेयम् ॥ अपु त्रधनग्रहणेसन्निहिताभावेसप्तपुरुषपर्यंतमधिकारः । धनग्राहिणमारभ्यतृती यःपौत्रःतदूर्ध्वंश्राद्धविच्छेदः । अन्यथाधनहारित्वेऽपुत्रश्राद्धाकरणेब्रह्महेत्य र्थः । आतृतीयादित्यनूढकन्याविषयं ॥ अप्रत्तानांतुस्त्रीणांत्रिपुरुषोविज्ञायत इति वसिष्ठोक्तेः । एतच्चाशौचविषयंसापिंड्यं नतुविवाहादौ । तत्रपूर्वोक्तव चनैः पंचमत्वसप्तमत्वनियमादितिमेधातिथिप्रमुखादाक्षिणात्याः । वाग्दा

नोत्तरमेतदितिशुद्धिविवेकः । मातृकुलविषयंकानीनकन्यकाविषयंचैतत् । अन्यथाअप्रत्तानांतथास्त्रीणांसापिंड्यं साप्तपौरुषं। प्रत्तानांभर्तृसापिंड्यं प्राह देवः प्रजापतिरितिकौर्मेणविरोधःस्यादितिरत्नाकरस्मृतितत्त्वादितिगौडग्रन्थाः । युक्तंचैतत् । अन्यथाकन्योत्पत्तौपुरुषत्रयपर्यंतमेवसूतकंस्यान्नोर्ध्वं **सापत्नमातामहकुलेत्वाह मिताक्षरायांशंखः** यद्येकजाताबहवःपृथक्क्षेत्रापृथक्जनाः । एकपिण्डाःपृथक्शौचाः पिण्डस्त्वावर्त्ततेत्रिषु । पृथक्क्षेत्राःभिन्नजातीयाःस्त्रीषुजाताःपृथक्जनाः । सजातीयभिन्नमातृषुजाताः । अत्रत्रिपुरुषंसापिंड्यमितिविज्ञानेश्वरोव्याचख्यौ **पृथ्वीचंद्रोदयेसापिंड्यदीपिकायांचैवम्** मदनपारिजातेतुपृथक्क्षेत्रजाः भिन्नमातृजाः पृथक्जनाःभिन्नजातीयाः । एतद्द्विजातीयसापत्नमातृकुलेचतुःपुरुषंसापिंड्यं । पंचमींसप्तमीं चैवमातृतः पितृतस्तथेतिवसिष्ठोक्तेः । सप्तमीमितिब्राह्मणादीनांक्षत्रियादिदारोत्पन्नपितृकुलविषयंचेत्युक्तं । तत्स्वकपोलकल्पितत्वात् ग्रन्थांतरविरोधाच्चनिर्मूलम् । पितृपत्न्यःसर्वामातरइत्युक्त्वासुमंतुनातदपत्यानिभागिनेयानीतिपृथङ्निषेधाच्च । अन्यथासपिंडत्वेननिषेधात् । सपत्नमातुलत्वादिनिर्देशोव्यर्थः । अतएवतेनस्मृतिकौमुद्यांसवर्णसापत्नमातामहकुलपरत्वेनतथैवशंखवचनंव्याख्यातम् । तेनवासिष्ठंपंचमींसप्तमीमतीत्येतिव्याख्येयम् । तस्मात्प्राच्येवव्याख्यायुक्ताप्रयोगरत्नेभट्टैः । स्मृतितत्त्वादिगौडग्रन्थेषुच सपत्नमातामहकुलेयावदुक्तंवाचनिकमेवसापिंड्यमुक्तम् **यथाहसुमंतुः** मातृपितृसंबद्धाआसप्तमादविवाह्याभवंति । आपंचमादन्येषांपितृपत्न्यःसर्वामातरस्तद्भ्रातरोमातुलास्तद्भगिन्योमातृष्वसारस्तद्दुहितरश्चभागिन्यस्तदपत्यानिभागिनेयानि । अन्यथासंकरकारिणःस्युस्तथाध्यापयितुरेतदेवेति । आपंचमादितिमातृकुलेत्रिगोत्रांतरितविषयंवेतिप्राच्याः **मात्स्ये** समानप्रवराचैवशिष्यसंततिरेवच । ब्रह्मदातुर्गुरोश्चैवसंततिःप्रतिषिद्ध्यते । तद्भगिन्योमातृष्वसारइतितुआकरेनपठितम् । क्वचिद्वचनादविवाहः **यथागृह्यपरिशिष्टे** अविरुद्धसंबंधामुपयच्छेतेत्युक्त्वाविरुद्धसंबंधःस्वयमेवोक्तः । यथाभार्यास्व

सुर्दुहितापितृव्यपत्नीस्वसाचेति **बौधायनः** मातुः सपत्न्याभगिनीतत्सु तांचविवर्जयेत् । पितृव्यपत्न्याभागिनींतत्सुतांचविवर्जयेत् । अतोमा तृष्वसुः सापत्नपुत्रकन्याप्यविवाह्या सापत्नमातृकुलजामितिमदनपारितो क्तेरितिकेचित् । केचित्तुज्येष्ठोभ्रातापितुः समइतिमनूक्तेस्तत्पत्न्यामातृ त्वात्तत्पितुर्मातामहत्वात् । ज्येष्ठभ्रातृपत्नीभगिनीनविवाह्या **तथा** उत्पा दकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पितेतिमनूक्तेर्गुरुणा त्रिपुरुषंसापिंड्यसखापि निर्वाप्यः । अतस्तेषांकन्यानोद्वाह्याः । गायत्र्याउपदेष्टुश्चकन्यांनैवोद्वहेद् द्विजः । गुरोश्चकन्याशिष्योवातत्संतत्यापिनेष्यते । पुरुषत्रयपर्यंतंभ्रात्रादेर्नै तादिष्यते । वाक्संबंधकृतानांतुस्नेहसंबंधभागिनां । विवाहोत्रनकर्तव्यो लोकगर्हाप्रसज्यतइतिवचनाच्चेत्याहुः । तत्रमूलंचिंत्यम् । दत्तकविषयेतूच्य ते **तत्रगौतमः** ऊर्ध्वंसप्तमात्पितृबंधुभ्योबीजिनश्चमातृबंधुभ्यः । पंचमादि तिबंधुग्रहणान्नदत्तकमात्रपरमिदम् ॥ किंतुसंतानेपि । एतत्क्षेत्रजादिसर्व द्व्यामुष्यायणपरामितिहरदत्तः । अत्रस्मृतिचन्द्रिकानियोगात् । यउत्पाद यतितस्माद्बीजिनोप्यूर्ध्वंसप्तमादित्यर्थइति । दत्तकस्यजनकविषयमेतदि तिसापिंड्यमीमांसायांतेनदत्तकस्यजनककुले साप्तपौरुषंजननीकुलेपञ्चपौरु षसापिंड्यं । दत्तक्रीतादिपुत्राणांबीजवसुःसदिंडता । सप्तमीपंचमीचैवगो त्रित्वं पालकस्यचेतिबृहन्मनूक्तेः । बीजिनश्चेतिगौतमोक्तेश्च । पालकपि तृकुलेतुपंचपुरुषं । पालकमातृकुलेत्रिपुरुषं **तथाचापरार्केपैठीनासिः** त्री न्मातृतःपंचपितृतःपुरुषानतीत्योद्वहेदिति । एतत्सएवव्याचख्यौ । दत्तका दीन्पुत्रान्पितृपक्षतोनिवृत्तपिंडगोत्रार्षेयान्प्रत्येतदुच्यते पञ्चपितृतइतिना न्यान्प्रतीति **यत्तुवृद्धगौतमः** स्वगोत्रेषुकृतायेस्युर्दत्तक्रीतादयःसुताः । विधिनागोत्रमायांतिनसापिंड्यंविधीयते **यच्चवसिष्ठः** अन्यशाखोद्भवोद त्तःपुत्रश्चैवोपनायितः । स्वगोत्रेणस्वशाखोक्तविधिनास्यात्स्वशाखभागिति **यच्चनारदः** धर्मार्थंवार्धिताःपुत्रास्तत्तद्गोत्रेणपुत्रवत् । अंशपिण्डविभागि त्वंतेषुकेवलमीरितमिति । तत्पालककुलेसाप्तपौरुषंसापिंड्यंनेत्येवंपरंनतुस

र्थासापिंड्यंनिषेधपरमितिसापिंड्यमीमांसायाम् । मदनपारिजातादपिदत्त कानुप्रवेशेऽल्पंसापिंड्यंप्रतिभाति ॥ तथाहि ॥ तेन त्रीनतीत्येत्युदाहृत्यय स्यमातादत्तपुत्रीप्रतिगृहीत्रापुत्रीकृतातस्याः प्रतिगृहीतृकुलेत्रीनतीत्येति । पंचपितृतइतियस्यदत्तपुत्रः पितातस्यदत्तस्ययज्जनककुलंतद्विषयमित्युक्तम् वस्तुतस्तु पूर्ववचसां महानिबंधेषु क्वाप्यनुपलंभादपरार्कादिलिखनाभावा त् । पूर्वोक्तव्यवस्थायाश्चप्रातिभिज्ञानतुल्यत्वाद्यैरेतल्लिखितंतेषामेवशोभते । ममतुपालककुले एकपिंडदानक्रियान्वयित्वरूपं साप्तपौरुषमेवसापिंड्यं । बीजिनश्चेति गौतमोक्तेर्जनककुलेपितावदेवत्रीन् मातृतइत्यादितुसवर्णसाप त्नमातृकुलपरं । यद्येकजाताबहवइतिशांखैकक्यत्वादितियुक्तंप्रतिभाति । अतएवास्यद्यामुष्यायणत्वंहेमाद्रिप्रवरमंजरीवृत्तिकृन्नारायणादिभिरुक्तम् । भट्टसोमेश्वरेणापिपृथायाःकुन्तिभोजस्यपालककन्यात्वेपि । ऊर्ध्वंसप्तमात्पितृ बन्धुभ्योबीजिनश्चेतिगौतमोक्तेर्दत्रिमायाःपृथायाःजनकस्यशूरसेनस्यकुलेपि साप्तपौरुषंपालककुलेपितावदेवसापिण्ड्यमुक्तमपिवाकारणाग्रहणेइत्यत्र सा पिण्ड्यदीपिकायांतुदत्तक्रीतादीनांजनकगोत्रेणोपनयनेकृते जनककुलेसाप्त पौरुषंसापिण्ड्यम् । पालकमातापितृकुलेत्रिपुरुषं । पिण्डनिर्वापान्निर्वाप्यल क्षणंत्रिपुरुषंसापिंड्यंपालकगोत्रेणोपनयनेतत्कुलेसाप्तपौरुषमित्युक्तम् ।तन्न । चूडोपायनसंस्कारानिजगोत्रेणवैकृताः । दत्ताद्यास्तनयास्तेस्युरन्यथादास उच्यतइतिकालिकापुराणादुपनयनोत्तरंदत्तकनिषेधात्।त्रिपुरुषमित्यत्रापिमू लंमृग्यमित्यलम्बहुना **मातापितृद्वारकसापिण्ड्यवतीनांकन्यानामियंसं ख्यारामवाजपेयिनोक्ता** उद्वोढुःपितरौपितुश्चपितरौतज्जन्मकृद्दम्पतीद्वं द्वंतस्यचतुष्कमष्टचततोप्यस्यक्रमात्षोडश । वंशारम्भकदम्पतीप्रमितिरित्या सप्तकक्षंरदाएकैकान्वयकन्यकाः पितृकुलेत्वासप्तकक्षंब्रुवे । यद्यप्येकस्यबह वःसुताःस्युस्तदपीहतु सम्बन्धसाम्यादेकैकगणितेत्यवधार्यताम् । एकस्मान्मि थुनात्सुतोथदुहिताद्वंद्वद्वयंतद्द्वया तस्माद्द्वंद्वचतुष्कमष्टचततोतःषोडशाऽ तोरदाः ॥ यावत्सप्तमकक्षमाभिरृतवःकन्याइहैकान्वये तादंतैर्गुणितारसैक

सदृशोवंशेसपिण्डाःपितुः । मातुर्ज्यन्मददम्पतीचमिथुनद्वंद्वंतयोःसागरास्त स्याःपंचमकक्षमष्टमितिरित्येकान्वयःपुंसुते । द्वंद्वाद्वाद्वयुगंभतोब्धयइतोऽ ष्टौपंचकक्षंशरक्षोण्यःसप्तगुणाःशराभ्रविधवोमातुःसपिण्डाःकुले । कुलद्वय स्यकन्यकायुतामिथःसपिण्डकाः । हिमांशुदृग्धराद्दशोविवाहकर्मवर्जिताइ ति । एतच्चसर्ववर्णसाधारणं । सर्वत्रसापिण्ड्यसद्भावादितिविज्ञानेश्वरोक्तेः । पंचमात्सप्तमादूर्ध्वंमातृतःपितृतः क्रमात् । सपिण्डतानिवर्तेतसर्ववर्णेष्वयं विधिरितिहरनाथधृतदेवलवचनाच्च । सम्बन्धतत्त्वेसुमंतुः पितृष्वसृसुतांमा तुलसुतांमातृसगोत्रांसमानार्षेयींविवाह्य चांद्रायणंचरेत्परित्यज्यैनांमातृव द्विभृयादितिदिक् । ऋषेरिदमार्षप्रवरः । गोत्रंप्रसिद्धं । समानेआर्षगोत्रेय स्यतस्माज्जातायानभवतिताम् **अथसंक्षेपेणगोत्रप्रवरनिर्णयः** तौचभिन्नो निषेधेनिमित्तम् । सगोत्रायदुहितरंनप्रयेच्छदित्यापस्तंबोक्तेः । असमानप्र वरैर्विवाहइतिगौतमोक्तेश्च **तत्रगोत्रलक्षणमाहप्रवरमंजर्यांबौधायनः** वि श्वामित्रोजमदग्निर्भरद्वाजोथगौतमः । अत्रिर्वसिष्ठःकश्यपइत्येतेसप्तऋषयः । सप्तानामृषीणामगस्त्याष्टमानांयदपत्यंतद्गोत्रमिति । यद्यपिकेवलभार्गवेष्वा र्ष्टिषेणादिषुकेवलांगिरसेषुचहारितादिषुचनैतत् ।भृग्वंगिरसौरुक्तेष्वनंतर्गतेः तथाप्यत्रेष्टापत्तिरेवेतिकेचित् । अतएवस्मृत्यर्थसारेऽप्रवैरक्यादेवात्राऽविवाह उक्तः।यद्यपिवसिष्ठादीनांनगोत्रत्वंयुक्तं । तेषांसप्तार्षित्वेनतदपत्यत्वाभावात् । तथापितत्पूर्वभाविवसिष्ठाद्यपत्यत्वेनगोत्रत्वंयुक्तम् । अतएवपूर्वेषांपरेषांचैतद्गो त्रम् । अत्रविशेषोऽस्मत्कृतप्रवरदर्पणेज्ञेयः।प्रवरास्तुप्रव्रणानिप्रवरः । कल्प काराहिवासिष्ठेतिहोतावसिष्ठेवादित्यध्वर्युरित्यादिना । येषांप्रवरणमामनंतिते प्रवराः । तच्चवरणंयद्यपिगोत्रभूतस्यापिक्वचिद्दृश्यते तथापिपूर्ववद्दृषिभेदो द्रष्टव्यः । अन्यथातेषांत्र्यार्षेयेएकार्षेइत्यादिनिर्देशानुपपत्तेः । अन्येतुतद्गोत्रा णांत्र्यार्षेयइतिभेदमाहुरितिदिक् ॥ तत्वंतुगोत्रभूतस्यपितृपितामहप्रपिताम हएवप्रवराः । पितैवाग्रेथपुत्रोथपौत्रइतिशतपथश्रुतेः । परंपरंप्रथममित्याश्व लायनोक्तेश्च **अत्रविशेषमाहबौधायनः** एकएवऋषिर्यावत्प्रवरेष्वनुवर्तते

तावत्समानगोत्रत्वमन्यत्रभृग्वंगिरसांगणादिति **स्मृत्यर्थसारे** प्रीयमाणात यावापिसत्तयावानुवर्तनम् । एकस्यदृश्यतेयत्रतद्गोत्रंतस्यकथ्यते **भृग्वंगिरो गणेषुतुमाधवीयेस्मृत्यंतरे** पंचानांत्रिषु सामान्यादविवाहस्त्रिषुद्वयोः । भृग्वं गिरोगणेष्वेवशेषेष्वेकोपिवारयेत् । शेषगोत्रेषुएकोपिसमानः प्रवरोविवाहं वारयेदित्यर्थः । बौधायनोपि ॥ भृग्वंगिरसावधिकृत्यद्वयोर्षेयसन्निपाते ॥ विवाहरुयार्षेयाणांरुयार्षेयसन्निपातेविवाहः । पंचार्षेयाणामितिभृग्वंगि रोगणेष्वपिजमदग्निगौतमभरद्वाजेष्वेकप्रवरसाम्येसर्वेषामप्यसाम्येवासगोत्र त्वादेवाविवाहइतिदिक् **अथगोत्राणिप्रवराश्चोच्यंते ॥ तत्रबौधायनः** गोत्राणांतुसहस्राणिप्रयुतान्यर्बुदानिच । ऊनपंचाशदेवैषांप्रवराऋषिदर्शना त् । तत्रसप्तभृगवः । वत्साबिदाआर्ष्टिषेणायस्कामित्रयुवावैन्याः शुनका इति । वत्सानांभार्गवच्यावनाप्नवानौर्वजामदग्न्येति । भार्गवौर्वजामदग्न्ये तिवा । भार्गवच्यावनाप्नवानेतिवा । बिदानांपंच । भार्गवच्यावनाप्नवानौ र्वबैदेति । भार्गवौर्वजामदग्न्येतिवा। एतौद्वौजामदग्न्यसंज्ञौ।आर्ष्टिषेणानां । भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति । भार्गवार्ष्टिषेणानूपेतिवा । एषांत्रयाणां परस्परमविवाहः । वात्स्यानाम् ॥ भार्गवच्यावनाप्नवानेति । वत्सपुरोधस योःपंच । भार्गवच्यावनाप्नवानवास्यपौरोधसेतिवैजवनिमतिथयोःपंच । भा र्गवच्यावनाप्नवानबैजवनैमथितेति । एतेत्रयःक्वचित् । एषामपिपूर्वैरविवाहः । अत्रतत्तद्गुणस्थाऋषयोन्यश्चविशेषोमत्कृतेप्रवरदर्पणेज्ञेयः । यस्कानाम भार्गववैतहव्यसावेतसेति । मित्रयुवानाम् । भार्गववाध्यश्वदिवोदासेति । भार्गवच्यावनदिवोदासेतिवा । वाध्यश्वेत्येकोवा । वैन्यानांभार्गववैन्यपार्थे ति । एतएवश्यैताः । शुनकानांशुनकेतिवा । गार्त्समदेतिद्वौवा । भार्गवशौ नहोत्रगार्त्समदेतित्रयोवा । वेदविश्वज्योतिषांभार्गववेदवैश्वज्योतिषेति । शा ठरमाठराणांभार्गवशाठरमाठरेति । एतौद्वौक्वचित् । यस्कादीनांस्वगणंत्य क्त्वासवैर्विवाहः **तदुक्तंस्मृत्यर्थसारे** यस्कामित्रयुवावैन्याःशुनकाःप्रवरैक्य तः ॥ स्वंस्वंहित्वागणं सर्वेविवहेयुःपरावरैरिति । अथांगिरसःतेगौतमाःभरद्वा

जाःकेवलांगिरसश्चेतित्रिधा अत्रगौतमादश । आयास्याः । शरद्वंताःकौमं डादीर्घतमसः । औशनसः । कारेणुपालेयाः । राहूगणाः । सोमराजकाः वामदेवाःबृहदुक्थाश्चेति । तत्रायास्यानां । आंगिरसायास्यगौतमेति । शरद्वं तानांआंगिरसगौतमशारद्वन्तेति कौमंडानांआंगिरसौतथ्यकाक्षीवंतगौतमकौ मांडेतिवा ॥ आंगिरसायास्यौशिजगौतमकाक्षीवतेतिवा । आंगिरसौतथ्यगौ तमौशिजकाक्षीवतेतिवा।आंगिरसौशिजकाक्षीवतेतित्रयोवा । दीर्घतमसां । आंगिरसौतथ्यकाक्षीवतगौतमदैर्घतमसेति । आंगिरसौतथ्यदैर्घतमसेतित्र योवा । औशनसां । आंगिरसगौतमौशनसेतित्रयः । कारेणुपालानां । आं गिरसगौतमकारेणुपालेतित्रयः ॥ राहूगणानांआंगिरसराहूगणगौतमेति ।सो मराजकानां । आंगिरससोमराजकगौतमेति । वामदेवानां । आंगिरसवाम देव्यगौतमेति । बृहदुक्थानां । आंगिरसबार्हदुक्थगौतमेति । आंगिरसवाम देवबार्हदुक्थेतिवा । उतथ्यानामांगिरसौतथ्यगौतमेति । औशिजानामांगि रसौशिजकाक्षीवतेत्यापस्तंबः । आंगिरसायास्यौशिजगौतमकाक्षीवतेतिका त्यायनः । एतौद्वौक्वचित् । रघुवानां । आंगिरसराघुवगौतमेतिकेचित् । त त्रमूलंचिंत्यम् । एषांसर्वेषांगौतमानामविवाहः **अथभरद्वाजाः** तेचत्वारः । भरद्वाजागर्गाऋक्षाःकपयइति । भरद्वाजानामांगिरसबार्हस्पत्यभारद्वाजेति त्रयः । गर्गाणामांगिरसबार्हस्पत्यभारद्वाजसैन्यगार्ग्येतिपंच आंगिरससै न्यगार्ग्येतिपंचआंगिरससैन्यगार्ग्येतिवा ॥ अंत्ययोर्व्यत्ययोवाभारद्वाजगा र्ग्यसैन्येतिवा । गर्गभेदानां । आंगिरसतैत्तिरकापिभुवेति । ऋक्षाणांकपिला नांचांगिरसबार्हस्पत्यभरद्वाजवांदनमातवचसेतिपंच । आंगिरसवांदनमात वचसेतित्रयोवा । कपिलानामांगिरसामहीयवोक्रक्षयसेति । आत्मभुवाम् । आंगिरसभारद्वाजबार्हस्पत्यमंत्रवरात्मभुवेतिपंच । अयंक्वचित् । भारद्वा जानांसर्वेषामविवाहः । अथकेवलांगिरसः । हारितानांआंगिरसांबरीषयौव नाश्वेति । आद्योमांधातावा । कुत्सानाम् । आंगिरसमांधातृकौत्सेति । क ण्वानामांगिरसाजमीढकाण्वेति । आंगिरसघोरकाण्वेति वारथीतराणामां

गिरसवैरूपराथीतरेति ॥ आंगिरसवैरूपपार्श्वदश्वेतिवा । अष्टादंष्ट्रपार्षदश्ववै रूपेतिवा । अंत्ययोर्व्यत्ययोवामुद्गलानामांगिरसभार्म्याश्वमौद्गल्येति । आद्यस्तार्क्ष्योंवा । आंगिरसताविमौद्गल्येतिवा । विष्णुवृद्धानामांगिरसपौ रुकुत्सत्रासदस्यवेति । एषांस्वगणंविहायसर्वैर्विवाहोभवति । हरितकुत्स योस्तुनभवति **अथात्रेयाः** तेचत्वारः । आत्रेयाः । वाद्धुतकाः । गविष्ठिराः मुद्गलाइति । आद्यानामात्रेयार्चनानसश्यावाश्वेति । वाद्धुतकानां । आत्रे यार्चनानशवाद्धुतकेति । धनंजयानांआत्रेयार्चनानशधानंजयेतिकचित् । गविष्ठिराणामात्रेयार्चनानशगविष्ठिरेति । आत्रेयगाविष्ठिरपौर्वातिथेतिवा । मुद्गलानामात्रेयार्चनानशपौर्वातिथेति । वामरथ्यसुमंगलवैजवापानामात्रे यार्चनानशातिथेति । आत्रेयार्चनानशगाविष्ठिरेतिवा ॥ सुमंगलानांअत्रि सुमंगलश्यावाश्वेतिकेचित् । अत्रेःपुत्रिकापुत्राणाम् । आत्रेयवामरथ्यपौत्रि केति । अत्रीणांसर्वेषामविवाहः **अथविश्वामित्राः** तेदशकुशिकाः । लो हिताः । रौक्षकाः । कामायनाः । कताः । धनंजयाः । अघमर्षणाःपूरणाः । इंद्रकौशिकाइति । कुशिकानांविश्वामित्रदेवरातौदलेति । लोहितानांवि श्वामित्राष्टकलौहितेति । अंत्ययोर्व्यत्ययोवा । वैश्वामित्रमाधुच्छंदसाष्टके तिवा । विश्वामित्राष्टकेतिद्वौवा । रौक्षकाणांवैश्वामित्रगाधिनरैवणेतिवैश्वा मित्ररौक्षकरैवणेतिवा । कामकायनानावैश्वामित्रदेवश्रवसदैवतरसेतिवा अ जानांवैश्वामित्रमाधुच्छंदसाचेति । वैश्वामित्राश्मरथवाधूलेतिवा ॥ अघमर्ष णानां वैश्वामित्राघमर्षणकौशिकेति । पूरणानांवैश्वमित्रपौरणेतिद्वौवा ॥ वै श्वामित्रदेवरातपूरणेतिवा । इंद्रकौशिकानांविश्वामित्रेंद्रकौशिकेतिद्वौ । धनंजयानांविश्वामित्रमापुच्छंदसधानंजयेति । वैश्वामित्रमाधुच्छंदसाघमर्ष णेतिवाकतानांवैश्वामित्रकात्यात्कीलेति । एतेबौधायनोक्ताःरौहिणानांवैश्वा मित्रमाधुच्छंदसरौहिणेति । रेणुनांवैश्वामित्रगाथिनरेणवेति । वेणूनांवै श्वामित्रगाथिनवैणवेति । जन्हुनांवैश्वामित्रशालंकायनकौशिकेति आश्मर थ्यानां । वैश्वामित्राश्मरथ्यवाधुलेतिउदवेणूनांवैश्वामित्रगाथिनवैणवेति एते

आश्वलायनामात्स्योक्ताः । अन्यैस्त्वन्येपिषट्गुणाउक्ताः । तेऽन्यत्रमत्कृतौ ज्ञेयाः । एषांविश्वामित्राणामविवाहः **अथकश्यपाः** तेपंच । निध्रुवाः । क श्यपाः । शंडिलाः । रैभाः । लौगाक्षयश्च । निध्रुवाणांकाश्यपावत्सारनै ध्रुवेति । कश्यपानांकाश्यपावत्सारासितेति । रेभाणांकाश्यपावत्सारैभ्येति । शण्डिलानांकाश्यपशांडिल्येति । अंत्यस्थानेदेवलोवासितोवा। शांडिलासित देवलेतिवा।कश्यपासितदेवलेतिवाअंत्ययोर्व्यत्ययोवा । देवलासितेतिद्वौवा । लौगाक्षीन्वक्ष्यामः । एषांकश्यपानामविवाहः **अथवसिष्ठाः** तेपंच । व सिष्ठाः । कुंडिनाः । उपमन्यवः । पराशराः । जातूकर्ण्याश्चेति । वसिष्ठानां। वासिष्ठेंद्रप्रमदाभरद्वस्विति । वासिष्ठेत्येकोवा । कुंडिनागांवासिष्ठमैत्रावरुण कौंडिन्येति। उपमन्यूनां। वासिष्ठेन्द्रप्रमदाभरद्वसव्येति । वासिष्ठाभरद्वस्वि द्रप्रमदेतिवा । आद्ययोर्व्यत्ययोवा । पराशराणांवासिष्ठशाक्यपाराशर्येति । जातूकर्ण्यानां । वासिष्ठात्रिजातूकर्ण्येति । वासिष्ठानांसर्वेषामविवाहः अं त्यस्यात्रिभिश्च **अथागस्त्याः** तेचत्वारः । इध्मवाहाः । सांभवाहाः । सो मवाहाः । यज्ञवाहाश्चेति आद्यानांआगस्त्यदाढर्च्युतैध्मवाहेति । आग स्त्येत्येकोवा। सोमवाहानां । आगस्त्यदाढर्च्युतसोमवाहेति। सांभवाहानां सांभवार्होत्यः। यज्ञवाहानांयज्ञवार्होऽत्यः । आद्यौपूर्वोक्तावेव । सारव।हा नांतदंतास्त्रायः । दर्भवाहानांतदंतास्त्रयः । अगस्तीनामागस्त्यमार्हेद्रमायो भुवेति । पूर्णमासानां आगस्त्यपौर्णमासपारणेति । हिमोदकानां आगस्त्यहै मचार्चिहैमोदकेति । पाणिकानामागस्त्यपैनायकपाणिकेति । एतेषट्कचित् । अगस्तीनांसर्वेषामविवाहः **अथद्विगोत्राः** शौंगशौशिरीणां । आंगिरसबा र्हस्पत्यभारद्वाजकात्याक्षीलेतिपंच । कात्याक्षीलयोःस्थानेशौंगशौशिरीवा आंगिरसकात्याक्षीलेतित्रयोवाएषांभरद्वाजैर्विश्वामित्रैश्चाविवाहः । एवंकपि लानांकतानांचसंस्कृतिपूतिमाषादीनां । आंगिरसगौरिवीतसांकृत्येति । शाक्त्यगौरिवीतसांकृत्येतिवाएषांस्वगणस्थैर्वसिष्ठैः शौंगशौशिरैर्लौगाक्षिभि श्चाविवाहः। कश्यपैरपीतिप्रयोगपारिजाते । लौगाक्षीणांकाश्यपावत्सारवासि

ष्ठेति। काश्यपावत्सारासितेतिवाएतेहर्वसिष्ठानक्तंकश्यपाः। एषांवसिष्ठैःकश्यपैःसंस्कृताद्यैश्चाविवाहः। देवरातस्यजामदग्न्यैर्विश्वामित्रश्चाविवाहइतिप्रयोगपारिजातेयदुक्तंबह्वृचश्रुतौ। यथैवांगिरसःसन्नुपेयांतवपुत्रतां। आंगिरसोजन्मनास्याजीगर्तिःश्रुतः कविरित्यंगिरोगणस्थत्वेनभार्गवजामदग्न्यत्वस्मृतेर्बाधात्। तेनप्रत्यक्षश्रुत्याहरिवंशादिस्मृतेश्चबाधात्। तेनद्वौदेवरातौ। एक आंगिरसःश्रुत्युक्तः। अन्योभार्गवःतयोः कल्पभेदेप्यांगिरसेनदेवरातेनजमदग्न्येर्भवत्येवविवाहःभार्गवेणतुनेतितत्वम्। धनंजयानांविश्वामित्रैरत्रिभिश्चाविवाहः। जातूकर्ण्यानांवसिष्ठैरत्रिभिश्चाविवाहः। एवंदत्तक्रीतकृत्रिमस्वयंदत्तपुत्रिकापुत्रादीनांउत्पादकपालकयोः पित्रोर्गोत्रप्रवरावर्ज्याइतिप्रतिप्रवरमंजरीनारायणवृत्तिप्रयोगपारिजातादयः अत्रसर्वत्रोपपत्तयः। मूलंचमत्कृतेप्रवरदर्पणेज्ञेयमितिदिक्। क्षत्रियवैश्ययोस्तुपुरोहितगोत्रप्रवरावेवेतिसर्वसिद्धांतः। यद्यपिबह्वृचपरिशिष्टेकपिभरद्वाजयोर्विवाहउक्तस्तथापिभरद्वाजाश्चकपयोगर्गारौक्षायणाइति। चत्वारोपिभरद्वाजगोत्रैक्यान्नान्वयेयुर्मिथः। कपिगर्गभरद्वाजामिथौरौक्षायणाद्विजाः। नोद्वहेयुःसगोत्रत्वात्प्रवरैक्याच्चकुत्राचिदिति। स्मृत्यर्थसाराद्युक्तेरविवाहएवतयोरितिप्रवरमंजर्यांयद्यपीदमुक्तम् तथापिभृग्वंगिरोगणेषुतुभवत्येव **तथाबह्वृचपरिशिष्टेबौधायनः** एकएवऋषिर्यावत् प्रवरेष्वनुवर्तते॥ तावत्समानगोत्रत्वमृते भृग्वंगिरोगणात् **माधवीयेस्मृत्यंतरे** पंचानात्रिषुसामान्यादविवाहस्त्रिषुद्वयोः॥ भृग्वंगिरोगणेष्वेववंशेष्वेकोपिवारयेदिति देशाचाराच्च॥ सोप्याभीरदेशेप्रसिद्धः **चतुर्विंशतिमते** यस्तुदेशानुरूपेणकुलमार्गेणचोद्वहेत्॥ नित्यंसव्यवहार्यःस्याद्वेदाच्चैतत्प्रदृश्यतइतिदिक् **तथाचभृगुः** यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा। योयत्रविहितोधर्मस्तंधर्मंनविचालयेदिति। पुनश्चतुर्विंशतिमते॥ यस्मिन्देशेतुआचारःपारंपर्यक्रमागतः॥ वर्णानांकिलसर्वेषांसदाचारःसउच्यते॥ स्वगोत्राद्यज्ञानेतुसत्याषाढः। अथानाज्ञातबंधोः पुरोहितप्रवरेणवेति आचार्यगोत्रप्रवरानभिज्ञस्तुद्विजःस्वयम्। दत्वामानंतुकस्मैचित्तद्वो

त्रप्रवरोभवेत् ॥ यद्वास्वगोत्रप्रवरविधुरोजामदग्निजःविवाहंचनतेनैवगोत्रेण तुसमाचरेदितिकश्चित् **दिवोदासीयेपि** स्वगोत्रप्रवराज्ञानेजमदग्निमुपाश्रयेत् । **अथमातृगोत्रानिर्णयःशातातपः** मातुलस्यसुतामूढ्वामातृगोत्रांतथैव च । समानप्रवरांचैवगत्वाचांद्रायणंचरेत् **द्ययपि** सगोत्रांमातुरप्येकेनेच्छंत्युद्वाहकर्मणि । जन्मनाम्नोरविज्ञातेव्युद्वहेदविशंकितइतिव्यासोक्तेरज्ञातनाम त्वेनसगोत्रत्वदोषस्तथापिनेदंकलौप्रवर्तते ॥ गोत्रान्मातुःसपिंडाच्चविवाहोगो वधस्तथेतिकलिवर्जत्वोक्तेः । इदंमातृगोत्रवर्जनंमाध्यंदिनीयानामेव । मातृगोत्रंमाध्यंदिनीयानामपुत्रायाश्चेति । सत्याषाढोक्तेरितिकश्चिन्महाराष्ट्रकल्पितम् । तन्निर्मूलम् । अन्यथागुर्जरादेःकातीयस्यकुतोननिषेधः । अतएवप्रवरमंजरीकारः । दोषस्यातिगुरुत्वात्सर्वेषांमातृगोत्रंवर्ज्यमितियत्रगुर्जरादीनांमाध्यंदिनीयानामप्याचरणाच्च । एकस्मिन्प्रवरेतुल्येमातृगोत्रेवरस्यच ॥ तमुद्वाहंनकुर्वीतसाकन्याभगिनीस्मृतेतिमातृकुलेप्रवरचिंतनमुक्तम् । तदासुरादिविवाहोढापरमितिदिक् । विस्तरस्तुग्रंथांतरेभ्योज्ञेयः **सगोत्रादिविवाहे प्रायश्चित्तंस्मृत्यर्थसारे** इत्थंसगोत्रसंबंधविवाहविषयेस्थिते । यदिकश्चिज्ज्ञानतस्तांकन्यामूढ्वोपगच्छति । गुरुतल्पव्रताच्छुध्येद्गर्भस्तज्जेऽत्यतांव्रजेत् । भोगतस्तापरित्यज्यपालयेज्जननीमिव । अज्ञानादैदवैःशुद्ध्येत्त्रिभिर्गर्भस्तु कश्यपः । एवंसापिंड्येपि । सपिंडापत्यदारेषु प्राणत्यागोविधीयतइतिबृह द्यमोक्तेः **तिथितत्वेबौधायनः** सपिंडांसगोत्रांचेदमत्योपयच्छेन्मातृवदेनां बिभृयात् । **कन्याविवाहकालउक्तोज्योतिर्निबंधे** षडब्दमध्येनोद्वाह्याकन्यावर्षद्वयंयतः । सोमोभुंक्तेततस्तद्वद्गंधर्वश्चतथाऽनलः **राजमार्त्तंडः** अयुग्मेदुर्भगानारीयुग्मेतुविधवाभवेत् । तस्माद्गर्भान्वितेयुग्मोविवाहेसापतिव्रता । मासत्रयादूर्ध्वमयुग्मवर्षेयुग्मोपिमासत्रयमेवयावत् । विवाहशुद्धिंप्रवदंतिसंतोवात्स्यादयःस्त्रीजानिजन्ममासात् **पराशरमाधवीयेतु** जन्मतोगर्भाधानाद्वापंचमाब्दात्परंशुभं । कुमारीवरणंदानंमेखलाबंधनंतथेत्युक्तम् **संबंधतत्त्वेयमः** कन्याद्वादशवर्षाणियाप्रदत्तावसेद्गृहे । ब्रह्महत्यापितुस्त

स्याःसाकन्यावरयेत्स्वयम् **भातरे** त्रिंशद्वर्षःषोडशाब्दांभार्यांविंदेतनग्निकाम्। दशवर्षोऽष्टवर्षांवाधर्मेसीदतिसत्वरः।अतोप्रवृत्तेरजसिकन्यांदद्यात्पितासकृत् **तत्रैव**सप्तसंवत्सरादूर्ध्वंविवाहःसार्ववार्णिकःकन्यायाः शस्यतेराजन्नन्ययाधर्म गर्हितः**राजमार्तंडः** राहुग्रस्तेतथायुद्धेपितृणांप्राणसंशये । अतिप्रौढाचयाक न्याचंद्रलग्नबलेनतु।चकारादतिबाला।प्राणसंशयइत्युक्तेः **मनुः** त्रिंशद्वर्षोवहे त्कन्यांकृत्वाद्वादशवार्षिकीं । द्वयष्टवर्षोष्टवर्षांवाधर्मेसीदतिसत्वरः **यद्यपि** विवाहस्त्वष्टवर्षायाः कन्यायाःशस्यतेबुधैरितिसंवर्त्तोक्तेरतऊर्ध्वरजस्वलेत्यादे श्चदशवर्षादूर्ध्वंविवाहोनिषिद्धः । तथापिदातुरभावेद्वादशषोडशाब्देज्ञेयेत्री णिवर्षाण्यृतुमतीकांक्षेतपितृशासनमिति । पराशरमाधवीयेबौधायनोक्तेश्च **मनुः** स्त्रीसंबंधेदशैतानिकुलानिपरिवर्जयेत् । हीनक्रियंनिःपुरुषंनिश्छंदो रोमशार्शसम् ॥ क्षय्यामयाव्यपस्मारीश्वित्रिकुच्छिकुलानिच । नर्क्षवृक्षनदी नाम्नींनांत्यपर्वतनामिकां । नपक्ष्यहिप्रेष्यनाम्नींनविभीषणनामिकाम् **यमः** तस्मादुद्वाहयेत्कन्यांयावन्नर्तुमतीभवेत्।तथामूलजादीनांफलंप्रागुक्तम् **तथा** वर्णवश्यग्रहमैत्र्यादिघटितविचारोज्योतिर्विद्भ्योज्ञेयः । विस्तरात्तुनोच्यते **अथगुर्वर्कबलं** ॥ **ज्योतिर्निबंधेगर्गः** स्त्रीणांगुरुबलंश्रेष्ठंपुरुषाणांरवेर्बलम् ॥ तयोश्चंद्रबलंश्रेष्ठमितिगर्गेणभाषितम्। जन्मत्रिदशमारिस्थपूजयाशुभदोगुरुः विवाहेऽथचतुर्थाष्टद्वादशस्थोमृतिप्रदः **देवलः** नष्टात्मजाधनवतीविधवाकु शीलापुत्रान्विताहतधवासुभगाविपुत्रा । स्वामिप्रियाविगतपुत्रधवाधनाढ्या वंध्याभवेत्सुरगुरौक्रमशोभिजन्म **बृहस्पतिः** झषचापकुलीरस्थोजीवोप्यशुभ गोचरः । अतिशोभनतांदद्याद्विवाहोपनयादिषु **लल्लः** द्वादशदशमचतुर्थे जन्मनिषष्ठाष्टमेतृतीयेच । प्राप्तेपाणिग्रहणेजीवेवैधव्यमाप्नोति **गर्गः** सर्व त्रापिशुभंदद्यात्द्वादशाब्दात्परंगुरुः । पंचषष्ठाब्दयोरेवशुभगोचरतामता । सप्तमात्पंचवर्षेषुस्वोच्चस्वर्क्षगतोयदि । अशुभोपिशुभंदद्याच्छुभक्षेषुकिंपु नः । रजस्वलायाःकन्यायागुरुशुद्धिनचिंतयेत् । अष्टमेपिप्रकर्तव्योविवाह स्त्रिगुणार्चनात् । अर्कगुर्वोर्बलंगौर्यारोहिण्यर्कबलास्मृता ॥ कन्याचंद्रबला

प्रोक्तावृषलीलग्नतोबला ॥ अष्टवर्षाभवेद्गौरीनववर्षाचरोहिणी ॥ दशवर्षा भवेत्कन्याअतऊर्ध्वंरजस्वला **अथबृहस्पतिशांतिः** ॥ **शौनकाः** कन्यको द्वाहकालेतुआनुकूल्यंनविद्यते ॥ ब्राह्मणस्योपनयनेगुरोर्विधिरुदाहृतः ॥ सुव र्णेनगुरुंकृत्वापीतवस्त्रेणवेष्टयेत् ॥ ईशान्यांधवलंकुंभंधान्योपरिनिधायच ॥ दमनंमधुपुष्पंचपलाशंचैवसर्षपान् ॥मांसीगुडूच्यपामार्गीविडंगीशंखिनीवचा सहदेवीहरिक्रांतासर्वौषधिशतावरि ॥ बालाचसहदेवीचनिशाद्वितयमेवच ॥ कृत्वाज्यभागपर्यंतंस्वशाखोक्तविधानतः ॥ ग्रहोक्तमंडलेभ्यर्च्यपीतपुष्पाक्षता दिभिः ॥ देवपूजोत्तरेकालेततःकुंभानुमंत्रणम् ॥ अश्वत्थसमिधश्चाज्यंपायसं सर्पिषायुतम् ॥ यवव्रीहितिलाःसाज्यामंत्रेणैवबृहस्पतेः ॥ अष्टोत्तरशतंसर्वंहो मशेषंसमापयेत् ॥ पुत्रदारसमेतस्यअभिषेकंसमाचरेत् ॥ कुभाभिमंत्रणोक्तैश्च समुद्रज्येष्ठमंत्रतः ॥ प्रतिमाकुंभवस्त्रंचआचार्यायनिवेदयेत्॥ब्राह्मणान्भोजये त्पश्चाच्छुभदःस्यान्नसंशयः ॥ इतिबृहस्पतिशांतिः **शौनकः** गुर्वादित्येव्य तीपातेवक्रातीचारगेगुरौ ॥ नष्टेशशिनिशुक्रेवाबालेवृद्धेऽथवागुरौ ॥ पौषेचै त्रेऽथवर्षासुशरद्यधिकमासके ॥ केतूद्गमेनिरंशेऽर्केसिंहस्थेमरमंत्रिणि ॥ वि वाहव्रतयात्रादिपुरहर्म्यगृहादिकं ॥ क्षौरंविद्योपविद्यांचयत्नतःपरिवर्जयेत् **म दनपारिजातेज्योतिःसागरे** बालेशुक्रेवृद्धेशुक्रेवृद्धेजीवेनष्टेजीवे ॥ बाले जीवेजीवेसिंहेसिंहादित्येजीवादित्ये ॥ तथामलिम्लुचेमासिसुराचार्येऽतिचा रगे ॥ वापीकूपविवाहादिक्रियाःप्रागुदितास्त्यजेत् ॥ सिंहस्थंमकरस्थंचगु रुंयत्नेनवर्जयेत् **लल्लः** अतिचारगतोजीवस्तंराशिंनैवचेत्पुनः ॥ लुप्तःसंव त्सरोज्ञेयःसर्वकर्मबहिष्कृतः **सिंहस्थगुरोरपवादमाहपराशरः** गोदाभागी रथीमध्येनोद्वाहःसिंहगेगुरौ ॥ मघास्थेसर्वदेशेषुतथामीनगतेरवौ **वसिष्ठो पि** विवाहोदक्षिणेकूलेगौतम्यांनेतरत्रतु ॥ भागीरथ्युत्तरेकूलेगौतम्यादक्षि णेतथा ॥ विवाहोव्रतबंधश्चसिंहस्थेज्येनदुष्यति **कन्यादातृक्रममाहयाज्ञ वल्क्यः** पितापितामहोभ्रातासकुल्योजननीतथा ॥ कन्याप्रदःपूर्वनाशेप्र कृतिस्थः परःपरः ॥ अप्रयच्छन्समाप्नोतिभ्रूणहत्यामृतावृतौ ॥ गम्यत्वाभा

वेदातृणांकन्याकुर्यात्स्वयंवरं **भ्रातृणांसंस्कृतानामेवाधिकारमाहसएव याज्ञवल्क्यः** असंस्कृतास्तुसंस्कार्याभ्रातृभिःपूर्वसंस्कृतैः ॥ भगिन्यश्चनिजादंशाद्दत्वांशंतुतुरीयकम् ॥ अत्रचकारेणापूर्वसंस्कृतैरित्यस्यानुवृत्तेर्विवाहपर्यासद्रव्यदाने स्वांशसमांशचतुर्थभागदानेवासंस्कृतग्रहणंव्यर्थस्यात् । अतःकर्तृनियऽमोयं । तेनानुपनीतभ्रातृमात्रादिसत्वेमात्रादेरेवाधिकारोनभ्रातुरित्युक्तं संबंधतत्त्वादौ।कन्यास्वयंवरेमातुर्दातृत्वेचताभ्यामेवनांदीश्राद्धंकार्यम् । तत्रचस्वयंप्रधानसंकल्पमात्रंकृत्वान्यब्राह्मणद्वाराकारयेदितिप्रयोगपारिजाते । वरस्तुसंस्कृतभ्रात्राद्यभावेस्वयमेवनांदीश्राद्धंकुर्यात् । नमातापुत्रषुविद्यमानेषुनान्यंवैकारयेत्स्वधामितिनिषेधात् उपनयनेनकर्माधिकारस्य जातत्वाच्चेतिपृथ्वीचंद्रोदयः **माधवीयेपरार्केचनारदः** पितादद्यात्स्वयंकन्यांभ्रातावानुमतेपितुः ॥ मातामहोमातुलश्चसकुल्योबांधवस्तथा ॥ मातात्वभावेसर्वेषांप्रकृतौयदिवर्तते ॥ तस्यामप्रकृतिस्थायांकन्यांदद्युःस्वजातयाः ॥ सकुल्यःपितृपक्षीयोबांधवोमातृवंशजः **मदनपारिजातेकात्यायनः** स्वयमेवौरसींदद्यात्पित्रभावेस्वबांधवाः ॥ मातामहस्ततोन्यांहिमातावाधर्मजांसुताम् ॥ ततोन्यामौरसींभिन्नां धर्मजांनियोगात्क्षेत्रजांमातामहोमातामातुलोवादद्यात् । तेनौरसीदानेपितृबंधुषुसत्सुमातामहादीनांनाधिकारःअनुमतिर्विना **अस्यापवादस्तत्रैव** दीर्घप्रवासयुक्तेषुपौगंडेषुचबंधुषु ॥ माता तुसमयेदद्यादौरसीमपिकन्यकाम् **मनुः** यदातुनैवकश्चित्स्यात्कन्याराजानमाव्रजेत् **परकीयकन्यादानेविशेषोमदनरत्नेस्कांदे** आत्मीकृत्यसुवर्णेनपरकीयांतुकन्यकाम् ॥ धर्मेणविधिनादानमसगोत्रेपियुज्यते ॥ अत्रप्रकृतिग्रहणादप्रकृतिस्थेनकृतमकृतमेव । स्वतंत्रोयदितत्कार्यंकुर्यादप्रकृतिंगतः । तदप्यकृतमेवस्यादस्वातंत्र्यस्यहेतुतइत्यपरार्केनारदोक्तेः । यदितुसप्तपदीविवाहहोमादिप्रधानंजातंतदंगवैकल्येपिनावृत्तिर्विवाहस्य । गौडाअप्येवमाहुः **तत्रैवमरीचिः** गौरींददन्नाकपृष्ठेवैकुंठंरोहिणींददत् ॥ कन्यांदद्ब्रह्मलोकंरौरवंतुरजस्वलाम् **अथमासनिर्णयः ॥ तत्रजन्ममासेविशेषःप्रागुक्तं**

ज्योतिःप्रकाशेव्यासः माघफाल्गुनवैशाखेयद्यूढामार्गशीर्षके ॥ ज्येष्ठेवाषाढमासेचसुभगाविन्तसंयुता ॥ श्रावणेवापिपौषेवाकन्याभाद्रपदेतथा ॥ चैत्राश्वयुक्कार्तिकेषुयातिवैधव्यतांलघु **नारदः** माघफाल्गुनवैशाखज्येष्ठमासाः शुभप्रदाः ॥ कार्तिकोमार्गशीर्षश्चमध्यमौनिंदिताःपरे **वसिष्ठः** पौषेपिकुर्यान्मकरस्थितेऽर्केचैत्रेभवेन्मेषगतोयदास्यात् ॥ प्रशस्तमाषाढकृतंविवाहंवदंतिगर्गामिथुनस्थितेऽर्के **आचार्यचूडामणौज्योतिर्गर्गराजमार्तंडौ** मांगल्येषुविवाहेषुकन्यासंवरणेषुच ॥ दशमासाःप्रशस्यंतेचैत्रेपौषविवर्जिताः ॥ आपस्तंबःसर्वऋतवोविवाहस्य । शैशिरौमासौपरिहार्य्यौत्तमंचनैदाघम् । अत्रमाघफाल्गुनाषाढवर्जेनवमासामुख्यः कालइतिसुदर्शनभाष्येंडविलायांब्रह्मविद्यातीर्थैश्चोक्तम् **बौधायनसूत्रेपि** सर्वेमासाविवाहस्यशुचितपस्तपस्यवर्जमित्येके । तेनपूर्वोत्तराशिशिरसंबंधिनौमासौपौषचैत्रौविवाहइति । निर्णयामृतव्याख्यानंमौर्ख्यकृतमित्युपेक्ष्यं । निशिचेत्सर्वेषुद्वादशस्वपिमासेषूद्वहेदितिकालादर्शः । यत्तुज्योतिषेमाधादिविधयस्तेगृह्यसूत्राणांद्विजपरत्वेनप्राबल्याच्छूद्रादिपराः **ज्योतिषे** वात्स्योवर्षमनूनमिच्छतितथारैभ्योऽयनंचोत्तरंश्रीवासंतमृतुंविहायमुनयोमांडव्यशिष्याजगुः ॥ चैत्रंप्रोह्झ पराशरः परिणयेत्पौषंचदौर्भाग्यदंह्याषाढादि चतुष्टयं नहितदंकैश्चित्प्रदिष्टंबुधैः **चण्डेश्वरः** मार्गेमासितथाज्येष्ठेक्षौरंपरिणयंव्रतम् ॥ ज्येष्ठपुत्रदुहित्रोस्तुयत्नेनपरिवर्जयेत् ॥ कृत्तिकास्थंरविंत्यत्क्वाज्येष्ठपुत्रस्यकारयेत् ॥ उत्सवादिषुकार्येषुदिनानिदशवर्जयेत् **रत्नकोशे** जन्मर्क्षेजन्मदिवसेजन्ममासेशुभंत्यजेत् ॥ ज्येष्ठेमास्याद्यगर्भस्यशुभंवर्ज्यंस्त्रियाअपि **पराशरः** अज्येष्ठाकन्यकायत्रज्येष्ठपुत्रोवरोयदि ॥ व्यत्ययोवातयोस्तत्रज्येष्ठमासःशुभप्रदः मिहिरः ॥ ज्येष्ठस्यज्येष्ठकन्यायाविवाहोनप्रशस्यते ॥ तयोरन्यतरेज्येष्ठे ज्येष्ठोमासःप्रशस्यते ॥ द्वौज्येष्ठौमध्यमौप्रोक्तावेकंज्येष्ठंशुभावहम् ॥ ज्येष्ठत्र यंनकुर्वीतविवाहेसर्वसंमतम् ॥ यत्तुसार्वकालमेकेविवाहमितितदासुरादिविवाहविषयम् । धर्म्येषुविवाहेषुकालपरीक्षणंनाधर्म्येष्वितिगृह्यपरिशिष्टात् ॥

रत्नमालायामप्येवं ॥ तेनासुरादयोमाघचैत्रादिनिषिद्धकालेष्वपिभवंति । मा सा:सौराः । सौरोमासोविवाहादावित्युक्तः । झषोननिंद्योयदिफाल्गुनेस्याद जस्तुवैशाखगतोननिंद्यइतित्वपवादः । अथदशदोषाः व्यवहारोच्चये वेध श्चलत्ताचतथैवपातःखर्जूरवेधोदशयोगचक्रम् ॥ युतिश्चजामित्रमुपग्रहश्चबा णाख्यवज्रेचदशैवदोषाः ॥ एषांलक्षणंज्योतिषेज्ञेयम् अतिचारगेगुरौतुव सिष्ठः अतिचारगतेजीवेवर्जयेत्तदनंतरम् ॥ विवाहादिषुकार्येषुअष्टविंशति वासरान् रत्नमालायाम् एकपंचनवयुग्मषट्दशत्रीणिसप्तचतुरष्टलाभगः ॥ द्वादशाजवृषभादिराशितोघातचन्द्रइतिकीर्तितोबुधैः नारदः भूबाणनंद हस्ताश्वरसदिग्वह्निशैलजाः ॥ वेदावसुशिवादित्याघातचंद्रोयथाक्रमम् ॥ यात्रायांयुद्धकार्येषुघातचंद्रविवर्जयेत्॥विवाहेसर्वमांगल्येचौलादौव्रतबंधने॥ घातचंद्रोनैवचिंत्यइतिपराशरोऽब्रवीत् ॥ ज्योतिर्निबंधे विवाहचौलव्र तबंधयज्ञेपट्टाभिषेकेचतथैवराज्ञाम् ॥ सीमंतयात्रासुतथैवजातेनोचिंतनीयः खलुघातचंद्रः नारदः अकालजाभवेयुश्चेद्विद्युन्नीहारवृष्टयः ॥ प्रत्यर्कप रिवेषेंद्रचापाभ्राध्वनयोयदि ॥ दोषायमंगलेनूनंनदोषायैवकालजाः ॥ अ कालवृष्टिस्वरूपमाहलल्लःपौषादिचतुरोमासाः प्रोक्तावृष्टिरकालजेति शार्ङ्ग धरःनिर्घातेक्षितिचलनेग्रहयुद्धे राहुदर्शनेचैव आपंचदिनात्कन्यापरि णीतानाशमुपयाति ॥ उल्कापातेंद्रचापप्रबलघनरजोधूमनिर्घातविद्युट्दृष्टि प्रत्यर्कदोषादिषु सकलबुधैस्त्याज्यमेवैकरात्रमदुःस्वप्नेदुर्निमित्तेह्यशुभफलद शोदुर्मनोभ्रांतबुद्धौचौलेमौंजीनिबंधेपरिणयनविधौसर्वदात्याज्यमेव ज्योतिः प्रकाशे अर्वाक्षोडनाडयःसंक्रांतेःपुण्यदाःपरतः ॥ उपनयनव्रतयात्राप रिणयनादौविवर्ज्यास्ताः गर्गः दिग्दाहेदिनमेकंचगृहेसप्तदिनानितु ॥ भू कंपेचसमुत्पन्नेत्र्यहमेवतुवर्जयेत् ॥ उल्कापातेत्रिदिवसंधूमेपंचदिनानिच ॥ वज्रपातेचैकदिनंवर्जयेत्सर्वकर्मसु ॥ दर्शनादर्शनाद्राहुकेत्वोःसप्तदिनंत्यजे त् ॥ यावत्केतूद्गमस्तावदशुभःसमयोभवेत् ॥ अस्यापवादोऽद्भुतसागरे अथदिवसत्रयमध्येमृदुपानीयंयदाभवति ॥ उत्पातदोषशमनंतदैवसंप्राहुरा

चार्याः **संबंधतत्वे** भूकंपादेर्नदोषोस्तिवृद्धिश्राद्धेकृतेसति ॥ अथपरिहार्ये कन्यायावैधव्ययोगेविशेषउच्यते **मार्कण्डेयपुराणे** बालवैधव्ययोगेतुकुंभेद्रु प्रतिमादिभिः ॥ कृत्वालग्नततः पश्चात्कन्योद्वाह्येतिचापरे **अत्रपुनर्दोषा भावउक्तोविधानखंडे** स्वर्णांबुपिप्पलानांचप्रतिमाविष्णुरूपिणी ॥ तयास हविवाहेतुपुनर्भूत्वंनजायते **सूर्यारुणसंवादे** विवाहात्पूर्वकालेच चंद्रता राबलान्विते ॥ विवाहोक्तेचतांकन्यांकुंभेनसहचिद्वहेत् ॥ सूत्रेणवेष्टयेत्पश्चा द्वशतंतुविधानतः ॥ कुंकुमालंकृतंदेहंतयोरेकांतमंदिरे ॥ ततःकुंभंचनिःसा र्यप्रभज्यसलिलाशये ॥ ततोऽभिषेचनंकुर्यात्पंचपल्लववारिभिः ॥ कुंभप्रार्थ नातत्रैव ॥ वरुणांगस्वरूपायजीवनानांसमाश्रय ॥ पतिजीवयकन्यायाश्चिरंपु त्रसुखंकुरु ॥ देहिविष्णोवरंदेवकन्यांपालयदुःखतः ॥ ततोऽलंकारवस्त्राढ्यां वरायप्रतिपादयेत् ॥ इतिकुंभविवाहः ॥ मूर्तिदानमपितत्रैवोक्तं ॥ ब्राह्मणंसा धुमामंत्र्यसंपूज्यविविधार्हणैः ॥ तस्मैदद्याद्विधानेनविष्णोर्मूर्तिंचतुर्भुजां ॥ शुद्धवर्णसुवर्णेनवित्तशक्त्याथवापुनः ॥ निर्मितांरुचिराशंखगदाचक्राब्जसं युताम् ॥ दधानांवाससीपीतेकुमुदोत्पलमालिनीं ॥ सदक्षिणांचतादद्यान्मं त्रमेनमुदीरयेत् ॥ यन्मयाप्रांचजनुषिन्नंत्यापतिसमागमम् ॥ विषोपविषशस्त्रा द्यैर्हतोवातिविरक्तया ॥ प्राप्यमानंमहाघोरंयशःसौख्यधनापहम् ॥ वैध व्याद्यतिदुःखौघनाशायशुभलब्धये ॥ बहुसौभाग्यलब्ध्यैश्चमहाविष्णोरिमां तनुम् ॥ सौवर्णींनिर्मितांशक्त्यातुभ्यंसंप्रददेद्विज ॥ अनघाद्याहमस्मीति त्रिवारंप्रजपेदिति ॥ एवमस्त्वितितस्योक्तिंगृहीत्वास्वगृहंविशेत् ॥ ततोवै वाहिकंकुर्याद्विधिदातामृगीदृशः ॥ अन्येप्यश्वत्थविवाहवृक्षसेचनादयस्त त्रैवज्ञेयाः **विस्तरभयान्नोच्यतेअथप्रतिकूलादिज्योतिर्निबंधेगर्गः** कृते तुनिश्चयेपश्चान्मृत्युर्भवतिकस्यचित् ॥ तदानमंगलंकुर्यात्कृतेवैधव्यमाप्नु यात् **ज्योतिर्मेधातिथिः** वधूवरार्थंघटितेसुनिश्चितेवरस्यगेहेप्यथकन्यका याः ॥ मृत्युर्यदिस्यान्मनुजस्पकस्यचित्तदानकार्यंखलुमंगलंबुधैः ॥ मंगलं विवाहः **स्मृतिचंद्रिकायाम्** कृतेवाङ्गनिश्चयेपश्चान्मृत्युर्मर्त्यस्यगोत्रिणः ॥

तदानमंगलंकार्यनारिवैधव्यदंध्रुवम् **भृगुः** वाग्दानानंतरंयत्रकुलयोःकस्य चिन्मृतिः ॥ तदोद्वाहोनैवकार्यःस्ववंशक्षयदोयतः **शौनकः** वरवध्वोः पितामातापितृव्यश्चसहोदरः ॥ एतेषांप्रतिकूलंचमहाविघ्नपदंभवेत् ॥ पिता पितामहश्चैवमाताचैवपितामही ॥ पितृव्यःस्त्रीसुतोभ्रातामगिनीचाविवाहिता ॥ एभिरत्रविपन्नैश्चप्रतिकूलंबुधैःस्मृतम् ॥ अन्यैरपिविपन्नैस्तुकेचिदूचुर्नतद्भवेत् **मांडव्यः** वाग्दानानंतरंमातापिताभ्रातावियद्यते ॥ विवाहोनैव कर्तव्यःस्ववंशस्थितिमिच्छता **संकटेतुमेधातिथिः** वाग्दानानंतरंयत्रकुलयोःकस्यचिन्मृतिः ॥ तदासंवत्सरादूर्ध्वंविवाहःशुभदोभवेत् **स्मृतिरत्नावल्याम्** पितुरब्दमशौचंस्यात्तदर्धंमातुरेवच । मासत्रयंतुभार्यायास्तदर्धंभ्रातृपुत्रयोः ॥ अन्येषांतुसपिंडानामाशौचंमासमीरितं ॥ तदंतेशांतिकंकृत्वा तातोलग्नंविधीयते ॥ **ज्योतिःप्रकाशे** प्रतिकूलेऽपिकर्तव्योविवाहोमासतःपरः शांतिंविधायगांदत्वावाग्दानादिचरेत्पुनः ॥ शांतिंविनायकशांतिं **तथाच मेधातिथिः** संकटेसमनुप्राप्तेयाज्ञवल्क्येनयोगिना । शांतिरुक्तागणेशस्य कृत्वातांशुभमाचरेदिति ॥ प्रतिकूलेनकर्तव्योगच्छेद्यावद्दतुत्रयम् ॥ प्रतिकूलेपिकर्तव्यमित्याहुर्बहुविष्णवे ॥ प्रतिकूलेसपिंडस्यमासमेकंविवर्जयेत् **ज्योतिःसारे** दुर्भिक्षेराष्ट्रभंगेचपित्रोर्वाप्राणसंशये ॥ प्रौढायामपिकन्यायां नानुकूल्यंप्रतीक्ष्यते **मेधातिथिः** पुरुषत्रयपर्यंतंप्रतिकूलंस्वगोत्रिणाम् ॥ प्रवेशान्निर्गमस्तद्वत्तथामंडनमुंडने ॥ प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियां॥ आचतुर्थंततःपुंसिपंचमेशुभदंभवेत् अथरजोदोषोनिर्णयः **माधवीये** प्रारंभात्प्राग्विवाहस्यमातायदिरजस्वला ॥ निवृत्तिस्तस्यकर्तव्यासहत्वश्रुतिचोदनात् ॥ आरंभात्नांदीश्राद्धात् । नांदीमुखंविवाहादावित्यादिनातस्यैवप्रारंभोक्तेः **मेधातिथिः** चौलेचव्रतबंधेचविवाहेयज्ञकर्मणि ॥ भार्यारजस्वलायस्यप्रायस्तस्यनशोभनं ॥ वधूवरान्यतमयोर्जननीचेद्रजस्वला ॥ तस्याःशुद्धेःपरंकार्यमांगल्यंमनुरब्रवीत् **वृद्धमनुः** विवाहव्रतचूडासुमातायदि रजस्वला ॥ तदानमंगलंकार्यशुद्धौकार्यशुभेप्सुभिः **गर्गः** यस्योद्वाहादिमां

गल्येमातायदिरजस्वला ॥ तदाननत्प्रकर्तव्यमायुःक्षयकरंयतः **नांदीश्रा द्धोत्तरंरजोदोषेतुकर्पर्दिकारिकासु** सूतिकोदक्ययोःशुध्येद्गांदद्याद्धोमपूर्व कम् ॥ हैमींमाषमितांपद्मांश्रीसूक्तविधिनार्चयेत् ॥ प्रत्यृचंपायसंहुत्वाअभि षेकंसमाचरेदिति **सूतकादिसंकटेतु** कूष्मांडीभिर्घृतंहुत्वापयस्विनींगांचद त्वाविवाहादिकुर्यादितिचप्रागुक्तं **अथैकक्रियानिर्णयःज्योतिर्निबंधेवृद्ध मनुः** एकमातृजयोरेकवासरेपुरुषस्त्रियोः ॥ नसमानक्रियांकुर्यान्मातृभे देविधीयते ॥ एतेनएकस्यपुंसोविवाहद्वयमेकदिनेनिषिद्धंमातृभेदाभावा त् **नारदः** पुत्रोद्वाहात्परंपुत्रीविवाहोनऋतुत्रये ॥ नतयोर्व्रतमुद्वा हान्मंडनादपिमुंडनम् **वराहः** विवाहस्त्वेकजातानांषण्मासाभ्यंतरेयदि ॥ असंशयंत्रिभिर्वर्षैस्तत्रैकाविधवाभवेत् **मदनरत्नेवसिष्ठः** नपुंवि वाहोर्ध्वमृतुत्रयेपिविवाहकार्यदुहितुःप्रकुर्यात् ॥ नमंडनाच्चापिहिमुंडनं चगात्रैकतायांयदिनाब्दभेदः ॥ एकोदरभ्रातृविवाहकृत्यंस्वसुर्नपाणिग्रहणं विधेयम् ॥ षण्मासमध्येमुनयःसमूचुर्नमुंडनंमंडनतोपिकार्यम् ॥ एतदपवाद स्तत्रैव ॥ ऋतुत्रयस्यमध्येचेदन्याब्दस्यप्रवेशनम् ॥ तदाह्येकोदरस्यापिवि वाहस्तुप्रशस्यते **सारावल्यां** फाल्गुनेचैत्रमासेतुपुत्रोद्वाहोपनायने ॥ भेदा ब्दस्यप्रकुर्वीतनर्तुत्रयविलंघनं**संहिताप्रदीपे** ऊर्ध्वंविवाहात्तनयस्यनैवकार्यो विवाहोदुहितुःसमार्धं॥ अप्राप्यकन्यांश्वशुरालयंचवधूःप्रवेश्यास्वगृहंचनादौ **मदनरत्नेवसिष्ठः** द्विशोभनंत्वेकगृहेपिनेष्टंशुभंतुपश्चान्नवभिर्दिनैस्तु॥ आव श्यकंशोभनमुत्सवोवाद्वारेथवाचार्यविभेदतोवा ॥ एकोदरप्रसूतानांनाग्निका र्यत्रयंभवेत्॥ भिन्नोदरप्रसूतानांनेतिशातातपोऽब्रवीत् **ज्योतिर्निबंधेकात्या यनः** कुलेऋतुत्रयादर्वाङ्मुंडनान्नतुमंडनं ॥ प्रवेशान्निर्गमोनेष्टोनकुर्यान्मंग लत्रयम् ॥ कुर्वीतिमुनयःकेचिदन्यस्मिन्वत्सरेलघु ॥ लघुवागुरुवाकार्यप्राप्तं नैमित्तिकंतुयत् ॥ पुत्रोद्वाहःप्रवेशाख्यःकन्योद्वाहस्तुनिर्गमः ॥ मुंडनंचौल मित्युक्तंव्रतोद्वाहौतुमंगलम् ॥ चौलंमुंडनमेवोक्तंवर्जयेन्मंडनात्परम् ॥ मौंजीचोभयतःकार्यायतोमौंजीनमुंडनम् ॥ अभिन्नवत्सरेपिस्यात्तदहस्तत्र

भेदयेत् ॥ अभेदेतुविनाशःस्यान्नकुर्यादेकमंडपे ॥ संकटेतुकपार्दिकारिका सुवराहामिहिरश्च । उद्वाह्यपुत्रींनपितापिवदध्यात्पुत्र्यंतरस्योद्वहनंकदाचित् ॥ यावच्चतुर्थदिनमत्रपूर्वसमाप्यचान्योद्वहनंविदध्यात् **कश्यपः** मौंजीबंधस्त थोद्वाहः षण्मासाभ्यंतरेपिवा ॥ पुत्र्युद्वाहंनकुर्वीत विभक्तानांनदोषकृत् **ज्योतिर्निबंधे** विवाहमारभ्यचतुर्थिमध्येश्राद्धंदिनंदर्शदिनंयदिस्यात् ॥ वै धव्यमाप्नोतितदाशुकन्याजीवेत्पतिश्चेदनपत्यतास्यात् **तथा** विवाहमध्येय दिचेत्क्षयाहस्तत्रस्वमुख्याःपितरोनयांति ॥वृत्तेविवाहेपरतस्तुकुर्याच्छ्राद्धंस्व धाभिर्नतुदूषयंति ॥ स्वधाभिरितिश्रुतेश्च **मासिकविषयेकालहेमाद्रौशा ढ्यायनिः** प्रेतश्राद्धानिसर्वाणिसपिंडीकरणंतथा ॥ अपकृष्यापिकुर्वीतकर्तुर्नां दीमुखंद्विजः **वृद्धिंविनापकर्षेदोषमाहतत्रैवोशनाः** वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानियश्चरेत् ॥ सश्राद्धीनरकेघोरेपितृभिःसहमज्जतीति मेधाति थिः ॥ प्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियाम् ॥ आचतुर्थेततःपुंसिपंचमे शुभदंभवेत् **स्मृत्यंतरे** सपिंडीकरणादर्वागपकृष्यकृतान्यपि ॥ पुनरप्यपकृ ष्यंतेवृध्युत्तरनिषेधनात् **स्मृतिसारावल्याम्** भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयु गेतथा ॥ एकस्मिन्मंडपेचैवनकुर्यान्मंडनद्वयम् ॥ सोदरविषयमेतत् **यमः** एकोदरप्रसूतानामेकस्मिन्वासरेपुनः ॥ विवाहेनैवकुर्वीतमंडनोपरिमुंडनम् **गार्ग्यः** भ्रातृयुगेस्वसृयुगेभ्रातृस्वसृयुगेतथा ॥ नकुर्यान्मंगलंकिंचिदेकस्मि न्मंडपेहनि ॥ एकस्मिन्वासरेप्राप्तेकुर्याद्यमलजातयोः ॥ क्षौरंचैवविवाहंच मौंजीबंधनमेवच **ज्योतिर्विवरणे** एकोदरयोरेकदिनोद्वहनेभवेन्नाशः ॥ न द्यंतरएकदिनेकेप्याहुःसंकटेचशुभम् ॥ ऊर्ध्वंविवाहाच्छुभदोनरस्यनारीविवा होनऋतुत्रयंस्यात् ॥ नारीविवाहात्तदहेपिशस्तंनरस्यपाणिग्रहमाहुरार्याः ॥ भिन्नमातृजयोस्तुएकवासरेविवाहमाहमेधातिथिः । पृथङ्मातृजयोःकार्यो विवाहस्त्वेकवासरे ॥ एकस्मिन्मंडपेकार्यःपृथग्वेदिकयोस्तथा ॥ पुष्पपट्टिक योःकार्यदर्शनंनशिरस्थयोः ॥ भगिनीभ्यामुभाभ्यांचयावत्सप्तपदीभवेत् ॥ यमयोस्तुविशेषः **भट्टकारिकायाम्** एकस्मिन्वत्सरेचैकवासरेमंडपेतथा ॥

कर्तव्यंमंगलंस्वस्रोर्भ्रात्रोर्यमलजातयोः **ज्योतिर्निबंधेनारदः** प्रत्युद्वाहोनै वकार्योनैकस्मैदुहितृद्वयम् ॥ नैवैकजन्ययोःपुंसोरेकजन्येतुकन्यके ॥ नैवं कदाचिदुद्वाहोनैकदामुंडनद्वयम् ॥ नैकजन्येतुकन्येद्वेपुत्रयोरेकजन्ययोः ॥ नपुत्रीद्वयमेकस्मैप्रदद्यात्तुकदाचनेति ॥ कन्यायारजोदर्शनेतुअपरार्केसंव र्तः । माताचैवपिताचैवज्येष्ठभ्रातातथैवच ॥ त्रयस्तेनरकंयांतिदृष्ट्वाकन्यांर जस्वलाम् **हारीतः** पितुर्गेहेतुयाकन्यारजःपश्यत्यसंस्कृता ॥ साकन्या वृषलीज्ञेयातत्पतिर्वृषलीपतिः॥देवलात्रिकश्यपाः पूर्वार्धंतदेव भ्रूणहत्यापितु स्तस्याःसाकन्यावृषलीस्मृता ॥ यस्तांसमुद्वहेत्कन्यां ब्राह्मणोज्ञानदुर्बलः ॥ अश्राद्धेयमपांक्तेयंतंविद्याद्वृषलीपतिम् **माधवीयेबौधायनः** त्रीणिवर्षाण्यृतु मतीकांक्षेतपितृशासनम् **विष्णुः** ऋतुत्रयमुपास्यैवकन्याकुर्यात्स्वयंवरम् **अत्रवरस्यदोषाभावमाहयमः** कन्याद्वादशवर्षाणियाप्रदत्तावसेद्गृहे ॥ भ्रूणहत्यापितुस्तस्याःसाकन्यावरयेत्स्वयम् ॥ एवंचोपनतांपत्नींनावमन्येत्क दाचन ॥ नतुतांबंधकींविद्यान्मनुःस्वायंभुवोऽब्रवीत् **मनुः** अलंकारंनाद दीतपितृदत्तंस्वयंवरे ॥ पितृदत्तंमातृदत्तंस्तेयीस्याद्यदितंहरेत् **वरंप्रत्याह** पि त्रेनदद्याच्छुल्कंतुकन्यामृतुमतींहरन् ॥ सहिस्वाम्यादतिक्रामेद्दतूनांप्रतिबो धनात् **अत्रप्रायश्चित्तमुक्तमाश्वलायनेन** कन्यामृतुमतींशुद्धांकृत्वानिष्कृ तिमात्मनः॥शुद्धिंचकारयित्वातामुद्वहेदनृशंस्यधीः ॥ पिताऋतून्स्वपुत्र्या स्तुगणयेदादितःसुधीः॥दानावधिगृहेयत्नात्पालयेच्चरजोवतीम्॥दद्याच्चद्दतु सङ्ख्यागाःशक्तःकन्यापितायदि॥दातव्यैकापिनिःस्वेनदानेतस्यायथाविधि दद्याद्ब्राह्मणेष्वन्नमतिनिःस्वःसदक्षिणम् ॥ तस्यातीतर्तुसंख्येषुवरायप्राति पादयेत् ॥ उपोष्यत्रिदिनंकन्यांरात्रौपीत्वागवांपयः ॥ अदृष्टरजसेदद्यात्क न्यायैरत्नभूषणम्॥तामुद्वहन्वरश्चापिकूष्माण्डैर्जुहुयाद्द्विजइति **मदनपारि जातेयज्ञपार्श्वः**विवाहेवितनेयज्ञेहोमकालउपस्थिते ॥ कन्यामृतुमतींदृष्ट्वा कथंकुर्वंतियाज्ञिकाः ॥ स्नापयित्वातुतांकन्यामर्चयित्वायथाविधि ॥ युंजा नामाहुतिंहुत्वाततस्तंत्रंप्रवर्तयेत् ॥ **बौधायनसूत्रे** अथयदिकन्योपसाद्य

मानाचोह्यमानावारजस्वलास्यात्तामनुमंत्रयेत् ॥ पुमांसौमित्रावरुणौपुमांसा वश्विनावुभौ ॥ पुमानिंद्रश्चसूर्यश्चपुमांसंचदधात्वियमिति ॥ अथद्वादशरात्रमलंकृत्यप्राशयेत्पंचगव्यमथशुद्धांकृत्वाविवहेत् । अत्रगांधर्वाद्यष्टौविवाहास्तद्व्यवस्थाचाकरेज्ञेया **मनुः** षडानुपूर्व्याविप्रस्यक्षत्रस्यचतुरोवरान् ॥ विट्शूद्रयोस्तुतानेवविद्याद्धर्म्यानराक्षसान् **चतुरः** आसुरगांधर्वराक्षसपैशाचान्तान्राक्षसवर्ज्यान्वैश्यशूद्रयोःसएव । आसुरंवैश्यशूद्रयोः **हेमाद्रौपैठीनसिः** राक्षसोवैश्यस्यपैशाचःशूद्रस्यप्रचेताः । पैशाचोसंस्कृतप्रसूतानांप्रतिलोमजानांच **मनुः** राज्ञस्तयासुरोवैश्येशूद्रेचांत्यस्तुगर्हितःक्षात्रियादेःसंकटे **पैशाचमाहमाधवीयेवत्सः** सर्वोपायैरसाध्यास्यात्सुकन्यापुरुषस्यया ॥ चौर्येणापिविवाहेनसाविवाह्यारहःस्थिता **गान्धर्वादिविवाहेष्वप्युदकपूर्वकंदानमाहतत्रैवयमः** नोदकेननवावाचाकन्यायाःपतिरुच्यते ॥ पाणिग्रहणसंस्कारात्पतित्वंसप्तमेपदे **पराशरमाधवीयेदेवलोपि** गांधर्वादिविवाहेषुपुनर्वैवाहिकोविधिः ॥ कर्त्तव्यश्चत्रिभिर्वर्णैःसमर्थेनाग्निसाक्षिकः ॥ त्रैवर्णोक्तेर्गांधर्वादौविप्रवर्जमधिकारउक्तः**तत्रैवपरिशिष्टे** गान्धर्वासुरपैशाचाविवाहाराक्षसश्चयः ॥ पूर्वपरिश्रयस्तेषुपश्चाद्धोमोविधीयते ॥ अतोहोमादावकृतेभार्यात्वाभावाद्वरांतरायदेया **तथाचतत्रैववसिष्ठबौधायनौ** बलादपहृताक न्यामंत्रैर्यदिनसंस्कृता ॥ अन्यस्मैविधिवद्देयायथाकन्यातथैवसेति ॥ अत्र मंत्रसंस्काराभावेऽन्यस्मैदानस्यसर्वविवाहेषुसाम्याद्बलादपहारेराक्षसपैशाचयोर्विशेषवचनंव्यर्थंतेनतयोर्यदिनसंस्कृतासंस्कृतावेत्यावृत्य कन्यानुमत्यावान्यस्मैदेयेतिव्याख्येयं **मदनपारिजातेनारदः** पाणिग्रहणिकामंत्रानियतंदारलक्षणाम् ॥ तेषांचनिष्ठाविज्ञेयाविद्वद्भिःसप्तमेपदे ॥ स्मृतिचन्द्रिकायामपरार्केचैवं **आशौचेतुयाज्ञवल्क्यः** दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे ॥ आपद्यपिचकष्टायांसद्यःशौचंविधीयते ॥ केषामित्यपेक्षिते **ब्रह्मपुराणेउक्तं** दातुःप्रतिगृहीतुश्चकन्यादानेचनोभवेत् ॥ विवाहविष्णोःकन्यायालाजहोमादिकर्मणीति ॥ व्रतयज्ञविवाहेषुश्राद्धेहोमेऽर्चनेजपे ॥ आरब्धेसूतकंन

स्यादनारब्धेतुसूतकमितिविष्णुवचनाच्च **प्रारम्भस्तेनैवोक्तः** प्रारम्भोवरणं यज्ञेसंकल्पोव्रतसत्रयोः ॥ नान्दीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति ॥ व रणमितिमधुपर्कपरं । गृहीतमधुपर्कस्ययजमानाच्चऋत्विजः ॥ पश्चादशौचेप तितेनभवेदितिनिश्चयइतिब्राह्मोक्तेः ॥ मधुपर्कात्पूर्व्वंतुभवत्येवाशौचमिति शुद्धिविवेकः । रामाण्डारभाष्येप्येवम् **नान्दीमुखावधिश्चस्मृत्यन्तरे** ए कविंशत्यहर्यज्ञेविवाहेदशवासराः ॥ त्रिषट्चौलोपनयनेनांदीश्राद्धंविधीय ते **आरम्भाभावेपिलग्नांतराभावगद्यविष्णुः** नदेवप्रतिष्ठाविवाहयोःपूर्वसं भृतयोरपीति **अत्रप्रायश्चित्तमाहमदनपारिजातेविष्णुः** अनारब्धविशु द्ध्यर्थंकूष्माण्डैर्जुहुयाद्घृतम् । गांदद्यात्पञ्चगव्याशीततःशुद्ध्यतिसूतकी **संग्रहेपि** संकटेसमनुप्राप्तेसूतकेसमुपागते । कूष्माण्डीभिर्घृतंहुत्वागांचद द्यात्पयस्विनीम् ॥ चूडोपनयनोद्वाहप्रतिष्ठादिकमाचरेत् ॥ यदैवसूतकप्रा प्तिस्तदैवाभ्युदयक्रिया **अन्नादिष्वविशेषःषट्त्रिंशन्मते** विवाहोत्सवयज्ञे षुत्वंतरामृतसूतके ॥ परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः ॥ परैरसगोत्रैः । भुंजानेषुतुविप्रेषुत्वंतरामृतसूतके ॥ अन्यगेहोदकाचांताःसर्वेतुशुचयःस्मृताः ॥ एकदाशौचात्पूर्वमपृथक्कृतान्नविषयं ॥ तत्रशेषमन्नंत्याज्यमित्यर्थः **पृथ क्कृतेषुतुबृहस्पतिराह** विवाहोत्सवयज्ञेषुत्वंतरामृतसूतके ॥ पूर्वसंकल्पिता न्नेषुनदोषःपरिकीर्तितइति **धर्मार्थंविवाहकरणेफलमुक्तंमहाभारते** ज्ञात्वा स्ववित्तसामर्थ्यादेकंचोद्वाहयेद्द्विजं ॥ तेनाप्याप्नोतितत्स्थानंशिवभक्तोनरो ध्रुवम् **अपरार्केदक्षः** मातापित्रविहीनंतुसंस्कारोद्वाहनादिभिः ॥ यःस्थाप यतितस्येहपुण्यसंख्यानविद्यते **मदनरत्नेभविष्ये** विवाहादिक्रियाकालेत त्क्रियासिद्धिकारणम् ॥ यःप्रयच्छतिधर्मज्ञःसोश्वमेधफलंलभेत् **कन्यागृहे भोजननिषेधोपितत्रैव** अप्रजायान्तुकन्यायांनभुंजीतकदाचन ॥ दौहि त्रस्यमुखंदृष्टाकिमर्थमनुशोचति **अपरार्केआदित्यपुराणे** विष्णुंजामातरं मन्येतस्यकोपंनकारयेत् ॥ अप्रजायांतुकन्यायांनाश्नीयात्तस्यवैगृहे ॥ ब्रह्म देयांनवैकन्यांदत्वाश्नीयात्कदाचन ॥ अथभुंजीथमोहाच्चेत्पूयाशेनरकेवसेत् ॥

तत्रैवकश्यपः अहतंयंत्रनिर्मुक्तंवासःप्रोक्तंस्वयंभुवा ॥ शस्तंतन्माङ्गलिक्येषुतावत्कालंनसर्वदा॥यन्त्रनिर्मुक्तंनूतनम् **विवाहमध्येस्त्रियासहभोजनेपिनदोषइत्याहहेमाद्रौप्रायश्चित्तकाण्डेगालवः** विवाहकालेयात्रायांपथिचौरसमाकुले ॥ असहायोभवेद्विप्रस्तदाकार्यंद्विजन्मभिः ॥ एकयानसमारोहएकपात्रेचभोजनम् ॥ विवाहेपथियात्रायांकृत्वाविप्रोनदोषभाक् ॥ अन्यथादोषमाप्नोतिपश्चाच्चांद्रायणंचरेत् ॥ मिताक्षरायामप्येवम् **रत्नमालायाम्** मूलमैत्रमृगरोहिणीकरैःपौष्णमारुतमघोत्तरान्वितैः ॥ भौमसौरिरविवारवर्जितेपाणिपीडनविधिर्विधीयते **अत्रानिष्टनक्षत्रादौदानमुक्तंज्योतिषे** विप्तारेगुडंदद्यान्निधनेतिलकांचनम् ॥ प्रत्यरेलवणंदद्याच्छागंदद्याद्विजन्मसु ॥ चंद्रेचशंखंलवणंचतारेतिथौविरुद्धेत्वथतंदुलांश्च ॥ धान्यंचदद्यात्करणेचवारेयोगेविरुद्धेकनकंप्रदेयम् **विवाहमंडपमाहवसिष्ठः** षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम् ॥ मंडपंतोरणैर्युक्तंतत्रवेदिंप्रकल्पयेत् ॥ अष्टहस्तंतुरचयेन्मंडपंवाद्विषट्करं **दैवज्ञमनोहरः** चित्राविशाखाशततारकाश्विनीज्येष्ठाभरण्यौशिवभाच्चतुष्टयम् ॥ हित्वाप्रशस्तंफलतैलवेदिकाप्रदानकंकंडनमंडपादिकम् **हेमाद्रौव्यासाः** कंडनदलनयवारकमंडपमृद्वेदिवर्णकाद्यखिलम् ॥ तत्संबंधिगतागतमृक्षेवैवाहिकेकुर्यात् ॥ यवारकंचिकसाइतिप्रसिद्धम् ॥ वैवाहिकेतुदिवसेशुभेवाथतिथौशुभे ॥ चतुर्थिकंप्रकुर्वीतविधिद्दष्टेनकर्मणा **वेदिमाहनारदः** हस्तोच्छ्रितांचतुर्हस्तैश्चतुरस्रांसमंततः ॥ स्तंभैश्चतुर्भिःसुश्लक्ष्णां वामभागेतुसद्मनि ॥ समांतथाचतुर्दिक्षुसोपानैरतिशोभिताम् ॥ प्रागुदक्प्रवणारंभांस्तंभहंसशुकादिभिः ॥ एवंविधामारुरुक्षेन्मिथुनंसाग्निवेदिकामिति **सप्तर्षिमते** मंगलेषुचसर्वेषुमंडपोगृहमानतः ॥ कार्य्यःषोडशहस्तोवाद्द्व्यूनहस्तोदशावधि ॥ स्तंभैश्चतुर्भिरेवात्रवेदीमध्येप्रतिष्ठिता ॥ हस्तोवध्वाः सोपानंपश्चिमतः उपरिभागेउक्तपरिमाणाद्विन्नम् **अथमृदाहरणंज्योतिर्निबंधेनारदः** कर्तव्यंमंगलेष्वादौमंगलायांकुरार्पणम् ॥ नवमेसप्तमेवापिपंचमेदिवसेपिवा ॥ तृतीयेबीजनक्षत्रे शुभवारेशुभोदये ॥

सम्यग्गृहाण्यलंकृत्यवितानध्वजतोरणैः ॥ सहवादित्रनृत्याद्यैर्गत्वाप्रागुत्तरां दिशम् ॥ तत्रमृत्सिकतांश्लक्ष्णांगृहीत्वापुनरागतः ॥ मृन्मयेष्वथवावैणवेषु पात्रेषुयोजयेत् ॥ अनेकबीजसंयुक्तां तोयपुष्पोपशोभिताम् **शौनकः** आधानंगर्भसंस्कारंजातकर्म्मचनामच ॥ हित्वान्यत्रविधातव्यंमंगलेकुरुवापनम् **बृहस्पतिः** आत्यंतिकेषुकार्येषुकार्यसद्योऽकुरार्पणम् **तत्रैववाग्दानंहरिद्रावंदनंचकार्यम् । ज्योतिःप्रकाशे** चतुर्थोमंडपःश्रेष्ठःसप्तमःपंचमस्तथा ॥ नवमैकादशौश्रेष्ठौनेष्टौषष्ठतृतीयकौ ॥ विवाहभेस्वोदयेवाकन्यावरणमाचरेत् **वरस्यापिवरणमाहचंडेश्वरः** उपवीतंफलंपुष्पंवासांसिविविधानिच ॥ देयंवरायवरणे कन्याभ्रात्राद्विजेनवेति **वाग्दानोत्तरंवरमरणेऽपरार्कस्मृतिचंद्रिकायांवासिष्ठः** अद्भिर्वाचाचदत्तायांम्रियेतोर्ध्ववरोयदि ॥ नच मंत्रोपनीतास्यात्कुमारीपितुरेवसा **यत्तुनारदः** उद्वाहितापिसाकन्यानचेत्संप्राप्तमैथुना ॥ पुनःसंस्कारमर्हेतयथाकन्यातथैवसेति **यच्चकात्यायनः** वरोयद्यन्यजातीयः पतितःक्लीबएवच ॥ विकर्मस्थःसगोत्रोवादासोदीर्घामयोपिवा ॥ ऊढापिदेयासान्यस्मैसहावरणभूषणेति ॥ इदंकलौनिषिद्धम् । देवरेणसुतोत्पत्तिर्दत्ताकन्यानदीयतइत्यादिपुराणेकलौनिषेधात् । दत्ताशब्दऊढापरःऊढायाःपुनरुद्वाहमितिहेमाद्रावुक्तेः **अतएवसगोत्रासपिंडादिविवाहेपि** भोगतस्तांपरित्यज्यपालयेज्जननीमिवेत्युक्तम् **देशांतरगमनेतुकात्यायनः** वरयित्वातुयःकश्चित्प्रणश्येत्पुरुषोयदा ऋत्वागमांस्त्रीनतीत्यकन्यान्यंवरयेद्वरम् **अपरार्केनारदोपि** प्रतिगृह्यतुयःकन्यांवरोदेशांतरंव्रजेत् ॥ त्रीन्ऋतून्समतिक्रम्यकन्याऽन्यंवरयेद्वरम् **शुल्कदानेतुमनुवसिष्ठौ** कन्यायांदत्तशुल्कायांम्रियतेयदिशुल्कदः ॥ देवरायप्रदातव्यायदिकन्यानुमन्यते **चंद्रिकायांकात्यायनः** प्रदायशुल्कंगच्छेद्यःकन्यायाःस्त्रीधनंतथा ॥ धार्यासावर्षमेकंतुदेयान्यस्मैविधानतः ॥ अनेकेभ्योहिदत्तायामनूढायांतुतत्रवै । पूर्वागतश्चसर्वेषांलभेताद्यवरस्तुताम् ॥ पश्चद्वरेणयहृत्तंतस्याःप्रतिलभेतसः ॥ अथागच्छेन्नवोढायांदत्तंपूर्ववरोहरेत् **याज्ञ**

वल्क्यः सकृत्प्रदीयतेकन्याहरंस्तांचौरदंडभाक् । दत्तामपिहरेत्पूर्वाच्छ्रे यांश्चेद्वरआव्रजेत् ॥ पूर्वस्यदोषसत्वेइदमितिविज्ञानेश्वरः संबंधतत्वेव सिष्ठः कुलशीलविहीनस्यपश्चाद्धिपतितस्यच ॥ अपस्मारिविधर्मस्यरोगिणां वेषधारिणाम् ॥ दत्तामपिहरेत्कन्यांसगोत्रोढांतथैवच ॥ मनुः षंढांधबधि रादीनांविवाहोस्तियथोचितम् ॥ विवाहसंभवेतेषांकनिष्ठोविवहेत्तदा ॥ पि तृव्यपुत्रेसापत्नेपरदारसुतेषुच ॥ विवाहाधानयज्ञादौपरिवेदोनदूषणम् ॥ अन्यद्वक्तव्यंविस्तरभीतेर्नोच्यतइतिदिक् ॥ अत्रनांदीश्राद्धेविशेषंतदधिका रिविशेषंचाग्रेवक्ष्यामः ॥ इदंचाद्यविवाहेपिताकुर्याद्द्वितीयादौवरएव नांदी श्राद्धंपिताकुर्यादाद्येपाणिग्रहेपुनः ॥ अतऊर्ध्वंप्रकुर्वीतस्वयमेवतुनांदिकमि तिस्मृतेः त्रिकांडमंडनोपि पित्रोस्तुजीवतोःकुर्यात्पुनःपाणिग्रहंयदा ॥ पितु र्नांदीमुखंश्राद्धंनोक्तंतस्यमनीषिभिरिति रेणुकाकारिका उक्तेकालेविवाहांगं कुर्यान्नादीमुखंपिता ॥ देशांतरेविवाहश्चेत्तत्रगत्वाभवेदिदम् लग्नघटीस्थाप नमाहनारदः षडंगुलमितोत्सेधंद्वादशांगुलमायतम् ॥ कुर्यात्पातालवत्ताम्र पात्रंतद्दशभिःपलैः ॥ ताम्रपात्रेजलैःपूर्णेमृत्पात्रेवाथवाशुभे ॥ मंडलार्धोद यंवीक्ष्यरवेस्तत्रविनिक्षिपेत् तत्र मंत्रः मुख्यंत्वमसियंत्राणांब्रह्मणानिर्मितं पुरा । भवभावायदंपत्योः कालसाधनकरणमिति वरस्यमधुपर्कमाहयाज्ञव ल्क्यः प्रतिसंवत्सरंत्वर्च्याःस्नातकाचार्यपार्थिवाः ॥ प्रियोविवाह्यश्चतथायज्ञं प्रत्यृत्विजःपुनः अत्रविशेषोगृह्यपरिशिष्टे वरस्ययाभवेच्छाखातच्छाखागृ ह्यचोदितः ॥ मधुपर्कःप्रदातव्योह्यन्यशाखेपिदातरि । अत्रवरदातृशब्दोऋ त्विगाद्युपलक्षणम् ॥ तदाहुः अर्च्यशाखयामधुपर्कइति । अर्च्यस्ययच्छा खीयंकर्मतच्छाखयामधुपर्कइतियाज्ञिकाः । जयंतस्तुवरणवत्सर्वत्रयजमान शाखयैवमधुपर्कइत्याह । यत्तुनाद्रियंतेवृद्धाः । अत्रपंचाशताभवेद्ब्रह्मातदर्धे नतुविष्टरइत्यादिगृह्यपरिशिष्टादेर्विष्टरादिलक्षणंमधुपर्कादिविधिश्चस्वगृह्यादे र्ज्ञेयः कन्यादानेप्रपितामहपूर्वकमित्युक्तंस्मृत्यर्थसारे नांदीमुखेविवाहे चप्रपितामहपूर्वकम् ॥ नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकम् ॥ नांदीमु

खेइतिबह्वृचाद्यतिरिक्तविषयम् **गृह्यपरिशिष्टेपित्राद्यानुलोम्यान्नानात व्यासः** भुक्त्वासमुद्वहेत्कन्यांसावित्रीग्रहणंतथा ॥ उपोषितःसुतांदद्यादार्चि तायद्विजायतु ॥ भुवक्त्वेतिमधुपर्केवेधभोजनपरम् **गृह्यपरिशिष्टे** कन्यांव रयमाणानामेषधर्मोविधीयते ॥ प्रत्यङ्मुखावरयंतिप्रतिगृह्णंतिप्राङ्मुखाः **मदनरत्नेऋष्यशृंगः** वरगोत्रंसमुच्चार्यप्रपितामहपूर्वकम् ॥ नामसंकीर्तयेद्वि द्वान्कन्यायाश्चैवमेवहि ॥ तिष्ठेत्पूर्वमुखोदातावरःप्रत्यङ्खोभवेत् ॥ मधुप र्कार्चितायैनांतस्मैदद्यात्सदक्षिणाम् ॥ उदपात्रंततोगृह्यमंत्रेणानेनदापयेत् गौरींकन्यामिमांविप्रयथाशक्तिविभूषिताम् ॥ गोत्रायशर्मणेतुभ्यंदत्तांविप्रस माश्रय ॥ भूमिंगांचैवदासींचवासांसिचस्वशक्तितः । महिषींवाजिनश्चैवद द्यात्स्वर्णमणींनपि । ततःस्वगृह्यविधिनाहोमाद्यंकर्मकारयेत् ॥ यथाचारंविधे यानिमांगल्यकुतुकानिच **एतत्कन्यादानंत्रिःकार्यमितिशौनकः । गृह प्रवेशनीयहोमेविशेषमाहाश्वलायनः** अर्धरात्रेव्यतीतेतुपरेद्युःप्रातरेवहि॥ गृहप्रवेशनीयःस्यादितियज्ञविदोविदुरिति **औपासनहोमेविशेषमाहशौ नकः** यदिरात्रौविवाहाग्निरुत्पन्नःस्यात्तथासति ॥ उपक्रम्योत्तरस्याह्नःसायं पारिचरेदमुम् ॥ यदिरात्रौनवनाडीमध्येऽग्न्युत्पत्तिस्तदातदैवहोमारंभः तदु त्तरंचेत्परदिनेसायमारंभइतिसुदर्शनभाष्येउक्तम् **अथदेवकोत्थापनं** समेच दिवसेकुर्याद्देवकोत्थापनंबुधः॥षष्ठंचविषमंनेष्टंमुक्त्वापंचमसप्तमौ **निर्णयदी पेगार्ग्यः** नांदीश्राद्धेकृतेपश्चाद्यावन्मातृविसर्जनम्॥दर्शश्राद्धंक्षयश्राद्धंस्नानं शीतोदकेनच ॥ अपसव्यंस्वधाकारंनित्यश्राद्धंतथैवच ॥ ब्रह्मयज्ञंचाध्ययनंन दीसीमातिलंघनम् उपवासंव्रतंचैवश्राद्धभोजनमेवचनैवकुर्युःसपिंडाश्चमंडपो द्वासनावधि **बृहस्पतिः**तीर्थेविवाहेयात्रायांसंग्रामेदेशविप्लवे॥नगरग्रामदाहेच स्पृष्ट्वास्पृष्टिर्नदुष्यति **योगयाज्ञवल्क्यः** नस्नायादुत्सवेतीतेमंगलंविनिवर्त्य च॥अनुव्रज्यसुहृद्धंधूनर्चयित्वेष्टदेवताम् **ज्योतिषे** स्नानंसचैलंतिलमिश्रकर्म प्रेतानुयानंकलशप्रदानम् ॥ अपूर्वतीर्थामरदर्शनंचविवर्जयेन्मंगलतोब्दमेक म् ॥ मासषट्कंविवाहादौव्रतप्रारंभणेनच॥जीर्णभांडादिनत्याज्यंगृहसंमार्जनं

तथा। ऊर्ध्वंविवाहात्पुत्रस्यतथाचव्रतबंधनात्॥आत्मनोमुंडनंनैववर्षेवर्षार्धमे वचाअभ्यंगेसूतकेचैवविवाहेपुत्रजन्मनि॥मांगल्येषुचसर्वेषुनधार्यंगोपिचंदन म् **ज्योतिर्निबंधे** उद्वाहात्प्रथमेशुचौयादिवसेऽर्तुर्गृहेकन्यकाहन्यात्तज्जन नींक्षयेनिजतनुंज्येष्ठेपतिज्येष्ठकम् ॥ पौषेचश्वशुरंपतिंचमलिनेचैत्रेस्वपित्राल येतिष्ठंतीपितरंनिहंतिनभयंतेषामभावेभवेत् **निबंधे** विवाहात्प्रथमेपौषे आषाढेचाधिमासके ॥ नसाभर्तुर्गृहेतिष्ठेच्चैत्रेपितृगृहेतथा **हेमाद्रौस्मृत्यंतरे** विवाहव्रतचूडासुवर्षमर्धंतदर्धकम् ॥ पिंडदानंमृदास्नानंनकुर्यात्तिलतर्पणम् **तथा** अर्धपूर्ववत् । सपिंडानैवकुर्वीरन्नाद्भिःस्नानमृतुत्रये ॥ तीर्थेसंवत्सरेप्रेते पितृयज्ञेमहालये ॥ कृतोद्वाहोपिकुर्वीतपिंडनिर्वपणंसदा **अथवधूप्रवेशः**। **जयतुंगे** मार्गशीर्षेतथामाघेमाधवेज्येष्ठसंज्ञके ॥ सुप्रशस्तेभवेद्वेश्मप्रवेशो नवयोषिताम् **नारदः** आरभ्योद्वाहदिवसात्षष्ठेवाप्यष्टमेदिने ॥ वधूप्रवेशः संपत्त्यैदशमेथसमेदिने **संग्रहे** विवाहमारभ्यवधूप्रवेशोयुग्मेतिथौषोडशवास रांतात् ॥ ऊर्ध्वंततोऽब्देयुजिपंचमांतादतःपरस्तान्नियमोनचास्ति **नारदः** समेवर्षेसमेमासेयदिनारीगृहंव्रजेत् ॥ आयुष्यंहरतेभर्तुःसानारीमरणंव्रजेत् **प्रयोगरत्नेतु** वधूप्रवेशःप्रथमेतृतीयेशुभप्रदःपंचमकेथवाह्नि ॥ द्वितीयके वाथचतुर्थकेवाषष्ठेवियोगामयदुःखदःस्यादित्युक्तं तत्रमूलंचिंत्यम् **वृद्धव सिष्ठोपि** षष्ठाष्टमेवादशमेदिनेवाविवाहमारभ्यवधूप्रवेशः ॥ पंचांगसंशुद्ध दिनंविनापिविधावसद्गोचरगेपिकार्यः **लल्लः** स्वभुवनपुरवेशेदेशानांविप्लवे तथोद्वाहे ॥ नवध्वागृहगमनेप्रतिशुक्रविचारणानास्ति **मांडव्यः** नित्यया नेगृहेजीर्णेप्राशनांतेषुसप्तसु ॥ वधूप्रवेशेमांगल्येनमौढ्यंगुरुशुक्रयोः **ज्यो तिःप्रकाशे** वामेशुक्रेनवोढायाःसुखंहानिश्चदक्षिणे ॥ धनंधान्यंचपृष्ठस्थेसर्व नाशःपुरःस्थिते ॥ नवोढायास्तुवैधव्यंयदुक्तंसंमुखेभृगौ । तदेवविबुधैर्ज्ञेयं केवलंतुद्विरागमे ॥ पूर्वतोभ्युदितेशुक्रेप्रयायाद्दक्षिणापरे ॥ पश्चादभ्युदि तेचैवयायात्पूर्वोत्तरेदिशौ **व्यवहारतत्त्वे** पौष्णात्कराच्चश्रवणाच्चयुग्मेहस्त त्रयेमूलमघोत्तरासु ॥ पुष्येचमैत्रेचवधूप्रवेशोरिक्तेतरेव्यर्ककुजेचशस्तः ॥

गर्गः व्यतीपातेचसंक्रांतौग्रहणेवैधृतावपि ॥ श्राद्धंविनाशुभंनैवप्राप्तकालेपि मानवः **तथा** अमासंक्रांतिविष्ट्यादौप्राप्तकालेपिनाचरेदिति **अथद्विराग मनम् ॥ ऋक्षोच्चये** माघफाल्गुनवैशाखेशुक्लपक्षेशुभेदिने ॥ गुर्वादित्यवि शुद्धौस्यान्नित्यंपत्नीद्विरागमः **बादरायणः** नीहारांशुदिनोत्तरादितिगुरुब्रह्मा नुराधाश्विनीशुक्रेभास्करवायुविष्णुवरुणत्वाष्ट्रेप्रशस्तेतिथौ ॥ कुंभाजालिगते रवौशुभकरेप्राप्तोदयेभार्गवे जीवज्ञास्फुजितांदिनेनववधूवेश्मप्रवेशःशुभः ॥ **अथपुनर्विवाहः । श्रीधरीये** पुनर्विवाहंवक्ष्यामिदंपत्योःशुभवृद्धिदम् ॥ लग्नेंदुलग्नयोर्दोषेग्रहतारादिसंभवे ॥ अन्येष्वशुभकालेषुदुष्टरोगादिसंभवे ॥ विवाहेचापिदंपत्योराशौचादिसमुद्भवे ॥ तस्यदोषस्यशांत्यर्थंपुनर्वैवाह्यमिष्य ते **याज्ञवल्क्यः** सुरापीव्याधिताधूर्तावंध्यार्थघ्न्यप्रियंवदा ॥ स्त्रीप्रसूश्चाधिवे त्तव्यापुरुषद्वेषिणीतथा **मनुः** वंध्याष्टमेधिवेत्तव्यादशमेतुमृतप्रजा ॥ एका दशेस्त्रीजननीसद्यस्त्वप्रियवादिनी **संग्रहेतु** अप्रजांदशमेवर्षेस्त्रीप्रजांद्वादशे त्यजेत् ॥ मृतप्रजांपंचदशेसद्यस्त्वप्रियवादिनीम् **याज्ञवल्क्यः** एकामुत्क म्यकामार्थमन्यांलब्धुंयइच्छति ॥ समर्थस्तोषयित्वार्थैःपूर्वोढामपरांव्रजेत् ॥ आज्ञासंपादिनींदक्षांवीरसूंप्रियवादिनीम् ॥ त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणंस्त्रियः **मनुः** अधिवेत्तातुयानारीनिर्गच्छेद्रोषितागृहात् ॥ सासद्यःस न्निरोद्धव्यात्याज्यावाकुलसन्निधाविति **हेमाद्रौकात्यायनः** अग्निशिष्टादिशु श्रूषांबहुभार्यःसवर्णया ॥ कारयेत्तद्बहुत्वंचेज्ज्येष्ठयागर्हितानचेदिति **याज्ञ वल्क्यः** सत्यामन्यांसवर्णायांधर्मकार्य्यंनकारयेत् ॥ सवर्णासुविधौधर्म्येज्ये ष्ठयानविनेतरा **द्वितीयविवाहहोमेग्निमाहकात्यायनः** सदारोऽन्याम्पुन र्दारावुद्वोढुंकारणांतरात् ॥ यदीच्छेदग्निमान्कर्तुंकहोमोस्यविधीयते ॥ स्वे ग्नावेवभवेद्धोमोलौकिकेनकदाचन **त्रिकांडमंडनोपि** आद्यायांविद्यमाना यांद्वितीयामुद्वहेद्यदि ॥ तदावैवाहिकंकर्मकुर्यादावसथेग्निमान् **सुदर्श नभाष्येतु** द्वितीयविवाहहोमोलौकिकएवनपूर्वोपासनेइत्युक्तम् **इदंचा संभवेतत्रचाग्निद्वयसंसर्गःकार्यस्तदाहशौनकः** अथाग्न्योर्गृह्ययोर्योगं

सपत्नीभेदजातयोः॥ सहाधिकारसिद्ध्यर्थमहंवक्ष्यामिशौनकः॥ अरोगामुद्व हेत्कन्यांधर्मलोपभयात्स्वयम् ॥ कृतेतत्रविवाहेचव्रतांतेतुपरेहनि ॥ पृ थक्स्थंडिलयोरग्निंसमाधाययथाविधि ॥ तत्रकृत्वाज्यभागांतमन्वाधाना दिकंततः ॥ जुहुयात्पूर्वपत्यग्नौतयान्वारब्धआहुतिः ॥ अग्निमीळेपुरोहितं सूक्तेननवर्चेनतु ॥ समिद्ध्येनंसमारोप्यअयंतेयोनिरित्यृचा ॥ प्रत्यवरोहे त्यनयाकनिष्ठाग्नौनिधायतम् ॥ आज्यभागांततंत्रादिकृत्वारभ्यतदादितः ॥ समन्वारब्धएताभ्यांपत्नीभ्यांजुहुयाद्धृतम् ॥ चतुर्गृहीतमेताभिर्ऋग्भिःषड् भिर्यथाक्रमम् ॥ अग्नावग्निश्चरतीत्यग्निनाग्निःसमिध्यते ॥ अस्तीदमितितिसृ भिःपाहिनोअग्नएकया ॥ ततःस्विष्टकृदारभ्यहोमशेषंसमापयेत् ॥ गोयुगं दक्षिणादेयाश्रोत्रियायाहिताग्नये॥ पत्न्योरेकायदिमृतादग्ध्वातेनैवतांपुनः॥ आदधीतान्ययासार्द्धमाधानविधिनागृहीति **बौधायनसूत्रेतु** अथयदिगृह स्थोद्वेभार्येविंदेतकथंतत्रकुर्यादितियस्मिन्कालेविंदेतोभावग्नी परिचरेदपरा ग्निमुपसमाधाय परिस्तीर्याज्यंविलाप्यस्रुचिचतुर्गृहीतंगृहीत्वाऽन्वारब्धायां जुहोतिनमस्तऋषेरादाव्यधायैत्वास्वधायैत्वामानइंद्राभिमतस्त्वदष्ट्वारिष्टा स एवब्रह्मन्नवेषसुस्वाहेत्यथाऽयंतेयोनिर्ऋत्वियइतिसमिधिसमारोपयेत् । पूर्वा ग्निमुपसमाधायाजुह्वानउद्बुध्यस्वाग्नइति समिधमाधायपरिस्तीर्यस्रुचिचतुर्गृ हीत्वाद्वयोर्भार्ययोरन्वारब्धयोर्यजमानोभिमृशति योब्रह्मा ब्रह्मणइत्येतेनसू क्तेनैकंचतुर्गृहीतं जुहोत्यग्निमुखान्कृत्वापकांजुहोतिसंमितंसंकल्पेथामितिपु रोनुवाक्यामनूचाग्नेपुरीष्येइतियाज्ययाजुहोत्यथाज्याहुतीरुपजुहोतिपुरीष्यम स्तमित्यंतादनुवाकस्य स्विष्टकृत्प्रभृतिसिद्धमाधेनुवरदानादथाग्रेणाग्निंदर्भ स्तंबेहुतंशेषंनिदधातिब्रह्मजज्ञानं पितावराजामितिद्वाभ्यांसंसर्गविधिःकार्यः **द्वितीयादिविवाहेकाल उक्तःसंग्रहे** प्रमदामृतिवासरादितःपुनरुद्वाहविधि र्वरस्यच ॥ विषमेयुगवत्सरेशुभोयुगलेचापिमृतिप्रदोभवेत् **तृतीयविवाहे निषेधोमात्स्ये** उद्वहेइतिसिद्ध्यर्थंतृतीयांनकदाचन ॥ मोहादज्ञानतोवा पियदिगच्छेत्तुमानुषीम् ॥ नश्यत्येवनसंदेहोगर्गस्यवचनंयथेति **संग्रहे** तृती

यांयदिचोद्वाहेत्तर्हिसाविधवाभवेत् ॥ चतुर्थादिविवाहार्थंतृतीयेऽर्केसमुद्वहे त् **तद्विधिस्तु** रविशन्योर्हस्तेवावरःसंकल्प्यस्वस्तिवाचनंनांदीश्राद्धंकृत्वा चार्यंवृत्वा । आकृष्णेनेतिछायायुतंसूर्यमर्कंसंपूज्यगुडौदनंदत्वा वस्त्रेणतं तुभिरावेष्टय । त्रिलोकवासिन्सप्ताश्वछाययासहितोरवे ॥ तृतीयोद्वाहजंदो षंनिवारयसुखंकुर्वितिसंप्रार्थ्यजलेनत्रिःसिंचेत् ममप्रीतिकरायेयंमयासृष्टापु रातनी ॥ अर्कजाब्रह्मणासृष्टाअस्माकंप्रतिरक्षतु ॥ नमस्तेमङ्गलेदेविनमःस वितुरात्मने ॥ त्राहिमांकृपयादेवीपत्नीत्वंमेइहागता ॥ अर्कत्वंब्रह्मणासृष्टः सर्वप्राणिहितायच ॥ वृक्षाणामादिभूतस्त्वंदेवानांप्रीतिवर्धनः ॥ तृतीयोद्वा हजंपापंमृत्युंचाशुविनाशयेति ॥ ततआचार्यः काश्यपगोत्रामादित्यप्रपौत्रींस वितुःपौत्रींममपुत्रीमर्ककन्यामुकगोत्रायवरायदास्येइति वाग्दानंकृत्वावर स्यमधुपर्ककृत्वांऽतःपटंधृत्वास्वस्तिनइतिसूक्तंजस्वा पूर्ववत्कन्यांदत्वा । अर्ककन्यामिमामित्यूहेनकन्यादानमंत्रमुक्त्वादक्षिणांदद्यात् । ततोगायत्र्या वेष्टितसूत्रेणबृहत्सामेतिमंत्रेणकंकणंबध्वाऽर्कस्याचतुर्दिक्षुकुंभेषुविष्णुंसंपूज्या ग्निंप्रतिष्ठाप्याघारांतेसंगोभिरिनिबृहस्पतयेयस्मैत्वाकामकामायेत्यृचाऽग्नयेव्य स्तसमस्तव्याहृतिभिराज्यंहुत्वाचार्यायगोयुगंदत्वा। मयाकृतमिदंकर्मस्थावरे षुजरायुणा॥अर्काऽपत्यानिनोदेहितत्सर्वंक्षंतुमर्हसीतिनमेदितिदिक् इतिनिर्ण यसिंधौविवाहः **अथाधानम्रत्नमालायाम्** प्राजापत्येपूषभेसद्विदैवेपुष्येज्ये ष्ठास्वैंदवेकृत्तिकासु॥अग्न्याधानंह्युत्तराणांत्रयेपित्र्यादित्येकीर्तितंगर्गमुख्यैः **आश्वलायनः** अग्न्याधेयंकृत्तिकासुरोहिण्यांमृगशिरसिफाल्गुनीषुविशाख योरुत्तरयोः प्रौष्ठपदयोरेतेषांकस्मिंश्चिद्दसंतेपर्वणिब्राह्मण आदधीतग्रीष्मवर्षा शरत्सुक्षत्रियवैश्योपकृष्टायस्मिन्कस्मिंश्चिद्दतावादधीत सोमेनयक्ष्यमाणोन र्तुंपृच्छेन्नक्षत्रम् । सोमाधानेऋत्वाद्यनालोचनमार्तपरम् । अथोखलुयदैवैन श्श्रद्धोपनमेदथादधीतसैवास्यविधिरितिसोमेनयक्ष्यमाणो नर्तुंपृच्छेन्नक्षत्रं तदेतदार्त्तस्यातिवेलंवाश्रद्धायुक्तस्यभवतीतिबौधायनोक्तेरिति मदनरत्नवृद्ध गार्ग्यः पुष्याग्नेय्युत्तरादित्यपौष्णज्येष्ठाचित्रार्कद्विदैवेंदुभेषुकुर्युर्वह्न्याधानमा

घंवसंतग्रीष्मोष्मांतेष्वेवविप्रादिवर्णाः **कालादर्शे** अग्निहोत्रंदर्शपूर्णमासाव प्युत्तरायणे ॥ उपक्रम्ययथाकालमुपासीरन्द्विजातयः ॥ सोमंचपशुबंधंसर्वा श्चविकृतीरपि ॥ सौम्यायनेयथाकालंविदध्युर्गृहमेधिनः ॥ अत्रविशेषःपूर्वमु क्तः । अग्निहोत्रकालउक्तः **छंदोगपरिशिष्टे** उदितेनुदितेचैव समयाध्युषिते तथा ॥ सर्वथावर्ततेयज्ञइतीयंवैदिकीश्रुतिः **एषांस्वरूपंतत्रैव** रात्रेस्तुषोडशे भागेग्रहनक्षत्रभूषिते ॥ कालंत्वनुदितंज्ञात्वाहोमंकुर्याद्विचक्षणः ॥ तथाप्रभा तसमयेनष्टेनक्षत्रमंडले ॥ रविर्यावन्नदृश्येतसमयाध्युषितंचतत्॥रेखामात्रंप्रदृ श्येतरश्मिभिश्चसमन्वितः ॥ उदितंसद्विजानीयात्तत्रहोमंप्रकल्पयेत् **आश्व लायनः** उषोदयंव्युषितउदितेवा । सायंतुसएव ॥ अस्तमितेहोमइति **गौण कालमाहसएव** प्रदोषांतोहोमकालःसंगवांतःप्रातरिति **छंदोगपरिशिष्टे** या वत्सम्यङ्नभाव्यंतेनभस्यृक्षाणिसर्वतः ॥ नचलौहितमापैतितावत्सायंतुहू यते ॥ औपासनेप्येवम् तस्याग्निहोत्रेणप्रादुष्करणहोमकालौव्याख्याताविद्या श्वलायनोक्तेः **अथावसथ्याधानम्** ॥ **पारस्करः** आवसथ्याधानंदारकाले दायाद्यकालएकेषामिति।दायाद्यकालोविभागकालः**मदनरत्नेव्यासः** अग्नि र्वैवाहिकोयेननगृहीतःप्रमादिना ॥ पितर्युपरतेतेननगृहीतव्यःप्रयत्नतः ॥ यो गृहीत्वाविवाहाग्निंगृहस्थइतिमन्यते ॥ अन्नंतस्यनभोक्तव्यंवृथापाकोहिसः स्मृतः ॥ ज्येष्ठभ्रातरिपितरिवासाग्नौकनिष्ठस्यपुत्रस्यवाऽग्न्यभावेपिनदोषः **त दाहतत्रैवगार्ग्यः** पितृपाकोपजीवीवाभ्रातृपाकोपजीविकः ॥ ज्ञानाध्ययननि ष्ठोवानदुष्येताग्निनाविनागृहस्थस्याप्यध्ययनमाहसत्यव्रतःअनधीत्यद्विजो वेदंस्नात्वोद्वाह्ययथातथा॥अधीतेब्रह्मचर्येणसांगंवेदंगुरोर्गृहे ॥इदंचाधानंज्येष्ठे कृताधानेनकार्यम् ॥ दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते ॥ परिवेत्तासवि ज्ञेयः परिवित्तिस्तुपूर्वजइतिमनुशातातपोक्तेः । स्मार्तेप्येवम् । सोदर्येतिष्ठति ज्येष्ठेनकुर्याद्दारसंग्रहम् ॥ आवसथ्यंतथाधानंपतितस्तुतथाभवेदितित्रैव गार्ग्योक्तेः **आज्ञायांत्वदोषमाहसुमंतुः** ज्येष्ठोभ्रातायदातिष्ठेदाधानंनैवचा श्रयेत् ॥ अनुज्ञातस्तुकुर्वीतशंखस्यवचनंयथा **वृद्धवसिष्ठः** अग्रजस्तुयदाऽ

नग्निरादध्यादनुजःकथम् ॥ अग्रजोनुमतंकुर्यादग्निहोत्रंयथाविधि **हारीतः**सो दराणांतुसर्वेषांपरिवेत्ताकथंभवेत् ॥ दारैस्तुपरिविद्यंतेनाग्निहोत्रेणनेज्यया ॥ अधिकारिणोपिभ्रातुरनुज्ञयाकुर्यादितिमदनपारिजातः ॥ विवाहस्त्वनुज्ञया पिनेत्यर्थः ॥ सोदरोक्तेरसोदराणांसापत्नदत्तकादीनांनदोषः । दत्तकस्या पिसोदराविवाहाभावेदोषएव **तदाहहेमाद्रौवसिष्ठः** पितृव्यपुत्रान्सापत्नान् परनारीसुतांस्तथा ॥ दाराग्निहोत्रसंयोगेनदोषःपरिवेदने । परनारीसुताःद त्तकादयः **देशांतरेविशेषमाहसएव** अष्टौदशद्वादशवर्षाणिवाज्येष्ठभ्रातर मनिविष्टमप्रतीक्षमाणःप्रायश्चित्तीभवतीति **क्लीबादावप्यदोषमाहकात्या यनः** देशांतरस्थक्लीबैकवृषणानसहोदारान् ॥ वेश्यानिष्ठांश्चपतितशूद्रतु ल्यातिरोगिणः ॥ जडमूकांधबधिरकुब्जवामनखंजकान् ॥ अतिवृद्धानभा र्याश्चकृषिसक्तान्नृपस्यच ॥ धनवृद्धिप्रसक्तांश्चकामतोकारिणस्तथा ॥ कुटिलो न्मत्तचोरांश्चपरिविंदन्नदुष्यति **आशार्केपि** उन्मत्तःकिल्विषीकुष्ठीपतितक्लीबएववा ॥ राजयक्ष्मामयावीचनन्याय्याः स्यात्प्रतीक्षितुम् ॥ एवंज्येष्ठेछिन्न हस्तादावपिनपरिवेत्तृत्वम् **तदाहत्रिकांडमंडनः** दर्शेष्टिंपौर्णमासेष्टिंसोमे ज्यामग्निसंग्रहम् ॥ अग्निहोत्रंविवाहंचप्रयोगेप्रथमेस्थितम् ॥ नकुर्याज्जनके ज्येष्ठेसोदरेचाप्यकुर्वति ॥ क्षेत्रजादावनीजानेविद्यमानेपिसोदरे ॥ नाधिकार विघातोस्तिभिन्नोदर्येपिचौरसे ॥ पंग्वंधमूकबधिरपतितोन्माददूषणे ॥संन्यस्त च्छिन्नहस्तादौयद्वाषंढादिदूषणे ॥ जनकेसोदरेज्येष्ठेकुर्यादेवेतरःक्रियामिति । आरोहतंदशतंशक्करीर्ममेत्याधानेमंत्रवर्णाच्च ॥ शक्करीरंगुलीः । तंत्ररत्नेप्यु क्तम् । अंगवैकल्यात्पूर्वमाहिताग्नित्वेऽधिक्रियेतैवनित्येषु । आधानंतुनकु र्यात्तस्यनैमित्तिकत्वादिति ॥ एवंचतुरंगुलेपि । षडंगुलकाणविवर्णादेस्त स्येवाधिकारः । एकादशसुदर्शातर्गतेः । शरीरकार्श्यवाविप्रतिषिद्धमिति हिरण्यकेशिसूत्रेकर्माशक्तिहेतोरेवांगवैकल्यस्यनिषेधात् ॥ अतएवद्राह्याय णसूत्रेयाज्यश्चप्रथमैस्त्रिभिर्गुणैरितिन्यूनांगस्याप्यधिकारउक्तः **अपरार्केउश नाः** पितापितामहोयस्यअग्रजोवाथकस्यचित् ॥ तपोग्निहोत्रमंत्रेषुनदोषः

परिवेदने **पितुराज्ञायामप्यदोषमाहमदनरत्नेसुमंतुः** पित्रायस्यतुनाधानं कथंपुत्रस्तुकारयेत् ॥ अग्निहोत्रेधिकारोस्तिशंखस्यवचनंयथेति ॥ नाधानंकृतमित्यर्थः **एतदाज्ञायामेवेतिहेमाद्रिः यत्तु** पितुःसत्यप्यनुज्ञानेनाधीतकदाचनेति ॥ तत्सत्यधिकारज्ञेयम् **अथशूद्रसंस्काराः ॥ यमः ॥** शूद्रोप्येवंविधःकार्योविनामंत्रेणसंस्कृतः ॥ नकेनचित्समसृजच्छंदसातंप्रजापतिः **छंदसामंत्रेण** । **व्यासोपि** गर्भाधानंपुंसवनंसीमंतोजातकर्मच ॥ नामक्रियानिष्क्रमोन्नप्राशनंवपनक्रिया ॥ कर्णवेधोव्रतादेशोवेदारंभक्रियाविधिः ॥ केशांतस्नानमुद्वाहोविवाहाग्निपरिग्रहः ॥ त्रेताग्निसंग्रहश्चैवसंस्काराः षोडशस्मृताइत्युक्त्वाह । नवैताःकर्णवेधांतामंत्रवर्जस्त्रियाःक्रियाः ॥ विवाहोमंत्रतस्तस्याः शूद्रस्यामंत्रतोदशेति **मदनरत्नेहिरण्यगर्भदानेतु** गर्भाधानंपुंसवनंसीमंतोन्नयनंतथा ॥ कुर्युहिरण्यगर्भस्यततस्तेद्विजपुंगवाइत्युक्त्वा जातकर्मादिकाः कुर्यात्क्रियाः षोडशचापराइत्यत्रस्त्रियाजातकर्म्मनामकरणनिष्क्रमणान्नप्राशनचूडाविवाहाःषट् । शूद्राणांतुषडेतेपंचमहायज्ञाश्चेत्येकादशेत्युक्तम् । रूपनारायणहरिहरभाष्ययोरप्येवम् **शार्ङ्गधरस्तु** द्विजानांषोडशैवस्युःशूद्राणांद्वादशैवहि ॥ पंचैवमिश्रजातीनांसंस्काराःकुलधर्मतः ॥ वेदव्रतोपनयनमहानाम्नीमहाव्रतम् विनाद्वादशशूद्राणांसंस्कारानाममंत्रत इत्याह । अपरार्कस्तुगर्भाधानमृतौपुंसइत्यत्राह । एतच्चातुर्वर्ण्यपरम् । न द्विजातिमात्रपरम् । तथासत्युपनयनंविधायवाच्यंस्यादिति । तेनतन्मतेष्टौ भवंति । ब्राह्मेतुविवाहमात्रसंस्कारंशूद्रोपिलभतांसदेत्युक्तम् । अत्रसदस च्छूद्रगोचरत्वेनदेशभेदाद्व्यवस्था **यत्तुमनुः** नशूद्रेपातकंकिंचिन्नचसंस्कारमर्हतीति **तदर्थमाहमेधातिथिः** यत्सामान्यतोनिषिद्धंस्तेयानृतादिनतदतिक्रमेऽस्यपापंयथाद्विजानाम्उपनयनरूपंसंस्कारंचनार्हतीति । तेचतूष्णींकार्याः । शूद्रोवर्णश्चतुर्थोपिवर्णत्वाद्धर्ममर्हति वेदमंत्रस्वधास्वाहावषट्कारादिभिर्विनेतिव्यासोक्तेः । अमंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यते इतिमरीच्युक्ते

श्च । इयंपरिभाषासर्वार्था तेनशूद्रधर्मेषुसर्वत्रविप्रेणमंत्रःपठनीयः । सोपिपौराणएवेतिशूलपाणिः । एवंस्त्रीणामपीतिदिक् ॥

इति रामकृष्णभट्टात्मजकमलाकरभट्टकृते निर्णयसिन्धौ संस्कारनिर्णयः

अथक्षुद्रकालाःतत्रजलाशयस्यवाराहः हस्तेचांबुपपौष्णकेशवमघामित्रोत्तरारोहिणीदेवेज्येषुचशुक्रसौम्यशशभृद्वागीशवारांशके ॥ रिक्तांछिद्रतिथिंविहायवृषभेनक्रेकुलीरेघटेमीनेकूपतडागकर्ममुनयःशंसंतिशुद्धेऽष्टमे ॥ हस्तोमघानुराधापुष्यधनिष्ठोत्तराणिरोहिण्यः ॥ शतभिषगित्यारंभेकूपानांशस्यतेभगणः **हेमाद्रौभविष्ये** तस्मिन्सलिलसंपूर्णेकार्तिकेतुविशेषतः ॥ मुनयःकेचिदिच्छंतिव्यतीतेचोत्तरायणे ॥ नकालनियमस्तत्रसलिलंतत्रकारणम् **दीपिकापि** मार्तंडेंदूडुशुद्धौमृजिदशयनेमाघषट्कस्यशुक्लेमूलाषाढोत्तराश्विश्रवणगुरुकरेपौष्णशुक्राज्जचंद्रे ॥ मैत्रेब्राह्मेचपूर्णामदन१३रवि १२तिथौसद्वितीयातृतीयेकार्यातोयप्रतिष्ठाज्ञगुरुसितदिनेकालशुद्धेसुलग्ने **वराहः** आग्नेयेयदिकोणेग्रामस्यपुरस्यवाभवतिकूपः ॥ नित्यंसकरोतिभयंदाहंचसमानसंप्रायः ॥ नैर्ऋत्येबालभयंवनिताक्षयंचवायव्ये ॥ दिक्त्रयमेतत्त्यक्त्वाशेषास्तुशुभावहाःकूपाः **वास्तुशास्त्रे** भूतिंपुष्टिंपुत्रहानिंपुरंध्रीनाशंमृत्युंसंपदंशत्रुबाधाम् ॥ किंचित्सौख्यंशंभुकोणादिकुर्यात्कूपोमध्येगेहमर्थक्षयंच ॥ उत्सर्गविधिश्चोक्तोबह्वृचपरिशिष्टे **अथातोवापीकूपतडागयज्ञंव्याख्यास्यामः** पुण्येह्नचुदकमसमीपेऽग्निंसमाधायवारुणंचरुंश्रपयित्वाज्यभागांते आज्याहुतीर्जुहुयात् ॥ समुद्रज्येष्ठेतिप्रत्यृचंततोहविषाष्टौ तत्वायामीतिपंच त्वंनोअग्नेइतिद्वे इमंमेवरुणेतिचस्विष्टकृतंनवमम् मार्जनांतेधेनुंतारयेत् । अवतीर्यमाणामनुमंत्रयेत् । इदंसलिलंपवित्रंकुरुष्वशुद्धापूताअमृताःसंतुनित्यम् ॥ मांतारयंतिकुरुतीर्थाभिषेकंलोकाल्लोकंतरतेतीर्थतेचेतिपुच्छाग्रेन्वारब्धउत्तीर्यापोअस्मान्मातरः शुंधयंत्वित्यथापराजितायांदिश्युपस्थापयेत्सूयवसाद्वगयतीतिहिंकृतंचेद्धिंकृण्वतीत्यलंकृतां विप्रायदद्यादितरांवाशक्त्याद क्षिणांततउत्सृजेद्देवपितृमनुष्याः प्रीयतामितिब्राह्मणान्भोजयित्वास्वस्त्ययनं

वाचयीतेति ॥ विस्तरस्तुमात्स्योक्तोऽस्मत्कृतेजलाशयोत्सर्गविधौज्ञेयः **कूपादेरुत्सर्गाकरणेदोषउक्तोभविष्ये** सदाजलंपवित्रंस्यादपवित्रमसंस्कृतं ॥ कुशाग्रेणापिराजेंद्रनस्पृष्टव्यमसंस्कृतं **तथा** वापीकूपतडागादौयज्जलंस्यादसंस्कृतं ॥ अपेयंतद्भवेत्सर्वंपीत्वाचांद्रायणंचरेत् **अथवृक्षारोपणं चंद्रेश्वरः** आदित्यचांद्रपितृतिष्यविशाखपौष्णमूलोत्तरात्रयतुरंगमवारुणाश्च । एतेषुतारकगणेषुहितंनराणांवृक्षादिरोपणमिहोपदिशंतिधीराः **अथमूर्तिप्रतिष्ठा वसिष्ठः** हस्तत्रयेमित्रहरित्रयेचपौष्णद्वयादित्यसुरेज्यभेषु तिस्रोत्तराधातृशशांकभेषुसर्वामरस्थापनमुत्तमंस्यात् **मात्स्ये** चैत्रेवाफाल्गुनेवापिज्येष्ठेवामाधवेतथा ॥ माघेवासर्वदेवानांप्रतिष्ठाशुभदाभवेत् ॥ नारदस्तुचैत्रं निषेधयति । विचैत्रेष्वेवमासेषुमाघादिषुचपंचस्विति । तेनात्रविकल्पः । अत्रमाघमासोविष्णुप्रतिष्ठाव्यतिरिक्तविषयः ॥ माघेकर्तुर्विनाशायफाल्गुनेशुभदाभवेदिति विष्णुधर्मोक्तेरितिहेमाद्रिः **मात्स्ये** दृढाधनकरीस्फीतातथाप्रतिपदिस्मृता ॥ द्वितीयार्धनोपेतातृतीयायांधनप्रदा ॥ चतुर्थ्यांनाशमाप्नोति यमस्यस्यात्सुखावहा ॥ विनायकस्य देवस्यतथा तत्रहितप्रदा ॥ पञ्चम्यांश्रीयुताकर्तुर्वरदाचतथाभवेत् ॥ षष्ठ्यांलक्ष्मीयुतानित्यंसप्तम्यांरोगनाशिनी ॥ अष्टम्यांधान्यबहुलानवम्यांचविनश्यति ॥ भद्रकाल्याःकृतात्रकर्तुर्भवतितुष्टये ॥ धर्मवृद्धिकरीज्ञेयादशम्यांतुतथातिथौ ॥ एकादश्यांतथायुक्ताद्वादश्यांसर्वकामदा ॥ त्रयोदश्यांतथाज्ञेयाचतुर्दश्यांविनश्यति ॥ कृष्णपक्षेपंचदश्यांकर्तुःक्षयकरीभवेत् ॥ पंचदश्यांतथाशुक्लेसर्वकामकरीभवेत्आषाढेद्वेतथामूलमुत्तरात्रयमेवच ॥ ज्येष्ठाश्रवणरोहिण्यःपूर्वाभाद्रपदातथा ॥ हस्तोश्विनीरेवतीचपुष्योमृगाशिरास्तथा ॥ अनुराधातथास्वातीप्रतिष्ठासुप्रशस्यते **श्रीपतिः** रोहिण्युत्तरपौष्णवैष्णवकरादित्याश्विनीवासवानूराधैंदवजीवभेषुगादितांविष्णोःप्रतिष्ठापनम् ॥ पुष्यश्रुत्यभिजित्सुरेश्वरकयोर्वित्ताधिपस्कंदयोर्मैत्रेतिग्मरुचेःकरेनिर्ऋतिभेदुर्गादिकानांशुभम् ॥ गणपरिवृढरक्षोयक्षभूतासुराणांप्रमथफणिसरस्वत्यादिकानांचपौष्णे ॥ श्रवसिसुगतनाम्नोवासवेलो

कपानांनिगदितमखिलानांस्थापनंचस्थिरेषु ॥ तेजस्विनीक्षेमकृदग्निदाहविधायिनीस्याद्धनदोदृढाच ॥ आनंदकृत्कल्पविनाशिनीचसूर्यादिवारेषुभवेत्प्रतिष्ठा **माधवीयेवैखानसः** मातृभैरववाराहनरसिंहत्रिविक्रमाः ॥ महिषासुरहंत्र्यश्चस्थाप्यावैदक्षिणायने **वैशब्दोप्यर्थे लिंगप्रतिष्ठायांविशेषः हेमाद्रौ लक्षणसमुच्चये** उत्तराशागतेभानौलिंगस्थापनमुत्तमम् ॥ दक्षिणेत्वयनेपूज्यत्रिवर्षार्द्धेभयावहम् ॥ स्वगृहेस्थापनंनेष्टंतस्माद्वैदक्षिणायने ॥ स्थापनंतुप्रकर्तव्यंशिशिरादावृतुत्रये ॥ प्रावृषिस्थापितंलिंगंभवेद्वरदयोगदम् ॥ हेमंतेज्ञानदंचैवलिंगस्यारोपणंमतम् **रत्नावल्याम्** माघफाल्गुनवैशाखज्येष्ठाषाढेषुपंचसु॥ मासेषुशुक्लपक्षेषुलिंगस्थापनमुत्तमम् **विष्णोरप्याहतत्रैववैखानसः** मार्गशीर्षादिमासौद्वौनिंदितौब्रह्मणापुरा ॥ मासेषुफाल्गुनःश्रेष्ठश्चैत्रोवैशाखएवच ॥ वृषेवाप्याश्वयुङ्मासेश्रावणेमासिवाभवेत् ॥ बौधायनसूत्रे विष्णुप्रतिष्ठामुपक्रम्यद्वादश्यांश्रोणायांवायानिचान्यानिपुण्यनक्षत्राणीति । कृत्तिकादिविशाखांतेष्वित्यर्थः **सर्वदेवेषुमासविशेषोहेमाद्रौविष्णुधर्मे** माघेकर्तुर्विनाशायफाल्गुनेशुभदाभवेत् ॥ लोकानंदकरीचैत्रेवैशाखेवरसंयुता ॥ आज्ञायुतासदाज्येष्ठेआषाढेधर्मवृद्धिदा ॥ श्रावणेधनहीनास्यात्प्रौष्ठपादेविनश्यति ॥ आश्विनेनाशमाप्नोति वह्निनाकार्तिकेतथा सौम्येसौभाग्यमतुलं पौषेपुष्टिरनुत्तमा ॥ दोषान्विताधिमासेस्यात्कर्तुरात्मनएवचेति ॥ अत्रश्रावणाश्विनयोर्निषेधोमार्गशीर्षविधिश्चविष्णुव्यतिरिक्तविषयः ॥ पूर्व्वोक्तवचनादितिहेमाद्रिः ॥ माघश्रावणभाद्रपदनिषेधः शिवव्यतिरिक्तविषयः । तत्रतस्योक्तेः **देविस्थापनेतत्रैवविशेषोदेवीपुराणे** देव्यामाघेऽश्विनेमासेउत्तमासर्वकामदा **तथा** नातिथिर्नचनक्षत्रंनोपवासोत्रकारणम् ॥ सर्व्वकालंप्रकर्तव्यंकृष्णपक्षेविशेषतः ॥ अन्यश्चात्रविचारोहेमाद्रौज्ञेयः **नारदः** हंत्यर्थहीनाकर्तारं मंत्रहीनातुऋत्विजम् ॥ स्त्रियंलक्षणहीनातुनप्रतिष्ठासमोरिपुः **अत्राधिकारिणउक्ताः कृत्यकल्पतरौदेवीपुराणे** वर्णाश्रमविभेदेनदेवाःस्थाप्यातुनान्यथा॥ ब्रह्मातुब्राह्मणैःस्थाप्योगायत्रीसहितः प्रभुः ॥ चतुर्वर्णैस्तथाविष्णुःप्रति

ष्ठाप्यःसुखार्थिभिः॥ भैरवोपिचतुर्वर्णैरंत्यजानांतथामतः॥ मातरःसर्वलोकैस्तु स्थाप्याःपूज्याःसुरोत्तमाः॥लिंगंगृहीयतिर्वापिसंस्थाप्यतुयजेत्सदा॥ **शिवसर्व स्वेभविष्ये** यस्तुपूजयतेलिंगंदेवादिंमांजगात्पतिम्॥ ब्रह्मणःक्षत्रियोवैश्यः शूद्रोवामत्परायणः॥तस्यप्रीतःप्रदास्यामिशुभाँल्लोकाननुत्तमान् **तिथितत्त्वे स्कांदे** शूद्रःकर्माणियोनित्यंस्वीयानिकुरुतेप्रिये॥ तस्याहमर्चांगृह्णामिचंद्रखंडविभूषिते॥ ब्रह्मचारीगृहस्थोवावानप्रस्थश्चसुव्रते॥ एवंदिनेदिनेदेवंपूजयेदंबिकापतिम्॥ संन्यासीदेवदेवेशंप्रणवेनैवपूजयेत्॥ नमोंतेनाशिवेनैवस्त्रीणांपूजाविधीयते॥ एतच्चपुराणप्रसिद्धजीर्णोलिंगपूजाविषयम्॥ यानितु **त्रिस्थलीसेतौनारदीये** यःशूद्रेणार्चितंलिंगंविष्णुंवाप्रणमेन्नरः॥ नतस्यनिष्कृतिर्दृष्टाप्रायश्चित्तायुतैरपि॥ नमेद्यःशूद्रसंस्पृष्टंलिंगंवाहरिमेववा॥ ससर्वयातनाभोगीयावदाचंद्रतारकम्॥ पाखंडपूजितंलिंगंनत्वापाखंडतांव्रजेत्॥ आभीरपूजितंलिंगंनत्वानरकमश्नुते॥ योषिद्भिःपूजितंलिंगंविष्णुंवापिनमेत्तुयः॥ सकोटिकुलसंयुक्तमाकल्पंरौरवंवसेदित्यादीनि तानिनूतनस्थापितलिंगादिविषयाणि॥ यदाप्रतिष्ठितंलिंगंमंत्रविद्भिर्यथाविधि॥ तदाप्रभृत्यशूद्रश्चयोषिद्वापिनसंस्पृशेदितितत्रैवोक्तेः॥ प्रतिष्ठायांतुशूद्रादीनां नाधिकारः। स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर॥ स्पर्शनेनाधिकारोस्ति विष्णोर्वाशंकरस्यवा॥ यःशूद्रसंस्कृतंलिंगंविष्णुंवापिनमेन्नरः॥ इहैवाप्यंतदुःखानिपश्यत्यामुष्मिकेकिमु॥ शूद्रोवानुपनीतोवास्त्रियोवापतितोपिवा॥ केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते इतिबृहन्नारदीयस्कांदोक्तेरितित्रिस्थलीसेतौपितामहचरणाः। चतुर्वर्णैरितिपूर्वोक्तवचनाद्विष्ण्वादिप्रतिष्ठायां शूद्रस्यविकल्पइतियुक्तंपश्यामः **तत्रैवगौतमः** शिवार्चनंसदाप्येवंशुचिःकुर्यादुदङ्मुखः॥ वाचस्पतिमतम्। प्राक्पश्चिमोदगास्यस्तुप्रातःसायंनिशासुचेति **प्रयोगपारिजातेगृह्यपरिशिष्टे** प्रतिमाप्राङ्मुखीरुदङ्मुखोयजेताऽन्यत्रप्राङ्मुखः। एतच्चस्थिरप्रतिमाविषयं। अन्यत्रचलार्चासु॥ **अथप्रतिमाः भागवार्चनदीपिकायांभविष्ये** सौवर्णीराजतीताम्रीमृन्मयीचतथाभवेत्॥

२०१

पाषाणधातुयुक्तावारीतिकांस्यमयीतथा ॥ रीतिःपित्तलं । शुद्धदारुमयीव पिदेवताऽर्च्याप्रशस्यते ॥ अंगुष्ठपर्वादारभ्यवितस्तियावदेवतु ॥ गृहेषुप्रति माकार्यानाधिकाशस्यतेबुधैः **पंचरात्रेतु** मृद्दारुलाक्षागोमेद वधूच्छिष्टमयींन त्वितिनिषेधउक्तः **भागवते** शैलीदारुमयीलौहीलेख्यालेख्याचसैकती॥मनो मयीमणिमयीप्रतिमाष्टविधास्मृता ॥ काष्ठंमधुकस्यैव । तत्रकाष्ठेषुमधुकमार्न यचवसुंधरे ॥ कृत्वाततप्रतिमांचैवप्रतिष्ठाविधिनार्चयेदितिवराहोक्तेः **देवी पुराणे** सप्तांगुलं समारभ्ययावच्चद्वाशांगुलम् ॥ गृहेष्वर्चासमाख्याताप्रास देवाधिकाशुभा॥**तिथितत्त्वेकालिकापुराणे** प्रतिमायाःकपोलौद्वौस्पृष्ट्वादक्षि णपाणिना॥प्राणप्रतिष्ठांकुर्वीततस्यदेवस्यवाहरेः ॥ अन्येषामपिदेवानांप्रतिम सुचपार्थिव ॥ प्राणप्रतिष्ठाकर्तव्यातस्यांदेवत्वसिद्धये ॥ वासुदेवस्यबीजेन तद्विष्णोरित्यनेनच ॥ तथैवहृदयेंगुष्ठंदत्वाशश्वच्चमंत्रवित् ॥ एभिर्मंत्रैःप्रति ष्ठांतुहृदयेपिसमाचरेत् ॥ अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यै देवत्वमर्चायैमामहेतिचकच्चन ॥ **हयशीर्षपंचरात्रे** अर्चकस्यतपोयोगादर्च नस्यातिशायनात् ॥ आभिरूप्याच्चबिंबानांदेवःसान्निध्यमृच्छति **प्रयोगपारि जातेव्यासः** प्रतिमापटयंत्राणांनित्यंस्नानंनकारयेत् ॥ कारयेत्पर्वदिवसेर दावामलधारणम् लिंगेविशेषस्तिथितत्त्वेभविष्ये मृद्भस्मगोशकृत्पिष्टताम् कांस्यमयंतथा ॥ कृत्वालिंगंसकृत्यूज्यवसेत्कल्पायुतंदिवि वार्क्षेवित्तप्रदंनि गंस्फाटिकंसर्वकामदं ॥ कृत्वापूजयविप्रेंद्रलप्स्यसेवांछितंफलम् ॥ **तत्रैव कालकौमुद्यांस्कांदे** अक्षादल्पपरीमाणांनलिंगंकुत्रचिन्नरः कुर्वीतांगुष्ठतो स्वंन कदाचित्समाचरेत् ॥ अक्षोऽशीतिर्गुंजागुंजाःपंचाल्पमाषकः ॥ तेष डशाक्षः कर्षोस्त्रीत्यमरकोशात् प्रयोगपारिजातेक्रियासारे नवाष्टसप्तांगुलिव लिंगंश्रेष्ठमिहोच्यते ॥ षट्पंचकचतुर्मानंमध्यमंत्रिविधंस्मृतम्॥त्रिद्व्येकांगुलि मानंयात्रिविधंतत्कनीयसम् ॥ एवंनवविधंप्रोक्तंचरलिंगंयथाक्रमम् **अथ चसूत्रीनिर्णयः ॥ गौतमीतंत्रे** लिंगमस्तकविस्तारोलिंगोच्छ्रायसमोमत ॥ परिधिस्तत्रगुणितस्तद्वत्पीठंव्यवस्थितम् ॥ प्रवालिकातथैवस्यात्पंचर

त्रविनिर्णयः ॥ अत्रेदंतत्त्वम् । लिंगमस्तकविस्तारंलिंगोच्चतासमंकृत्वातत्रि गुणसूत्रवेष्टनार्हंलिंगस्थौल्यंकृत्वा तत्समंवृत्तंचतुरस्रंवापीठंविस्तारमधश्चो र्ध्वंकुर्यात् ॥ पीठोच्चतातुलिंगोच्चतातोद्विगुणापीठमध्येलिंगाद्द्विगुणस्थूलं पीठोच्चतातृतीयांशेनकंठं कृत्वातस्योर्ध्वंअधश्चसमं बप्रद्वयंत्रयंवाकृत्वालिं गविस्तारषष्ठांशेनपीठोपरिबाह्यमेखलांकृत्वातदंतः संलग्नतत्समंखातंकृत्वा पीठाद्बहिर्लिंगसमदीर्घापीठार्धदीर्घावामूलेदैर्घ्यसमविस्तारां तृतीयांशेनमध्ये खातांपीठवत्समेखलांप्रनालिकांकुर्यादिति । अत्रमूलंसिद्धांतशेखरेशैवागमे च्चज्ञेयम् **तिथितत्वेब्राह्मे** सर्वत्रैवप्रशस्तोब्जःशिवसूर्यार्चनंविना **तत्रैववा राहपाद्मयोः** गृहेलिंगद्वयंनार्च्यंशालग्रामद्वयंतथा । द्वेचक्रेद्वारकायास्तु नार्च्यंसूर्यद्वयंतथा ॥ शक्तित्रयंतथानार्च्यंगणेशत्रयमेवच ॥ द्वौशंखौनार्च येच्चैवभग्नांचप्रतिमांतथा ॥ नार्चयेच्चतथामत्स्यकूर्मादिदशकंतथा ॥ गृहेभिद ग्धाभग्नाश्चनार्च्याःपूज्यावसुंधरे । एतासांपूजनान्नित्यमुद्वेगंप्राप्नुयाद्गृही । शालग्रामाःसमाःपूज्याःसमेषुद्वितयंनहि ॥ विषमानैवपूज्यास्तुविषमेष्वेकए वहि ॥ शालग्रामशिलाभग्नापूजनीयासचक्रका ॥ खंडिताःस्फुटितावापिशा लग्रामशिलाशुभा **वाराहे** दद्याद्भक्तायदेविशालग्रामशिलांनरः ॥ सु वर्णसहितांदिव्यांपृथ्वीदानफलंलभेत् **तत्रैव** यःपुनःपूजयेद्भक्त्याशालग्रा ग्रामशिलाशतम् । तत्फलंनैवशक्तोहंवक्तुंवर्षशतैरपि **देवीपुराणे** ब्राह्म णःक्षत्रियोवैश्यःशूद्रश्चपृथिवीपते ॥ स्वधर्मतत्परोविष्णुमाराधयतिनान्यथा **अविभक्तानामपृथग्देवपूजामाहप्रयोगपारिजातेआश्वलायनः** पृथग प्येकपाकानांब्रह्मयज्ञोद्विजातिनाम्॥ अग्निहोत्रंसुरार्चायांसंध्यानित्यंभवेत्पृथ क् **तत्रैवविष्णुधर्मे** शालग्रामशिलांवापिचक्रांकितशिलांतथा ॥ ब्राह्मणः पूजयेन्नित्यंक्षत्रियादिर्नपूजयेत् ॥ इदंस्पर्शसहितपूजाविषयम् । शूद्रोवानु पनीतोवास्त्रियोवापतितोपिवा ॥ केशवंवाशिवंवापिस्पृष्ट्वानरकमश्नुते ॥ ब्राह्मण्यपिहरंविष्णुंनस्पृशेच्छ्रेयइच्छती ॥ सनाथामृतनाथावातस्यानास्तीह निष्कृतिः ॥ स्त्रीणामनुपनीतानांशूद्राणांचजनेश्वर ॥ स्पर्शनेनाधिकारोस्ति

विष्णोर्वाशंकरस्यचेतिस्कांदात् ॥ स्पर्शरहितातुतयोर्भवत्येव । शालग्रामंन स्पृशेत्तुहीनवर्णोवसुंधरे ॥ स्त्रीशूद्रकरसंस्पर्शोवज्रस्पर्शाधिकोमतः ॥ मोहाद्यःसंस्पृशेच्छूद्रोयोषिद्वापिकदाचन ॥ स्वपतेनरकेघोरेयावदाभूतसंप्लवम् ॥ यदिभक्तिर्भवेत्तस्यस्त्रीणांवापिवसुंधरे ॥ दूरादेवास्पृशन्पूजांकारयेत्सुसमाहितइतिवाराहोक्तेः शालग्रामशिलामात्रेनिर्बंधोनप्रतिमादौ । सर्ववर्णैस्तुसंपूज्याःप्रतिमाःसर्वदेवताः ॥ लिंगान्यपितुपूज्यानिमणिभिःकल्पितानिचेति तत्रैवोक्तेः । चत्वारोब्राह्मणैःपूज्यास्त्रयोराजन्यजातिभिः ॥ वैश्यैर्द्वावेवसंपूज्यौतथैकःशूद्रजातिभिरितिस्कांदात् ॥ अन्येतुदीक्षितविषयत्वेनव्यवस्थामाहुः **विष्णुधर्मे** तयोरसंभवेचैवसाचेहनवधास्मृता ॥ रत्नजाहेमजाचैवराजतीताम्रजातथा ॥ रैतिक्यचार्यथालौहिशैलजाद्रुमजातथा ॥ अधमाधमाचविज्ञेयामृन्मयाप्रतिमाचया ॥ एषांफलानितत्रैवज्ञेयानि । नार्च्यागृहेऽङ्गुष्ठसमजामूर्तिश्चतुरंगुलतोधिका ॥ नवितस्त्यधिकाधातुसंभवाश्रेयइच्छता ॥ एवंलक्षणसंपन्नापारंपर्यक्रमागता ॥ उत्तमासातुविज्ञेयागुरुदत्तापितत्समा **तत्रैवपाद्मेशालग्रामंप्रक्रम्य** तत्राप्यामलकीतुल्यापूज्यासूक्ष्मैवयाभवेत् ॥ यथायथाशिलासूक्ष्मातथास्यात्तुमहत्फलम् **तथा** यवमात्रंतुगर्तःस्याद्यवार्धं लिंगमुच्यते ॥ शिवनाभिरितिख्यातस्त्रिषुलोकेषुदुर्लभः **तत्रैव** शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् ॥ वाराणस्यायवार्धिक्यंसमंताद्योजनत्रयम् ॥ योमृतस्तत्समीपेतुमृतोवानीयतेतिकं ॥ सवैमोक्षमवाप्नोतिसत्यंसत्यंनचान्यथा **तत्रैव** चक्रांकमिथुनंपूज्यंनैकंचक्रांकमर्चयेत् ॥ चक्रांकमिथुनात्सार्द्धंशालग्रामंप्रपूजयेत् **तत्रैववाराहे** म्लेच्छदेशेशुचौवापिचक्रांकोयत्रतिष्ठति ॥ योजनानांतथात्रीणिममक्षेत्रंवसुंधरे **तत्रैवशालग्रामंप्रक्रम्य** क्रयक्रीतापरिज्ञेयामध्यमायाचिताधमा **प्रयोगपारिजतेवाराहे** एवंलक्षणसंपन्नापारंपर्यक्रमागता ॥ उत्तमासातुविज्ञेयागुरुदत्तापितत्समा **अथपार्थिवपूजानंदीपुराणे** आयुष्मान्बलवान्श्रीमान्पुत्रवान्धनवान्सुखी ॥ वरमिष्टंलभेल्लिंगंपार्थिवंयः समर्चयेत् ॥ तस्मात्तुपार्थिवंलिंगंज्ञेयंसर्वार्थसाधकम् ॥ **तत्रैवै**

गोभूहिरण्यवस्त्रादिबलिपुष्पनिवेदने ॥ ज्ञेयोनमःशिवायेतिमंत्रःसर्वार्थसाध
कःसर्वमंत्राधिकश्चायमोंकाराद्यःषडक्षरः **भविष्ये** मूर्तयोष्टौशिवस्यैताःपूर्वा
दिक्रमयोगतः ॥ आग्नेय्यांताः प्रपूज्यास्तुवेद्यालिंगेशिवंयजेत् ॥ अत्र
नप्राचीमग्रतः शंभोरितिरुद्रयामलेनिषेधात् । नांतरालंप्राचींकिंतुप्रसि
द्धैव **तिथितत्वेदेवीपुराणे** मृदाहरणसंघट्टप्रतिष्ठाह्वानमेवच ॥ स्नपनं
पूजनंचैवविसर्जनमतःपरम् ॥ हरोमहेश्वरश्चैवशूलपाणिःपिनाकधृक् ॥
शिवःपशुपतिश्चैवमहादेवइतिक्रमः **स्कांदे** शुष्काण्यपिचपत्राणिश्रीवृक्ष
स्यनिवेदयेत् **तत्रैवभविष्ये** धत्तूरकैश्चयोलिंगंसकृत्पूजयतेनरः ॥ स
गोलक्षफलंप्राप्यशिवलोकेमहीयते **योगिनीतंत्रे** शिवागारेमल्लकंचसूर्यागा
रेचशंखकम् ॥ दुर्गागारेवंशवाद्यंमधुरींनचवादयेत् **श्राद्धहेमाद्रौस्कांदे** स्पृ
ष्ट्वारुद्रस्यनिर्माल्यंवाससाआप्लुतःशुचिः **प्रयोगपारिजातेक्रियासारे** मध्य
मानामिकामध्येपुष्पंसंगृह्यपूजतेत्॥अंगुष्ठतर्जन्यग्राभ्यांनिर्माल्यमपनोदयेत्॥
अपनीतंचनिर्माल्यंचंडेशायनिवेदयेत् । अशून्यमस्तकंलिंगंसदाकुर्वीतपूज
कः **शूलपाणौलैंगे** वरंप्राणपरित्यागःशिरसोवापिकर्तनम् ॥ नचैवापूज्य
भुंजीतशिवलिंगेमहेश्वरम् ॥ सूतकेमृतकेचैवनत्याज्यंशिवपूजनम् **तिथित
त्वेलैंगे** विनाभस्मत्रिपुंड्रेणविनारुद्राक्षमालया ॥ पूजितोपिमहादेवोनस्या
त्तस्यफलप्रदः ॥ तस्मान्मृदापिकर्तव्यंललाटेवैत्रिपुंड्रकम् **रुद्राक्षधारणेवि
शेषःशिवरहस्ये** एकवक्त्रःशिवःसाक्षाद्ब्रह्महत्यांव्यपोहति ॥ अवंध्यत्वंप्रति
स्रोतोवह्निस्तंभंकरोतिच ॥ द्विवक्त्रोहरगौरीस्याद्गोवधाद्यघनाशकृत् ॥
त्रिवक्त्रोह्यग्निजन्माथपापराशिंप्रणाशयेत् ॥ चतुर्वक्त्रःस्वयंब्रह्मानरहत्यांव्य
पोहति ॥ पंचवक्त्रस्तुकालाग्निरगम्याभक्ष्यपापनुत् ॥ षड्वक्त्रस्तुगुहोज्ञेयोभ्रू
णहत्यादिनाशयेत् ॥ सप्तवक्त्रःस्मृतोविष्णुर्भूतप्रेतभयापहः ॥ एकादशमुखो
रुद्रोनानायज्ञफलप्रदः ॥ द्वादशास्यस्तथादित्यःसर्वरोगनिबर्हणः ॥ त्रयो
दशमुखःकामःसर्वकामफलप्रदः ॥ चतुर्दशास्याःश्रीकंठोवंशोद्धारकरःपरइ
ति॥तथा। विनामंत्रेणयोधत्तेरुद्राक्षंभुविमानवः ॥ सयातिनरकान्घोरान्याव

303

दिंद्राश्चतुर्दश ॥ पंचामृतंपंचगव्यंस्नानकालेप्रयोजयेत् ॥ रुद्राक्षस्यप्रतिष्ठा यांमंत्रंपंचाक्षरंतथा ॥ त्रियंबकादिमंत्रंचतथातत्रप्रयोजयेत् यद्वाओंअघोरओं ह्रौंअघोरतरओंह्रौंह्रांनमस्तेरुद्ररूपह्रौंस्वाहाअनेनाभिमंत्र्यधारयेत् **तथा** अष्टो त्तरशतंकार्याचतुःपंचाशदेववा॥ सप्तविंशतिमानावाततोहीनाधमाःस्मृताः **प्र जापतिः** मोक्षार्थीपंचविंशत्याधनार्थीत्रिंशताजपेत् ॥ पुत्रार्थीपंचविंशत्यापं चदश्याभिचारके ॥ सप्तविंशतिरुद्राक्षमालयादेहसंस्थया ॥ यत्करोतिनरःपु ण्यंसर्वकोटिगुणंभवेत् ॥ योददातिद्विजेभ्यश्चरुद्राक्षंभुविसन्मुखम् ॥ तस्य प्रीतोभवेद्रुद्रःस्वपदंचप्रयच्छतीति **पदार्थादर्शेवोपदेवः** रुद्राक्षान्कंठदेशे दशनपरिमितान्मस्तकेविंशतिद्वे षट्षट्कर्णप्रदेशेकरयुगुलकृतेद्वादशद्वाद शैव ॥ बाह्वोरिंदोःकलाभिर्नयनयुगकृतेएकमेकंशिखायांवक्षस्यष्टाधिकंयः कलयतिशतकंसःस्वयंनीलकंठः **हेमाद्रौशिवधर्मे** स्नानंपलशतंज्ञेयमभ्यं गःपंचविंशतिः । पलानांद्वेसहस्रेतुमहास्नानंप्रकीर्तितम् ॥ पंचविंशत्पलं लिंगेअभ्यंगंकारयेदथ ॥ शिवस्यसर्पिषास्नानंप्रोक्तंपलशतेनच ॥ तावता मधुनाचैवदध्नाचैवततःपुनः ॥ तावतैवचक्षीरेणगव्येनैवभवेत्ततः ॥ भूयः सार्द्धसहस्रेणपलानामैक्षवेणच ॥ रसेनकारयेत्स्नानंभक्त्याचोष्णांबुनाततः **विष्णवादौतुस्कांदे** क्षीराद्दशगुणंदध्नाघृतेनैवदशोत्तरम् ॥ घृताद्दशगुणंक्षौ द्रंक्षौद्राच्चैक्षवजंतथा **ब्राह्मे** देवानांप्रतिमायत्रघृताभ्यंगक्षमाभवेत् ॥ पला नितत्रदेयानिश्रद्धयापंचविंशतिः ॥ इदंक्रोडीकृताभिप्रायेण **तत्रैवसंग्रहे** वि ष्वक्सेनायदातव्यंनैवेद्यस्यशतांशकम् ॥ पादोदकंप्रसादंचलिंगेचंडेश्वरायतु **पंचायतनसन्निवेशमाहबोपदेवःपदार्थादर्शश्च** शंभौमध्यगतेहरीनहरभूदे व्योहरौशंकरे भास्येनागसुतारवौ हरगणेशाजांबिकाः स्थापिताः ॥ देव्यां विष्णुहरेभवक्रवयोलंबोदरेजेश्वरेनांबाःशंकरभागतोऽतिसुखदाव्यस्तास्तुहा निप्रदाः ॥ शंकरभागतः । ईशानकोणादारभ्यप्रदक्षिणमित्यर्थः **अत्रदिक् स्वरूपमुक्तंप्रयोगपारिजातेमंत्रशास्त्रे** देवस्यमुखमारभ्यदिशंप्राचींप्रकल्प येत् ॥ तदादिपरिवाराणामंगाद्यावरणस्थितिः **तत्रक्रमःपाद्मे** रविर्विनायक

श्चंडीईशोविष्णुस्तुपंचमः ॥ अनुक्रमेणपूज्यंतेव्युत्क्रमेतुमहद्भयम् तथा पू ज्यपूजकयोर्मध्येप्राचीप्रोक्ताविचक्षणैः अथकेशवादिमूर्तयः। बोपदेवः को विगोवादापुरुपेप्रजाच्यकृममात्रिना॥ बाधोनृहसानिश्रीपाशाच्चगेविगपेचपे॥ अत्रकोविगवित्याद्यैःकेशवविष्ण्वादिचतुर्विंशतिमूर्तयोऽभिधीयंये । शातृशं खात्चगेचक्रगदेज्ञेयेत्यर्थः । शिष्टेभुजेपद्मंत्वर्थतःसिद्धम् ॥ अत्रदक्षिणाधःक रक्रमेणज्ञेयम्। दक्षिणोऽधःकरक्रमादितिहेमाद्रौवचनात्। तेनहेमाद्रिणासंवा दः। विशब्देनविपरीतंगचेइत्यर्थः अत्रापिशब्दादनुवृत्तिः। शंखाद्गदाचक्रेइ त्यर्थः। गपेइत्यत्रापिशादित्यनुवर्तते। शंखाद्गदापद्मेइत्यर्थः। विपरीतेपद्मगदेइ त्यत्रापिशंखाज्ज्ञेये।चपेचक्रपद्मे। शंखाच्चक्रपद्मेइत्यर्थः विइत्यत्रापिपद्मचक्रेइ त्यर्थः। तेनचगदेत्यष्टौमूर्तयः।गपेइत्यष्टौमूर्तयः । चपेइत्यत्रच।अत्रमूलंहेमाद्रौ ज्ञेयम् अथबौधायनसूत्रम्। त्रैविक्रमींचानुस्मृत्यलिंगार्चाप्रतिष्ठोच्यते यजमानःपूर्वोक्तकालेपूर्वेद्युः । दशद्वादशषोडशान्यतरहस्तंमंडपंकृत्वाग्नेये हस्तमात्रंचतुरस्रंकुंडंस्थंडिलंवापूर्वतोहस्तमात्रांवेदींनैर्ऋतेवास्तुमंडलमध्येवे दीं तदुपरिसर्वतोभद्रंकृत्वाप्राणानायम्यास्यांमूर्तौदेवस्यसान्निध्यसिद्ध्यर्थदी र्घायुर्लक्ष्मी सर्वकामसमृद्ध्यक्षय्यसुखकामोऽमुकमूर्तिप्रतिष्ठांकरिष्येइतिसंक ल्प्य । गणेशपूजापुण्याहवाचनमातृकापूजननांदीश्राद्धानिकृत्वाचार्यंचतु रोऋत्विजश्चवृत्वावस्त्राद्यैःपूजयेत् । अथाचार्यः । यदत्रसंस्थितमितिसर्षपा न्विकीर्यापोहिष्टेतिकुशोदकेनभूमिंप्रोक्ष्य । देवाआयांतु । यातुधानाअपयां तु। विष्णोदेवयजनंरक्षस्वेतिभूमौप्रादेशंकृत्वाऽस्मत्कृततुलापद्धतिमार्गेणमंड पप्रतिष्ठांकृत्वाऽ कृत्वावापूर्वरात्रौहिरण्योपधानंदेवंपंचगव्यहिरण्ययवदूर्वाश्व त्थपलाशपर्णैरापोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतसृभिः पवमानःसुवर्जनइ त्यनुवाकेनाभिषिच्यव्याहृतिभिरिदंविष्णुरितिफलयवदूर्वाः समर्प्यरक्षोहणमि तिहस्तेकंकणंबध्वा वाससाच्छाद्य । अवतेहेडउदुत्तमामितिजलेधिवासयेत् । इदंबौधायनोक्तम् । ततश्चलिंगार्चायांवाअत्राग्निंप्रतिष्ठाप्य गोक्षीरनीवारच रुंकृत्वाविष्णुश्चेत् कृसरमपिश्रपयित्वाज्यभागांतेपलाशोदुंबराश्वत्थशम्यपा

मार्गसमिद्भिः आज्येन चरुणातिलैर्वाप्रत्येकमष्टाविंशतिमष्टौवाहुतीर्लोकपा लमूर्तिमूर्तिपतिभ्योहुत्वास्थाप्यदेवमंत्रेणपूर्वोक्तसमित्तिलनैवारचर्वाज्यैरष्टस हस्रमष्टशतमष्टाविंशतिंवाहुत्वा अग्निर्यजुर्भिरित्यनुवाकेनदशाहुतीर्जुहुयात्। प्रतिद्रव्यहोमांतेदेवंपादनाभिशिरःस्पृशेत्आज्यहोमेचोत्तरतः सजलकुंभेसं पातान्नयेत्। तेषांमंत्राः।इंद्रायेंदोइतींद्रस्य। स्योनेतिपृथिवीमूर्तेः। अधो रेभ्यइतितत्पतेःसर्वस्य। अग्नआयाहीत्यग्नेः। अग्निंदूतमित्यग्निमूर्तेः। न मःशर्वायचपशुपतयेचेतिपशुपतेः यमायसोमंयमस्यअसिहिवीरितियजमान मूर्तेः। स्तुहिश्रुतंतत्पतेःउग्रस्य। असुन्वंतंनिर्ऋतेः। आकृष्णेनसूर्यमूर्तेः। योरुद्रोअग्नौइतितत्पतेरुद्रस्य। इममेवरुणस्य। शंनोदेवीजलमूर्तेः। नमो भवायेतिभवस्य। आनोनियुद्भिरितिवायोः। वातआवातुवायुमूर्तेः। तमी शानंतत्पतेरीशानस्य। आप्यायस्वेतिकुबेरस्य। वयंसोमेतिसोममूर्तेः। त तत्पुरुषायमहादेवस्य। अभित्वाईशानस्य। आदित्प्रत्नस्येत्याकाशस्य॥ नमउग्रायचेतितत्पतेर्भीमस्यततोदेवस्यपादौस्पृशेत्। एवंद्वितीयेहुत्वानाभिं तृतीयेमध्यंचतुर्थेउरः पंचमेशिरःस्पृष्ट्वाप्रतिपर्यायंसंपातजलेनदेवं अभिषिंचे त्। ततःस्विष्टकृदादिहोमशेषंसमाप्यार्चांशोधयेत्। स्थिरलिंगार्चादौतुनेदा नीमग्निस्थापनहोमादिकार्यम्॥ ततोदेवंनत्वा॥ स्वागतंदेवदेवेशविश्वरू पनमोस्तुते। शुद्धेपित्वदधिष्ठानेशुद्धिंकुर्मःसहस्वतामितिसंप्रार्थ्य। उत्तिष्ठ ब्रह्मणस्पतेइतिसऋत्विगुत्थाप्य। पूर्वमकृतेभ्युत्तारणेअधुनावाकार्यम्। अ ग्निःसप्तिमितिसूक्तमग्निपदहीनंपठित्वातत्सहितंपुनःपठेत्। एवमष्टसहस्रम ष्टशतमष्टाविंशतिंवापठन्जलंपातयेत् ततोर्चांद्वादशवारंमृदाजलेनचप्रक्षा ल्यमंत्रवत्पंचगव्यंकृत्वापयःपृथिव्यामावोराजानमितिचसंस्राप्य। आप्या यस्वदधिक्राष्वणस्तेजोसिमधुवाताआयंगौरितिपंचामृतैःसंस्राप्य॥ लिंगंचेन्न मस्तेरुद्रमन्यवइत्यष्टाभिः संस्राप्यघृतेनाभ्यज्योद्वर्तनेनोद्वर्योष्णोदकेनप्रक्षा ल्यगंधंदत्वासंपातोदकेनाभिषिच्यसपल्लवैःचतुर्भिःकुंभैरापोहिष्ठेतित्रिभिराक लशेष्वितिचप्रत्येकंसमुद्रज्येष्ठाइतिचतुर्भिराकलशेष्वितिचमीलितैः संस्राप्यौ

दुंबरादिपीठेऽर्चामुपवेश्यपरितोऽष्टदिक्षुसजलकुंभान्संस्थाप्य तेषुगंधपुष्पदू र्वाःक्षिप्त्वाद्येसप्तमृदः द्वितीयेपुष्करपर्णशमीविकंकताश्मंतकत्वचःपल्लवांश्च तृतीयादिषुसप्तधान्यं पंचरत्नफलपुष्पाणिकुशदूर्वागोरोचनसंपातोदकगंध फलसर्वौषधीःक्षिप्त्वा । क्रमेणापोहिष्ठेतितिसृभिर्हिरण्यवर्णाइतिचतुर्भिः । पवमानानुवाकेनचाभिषिच्यैककुंभेशमी पलाशवटखदिरबिल्वाश्वत्थविकंक तपनसाम्रशिरीषोदुंबराणांपल्लवान्कषायांश्चक्षिप्त्वाआश्वत्थेवइत्यभिषिच्यापं चरत्नोदकेनहिरण्यवर्णाइति संस्नाप्यवाससीदत्वाउपवीतादिदीपांतंकृत्वाहि रण्यगर्भः । यआत्मदा । यः प्राणतः । यस्येमे । येनद्यौः । यंक्रंद सी । आपोहयन् । यश्चिदापो । इत्यष्टौपिष्टदीपान्दत्वा । सूवर्ण शलाकयातैजसपात्रस्थंमधुघृतंचगृहीत्वारोचित्रंदेवानांतेजोसीतिमंत्राभ्यां ओं नमोभगवतेतुभ्यंशिवायहरयेनमः ॥ हिरण्यरेतसेविष्णोविश्वरूपायतेनम इतिचदक्षिणसव्येदेवनेत्रेमंत्रावृत्यालिखेत्अंजंतित्वेत्यंजनेन मधुनावांक्त्वा देवस्यत्वेतिमध्वाज्यशर्कराभिरंक्त्वातेनैवांजनेनपुनरंजयेत् । अत्रानर्ज्मीति शेषः । स्थिरलिंगेतुस्वर्णसूच्यागंधेन । ओंनमोगगवतेरुद्रायहिरण्यरेतसेप रायपमात्मनेविश्वरूपायोमाप्रियायनमइत्यङ्त्वांजनादिनांजयेत् ॥ ततः आदर्शभक्ष्यादिदर्शयेत् ॥ ततःकर्ताआचार्यायगामृत्विग्भ्यश्चदक्षिणांदद्या त् । अथाचार्यःप्रत्यृचमादौप्रणवंवदन्पुरुषसूक्तेनस्तुत्वा । वंशपात्रेपंचव र्णोदनेनदेवस्यनीराजनंकारयित्वारुद्रायचतुष्पथादौदद्यात् । मंत्रस्तु ओंन मोरुद्रायसर्वभूताधिपतयेदीप्तशूलधरायोमादयितायविश्वाधिपतये रुद्रायवैन नमोनमः । शिवमगर्हितंकर्मास्तुस्वाहेति ॥ अश्वत्थपर्णेभूतेभ्योनमइति ॥ के चिदेतद्रात्रौस्थिरप्रतिष्ठायामिच्छंति । अथाचार्यःसर्वतोभद्रेदेवानावाहयेत् । मध्येब्रह्माणम् । पूर्वादिदिक्षुइंद्रादिलोकपालान् । ईशानेंद्राद्यंतरालेषुवसू न् । रुद्रान् ॥ आदित्यान् । अश्विनौ । विश्वान्देवान् । पितॄन् । नागा न् ॥ स्कंदवृषौ । ब्रह्मेशानाद्यंतरालेषुदक्षविष्णुदुर्गास्वधाकास्मृत्युरोगान् । समुद्रान्सरितःमरुतःगणाधिपंचेति । मध्येएवपृथिवींमेरुंसंस्थाप्यदेवंचावा

ह्य । प्रागादि वज्रं शक्तिं दंडं खड्गं पाशं अंकुशं गदां शूलं तद्बाह्ये गौतमं भरद्वाजं विश्वामित्रं कश्यपं जमदग्निं वसिष्ठं अत्रिं अरुंधतींच । तद्बाह्ये नवग्रहान् । तद्बाह्ये ऐन्द्रीं कौमारीं ब्राह्मीं वाराहीं चामुंडां वैष्णवीं माहेश्वरीं वैनायकीमिति । एताः नामभिरावाह्यसंपूज्य । अर्चायांदेवंतन्मंत्रेणावाह्य । मंडलमध्येर्चासुप्रतिष्ठोभवेतिनिवेश्यसंपूज्य । वह्नौमंडलदेवतानांनामभिस्तिलाज्येन दशदशाहुतीर्हुत्वा शय्यायांदेवमारोप्य पुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वादेवेन्यासंकुर्यात् तद्यथा पुरुषात्मनेनमः ॥ प्राणात्मनेन० प्रकृतितत्त्वाय० बुद्धितत्त्वाय० अहंकारतत्त्वाय० मनस्तत्त्वाय० इतिसर्वांगे ॥ प्रकृतितत्त्वाय ० बुद्धितत्त्वाय ० हृदितत्त्वाय ० शब्दतत्त्वाय ० शिरसि ॥ स्पर्शतत्त्वाय० त्वचि ॥ रूपतत्त्वाय० हृदि ॥ एवंरसगंधश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थपृथिव्यप्तेजो वाय्वाकाशसत्त्वरजस्तमो देहतत्त्वानिविन्यसेत् ॥ ततःपुरुषसूक्तस्याद्यमृग्द्वयंकरयोः ॥ तदुत्तरंजान्वोः ॥ तदुत्तरंकट्योः ॥ तंयज्ञमितितिस्रः ॥ नाभिहृत्कंठेषुतस्मादश्वेतिद्वयंबाह्वोः ॥ ब्राह्मणस्येतिद्वयंनासयोः ॥ नाभ्येतिद्वयमक्ष्णोः ॥ अंत्यां शिरसि ॥ केचित्तत्त्वन्यासमन्यथैवाहुः । पुरुषप्रकृतिमहदहंकारतत्त्वानि । शब्दस्पर्शरूपरसगंधतन्मात्राणि । आकाशवायुतेजोप्पृथिवीश्रोत्रत्वक्चक्षुरसनाघ्राणवाक्पाणिपादपायूपस्थमनस्तत्त्वानीति । केचिदेतानिस्थिरलिंगादावेच्छंति । ततःसुखशायीभवेतिशय्यायां देवंस्वापयित्वामंडलशय्ययोरंतरालेनगंतव्यामितिप्रैषंदत्वा मंडलदेवताभ्योनामभिःपायसेनचरुणावाबलिंदद्यात् । नीवारचरुशेषेणदिग्बलिम् । नेदंस्थिरप्रतिष्ठायाम् । स्थिरलिंगार्चादौत्वयंविशेषः अग्निस्थापनहोमवर्ज्यसर्वंपूर्ववत्कृत्वा इदानीमग्निस्थापनंकृत्वापूर्वोक्तहोमंकुर्यात् ॥ नात्रनैवारश्चरुः विष्णुश्चेत्पूर्वोक्तहोमंकृत्वापुरुषसूक्तेनप्रत्यृचमाज्यंहुत्वा इदंविष्णुरिति पादौस्पृष्ट्वा पुनस्तावेवहुत्वा विष्णोर्नकुमितिनाभिंस्पृष्ट्वापुनस्तावेवहुत्वा । अतोदेवेतिशिरःस्पृष्ट्वापुनस्ताएवहुत्वपुरुषसूक्तेनसर्वांगंस्पृशेत् ॥ स्थिरलिंगंचेदग्निस्थापनादिपूर्वो

क्तसमिदाज्यतिलाहुतीर्हुत्वा । यातइषुरित्यनुवाकांतंद्रापेसहस्राणीत्यनुवाकाभ्यांचप्रत्यृचमाज्यंहुत्वासर्वोवैरुद्रइतिमूलंस्पृशेत् । पुनस्ताएवहुत्वाकद्रुद्रायेतिमध्यंपुनस्ताएवहुत्वा । नमोहिरण्यबाहवइत्यग्रम् । पुनस्ताएवहुत्वा सर्वरुद्रेणसर्वांगंस्पृशेत् । ततोधामंतइतिपूर्णाहुतिंजुहुयान्नवा एवमधिवासनं कृत्वापरेद्युः सद्योवापीठिकांस्नापयित्वामहीमूष्वित्यावाह्य । अदितिर्द्यौरितिस्तुत्वा । ह्रींनमइतिसंपूज्यतेनैवपूर्णाहुतिंहुत्वा । उत्तिष्ठब्रह्मणस्पतइतिदेवमुत्थाप्यपुष्पांजलिंदत्वा पुरुषसूक्तेनस्तुत्वा उदुत्यमित्युत्थाप्य कनिक्रददितिसूक्तेनविष्णुं सद्योजातमितिपंचानुवाकैर्लिंगंगृहंप्रवेश्यपीठिकायांइंद्रादिनामभिरष्टरत्नानिक्षिप्त्वा सप्तधान्यरूप्यवृषमनःशिलाःक्षिप्त्वा पायसेनसांलिप्यप्रणवेनांगन्यासंकृत्वा सुवर्णशलाकामंतरितांकृत्वा ओंसुलग्नेप्रतिष्ठपरमेश्वरेत्युक्त्वाअतोदेवेतिविष्णुं रुद्रेणचलिंगंस्थापयेत् । ततः प्राणप्रतिष्ठा ॥ चलार्चादौत्वधिवासनांतेपरेद्युरुत्तिष्ठब्रह्मणस्पतइतिदेवमुत्थाप्यपुरुषसूक्तोत्तरनारायणाभ्यांस्तुत्वा घृतेव्रीहिचरुंकृत्वातदेवतामंत्रेणदशाहुतीर्हुत्वानामभिर्जुहुयात् । अग्नयेस्वाहा । सोमायस्वाहा । धन्वंतरयेस्वाहा । कुह्वैस्वाहा । अनुमत्यैस्वाहा । प्रजापतयेस्वाहा । परमेष्ठिनेस्वाहा ब्रह्मणेस्वाहा । अग्नयेस्वाहा । सोमायस्वाहा । अग्नयेन्नादायस्वाहा । अग्नयेन्नपतयेस्वाहा । प्रजापतयेस्वाहा । विश्वेभ्योदेवेभ्यःस्वाहा । सर्वेभ्योदेवेभ्यःस्वाहा । भूर्भुवःस्वःअग्नयेस्विष्टकृतेइति । ततःसप्ततेपुनस्त्वेत्याभ्यांपूर्णाहुतिः । ततः आचार्योयाओषधीरितिसर्वौषधीःसमर्प्य । संपातोदकंदेवमंत्रेणशतवारमभिमंत्र्यतेनैवाभिषिंचेत् । ततःउत्तिष्ठेतिदेवमुत्थाप्य । विश्वतश्चक्षुरित्युपस्थायदेवंध्यात्वाजपेत् ब्रह्मणेनमः । एवंविष्णवेरुद्राय० । इंद्रादीनष्टौवसुभ्योरुद्रेभ्यआदित्येभ्योऽश्विभ्यांमरुद्भ्यः कुबेरायगंगादिमहानदीभ्योऽग्नीषोमाभ्यामिंद्राग्निभ्यांद्यावापृथिवीभ्यां धन्वंतरयेसर्वेशायविश्वेभ्योदेवेभ्योब्रह्मणेनमइति । ततःसंपातोदकेनयजमानमभिषिच्य । देवंध्यात्वाप्रतितिष्ठपरमेश्वरेतिपुष्पांजलिंनिवेद्य । सच्चिदानंदंब्रह्मैवभक्तानुग्रहायगृहीत

विग्रहंकरचरणाद्यवयविनंशंखचक्राद्यायुधवंतंनिजवाहनाद्युपेतं निजहृत्क मलेऽवस्थितंसर्वलोकसाक्षिणमणीयांसंपरमेष्ठ्यसिपरमांश्रियंगमयेति । मंत्रे णपुष्पांजलावागतंविभाव्याऽर्चायांविन्यस्यप्राणप्रतिष्ठांकुर्यात् यथा प्राणप्र तिष्ठामंत्रस्यब्रह्मविष्णुरुद्राऋषयः । ऋग्यजुःसामानिछंदांसि । क्रियामयवपुः। प्राणाख्यादेवता । आंबीजम् । क्रौंशक्तिःप्राणप्रतिष्ठायांविनियोगः । ततो ऋष्यादीन्क्रमेणशिरोमुखहृदगुह्यपादेषुविन्यस्य । ओंकंखंगंघंङंअंपृथिव्य तेजोवाय्वाकाशात्मनेआंहृदयायनमः । ओंचंछंजंझंञंइंशब्दस्पर्शरूपरसगं धात्मनेईंशिरसेस्वाहा । ओंटंठंडंढंणंउंश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मानेऊंशि खायैवषट् । ओंतंथंधंनंएं वाक्पाणिपादपायूपस्थात्मनेऐंकवचायहुम् । ओंपं फंबंभंमंवचनादानविहरणोत्सर्गानंदात्मनेओंनेत्रत्रयायवौषट् । ओंयंरंलंवंश षंसंहंलंक्षंअंमनोबुद्ध्यहंकारचित्तात्मने अःअस्त्रायफट् । एवंआत्मनिदेवे चकृत्वादेवंस्पृष्ट्वाजपेत् । ओंआंह्रींक्रोंयंरंलंवंशंषंसंहंसःदेवस्यप्राणाइहप्रा णाः। ओंआंह्रींक्रोंयंरंलंवंशंषंसंहंसःदेवस्यजीवइहस्थितःओंआंह्रींक्रोंयंरंलं वंशंषंसंहंसःदेवस्यसर्वेन्द्रियाणि । ओंआंह्रींक्रोंअंयंरंलंवंशंषंसंहंसः । देवस्य वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणाइहागत्यस्वस्तयेसुखेनसुचिरंतिष्ठंतुस्वाहेति । ततोऽर्चांहृद्यंगुष्ठंदत्वाजपेत्अस्यैप्राणाःप्रतिष्ठंतुअस्यैप्राणाःक्षरंतुच ॥ अस्यै देवत्वमर्चायैममाहेतिचकञ्चनेति ॥ ततःप्रणवेनसंरुध्यसजीवंध्यात्वाध्रुवाद्यौ रितितृचंजप्त्वाकर्णेगायत्रींदेवमंत्रंचजप्त्वापुरुषसूक्तेनोपस्थायपादनाभिशि रःस्पृष्ट्वा इहैवैधीतित्रिर्जपेत् । ततःकर्तास्वागतंदेवदेवेशमद्भाग्यात्त्वामि हागतः । प्राकृतंत्वमदृष्ट्वामांबलवत्परिपालय ॥ धर्मार्थकामसिद्ध्यर्थंस्थि रोभवशुभायनः ॥ सान्निध्यंतुसदादेवस्वार्चायांपरिकल्पय ॥ यावच्चंद्रावनी सूर्यास्तिष्ठंत्यप्रतिघातिनः ॥ तावत्त्वयात्रदेवेशस्थेयंभक्तानुकंपया ॥ भगव न्देवदेवेशत्वंपितासर्वदेहिनाम् ॥ येनरूपेणभगवंस्त्वयाव्याप्तंचराचरम् ॥ तेनरूपेणदेवेशस्वार्चायांसन्निधोभवेतिनमेत् । एतदंतेसर्वदेवानांसमानम् । देवमंत्रश्चमूलमंत्रोवैदिकोवाग्राह्याः । अथाचार्यःकर्तावालिंगचींवाओंभूःपुरु

षमावाहयामि । ओंभुवःपुरुषमावाहयामि ओंसुवःपुरुषमावाहयामि । ओं भूर्भुवःसुवःपुरुषमावाहयामीत्यावाह्य । प्रणवेनासनंदत्वातेनैवदूर्वाश्यामाक विष्णुक्रांतापद्ममिश्रंपाद्यम् । इमाआपःशिवतमाःपूताःपूततमामेध्यामेध्यत माअमृताअमृतरसाःपाद्यास्ताजुषतांप्रतिगृह्यतां प्रतिगृह्णातुभगवान्महावि ष्णुर्विष्णवेनमइतिपाद्यम् । भगवान्महादेवोरुद्रायनमइतिलिंगे ॥ इमा आपआचमनीयास्ताजुषतामित्याचमनीयम् । अर्घ्याइत्यर्घ्यम् । ततोवेद मंत्रैःसंस्नाप्यइदंविष्णुरितिविष्णौ । नमोअस्तुनीलग्रीवायेतिलिंगेप्रतिसरं विस्रस्य । इमेगंधाःशुभादिव्याःसर्वगंधैरलंकृताः ॥ पूताब्रह्मपवित्रेणपूताः सर्वस्यरश्मिभिः । पूताइत्यादिपूर्ववत् । इतिगंधम् । इमेमाल्याःशुभादि व्याःसर्वमाल्यैरलंकृताः ॥ पूताइत्यादिमाल्यम् इमेपुष्पाःशुभाइत्यादिपुष्प म् । वनस्पतिरसोद्भूतोगंधाढ्योधूपउत्तमः ॥ आघ्रेयःसर्वदेवानांधूपोयंप्र तिगृह्यताम् ॥ प्रतिगृह्णात्वित्यादिधूपम् । ज्योतिःशुक्रंचतेजश्चदेवानांसततं प्रियः ॥ प्रभाकरःसर्वभूतानांदीपोयंप्रतिगृह्यताम् ॥ इतिदीपंदत्वाविष्णौसं कर्षणवासुदेवप्रद्युम्नानिरुद्धपुरुषोत्तमाधोक्षजनृसिंहाच्युत जनार्दनोपेंद्रहरि श्रीकृष्णेतिद्वादशनामाभिः केशवादिद्वादशनामभिर्वापुष्पाणिसमर्प्यतैरेव तर्पणंकृत्वा । पायसगुडौदनचित्रौदनानि । पवित्रंतेविततमितिनैवद्यकृ सरंपूर्वोक्तनामभिर्हुत्वातेनैवशार्ङ्गिणेश्रियैसरस्वत्यैविष्णवेइतिहुत्वा । विष्णो र्नुकंवीर्याणि । तदस्यप्रियमभिपाथो० । प्रतद्विष्णुस्तवतेवीर्येण० । परोमात्र तन्वावृधान० त्रिचक्रमेपृथिवीमेषएतां० । त्रिर्देवःपृथिवीमेषएतां० । इतिद्वा दशनामभिश्चामुष्मैस्वाहेतिजुहुयात् । लिंगेतुदीपांतंकृत्वा भवाय० देवाय० शर्वाय०ईशानाय० पशुपतये० रुद्राय० उग्राय०भीमाय० महतेदेवायनमइ तिपुष्पाणिदत्वा । तैरेवतर्पणंकृत्वा । पवित्रंतेइतिपायसंगुडौदनंचनिवेद्यपूर्वो क्तनामाभिःकृसरंहुत्वा । भवस्यदेवस्यपत्न्यैस्वाहेत्याद्यष्टभिर्गुडौदनंहुत्वा । भवस्यदेवस्यसुतायस्वाहेत्याद्यैर्हरिद्रौदनंहुत्वा । त्र्यम्बकंयजामहे० । मानो महान्तमुतमानो० । मानस्तोकेतनये० आरात्तेगोघ्नमुतपूरुषघ्ने० त्रिकिरिद

विलोहित० सहस्राणिसहस्रशो इतिद्वादशएतैर्हुत्वा । शिवाय शंकराय सहमानायशितिकंठाय कपर्दिने ताम्राय अरुणाय अपगुरमाणाय हिरण्य बाहवे सस्पिंजराय बभ्लुशाय हिरण्यायेतिच जुहुयात् । ततःस्विष्टकृदादि होमशेषंसमाप्यवूर्वोक्तसर्वहविर्भिर्व्विष्णवेलिंगायवाबलिंदद्यात् **मंत्रस्तु** त्वा मेकमाद्यंपुरुषंपुरातनं नारायणं विश्वसृजं यजामहे ॥ त्वमेवयज्ञोविहितो विधेयस्त्वमात्मनात्मन् प्रतिगृह्णीष्वहव्यमिति । लिंगेतुनारायणपदे रुद्रं शिवमितिवदेत् । ततोऽश्वत्थपर्णेभूर्भुवःस्वरोमिति हुतशेषंनिधाय प्रदक्षि णीकृत्य विश्वभुजेआत्मनेपरमात्मनेनमःइतिनत्वाआचार्यायशतं तदर्धं तद र्धंद्वादशतिस्रएकांवागांदत्वाऋत्विग्भ्योपि दक्षिणांदत्वाशतंद्वादश ब्राह्मणा न्भोजयेदितिसंक्षेपः । प्रासादमात्रेनूतनेतु मात्स्योक्तजलाशयप्रतिष्ठावि धिमेवकुर्यात् ॥ गोरुत्तारणपात्रीप्रक्षेपादितुनभवतिद्वारलोपात् । वारुणहो मस्थानेवास्तुहोमः । अन्यत्तद्वदेवे ॥

इति भट्टकमलाकरकृतौ लिंगार्च्याप्रतिष्ठाविधिः ॥

अथपुनःप्रतिष्ठा तामधिकृत्यहयशीर्षपंचरात्रे—चांडालमद्यसंस्पर्श दूषितावह्निनाथवा ॥ अपुण्यजनसंस्पृष्टाविप्रक्षतजदूषिता ॥ संस्कार्येतिशेषः **पदार्थादर्शेब्राह्मे** खंडितेस्फुटितेदग्धेभ्रष्टेमानविवर्जिते ॥ यागहीनेपशुस्पृ ष्टे पतितेदुष्टभूमिषु ॥ अन्यमंत्रार्चितेचैवपतितस्पर्शदूषिते ॥ दशस्वेतेषुनो चक्रुःसन्निधानंदिवौकसः ॥ यागःपूजा । पशुर्गर्दभादिः **पंचरात्रे** खंडिता स्फुटितादग्धायस्मादर्चाभयावहा ॥ तस्मात्समुद्धरेत्तांतुपूर्वोक्तविधिनानरः॥ अर्चाभंगादावुपवासःकार्यः । नराज्ञोविल्पवेक्षीयात्सुरार्चाविप्लवेतथेति वि ष्णुधर्मोक्तेः **सिद्धांतशेखरे** चौरचंडालपतितश्वोदक्याःस्पर्शनेसति ॥ शि वाद्युपहतेचैवप्रतिष्ठांपुनराचरेत् **पंचरात्रे** अंगादंगादिसंधानेप्रतिष्ठांपुनरा चरेत् ॥ जलाधिवासविहितनेत्रोन्मीलनवर्जितां **शुद्धिविवेकेविष्णुः** द्र व्यवत्कृतशौचानांदेवतार्चानांभूयःप्रतिष्ठापनेनशुद्धिरिति । अर्चाःप्रतिमाः तद्द्रव्यस्यताम्रादेरुक्तशौचंकृत्वापुनःप्रतिष्ठांकुर्यादित्यर्थः । स्मृत्यर्थसारे

प्येवम् **तद्विधिर्बौधायनसूत्रे** पूर्वप्रतिष्ठितस्याबुद्धिपूर्वमेकरात्रंद्विरात्रमेकमासद्विमासंवार्चनादिविच्छेदे शूद्ररजस्वलाद्युपस्पर्शने पूर्वोक्तेकालेपुण्याहंवाचयित्वा युग्मान्ब्राह्मणान्भोजयित्वानिशायांजलाधिवासंकृत्वाश्वोभूते कलशपूर्णेनपंचगव्येनतत्तन्मंत्रैः स्नापयित्वाऽन्यंकलशंशुद्धोदकेनापूर्यतस्मिन्नवरत्नानिप्रक्षिप्यतंकलशंतत्तद्वायव्याष्टसहस्रमष्टशतमष्टाविंशतिवारंवाभिमंत्र्यतेनोदकेनदेवंस्नापयेतत्तः शुद्धोदकेनस्नापयेदष्टसहस्रमष्टशतमष्टाविंशतिवापुरुषसूक्तेनमूलमंत्रेणच । ततःपुष्पाणिदत्वायथासंभवमर्चयित्वागुडौदनंनिवेदयेदिति । बुद्धिपूर्वंतुविच्छेदेपूर्वोक्तांप्रतिष्ठांपुनःकुर्यात् । पूर्वोक्तविष्णुवचनात् इदंमलमासशुक्रास्तादावपिकार्यमितिमदनरत्नेहेमाद्रौच **देवार्चा प्रासादभेदनेतु शूलपाणौकाश्यपः** वापीकूपारामसेतुसभातडागवप्रदेवतायनभेदनेप्रायश्चित्तंचतस्रआज्याहुतीर्जुहुयात् । इदंविष्णुर्मानस्तोकेविष्णोःकर्माणिपादोस्येतियांदेवतामुत्सादयति तस्यैदेवतायैब्राह्मणान्भोजयेदिति । शंखलिखितोप्रतिमारामकूपसंक्रमध्वजसेतुनिपातभंगेषुतत्समुत्थानंप्रतिसंस्कारोऽष्टशतंचनिपातितानामिति । समुत्थानंप्रतिक्रियाप्रतिसंस्कारःपुनःप्रतिष्ठा । अष्टशतंपणादंडश्चेत्यर्थः **अथजीर्णोद्धारः** सचलिंगादौदग्धेभग्नेचलितेवा कार्यः । अयंचानादिसिद्धप्रतिष्ठितलिंगादौभंगादिदुष्टेपिनकार्यः । तत्रतुमहाभिषेकंकुर्यादितिविक्रमः । कर्त्तामुकदेवस्यजीर्णोद्धारंकरिष्ये इत्युक्त्वापुण्याहंवाचयित्वाआचार्यमृत्विजाश्चवृत्वा । लिंगेओंव्यापकेश्वरहृदयायनमः । ओं व्यापकेश्वरशिरसेस्वाहेत्येवंषडंगंकृत्वाघोरमंत्रंशतजप्त्वाऽग्निंप्रतिष्ठाप्याघोरेणघृतसर्षपैःसहस्रंहुत्वा । इंद्रादिभ्योनाम्नाबलिंदत्वाजीर्णदेवंप्रणवेनसंपूज्यब्रह्मादिमंडलदेवतानांहोमंपूर्वोक्तंकृत्वादेवंप्रार्थयेत् । जीर्णभग्नमिदंचैवसर्वदोषावहंनृणाम् ॥ अस्योद्धारेकृतेशांतिःशास्त्रेऽस्मिन्कथितात्वया ॥ जीर्णोद्धारविधानंचनृपराष्ट्रहितावहम् ॥ तदधस्तिष्ठतादेवप्रहरामितवाज्ञयेति ॥ ततःक्षाराज्यमधुदूर्वाभिःसमिद्भिश्चाष्टोत्तरसहस्रंशतंवादेवमंत्रेणहुत्वांऽगानांदशांशेनलिंगचालनार्थंसहस्रंशतंवापायसेनहुत्वालिंगंप्रार्थयेत् ।

लिंगरूपंसमागत्ययेनेदंसमधिष्टितम् ॥ यायास्त्वंसंमितंस्थानंसंत्यज्यैवशि वाज्ञया ॥ अत्रस्थानेचयाविद्यासर्वविद्येश्वरैर्युता ॥ शिवेनसहसंतिष्ठेतिमंत्रि तजलेनाभिषिच्यविसर्जयेत् । ततोऽस्त्रमंत्रितेनखनित्रेणखात्वालिंगमादायन द्यादौवामदेवेनलिंगंप्रणवेनमूर्तिंक्षिपेत् । दारुजंतुमधुनाऽभ्यज्याघोरेणदहे त् । हेमरत्नादिमयंतुदग्धंचलितंवापुनस्तत्रैवस्थापयेत् । ततःशांत्यैअघोरे णतिलैःसहस्रंहुत्वाप्रार्थयेत् । भगवन्भूतभव्येशलोकनाथजगत्पते ॥ जी र्णलिंगसमुद्धारःकृतस्तवाज्ञयामया ॥ अग्निनादारुजंदग्धंक्षिप्तंशैलादिकंज ले ॥ प्रायश्चित्तायदेवेशअघोरास्त्रेणतर्पितम् ॥ ज्ञानतोऽज्ञानतोवापियथो क्तंनकृतंयदि ॥ तत्सर्वंपूर्णमेवास्तुत्वत्प्रसादान्महेश्वरेति ॥ ततोयजमानः प्रार्थयेत् । गोविप्राशिल्पिभूतानामाचार्यस्यचयज्वनः ॥ शांतिर्भवतुदेवेशअ च्छिद्रंजायतामिदम् **मूर्तौतुविशेषः** त्वत्प्रसादेननिर्विघ्नंदेहंनिर्मायत्य सौ ॥ वासंकुरुसुरश्रेष्ठतावत्त्वंचाल्पकेगृहे ॥ वसन्क्लेशंसहित्वेहमूर्तिंवैतव पूर्ववत् ॥ यावत्कारयतेभक्तःकुरुतस्यचवांछितमिति ॥ ततोनवांमूर्तिंलिंगं वाकृत्वोक्तविधिनास्थापयेत् ॥ मूलंत्वग्निपुराणेस्पष्टम् । इतिजीर्णोद्धारः ॥ **अथतुलसीग्रहणम् । देवयाज्ञिककृतेस्मृतिसारे** वैधृतौचव्यतीपातेभौमभा र्गवभानुषु ॥ पर्वद्वयेचसंक्रांतौद्वादश्यांसूतकद्वये ॥ तुलसींयेविचिन्वन्ति तेछिंदंतिहरेःशिरः **विष्णुधर्मोत्तरे** रविवारंविनादूर्वांतुलसींद्वादशींविना ॥ जीवितस्यविनाशायप्रविचिन्वीतधर्मवित् **तथा** संक्रांतावर्कपक्षांते द्वाद श्यांनिशिसन्ध्ययोः ॥ यैश्छिन्नंतुलसीपत्रं तैश्छिन्नंहरिमस्तकम् **पाद्मे** द्वा दश्यांतुलसीपत्रं धात्रीपत्रंचकार्तिके ॥ लुनातिसनरोयच्छेन्निरयानतिगर्हि तान् **रुद्रयामले** द्वादश्यांच दिवास्वापस्तुलस्यवचयस्तथा ॥ विष्णोश्चैव दिवास्नानंवर्जनीयंसदाबुधैः **विष्णुधर्मे** नाछिंद्यात्तुलसींविप्रोद्वादश्यांवैष्णवः क्वचित् ॥ देवार्थेतुलसीछेदोहोमार्थेसमिधातथा ॥ इन्दुक्षयेनदुष्येतगवार्थे द्रुतृणस्यच **ग्रहणमन्त्रस्तुपाद्मे** तुलस्यमृतजन्मासिसदात्वंकेशवप्रिये ॥ केशवार्थंविचिन्वामिवरदाभवशोभनेइति **पारिजातेदक्षः** समित्पुष्पकुशा

दीनांद्वितीयःप्रहरोमतः ॥ अथ पुष्पादेःपर्युषितत्वम् **भार्गवार्चने भविष्ये** प्रहरंतिष्ठतेजातीकरवीरमहर्निशम् ॥ तुलस्याबिल्वपत्रेषुसर्वेषुजलजेषुच ॥ नपर्युषितदोषोस्तिमालाकारगृहेपिच **बृहन्नारदीये** वर्ज्यपर्युषितंपुष्पंवर्ज्यपर्युषितंजलम् ॥ नवर्ज्यंतुलसीपत्रंनवर्ज्यंजाह्नवीजलम् **तत्रैवपाद्मे** तुलसीपर्युषितानैवबिल्वंतुत्रिदिनावधि॥ पद्मंपंचदिनात्त्याज्यंशेषंपर्युषितंविदुः **स्कान्दे** पालाशंदिनमेकन्तु पंकजंचदिनत्रयम् ॥ पंचाहंबिल्वपत्रंच दशाहंतुलसीदलम् **पदार्थादर्शेबोपदेवस्त्वन्यथाह** बिल्वापामार्गजातीतुलसिशमिशताकेतकीभृङ्गदूर्वा मन्दाम्भोजाहिदर्भामुनितिलतगरब्रह्मकल्हारमल्ल्यः ॥ पंचाश्वारातिकुम्भीदमनमरुबकाबिल्वतोहानिशस्तास्त्रिंश ३० त्र्येका १ र्थ ६ रीशो ११ दधि ४ निधि ९ वसु ८ भू १ भू १ यमा २ भूय एवम् ॥ अस्यार्थः ॥ शताशतावरी । मन्दःमन्दारः । अहिर्नागकेशरः मुनिरगस्त्यः । अश्वासतिः । करवीरः कुम्भीपाटलेतिकैदेवनिघंटुः । अरयः षट् ईशाः एकादश । उदधयश्चत्वारः निधयोनव । वसवोऽष्टौ । भूः एकः । यमौ द्वौ बिल्वमारभ्याऽहिपर्यंतंगणयित्वादर्भमारभ्य पुनस्त्रिंशदादिगणयेदित्यर्थः । एतद्दिनोत्तरपर्युषितानीत्यर्थः **टोडरानंदेस्कान्दे दमनमुपक्रम्य** तस्यमालाभगवतः परमप्रीतिकारिणी ॥ शुष्कापर्युषितावापिनदुष्टाभवतिक्वचित् **तिथितत्त्वेमात्स्ये** बिल्वपत्रंचमाध्यंचतमालामलकीदले ॥ कल्हारंतुलसींचैवपद्मंचमुनिपुष्पकं ॥ एतत्पर्युषितंनस्यात् कुशाश्चकलिकास्तथा **स्मृतिसारावल्याम्** जलजानांच सर्वेषांपत्राणामहतस्यच ॥ कुशपुष्पस्यरजतसुवर्णकृतयोरपि ॥ नपर्युषितदोषोस्तितीर्थतोयस्यचैवहि ॥ मुकुलैर्नार्चयेद्देवं पंकजैर्जलजैर्विना **अथशिवनिर्माल्यनिर्णयःशिद्धान्तशेखरे** धराहिरण्यगोरत्नताम्ररौप्यांशुकादिकान् ॥ विहायशेषंनिर्माल्यंचण्डेशायनिवेदयेत् ॥ अन्यदन्नादिपानीयंतांबूलंगन्धपुष्पकम् दद्याच्चण्डायनिर्माल्यंशिवभक्तन्तुसर्वशः ॥ आचार्यशिवच्चण्डानामाज्ञाभंगेतुलक्षकम्॥ धनस्यभक्षणेतेषांपादोनंलक्षमीरितम् ॥ निर्मा

ल्येभक्षितेलक्षपादतःशुद्धिमीरिता ॥ दानंचभक्षणसमं तदर्धन्तदुपेक्षणे ॥ अकामाद्भक्षणेयद्वा निर्माल्यस्यजपेत्सुधीः ॥ ब्रह्मपंचकसाहस्रं धर्म्मेणस हितंततः ॥ कामतोभक्षणेदीक्षाप्रायश्चित्तंनचान्यतः ॥ निर्माल्यंलंघनेघोरं प्रजपेदयुतंततः ॥ स्पर्शश्चलंघनसमो विक्रयोभक्षणेनच **स्मृत्यर्थसारेपि** शैवसौरनिर्माल्येनैवेद्यभक्षणेचान्द्रमभ्यासेद्विगुणमत्याभ्यासेप्रतपनम् ॥ अ न्यनिर्माल्येप्यनापद्येवमितिइदंचज्योतिर्लिंगाद्यतिरिक्तविषयम् **तथाचपुरु षार्थप्रबोधेभविष्ये** ज्योतिर्लिंगंविनालिंगंयःपूजयतिसत्तमः ॥ तस्यनैवेद्य निर्माल्यभक्षणात्तप्तकृच्छ्रकम् ॥ शालग्रामोद्भवेलिंगेबाणलिंगेस्वयम्भुवि । रसलिंगेतथार्षेचसुप्रसिद्धप्रतिष्ठिते ॥ हृदयेचन्द्रकान्तेच स्वर्णरौप्यादिनि र्मिते॥शिवदीक्षावताभक्ते नेदंभक्ष्यमितीर्यते **तथा** बाणलिंगेस्वयम्भूतेचन्द्र कान्तेहृदिस्थिते ॥ चान्द्रायणसमंज्ञेयंशम्भोर्नैवेद्यभक्षणं । लिंगेस्वयम्भुवे बाणेरत्नजेरसनिर्मिते ॥ सिद्धप्रतिष्ठितेचैवनचण्डाधिकृतिर्भवेत् ॥ यत्रचण्डा धिकारोस्तितद्भोक्तव्यंनमानवैः ॥ चण्डाधिकारोनोयत्रभोक्तव्यंतत्रभक्तितः **त्रैविक्रम्याम्** बाणलिंगेचलौहेच सिद्धलिंगेस्वयम्भुवि ॥ प्रतिमासुचसर्वासु नचण्डोधिकृतोभवेत् ॥ अत्रब्रह्महापिशुचिर्भूत्वानिर्माल्यंयस्तुधारये त्॥तस्य पापंमहच्छीघ्रंनाशयिष्येमहाव्रतेइतिस्कांदादशुचिनानग्राह्यंशिवनिर्माल्यंकिं तुस्नात्वेतिस्मार्ताः अनुपनीतेनग्राह्यमितिश्रीदत्तःशिवदीक्षाहीनैर्नग्राह्यमिति शैवाःतिथितत्त्वेहेमाद्रौपरिशिष्टेअग्राह्यंशिवनैवेद्यंपत्रंपुष्पंफलंजलं॥शालग्रा मशिलासंगात्सर्वयातिपवित्रताम्॥पंचायतनपूजायांतंत्रेणचनिवेदितमित्यर्थः **शिवपुराणे** येवीरभद्रशमिताःशिवभक्तिपराङ्मुखाः । शंभोरन्यत्रदेवेषुयेभ क्तायेनदीक्षिताः ॥ तेषामनर्हमीशस्यतत्प्रसादचतुष्टयम् **काशीखंडे** जलस्य धारणंमूर्ध्निविश्वेशस्नानजन्मनः॥एषजालंधरोबंधःसमस्तसुखवल्लभः **तथा** स्ना पयित्वाविधानेनयोलिंगस्नपनोदकं ॥ त्रिःपिवेत्त्रिविधंपापंतस्येहाशुविनश्यति ॥लिंगस्नपनवार्भिर्यःकुर्यान्मूर्ध्न्यभिषेचनम्॥गंगास्नानफलंतस्यजायतेऽत्रवि पाप्मनः। इदंपूर्ववाक्यवशाद्विश्वेश्वरविषयमितिकेचित् । काशीस्थपुराणप्र

सिद्धसर्वलिंगविषयम् **काशीखंडेरत्नेश्वराख्याने** तथैवदर्शनादित्यन्ये **अथकृषिः राजमार्तंडः** ऋक्षेषूत्तरपौष्णवैष्णवमघामूलानुराधाश्विनी प्राजाप त्यकरद्वित्रैदैवतगुरुप्रालेयपादेषुच ॥ निर्दोषैर्वृषभैर्हलैश्चसुमनोमालाभिरभ्य र्चितैर्दत्वाक्षेत्रपतेर्बलिंहलधरःक्षेत्रंततःकर्षयेत् ॥ प्राजेशश्रवणोत्तरादितिम घामार्तंडतिष्याश्विनीपौष्णानुष्णमरीचयःशतभिषक्स्वातीविशाखातथा ॥ जी वार्केन्दुसितेंदुनंदनदिनेलग्नेचसौम्योदये सस्यानांवपनेतथैवलवनेशस्तास्त थारोपणे **चंडेश्वरः** हस्तचित्रादितिस्वातीरेवत्यांश्रवणत्रये ॥ स्थिरलग्नेगुरोर्वारे बीजंधार्येज्ञशुक्रयोः ॥ ओंधनदायसर्वलोकहितायदेहिमेधान्यंस्वाहा ॥ ले खयित्वाइमंमंत्रंधान्यागारेनिधापयेत् ॥ सस्यवृद्धिंपरांकुर्यात्पूजितंप्रतिपूज येत् ॥ दक्षिणदिङ्मुखगमनंगमनमभिनवासुनारीषु ॥ व्ययमपिसस्यधना नांनबुधाबुधवासरेकुर्युः ॥ शनिवारेचनोकार्योधनधान्यव्ययोबुधैः **अथव स्त्रंश्रीपतिः** रोहिणीषुकरपंचकेश्विभेत्र्युत्तरासुचपुनर्वसुद्वये ॥ रेवतीचव सुदैवतेजभेनव्यवस्त्रपरिधानमिष्यते ॥ जीर्णेरवौसततमंबुभिरार्द्रमिन्दौभौ मेशुचेबुधदिनेतुभवेद्धनाय ॥ ज्ञानायमंत्रिणिभृगौप्रियसंगमायमंदेमलाय चनवांबरधारणंस्यात् ॥ रोहिणीगुरुपुनर्वसूत्तरेयाबिभर्तिनववस्त्रभूषणे ॥ सा नयोषिदवलंबतेपतिंस्नानमाचरतिवारुणेपिया ॥ अथालंकारवलयादि **दैव ज्ञवल्लभः** नासत्यपूषवसुभिःकरपंचकेनमार्तंडभौमगुरुदानवमंतिवारे॥मुक्तासु वर्णमणिविद्रुमशंखदंतरक्तांबराणिविधृतानिभवंतिसिद्धये **ज्योतिर्निबंधे** हस्तानुराधमृगपूषधनिष्ठयुक्तचित्रोत्तरासुचपुनर्वसुरोहिणीषु ॥ लग्नेस्थिरेर विसुतेंदुजजीववारेहेमादिधारणविधिःकथितोनराणम् ॥ **तत्रैवश्रीपतिः** पौष्णाश्विनीवसुकरादिषुपंचकेषुकौसुंभहेममणिविद्रुमकाचशंखाः ॥ नार्याधृ ताःसुखसुखार्थकराभवंतिब्रह्मोत्तरादितिगुरुष्वसुखायभर्तुः **तत्रैव** शंखादि वररत्नानिपुष्यादित्युत्तरासुच ॥ रोहिण्यांनैवगृह्णीतभर्तुर्जीवितकांक्षिणी **अथसूचिकर्म** वासवादितिभत्वाष्ट्रमैत्रचंद्राश्विनीषुच ॥ सूचीकर्मतनुत्राण मेभिर्ऋक्षैःप्रशस्यते **अथशय्या** हस्तादितित्रब्रह्मगुरूत्तराणिपौष्णाश्विमूलेंदु

भचित्रभानि ॥ वारेषुजीवेंदुसितेंदुजानांशय्यासनारंभणमुत्तमंस्यात् **अथ शस्त्रधारणम्** पुष्येचादितिचित्रपद्मतनयेशक्रोत्तरारेवतीस्वातीवाजिविशा खमित्रसहितेभानौगुरौभार्गवे ॥ कुम्भेकीटगृहेवृषेमृगपतौचेंदौशुभैर्वीक्षिते सन्नाहःशरखड्गकुंतछुरिकाधार्यानृपाणांहिताः । **अथस्वामिसेवा चंडेश्वरः** रोहिण्युत्तरपौष्णेषुवसुवारुणयोरपि ॥ सेवेतस्वामिनंभृत्यःशुभवारोदयेतथा **ज्योतिर्निबंधे** दासीदासादिभृत्यानांकुर्यात्संगृहणंबुधैः ॥ स्थिरलग्नेशुभैर्दृष्टेमंदवारेविशेषतः ॥ **अथगजाश्वदोलाः सएव** पौष्णप्रजेशादितिभद्र यानिहस्तादिषट्कश्रवणोत्तराणि ॥ दोलादिमातंगतुरंगमाणामारोहणेभीष्ट फलप्रदानि ॥ **अथनृत्यम्** हस्तःपुष्योवासवंरोहिणीचज्येष्ठापौष्णंवारुणं चोत्तराश्च ॥ पूर्वाचार्यैःकीर्तितश्चक्रवर्तीनृत्यारंभेशोभनोऽयंभवर्गः । **अथ राजदर्शनं श्रीपतिः** मृगाश्विपुष्यश्रवणश्रविष्ठाहस्तध्रुवत्वाष्ट्रभपूषभानि ॥ मैत्रेणयुक्तानिनरेश्वराणांविलोकनेभानिशुभप्रदानि । **अथक्रयविक्रयौ** भा द्रद्वयत्रिदशमंत्रिदिवाकरेषु मूलानिलोत्तरतुरंगमरेवतीषु ॥ सारंगपाणिरज नीकरमैत्रभेषुलाभःसदैवभवतिक्रयविक्रयाभ्यां **वस्त्रेतु** चित्राशतभिषास्वा तीरेवतीचाश्विनीशुभा ॥ श्रवणश्चतथाप्रोक्तावस्त्राणांक्रयणेशुभः **अथसेतुः** स्वातीयुक्तेमंदवारेवृषलग्नेशुभेदिने ॥ सेतूनांबंधनंकार्यध्रुवभेचार्कजीवयोः **अथपशुक्रयम् । श्रीपतिः** चित्रोत्तरावैष्णवरोहिणीषुचतुर्दशीदर्शदिनाष्ट मीषु ॥ स्थानप्रवेशोगमनंविदध्यात्पुमान्पशूनांनकदाचिदेव **चंडेश्वरः** हस्तमूलविशाखासुरेवत्यांश्रवणेतथा ॥ मैत्रेचवारुणेश्रेष्ठंपशुक्रयणमुच्यते ॥ पूर्वात्रयामृतमयूखहुताशनेषुइंद्राग्निवाजिवसुवारुणशंकरेषु ॥ एतेषुगोमहिषदंतितुरंगमादिनानाप्रकारपशुजातिगतिःप्रशस्ता ॥ **अथगजदंतच्छेदः ज्योतिर्निबंधे** त्वाष्ट्रवैष्णवअश्विन्यामादित्येवसुदैवते ॥ दंतिनांशुभदंकर्म पुष्येहस्तेचकर्तनम् । **अथनिक्षेपः** भरणीत्रीणिपूर्वाणिआर्द्राश्लेषामघातथा॥ चित्राज्येष्ठाविशाखाचमूलंमृगपुनर्वसु ॥ एभिर्दत्तंप्रयुक्तंचयद्यन्निक्षिप्यतेध नम् ॥ पृष्ठतोधावमानस्यनिर्धनोनोपपद्यते । **अथऋणमोक्षः श्रीधरः**

वागीशमंददिवसांशकलम्रयुक्तेरिक्तासुमंददिवसेकुलिकोदयेच ॥ मैत्रेद्वितीय पदमैत्रमुहूर्तयुक्ते राश्युद्गमेचक्षणमोक्षमुशंतिसंतः। **अथराजमुद्रा** मृदुध्रुव क्षिप्रचरेषुभेषुयोगप्रशस्तेशनिचंद्रवर्जे ॥ वारेतिथौपूर्णजयाह्वयेचमुद्राप्रति ष्ठाशुभदाहिराज्ञाम्। **अथनौः चण्डेश्वरः** पौष्णाश्विनीतुरगवारुणमित्रचित्रा शीतोष्णरश्मिवसवोनलवंत्यमूनि ॥ वारेचजीवभृगुनंदनकेप्रशस्तेनौकादि संघटनवाहनमेषुकुर्य्यात्। **अथभोगः** गुरुभरविभानुराधाविधातृपौष्णाश्वि रोहिणीषुस्यात् ॥ स्वात्युत्तरासुकुर्याच्छयनासनभोगभोगादि **अथश्मश्रु कर्मश्रीपतिः** पुष्येपौष्णेचाश्विनीष्वैंदवेचशाक्रेहस्ताद्यत्रिकेभेप्यदित्याः ॥ क्षौरंकार्यंवैष्णवादित्रयेचमुक्त्वाभौमादित्यपातंगिवारान् ॥ नस्नानभुक्तोत्क टभूषितानामभ्यक्तयात्रासमरोत्सुकानां ॥ क्षौरंविदध्यान्निशिसंध्ययोर्वाजि जीविषूणांनवमेनचाह्नि **त्रिस्थलीसेतौवृद्धगार्ग्यः** रव्यारसौरवारेषुरात्रौपा तेव्रताहनि ॥ श्राद्धाहःप्रतिपद्रिक्ताभद्राःक्षौरेषुवर्जयेत् ॥ **गार्ग्यः** षष्ठ्यमा पूर्णिमापातचतुर्दश्यष्टमीतथा ॥ आसुसन्निहितंपापंत्रिषुतैलेभगेक्षुरे **राजमा र्तंडः** देवकार्येपितुःश्राद्धे रवेरंशपरिक्षये ॥ क्षौरकर्मनकुर्वीतजन्ममासे चजन्मभे **बृहस्पतिः** राजकार्येनियुक्तानांनराणांभूपजीविनाम् ॥ श्मश्रु लोमनखच्छेदोनास्तिकालविशोधनम् **तथा** क्षौरंनैमित्तिकंकार्यंनिषेधेस त्यपिध्रुवम् ॥ पित्रादिमृतिदीक्षासुप्रायश्चित्तंचतीर्थके ॥ केचित्तूत्तरार्धमन्य थापठंति मुंडनस्यनिषेधेपिकर्तनंतुविधीयतइति **नारदः** नृपविप्राज्ञयायज्ञेम रणेबंधमोक्षणे ॥ उद्वाहेखिलवारर्क्षेतिथिषुक्षौरमिष्टदम् **भारते** प्राङ्मुखःश्म श्रुकर्मणिकारयीतसमाहितः ॥ उदङ्मुखोवाथभूत्वातथायुर्विंदतेमहत् **अप रार्के** उदङ्मुखःप्राङ्मुखोवावपनंकारयेत्सुधीः ॥ केशश्मश्रुलोमनखान्यु दक्संस्थानिवापयेत् ॥ दक्षिणंकर्णमारभ्यधर्मार्थंपापसंक्षये ॥ शिखाद्यंनव मंस्कारेशिखाद्यंतंशिरोवपेत् **यतीनांतुविशेषोनिगमे** कक्षोपस्थशिखावर्ज मृतुसंधिषुवापयेदिति ॥ अन्येपिविधिप्रतिषेधाःप्रागुक्ताः **अथधनसंग्रहः** ब्रह्मानिलार्कमघमूलत्रिपूर्वरौद्रपौष्णानुराधगुरुविष्णुविशाखयुक्ते ॥ वारेकु

जार्कभृगुनंदनसोमजानां श्रेष्ठैंधनस्यकरणंभवतिप्रशस्तम् । **अथनवान्नम्** । **श्रीपतिः** रेवतीश्रुतिपुनर्वसुहस्तब्राह्मतःपृथगपिद्वितयेच ॥ त्र्युत्तरेषुग दितंपृथुकानांप्राशनंनवनवान्नविधानं **अथनवभोजनपात्रम्** । **ज्योतिर्निबंधे** भोज्यपात्रंसुधासिंधौघटयेद्वासमाहरेत् । तत्रान्नप्राशनप्रोक्तेकालेभोज नमाचरेत् **अथनवपर्णफलादिभक्षणम्** । **चंडेश्वरः** मूलाश्विमैत्रकरतिष्य हरींद्रभेषुपौष्णोत्तरेंदवपुनर्वसुवासवेषु ॥ वारेषुभूमितनयार्कजवारवर्जंतांबूल नूतनफलाद्यशनंहिताय **अथहोमेआहुतिपातः** **ज्योतिषे** तरणिविद्भृगु भास्करिचन्द्रमाःकुजसुरेज्यविधुंतुदकेतवः ॥ रविभतोदिनभंगणयेत्क्रमात् प्रतिखगंत्रितयंत्रितयंन्यसेत् ॥ दिनकरार्कितमःकुजकेतवोहुतभुजेनशुभा स्तिवरेशुभाः ॥ हवनचक्रमिदंप्रविलोक्यतांहवनकर्माणिसर्वसमृद्धये **अत्र शांतिरुक्ताविष्णुधर्मे** क्रूरग्रहमुखेचैवसंजातेहवनेशुभे शांतिंविधायगांदद्या द्ब्राह्मणायकुटुंबिने ॥ आयसींप्रतिमांकृत्वानिक्षिपेत्तामधोमुखीं ॥ गोमूत्रम धुगंधाद्यैरर्चितांप्रतिमांततः ॥ स्वस्थांनिधायसंपूज्यतत्रहोमोविधीयते **अत्रा पवादाःक्रियासारे** नित्येनैमित्तिकेदुर्गाहोमादौनविचारयेत् **अथज्वरादौ फलम् श्रीपतिः** स्वात्याश्लेषारौद्रपूर्वासुशाक्रेरोगोत्पत्तिर्जायतेयस्यपुंसः ॥ तद्भैषज्यंव्यापृतोनिःप्रयत्नःस्याद्रुग्घाब्धेर्लब्धजन्मापिवैद्यः ॥ व्याध्युत्पत्ति र्यस्यपौष्णेसमैत्रेप्राणत्राणंजायतेतस्यकृच्छ्रात् ॥ वैश्वेसौम्येरोगमुक्तिस्तुमा सार्द्धिशत्यास्याद्वासराणांमघासु ॥ पक्षाद्धस्तेवासवेसद्विदैवेमूलाश्विन्योरग्नि धिष्ण्येनवाहात् ॥ याम्येत्वाष्ट्रेवैष्णवेवारुणेचनैरुज्यंस्यान्नूनमेकादशाहात् ॥ आहिर्बुध्न्येतिष्यसंज्ञेयमाख्येप्राजापत्यादित्ययोःसप्तरात्रात् ॥ रोगान्मुक्ति र्जायतेमानवानांनिःसंदिग्धंजल्पितंगर्गमुख्यैः **ज्योतिषे** एकाहोनिधनंदशा हमनिलाद्वाणावियत्पर्वताःसप्ताङ्गाविलयश्चमासयुगुलंमासोमृतिःपक्षकः ॥ द्वौमासावथविंशतिर्दशनिशाः पक्षांतपक्षानखामासौपक्षदशांतपक्षककुभःपी डादिनान्यश्विभात् **दैवज्ञे** उरगवरुणरौद्रावासवेंद्रत्रिपूर्वायमदहनविशाखा पापवारेणयुक्ताः ॥ तिथिषुनवमिषष्ठीद्वादशीवाचतुर्थीभवतिमरणयोगोरोगि

णांकालहेतुः ॥ अत्रकुंभेहैमींनक्षत्रदेवताप्रतिमांसंपूज्यद्वादशदलेषुसंकर्ष णादिद्वादशमूर्तीर्द्वादशादित्यान्वासंपूज्य दूर्वासमित्तिलक्षीराज्यैर्गायत्र्यातद्दे वतायैअष्टोत्तरशतंहुत्वादध्योदनंबलिंदत्वाआचार्याय गांप्रतिमांचदत्वाविप्रा न् भोजयेदितिसंक्षेपः । विशेषस्तुव्रतहेमाद्रौपदार्थादर्शेचज्ञेयः **अथभेषजं। चंडेश्वरः** मूलानुराधमृगतिष्यपुनर्वसौचपौष्णाश्विनीश्रवणशक्रकरत्रयेच वा रेषुवाक्पतिदिनेषुसितेंदुशस्तेभैषज्यभक्षणममीषुहितंनराणाम् **अथारोग्य स्नानम् श्रीपतिः** इन्द्रोर्वारेभार्गवेचध्रुवेषुसार्पादित्यस्वातियुक्तेषुभेषु॥ पित्र्ये चांतेवापिकुर्यात्कदाचिन्नैवस्नानंरोगनिर्मुक्तजंतुः ॥ चरेविलग्नेरविभौमवारे रिक्तेतिथौस्याद्बहुलेचपक्षे ॥ धिष्ण्येचरेरोगनिपीडितानांस्नानंनराणांनिरुज त्वकारि **अथदंतधावनं** पृथ्वीचन्द्रोदयेविष्णुःप्रतिपद्दर्शषष्ठीषुचतुर्दश्यष्टमी षुच ॥ नवम्यांभानुंवारेचदंतकाष्ठंविवर्जयेत् **नारदः** चतुर्दश्यष्टमीपौर्णमा सीसंक्रमणेषुच नंदासुचनवम्यांचदंतकाष्ठंविवर्जयेत् ॥ श्राद्धेयज्ञेचनियमे तथाप्रोषितभर्तृका ॥ व्यतीपातेचसंक्रांत्यांनंदाभूताष्टपर्वसु ॥ तैलंक्षौरंरतिं मांसंदंतकाष्ठंचवर्जयेत् **वसिष्ठः** शन्यर्कशुक्रवारेषुकुजाहेव्रतवासरे ॥ जन्मा हेश्राद्धदिवसेदंतकाष्ठंविवर्जयेत् **हेमाद्रौस्कांदे** अभ्यंगेजलधिस्नानेदंतधाव नमैथुने ॥ जातेचनिधनेचैव तत्कालव्यापिनीतिथिः **संवर्तः** स्वौविवाहआ शौचेवर्जयेद्दंतधावनम् **व्यासः** अलाभेदंतकाष्ठानांनिषिद्धानांतथातिथौ ॥ अपांद्वादशगंडूषैर्विदध्याद्दंतधावनम् **अथामलकस्नानं। व्यासः** श्रीकामः सर्वदास्नानंकुर्वीतामलकैर्नरः॥ सप्तमींनवमींचैवपर्वकालंविवर्जयेत् ॥ चन्द्र सूर्योपरागेचस्नानमामलकैस्त्यजेत् **ऋतुः** षष्ठीचसप्तमीचैवनवमीचत्रयोदशी ॥ संक्रान्तौरविवारेच स्नानमामलकैस्त्यजेत् **यत्तु** नवमीदशमीचैव तृतीया चत्रयोदशी ॥ प्रतिपत्द्वादशीकृष्णस्नानंतासुविवर्जयेत् ॥ **यच्च दर्शेस्नानं** नकुर्व्वीत मातापित्रोःसुजीवतोः ॥ पुत्रःकुर्व्वन्निराचष्टे पित्रोरुन्नतिजीविते इति कण्वयमाद्यैःस्नानमात्रंनिषिद्धं । तल्लोगार्थस्नानपरं । ननित्यनैमि त्तिकपरमितिहेमाद्रिः। **अथतैलस्ननिषेधः कात्यायनः** पक्षादौचरवौ

षष्ठ्यां रिक्तायाञ्चतथातिथौ ॥ तैलेनाभ्यज्यमानस्तु चतुर्भिःपरिहीयते **गर्गः** पञ्चदश्यांचतुर्दश्यामष्टम्यांरविसंक्रमे ॥ द्वादश्यांसप्तमीषष्ठ्योस्तैल स्पर्शंविवर्जयेत् ॥ नचकुर्यात्तृतीयायां त्रयोदश्यान्तिथौतथा ॥ शाश्वतींग तिमन्विच्छन्दशम्यामपिपण्डितः **तत्रैवायुर्वेदे** षष्ठ्यांदिनक्षयेष्टम्यामेका दश्यांचपर्वसु ॥ द्वादश्यांचचतुर्दश्यांपंचम्यांप्रतिपत्तिथौ ॥ व्रतेश्राद्धदिने जन्मत्रितयेश्रवणार्द्रयोः ॥ ज्येष्ठोत्तराफाल्गुनीषुव्यतीपातेचवैधृतौ ॥ वि ष्टियोगेचसंक्रांतौमन्वादिषु युगादिषु ॥ नाभ्यंगंतत्रबालानांवृद्धानांतुनदो षकृदिति **व्यवहारतत्त्वे** संक्रांतिभद्राव्यतिपातवैधृतिषष्ठ्यष्टमीपर्वसुनार्क भूसुते ॥ स्नानेद्वितीयादशमीचगर्हितःषष्ठ्यादिमाद्यारदधावनेऽधमाः **अस्या पवादमाहतत्रैवप्रचेताः** सार्षपंगंधतैलंचयत्तैलंपुष्पवासितं ॥ अन्यद्द्रव्य युतंतैलंनदुष्यतिकदाचन **आयुर्वेदे** निषिद्धतिथिवारर्क्षग्रहणेष्वपिरात्रिषु । किंचिद्गोघृतयुक्तंवाविप्रपादरजोन्वितं ॥ भानौदूर्वान्वितंभौमेभूयुक्तंपुष्ययु ग्गुरौ ॥ सर्वेषांसर्वदातैलमभ्यंगेषुनदुष्यति ॥ मंगलेष्वप्यदोषः । मांगल्यं विद्यतेस्नानंवृद्धिपूर्वोत्सवेषुच ॥ स्नेहमात्रसमायुक्तंमध्याह्नात्प्राक्तदिष्यते ॥ इतिमदनपारिजातेकात्यायनोक्तेः **हेमाद्रौबृहन्मनुः** तैलाभ्यंगोनार्कवारेन भौमेनोसंक्रांतौवैधृतौविष्टिषष्ठ्योः ॥ पर्वस्वष्टम्यांचनेष्टःसइष्टःप्रोक्तान्मुक्त्वा वासरेसूर्यसूनोः **तिलस्ताननिषेधस्तुषदत्रिंशन्मते** तथासप्तम्यमावास्यासं क्रांतिग्रहजन्मसु ॥ धनपुत्रकलत्रार्थीतिलपिष्टंनसंस्पृशेत् **अथगृहारंभः । ज्योतिर्निबंधेबादरायणः** वैशाखेफाल्गुनेपौषेश्रावणेमार्गशीर्षके ॥ सूत्रारं भःशिलान्यासःस्तंबारंभःप्रशस्यते **नारदः** सौम्यफाल्गुनवैशाखमाघश्राव णकार्तिकाः ॥ मासाःस्युर्गृहनिर्माणेपुत्रारोग्यधनप्रदाः ॥ अत्रवृषसिंहवृश्चि काःवैशाखश्रावणकार्तिकाःसौराज्ञेयाइतिकालदर्शः **तत्रैवकारणतंत्रे** स्थि रमासेस्थिरेराशौस्थिरेंशेनववेश्मनाम् ॥ कुर्वीतस्थापनंशंकोःशंभुस्थापनमे ववा ॥ कार्तिकनिषेधस्तुलापरः । कुंभेमाघेपिसर्वेषांमांदिराणामुपक्रमम् ॥ महर्षयःप्रशंसंतिधान्यागारंविहायच ॥ निषेधोधान्यगृहपरः । पाकभोज

नशालादौमार्गशीर्षश्चफाल्गुनः ॥ रथ्यागेहमठादौचसहस्यःशुचिरेवतु ॥ पौषाषाढनिषेधस्तुप्रधानगृहपरः । नप्रधानगृहारंभंकुर्यात्पौषेशुचावपीतित त्रैवोक्तेः **ज्योतिस्तत्त्वे** पूर्वापरास्यंतुनभोंत्यपौषेयाम्योत्तरास्यंसहसिद्धिती ये ॥ कार्यंगृहंजीवबुधर्क्षगार्कनीचास्तगौजीवसितौचहित्वा **रत्नमाला यां** कर्कनक्रहरिकुंभगतेऽर्केपूर्वपश्चिममुखानिगृहाणि ॥ तौलिमेषवृषवृश्चि कयातेदक्षिणोत्तरमुखानिवदंति **दैवज्ञवल्लभः** शोकंधान्यंपंचतांनिःपशुत्वं स्वार्तिंनैःस्वंसंगरंभृत्यनाशम् ॥ स्वंश्रीप्रार्तिंवह्निभीर्तिंचलक्ष्मींकुर्युश्चैत्राद्या गृहारंभकाले **गर्गः** त्र्युत्तरामृगरोहिण्यांपुष्येमैत्रेकरत्रये ॥ धनिष्ठाद्वितीये पौष्णेगृहारंभःप्रशस्यते ॥ रोहिण्यांश्रवणत्रयेदितियुगेहस्तत्रयेमूलकेरेवत्यु त्तरफाल्गुनीष्वुरगभेमैत्रोत्तराषाढयोः ॥ शस्तंवास्तुकुजार्कवर्जितदिनेगोकुं भसिंहेमुखे कन्यायांमिथुनेनभःशुचिसहोराधार्कजेफाल्गुने **कालादर्शेस नत्कुमारः** आदित्यभौमवर्जंतुसर्वेवाराःशुभप्रदाः **वास्तुशास्त्रे** मार्गशीर्षे तथापौषेवैशाखेश्रावणेतथा ॥ फाल्गुनेचकृतंवेश्मसर्वसंपत्प्रदंभवेत् ॥ का र्तिकेमाघमासेचचैत्रेज्येष्ठेतथाश्विने ॥ मास्याषाढेभाद्रपदेनकुर्यात्सर्वथागृहं ॥ द्वितीयाचतृतीयाचपंचमीसप्तमीतथा ॥ त्रयोदशीचदशमीपूर्णाचैकादशीत था ॥ वेश्मारंभेशुभायस्युर्विशेषाच्छुक्लपक्षगाः **व्यवहारसारे** शिलान्यासः प्रकर्तव्योगृहाणांश्रवणेमृगे ॥ पौष्णेहस्तेचरोहिण्यांपुष्याश्विन्युत्तरात्रये **वा स्तुप्रदीपे** अधोमुखैर्भौर्विदधीतखातंशिलास्तथैवोर्ध्वमुखैश्चपट्टम् ॥ तिर्यङ्मुखैर्द्वारकपाटयानंगृहप्रवेशेमृदुभिर्ध्रुवैश्च । **ललः** स्नानंचपाकंशयनंचभो ज्यंगजालयंवाजिगृहंधनस्य ॥ देवस्वपूर्वादिदिशिक्रमेणमध्येसभाभूपनि वेशनाय **शिल्पशास्त्रे** कन्यासिंहेतुलायांभुजगपतिमुखंशंभुकोणेग्निखातंवा यव्येस्यात्तदास्यंत्वलिधनमकरेईशखातंवदंति ॥ कुंभेमीनेचमेषेनिर्ऋतिदि शिमुखंखातवायव्यकोणेचाग्नेःकोणे मुखंवैवृषमिथुनगतेकर्कटेरक्षखातं **तत्त्व चिंतामणौ** यत्रदैर्घ्यगृहादीनांद्वात्रिंशद्धस्ततोधिकं ॥ नतत्रचिंतयेद्धीमान्गु णानायव्ययादिकान् **राजमार्तंडः** आयव्ययौमासशुद्धितृणागारेनचिंतयेत् ॥

325

शिलान्यासादिनोकुर्यात्तथागारपुरातने **व्यवहारतत्त्वे** निषिद्धेष्वपिकालेषु स्वानुकूलेशुभेदिने ॥ तृणकाष्ठगृहारंभेमासदोषोनविद्यते **चंडेश्वरः** पूर्णादित्व ष्टमीयावत्पूर्वास्यंवर्जयेद्गृहं ॥ उत्तरास्यंनकुर्वीतनवम्यादिचतुर्दशीं ॥ अ मावास्याष्टमींयावत्पश्चिमास्यंविवर्जयेत्॥नवम्यादौतथायाम्यंयावत्कृष्णचतु र्दशी ध्रुवंदृष्ट्वाथवास्मृत्वाकर्तव्यंवास्तुरोपणम् ॥ सायाह्नेवर्जदिवसेरात्रौत्य क्त्वामहानिशाम् **वराहः** दक्षिणपूर्वेकोणेकृत्वापूजांशिलांन्यसेत्प्रथमाम् ॥ शेषाःप्रदक्षिणेनस्तंभाश्चैवंसमुत्थाप्याः **कालादर्शेवास्तुशास्त्रे** खातेचैवशि लान्यासेवृषचक्रंप्रशस्यते **तत्रोक्तंशांतिरत्ने** चतुर्हस्तप्रमाणंतुखात्वागर्तं समंततः॥ कुंभोदकैःसेचयेयुःशांतिपाठपुरःसरं ॥ ततईशानदिग्भागे साक्षतं रत्नपंचकम् साज्यंकुंभंस्थिरंमुक्त्वावास्तुपूजनपूर्वकं ॥ कुंभोपरिशिलान्या सःकर्तव्यस्तदनंतरं ॥ **अथगृहप्रवेशः बृहस्पतिः** नंदायांदक्षिणंद्वारंभद्रा यांपश्चिमेनतु॥जयायामुत्तरद्वारंपूर्णायांपूर्वतोविशेत् **वसिष्ठः**कृत्वाशुक्रंपृष्ठतो वामतोर्कंविप्रान्पूज्यानग्रतःपूर्णकुंभं ॥ हर्म्यैरम्यंतोरणस्रग्वितानैःस्त्रीभिः स्रग्वीगीतऽवाद्यैर्विशेच्च **व्यवहारतत्त्वे** सौम्यायनेश्रावणमार्गपौषेजन्मर्क्षल ग्नोपचयोदयेंशे॥वामंगतेर्केगृहवास्तुपूजांकृत्वाविशेद्वेश्मभकूटशुद्धम् **वास्तु शास्त्रे** लग्नात्प्रागादितोदिक्षुद्वौद्वौराशीनियोजयेत् ॥ एकमेकंन्यसेत्कोणे सूर्यंवामंविचिंतयेत् **वसिष्ठः** चंद्रजार्यसितवासरेषुचश्रीकरंसुतमहार्थलाभ दं ॥ सूर्यसूनुदिवसेस्थिरप्रदंकिंतुचौरभयमत्रनिर्दिशेत् **रत्नकोशे** पुष्येध निष्ठामृगवारुणेषुस्वायंभुवर्क्षेत्रिषुचोत्तरासु ॥ अक्षीणचंद्रे शुभदेनृपस्यतिथा वरिक्तेचगृहप्रवेशः **नारदः** प्रवेशोमध्यमोज्ञेयःसौम्यकार्तिकमासयोः ॥ माघफाल्गुनवैशाखज्येष्ठमासेषुशोभनः ॥ अकपाटमनाच्छन्नमदत्तबलिभो जनं ॥ गृहंनप्रविशेद्धीमानापदामाकरोहितत् ॥ ज्येष्ठःक्षुद्रगृहपरः **वृद्धगा र्ग्यः** भानोश्चभौमस्यविवाहवारौशूलादियोगानशुभान्नवापि ॥ रिक्तातिथिश्चापिमृदुध्रुवर्क्षेसौम्यायनेचप्रविशेद्गृहाणि **रत्नमालायाम्** त्वाष्ट्रमित्रशशि पुष्यदैवतान्यामनंतिमुनयोमृदून्यथ ॥ मैत्रगेहरतिभूषणांबरोद्गीतमंगलविधा

नमेषुच ॥ रोहिण्युत्तरात्रयंचध्रुवाणि । प्रवेशश्चवास्तुपूजांकृत्वाकार्यः ॥ जीर्णोद्धारेतथोद्यानेतथागृहनिवेशने ॥ नवप्रसादभवनेप्रसादपरिवर्तने ॥ द्वाराभिवर्तनेतद्वत्प्रासादेषुगृहेषुच ॥ वास्तूपशमनंकुर्यात्पूर्वमेवविचक्षण इतिमात्स्योक्तेः **तत्रैव** कृत्वाग्रहोद्विजवरानथपूर्णकुंभंदध्यक्षताम्रदलापुष्प फलोपशोभम् ॥ दत्वाहिरण्यवसनानितथाद्विजेभ्योमांगल्यशांतिनिलयं स्वगृहंविशेच्च ॥ गृह्योक्तहोमविधिनाबलिकर्मकुर्यात्प्रासादवास्तुशमनेचवि धिर्यउक्तः ॥ संतर्पयेद्द्विजवरानथभक्ष्यभोज्यैः शुक्लांबरःस्वभवनंप्रविशेत्सु रूपं **अथकलिवर्जानि बृहन्नारदीये** समुद्रयातुःस्वीकारःकमंडलुविधार णं ॥ द्विजानामसवर्णासुकन्यासूपयमस्तथा ॥ देवराच्चसुतोत्पत्तिर्मधुपर्के पशोर्वधः ॥ मांसदानंतथाश्राद्धेवानप्रस्थाश्रमस्तथा ॥ दत्ताक्षतायाःकन्याः याःपुनर्दानंपरस्यच ॥ दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधकौ ॥ रहःप्रस्थान गमनंगोमेधश्चतथामखः ॥ इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणः॥ कम ण्डलुः सोदकंचकमंडलुमित्युक्तः । मृन्मयोवा। दत्ताऊढा । ऊढायाःपुन रुद्वाहंज्येष्ठांशंगोवधस्तथा ॥ कलौपंचनकुर्वीतभ्रातृजायांकमंडलुमितिहे माद्रौवचनात् । ऊढायाःपुरापुरुषसंयोगान्मृतेदेयेतिकेचनेत्यादिभिर्विवाह तोक्ता **हेमाद्रौब्राह्मे** गोत्रान्मातुःसपिंडाच्चविवाहोगोवधस्तथा ॥ नराश्वमेधो मद्यंचकलौवर्ज्यंद्विजातिभिः । गोत्राद्गोत्रजायाःपितृष्वसुःमातृसपिंडात्मातु लात्तत्कन्यायाविवाहःकलौनकार्यः । तेन यानितद्विधायकानितानियुगांतर विषयाणि **तथाव्यासः** तृतीयांमातृतःकन्यांतृतीयांपितृतस्यथा ॥ शुल्केनचो द्वहिष्यंतिविप्राःपापविमोहिताः ॥ इति कलौतन्निंदामाह मातृतस्तृतीयांमा तुलकन्यामित्यर्थः । उक्तंचैतत्प्राक् । मद्यंस्त्रीभ्यश्चसुरामाचाममित्यादिनावि हितमपिवर्ज्यं **हेमाद्रौआदित्यपुराणे** विधवायांप्रजोत्पत्तौदेवरस्यनियोज नं ॥ बालायाःक्षतयोन्यास्तुवरेणान्येनसंस्कृतिः ॥ कन्यानामसवर्णानांविवाह श्चद्विजन्मभिः ॥ आततायिद्विजाग्र्याणांधर्मयुद्धेनहिंसनम् ॥ द्विजस्याब्धौतु नौयातुःशोधितस्यापिसंग्रहः ॥ सत्रदीक्षाचसर्वेषांकमंडलुविधारणम् ॥महाप्र

स्थानगमनंगोसंज्ञप्तिश्चगोसवे ॥ सौत्रामण्यामपिसुराग्रहणस्यचसंग्रहः ॥ अग्निहोत्रहवन्याश्चलेहोलीढापरिग्रहः ॥ वृत्तसाध्यायसापेक्ष्यमद्यसंकोचनंतथा ॥ प्रायश्चित्तविधानंचविप्राणांमरणांतिकं ॥ संसर्गदोषस्तेयान्यमहापातकनिष्कृतिः ॥ संसर्गदोषस्तत्संसर्गीचपंचमइत्युक्तः । स्तेयंचतदन्यानिमहापातकानि । ब्रह्महत्यासुरापगुरुतल्पानित्रीणि । तेषांकामकृतानांमरणांतिकंप्रायश्चित्तंविप्राणांकलौनेत्यर्थः मरणांतिकेहिजातिवधनिमित्तद्वादशाब्दाद्विगुणब्रह्मवधनिमित्तंचद्विगुणंभवति । तच्चतुर्थेनास्तिनिष्कृतिरितिनिषिद्धम् । नचात्महत्याविधिनातदबाधः तेनह्यात्महत्यानिमित्तस्यैवबाधोनजातिवधनिमित्तस्याभिन्नाविषयत्वात् । संसर्गिणस्तुकामतोपिव्रतस्यैवोक्तेर्नमरणांतिकाभावात् । तयोरेवनिष्कृतिर्नान्येषांत्रयाणां युगांतरेतु कलौनिषेधबलात्प्रवृत्तिः । एतद्विप्रपरंनक्षत्रियादेः । तदुक्तंविप्राणांमरणांतिकामिति विशेषोस्मत्कृतेप्रायश्चित्तरत्नेज्ञेयः । वरातिथिपितृभ्यश्चपशूपाकरणक्रिया ॥ दत्तौरसेतरेयांतुपुत्रत्वेनपरिग्रहः ॥ सवर्णान्यांगनादुष्टैःसंसर्गःशोधितैरपि ॥ अयोनौसंग्रहेवृत्तेपरित्यागोगुरुस्त्रियः ॥ परोद्देशान्यसंत्यागउद्दिष्टस्यापिवर्जनम् ॥ प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः ॥ अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवच ॥ शामित्रंचैवविप्राणांसोमविक्रयणंतथा ॥ शूद्भक्तानशनेयान्नहरणंहीनकर्मणः ॥ माधवीयेपृथ्वीचंद्रोदयेच ॥ शूद्रेषुदासगोपालकुलमित्रार्धसीरिणां ॥ भोज्यान्नतागृहस्थस्यतीर्थसेवातिदूरतः ॥ शिष्यस्यगुरुदारेषुगुरुवद्वृत्तिशीलता । आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकतातथा ॥ प्रजार्थंतुद्विजाग्र्याणांप्रजारणिपरिग्रहः ॥ ब्राह्मणानांप्रवासित्वंमुखाग्निधमनाक्रिया ॥ बलात्कारादिदुष्टस्त्रीसंग्रहोविधिचोदितः ॥ यतेश्चसर्ववर्णेषुभिक्षाचर्याविधानतः ॥ नवोदकेदशाहंचदक्षिणागुरुचोदिता ब्राह्मणादिषुशूद्रस्यपचनादिक्रियापिच ॥ भृग्वग्निपतनैश्चैववृद्धादिमरणे तथा ॥ गोतृप्तिशिष्टेपयसिशिष्टैराचमनक्रिया ॥ पितापुत्रविरोधेषुसाक्षिणादंडकल्पनं ॥ यतेःसायंगृहत्वंचसूरिभिस्तत्वदर्शिभिः ॥ एतानिलोकगुप्त्यर्थं

कलेरादौमहात्मभिः ॥ निवर्त्तितानिविद्वद्भिर्व्यवस्थापूर्वकंबुधैः ॥ सुराग्रह णस्यतत्कर्तुःसंग्रहोव्यवहारकः ॥ नचमद्यंचेतिसामान्येननिषिद्धस्याऽनेनो पसंहारइतिवाच्यम् । निषिद्धस्यनिवृत्तिमात्रफलत्वेनविशेषानपेक्षत्वात् । नै हिस्यादित्यस्यनब्राह्मणं हन्यादित्यनेनोपसंहारेहिंसातरस्यादोषत्वापत्तेश्चनि रूपितंचैतद्धेमाद्रिणाऽन्यत्रेत्युपरम्यते॥सुराग्रहस्योद्देशस्यसौत्रामणिविशेणा बिवक्षयावाजपेयेपिनिषेधः । सौत्रामण्यांतुपयोग्रहावास्युरित्यापस्तंबोक्तेर्वैक ल्पिकपयोग्रहैरथधिकारः । वाजपेयेतुतत्प्राप्तौमानाभावात्सोमसुरयोःसह त्यागेनांशेसुराद्रव्यत्वात्तत्प्रत्यक्षतयायागनामत्वेनतांविनासंज्ञायोगात्कलौ नाधिकारइतियुक्तंप्रतीमः । त्रिकांण्डमंडनादिलिखनंतुनिर्मूलमनाकरंचावृत्ते तिएकाहाद्ब्रह्मणःशुद्ध्येद्योग्निवेदसमन्वितइतिउक्तः । आद्यस्याशौचस्यसं कोचोनतस्यनिष्कृतिर्दृष्टाभृग्वग्निपतनादृतेइत्युक्तस्यप्रायश्चित्तस्यविधानंउ पदेशः ॥ कलौकर्तैवलिप्यतेइतिव्यासोक्तेः । पतितसंसर्गेदोषसत्वेपिपाति त्यंनेत्यर्थः । अन्यथासंसर्गःशोधितैरपीतिविरोधापत्तेः । स्तेयभिन्नेमहापा पेरहस्यकृतेप्रायीश्चत्तंनेत्यर्थः । सवर्णान्याअसवर्णाक्षत्रियादिस्तयादुष्टेअयो नौशिष्यादौचतस्रस्तुपरित्याज्याःशिष्यगागुरुगाचयेत्युक्तस्त्यागः। परोद्देशेन ब्राह्मणाद्यर्थआत्मत्यागः । यद्वापरोद्देशात्मत्यागोगोदानंमनसापात्रमुद्दिश्ये त्युक्तं । उद्दिष्टस्यत्यक्तस्यवर्जनंप्रतिग्रहसमर्थोपीत्युक्तं । वेतनग्रहणेनप्रति मापुजा । स्वाशौचकालाद्विज्ञेयंस्पर्शनंतुत्रिभागतइत्युक्तस्पर्शः । षडिति । उपोषितरूयहंस्थित्वाधान्यमब्राह्मणाद्धरेदित्युक्तमन्नचौर्यम् । आपदिक्षात्रा दिवृत्तिः । मुखेनैवधमेदग्निमित्युक्तंधमनम् । दशाहेनैवशुद्धेतभूमिष्टंचन वोदकमित्युक्तोदशाहः । गुरवेतुवरंदत्वेत्युक्त्वादक्षिणाशूद्रेषुदासगोपाले ति । कंदूपक्वंस्नेहपक्वंयच्चदुग्धेनपाचितम् ॥ एतान्यशूद्रान्यभुजोभोज्यानि मनुरब्रवीदित्यपरार्केसुमंतूक्ताशूद्रस्यपाकक्रियापितापुत्रविवादेतुसाक्षिणांत्रिप णोदमइत्युक्तः । सायंगृहत्वंविधूमेसन्मुसलेइत्युक्तं पृथ्वीचंद्रेणेतु अटंति बसुधांविप्राःपृथिवीदर्शनायच । अनिकेताह्यनाहारायत्रसायंगृहास्तुतेइतिवि

ष्णुपुराणोक्तोनिषिद्धः । तेनज्ञाताशीलपांथादेःश्राद्धादौविनियोगोनकार्यः । कलावित्यर्थउक्तः । एतानिवर्जानीत्यर्थः **निगमः** अग्निहोत्रंगवालंबंसं न्यासंपलपैतृकं ॥ देवराच्चसुतोत्पत्तिःकलौपंचविवर्जयेत् ॥ अग्निहोत्रंतदर्थ समाधानं । एतच्चसर्वाधानपरं । अर्धाधानस्मृतौश्रौतस्मार्ताग्न्योस्तुपृथक्कृ तिः ॥ सर्वाधानंतयोरैक्यकृतिःपूर्वयुगाश्रयेतिलौगाक्षिवचनादितिस्मृतिचं द्रिकायाम् ॥ एतेनचत्वार्यब्दसहस्राणिचत्वार्यब्दशतानिच ॥ कलेर्यदाग मिष्यंतितदात्रेतापरिग्रहः ॥ सन्यासश्चनकर्तव्योब्राह्मणेनविजानतेतिव्यास वचनंव्याख्यातम् ॥ **सर्वाधानेपिविशेषमाहदेवलः** यावद्वर्णविभागोस्ति यावद्वेदःप्रवर्तते ॥ संन्यासंचाग्निहोत्रंचतावत्कुर्यात्कलौयुगेइति ॥ अत्रपूर्व युगाश्रितेतिलौगाक्षिवाक्येपूर्वयुगानिकृतादीनित्येकोर्थः । अन्येतुयुगस्यपू र्वैकलेःपूर्वोभागः । सचत्वार्यब्दसहस्राणीतिपूर्वोक्तवाक्याच्चतुश्चत्वारिंशच्छ तवर्षावच्छिन्नः तस्मिन्भागेसर्वाधानंकार्यम् । तदुत्तरं तुयावद्वर्णविभा गोस्तीतिवाक्यात्वर्णविभागपर्यंतमर्धाधानमित्याहुः । संन्यासस्त्रिदंडः ॥

॥ इतिश्रीमन्नारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजदिन करभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौतृती यपरिच्छेदेकलिवर्ज्यानिसमाप्तानि ॥

अथ तृतीयपरिच्छेदे श्राद्धप्रकरणं प्रारभ्यते.

अथश्राद्धनिर्णयः ॥नानानिबंधवैमत्यभ्रांतचित्तोद्दिधीर्षया॥कमलाकर संज्ञेनक्रियतेश्राद्धनिर्णयः॥ **तत्स्वरूपमाहपृथ्वीचंद्रोदयेमरीचिः** प्रेतंपितृ श्चनिर्दिश्यभोज्यंयत्प्रियमात्मनः ॥ श्रद्धयादीयतेयत्रतच्छ्राद्धंपरिकीर्तित म् ॥ ब्राह्मणस्वीकारांतश्चतुर्थ्यंतपदोपनीतपित्राद्युद्देश्यकस्त्यागःश्राद्धमित्य र्थः । तत्रयद्यपिहोमपिंडभोजनानिप्रधानामितिहेमाद्रिः । होमश्चपिंडदानंच तथाब्राह्मणभोजनं ॥ श्राद्धशब्दाभिधेयंस्यादेकस्मिन्नोपचारिकामिति ॥ श्री

धरश्च । तथापिक्वचिद्विशेषंवक्ष्यामः । निमित्तभेदेभोजनस्यपिंडानांवानिषेधोनप्राधान्यंविरुणद्धि । असोमयाजिनोदधिपयोयागवत् **यच्चशूलपाणिः** नित्यश्राद्धमदैवंस्यादूर्ध्वपिंडविवर्जितमिति ॥ हारीतीयेनित्यश्राद्धमधादौपिंडनिषेधोस्तिनचप्राप्तिविनासःनचातिदेशंविनाप्राप्तिः । नचांगत्वेनविनातिदेशः । प्रधानस्यानतिदेशात् । सप्तमेउपकारकत्वेनातिदेशोक्तेः । तेनभोजनप्रधानंपिंडोंगम् । पिंडदानमात्रविधिस्त्वंगभूतात् कर्मांतरमेवप्रकर्णांतरन्यायादिति । तन्न जातश्राद्धेनदद्यात्तु पक्वान्नंब्राह्मणेष्वपि ॥ नपक्वंभोजयेद्विप्रान्सच्छूद्रोपिकदाचनेत्याद्यैर्जातश्राद्धशूद्रश्राद्धादौभोजनस्यनिषेधेनांगत्वापत्तेः । नतौपशौकरोतीतिवदुपजीव्यविरोधेनविकल्पापत्तेश्च । तेनश्राद्धशब्दाभिधेयेत्वनोभयप्राप्तौनिषेधः । पर्युदासोवादीक्षितोनददातिनजुहोतिनासोमयाजीसन्नयेदितितत्त्वम् । धर्मप्रदीपेपि । यजुषांपिंडदानंतु बह्वृचानांद्विजार्चनम् ॥ श्राद्धशब्दाभिधेयंस्यादुभयंसामवेदिनाम् ॥ तच्च पितृन्यजेतपितृभ्योदद्यादित्युभयप्रयोगदर्शनाद्यागदानोभयात्मकं । पितरेदेवताइतिपित्रुदेश्यकत्वाद्यागत्वं विप्रापेक्षयाचदानत्वमित्यविरुद्धम् । एतेननायंयागः । देवतोद्देशेनत्यागोयागः यागोद्देशाच्चदेवतेत्यात्माश्रयादितिगौडमतमपास्तं वैधशब्दविशेषोद्देश्यत्वस्यतस्येदमितिस्वत्वारोपप्रतियोगित्वस्यवादेवतात्वात् **तत्रैवसुमन्तुः** श्राद्धात्परतरंनान्यच्छ्रेयस्करमुदाहृतम् **आदित्यपुराणे** नसंतिपितरश्चेतिकृत्वामनसियोनरः ॥ श्राद्धंनकुरुतेतत्रतस्यरक्तंपिबंतिते **तद्धेदानाहविश्वाभित्रः** नित्येनैमित्तिकंकाम्यंवृद्धिश्राद्धसपिंडनम् ॥ पार्वणंचेतिविज्ञेयंगोष्ठ्यांशुच्यर्थमष्टकं ॥ कर्मांगंनवमंप्रोक्तंदैविकंदशमंस्मृतम्॥यात्रास्वेकादशंप्रोक्तंपुष्ट्यर्थंद्वादशंस्मृतमिति **एषांलक्षणानिभविष्ये** अहन्यहनियच्छ्राद्धंतन्नित्यमितिकीर्तितं॥ वैश्वदेवविहीनंतदशक्तावुदकेनतु ॥ एकोद्दिष्टंतुयच्छ्राद्धंतन्नैमित्तिकमुच्यते ॥ तदप्यदैवंकर्तव्यमयुग्मान्भोजयेद्द्विजान् ॥कामायविहितंकाम्यमभिप्रेतार्थसिद्धये ॥ वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते ॥ गन्धोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयं ॥

अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् । येसमानाइतिद्वाभ्यामेतज्ज्ञेयंसपिण्डम् नित्येनतुल्यशेषंस्यादेकोद्दिष्टंस्त्रियाअपि ॥ एतदुभयमेवस्त्रियः । तेनस्त्रीकर्तृकंस्त्रीसंप्रदानकंचेत्युभयनियमइतिकल्पतरुः ॥ अमावास्यायांयत्क्रियते तत्पार्वणमितिस्मृतम् । क्रियतेवापर्वणियत्तत्पार्वणमितिस्थितिः । अत्रपर्व चतुर्दश्यष्टमीचैवअमावास्याचपौर्णिमा ॥ पर्वाण्येतानिराजेन्द्ररविसंक्रमणं तथेति ॥ विष्णुपुराणोक्तंसंक्रांत्यादि गोष्ठ्यांयत्क्रियतेश्राद्धंगोष्ठिश्राद्धंतदुच्यते ॥ बहूनांविदुषांसंपत्सुखार्थंपितृतृप्तये ॥ क्रियतेशुद्धयेयत्तुब्राह्मणानांतुभोजनम् ॥ शुध्यर्थमितितत्प्रोक्तंवैनतेयमनीषिभिः ॥ निषेककालेसोमेचसीमन्तोन्नयनेतथा ॥ ज्ञेयंपुंसवनेचैवश्राद्धंकर्मांगमेवच ॥ देवानुद्दिश्ययच्छ्राद्धंतत्तुदैविकमुच्यते ॥ गच्छन्देशांतरंयस्तुश्राद्धंकुर्यात्तुसर्पिषा ॥ यात्रार्थमितितत्प्रोक्तंप्रवेशेचनसंशयः ॥ शरीरोपचयेश्राद्धमर्थोपचएवच ॥ पुष्ट्यर्थमेतद्विज्ञेयमौपचापिकमुच्यते ॥ गोष्ठ्यांश्राद्धकर्तृसमुदायेसंभूयसामग्रीसंपादनेनश्राद्धमित्यर्थः । युगपत्तीर्थादिप्राप्तौविदुषांश्राद्धंसंपदासुखार्थंभिन्नपाकाशक्तौबहुपितृकश्राद्धमेकःकुर्यादितिकल्पतरुः । शंखाधरश्चशुद्धिश्राद्धंप्रायश्चित्तांगमितिमैथिलाः । अत्रपार्वणैकोद्दिष्टवृद्धिसपिण्डिकरणात्मकंचतुर्विधमेवमुख्यंतस्यैवायंप्रपंचः।**अथश्राद्धदेशाः।मनुः**।शुचिदेशंविविक्तंतुगोमयेनोपलेपयेत् ॥ दक्षिणाप्रवणंचैवप्रयत्नेनोपपादयेत् । **पृथ्वीचन्द्रोदयेविष्णुधर्मे**। दक्षिणाप्रवणेदेशेतीर्थादौचगृहेपिवा ॥ भूसंस्कारादिसंयुक्तेश्राद्धंकूर्यात्प्रयत्नतः । **तत्रैवप्रभासखण्डे** । तीर्थादष्टगुणंपुण्यंस्वगृहेददतःशुभे । **भारते** । तस्यदेशाःकुरुक्षेत्रंगयागङ्गासरस्वती ॥ प्रभासंपुष्करंचेतितेषुश्राद्धं महाफलं। **स्कान्दे** ।तुलसीकाननच्छायायत्रयत्रभवेद्द्विज ॥ तत्रश्राद्धंप्रदातव्यंपितृणांतृप्तिहेतवे । **माधवीयेश्राद्धोपक्रमेव्यासः** । महोदधौप्रयागेचकाश्यांचकुरुजांगले । **शंखः** । गङ्गायमुनयोस्तीरेपयोष्ण्यमरकंटके ॥ नर्मदाबाहुदातीरेभृगुलिंगेहिमालये ॥ गङ्गाद्वारेप्रयागेचनैमिषेपुष्करेतथा ॥ सन्निहत्यांगयायांचदत्तमक्षयतांव्रजेत् ॥ अपिजायेतसोस्माकंकुलेकश्चिन्नरोत्त

मः ॥ गयाशीर्षेवटेश्राद्धंयोनोदद्यात्समाहितः ॥ एष्टव्याबहवःपुत्रायद्येकोपि गयांव्रजेत् ॥ यजेतवाश्वमेधेननीलंवावृषमुत्सृजेत् । **आदित्यपुराणे** । पंचक्रोशंगयाक्षेत्रंक्रोशमेकंगयाशिरः ॥ महानद्यःपश्चिमेनयावद्गृध्रेश्वरोगिरिः उत्तरेब्रह्मयूपस्ययावद्दक्षिणमानसम् ॥ यद्गयाशिरोनामत्रिषुलोकेषुविश्रुत मिति । **शूलपाणौबृहस्पतिः** । गङ्गायांधर्मपृष्ठेचसरसिब्रह्मणस्तथा ॥ गयाशीर्षेक्षयवटेपितृणांदत्तमक्षयं॥धर्मारण्यंधर्मपृष्ठंधेनुकारण्यमेवच॥ दृष्ट्वैतानि पितृश्चर्चन्वंशान्विंशतिमुद्धरेत् । **त्रिस्थलीसेतौवायीवये** । शमीपत्रप्रमाणेन पिण्डंदद्याद्गयाशिरे ॥ उद्धरेत्सप्तगोत्राणिकुलमेकोत्तरंशतं । **सप्तगोत्राणितु** । पितामाताचभार्याचभगिनीदुहितातथा ॥ पितृमातृष्वसाचैवसप्तगोत्राणिवैविदुरिति ॥ एषांगोत्राणामेकोत्तरशतंकुलंपुरुषाइत्यर्थः । **तेचोक्तास्तत्रवै** । तत्वानिविंशतिनृपाद्वादशैकादशादश ॥ अष्टावितिचगोत्राणांकुलमेकोत्तरंशतं । **तत्वानिचतुर्विंशतिः** । तेचद्वादशपूर्वाद्वादशपराः । एवमग्रेपि । **प्रयोगपारिजातेपाद्मे** । शालग्राममयीमुद्रासंस्थितायत्रकुत्रचित् वाराणास्यांयवाधिक्यंसमन्ताद्योजनत्रयं । तथा । यत्किंचित्पैतृकंकुर्यात्स पिण्डंवातदन्तिके ॥ विष्णुलोकंसगच्छेत्तुलभतेशाश्वतंपदम् । **तत्रैववाराहे** चक्रांकस्यतुसान्निध्यंयत्कर्माक्रियतेनरैः ॥ स्नानंदानंतपःश्राद्धंसर्वमक्षयतांव्रजेत् **अथनिषिद्धदेशःपृथ्वीचन्द्रोदयेस्कान्दे** त्रिशंकोर्वर्जयेद्देशं सर्वद्वादशयोजनं॥उत्तरेणमहानद्यादक्षिणेनतुकीटकान् ॥ देशस्त्रैशंकवोनाम श्राद्धकर्मणिवर्जितः **वायवीये** प्रनष्टाश्रमधर्माश्चदेशावर्ज्याःप्रयत्नतः **यमः** रूक्षंकुमिहतंक्लिन्नं संकीर्णानिष्टगन्धिकं ॥ देशंत्वनिष्टशब्दंच वर्जयेच्छ्राद्धकर्म्मणि **तत्रैवशंखः** गोगजाश्वादिजुष्टेषु कृत्रिमायांतथाभुवि ॥ नकुर्याच्छ्राद्धमेतेषु पारक्यासुचभूमिषु **यमः** परकीयेप्रदेशेषुपितृणांनिर्वपेत्तुयः ॥ तद्भूमिस्वामिपितृभिःश्राद्धकर्मविहन्यते **ब्राह्मभारतयोरपि** परकीयगृहेयस्तुस्वान् पितॄन्तर्पयेद्यदि ॥ तद्भूमिस्वामिनस्तस्यहरन्तिपितरोबलात् ॥ अग्रभागंतत स्तेभ्योदद्यान्मूलंचजीवितम्॥श्राद्धार्हाणामग्रभागश्राद्धंतदनर्हाणांशूद्राणांतु

मूल्यमितिकेचित् । षोडशीपिण्डेबान्धवानामपिण्डोक्तेः । येबांधवाबांधवा वेत्यादितर्पणबाधापत्तेश्च । नामगोत्रपूर्वंश्राद्धनिषेधोनान्यत्रेतिगौडाः । विप्रा सुतस्यशूद्रापुत्रश्राद्धनिषेधोनान्यत्र । अन्नदानंचान्नत्यागात्पूर्वंकार्यमितिमै थिलाः । तन्न । अग्रभागस्यश्राद्धपरत्वेमानाभावात् । अन्नदानेचनिषेधा भावात् ॥ त्यागात्पूर्वंकरणेनंगेनव्यवधानापत्तेः । अंगत्वेचमानाभावात् इदंचस्वाम्यनुज्ञाभावेतदुक्तंतत्रैवब्राह्मे स्वनुलिप्तेषुस्वेष्वनुज्ञापितेषुच ॥ श्राद्धमेतेषुदातव्यंवर्ज्यमेतेषुनोच्यते ॥ किरातेषुकलिंगेषुकोंकणेषुखसेष्व पि ॥ सिन्धोरुत्तरकूलेषुनर्मदायाश्चदक्षिणे ॥ पूर्वेणकरतोयायानदेयंश्राद्धमु च्यते ॥ इदंकाम्यविषयं । अन्यथातत्रत्यानांसर्वश्राद्धाकरणापत्तेः **नर्म दादक्षिणेपवादःस्कांदे** सह्यस्यचोद्भवोयत्र यत्रगोदावरीनदी ॥ पृथि व्यामपिकृत्स्नायांसप्रदेशोतिपावनः **परकीयत्वापवादआदित्यपुराणे** अटवीपर्वताःपुण्या नदीतीराणियानिच ॥ सर्वाण्यस्वामिकान्याहुर्नहितेषु परिग्रहः ॥ वनानिगिरयोनद्यस्तीर्थान्यायतनानिच ॥ देवखाताश्चगर्तश्च नस्वाम्यंतेषुविद्यते **स्मृतिसारे** नैकवासानचद्वीपेनांतरिक्षेकदाचन ॥ श्रु तिस्मृत्युदितंकर्मनकुर्यादशुचिःक्वचित् ॥ **दिवोदासीये** म्लेच्छदेशेतथा रात्रौसंध्यायांविप्रवर्जितः ॥ नश्राद्धमाचरेद्विद्वान्नचाकाशेकथंचन **अथश्रा द्धकालाः** तेचसंक्रांतियुगादिमहालयादयः । प्रायेणपूर्वपरिच्छेदद्वयेउ क्ताएव । केचित्तूच्यंते **पृथ्वीचंद्रोदयेवृद्धपराशरः** श्राद्धंवृद्धावचन्द्रेभ छायाग्रहणसंक्रमे ॥ नवोदकेनवान्नेचनवच्छन्नेतथागृहे ॥ नवैक्षवेषुचेहंते पितरोहिमघास्वपि ॥ पितरःस्पृहयंत्यन्नमष्टकासुमघासुचेति शातातप पाठः । नवोदकेनवकूपवाप्यादाविति केचित् । वर्षोपक्रमेआर्द्राप्रवेशइति गौडाः **नवान्नश्राद्धेविशेषोज्योतिषे** ज्येष्ठाशेषार्धगेसूर्येमृगनेत्रानिशात्म के ॥ नवान्नभोजनश्राद्धंजन्मचन्द्रतिथौनच ॥ आश्लेषाकृत्तिकाज्येष्ठामूला जपदगेषुच ॥ गुरुभौमदिनेरिक्तेतिथौनाद्यान्नवोदनं **व्रतैव** वृश्चिकेशुक्ल पक्षेतुनवान्नंशस्यतेबुधैः ॥ अतःकृष्णपक्षेनेतिगौडाः **मैथिलास्तु** अकृताग्र

यणंचैवधान्यजातंनरोत्तमइतिवाराहोक्तेः । प्रतिधान्यंश्राद्धमाहुः । तन्न । जा तपदस्यश्राद्धयोग्यसमूहपरत्वात् **हेमाद्रौजातूकर्ण्यः** ग्रहोपरागेचसूतेचजा तेपित्र्येगयायामयनद्वयेच ॥ नित्यंचशंखेचतथैवपद्मेदत्तम्भवेन्निष्कसहस्र तुल्यम् ॥ शंखंप्राहुरमावास्यांक्षीणचंद्रांद्विजोत्तमाः ॥ अष्टकासुभवेत्पद्मं तत्रदत्तन्तथाक्षयम् **तत्रैवशंखः** यदाविष्टिर्व्यतीपातो भानुवारस्तथैवच ॥ पद्मकंनामतत्प्रोक्तमयनाच्चचतुर्गणम् **याज्ञवल्क्यः** अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयं ॥ द्रव्यंब्राह्मणसम्पत्तिर्विषुवत्सूर्यसंक्रमः ॥ व्यतीपातोग जच्छायाग्रहणंचन्द्रसूर्ययोः ॥ श्राद्धंप्रतिरुचिश्चैवश्राद्धकालाःप्रकीर्तिताः ॥ कृष्णपक्षः सर्वोपि । शाकेनापरपक्षंनातिक्रमेत् । मासिमासिवाशनमितिश्रु तेः । ऊर्ध्ववाचतुर्थ्यायदहःसम्पद्यतेऋते चतुर्दशीमितिकाल्यायनोक्तेः । मा सिमासिकार्यमपरपक्षस्यापराह्णः । श्रेयानित्यापस्तंबोक्तेश्चवीप्सयासर्वकृ ष्णपक्षेषुनित्यम् । तत्रोपसंहारान्महालयपरत्वंपरास्तं । अत्रप्रत्यहंपंचम्या दियदहःसंपत्तिर्वेतित्रयःपक्षाः । यदैकदिनेश्राद्धंतदादार्शंपृथगेव । याज्ञव ल्क्येनामावास्यायाःपृथङ्निर्देशात् । एतेनकृष्णपक्षेयदहःसंपद्यते । अमा वास्यायांतुविशेषेणेतिनिगमोक्तेर्गुणोपरपक्षश्राद्धस्यामावास्येतिशूलपाणिमत मप्यपास्तम् अशक्तौदर्शेनापिमासिश्राद्धसिद्धिरितिनारायणवृत्तिः निरग्नि कानांकर्स्मिश्चिद्दिने । आहिताग्नेस्तुदर्शेएव । नदर्शेनविनाश्राद्धमाहि ताग्नेर्द्विर्जन्मनइतिमनूक्तेः **सर्वकृष्णपक्षाशक्तौमात्स्ये** अनेनविधिनाश्रा द्धंत्रिरब्दस्येहनिर्वपेत् ॥ कन्याकुंभवृषस्थेर्केकृष्णपक्षेचसर्वदा **कर्कोपि** आ हिताग्नेःसंवत्सरेत्रिःश्राद्धनियमइतिदेवलः । अनेनविधिनाश्राद्धंकुर्यात्संव त्सरंसकृत् ॥ द्विश्चतुर्वायथाश्राद्धंमासेमासेदिनेदिने ॥ कृष्णपक्षेष्वपिम हालयस्यश्रेष्ठत्वम् । तच्चोक्तंप्राक् **व्यतीपातेविशेषमाहहेमाद्रौशंखः** फलंलक्षघ्नमुत्पत्तौभ्रमणेकोटिरुच्यते ॥ पतनेशतकोट्यस्तुपतिवैदत्तमक्ष यम् **ज्योतिःशास्त्रे** द्वाविंशतिस्तथोत्पत्तौभ्रमणेचैकविंशतिः ॥ पतनेदश नाड्यस्तुपतितेसप्तनाडिकाः **अंत्यौचद्वौव्यतीपातौप्रागुक्तौहेमाद्रौमार्क**

ण्डेयः यदाचश्रोत्रियोभ्येतिगृहंवेदविदीप्सवित् ॥ तेनैकेनापिकर्तव्यंश्राद्धंच विषुवच्छुभं ॥ इदंचापिंडकार्यमितिहेमाद्रिः । एतज्जीवत्पितृकोकुर्यात् । उद्वाहेपुत्रजननेपित्र्येष्ट्यांसौमिकेमखे ॥ तीर्थेब्राह्मणआयातेषडेतेजीवतःपितुरितिमैत्रायणीयपरिशिष्टोक्तेः ॥ तिथिविशेषफलविशेषोयाज्ञवल्क्येनोक्तः । कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि । द्यूतंकृषिंचवाणिज्यंद्विशफैकशफांस्तथा ॥ ब्रह्मचर्यस्विनःपुत्रान्स्वर्णरौप्येसकुप्यके ॥ ज्ञानिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदा ॥ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीं ॥ एताः कृष्णपक्षस्थाएव । महालयेतुफलभूमेतिपृथ्वीचंद्रोदयः **पौर्णमास्यांहेमाद्रौपितामहः** अमावास्याव्यतीपातेपौर्णमास्यष्टकासुच ॥ विद्वान्श्राद्धमकुर्वाणोनरकंप्रतिपद्यते ॥ एतन्माध्यादिपरम् । व्रीहिपाकेचकर्तव्यंयवपाकेच पार्थिव ॥ पौर्णमासीतथामाघीश्रावणीचनृपोत्तम ॥ प्रौष्ठपद्यामतीतायांतथा कृष्णत्रयोदशी ॥ एतांस्तुश्राद्धकालान्वैनित्यानाहप्रजापतिरिति ॥ विष्णुधर्मोक्तेः **विष्णुः** माघीप्रौष्ठपद्यूर्ध्वंकृष्णत्रयोदशीति । अत्रमाघिपौर्णमासीतिकल्पतरुः ॥ श्रावण्यूर्ध्वमपि मघायोगसंभवात्रयोदशी विशेषणमिति गौडाः **नक्षत्रेष्वपियाज्ञवल्क्यः** स्वर्गंह्यपत्यभोजश्चशौर्यंक्षेत्रंबलंतथा ॥ पुत्रान्च्छ्रैष्ठ्यंचसौभाग्यंसमृद्धिंमुख्यतांशुभम् ॥ प्रवृत्तचक्रतांवापिवाणिज्यप्रभृतीनपि ॥ अरोगित्वंशोवीतशोकतांपरमांगतिं ॥ धनंवेदान्भिषक्सिद्धिंकुप्यंगामप्यजाविकं ॥ अश्वानायुश्चविधिवद्यःश्राद्धंसंप्रयच्छति ॥ कृत्तिकादिभरण्यंतंसकामान्प्राप्नुयादिमान् ॥ फलांतराण्यपिमहाभारतेकौर्मादेर्ज्ञेयानि **माधवीयेमरीचिः** कृत्तिकादिषुऋक्षेषुश्राद्धेयत्फलमीरितम् ॥ विष्कंभादिषुयोगेषुतदेवफलमिष्यते **बृहस्पतिः** आरोग्यंचैवसौभाग्यंशत्रूणांचपराजितं ॥ सर्वान्कामान्प्रियांविद्यांधनमायुर्यथाक्रमम् ॥ सूर्यादिदिवसेष्वेतच्छ्राद्धकृल्लभतेफलं ॥ ववादिकरणेष्वेतच्छ्राद्धकृल्लभतेफलम् **अन्यानिचषण्णवतिश्राद्धादीनिप्रायुक्तानिमार्कंडेयपुराणे** श्राद्धार्हद्रव्यसंपत्तौतथादुःस्वप्नदर्शने ॥ जन्मर्क्षेग्रहपीडासुश्राद्धंकुर्वीतचेच्छया **अथश्रा**

द्धाधिकारिणः। चन्द्रिकायांसुमन्तुः मातुःपितृःप्रकुर्वीतसंस्थितस्यौरसः सुतः॥ पैतृमेधिकसंस्कारंमंत्रपूर्वकमाहृतः **तत्रैवहेमाद्रौशंखः** पितुःपुत्रेणकर्तव्यापिंडदानोदकक्रिया॥ पुत्राभावेतुपत्नीस्यात्तदभावेतुसोदरः॥ अत्र यद्यपिपुत्रपदंक्षेत्रजादिद्वादशविधपुत्रपरम् **तेचद्वादशपुत्रायाज्ञवल्क्येनोक्ताः** औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतः॥ क्षेत्रजःक्षेत्रजातस्तुसगोत्रेणेतरेणवा॥ गृहेप्रच्छन्नउत्पन्नोगूढजस्तुसुतःस्मृतः॥ कानीनःकन्यकाजातोमातामहसुतः स्मृतः॥ अक्षतायांक्षतायांवाजातःपौनर्भवस्तथा॥ दद्यान्मातापितावायंसपुत्रोदत्तकोभवेत्॥ क्रीतश्चताभ्यांविक्रीतःकृत्रिमःस्यात्स्वयंकृतः॥ दत्तान्मातुःस्वयंदत्तोगर्भेविन्नःसहोढजः॥उत्सृष्टोगृह्यतेयस्तुसोपविद्धोभवेत्सुतः।पिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइति॥तथापिदत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहइतिहेमाद्रावादिपुराणे। कलावितरेषांपुत्रत्वनिषेधादौरसदत्तकपरमेव॥ यद्यपिपिंडदोंशहरश्चैषांपूर्वाभावेपरःपरइतियाज्ञवल्क्योरौरसाभावेदत्तकप्राप्तिस्तथाप्यौरसाभावेपौत्रः तदभावेप्रपौत्रस्तद्भावेदत्तकादयइतिज्ञेयम्॥ पुत्रेणलोकान्जयतिपौत्रेणानंत्यमश्नुते॥ अथपुत्रस्यपौत्रेणब्रह्मस्याप्नोतिविष्टपमिति जीमूतवाहनधृतवसिष्ठहारीतशंखलिखितोक्तेः। लोकानंत्यंदिवःप्राप्तिंपुत्रपौत्रप्रपौत्रकैरितियाज्ञवल्क्योक्तेश्च। पुत्रःपौत्रश्चतत्पुत्रःपुत्रिकापुत्रएवच। पत्नीभ्राताचतज्ज्ञश्चपितामातास्नुषातथा॥ भगिनीभागिनेयश्चसपिंडःसोदकस्तथा॥ असन्निधानेपूर्वेषामुत्तरेपिंडदाःस्मृताः **स्मृतिसंग्रहे** प्रपौत्रानंतरंपुत्रिकापुत्रोक्तेस्तत्समत्वाच्चदत्तकस्य **यद्यपिबृहस्पतिना** पुत्रश्चपुत्रिकापुत्रःस्वर्गप्राप्तिकरावुभौ॥ रिक्थेचपिंडदानेचसमानौपरिकीर्तितावितिपौत्रसाम्यमुक्तं **याज्ञवल्क्येनच** औरसोधर्मपत्नीजस्तत्समःपुत्रिकासुतइतिऔरससाम्यम् **तथापि** लोकेराजसमोमंत्रीत्यादौकिंचिन्न्यूनेसमशब्दप्रयोगात् गौणमुख्ययोःसाम्ययोगाच्चस्तुत्यर्थतत्नतुसमविकल्पइतिभ्रमितव्यम्। पुत्रःपौत्रःप्रपौत्रोवाभ्रातावाभ्रातृसंततिः॥ सपिंडसंसृतिर्वापिक्रियार्हान्नृपजायते॥ तेषामभावेसर्वेषांसमानोदकसंततिः॥ मातृपक्षसपिंडेन

संबंधोयोजलेनवा ॥ कुलद्वयेपिचोच्छिन्नेस्त्रीभिःकार्याक्रियानृप ॥ तत्संघातग तैर्वापितद्रिक्थात्कारयेन्नृपेतिविष्णुपुराणाच्चेति प्रपौत्रानंतरंदत्तकादयइतिपृ थ्वीचंद्रमदनरत्नकालादर्शादयः । मदनपारिजातेप्येवम् **बोपदेवरुद्रधराद यस्तु** पुत्रेषुविद्यमानेषुनान्यंवैकारयेत्स्वधामिति **सुमंतूक्तौ** पितामहःपितुःप श्चात्पंचत्वंयदिगच्छति ॥ पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषोडशम् ॥ नैतत्पौ त्रेणकर्तव्यंपुत्रवांश्चेत्पितामहइति **छंदोगपरीशिष्टेच** पुत्रशब्दस्यद्वादश विधसुतपरत्वात्पूर्वाभावेपरःपरइत्यस्यानन्यपरत्वाच्चदत्तकाद्यभावेपुत्रादीना मप्यधिकारइत्याहुः । तद्गौणमुख्योःसाम्यायोगाद्दत्तकेसतिपौत्रस्यांशहरत्व स्याप्यभावापत्तेःपुत्रपदस्यौरसमात्रपरत्वाच्चित्यम् अतएवनिषेधादुपनीतपौ त्रसत्वेप्यनुपनीतपुत्रस्यैवाधिकारः **औरसश्चानुपनीतोपिकुर्यादित्याहपृ थ्वीचंद्रोदयेसुमंतुः** श्राद्धंकुर्यादवश्यंतुप्रमीतपितृकेद्विजः ॥ व्रतस्थोवात्र तस्थोवाएकएवभवेद्यदि **वृद्धमनुः** कुर्यादनुपनीतोपिश्राद्धमेकोहियःसुतः ॥ पितृयज्ञाहुतिंपाणौजुहुयाद्ब्राह्मणस्यसः ॥ एकोमुख्यऔरसइत्यर्थः **मनुः** न ह्यस्मिन्युज्यतेकर्मकिंचिदामौंजिबंधनात् । नाभिव्याहारयेद्ब्रह्मस्वधानिन यनादृते ॥ ब्रह्मवेदः **सुमंतुरपि** नाभिव्याहारयेद्ब्रह्मयावन्मौंजीनिबद्धच ते । मंत्राननुपनीतोपिपठेदेवैकऔरसः ॥ अयंमंत्रपाठःत्रिवर्षकृतचूडस्यै व ॥ अनुपनीतोपिकुर्वीतमंत्रवत्पितृमेधिकम् । यद्यसौकृतचूडःस्याद्यदि स्याच्चत्रिवत्सरइतिसुमंतूक्तेः **यत्तुव्याघ्रः** कृतचूडस्तुकुर्वीतउदकंपिंडमेव च । स्वधाकारंप्रयुंजीतवेदोच्चारंनकारयेदिति **यच्चस्मृतिसंग्रहे** कृतचूडोनुपेत श्रपित्रोःश्राद्धंसमाचरेत् । उदाहरेत्स्वधाकारंनतुवेदाक्षराण्यसाविति तत् प्रथमवर्षचूडाविषथमितिमाधवमदनरत्नपृथ्वीचंद्राः ॥ त्रिवर्षोर्ध्वंमंत्रवत्व स्यविकल्पइतिचंद्रिकाबोपदेवश्च । दत्तकादिपरोनिषेधइतिवयम् **मदनर त्नेस्कांदे** यज्ञेषुमंत्रवत्कर्मपत्नीकुर्याद्यथानृप ॥ तथोर्ध्वदैहिकंकर्मकुर्या त्साधर्मसंस्कृता **अशक्तौतुकात्यायनः** असंस्कृतेतुपत्न्याचह्यग्निदानंसमं त्रकम् ॥ कर्तव्यमितरत्सर्वंकारयेदन्यमेवहि ॥ पुत्रश्चतज्जन्मतोधिकारी

किंतुवर्षोत्तरमित्याहकालादर्शः चौलादाब्दिकादर्वाङ्नकुर्यात्पैतृमेधिकम् ॥ पुत्रश्चोत्पत्तिमात्रेणसंस्कुर्याद्दृणमोचनात् ॥ पितरंनाब्दिकाच्चौलात्पैतृमेधेनकर्मणा ॥ एतच्चौरसस्यैव । दत्तकादीनांतूपनीतानामेवाधिकार इतिकालादर्शः **पृथ्वीचंद्रोदयेस्कान्दे** पित्रोरनुपनीतोपिविदध्यादौरसः सुतः । और्ध्वदैहिकमन्येतु संस्कृताःश्राद्धकारिणइति ॥ अन्यत्रापि । दर्शमहालयादावनुपनीतस्याधिकारोस्माभिःपूर्वमुक्तः प्रपौत्राभावेदत्तकादयएकादशपुत्राः । तदभावेभर्तुःपत्नीतस्याश्चसः । अपुत्राशयनंभर्तुःपालयंतीव्रतेस्थिता ॥ पत्न्यैवदद्यात्तत्पिण्डंकृत्स्नमंशंलभेतचेदितिवृद्धमनूक्तेः ॥ भार्यापिण्डंपतिर्दद्याद्भर्त्रेभार्यातथैवच । श्वश्वादेश्श्वश्रूषाचैव तदभावेसपिण्डकाइति ॥ पुत्राभावेतुपत्नीस्यात्पत्न्यभावेतुसोदरइतिचहेमाद्रौशंखोक्तेः **पृथ्वीचंद्रोदयस्तु** कानीनगूढसहजपुनर्भूतनयाश्चये । पत्न्यभावेधिकुर्युस्ते अप्रशस्ताःस्मृताहितेइतिस्मृतिसंग्रहात् । पत्न्यभावेकानीनादयइत्याह । पत्युरपिसपत्नीपुत्रेसतिनाधिकारः । पितृपत्न्यःसर्वामातरइतिसुमंतूक्तेः ॥ विदध्यादौरसःपुत्रो जनन्याऔर्ध्वदेहिकं । तदभावेसपत्नीजः क्षेत्रजाद्याः स्मृतास्तथा ॥ तेषामभावेतुपतिस्तदभावेसपिण्डकाइति मदनरत्नेकात्यायनोक्तेश्च ॥ बह्वीनामेकपत्नीनामेषएवविधिःस्मृतः ॥ एकाचेत्पुत्रिणीतासांसर्वासांपिण्डदस्तुसइतिबृहस्पतिवचनाच्च ॥ अपरार्केप्येवम् । तेनयच्छुद्धिविवेकेउक्तंसत्यपिसपत्नीपुत्रेपत्युरेवाधिकारइति तन्निरस्तम् **यच्चतत्रैव कात्यायनः** नभार्यायाःपतिर्दद्यादपुत्रायाअपिक्वचित् **यच्चविष्णुपुराणं** कुलद्वयेपिचोत्सन्नेस्त्रीभिःकार्याक्रियानृपेति **यच्चमार्कंडेयपुराणम्** सर्वाभावेस्त्रियःकुर्युःस्वभर्तृणाममंत्रकमितितदासुरादिविवाहोढाविषयम्॥घर्मैर्विवाहैरूढायासापत्नीपरिकीर्तिताक्रयक्रीतातुयानारीनसापत्न्यभिधीयते ॥नसादैवेनसापित्र्येदासींतांमुनयोविदुरितिमाधवीयेशातातपोक्तेः **यत्तुशुद्धिरत्नाकरःशूलपाणिश्च** अपुत्रस्यचयापुत्रीसापिपिण्डप्रदाभवेत् ॥ तस्यपिण्डान्दशैकंवाएकंहेनैवनिक्षिपेदितिजाबालोक्तेः॥भर्तुर्धनहरापत्नीतांविनादुहितास्मृता ॥ अं

गादंगात्सम्भवतिपुत्रवद्दुहितानृणामितिबृहस्पतिः दुहितुर्धनहारित्वोक्तेश्चपुत्राभावेकन्यातदभावेसपत्नीपुत्रइत्याहतुतत्पूर्वविरोधात् । मातुर्दुहितरशेषमृणांताश्यक्रतेन्वयेइति दुहितुर्मातृधनग्राहित्वेनपुत्रस्यतच्छ्राद्धानधिकारापत्तेश्चोपेक्ष्यमवचनन्तुभ्रातृपुत्राद्यभावविषयमपत्न्यभावेअविभक्तस्यसोदरःपूर्वोक्तशंखवचनात्।विभक्तस्यतुदुहिताधनहारित्वात् पूर्वोक्तजाबालिवचनाच्च । तत्राप्यूढानूढसमवायेऊढैव । दुहितापुत्रवत्कुर्यान्मातापित्रोस्तुसंस्कृता ॥ आशौचमुदकंपिण्डमेकोद्दिष्टंसदातयोरितिभरद्वाजोक्तेः ॥ तदभावेदौहित्रःधनहारित्वात् । मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदैहिकं ॥ कुर्वन्मातामहस्यापित्रतीनभ्रश्यतेव्रतादितिचंद्रिकायांवृद्धमनूक्तेः । यथाव्रतस्थोपिसुतःपितुःकुर्यात्क्रियांनृप ॥ उदकाद्यांमहाबाहो दौहित्रोपितथार्हतीत्यपरार्केभविष्योक्तेश्च **एतद्धनहारिणआवश्यकंनान्यस्येत्याहतत्रैवस्कन्दः** श्राद्धंमातामहानांतुअवश्यंधनहारिणा ॥ दौहित्रेनार्थनिष्कृत्यैकर्तव्यंपूर्वमुत्तरमिति । तेन दौहित्रोत्रपुत्रीकृतइतिदेवयाज्ञिकोक्तिःपरास्ता ॥ अत्रपत्नीदौहित्रसमवायेंशपरत्वात्पत्न्यैवकुर्यात् ॥ दौहित्रभ्रातृपुत्रसत्त्वेविभक्तस्यदौहित्रःअविभागेभ्रातृपुत्रः । भ्रातृतत्पुत्रसत्त्वेकनिष्ठश्चेतभ्रातैव । ज्येष्ठश्चेत्तत्तत्पुत्रःकुर्यादितिदाक्षिणात्यग्रन्थाः **हारलतादौतु** भ्रातुर्भ्रातास्वयंचक्रेतद्भार्याचेन्नविद्यते । तस्यभ्रातृसुतश्चक्रेयस्यनास्तिसहोदरइतिब्राह्मोक्तेः । पत्नीकुर्यात्सुताभावे पत्न्याभावेसहोदरइतिकौर्माच्चज्येष्ठभ्रातैवकुर्यान्नतत्पुत्रः ॥ यत्तु नानुजस्यतथाग्रजइतितत्कनिष्ठभ्रातृसत्वविषयम् **यच्चमनुः** सर्वेषामेकजातानामेकश्चेत्पुत्रवान्भवेत् ॥ सर्वास्तास्तेनपुत्रेणपुत्रिणोमनुरब्रवीदितितत्सहोदरभावविषयमित्युक्तं ॥ एतेनपुत्रत्वातिदेशोयम् । अतस्तस्मिन्सतिएकादशपुत्रःप्रतिनिधयोनकार्याः॥सएवपिण्डदोंशहरश्चेतिअत्रापिवाचस्यतिमनुकीटाकल्पतरुरत्नाकरादयःपरास्ताः । द्वादशपुत्राभावेपत्नीदुहितरइति याज्ञवल्क्योक्तेश्च ॥ तस्माद्दत्तकपुत्रप्रशंसेयमितिविज्ञानेश्वरः । अविभक्तविषयंवा **मदनरत्नेस्मृतिसंहे** पुत्रःकुर्य्यात्पितुःश्राद्धंपत्नीचतदसन्निधौ । धनहार्य्यथ

दौहित्रस्ततोभ्राताचतत्सुतः ॥ भ्रात्रोःसहोदरोभ्राताकुर्य्याद्दाहादितत्सुतः ॥ ततस्त्वसोदरोभ्रातातदभावेचतत्सुतइति भ्रातृपुत्राभावेक्रमेणपितृस्नुषास्व सृतत्पुत्रादयः ॥ धनहारित्वात् **भगिनीतत्सुतयोर्विशेषमाहमदनरत्ने कात्यायनः** अनुजाअग्रजावापिभ्रातुःकुर्वीतसंस्क्रियां॥ ततःस्वसोदरास्तद्व त्क्रमेणतनयस्तयोः **अपरार्केकाष्णाजिनिः** पुत्रःशिष्योथवापत्नीपिताभ्रा तास्नुषागुरुः॥ स्त्रीहारीधनहारीचकुर्यात्पिण्डोदकक्रियाम् **मार्कण्डेयपुराणे** पुत्रोभ्राताचतत्पुत्रःपत्नीमातातथापिता ॥ वित्ताभावेपिशिष्यश्चकुर्वीरन्नौ र्ध्वदैहिकं ॥ तेनधनहारीएतद्भिन्नइतिकालादर्शः ॥ अत्रपाठक्रमोनविवक्षि तः। पूर्ववाक्येष्वथततःशब्दादिभिःश्रौतक्रमोक्तः ॥ अथजिह्वायाअथवक्ष सइतिवत् **पृथ्वीचन्द्रोदयेवृद्धमनुः** स्नुषास्वस्त्रीयतत्पुत्रज्ञातिसम्बन्धबान्ध वाः ॥ पुत्राभावेतुकुर्वीरन्सपिण्डांतंयथाविधिः **मार्कण्डेयपुराणे** पुत्राद्युत्स न्नबन्धोश्चसखापिश्वशुरस्यच॥ जामातास्नेहवत्कुर्यादखिलंपैतृमेधिकं **चन्द्रि कायांवृद्धशातातपः** मातुलोभागिनेयश्चस्वस्त्रीयोमातुलस्यच ॥ श्वशुरस्य गुरोश्चैवसख्युर्मातामहस्यच ॥ एतेषांचैवभार्याणां स्वसुर्मातुःपितुस्तथा ॥ श्राद्धमेषांतुकर्तव्यमितिवेदविदोविदुः **शुद्धिविवेकेपृथ्वीचन्द्रोदयेचब्राह्मे** दत्तानांचाप्यदत्तानां कन्यानांकुरुतेपिता ॥ चतुर्थेहनितास्तेषांकुर्वीरन्सुस माहिताः॥ दत्तावाग्दत्ताः ॥ मातामहानांदौहित्राःकुर्वत्यहनिचापरे ॥ ते पितेषांप्रकुर्वीतद्वितीयेहनिसर्वदा ॥ जामातुःश्वशुराश्चकुस्तेषांतेपिचसंयताः॥ मित्राणांतदपत्यानांश्रोत्रियाणांगुरोस्तथा ॥ भागिनेयसुतानांचसर्वेषांत्वपरे हनि ॥ राजासतिसपिण्डेतुनिरपत्येपुरोहितः ॥ मंत्रीवातदशौचन्तुपुराची र्त्वाकरोतिसः **अत्रद्वितीयाहादौश्राद्धविधानमस्थिसंचयपरं। कालाद र्शे** दाहादिमंत्रवत्पित्रोर्विदध्यादौरसःसुतः ॥ तदभावेतुपौत्रश्चप्रपौत्रःपुत्रि कासुतः ॥ दौहित्रोधनहारीचभ्रातातत्पुत्रएवच ॥ पितामातास्नुषाचैवस्व सातत्पुत्रएवच ॥ सपिण्डःसोदकोमातुःसपिण्डश्चसहोदकः ॥ स्त्रीचशिष्य र्त्विगाचार्याजामाताचसखापिवा ॥ उत्सन्नबन्धोरिक्थेनकारयेदवनीपतिः

गौतमः पुत्राभावेसपिण्डामातृसपिण्डाः शिष्याश्चदद्युस्तदभावेऋत्विगा चार्यौ **यत्तुचंद्रिकायांवृद्धशातातपः**प्रीत्याश्राद्धंप्रकर्तव्यंसर्वेषांवर्णलिंगि नामितितत्सवर्णविषयम् ॥ ब्राह्मणस्त्वन्यवर्णानांनकुर्यात्कर्मकिंचन । का माल्लोभाद्भयान्मोहात्कृत्वातज्जातितांव्रजेदितिब्राह्मोक्तेः ॥ नब्राह्मणेनकर्त व्यंशूद्रस्याप्यौर्ध्वदैहिकं ॥ शूद्रेणवाब्राह्मणस्यविनापारसवात्कचिदितिपार सवोक्तेश्च ॥पारसवऊढशूद्रपुत्रः॥अत्रेदंतत्त्वं सर्वत्रपुत्रादेःसर्वस्याभावेपत्न्या देरधिकारउक्तः ॥ तत्राभावेऽसन्निधिर्नाशश्चोच्यते ॥ अतएवपूर्वत्रअस न्निधानेपूर्वेषामित्युक्तम् । तत्रासन्निधौपत्न्यादेःसर्वाधिकारेप्राप्ते प्रोषितावसितेपुत्रःकालादपिचिरादपि ॥ एकादशाद्याःक्रमशोज्येष्ठस्यविधिवत्क्रियाः॥ ज्येष्ठेनैवतुयत्कृतमित्याद्यैर्देशांतरेऽपवादात्पुत्रनाशेएव पत्न्यादेःसपिण्डना दावधिकारः ॥ असन्निधौतुतत्पूर्वमेवनोर्ध्वं ॥ अतोनधिकारिणाभ्रात्रादिनाकृ तमप्यकृतमेवेतिपुनरावर्तनीयम् । मासिकापकर्षोप्यावर्तनीयः ॥ एकादशा हमासिकानिनावर्तते । तज्ज्यायसापिकर्तव्यंसपिण्डीकरणंपुनरितिवदावृत्ति विधानाभावादितिकेचित् ॥ तन्न ॥ अस्यनिर्मूलत्वात् । अतस्तदपिकनिष्ठकृ तमावर्तते । वृद्धिश्राद्धंतपिण्डपितृयज्ञार्थंतुकृतंनावर्तते । नासपिण्ड्याग्निमान् पुत्रःपितृयज्ञंसमाचरेत् नपार्वणंनाभ्युदयंकुर्वन्नलभतेफलमितिवृद्धयुत्तरानि षेधनादिति ॥ भ्रातावाभ्रातृपुत्रोवेत्यादिहारीतादिवचोभ्यःकनिष्ठादेरप्यधि कारात् । यथात्रज्येष्ठकर्तृकत्वबाधस्तथापुत्रकर्तृकत्वस्यापिबाधः । सपिण्डने तुबहुवक्तव्यंतन्निर्णयेवक्ष्यामः । अधिकारविशेषेणक्रियाव्यवस्थोक्ता **विष्णु पुराणे** पूर्वाःक्रियामध्यमाश्चतथाचैवोत्तराःक्रियाः । त्रिप्रकाराःक्रियाह्येतास्ता सांभेदान्शृणुष्वमे ॥ आदाहाद्द्वादशाहाच्चमध्येयाःस्युःक्रियानृप । ताः पूर्वामध्यमामासिमास्येकोद्दिष्टसंज्ञिताः ॥ प्रेतेपितृत्वमापन्नेसपिंडीकरणाद नु । क्रियंतेयाःक्रियाःपुत्रप्रोच्यन्तेतानृपोत्तराः ॥ पितृमातृसपिण्डैश्चसमान सलिलैस्तथा । तत्संघातगतैश्चैवराज्ञावाधनहारिणा ॥ पूर्वामध्याश्चकर्त व्याःपुत्राद्यैरेवचोत्तराः ॥ दौहित्रैवनरश्रेष्ठकार्यास्तत्तनयैस्तथा । मृताहनि

तुकर्तव्याःस्त्रीणामप्युत्तराःक्रियाः ॥ दौहित्रतत्पुत्रयोर्धनहारिणोरिदं ॥ एवमन्यस्यधनहर्तुःयश्चार्थहरःसपिंडदायीत्यापस्तंबोक्तेः ॥ प्रेतस्यप्रेतकार्याणिअकृत्वाधनहारकः ॥ वर्णानांयद्यधेप्रोक्तंतद्व्रतंप्रयतश्चरेदितिपृथ्वीचंद्रोदयेव्याघ्रपादोक्तेः **मदनरत्नेस्कांदेपि** मलमेतन्मनुष्याणांद्रविणं यत्प्रकीर्तितमित्युक्त्वा। ऋषिभिस्तस्यनिर्दिष्टानिष्कृतिःपावनीपरा। आदेह पतनात्तस्यकुर्यात्पिंडोदकक्रियामित्युक्तं **क्रियानिबंधेकात्यायनः** नचमातानचपिताकुर्यात्पुत्रस्यपैतृकम्। नाग्रजश्चतथाभ्राताभ्रातृणांतुकनीयसां **पृथ्वीचंद्रोदयेबौधायनः**पित्राश्राद्धंनकर्तव्यंपुत्राणांतुकथंचन ॥ भ्रात्राचैवनकर्तव्यंभ्रातृणांचकनीयसाम् ॥ यदिस्नेहेनकुर्यात्तांसपिंडीकरणंविना ॥ गयायांतुविशेषेणज्यायानपिसमाचरेत् ॥ अन्याभावेपित्रादिरपिकुर्यात् ॥ उत्सन्नबांधवंप्रेतंपिताभ्रातथवाग्रजः ॥ जननीचापिसंस्कुर्यान्महदेनोन्यथाभवेदितिसुमंतूक्तेः **ब्रह्मचारिणांतुशुद्धिविवेकेपृथ्वीचंद्रोदयेचब्राह्मे** असमाप्तव्रतस्यापिकर्तव्यंब्रह्मचारिणः ॥ श्राद्धंतुमातापितृभिर्नतुतेषांकरोतिसः ॥ श्राद्धं मासिकाब्दिकादिसर्वंकार्यमित्यर्थः ॥ नत्वितिनिषेधोन्यसत्वे **यत्तुछंदोगपरिशिष्टे** नत्यजेत्सूतकेकर्मब्रह्मचारीस्वयंक्वचित् ॥ नदीक्षणात्परंयज्ञेनकृच्छ्रादितपश्चरन् ॥ पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित् ॥ आशौचंकर्मणोतेस्यात्त्र्यहंवाब्रह्मचारिणां **यच्चयाज्ञवल्क्यः** नब्रह्मचारिणःकुर्युरुदकंपतितास्तथेतितदप्यन्यसत्वे ॥ अन्याभावेतुब्रह्मचारिणापिकार्यंपूर्वोक्तवृद्धमनुवचनात् ॥ आचार्यपित्र्युपाध्यायान्निर्हृत्यापिव्रतीव्रती॥संकटान्नंचनाश्नीयान्नचतैःसहसंवसेदितितेनैवोक्तेः ॥ ब्रह्मचारिणः शवकर्मिणोव्रतान्निवृत्तिरन्यत्रमातापित्रोरितिवसिष्ठोक्तेः ॥ अत्राशौचमेकाहंवक्ष्यामः ॥ प्रागुपनयानान्मृतस्यतुपंचवर्षोत्तरसपिंडीकरणवर्ज्यषोडशश्राद्धादिसर्वंकार्यमित्युक्तं देवजानीये ॥ असंस्कृतानांभूमौपिंडंदद्यात्संस्कृतानांकुशेष्वितिप्रचेतोवचनाच्च ॥ एतच्चाग्रेवक्ष्यामः **अविभक्तानांविशेषमाहपृथ्वीचंद्रोदयेमरीचिः** बहवःस्युर्यदापुत्राः पितुरेकत्रवासिनः ॥ सर्वेषांतुमतंकृत्वाज्येष्ठेनैवतुयत्कृतम् ॥

द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् ॥ ज्येष्ठस्यकर्तृत्वेपिसर्वेफलभागिन इत्यर्थः । तेनयेब्रह्मचर्यपरान्नवर्जनादयः । फलसंस्कारास्तेसर्वेषांभवंती तिसिद्धम् । संसृष्टीनामप्येवंतुल्यत्वात् **विभक्तानांविशेषमाहोशनाः** नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडश ॥ एकेनैवतुकार्याणिसंविभक्तधने ष्वपि **लघुहारीतः** सपिंडीकरणांतानि यानिश्राद्धनिषोडश ॥ पृथङ् नैवसुताःकुर्युः पृथग्द्रव्याअपिक्वचित् ॥ ऊर्ध्वंसपिंडीकरणात्सर्व्वेकुर्युः पृथक्पृथक् **मदनरत्ने** विभक्तास्तुपृथक्कुर्युःप्रतिसंवत्सरादिकम् ॥ एकेनैवा विभक्तेषुकृतेसर्वैस्तुतत्कृतम्॥ एतेनाब्दिकादिष्वविभक्तानांसंनियमइतिवद न्शूलपाणिःपरास्तः ॥ दत्तकस्तुजनकस्यपुत्राद्यभावेदद्यान्नतत्सत्वेगोत्ररि क्थेजनयितुर्नभजेद्वृत्तिमःसुतः॥गोत्ररिक्थोनुगःपिंडोव्यपैतिददतःस्वधेतिम नूक्तेः ॥ इदंजनकस्यपुत्रसत्त्वविषयम् । एतच्चप्रवरमंजर्यांकात्यायनलौगा क्षिभ्यांस्पष्टमुक्तं ॥ अथयेदत्तकक्रीतकृत्रिमपुत्रिकापुत्राःपरपरिग्रहेणानार्षेया जातास्तेद्व्यामुष्यायणाभवंति ॥ यथाशौंगशैशिरीणांयानिचान्यान्यवेसमु त्पत्तीनिकुलानिभवंतीत्यादिनाद्वयोःपित्रोःप्रवरानुक्त्वोक्तम् । अथयद्येषां स्वसुर्भार्यास्वपत्यंनस्याद्दक्थंहरेयुः पिंडंचैभ्यस्त्रिपुरुषंदद्युर्य्यद्युभयोर्नस्या दुभाभ्यामेवदद्युरेकस्मिन्श्राद्धेपृथगुद्दिश्यैकपिण्डेद्वावनुकीर्तयेत्परिगृहीतारं च्चोत्पादयितारंचातृतीयात्पुरुषादिति **हेमाद्रौकाष्णाजिनिः** यावंतःपितृ वर्ज्याःस्युस्तावद्भिर्दत्तकादयः ॥ प्रेतानांयोजनंकुर्युःस्वकीयैःपितृभिःसह ॥ द्वाभ्यांसहाथतत्पुत्राःपौत्रास्त्वेकेनतत्समम् चतुर्थेपुरुषेछेदस्तस्मादेषात्रिपूरु षी ॥ साधारणेषुकालेषुविशेषोनास्तिवर्गिणाम् ॥ मृताहेत्वेकमुद्दिश्यकुर्युः श्राद्धंयथाविधीति **अस्यार्थमाहहेमाद्रिः** दत्तकादयः जनकपालकयोःकु लेप्रेतानांस्ववर्गीयैःसपिण्डनंकुर्युः । दत्तकानांपुत्रास्तुपितुर्दत्तकस्यपितृभ्य जनकपालकाभ्यांस्वपितामहाभ्यांसपिण्डनंकुर्युः ॥ तेषांपौत्राःस्वपितरंदत्त केनपितामहेनतज्जनकेनचसपिण्डयेयुः । चतुर्थोपितत्कुलस्थएव । तेषांप्र पौत्रस्तुदत्तकस्यप्रपितामहस्यपालककुलस्थंचतुर्थंयोजयेन्नवा ॥ छंदइच्छा

दर्शमहालयादौतुद्वयोःपित्रोःपितामहयोःप्रपितामहयोर्वाश्राद्धंदेयम् । तत्र द्वयोःपित्राद्योः पृथक्पिण्डदानंद्वयोरुद्देशेनैकोवेति **अत्रकेचित्** आवयोर यमितिपरिभाष्ययोदत्तस्तस्येदंद्वयोःपित्रोःश्राद्धं। यस्त्वपरिभाष्यदत्तःसग्रही तुरेव । सपालकायैंवदद्यादित्याहुः ॥ अत्रमूलंतएवप्रष्टव्याः ॥ वस्तुतस्तु जनकस्य पुत्रपत्न्याद्यभावेदत्तकोद्वयोर्दद्यादन्यथापालकायैवप्रागुक्तकात्या यनवचनात् । मानवीयमप्येतद्विषयमेव । गोत्रंतुश्राद्धेपालकस्यैवविवाहा दौतूभयोरित्यादिमत्कृतप्रवरदर्पणेज्ञेयं। यस्तुमूल्यक्रीतायांपरभार्यायांदास्यां चोत्पन्नःसबीजिनएवदद्यात् । मूल्यंविनास्वयमुपनतायांतुक्षेत्रिणएव **तदुक्तंपृथ्वीचंद्रोदयेकौर्मे** अनियोगात्सुतोयस्तुशुल्कतोजायतेत्विह ॥ प्रदद्या द्बीजिनेपिण्डंक्षेत्रिणेतुततोन्यथेति ॥ क्षेत्रजादेर्विशेषस्तुकलौतदभावान्नोच्य तइतिदिक् **जारजानांविशेषमाहापरार्केनारदः** जायंतेत्वनियुक्तायामेके नबहुभिस्तथा ॥ अरिक्थभाजस्तेसर्वेबीजिनामेवतेसुताः ॥ दद्युस्तेबीजिने पिण्डंमाताचेच्छुल्कतोहृता । अशुल्कोपहृतायांतुपिण्डदावोढुरेवते **धर्मार्थं श्राद्धकरणेफलमाहचन्द्रिकायांशातातपः** प्रीत्याश्राद्धंतुकर्तव्यं सर्वेषांव र्णलिंगिनाम् ॥ एवंकुर्वन्नरःसम्यङ्महतींश्रियमाप्नुयात् **गयायामपितत्रैवब्र ह्मवैवर्ते** आत्मजोवाथवान्योपिगयाशीर्षेयदातदा ॥ यन्नाम्नापातयेत्पिण्डं तन्नयेद्ब्रह्मशाश्वतम् ॥ एतच्चयदाफलभूमार्थिनाद्विजेनकिंवाक्रियतेतदाप्रेतशि लाश्राद्धवर्ज्यंकुर्यात्तस्यप्रेतत्वविमोक्षार्थत्वात्तस्यचजातत्वादितिकेचित् । व स्तुतस्तुसंन्यासिश्राद्धवदत्रापिसर्वंकार्यम् । स्वांगेधिकारादितियुक्तंप्रतीमः॥ संन्यस्तपित्रादिस्तुपितुःपित्रादिभ्यःसर्वश्राद्धेषुदद्यादित्युक्तंप्राक् वक्ष्यतेच जीवत्पितृकश्राद्धे । अत्रस्त्रीशूद्राणांश्राद्धंमंत्रवर्ज्यंतूष्णींभवति । स्त्रीणाममंत्र कंश्राद्धंतथाशूद्रासुतस्यच ॥ प्राग्द्विजाश्चव्रतादेशात्तेचकुर्युस्तथैवतदिति हे माद्रौमरीचिवचनात्सिद्धम् ॥ अयमेवविधिःप्रोक्तःशूद्राणांमंत्रवर्जितः ॥ अ मंत्रस्यतुशूद्रस्यविप्रोमंत्रेणगृह्यतइतिब्राह्मोक्तेश्च ॥ गृह्यतेसंबद्ध्यते । अस्य श्राद्धप्रकरणेपाठेपिपरिभाषात्वान्नप्रकरणेनसंकोचोयुक्तः तेनशूद्रस्यस्नानदा

315

नादावपिविप्रेणमंत्रपाठःकार्यः ।अमन्त्रश्चेतिविशेषणात् । स्त्रियाअपीतिशूल पाणिः । यत्तुतेनोक्तंमंत्रजन्यनियमादृष्टसिद्धिस्तुनमस्कारेण । अनुमतोस्य नमस्कारोमन्त्रइतिगौतमोक्तेरिति तन्न । दृष्टद्वारैवहितत्प्राप्तिर्नस्वातंत्र्येण । अन्यथानखविपूतेष्यवघातजन्यादृष्टार्थसोपिक्रियतेतिकिंचिदेतत् ॥ तेनपितॄणांनामगोत्रतइत्यादौ यत्रद्विजानामपिनाममन्त्रउक्तस्तत्रप्रतिप्रसवमात्रार्थं युक्तम् । नतिलावपनादावपि । अत्रकेचित् । वैदिकमन्त्रोविप्रस्यपौराणस्तुशूद्रैः पठनीयः नहिवेदेष्वधिकारः क्वचिच्छूद्रस्यविद्यते । पुराणेष्वधिकारोमेदर्शितोब्राह्मणैरिहेतितत्रैवपाद्मोक्तेरित्याहुः ॥ गौडाअप्येवं तन्न ॥ नाध्येतव्यमिदंशास्त्रंवृषलस्यतुसन्निधाविति कौर्मे । पुराणनिषेधेन वेस्यदूरापास्तत्वात् । अध्येतव्यंब्राह्मणेनवैश्येनक्षत्रियेणच ॥ श्रोतव्यमेव शूद्रेणनाधेतव्यंकदाचन ॥ श्रौतंस्मार्तंचवैधर्मप्रोक्तमस्मिन्नृपोत्तम ॥ तस्माच्छूद्रैर्विनाविप्रंनश्रोतव्यंकदाचनेतितत्रैवपुराणाधिकारेभविष्योक्तेश्च ॥ एतेननाध्येतव्यमितिनिषेधोमंत्रेतरपुराणपरइतिश्रीदत्तादिमतमपास्तम् । तेन पौराणमंत्राणामेवविप्रेणपाठोनवैदिकानामितिसिद्धम् । द्विजस्त्रियस्तुसंकल्पमात्रंस्वयंकृत्वावैदिकमंत्रयुक्तंसर्वंब्राह्मणद्वाराकारयेयुरितिप्रयोग पारिजातः । अतएवस्त्रीणामित्यकृतविवाहस्त्रीपरमितिहेमाद्रिराह । अनुपनीतस्तु वैदिकमन्त्रयुक्तंसर्वंस्वयमेवकुर्यादित्युक्तंप्राक् । यत्तुप्राक्द्विजाश्चव्रतादेशादितितदशक्तविषयमचूडविषयंवेतिदिक् ॥ शूद्रस्यतुसदामश्राद्धमेव ॥ सदाचैवतुशूद्राणामामश्राद्धंविधीयतइतिसुमंतूक्तेः **पृथ्वीचन्द्रोदयेमात्स्येपि** एवंशूद्रोपिसामान्यं वृद्धिश्राद्धंचसर्वदा ॥ नमस्कारेणमंत्रेण कुर्यादामान्नवत्सदा **तत्रैववृद्धपराशरः** आमान्नेनतुशूद्रस्य तूष्णींतुद्विजपूजनं ॥ कृत्वा श्राद्धंतुनिर्वाप्य सजातीनाशयेदथ ॥ सएव । आमंशूद्रस्यपक्वान्नं पक्वमुच्छिष्टमुच्यते ॥ **हेमाद्रौभविष्ये** धर्मेप्सवस्तुधर्मज्ञायदिशूद्राःप्रकुर्वते ॥ अन्नौकरणमंत्रश्चनमस्कारोविधीयते ॥ आवाहनादिकर्तव्यंयथाशूद्रेणतच्छृणु ॥ देवानांदेवनाम्नातुपितॄणांनामगोत्रतः ॥ पिंडादीन्निर्वपेद्वीरनामतोगोत्र

तस्तथा ॥ शूद्राणांगोत्राभावेपिकाश्यपंगोत्रंज्ञेयम् ॥ तस्मादाहुःसर्वाःप्रजाः काश्यप्यइतिश्रुतेः । गोत्रनाशेतुकाश्यपइतिव्याघ्रपादोक्तेश्चेतिहेमाद्रिः ॥ एवमन्यत्रगोत्राज्ञानेतर्पणादिषुचज्ञेयम् **तत्रैवभविष्ये** शूद्रस्तुगृहपाकेनन पिंडान्निर्वपेत्तथा ॥ सक्तुमूलंफलंतस्यपायसंवाभवेत्स्मृतम् **गौतमः** अनुम तोस्यनमस्कारोमंत्रइति । देवताभ्यःपितृभ्यःश्रेत्ययंनमस्कारमंत्रइतिकेचि त् । विज्ञानेश्वरोप्येवमाह **हेमाद्रिस्तु** शूद्रोप्यमंत्रवत्कुर्यादनेनविधिनाबु धइतिमात्स्ये **मंत्रनिषेधान्नाममंत्रेणेत्याहपृथ्वीचंद्रोदयेस्कांदे** राजकार्ये नियुक्तस्यबंधनिग्रहवर्तिनः ॥ व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेत् **यत्तुभार तेराजधर्मेषु** यवनाःकिरातागांधाराश्चीनाःशबरबर्बराः ॥ शकास्तुषाराःकं काश्चपह्लवाश्चांध्रमद्रकाइत्युक्त्वा ब्रह्मक्षेत्रेप्रसूताश्चवैश्याःशूद्राश्चमानवाः । कथंधर्माश्चरिष्यंतिसर्वेविषयवासिनः ॥ इतिचोक्त्वा । वेदधर्मक्रियाश्चैवते षांधर्मोविधीयते । पितृयज्ञास्तथाकूपाःप्रपाश्चशयनानिच ॥ दानानिचयथा कालंद्विजेभ्योविसृजेत्सदा **तथा** दक्षिणासर्वयज्ञानांदातव्याभूतिमिच्छता ॥ पाकयज्ञामहार्हाश्चकर्तव्याःसर्वदस्युभिरितिम्लेच्छादीनांश्राद्धविधानम् । तदपिसजातीयभोजनद्रव्यदानादिपरंनतुश्राद्धपरमिति ॥

इतिश्रीनारायणभट्टसूरिसूनुरामकृष्णभट्टात्मजकमलाकरभट्टकृते
निर्णयसिंधौअधिकारनिर्णयः ॥

अथपितरः । हेमाद्रौमात्स्यदेवलौ नामगोत्रंपितृणांतुप्रापकंहव्यकव्य योः ॥ अग्निष्वात्तादयस्तेषामाधिपत्येव्यवस्थिताः ॥ नाममंत्रास्तदादेशाभवां तरगतानपि ॥ प्राणिनःप्रीणयंत्येवतदाहारत्वमागतान् ॥ देवोयदिपिताजा तःशुभकर्मानुयोगतः ॥ तस्यान्नममृतंभूत्वादेवत्वेप्यनुगच्छति ॥ गांधर्वेभो गरूपेणपशुत्वेचतृणंभवेत् ॥ श्राद्धान्नंवायुरूपेणनागत्वेप्युपतिष्ठति ॥ पा नंभवतियक्षत्वेराक्षसत्वेतथामिषम् ॥ दनुजत्वेतथामद्यंप्रेतत्वेरुधिरोदकम् ॥ मनुष्यत्वेन्नपानादिनानाभोगकरंभवेत् ॥ अत्रपित्रादिशब्दैर्जनकादीनामे वदेवतात्वमुच्यतेनवस्वादीनाम्असावेतत्तइतियजमानस्यपित्रेइतिशतपथश्रु

तेः ॥ यस्यपिताप्रेतःस्यात्सपित्रेपिंडंनिधायेति विष्ण्वादिस्मृतेश्च **यत्तुमनु देवलौ** वसवःपितरोज्ञेयारुद्राज्ञेयाःपितामहाः ॥ प्रपितामहास्तथादित्याःश्रुतिरेषासनातनी **यच्चयाज्ञवल्क्यः** वसुरुद्रादितिसुताःपितरःश्राद्धदेवताइति॥ तदभेदज्ञानार्थम् **यानितुहेमाद्रौनंदिपुराणे** विष्णुःपितास्यजगतोदिव्योयज्ञःसएवच॥ब्रह्मापितामहोज्ञेयोह्यहंचप्रपितामहइति **यच्चभविष्ये** अनिरुद्धःस्वयंज्ञेयःप्रद्युम्नश्चपितास्मृतः । संकर्षणस्तज्जनकोवासुदेवस्तुतत्पिता स्वयं कर्ता **यत्तुतत्रैव** प्रथमोवरुणोज्ञेयःप्राजापत्यस्तथापरः ॥ तृतीयोग्निःस्मृतःपिंडोह्येषपिंडविधिःस्मृतः **यच्चमनुः** सोमपानामविप्राणांक्षत्रियाणांहविर्भुजः ॥ वैश्यानामाज्यपानामशूद्राणांतुसुकालिनः **यच्चादित्यपुराणे** मासाश्चपितरोज्ञेयाऋतवश्चपितामहाः॥संवत्सरःप्रजानांचसुष्ट्वेकःप्रपितामहः **यच्चनंदिपुराणे** अग्निष्वात्ताब्राह्मणानांपितरःपरिकीर्तिताः ॥ राज्ञांबर्हिषदोनामविशांकाव्याःप्रकीर्तिताः ॥ सुकालिनस्तुशूद्राणांव्यामाम्लेच्छांत्यजातिषु ॥ अत्रावाहनादिषुपित्रादयःसमुच्चयेनविकल्पेनवायथाचारंतत्तद्देवतारूपेणवाच्याइतिहेमाद्र्यादयः **हेमाद्रौब्राह्मे** पार्वणंकुरुतेयस्तुकेवलंपितृहेतुकम्॥ मातामहंनकुरुतेपितृहासप्रजायते **धौम्यः** पितरोयत्रपूज्यंते तत्रमातामहाध्रुवम् ॥ अविशेषेणकर्तव्यं विशेषान्नरकंव्रजेत् **अस्यापवादमाहकात्यायनः** कर्षूसमन्वितमुक्त्वातथाद्यंश्राद्धषोडशम्। प्रत्याब्दिकंतुशेषेषुपिंडाःस्युःषडितिस्थितिः ॥ कर्षुसमन्वितंसपिंडीकरणम्। दर्शादौसपत्नीकानामेवदेवतात्वम्॥ स्वेनभर्तासमंश्राद्धंमाताभुंक्तेसुधासमं ॥ पितामहीचस्वेनैव तथैवप्रपितामहीतितत्रैवोक्तेः **चंद्रिकायांचतुर्विंशतिमते** क्षयाहंवर्जयित्वैकंस्त्रीणांनास्तिपृथक्क्रिया ॥ केचिदिच्छंतिनारीणांपृथक्श्राद्धेमहर्षयः ॥ अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि ॥ अत्रमातुःपृथक्श्राद्धमन्यत्रपतिनासहेतिकात्यायनोक्तेश्च ॥ अस्यनिर्मूलतांवदंतोगौडास्त्वज्ञाएव । अत्रभागइत्यध्याहारः ॥ अन्यथासपतिकायैमात्रेइतिप्रयोगापत्तेः । अत्रमातृशब्दोजनन्यामेवमुख्यः । तेनसापत्नमातृभ्योनदद्यात् । एवंपितामह्यादिशब्दैः पितृजनन्यादयएवोच्यंतेइतितत्स

पत्नीभ्योनदेयमितिहेमाद्रिःकारुण्येनतुमहालयादौदेयमितिसएव **अथवि श्वेदेवाः** ॥ **हेमाद्रौशंखबृहस्पती** इष्टिश्राद्धेक्रतूदक्षौसत्यौनांदीमुखेवसू ॥ नैमित्तिकेकामकालौकाम्येचधूरिलोचनौ ॥ पुरूरवार्द्रवौचैवपार्वणेसमुदाहृतौ ॥ तत्रैव । उत्पत्तिनामचैतेषां नविदुर्येद्विजातयः ॥ अयमुच्चारणीयस्तैः श्लोकःश्रद्धासमन्वितैः ॥ आगच्छंतुमहाभागाविश्वेदेवामहाबलाः ॥ येय त्रविहिताःश्राद्धेसावधानाभवंतुतेइति ॥ इष्टिश्राद्धंप्रतिरुचिरित्युक्तमितिक ल्पतरुः । आधानादिकर्मांगमित्यन्ये । नैमित्तिकमेकोद्दिष्टम् । एकोद्दिष्टंतुय च्छ्राद्धंतन्नैमित्तिकमुच्यतेइतिभविष्योक्तेः । एतद्यद्यपिएकोद्दिष्टंदैवहीनमि ति तत्रविश्वेदेवनिषेधस्तथापि नवश्राद्धेद्वादशमासिकेचकामकालौज्ञेयौ । न वश्राद्धंदशाहानिनवमिश्रंतुषड्तून् । अतःपरंपुराणंवैत्रिविधंश्राद्धमुच्यते ॥ यस्मिन्नेवपुराणेवाविश्वेदेवानलेभिरे ॥ आसुरंतद्भवेच्छ्राद्धंवृषलंमंत्रवर्जित मितिबह्वृचपरिशिष्टात् । एतच्चबह्वृचानामेवतेषामेवोक्तेः । अन्येषांतुना त्रविश्वेदेवाइतिकात्यायनोक्तेस्तन्निषेधएवेति पृथ्वीचंद्रोदयः । अन्येतुनैमि त्तिकंसपिंडीकरणमाहुः । भविष्येयद्यप्येकोद्दिष्टंतच्छब्देनोक्तं तथापितद प्यदैवंकर्तव्यमयुग्मान्भोजयेत्द्विजानिति तत्रैवविश्वेदेवनिषेधात् यद्यपिस पिंडीकरणेंशतएकोद्दिष्टत्वं तथापिसपिंडीकरणश्राद्धं देवपूर्वंनियोजयेदिति वचनात्तत्परत्वम् **हेमाद्रावादित्यपुराणे** विश्वेदेवौक्रतुर्दक्षःसर्वास्विष्टिषु कीर्तितौ ॥ नित्यंनांदीमुखेश्राद्धेवसूसत्यौचपैतृके ॥ नवान्नलंभनेदेवौकाम कालौसदैवहि ॥ अपिकन्यागतेसूर्येकाम्येचधूरिलोचनौ ॥ पुरूरवार्द्रवौचैव विश्वेदेवौतुपार्वणे **क्वचिद्विश्वेदेवापवादमाहहेमाद्रौशातातपः** नित्यंश्राद्ध मदैवंस्यादेकोद्दिष्टंतथैवच ॥ मातुःश्राद्धंचयुग्मैःस्याददैवंप्राङ्मुखैःपृथक् ॥ योजयेद्देवपूर्वाणिश्राद्धान्यन्नानियत्नतः ॥ नांदीश्राद्धेभिन्नप्रयोगपक्षेमातुः श्राद्धमदैवमितिहेमाद्रिः । अथविप्राः ॥ तेचोत्तममध्यमाधमभेदेनत्रिवि धाः । तत्राद्याः । अत्रमदीयाःश्लोकाः । त्रिनाचिकेतस्त्रिमधुश्चबह्वृचोप्या थर्वणोयाजुषसामगौच ॥ षडंगविच्चत्रिसुपर्णवेत्ताप्यथर्वशीर्षोध्ययनेरतश्च ।

शतायुर्वेदार्थविदौप्रवक्तास्याद्ब्रह्मचारीचतथाग्निविच्च ॥ सीदद्वृत्तिःसत्यवाक्पू रुषैःस्वैर्मातापित्रोःपंचभिःख्यातवंशः ॥ पत्नीयुक्तोज्येष्ठसामापुराणवेत्तापुत्री चेतिहासेष्वभिज्ञः ॥ योगीभिक्षुःसामगोब्रह्मवेत्तापंचाग्निश्चश्रोत्रियस्तत्सुतो वा ॥ शंभूध्यायीश्रीशपादाब्जसेवीपांथश्चैतेतूत्तमाःसंप्रदिष्टाः ॥ भिक्षुर्योगी पांथएतेत्वसम्याभाग्याल्लब्धाश्चेत्तदाभोजनीयाः । श्राद्धेविप्रेषूपविष्टेषुपश्चा त्संप्राप्ताश्चेद्विप्रपंक्तौतुभोज्याः । अत्रमूलंहेमाद्रौज्ञेयम् **तत्रैवनारदः** यो वैयतीननाद्दत्यभोजयेदितरान्द्विजान् ॥ विजानन्वसतोग्रामेकव्यंतद्याति राक्षसान् ॥ **दीपकलिकायांदक्षः** विनामांसेनमधुनाविनादक्षिणयाशि षा ॥ परिपूर्णभवेच्छ्राद्धंयतिषुश्राद्धभोजिषु ॥ एतच्चज्ञातिविषयम् । त्रि णाचिकेतस्त्रिसुपर्णेयजुर्वेदैकदेशौतद्व्रतेनतदध्यायिनौ । यस्यसप्तपूर्वेसो मपाःत्रिसुपर्णइतिबोपदेवः । त्रिमधुर्ऋग्वेदैकदेशस्तदध्यायी । केचिन्नाचि केतंचयनंत्रिःकृतवानित्यर्थमाहुस्तद्धेमाद्रिविरुद्धम् **हेमाद्रौगौतमः** युव भ्योदानंप्रथमंपितृवयसइत्येके **सात्स्येमनुः** यच्चव्याकुरुतेवाचंयश्चमीमां सतेध्वरम् ॥ सामस्वरविधिज्ञश्चपंक्तिपावनपावनः **कौर्मे** असमानप्रवरै कोद्यसगोत्रस्तथैवच ॥ असंबंधीचविज्ञेयाब्राह्मणाःश्राद्धसिद्धये **गारुडे** श्राद्धेषुविनियोज्यास्तेब्राह्मणाब्रह्मवित्तमाः ॥ येयोनिगोत्रमंत्रांतेवासिसंबंध वर्जिताः **मनुः** नमित्रंभोजयेच्छ्राद्धेधनैःकार्योस्यसंग्रहः ॥ नारिंनमित्रंयोवि द्यात्तंतुश्राद्धेनिमंत्रयेत् ॥ द्वयोर्भ्रात्रोःश्राद्धेभोजनंनिषिद्धम् ॥ पितृपुत्रौभ्रा तरौद्वौनिरग्निगुर्विणीपतिम् ॥ सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेदितिश्राद्ध दीपकलिकायांजातूकर्ण्योक्तेः **अथमध्यमाः । हेमाद्रौकौर्मगार्ग्यौ** नै कगोत्रेहविर्दद्याद्यथाकन्यातथाहविः ॥ अभावेह्यन्यगोत्राणामेकगोत्रांस्तुभो जयेत् **अत्रकेचित्स्वशाखीयान्मुख्यानाहुःपठंतिच** ॥ निमंत्रयीतपूर्वेद्यु स्वशाखीयान्द्विजोत्तमान् ॥ स्वशाखीयद्विजाभावेद्विजानन्यान्निमंत्रयेदि ति ॥ इदंतुनिर्मूलत्वाद्धेमाद्रिणादूषितत्वाच्चोपेक्ष्यम् **मनुरपि** यत्नेनभोज येच्छ्राद्धेब्राह्मणंवेदपारगं ॥ शाखांतगमथाध्वर्युछंदोगंवासमाप्तिगम् ॥ एषा

मन्यतमोयस्यभुंजीतश्राद्धमर्चितः ॥ पितृणांतस्यतृप्तिःस्याच्छाश्वतोःसप्तपौरुषी ॥ **अत्रमामकाःश्लोकाः** मातामहोमातुलभागिनेयदौहित्रजामातृगुरुस्वशिष्याः ॥ ऋत्विक्चयाज्यश्वशुरौस्वबंधुश्यालागुणाढ्यास्त्वनुकल्पभूता बांधवोमातृष्वसृपितृष्वसृमातुलपुत्राइतिबोपदेवः ॥ **अत्रमूलंहेमाद्रौज्ञेयम् ॥ सगुणस्वस्त्रीयाद्यतिक्रमेदोषएव** ॥ सप्तपूर्वान्ससप्तपरान्पुरुषानात्मानासह अतिक्रम्यद्विजानेतान्नरकेपातयेत्खग ॥ संबंधिनस्तथासर्वान्दौहित्रंविट्पतितथा ॥ भागिनेयंविशेषेणतथाबंधुंखगाधिपेतिमदनरत्नेभविष्योक्तेः ॥ अतएवयाज्ञवल्क्योब्राह्मणप्रातिवेश्यानामेतदेवानिमंत्रणइतिगुण्यतिक्रमेदशपणंदंडमाह ॥ आसन्नमात्रपरमिदम्मूर्खेतुनदोषः ॥ ब्राह्मणातिक्रमोनास्तिमूर्खेचैववविर्जिते ॥ ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयतइतिकात्यायनोक्तेः ॥ विप्रस्यापिदोषः ॥ अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवदितिमनूक्तेः ॥ **अपरार्केअत्रिः** ॥ षड्भ्यस्तुपुरुषेभ्योर्वागश्राद्धेयास्तुगोत्रिणः ॥ षड्भ्यस्तुपरतोभोज्याः श्राद्धेस्युर्गोत्रजाअपि ॥ एतच्चब्राह्मणालाभेअपिशब्दात्असंभवेहेमाद्रौगौतमःशिष्यांश्चैकेसगोत्रांश्चभोजयेदूर्ध्वंत्रिभ्योगुणवतः **आपस्तंबः** ब्राह्मणान्भोजयेद्योनिगोत्रमंत्रांतेवास्यसंबंधिनः। गुणहान्यांतुपरेषांसमुदितःसोदर्योपिभोजयितव्यः। एतेनांतेवासिनोव्याख्याताइति **अत्रविशेषमाहात्रिः** पितापितामहोभ्रातापुत्रोवाथसपिंडकः ॥ नपरस्परमर्घ्याःस्युर्नश्राद्धे ऋत्विजस्तथा ॥ ऋत्विक्पुत्रादयोप्येतेसकुल्याब्राह्मणाःस्मृताः ॥ वैश्वदेवेनियोक्तव्यायद्येतेगुणवत्तराः ॥ सगोत्रानानियोक्तव्याःस्त्रियश्चैवाविशेषतइति **अथवर्ज्याः। अत्रमामकाःश्लोकाः** वर्ज्यान्प्रवक्ष्येत्वथरोगिवैरिहीनाधिकांगान्कितवान्कृतघ्नान् ॥ नक्षत्रशास्त्रेणचजीवमानान्भैषज्यवृत्त्यापिचराजभृत्यान् ॥ संगीतकायस्थकुसीदवृत्त्यावेदक्रयेणापिकवित्ववृत्त्या ॥ देवार्चनेनापिचजीवमानान्स्वाध्यायदाराग्निसुतोज्झकाणान् ॥ दुर्वालखल्वाटकुनख्यधर्मिनटांश्चपौनर्भवकृष्णदंतान् ॥ अगारदाहीगरदःसमुद्रयायीचकुंडाशथकूटकारी ॥ बालांश्चयोध्यापयतेस्वपुत्रा

दवाप्तविद्यस्त्वथकुंडगोलौ ॥ अग्रेदिधिष्वाःपतिरस्त्रकर्तासोमक्रयीतैलिकके कराक्षौ । युद्धाचार्यःपक्षिणांपोषकश्चस्रोतोभेत्तावृक्षसंरोपकश्च ॥ मेषाणांवा माहिषाणांचपुष्ट्यास्वीयस्त्रीषुप्रहितैर्यश्चजारैः ॥ जीवत्यधेतुश्चदत्तानुयोगा तद्द्रव्यप्राप्त्यैवेदमुद्घाटयंतः ॥ ग्रामयाजिपशुकेशविक्रयीस्तेनशिल्पिपितृवादकारकान् ॥ अर्थकामरतशूद्रयाजकश्मश्रुहीनजटिमुंडिनिर्घृणान्।यस्य चैवगृहिणीरजस्वलास्वार्थपाकरतशापदायकान् ॥ क्लीबकुष्ठ्यतिहिलोहिते क्षणान्कुब्जवामनमृषाभिशापिनः।पुत्रहीनमथकूटसाक्षिणंप्रेतहारिकमयाज्य याजकं॥स्वात्मदातृपरिवेतृजाग्रकस्तेनहिंस्रकमुखान्विवर्जयेत् ॥ अत्रमूलंहेमाद्रौपृथ्वीचंद्रोदयेचज्ञेयं **भारतेदानधर्मेषुश्राद्धवर्ज्यविप्राधिकारे** कितवोभ्रूणहायक्ष्मीपशुपालोनिराकृतिः ॥ ग्राम्यप्रेष्योवार्धुषिकोगायकःसर्वविक्रयी॥ सामुद्रिकोराजभृत्यस्तेलिकःकूटकारकः॥पित्राविवदमानश्चयस्यचोपपतिर्गृहे॥अभिशस्तस्तथास्तेनःशिल्पंयश्चोपजीवति ॥ पर्वकारश्चसूचीचमित्रध्रुक्पारदारिकः॥अव्रतानामुपाध्यायःकांडपृष्ठस्तथैवच।श्वभिश्चयःपरिक्रामेद्यः शुनादष्टएवच॥पारिवित्तस्तथास्तेनोदुश्चर्मागुरुतल्पगः।कुशीलकोदेवलकोनक्षत्रैर्यश्चजीवति॥ईदृशाब्रह्मणाज्ञेयाअपांक्तेयायुधिष्ठिर **तथा ऋणकर्ताचयोराजन्यश्चवार्धुषिकोनरः काण्डपृष्ठः** स्वशाखांत्यक्त्वापरशाखयोपनीतस्तद्ध्यायीच **क्षत्रियवैश्यवृत्तौनारदस्तु** तस्यामेवतुयोवृत्तौ ब्राह्मण्योवसतेरसान् । कांडपृष्ठश्च्युतोमार्गात्सोपांक्तेयः प्रकीर्तितः **इत्याहहारीतः** शूद्रापुत्राः स्वयंदत्तायेचैतेक्रीतकाःसुताः ॥ तेसर्वेमनुनाप्रोक्ताःकांडपृष्ठानसंशयः **अन्येपिहेमाद्रौमात्स्ये** त्रिशंकून्बर्बरानंध्रान्चीनद्रविडकौंकणान् ॥ कर्णाटकांस्तथाभीरान्कालिंगांश्चविवर्जयेत् **तत्रैवसौरपुराणे** अंगवंगकलिंगांश्चसौराष्ट्रान्गुर्जरांस्तथा ॥ आभीरान्कौंकणांश्चैवद्राविडान्दाक्षिणायनान् ॥ आवंत्यान्मागधांश्चैवब्राह्मणांस्तुविवर्जयेत् ॥ **चंद्रिकायांयमः** काणाःकुब्जाश्चषंढाश्चकृतघ्नागुरुतल्पगाः ॥ मानकूटास्तुलाकूटाशिल्पिनोग्रामयाजकाः राजभृत्यांधबधिरमूकखल्वाटपंगवः ॥ वणिजोमधुहर्तारोरोगदावनदाहकः

समयानांचभेत्तारःप्रदानेयेनिवारकाः ॥ प्रव्रज्योपनिवृत्ताश्चवृथाप्रव्रजिताश्च ये ॥ यश्चप्रव्रजिताज्जातःप्रव्रज्यावसितश्चयः ॥ अवकीर्णीचवीरघ्नोगुरुघ्न पितृदूषकः ॥ **श्राद्धकाशिकायांकात्यायनः** ॥ द्विर्नग्नःकीलदुश्चर्माशुक्लो तिकपिलस्तथा ॥ छिनोष्ठच्छिन्नलिंगश्चनैवकेतनमर्हति ॥ द्विर्नग्नःपित्रोर्वि शेत्रिपुरुषंविच्छिन्नवेदाग्निः ॥ **हेमाद्रौमरीचिः** अविद्धकर्णःकृष्णश्चलं बकर्णस्तथैवच ॥ वर्जनीयाःप्रयत्नेनब्राह्मणाःश्राद्धकर्मणि ॥ **ब्राह्मे** ॥ मूकश्चपूतिनाशश्चछिन्नांगश्चाधिकांगुलिः ॥ गलरोगीचगडुमान्स्फुटितांग श्चसज्वरः ॥ षंढतूवरमंदाश्चश्राद्धेष्वेतान्विवर्जयेत् ॥ **लंबकर्णीचाहतत्रै वगोभिलः** ॥ हनुमूलादधःकर्णौलंबौतुपरिकीर्तितौ ॥ द्व्यंगुलोन्यंगुलौ शस्ताविंतिशातातपोब्रवीत् ॥ **चंद्रिकायांयमः** ॥ द्व्यंगुलातीतकर्णस्य भुंजतोपितरोनतु ॥ षंढश्चात्रचंद्रिकोक्तोसप्तविधोग्राह्यः ॥ **यथा** ॥ षंढ कोवातजःषंढःपंडःक्लीबोनपुंसकः ॥ कीलकश्चेतिसप्तैवक्लीबभेदाःप्रकीर्ति ताः ॥ पराशरमाधवीयेतुचतुर्दशविधउक्तः ॥ तेषांस्वरूपाणितत्रैवज्ञेया नि ॥ **चंद्रिकायांशातातपः** ॥ अग्निष्टोमादिभिर्यज्ञैर्येयजंत्यल्पदक्षिणैः ॥ तेषामन्नन्नभोक्तव्यमपांक्तास्तेप्रकीर्तिताः ॥ एतच्चशक्तौसत्यां ॥ **अपरा र्केभारते** ॥ अव्रतीकितवस्तेनःप्राणिविक्रयकोपिवा ॥ पश्चाच्चेत्पीतवान्सोमं सोपिकेतनमर्हति ॥ **श्राद्धदीपकलिकायायमः** ॥ अपत्नीकश्चवर्ज्यः स्यात्सपत्नीकोप्यनग्निकः ॥ **तत्रैवाश्वलायनः** ॥ प्रतिमाविक्रयंयोवैक रोतिपतितस्तुसः ॥ जीवनार्थंपरास्थीनिधृत्वातीर्थंप्रयातियः ॥ मातापित्रो र्विनासोपिपतितःपरिकीर्तितः ॥ **तत्रैवजातूकर्ण्यः** ॥ यत्रमातुलजो द्वाहीयत्रवावृषलीपतिः ॥ श्राद्धंनगच्छेत्तद्विप्राःकृतंयच्चनिरामिषं ॥ पितृ पुत्रौभ्रातरौद्वौनिरग्निगुर्विणीपतिम् ॥ सगोत्रप्रवरंचैवश्राद्धेषुपरिवर्जयेत् ॥ **बृहन्नारदीये** ॥ शंखंचक्रंमृदायस्तुकुर्यात्तप्तायसेनवा ॥ सशूद्रवद्बहिष्का र्यःसर्वस्माद्द्विजकर्मणः ॥ शंखचक्राद्यंकनंचगीतनृत्यादिकंतथा ॥ एक जातेरयंधर्मोनजातुस्यात्द्विजन्मनः ॥ तेनयेतप्तमुद्रादिविधयस्तेशूद्रविष

353

याइति **पृथ्वीचंद्रोदये** ॥ शिवकेशवयोरंकान्शूलचक्रादिकान्द्विजः नधारयेतमतिमान्वैदिकेवर्त्मनिस्थितइत्याश्वलायनोक्तेश्च ॥ नृत्यंचोदरा र्थनिषिद्धमितिश्रीधरस्वामी ॥ अन्येपिनिषिद्धानिबंधेषुज्ञेयाइतिदिक् ॥ अत्रविप्राणांग्राह्यत्वोक्त्यैवतद्वर्ज्यानांनिषेधेसिद्धेपुनर्वर्ज्यपरिगणनं ॥ निषिद्ध वर्ज्यनिर्गुणप्राप्त्यर्थमितिविज्ञानेश्वरः॥ **कुष्ठिकाणादेरपवादोहेमाद्रौवसिष्ठः** अपिचेन्मंत्रविद्युक्तःशारीरैःपंक्तिदूषणैः॥ अदूष्यंतंयमःप्राहपंक्तिपावनएवसः क्वचिद्विप्राणांजातिमात्रेणग्राह्यत्वमुक्तं **चन्द्रिकायामाग्नेये** यदिपुत्रोगयांग च्छेत्कदाचित्कालपर्ययात्॥ तानेवभोजयेद्विप्रान्ब्राह्मणायेप्रकल्पिताः॥ ब्रह्म णाकृतसंस्थानाविप्राब्रह्मसमाःस्मृताः॥ अमानुषागयाविप्राब्राह्मणायेप्रकल्पि ताः। तेषुतुष्टेषुसंतुष्टाःपितृभिःसहदेवताः **तत्रैव** नाविचार्यकुलंशीलंविद्याचतप एवच॥पूजितैस्तैस्तुसंतुष्टादेवाःसपितृगुह्यकाः।गयायांनिर्गुणापितेएवभ्योज्या इतिहेमाद्रौ अक्षय्यवटश्राद्धएवतन्नियमोनान्यत्रेतित्रिस्थलीसेतौपितामह च रणाः **पृथ्वीचंद्रोदयेपिपाद्मे** तीर्थेषुब्राह्मणंनैवपरीक्षेतकदाचन॥अन्नार्थिनम नुप्राप्तंभोज्यंतंमनुरब्रवीत्॥**स्कांदेपि** ब्राह्मणान्नपरीक्षेततीर्थेक्षेत्रनिवासिनः म नुःनब्राह्मणंपरीक्षेतदैवेकर्मणिधर्मवित्॥पित्र्येकर्मणितुप्राप्तेपरीक्षेतप्रयत्नतः॥ असंभवपरमेतदितिमेधातिथिः **हेमाद्रौव्यासः** गायत्रीसारमात्रोपिवरंविप्रः सुयंत्रितः ॥ नायंत्रितश्चतुर्वेदीसर्वाशीसर्वविक्रयी ॥ काणाः कूटाश्चकुब्जाश्च दरिद्राव्याधितास्तथा । सर्वेश्राद्धेनियोक्तव्यामिश्रितावेदपारगैः **अथविप्र निमंत्रणम्चंद्रिकायांवाराहे** वस्त्रशौचादिकर्तव्यंश्चःकर्तास्मीतिजानता ॥ स्थानोपलेपनंकृत्वाततोविप्रान्निमंत्रयेत् ॥ दंतकाष्ठंचविसृजेद्ब्रह्मचारीशुचि र्भवेत् **तत्रैवप्रचेताः** दक्षिणंचरणंविप्रःसव्यंवैक्षत्रियस्तथा ॥ पादावादाय वैश्योद्यौशूद्रःप्रणतिपूर्वकम् **बृहस्पतिः** उपवीतीततोभूत्वादेवार्थंतुद्विजोत्त मान् ॥ अपसव्येनपित्र्येथस्वयंशिष्योथवासुतः **प्रचेताः** सवर्णंप्रेषयेदाप्तं द्विजानांतुनिमंत्रणे **पृथ्वीचंद्रोदयेस्कांदे** राजकार्येनियुक्तस्यबंधनिग्रहव र्त्तिनः ॥ व्यसनेषुचसर्वेषुश्राद्धंविप्रेणकारयेत् **चंद्रिकायांयमः** अभोज्यंब्रा

ह्मणस्यान्नंवृषलेननिमंत्रितम् ॥ तथैववृषलस्यान्नं ब्राह्मणेननिमंत्रितम् त्रैवपैठीनसिः सप्तपंचद्वौवाश्रोत्रियान्निमंत्रयेत् आश्वलायनसूत्रेपि एकैकमेकैकस्यद्वौद्वौत्रींस्त्रीन्वावृद्धौफलभूयस्त्वंद्वाविति वृद्धिश्राद्धेगौतमः नवावरान्भोजयेदयुजोवायथोत्साहम् याज्ञवल्क्यः द्वौदैवेप्राक्त्रयः पित्र्ये उदगेकैकमेववा । मातामहानामप्येवंतंत्रंवावैश्वदेविकम् दीपकलिकायां पराशरः संपत्तावर्थपात्राणामेकैकस्यत्रयस्त्रयः ॥ पित्रादेर्ब्राह्मणाःप्रोक्ताश्च त्वारोवैश्वदेविके वृद्धयाज्ञवल्क्यः दशैकंपंचवाविप्रान्पार्व्वणेविनियोजये त् । अत्रवैश्वदेवेद्वौचतुरोवोपवेश्यपित्रादीनामेकैकस्यस्थानेएकंत्रीन्पंचस प्तनववोपयेशयेदितिनिक्षुण्णोर्थः मनुः द्वौदैवेपितृकृत्येत्रीनेकैकमुभयत्रवा । भोजयेत्सुसमृद्धोपिनप्रसज्येताविस्तरे । सत्क्रियांदेशकालौचशौचंब्राह्मण संपदम् ॥ पंचैतान्विस्तरोहंतितस्मान्नेहेतविस्तरम् पृथ्वीचंद्रोदयेशातात पः द्वौदैवेथर्वणौ विप्रौप्राङ्मुखावुपवेशयेत् ॥ पित्र्येतूदङ्मुखांस्त्रींश्चबहवृ चाध्वर्युसामगान् अत्यशक्तौहेमाद्रौदेवलः एकेनापिहिविप्रेणषट्पिंडंश्राद्ध माचरेत् ॥ षडर्घ्यान्दापयेत्तत्रषड्भ्योदद्यात्तथाहविः गोभिलः यद्येकंभो जयेच्छ्राद्धेछंदोगंतत्रभोजयेत् । ऋचोयजूंषिसामानित्रितयंतत्रविद्यते अत्र वैश्वदेवेविशेषमाहतत्रैववसिष्ठः यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत् ॥ अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रकृतस्यच ॥ देवतायतनंकृत्वाततःश्राद्धंसमाचरे त् ॥ प्रास्येदग्नौतदन्नंतुदद्याद्ब्राह्मचारिणे ॥ एतच्चसपिंडीकरणवर्ज्यंज्ञेय म् ॥ नत्वेवैकंसर्वेषांकाममनाद्येइत्याश्वलायनोक्तेः अस्यार्थउक्तोनाराय णवृत्तौ आद्यंसपिंडीकरणंतद्वर्जेषुश्राद्धेषुकामंत्रयाणामेकंभोजयेत् ॥ सपिं डीकरणेतुनियतंत्रिभिर्भवितव्यमिति । अनाद्येपार्वणवर्जितेवा । अभोजने आमहेमश्राद्धादौवा । अन्नाभावेवेतिव्याख्यांतरंतत्रैवज्ञेयम् कारिकापि दै वेपित्र्येथवैकैकंसपिंडीकरणंविनेति अत्रैकविप्रेसाग्नेर्विशेषमाहपृथ्वीचं द्रोदयेप्रचेताः एकस्मिन्ब्राह्मणेदैवेसाग्नेरग्निर्भवेत्सदा ॥ अनग्नेःकुशमुष्टिः स्याच्छ्राद्धकर्मणिसर्वदा सर्वथाविप्रालाभेतत्रैवहेमाद्रौचसत्यव्रतः नि

धायदर्भनिचयमासनेषुसमाहितः ॥ प्रैषानुप्रेषसंयुक्तंसर्वंश्राद्धंप्रकल्पयेत् ॥ अत्रप्राप्त्यभावात्सत्रेइवऋत्विक्कार्येयजमानविधौनदक्षिणेतिकेचित् तन्न । अदृष्टार्थायाः दक्षिणायाःप्राप्तेः सर्वतात्रिजटेतुभ्यंयच्चश्राद्धमदक्षिणमिति पाद्मात् ॥ विदध्याद्धौत्रमन्यश्चेद्दक्षिणार्द्धहरोभवेत् ॥ स्वयंचेदुभयंकुर्याद न्यस्मैप्रतिपादयेदितिछंदोगपरिशिष्टाच्च **एवंयतिश्राद्धेपिकात्यायनः** यज्ञ वस्तुनिमुष्टौचस्तंभेदर्भबटौतथा ॥ दर्भसंख्यानविहितावृष्टरास्तरणेषुच **मा तृश्राद्धेतुविप्रालाभेसुवासिन्योपिभोजनीया इत्याहापरार्केवृद्धवसिष्ठः** मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि ॥ पतिपुत्रान्विताभव्यायोषितोष्टौकुलो द्भवाइति ॥ अष्टावितिवृद्धिश्राद्धविषयम् **पाद्मेउत्तरखंडे** सकृदभ्यर्चितंलि गंशालग्रामशिलांचयः ॥ पीठेसंस्थापयित्वातुश्राद्धंचकुरुतेनरः ॥ पितरस्त स्यतिष्ठंतिकल्पकोटिशतंदिवि **चंद्रिकायांमात्स्ये** पठन्निमंत्र्यनियमान्श्रा वयेत्पैतृकान्बुधः ॥ अक्रोधनैःशौचपरैःसततंब्रह्मचारिभिः ॥ भवितव्यंभ वद्भिश्चमयाचश्राद्धकारिणा **यत्तुमनुः** सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जि तैः ॥ भवितव्यंभवद्भिर्नःश्वोभूतेश्राद्धकर्मणीतितत्पूर्वेद्युर्निमंत्रणपरंनतदहः **तत्रैवदेवलः** असंभवेपरेद्युर्वाब्राह्मणांस्तान्निमंत्रयेत् । अज्ञातीनसमाना र्षानयुग्मानात्मशक्तितः **कात्यायनः** आनिंद्येनामंत्रितोनापक्रामेत्केतनं गृह्यशक्तः अथश्राद्धकर्तृभोक्तृनियमाः **तत्रनिमंत्रितविप्रत्यागेऽ अपरा र्केयमः** केतनंकारयित्वातुयोतिपातयतिद्विजम् ॥ ब्रह्महत्यामवाप्नोतिशू द्रयोनौचजायते ॥ आमंत्र्यब्राह्मणंयस्तुयथान्यायंनपूजयेत् ॥ अतिकृ च्छ्रासुघोरासुतिर्यग्योनिषुजायते ॥ **प्रमादात्यागेतुहारीतः** प्रमादाद्वि स्मृतंज्ञात्वाप्रसाद्यैनंप्रयत्नतः ॥ तर्पयित्वायथान्यायंसर्वंतत्फलमश्नुते **प्रमादाभावेतुनारायणः** एकस्मिन्नेनसिप्राप्तेब्राह्मणोनियतःशुचिः ॥ य तिचांद्रायणंकृत्वातस्मात्पापात्प्रमुच्यते **यमः** आमंत्रितस्तुयोविप्रोभोक्तुम न्यत्रगच्छति ॥ नरकाणांशतंगत्वाचांडालेष्वभिजायते **तत्रैवदेवलः** पूर्वंनि मंत्रितोऽन्येनकुर्यादन्यप्रतिग्रहम् ॥ भुक्ताहारोथवाभुंक्तेसुकृतंतस्यनश्यति

॥ **यदिविप्रोविलंबेत तदोक्तमादित्यपुराणे** आमंत्रितश्चिरंनैवकुर्याद्विप्रःकदाचन ॥ देवतानांपितॄणांचदातुरन्नस्यचैवहि ॥ चिरकारीभवेद्रोहे पच्यतेनरकाग्निना **पृथ्वीचंद्रोदयेयमः** निमंत्रितस्तुयोविप्रोह्यध्वानंयातिदुर्मतिः ॥ भवंतिपितरस्तस्यतंमासंपांशुभोजनाः ॥ आमंत्रितस्तुयःश्राद्धहिंसां वैकुरुतेद्विजः ॥ पितरस्तस्यतंमासंभवंतिरुधिराशनाः ॥ आमंत्रितस्तुयोविप्रो भारमुद्वहतेद्विजः ॥ पितरस्तस्यतंमासंभवंतिस्वेदभोजनाः ॥ निमंत्रितस्तु योविप्रःप्रकुर्यात्कलहंयदि ॥ पितरस्तस्यतंमासंभवंतिमलभोजनाः **शंखः** निमंत्रितस्तुयःश्राद्धेमैथुनंसेवतेद्विजः ॥ श्राद्धंदत्वाचभुक्त्वाचयुक्तःस्यान्महतैनसा ॥ मैथुनंऋतावपिनिषिद्धं। ऋतुकालेनियुक्तोवानैवगच्छेत्स्त्रियंक्वचित् ॥ तत्रगच्छन्नवाप्नोतिह्यनिष्टानिफलानित्वितितत्रमाधवीयेचवृद्धमनूक्तेः ॥ श्राद्धंकरिष्यन्कृत्वावाभुक्त्वावापिनिमंत्रितः ॥ उपोष्यचतथाभुक्त्वानोपेयाच्चऋतावपि ॥ भोक्ष्यन्करिष्यन्श्वःश्राद्धंपूर्वरात्रौप्रयत्नतः ॥ व्यवायंभोजनंचापिऋतावपिविवर्जयेदितितत्रैवाश्वलायनोक्तेश्च **विज्ञानेश्वरेणतु** श्राद्धेऋतौगच्छतोपिनदोषइत्युक्तंतत्वगतिकत्वेज्ञेयं **बृहस्पतिः** द्विनिशंब्रह्मचारीस्याच्छ्राद्धकृद्ब्राह्मणैःसह ॥ अन्यथावर्तमानौतुस्यातांनिरयगामिनौ ॥ पुनर्भोजनमध्वानंभारमायासमैथुनं ॥ श्राद्धकृच्छ्राद्धभुक्चैवसर्वमेतद्विवर्जयेत् ॥ स्वाध्यायंकलहंचैवदिवास्वापंतथैवच **यत्तुश्राद्धकारिकायांपुराणसमुच्चये** कृत्वातुरुधिरस्रावंनविद्वान्श्राद्धमाचरेत् ॥ एकंद्वेत्रीणिवाविद्वान्दिनानिपरिवर्जयेदितितन्निर्मूलम् **पृथ्वीचंद्रोदयेयमः** पुनर्भोजनमध्वानंभाराध्ययनमैथुनम् ॥ संध्यांप्रतिग्रहंहोमंश्राद्धभोक्ताऽष्टवर्जयेत् ॥ इतिसंध्यानिषेधःप्रायश्चित्तात्पूर्वंज्ञेयः **यथाहोशनाः** दशकृत्वःपिवेदापोगायत्र्याश्राद्धभुक्द्विजः ॥ ततःसंध्यामुपासीतजपेच्चजुहुयादपि **गौडास्तु** सायंसंध्यांपरान्नंचछेदनंचवनस्पतेः ॥ अमावास्यांनकुर्वीतरात्रिभोजनमेवच ॥ द्यूतंचकलहंचैवसायंसंध्यांदिवाशयं ॥ श्राद्धकर्ताचभोक्ताचपुनर्भुक्तिंचवर्जयेदिति कामधेनौवराहाद्युक्तेः ॥ श्राद्धकर्तुरपिसायंसंध्यानिषेधमाहुः ॥ शिष्टास्तुनि

मूलत्वमाहुः ॥ होमनिषेधस्तुस्वविषयः ॥ सूतकेचप्रवासेचअशक्तौश्राद्धभो जने ॥ एवमादिनिमित्तेषुहावयेन्नतुहापयेदितिछंदोगपरिशिष्टात् **तत्रैवादि त्यपुराणे** निमंत्रितस्तुनश्राद्धेकुर्याद्भार्यादिताडनं **चंद्रिकायांप्रचेताः** श्राद्ध भुक्प्रातरुत्थायप्रकुर्यादंतधावनं॥श्राद्धकर्तानकुर्वीतदंतानांधावनंबुधः **हेमा द्रौजाबालिः** दंतधावनतांबूलंतैलाभ्यंगमभोजनं ॥ स्त्र्यौषधपरान्नंचश्राद्ध कृत्सप्तवर्जयेदिति **विष्णुरहस्ये** श्राद्धोपवासदिवसेखादित्वादंतधावनं ॥ गायत्र्याशतसंपूतमंबुप्राश्यविशुद्ध्यति ॥ पुनर्भोजनमध्वानंयानमायासमै थुनं ॥ दानप्रतिग्रहौहोमंश्राद्धभुक्त्वष्टवर्जयेत् **सोमोत्पत्तौ** वनस्पतिग तेसोमेयस्तुहिंस्याद्वनस्पतिम् घोरायांभ्रूणयत्यायांयुज्यतेनात्रसंशयः ॥ एत द्धिहितेध्मादिव्यतिरेकेण । वनस्पतिगतेसोमेमंथानंयस्तुकारयेत् ॥ गावस्त स्यप्रणश्यंतिचिरकालमुपस्थिताः **वनस्पतिगतस्वरूपमाहपृथ्वीचंद्रोदये व्यासः** त्रिमुहूर्तंवसेदर्केत्रिमुहूर्तंवसेज्जले ॥ त्रिमुहूर्तंवसेद्रोषुत्रिमुहूर्तंवन स्पतौ **कालिकायांवृद्धमनुः** निमंत्र्यविप्रांस्तदहर्वर्जयेन्मैथुनंक्षुरं ॥ प्रमत्त ताचस्वाध्यायंक्रोधशौचेतथानृतम् ॥ केचिन्निमंत्रणात्पूर्वंशुद्ध्यर्थंपूर्वेन्हिक्षौ रंकुर्वंतितत्रमूलंमृग्यम् **मरीचिः** षष्ठ्यांपर्वसुपक्षादौरिक्ताभद्रातिथिष्वपि ॥ पातेश्राद्धेव्रताहेचक्षौरंवर्ज्यंनिशासुच ॥ यदाकर्तुरशक्त्यातत्पुत्रशिष्यादिःश्रा द्धंकरोतितदाकर्त्राप्रतिनिधिनाचप्रागुक्तानियमाःकार्याः ॥ नशक्नोतिस्वयं कर्तुंयदाह्यनवकाशतः ॥ श्राद्धंशिष्येणपुत्रेणतदान्येनापिकारयेत् ॥ निय मानाचरेत्सोपिनियतांश्चवसुंधरे ॥ यजमानोपितान्सर्वानाचरेत्सुसमाहितइ तिहेमाद्रौवाराहोक्तेः ॥ **स्त्रियस्तुपाद्मे** मुक्तकच्छातुयानारीमुक्तकेशीतथै वच ॥ हसतेवदतेचैवनिराशाःपितरोगताः **आश्वलायनः** श्राद्धेह्निभो जयेद्वास्तौनबालानपियव्रतः ॥ प्राक्पिंडदानाद्गंधाद्यैर्नालंकुर्यात्स्वविग्र हम् ॥ वास्तौगृहे **अथश्राद्धवस्तूनि ॥ तत्रादौकुशाः । पृथ्वीचं द्रोदयेदक्षः** समित्पुष्पकुशादीनांद्वितीयःपरिकीर्तितः॥अष्टधाभक्तेदिनेद्वितीयोभागइत्यर्थः **तत्रैवयमः** समूलस्तुभवेद्दर्भाः पितॄणांश्राद्धकर्म्मणि ॥ मूले

नलोकान्जयतिशक्रस्यसुमहात्मनः व्यासः तर्पणादीनिकार्याणिपितॄणांया निकानिचित् ॥ तानिस्युर्द्विगुणैर्दर्भैःसप्तपत्रैर्विशेषतः शालंकायनः सर्पि डीकरणंयावद्दजुदर्भैःपितृक्रिया। सपिंडीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् शं खः अनन्तगर्भिणंसाग्रं कौशंद्विदलमेवच ॥ प्रादेशमात्रंविज्ञेयं पवित्रंयत्र कुत्रचित् हारीतः पवित्रंब्राह्मणस्यैव चतुर्भिर्दर्भपिंजुलैः॥ एकैकंन्यूनमुद्दिष्टं वर्णेवर्णेयथाक्रमम् स्मृत्यर्थसारे सर्वेषांवाभवेत्द्वाभ्यांपवित्रंग्रंथितंनवम् रत्नावल्याम् द्वयोस्तुपर्वणोर्मध्येपवित्रंधारयेद्बुधः हेमाद्रौस्कांदे अनामिका धृतादर्भाह्येकानामिकयापिवा ॥ द्वाभ्यामनामिकाभ्यांतुधार्येदर्भपवित्रके पवित्राभावेतुतत्रैवसुमंतुः समूलाग्रौविगर्भौतुकुशौद्वौदक्षिणेकरे॥ सव्येचै वतथात्रीन्वैबिभृयात्सर्वकर्मसु बौधायनः हस्तयोरुभयोर्द्वौद्वावासनेपित थैवच दर्भग्रहणेमंत्रमहाशंखः विरिंचिनासहोत्पन्नपरमेष्ठिनिसर्गज ॥ नु दसर्वाणिपापानिदर्भस्वस्तिकरोभव स्मृत्यर्थसारे हुंफट्कारेणमंत्रेणसकृ च्छित्वासमुद्धरेत् भारद्वाजः प्रेतक्रियार्थंपित्रर्थमभिचारार्थमेवच ॥ दक्षि णाभिमुखश्छिद्यात्प्राचीनावीतिकोद्विजः कुशाभावेऽपरार्केसुमंतुः कुशाः काशाःशरोगुंद्रोयवादूर्वाऽथबिल्वजाः ॥ गोकेशमुंजकुंदाश्चपूर्वाभावेपरःपरः काशादौविशेषमाहशंखः काशहस्तस्तुनाचामेत्कदाचिद्विधिशंकया ॥ प्रायश्चित्तेनयुज्येतदूर्वाहस्तस्तथैवच पृथ्वीचंद्रोदयेयमः मासिमास्युद्धृता दर्भामासिमास्येवचोदिताः षट्त्रिंशन्मते मासेनस्यादमावास्यादर्भोग्राह्यो नवःस्मृताः गृह्यपरिशिष्टे येचपिंडाश्रितादर्भायैःकृतंपितृतर्पणम् ॥ अमे ध्याशुचिलिप्तायेतेषांत्यागोविधीयते लघुहारीतः पथिदर्भाश्चितौदर्भायोदर्भा यज्ञभूमिषु ॥ स्तरणासनपिंडेषुषट्कुशान्परिवर्जयेत् ॥ ब्रह्मयज्ञेचयेदर्भा येदर्भाःपितृतर्पणे ॥ हतामूत्रपुरीषाभ्यांतेषांत्यागोविधीयते हेमाद्रौ अन्या निचपवित्राणिकुशदूर्वात्मकानिच ॥ हेमात्मकपवित्रस्यह्येकांनार्हतिवैकला म् अथहविः हेमाद्रौप्रचेताः कृष्णमाषास्तिलाश्चैवश्रेष्ठाःस्युर्यवशालयः ॥ महायवाव्रीहियवास्तथैवचमधूलिकाः ॥ कृष्णाः श्वेताश्चलोहाश्चग्राह्याः

स्युःश्राद्धकर्मणि ॥ महायवावेणुबीजं । मधूलिकायावनालाइतिहेमाद्रिः **कल्पतरुश्चभारते** वर्धमानतिलंश्राद्धमक्षय्यंमनुरब्रवीत् ॥ सर्वकामैःसयज तेयस्तिलैर्यजतेपितॄन् **चंद्रिकायांदेवलः** इष्टापूर्तेमृताहेचदर्शवृद्ध्यष्टकासु च ॥ पात्रेभ्यस्तेषुकालेषुदेयंनैवकुभोजनं **सायणीये** अगोधूमंचयच्छ्राद्धं माषमुद्गविवर्जितं ॥ तैलपक्केनरहितंकृतमप्यकृतंभवेत् **हेमाद्रावात्रिः** अगो धूमंचयच्छ्राद्धंकृतमप्यकृतंभवेत् **तत्रैवब्राह्मे** यवैर्व्रीहितिलैर्माषैर्गोधूमैश्चण कैस्तथा । संतर्पयेत्पितॄन्मुद्गैश्यामाकैःसर्षपद्रवैः ॥ नीवारैर्हरिश्यामाकैः प्रियंगुभिरथार्चयेत् ॥ **हेमाद्रौकाष्णाजिनिः** यदिष्टंजीवतश्चासीत्तद्दद्यात्त स्ययत्नतः ॥ सतृप्तोदुस्तरंमार्गंततोयातिनसंशयः **कलिकायामाश्वलाय नः** कदल्यादिफलैःशस्तैर्मूलैराद्रादिकैरपि॥गोरसैर्मधुनादध्नाश्राद्धेसंतर्पयेत् पितॄन् ॥ कदल्याम्रफलादीनिश्राद्धेसंपादयेत्सुधीः **हेमाद्रौपृथ्वीचंद्रोदये चमार्कंडेयः** गोधूमैरिक्षुभिर्मुद्गैःसतीनैश्चणकैरपि ॥ श्राद्धेषुदत्तैःप्रीयंतेमास मेकंपितामहाः ॥ विदार्याचभरुंडैश्चतिलैःशृङ्गाटकैस्तथा ॥ कंचुकैश्चतथा कंदैःकर्कधूबदरैरपि ॥ पालेवतैरारुकैश्चाप्यक्षोटैःपनसैस्तथा ॥ काकोल्या क्षीरकाकोल्यातथापिंडालकैःशुभैः ॥ लाजाभिश्चसधानाभिस्रपुसैश्चारुचि र्भटैः ॥ सर्षपाराजकाशाभ्यामिंगुदैराजजंबुभिः ॥ प्रियालामलकैर्मुख्यैः फल्गुभिश्चतिलंटकैः ॥ वेत्राकुरैस्तालकंदैश्चक्रिकाक्षीरिकावचैः ॥ लो चैःसमोचैर्लकुचैस्तथावैबीजपूरकैः ॥ कुंजातकैःपद्मकलैर्भक्ष्यभोज्यैश्चसं स्कृतैः ॥ रागखांडवचोष्यैश्चत्रिजातकसमन्वितैः ॥ दत्तैस्तुमासंप्रीयं तेश्राद्धेषुपितरोनृणाम् ॥ एषांकोशहेमाद्यादिव्याख्यावैद्यकाद्यनुसारेणम ध्यदेशभाषयानामान्युच्यंते । सतीनैःकलापैः । कलापस्तुसतीनकइत्यमरः । बटूरीतिप्रसिद्धैः ॥ विदार्यातत्कंदेनभरुंडजलजं । मखाणाइतिश्राद्धमंजर्यां । भूकूष्मांडमित्यन्ये । शृङ्गाटकं सिंघाडा । कंचुकः कंचनारः । कंदः सूरणः । आर्शोघ्नःसूरणःकंदइत्यमरः । कर्कंधूःवन्यंसूक्ष्मंबदरं । पालेवतंकोशातकी । आरुकं अरुई । अक्षोटं अखरोट । काकोलीक्षीरकाकोल्यौगौडेषुप्रासिद्धौ

॥ पिंडालकंसुथनी । महाराष्ट्राणांमोहलकंदइतिप्रसिद्धम् । त्रपुसादयस्त्र यःकर्कटीभेदाः । चिर्भटंखर्बुजम् । सर्षपाइतिदीर्घश्छांदसःप्रियालंचिरौं जी । फल्गुउदुंबरं । तिलंटकंपटोलकं । तालकंदःकंदविशेषः । चक्रिकां तिंतिणीबिंबा । क्षीरिकाखीरिणी । मोचंकदलीफलं । लकुचंवडहरम् । मुं जातकंगौडदेशेप्रसिद्धं । पद्मफलंगट्टा । रागखांडवः पिप्पलीशुंठियुक्तस्तुमु द्गयूपस्तुखांडवः ॥ रागखांडवतांयातिशर्करासंयुतंतुतत् इत्युक्तःपानविशेष त्रिजातंलवंगैलापत्रकाणि **मदनरत्नेकौर्मे** कालशाकंचवास्तूकंमूलकंकृष्ण नालिका ॥ प्रशस्तानीतिशेषः **हेमाद्रौपृथिवीचंद्रोदयेचवायुपुराणे** काल शाकंमहाशाकंद्रोणशाकंतथार्द्रकम् ॥ बिल्वामलकमृद्वीकापनसाम्रातदा डिमं ॥ चव्यंपालिवटाक्षोटखर्जूरंचकसेरुकम् ॥ कोविदारश्चकंदश्चपटोलंबृ हतीफलं ॥ पिप्पलीमरिचंचैवएलाशुंठीचसैंधवं ॥ शर्करागुडकर्पूरबदरीद्रो णपत्रकं **तथा** मधुकंरामठंचैवकर्पूरंगुडमेवच ॥ श्राद्धकर्मणिशस्तानिसैंध वंत्रपुसंतथा॥रामठंहिंगुः॥कसेरुःकोविदारश्चतालकंदस्तथाबिसम् ॥ तमालं शतकंदश्चमध्वालुःशीतकंदकम् ॥ कालेयंकालशाकंचसुनिषण्णंसुवर्चलं ॥ मांसंशाकंदधिक्षीरंचांबुवेत्रांकुरस्तथा ॥ कट्फलंकौंकणीद्राक्षालकुचंमोचमे वच ॥ अलाबुंग्रीवकंचारंकर्कधूर्मधुसाह्वयम् ॥ वेकंकतंनारिकेलंशृङ्गाटकप रूषकं ॥ पिप्पलीमरिचंचैवपटोलंबृहतीफलं ॥ एवमादीनिचान्यानिस्वादू निमधुराणिच ॥ नागरंचार्द्रकंदेयंदीर्घमूलकमेवचेति **तथा** शर्कराक्षीरसंयु क्ताःपृथुकानित्यमक्षयाः ॥ द्रोणशाकंगूमइतिप्रसिद्धम् । मृद्वीद्राक्षा । आ म्रातंआंबाडाइतिप्रसिद्धोवृक्षः।तत्फलंचपालिवंतंजंबीरं। पालिआलमितिगौ डप्रसिद्धंवा । खर्जूरंखजूरइतिप्रसिद्धम् । कसेरुःजलजःकंदः । कोविदारः कंचनारसदृशः ॥ तालकंदःतालमूली । विसंभसीडं । शतकंदःशतावरी॥ शीतकंदः । शालुकंसेरुकीतिप्रसिद्धम् । कालेयंकरालसंज्ञःशाकः । दारुह रिद्रावेति **पृथिवीचंद्रोदयः** सुनिषण्णंकर्कटी । सुदृशंसुलटीयाइतिगौडप्रसि द्धं सुवर्चलंशाकविशेषः । कट्फलंश्रीपर्णीवृक्षफलं । कौंकणीअम्लरसाद्रा

क्षा । तिंदुकंडिंडिसमितिकैदेवः।तिंदुफलंवा । ग्रीवकंफलविशेषः । चारंक्षुद्र तालं । मधुसाह्वयंमधूकपुष्पंफलंवा । वैकंकतंचैंचीतिगौडाख्यातम् । परू षकंपरूसमितिप्रसिद्धम् । नागरंशुंठीः **पृथिवीचंद्रोदयेब्राह्मे** आम्रमाम्रात कंबील्वंदाडिमंबीजपूरकं ॥ प्राचीनामलकंक्षीरंनारिकेरंपरूषकं ॥ नारंगकं चखर्जूरंद्राक्षानीलकपित्थकम् ॥ एतानिफलजातानिश्राद्धेदेयानियत्नतः **मात्स्ये** अन्नंतुसदधिक्षीरंगोघृतंशर्करान्वितम् ॥ मासंप्रीणातिसर्वान्वैपितॄ नित्याहकेशवः **याज्ञवल्क्यः** हविष्यान्नेनवैमासंपायसेनतुवत्सरम् ॥ मात्स्यहारिणकौरभ्रशाकुनच्छागपार्वतैः ॥ ऐणरौरववाराहशाशैर्मासैर्य थाक्रमं ॥ मासवृद्ध्याभितृप्यंतिदत्तैरिहपितामहाः खड्गामिषंमहाशल्यं मधुमुन्यन्नमेवच ॥ लोहामिषंकालशाकंमांसंवाध्रीणसस्यच **निगमः** त्रिःपि बंतिंवद्रियक्षीणंश्वेतंवृद्धमजापतिम् ॥ वाध्रीणसंतुतंप्राहुर्याज्ञिकाःश्राद्धकर्म णि ॥ वाध्रीणसोजरच्छागइतिमेधातिथिःकात्यायनः । छागोस्तनपाना लभ्यःशेषाणिक्रित्वालब्ध्वावास्वयंमृतानांवाहृत्यपचेत् । **कौर्मे** क्रीत्वाल ब्ध्वास्वयंवाथमृतानानाहृत्यवाद्विजः ॥ दद्याच्छ्राद्धेप्रयत्नेनतदस्याक्षय्य मुच्यते **श्राद्धेदत्तस्यमांसस्याभक्षणेदोषमाहमनुः** नियुक्तस्तुयथान्या यंयोमांसंनात्तिमानवः । सप्रेत्यपशुतांयांतिसभवानेकविंशतिम् ॥ अत्रबहु षुवचनेषुश्राद्धेमांसमधुनोःप्राशस्त्योक्तेः ॥ विनामांसेनयच्छ्राद्धंकृतमप्यकृतं भवेदितिहेमाद्रौदेवलोक्तेः । यच्छ्राद्धंमधुनाहीनंतद्रसैःसकलैरपि ॥ मिष्टान्नै रपिसंयुक्तंपितॄणांनैवतृप्तये ॥ अणुमात्रमपिश्राद्धेयदिनस्याच्चमाक्षिकम् ॥ नामापिकीर्तनीयंस्यात्पितॄणांप्रीतयेततइतिहेमाद्रौब्राह्मोक्तेश्च ॥ मांसमधु नोःश्राद्धेनियतत्वंगम्यतेगौडनिबंधेमात्स्यसुमंतूक्तेः ॥ मध्वाभावेगुडोदेयः क्षीरस्यचतथादधि ॥ नलभ्यतेघृतंयत्रकुर्यात्घृतवतीजपं **श्राद्धकलिका यांनागरखंडे** कथंचिद्यादिविप्रेभ्योनदत्तंभोजनेमधु ॥ पिंडास्तुनैवदातव्याः कदाचिन्मधुनाविना ॥ बृहत्पराशरस्तुमांसंनिषेधति ॥ यस्तुप्राणिवधंकृत्वा मांसैस्तर्पयतेपितॄन् ॥ सविद्वांश्चंदनंदग्ध्वाकुर्यादंगारविक्रयम् ॥ क्षिप्त्वा

कूपेयथाकिंचिद्बालआदातुमिच्छति ॥ पतत्यज्ञानतःसोपिमांसेनश्राद्धकृत्त था **सएव** सर्वथान्नंयदानस्यात्तदैवामिषमाश्रयेत् ॥ ब्राह्मणश्चस्वयंनाद्या त्तच्चश्वादिहतंयदि **भागवतेपि** नदद्यादामिषंश्राद्धेनचाद्याद्धर्मतत्त्ववित् मुन्यन्नैःस्यात्पराप्रीतिर्यथानपशुहिंसया तथेतिशेषः । अत्रकेचित् । मु न्यंन्नब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोः ॥ मधुप्रदानंशूद्रस्यसर्वेषांवाविरोधि यदितिहेमाद्रौपुलस्त्योक्त्याव्यवस्थामाहुः **पृथ्वीचंद्रोदयस्तु** अक्षतागोप शुश्चैवश्राद्धेमांसंतथामधु ॥ देवराच्चसुतोत्पत्तिःकलौपंचविवर्जयेदितिनिगमो क्तेः ॥ वरातिथिपितृभ्यश्चपशूपाकरणक्रियेतिकलिवर्ज्येषुहेमाद्रावादित्यपुरा णात् **बृहन्नारदीये** मांसदानंयथाश्राद्धेवानप्रस्थाश्रमस्तथेत्युक्त्वा इमान्ध र्मान्कलियुगेवर्ज्यानाहुर्मनीषिणइतिबृहन्नारदीयेभिधानाच्चमांसविधिःकलि व्यतिरिक्तविषयः ॥ कलौमांसनिषेधानांचदेशाचारात्व्यवस्था ॥ तथाचबृ हन्नारदीयेश्राद्धंप्रकृत्य । यथाचारंप्रदेयंतुमधुमांसादिकंतथा ॥ देशाचाराः परिग्राह्यास्तत्तद्देशीयजैर्नरैः ॥ अन्यथापतितोज्ञेयःसर्वधर्मबहिष्कृतइति ॥ यस्मिन्देशेपुरेग्रामेत्रैविद्येनगरेपिवा ॥ योयत्रविहितोधर्मस्तंधर्मंनविचारयेदि तिभृगूक्तेश्चेत्याहुस्तन्न ॥ होलिकाधिकरणन्यायेनदेशविशेषव्यवस्थापकप दकल्पनायोगात् निरूपितंचतत्पितामहचरणैर्मांसमीमांसायामितिदिक् ॥ **मनुः** संवत्सरंतुगव्येनपयसापायसेनच ॥ वाध्रीणसस्यमांसेनतृप्तिर्द्वादश वार्षिकी । त्रिःपिबर्त्विद्रियक्षीणंश्वेतंवृद्धमजापतिं । वाध्रीणसंतुतंप्राहुर्याज्ञि काःश्राद्धकर्मणि ॥ **क्षीरादौविशेषमाहहेमाद्रौसुमंतुः** पयोदधिघृतंचैवग वांश्राद्धेषुपावनम् ॥ महिषीणांघृतंप्राहुःश्रेष्ठंनतुपयःक्वचित् **याज्ञवल्क्यः** सं धिन्यनिर्दशावत्सागोपयःपरिवर्जयेत् ॥ औष्ट्रमेकशफंस्त्रैणमारण्यकमथावि कम् **हेमाद्रौहारीतः** नवसूतयाःसप्तरात्रादित्येकादशरात्रादित्यपरेमासेनोपे युषंभवतीतिधर्मविदः ॥ एतद्रजोभावपरम् **देवलः** अजाविमहिषीणांतुपयः श्राद्धेषुवर्जयेत् । विकारान्पयसश्चैवमाहिषंतुघृतंहितम् **तत्रैवब्राह्मे** माहि षंचामरंमार्गमाविकैकशफोद्भवम् । स्त्रैणमौष्ट्रंपाचितंचदधिक्षीरंत्यजेत्घृतम्

सगुडंमरिचाक्तंतुतथापर्युषितंदधि । दीर्णतक्रमपेतंचनष्टास्वादंचफेनवत् **मा हिषापवादोपरार्केब्राह्मे** देयंतक्रंतुसद्यस्कंनवनीतादनुद्धृतम् । आरण्यम हिषीक्षीरंशर्करास्रुतिसंयुतम् ॥ मध्वक्तन्तुहिनंचैवदद्यात्तदमृतंयतः ॥ स्रुतिःक्षीरशरः । श्राद्धकौमुद्यांचैवम् **यद्यपियाज्ञवल्क्येन** अन्नंपर्युषितंभोज्यं स्नेहाक्तंचिरसंस्थितम् । अस्नेहाअपिगोधूमयवगोरसविक्रियाइति पर्युषितंदध्यादिभोज्यमुक्तंतथापिगुडमरीचाक्तस्यपर्युषितदोषोत्रोच्यत इतिहेमाद्रिः **तत्रैवब्राह्मे** कालशातंकंदुलीयंवास्तुकंमूलकंतथा ॥ शाकमारण्यकंचैवदद्याच्छ्राद्धेषुनित्यशः ॥ तन्दुलीयंसूक्ष्मपत्रमितिहेमाद्रिः ॥ महाराष्ट्राणांमाठइति प्रसिद्धम् ॥ आरण्यकंफांजीचूचादि **तत्रैव** दाडिमंमागधीचैव नागरार्द्रं कतिन्तिणिः । आम्रातकञ्जीरकञ्च कुवरंचैवयोजयेत् ॥ मागधीपिप्पली । नागरंशुठी । कुवरंकुस्तुम्बरं । धणियाइतिप्रसिद्धम् **वायवीये** अगस्तस्य शिखास्ताम्राःकाषायाःसर्वएवच । शिखानवपल्लवाः **प्रभासखंडे** आरामस्य तुसीमंताःकलापाःसर्वएवच॥सीमन्ताःनवपल्लवाः **कौर्मे** तमालंशतकन्दञ्चम ध्वालुंशीतकन्दली । मध्वालुःमोहलकन्दः । शीतकन्दलीरातालुइतिप्रसिद्धम् **अथवर्ज्यमार्कण्डेयपुराणे** यच्चोत्कोचादिनाप्राप्तंपतिताद्यदुपार्जितम् । अन्यायकन्याशुल्कार्थद्रव्यञ्चात्रविगर्हितम् ॥ पित्र्यर्थमेप्रयच्छस्वेत्युक्त्वा यच्चाप्युपाहृतं **चंन्द्रोदयेशंखः** भूस्तृणंशिरसाशिग्रुपालंकीमृचुकन्तथा । कूष्माण्डलाम्बुवार्त्ताक कोविदारांश्चवर्ज्जयेत् ॥ पिप्पलींमरिचंचैवतथा पिण्डकमूलकम् । कृतञ्चलवणंसर्ववंशाग्रंचविवर्जयेत् ॥ राजमाषान्मसूरांश्चकोद्रव्यान्कोरदूषकान् । लोहितान्वृक्षनिर्यासान्श्राद्धकर्म्मणिवर्ज्जयेत् ॥ भूस्तृणंकाश्मीरदेशेप्रसिद्धम् । सुरसानिर्गुण्डीतिमाधवः ॥ तुलसीपिपृथ्वीचन्द्रोदयः । साचभक्ष्यत्वेननिषिद्धानपुष्णत्वेनेतिगौडाः ॥ पालंकीपालकइतिप्रसिद्धा।मृचुकंजलजःशाकः ।समुकमितिपाठेखदिरशाकइतिहेमाद्रिः मरीचान्यार्द्राणीतिहेमाद्रिः । कृतंलवणंसाँभरभिन्नम् । सैंधवंलवणंचैव तथा मानससम्भवम् । यच्चसामुद्रिकंभवेदिति शूलपाणौपाठः । पवित्रेपरमेह्यो

तेप्रत्यक्षेअपिनित्यशइतिवायवीयोक्तेः । मानसंसाम्भरम् **यत्तुभविष्यम्** तर्जन्यादन्तकाष्ठञ्चप्रत्यक्षंलवणंतथेति । तत्रक्षारलवणंखारितिप्रसिद्धंनिषिद्धं ॥ भुक्त्वातुक्षारलवणंत्रिरात्रन्तुवनेवसेदिति ब्राह्मोक्तेरिति शूलपाणिः । क्षीरलवणमितियावत् । क्षीरमिश्रंलवणंनिषिद्धमितिवाचस्पतिः ॥ राजमाषाःरतराइतिप्रसिद्धाः । कोरदूषकःवनकोद्रवः **चन्द्रिकायांशंखः** पिण्डालकंचतुंडीरंकरमर्दंचनालिकं । कूष्माण्डंबहुबीजानिश्राद्धेदत्वाव्रजत्यधः । पिण्डालकंमहाराष्ट्रेषुपेण्डरमितिप्रसिद्धम् । तुण्डीरंबिम्बीफलमितिकैदेवः । करमर्दंकरवंदमितिप्रसिद्धम् । तत्रैव । बिडालोच्छिष्टमाघ्रातंश्राद्धे यत्नेनवर्जयेत् । कूष्माण्डंमाहिषीक्षीरमाढक्योराजसर्षपाः ॥ चणकाराजमाषाश्चन्तिश्राद्धन्नसंशयः **वृद्धपराशरः** करीरफलपुष्पाणि विडंगमरिचानि च । जम्भारिकासजम्बीरासुपक्वम्बीजपूरकम् ॥ जंब्वलाबूनिपिप्पल्यःपटोलंपिण्डमूलकम् । मसूरांजनपुष्पंचश्राद्धेदत्वापतत्यधः ॥ जम्बुमूक्ष्मं **माधवीयेचतुर्विंशतिमते** यावनालान्कुलित्थांश्च वर्ज्जयन्तिविपश्चितः ॥ यावनालाजोंधला ॥ अत्रयानिचणकादीनिविहितनिषिद्धानितेषांविकल्पः । अन्यथा । श्यामाकैश्चणकैःशाकैर्नीवारैश्चप्रियंगुभिः । गोधूमैश्चतिलैर्मुद्गैर्मासंप्रीणयतेपितॄनिति । गोधूमैरिक्षुभिर्मुद्गैःसतीनैश्चणकैरपीतिहेमाद्रौकौर्मविष्णुधर्मादिविरोधःस्यात् ॥ पिप्पलीमरीचादेस्तुप्रत्यक्षस्यनिषेधोनत्वन्यद्रव्यमिश्रस्य ॥ सौवीरतिक्तैर्लवणादिभिस्तुपाकस्यसिद्धिर्महतीहयैस्तु । तद्बीजपूरान्मरिचादियोगात्सिद्धम्प्रदेयंनतुदुष्यतीहेतिपृथ्वीचन्द्रोदये वृद्धपराशरोक्तेः **तत्रैव** दातुश्चयस्मिन्मनसोभिलाषः श्रद्धाभवेद्यत्रचदीयमाने । श्राद्धेषुदेयंविधिवत्तदेवतद्दत्तस्यमक्षय्यमितिब्रुवन्ति ॥ एतन्निषिद्धेतरविषयम् **चन्द्रिकायां** कृष्णधान्यानिसर्वाणिवर्जयेच्छ्राद्धकर्मणि । नवर्जयेत्तिलांश्चैवमुद्गमाषांस्तथैवच **मात्स्ये** मसूरशणनिष्पावराजमाषकुसुम्भिकाः । पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः ॥ नदेयाःपितृकार्येषुपयश्चाजाविकन्तथा कोद्रवोदारवरककपित्थमधुकातसी ॥ एतान्यपिनदेयानिपितृभ्यःश्राद्धमि

च्छता ॥ निष्पावाःवल्लाः **यत्तुमार्कंडेयः** प्रियंगवः कोविदारानिष्पावाश्चा त्रशोभनाइतितत्रनिष्पावः श्वेतशिंबीतिदानसागरेश्राद्धप्रकाशेचोक्तम् ॥ बिल्वंचारिक्तंनिषिद्धं ॥ जंबीरंरक्तविल्वंचशालस्यापिफलंत्यजेदितिब्राह्मो क्तेः ॥ पारिभद्रोनिंबतरुरित्यमरः **रक्तमंदारइतिहेमाद्रिः** आटरूषोवासा तपुष्पं । उद्दारःकांचनारः । मधूकंज्येष्ठीमध्वीतिचंद्रिका । चरकावनमुद्गाः **हेमाद्रौब्रह्मांडे** आसनारूढमन्नाद्यंपादोपहतमेवच । अमेध्यैर्जंगमैःस्पृष्टंशु ष्कंपर्युषितंचयत् । द्विःस्विन्नंपरिदग्धंचतथैवाघ्रावलेहितम् ॥ शर्कराकीट पाषाणैःकेशैर्यच्चाप्युपद्रुतम् ॥ पिण्याकंमथितंचैवतथातिलवणंचयत् ॥ सि द्धाःकृताश्चयेभक्ष्याःप्रत्यक्षलवणीकृताः । वाससाचावधूतानिवर्ज्यानिश्राद्ध कर्मणि ॥ द्विस्विन्नंयत्सकृत्पाकेनभक्ष्यमपिहिंगुजीरकादिसंस्कारार्थंपुनःप च्यतेतद्वर्ज्यम् ॥ यत्तुतिक्तशाकान्नविकारादिद्विःपाकेनैवभक्षणार्हंतन्ननिषि द्धम् ॥ अघ्रावलेहितमास्वादितपूर्वं । पर्युषितस्यसदानिषेधेपिपुनर्वचनम् । अपूपाश्चकरंभाश्चधानावटकसक्तवः । शाकंमांसंमसूरंचसूपंकृसरमेवच । यवागूःपायसंचैवयच्चान्यत्स्नेहसंयुतम् । सर्वंपर्युषितंभोज्यंशुष्कंचेत्परिवर्ज्य येदितिमाधवीयेयमोक्तावटकादेरपिपर्युषितस्यनिषेधार्थमितिचंद्रिकादयः **व र्ज्येषुविश्वामित्रः** कपित्थंकुरुकंचैवनालिकेरंचपैत्तिकम् । जंबूफलादिप क्वंचपिण्याकंतंदुलीयकम् **हेमाद्रौषट्त्रिंशन्मते** वर्ज्यामर्कटकाःश्राद्धेराज माषास्तथैवच ॥ मर्कटकाःलाकाइतिप्रसिद्धाः **पैठीनसिः** वृंताकंनलिका पोतकुसुंभाश्मंतकानिच। शाकानामभक्ष्याइति। पोतंपोईतिप्रसिद्धम् कुसुंभं करडइतिमहाराष्ट्रेप्रासिद्धम् **मार्कंडेयः** वर्ज्याश्चाभिषवान्नित्यंशतपुष्पागवेधु काः। जंबीरकंफलंवर्ज्यं कोविदाराश्चनित्यशः॥ अभिषवःशुक्तइतिचंद्रिका। संधानकामितिपृथ्वीचंद्रः। शतपुष्पाओंवाइतिप्रसिद्धम् **शाठ्यायनः** मारिषं नालिकाचैवरक्तायाचकलंबिका। असुरान्नमिदंसर्वंपितॄणांनोपतिष्ठते ॥ मारि षंमध्यदेशेमरुसाइतिमहाराष्ट्रेषुराजगिराइतिचप्रसिद्धम् ॥ कलंबिकावेण्वाकृ तिपत्रा ॥ तत्रैव गांधारिकापटोलानिश्राद्धकर्मणिवर्जयेत् ॥ गांधारिकातंदु

लीयमितिचंद्रिका । जवासाख्यादुरालभेतिकैदेवः **भारते** हिंगुद्रव्येषुशाके षुअलाबुंलशुनंतथा । कुकुंडकान्यलाबूनिकृष्णंलवणमेवच । पुनरलाबुग्र हणमुभयालाबुनिषेधार्थमितिपृथ्वीचंद्रः ॥ कुकुंडकंवर्तुलछत्राकम् **तत्रैव** कुस्तुंबुरुंकलिंगोत्थंवर्जयेदाम्लवेतसं **हेमाद्रौब्राह्मे** वार्ताकंपंचशिंबंचलोम शानिफलानिच । कलिंगंरक्तचारंचवीणाकंधृतचारकम् ॥ कपालंकाचमारिं चकरंजंपिंडमूलकम् । गृञ्जनंचुलिकांचैवगाजरंजीवकंतथा ॥ वृन्ताकंश्वे तं । कंडुरांश्वेतवृन्ताकंकूष्मांडंचविवर्जयेदितिदेवलोक्तेः ॥ तेनकृष्णस्यनिषे धइतिचंद्रिकामाधवौ वस्तुतस्तुसदाश्वेतनिषेधात्पुनःश्राद्धेनिषेधोव्यर्थः । ते नभक्ष्यस्यकृष्णवृन्ताकस्यापि निषेधार्थमिदमितिवयम् ॥ कंदूराकपिकच्छू : । कंभांडंवृत्तालाबुः । पंचशिंबंवल्लमसूरराजमाषमठकुलित्थाः । लोमशानिक पित्थानि । रक्तचारंलोहितचारफलम् । वीणाकंकृष्णदीर्घकर्कटी । घृतचा रकंचिरस्थितचारफलम् । चारोलीतिप्रसिद्धम् । कपालंनारिकेलम् । का चंकवृक्षफलं । मारिचंआर्द्रमरीचानि । गृञ्जनंपलांडुभेदः । पश्चिमदिशिप्र सिद्धः । नतुगाजरम् । तस्यपृथगुक्तेःहेमाद्रिणातुगृञ्जनंगाजरमेवोक्तम् । गौडश्राद्धकौमुद्यामप्येवंतच्चिंत्यम् ॥ चुक्रिकाचिरकालशुक्तंपानकम् **चंद्रि कायांहारीतः** नवटप्लक्षोदुंबरशेलुदधित्थनीपमातुलिंगानिभक्षयेत् ॥ शेलुः भोकरसंज्ञः । दधित्थंकपित्थं **स्मृतिसारे** क्षीरेतुलवणंदत्वाउच्छिष्टेपिचय द्घृतम् । स्नानंरजकतीर्थेषुताम्रेगव्यंसुरासमम् **गौडनिबंधसागरेस्मृतिः** नारिकेरोदकंकांस्ये ताम्रपात्रेस्थितंमधु । गव्यंचताम्रपात्रस्थंमद्यतुल्यंघृतंवि ना॥ताम्रपात्रेघृतंमांसंपंचगव्यंघृततरत्आमिषंतुगवांमांसंदधिमद्यंपयोरजः ॥ द्रव्यांतरयुतंमांसंपयसासंयुतंदधि ॥ पयोनुद्धृतसारंचताम्रपात्रेनदुष्यति **अ थजलम् याज्ञवल्क्यः** शुचिगोतृप्तिकृत्तोयंप्रकृतिस्थंमहीगतम् **वर्ज्यंजलमु क्तंहेमाद्रौब्रह्मांण्डे** दुर्गंधिफेनिलंक्षारंपंकिलंपल्वलोदकम् । नभवेद्यत्रगोतृ प्तिर्नक्तंयच्चाप्युपाहृतम् ॥ यन्नसर्वार्थमुत्सृष्टंयच्चाभोज्यनिपानजम् ॥ तद्वर्ज्यं सलिलंतातसदैवश्राद्धकर्मणि ॥ निपानोजलाशयः **शुद्धितत्त्वेशंखः** स्नान

माचमनंदानं देवतापितृतर्पणम् । शूद्रोदकैर्नकुर्वीततथामेध्याद्विनिःसृतैः **हेमाद्रावादित्यपुराणे** चिरंपर्युषितंवाविशूद्रस्पृष्टमथापिवा ॥ जाह्नव्याःस्नानदानादौपुनात्येवसदापयः **कात्यायनः** अपोनिशिनगृह्णीयान्नपिबेच्चकदाचन । उद्धृत्याग्निमुपर्यग्नेर्धान्नोधान्नइतीरयेत् **रजोदोषेतुप्रायुक्तंनारदीये** त्यजेत्पर्युषितंपुष्पंत्यजेत्पर्युषितंजलम् । नत्यजेज्जाह्नवीतोयंतुलसींबिल्वपद्मकम् **अन्यान्यपिपृथिवीचंद्रोदयेमात्स्ये** मध्याह्नःखड्गपात्रंतथानेपालकंबलः रौप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः ॥ पापंकुत्सितमित्याहुस्तस्यसंतापकारिणः।अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताः **ब्राह्मे** यतिस्त्रिदंडःकरुणाराजतंपात्रमेवच । दौहित्रंकुतपःकालश्छागःकृष्णाजिनंतथा ॥ शास्तानीतिशेषः ॥ दौहित्रंखड्गपात्रमितिकल्पतरुः **अपरार्केस्मृत्यंतरे** अपत्यंदुहितुश्चैवखड्गपात्रंतथैवच । घृतंचकपिलायागोदौहित्रमितिकीर्तितम् **ब्रह्माण्डे** अमावास्यागतेसोमेयातुखादतिगोस्तृणम् । तस्यागोर्यद्भवेत्क्षीरंतद्दौहित्रमुदाहृतम् **स्मृतिसंग्रहे** उच्छिष्टंशिवनिर्माल्यंवांतंचमृतकर्पटम् । श्राद्धे सप्तपवित्राणि दौहित्रःकुतपस्तिलाः ॥ उच्छिष्टंवत्सस्यदुग्धमित्यर्थः ॥ शिवनिर्माल्यंगंगोदकं । वांतंमधु । मृतकर्पटंतसरीपट्टम् **तिलेष्वापस्तंबः** अटव्यांयेसमुत्पन्नाअकृष्टफलितास्तथा । तेवैश्राद्धेपवित्राःस्युस्तिलास्तेनातिलास्तिलाः ॥ अभावेग्राम्याः॥ गौराःकृष्णांस्तथारण्यास्तथैवत्रिविधास्तिलाइति ब्राह्मोक्तेः **अथवर्ज्यानिचंद्रिकायांयमः** कुक्कुटोविड्वराहश्चकाकश्चाथबिडालकः । वृषलीपतिश्चवृषलःषंढोवीरारजस्वला ॥ एतेतुश्राद्धकालेवैवर्जनीयाःप्रयत्नतः ॥ खंजःकाणःकुणिःश्वित्रीदातुःप्रेष्यकरस्तथा । न्यूनांगोप्यतिरिक्तांगस्तमप्यपनयेत्ततः **वायवीये** अन्नंपश्येयुरेतेतुयदिवैहव्यकव्ययोः । उत्सृष्टव्यंप्रधानार्थंसंस्कारस्त्वापदिस्मृतः **सुमंतुः** चांडालादिवीक्षितमन्नमभोज्यमन्यत्रमृद्भस्महिरण्योदकस्पर्शात् **तत्रैवजमदग्निः** शुद्धवत्योथकूष्मांड्यःपावमान्यस्तरत्समाः । पूतेनवारिणादर्भैरन्नदोषमपानुदत् **चंद्रोदये** पादुकोपानहौछत्रंचित्ररक्तांबरंतथा । रक्तपुष्पंचमार्जारंश्राद्धभूमौविवर्जयेत्

निर्णयदीपे घंटानिनादोहयसंनिधानंशंबूकशंखंकदलीदलंच।उन्मत्तजात्यर्कहयारिजानिश्राद्धस्यवैगुण्यकराण्यमूनि ॥ हयारिजंमहिषीक्षीरादि। **अथ श्राद्धदिनकृत्यम् चन्द्रोदयेउशनाः** गोमयोदकैर्भूमिभाजनशौचंकुर्यात् **पराशरः** कांजिकंदधितक्रंचशृतंवाशृतमेवच। पूर्वमेवनदातव्यमेकोद्दिष्टेथ पार्वणे **हेमाद्रौपराशरः** गृहाग्निशिशुदेवानांब्रह्मचारितपस्विनाम्। तावन्न दीयतेकिंचिद्यावत्पिंडान्ननिर्वपेत् ॥ **कौर्मे** तिलानवकिरेत्तत्रसर्वतोबंधयेदजान् **तत्रैवदेवलः** तथैवयंत्रितोदाताप्रातःस्नात्वासहांबरः। आरभेतनवैःपात्रैरन्नारंभंचबांधवैः ॥ अत्रात्मनेपदात्स्वयमेवपाकःकार्यः ॥ अशक्तौपत्न्यातदभावेबांधवैः ॥ ततस्तुनिपपाचाशुसीताजनकनंतिनीतिपाद्मलिंगादिति हेमाद्रिः **श्राद्धदीपकलिकायामाश्वलायनः** समानप्रवरैर्मित्रैःसपिंडैश्चगुणान्वितैः। कृतोपकारिभिश्चैवपाककार्यप्रशस्यते **व्यासः**गृहिणीचैवसुस्नातापाकंकुर्यात्प्रयत्नतः। निष्पन्नेषुचपाकेषुपुनःस्नानंसमाचरेत् **पृथ्वीचंद्रोदयेब्राह्मे** रजस्वलांचपाखंडांपुंश्चलींपतितांतथा॥त्यजेच्छूद्रांतथावंध्यांविधवांचान्यगोत्रजाम् ॥ व्यंगकर्णींचतुर्थाह्नःस्नातामपिरजस्वलाम् वर्जयेच्छ्राद्धपाकार्थममातृपितृवंशजाम्॥ मातृपितृवंशजभिन्नांत्यजेदित्यर्थः **स्मृतिसारे** नपाकंकारयेत्पुत्रीमन्यांवाप्यन्यगोत्रजाम्। मृतवंध्यांचगर्भघ्नीं गर्भिणीं चैवदुर्मुखीम् **पाकभांडानितुहेमाद्रौनागरखंडे** सौवर्णान्यथरौप्याणिकांस्यताम्रोद्भवानिच। मार्तिक्यान्यपिभव्यानि नूतनानिदृढानिच **तत्रैवादित्यपुराणे** पचेदन्नानिसुस्नातःपात्रेषुशुचिषुस्वयं। स्वर्णादिधातुजातेषुमृन्मयेष्वपिवाद्विजः ॥ अच्छिद्रेष्वविलिप्तेषुतथानुपहतेषुच। नायसेषुनभिन्नेषुदूषितेष्वपिकर्हिचित् पूर्वकृतोपयोगेषु मृन्मयेषुनतुक्वचित् **वायुपुराणे** न कदाचित्पचेदन्नमयस्थालीषुपैतृकं। अयसोदर्शनादेवपितरोपिद्रवन्तिहि ॥ कालायसंविशेषेणनिंदंतिपितृकर्मणि। फलानांचैवशाकानांछेदनार्थानियानितु ॥ महानसेपिशस्त्राणितेषामेवहिसन्निधिः। इष्यतेनेतरस्यात्रशस्त्रमात्रस्यदर्शनं ॥ श्राद्धदेशेतुविदुषापितॄणांतृप्तिमिच्छता ॥ महानसेपियुक्ता

नामपिकार्यनदर्शनम् **तत्रैव** पचमानस्तुभाण्डेषुभक्तयाताम्रमयेषुच । समु द्धरतिवैघोरात् पितृन्दुःखमहार्णवात् ॥ तैजसानामभावेतुपिठरेमृन्मयेपि च । नवेशुचौप्रकुर्व्वीतपाकंपित्रर्त्थमादरात् **तत्रैवादित्यपुराणे** पक्वान्न स्थापनार्थेतुशस्यन्तेदारुजान्यपि । दर्व्यादीन्यपिकार्याणियज्ञियैरपिदारुभिः **यमः**विवाहेप्रेतकार्य्येचमातापित्रोःक्षयेहनि । नवभाण्डानिकुर्वीतयज्ञकाले विशेषतः **अथपाकाग्निः हेमाद्रौप्रजापतिः**औपासनेनान्नसिद्धिरग्नौकरण मेवच **पृथ्वीचंद्रोदयेंगिराः** शालाग्नौतुपचेदन्नंलौकिकेवापिनित्यशः । य स्मिन्नग्नौपचेदन्नंतस्मिन्होमोविधीयते **मनुः** वैवाहिकेग्नौकुर्वीतगृह्यंकर्मयथा विधि । पंचयज्ञविधानंचपंक्तिञ्चान्वाहिकींद्विजः ॥ श्राद्धस्यगृह्यत्वंचोक्तम परार्केण **अत्रविशेषःकर्मप्रदीपे** प्रातर्होमन्तुनिर्वर्त्यसमुद्धृत्यहुताशनात् । शेषंमहानसेकृत्वातत्रपाकंसमाचरेत् ॥ पाकांतेग्निंतमाहृत्यगृह्याग्नौतुपुनः क्षिपेत । ततोस्मिन्वैश्वदेवादिकर्मकुर्यादतंद्रितः ॥ तदभावेलौकिके । ततः पचेयुरन्नानिनिर्वापानंतरंशनैः । वैवाहिकेग्नावन्यत्रलौकिकेवापिसंयतइ तिकलिकायांसंग्रहोक्तेः ॥ पित्रर्थंनिर्वापंकृत्वेत्यर्थः **अतएवहेमाद्रौवायुपु राणे** पित्रर्त्थंनिर्वपेद्भूमौकूर्चेवादर्भसंस्कृते **तत्रैवपाद्मेमात्स्ययोः** अग्निमा न्निर्वपेत्पैत्रंचरुंवासममुष्टिभिः । पितृभ्योनिर्वपामीतिसर्वदक्षिणतोन्यसेत् ॥ चरुग्रहणान्नशाकादाविहेमाद्रिः ॥ पिण्डपितृयज्ञार्थपाकविषयोयंनिर्वाप इतितुयुक्तं ॥ अयंचेतरेषामग्निः ॥ आश्वलायनानान्तुगुरुणाभिमृताअन्य तोवापक्षीयमाणाअमावास्यायां शान्तिकर्म्मकुर्वीरन्नित्यादिसूत्रेण पचनाग्ने स्त्यागमुक्त्वा इहैवायमितरोजातवेदाइत्यर्धर्चेन शमीमयीभ्यामरणिभ्याम ग्निंमंथेत्सपचनाग्निर्भवतीतिसूत्रेवृत्तौचोक्तेः ॥ पचनाग्नावेवपाकः ॥ बौधाय नेनाप्युक्तंआहृतपचनाग्निमौपासनंवाभिप्रव्रजन्तीति ॥ स्मार्त्ताग्नौपाकस्त्व न्यशाखाविषयइतिकेचित् ॥ वस्तुतस्तुपूर्वोक्तस्यसर्वाधानविषयत्वंयुक्तम् ॥ शिष्टाचारेपिनपचनोदृश्यते ॥ अण्डविलायामपिसर्वाधानपक्षेवैश्वदेवश्रा द्धंचपचनेकुर्यादन्यथौपानेइत्युक्तं ॥ अग्नौकरणन्तुप्रयोगपारिजातादिभिरा

ब्दिकादिसर्वश्राद्धेषु पिण्डपितृयज्ञव्यतिषंगोक्तेलौकिके पचने वा पाके कृतैपिगृह्याग्नौ पक्कचरुणैव कार्यमिति प्रतिभाति ॥ मदनरत्नेप्येवम् ॥ विधुरोत्सन्नाग्न्यादेस्तुपृष्टोदि विविधानेनाग्निसम्पादनमित्युक्तंहरिहरभाष्ये इतिपाकाग्निः **चन्द्रिकायांमार्कंडेयः** अह्नःषट्सुमुहूर्तेषु गतेषुप्रयतान्द्विजान्। प्रत्येकंप्रेषयेत्तेषां प्रदायामलकोदकम् **देवलः** ततोनिवृत्तेमाध्याह्ने कृत्तरोमनखान्द्विजान्। अभिगम्ययथान्यायंप्रयच्छेद्दंतधावनम् ॥ तैलमभ्यञ्जनंस्नानंस्नानीयंचपृथग्विधम्। पात्रैरौदुंबरैर्दद्याद्वैश्वदेविकपूर्वकम् ॥ औदुम्बरैस्ताम्रययैः अत्रक्षौरामलकस्नानादिनिषिद्धतिथ्यादिव्यतिरिक्तविषयमितिहेमाद्रिर्माधवश्च **यत्तुचन्द्रिकायांप्रचेताः** तैलमुद्वर्तनंस्नानंदद्यात्पूर्वाह्णएवच। श्राद्धभुग्म्योनखश्मश्रुच्छेदनंतुनकारयेदितितन्निषिद्धतिथ्यादिविषयमनिषिद्धतिथ्यादितुप्रागुक्तम् **अभ्यंगेतुकलिकायांकात्यायनः** तैलमुद्वर्तनेदेयेब्राह्मणेभ्यःप्रयत्नतः। तैरभ्यंगश्चकर्तव्योवर्ज्यकालं नचिन्तयेत् **अपरार्केप्रचेताः** स्नातोधिकारीभवतिदैवेपित्र्येचकर्मणि। श्राद्धकृच्छुक्लवासाःस्यान्मौनीचविजितेन्द्रियः **हेमाद्रोजाबालिः** ताम्बूलंदन्तकाष्ठंचस्नेहस्नानमभोजनम्। रत्यौषधंपरान्नानिश्राद्धकर्तावर्जयेत् **वस्त्रेविशेषमाहतत्रैवभृगुः** नग्नःस्यान्मलवद्वासा नग्नःकौपीनकेवलः। द्विकच्छोनुत्तरीयश्चअकच्छोवस्त्रएवच ॥ नग्नःकाषायवासाः स्यान्नग्नश्चार्द्रपटःस्मृतः। नग्नेद्विगुणवस्त्रःस्यान्नग्नोरक्तपटःस्मृतः ॥ नग्नस्तुस्निग्धवस्त्रःस्यान्नग्नः स्यूतपटस्तथा ॥ ततःकर्ताऊर्ध्वपुंड्रंकुर्यात् ॥ जपेहोमेतथादानेस्वाध्यायेपितृकर्माणि। तत्सर्वंनश्यतिक्षिप्रमूर्ध्वपुंड्रंविनाकृतमितिहेमाद्रावुक्तेः ॥ यज्ञोदानंजपोहोमः स्वाध्यायः पितृकर्मच। वृथाभवतिविप्रेंद्राऊर्ध्वपुंड्रं विनाकृतमितिबृहन्नारदीयात् ॥ ऊर्ध्वंचतिलकंकुर्यात्दैवेपित्र्येचकर्मणीतिवृद्धपराशरोक्तेश्च **अन्येतु** ऊर्ध्वपुंड्रं द्विजातीनामग्निहोत्रसमोविधिः। श्राद्धकालेतुसंप्राप्तेकर्ताभोक्ताचतत्त्यजेत् ॥ वामहस्तेचदर्भास्तुगृहेरंगावलिंतथा। ललाटेतिलकंदृष्ट्वानिराशाः पितरोगताइ

तिग्रहोक्तेः ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वाचंद्राकारमथापिवा । श्राद्धकर्तानकुर्वीत यावत्पिंडान्ननिर्वपेदितिविश्वप्रकाशेवचनाच्चनकर्यमित्याहुः ॥ अत्राचारा द्व्यवस्था **अतएवबृहन्नारदीये** ऊर्ध्वपुंड्रंचतुलसींश्राद्धेनेच्छंतिकेचनेति ॥ ऊर्ध्वपुंड्रविधिर्विप्रविषयः ॥ निषेधःकर्तृपरइति पृथ्वीचन्द्रः **यत्तुहेमाद्रौच देवलः** ललाटेपुंड्रकंदृष्ट्वास्कंधेमाल्यंतथैवच ॥ निराशाःपितरोयांतिदृष्ट्वा चवृषलीपतिमितिदृंधेनत्रिपुंड्रविषयम् ॥ प्राक्पिंडदानाद्रंधाद्यैर्नालंकुर्यात्स्वविग्रहमित्याश्वलायनोक्तेः ॥ पुंड्रं वर्तुलमित्यपरार्केमदनरत्नेच ॥ पृथ्वीचंद्रस्तुपुंड्रं त्रिपुंड्रम् ॥ उर्ध्वंचतिलकंकुर्यान्नकुर्याद्वैतिपुंड्रकम् । निराशाःपितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिबृहत्पराशरोक्तेः ॥ भोक्तुस्तिर्यग्ललेपोभवत्येव ॥ वर्जयेत्तिलकंभालेश्राद्धकालेचसर्वदा । तिर्यगप्यूर्ध्वपुंड्रं वा धारयेत्तुप्रयत्नतइतिव्यासोक्तेरित्याह **पृथ्वीचन्द्रोदयेब्राह्मे** सदर्भेणतुहस्तेनयः कुर्यात्तिलकंबुधः । आचम्यसविशुद्धयेतदर्भत्यागेनचैवहि **श्राद्धारंभकालमाहापरार्केगौतमः** आरभ्यकुतपेश्राद्धंकुर्यादारोहणंबुधः । विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेत् ॥ एतदेकोद्दिष्टे **पार्वणेतूक्तंमात्स्ये** ऊर्ध्वमुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् । मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यते **तथा** मध्याह्नेसर्वदायस्मान्मन्दीभवतिभास्करः । तस्मादनंतफलदस्तत्रारम्भोविशिष्यते **अथश्राद्धपरिभाषा चन्द्रिकायांकात्यायनः** दक्षिणांपातयेज्जानुंदेवान्परिचरन्सदा । पातयेदितरंजानुंपितॄन्परिचरन्सदा **बौधायनः** प्रदक्षिणान्तुदेवानांपितॄणामप्रदक्षिणम् । देवानामृजवोदर्भापितॄणांद्विगुणास्तथा **पृथ्वीचन्द्रोदयेशंखः** आवाहनार्घ्यसंकल्पेपिण्डदानान्नदानयोः । पिण्डाभ्यंजनकालेतुतथैवांजनकर्मणि । अक्षय्यासनयोःपाद्यगोत्रंनामप्रकाशयेत् **तत्रैवपरिशिष्टे** क्षणेचपिण्डदानेचगन्धधूपाक्षयेतथा । संकल्पेचासनेदीपे अंजनाभ्यंजनेतथा । अन्नार्घ्यदानाद्यंतेषुगोत्रंनामचकीर्तयेत् **कलिकायांसंग्रहे** आसनावाहनेपाद्येअन्नदानेतथैवच । अक्षय्येपिण्डदानेचषट्सुनामानिकीर्तयेत् **मात्स्ये** सम्बन्धं

प्रथमंब्रूयाद्गोत्रंनामतथैवच । पश्चाद्रूपंविजानीयात्क्रमएषसनातनः **तत्रैव** सकारेणतुवक्तव्यंगोत्रंसर्वत्रधीमता । सकारःकुतपोज्ञेयस्तस्माद्यत्नेनतंवदेत् ॥ यथाकाश्यपसगोत्रेति ॥ पराशरसगोत्रस्यवृद्धस्यतुमहात्मनः । भिक्षोः पंचशिखस्याहंशिष्यःपरमधार्म्मिकइतिमोक्षधर्मेषुप्रयोगाच्च ॥तेनगोत्रसगोत्रयोःपर्यायत्वाच्छाखाभेदाद्व्यवस्थेतिशूलपाणिः ॥ एतद्येषामाम्नातंतेषामेव **हेमाद्रौवृहत्प्रचेताः** गोत्रंस्वरांतंसर्वत्रगोत्रस्याक्षय्यकर्मणि ॥ गोत्रस्तुतर्पणे प्रोक्तएवंदातानमुह्यति ॥ सर्वत्रैवपितःप्रोक्तःपितातर्पणकर्मणि । पितुरक्षय्यकालेतुपित्र्येसंकल्पनेतथा ॥ शर्मन्नर्घ्यादिकेकार्यंशर्मातर्पणकर्मणि । शर्मणोक्षय्यकालेतुपितृणांदत्तमक्षयं । स्वरांतंसम्बुद्ध्यंतमितिहेमाद्रिः **तत्रैवच न्द्रिकायांचस्मृत्यंतरे** गोत्रस्यत्वपरिज्ञानेकाश्यपंगोत्रमुच्यते । यस्मादाहश्रुतिःसर्वःप्रजाःकश्यपसम्भवाः **यत्तुसत्याषाढः** अथानाज्ञातबन्धोःपुरोहितगोत्रेणाचार्यगोत्रेणवेतितद्विवाहपरम् **नामोच्चारणेविशेषमाहहेमाद्रौबौधायनः** शर्मांतंब्राह्मणस्योक्तंवर्मांतंक्षत्रियस्यतु । गुप्तांतंचैववैश्यस्यदासांतंशूद्रजन्मनः**पित्रादिनामाज्ञानेतत्रैव** पृथिवीवात्पितावाच्यस्तत्पिताचांतरिक्षवत् । अभिधानापरिज्ञानेदिविषत्प्रपितामहः ॥ पित्रादीनांनामयदापुत्रैर्नज्ञायतेतदा ॥ आपस्तम्बसूत्रेप्येवम् ॥ एतदन्यशाखापरम् **आश्वलायनानां तूक्तंतत्सूत्रे** यदिनामान्यविद्वांस्तत्पितृपितामहप्रपितामहेतिब्रूयात् **तत्कारिकापि** नामानिचेन्नजानीयात्तत्तेत्यादिवदेत्क्रमात् ॥ तत्तेतिसंबंधमात्रपरम् ॥ तेनपितृव्यादावपितथेतिगौडाः ॥ स्त्रीणांदांतंनामज्ञेयम् ॥ दांतंनाम स्त्रीणामितिपृथ्वीचंद्रोदयेगोभिलोक्तेः ॥ केचिद्देवीशब्दांतमाहुःअन्येतुदेवीदाइतिद्वयोःसमुच्चयमाहुः **हेमाद्रौनारायणः** विभक्तिभिस्तुयत्किंचिद्दीयतेपितृदैवते । तत्सर्वंसफलंज्ञेयंविपरीतंनिरर्थकम् **चंद्रिकास्मृत्यर्थसारयोश्चनारदीये** अक्षय्यासनयोःषष्ठीद्वितीयावाहनेतथा । अन्नदानेचतुर्थीस्याच्छेषाःसंबुद्धयःस्मृताः **यत्तुव्यासः** चतुर्थीचासनेनित्यंसंकल्पेचविधीयते । प्रथमातर्पणेप्रोक्तासम्बुद्धिमपरेजगुरिति ॥ अत्रशाखाभेदाद्व्यवस्थेतिहेमा

द्रिः **हेमाद्रौभृगुः** अर्घ्यावनेजनंपिंडमन्नंप्रत्यवनेजनम्। संबुद्धितत्रकुर्वीतशेषष्ठीविधीयते **तत्रैवमातुर्विशेषोनागरखंडे** मातर्मात्रेतथामातुरासनेकल्पनेक्षये। गोत्रेगोत्रायैगोत्रायाःप्रथमाद्याविभक्तयः **हेमाद्रौप्रभासखंडे** यज्ञोपवीतिनाकार्यदैवंकर्मप्रदक्षिणम्। प्राचीनावीतिनाकार्यपितृकर्माप्रदक्षिणं॥ अनुपनीतस्त्रीशूद्रादेस्तूत्तरीयेणैवसव्यापसव्येज्ञेये॥तस्योपवीतस्थानीयत्वात्॥ अपसव्यंक्रमाद्वस्त्रंकृत्वाकश्चित्सगोत्रजइतिब्राह्मणाब्रूतेतिवाचस्पतिः॥ यत्तुकेचित्॥ सदोपवीतिनाभाव्यमित्यस्यपुरुषार्थत्वात्॥प्राचीनावीतिकालेप्युपवीतांतरेणतत्कार्यमेवेति तन्न॥ विशेषेणबाधात् **जमदग्निः** सूक्तस्तोत्रजपंत्यक्त्वापिंडाघ्राणंचदक्षिणाम्॥ आह्वानंस्वागतंचार्घ्यंविनाचपरिवेषणम्॥ विसर्जनंसौमनस्यमाशिषांप्रार्थनेतथा॥ विप्रप्रदक्षिणांचैवस्वस्तिवाचनकंविना॥ पितृनुद्दिश्यकर्तव्यंप्राचीनावीतिनासदा **हेमाद्रौसंग्रहे** आदौविप्रांघ्रिशौचांतेभ्यर्चनेविकिरेकृते। पिंडानप्यर्चयित्वाचविसर्ज्यब्राह्मणांस्तथा॥ आचमेच्छ्राद्धकर्ताचस्थानेष्वेतेषुसत्पसु।आद्यंतयोर्द्विराचामेच्छेषेषुतुसकृत्सकृत् **तत्रैव** श्राद्धारंभेवसानेचपादशौचार्चनांतयोः। विकिरेपिंडदानेचषट्स्वाचमनमिष्यतेआश्वलायनःदानाध्ययनदेवार्चाजपहोमव्रतादिकान्।नकुर्याच्छ्राद्धदिवसेप्राग्विप्राणांविसर्जनात्॥ एतन्नित्यवर्ज्यमिति बोपदेवः॥इदंविष्णुभिन्नदेवपरम्॥ विष्णोर्निवेदितान्नेनयष्टव्यंदेवतांतरम्। पितृभ्यश्चापितद्देयंतदानंत्यायकल्पते॥ पितृशेषंतुयोदद्याद्धरयेपरमात्मने। रेतोधाःपितरस्तस्यभवंतिक्लेशभागिनइतिस्कांदात्॥ पितरःसर्व्वमनुष्याविष्णुनाशितमश्नन्तीतिश्रुतेः॥ यःश्राद्धकालेहरिभुक्तशेषंददातिभक्त्यापितृदेवतानाम्। तेनैवपिंडांस्तुलसीविमिश्रानाकल्पकोटिंपितरस्तृप्ताइति ब्राह्मोक्तेश्चेतिश्रीधरस्वामिनृसिंहपरिचर्यादयः एतत्सर्वंनिबंधविरोधान्निर्मूलं **अत्रविशेषोहेमाद्रौविष्णुधर्मे** श्राद्धाह्नितुसमभ्यर्च्यनृवराहंजनार्दनम् **शिवपुराणे** पूजयित्वाशिवंभक्त्यापितृश्राद्धंप्रकल्पयेत्॥ पूर्वनिषेधस्तुविहितभिन्नपरः **तथाहेमाद्रौ** देव्यर्चादक्षिणांगादिः पादजान्वंसमूर्धनि। शिरोंसजानुपादेषुवामांगा

दिचपैतृकम् **कलिकायांस्मृत्यंतरे** श्राद्धारंभेतुयेदर्भाःपादशौचेविसर्जयेत् । अर्चनादौतुयेदर्भाउच्छिष्टांतेविसर्ज्जयेत् ॥ मार्ज्जनादौतुयेदर्भाः पिंडोत्थानेविसर्जयेत् । उत्थानादौतुयेदर्भादक्षिणांतेविसर्जयेत् ॥ प्रार्थनादौतुयेदर्भानमस्कारेविसर्जयेत्र **ऊहमाहविष्णुः** मातामहानामप्येवंश्राद्धंकुर्याद्विचक्षणः ॥ मंत्रोहेनयथान्यायं शेषाणांमंत्रवर्जितम् ॥ यथान्यायमितियत्र बहुवचनांतःपितृशब्दस्तत्रसर्व्वपितृवाचित्वान्नोहः ॥ तत्रापिशुंधंतांपितर इत्यत्रोहएव । सर्व्वपितृवाचित्वेउत्तरमंत्रद्वयवैयर्थ्यात् ॥ वहुवचनन्तुनोह्यते ॥ प्रकृतावसमर्थत्वात्पाशानितिवत् ॥ ऋगंतेचनोहः ॥ तस्माद्दर्चं नोहेदितिनिषधात्एकोद्दिष्टेप्येवम् ॥ प्रेतैकोद्दिष्टेत्वेकवन्मंत्रानूहेनैकोद्दिष्टेइतिविष्णूक्तेरूहः ॥ अत्रबहुवचनस्याप्यूहोवचनात् ॥ वृद्ध्यादौतुविशेषं वक्ष्यामः ॥ शेषाणामितिपितृव्याद्येकोद्दिष्टेआवाहनादिमंत्रवर्ज्यंकार्यमितिकल्पतरुः ॥ ऊहयोग्यपितृपदवान्मंत्रएवतत्रनप्रयोज्यः ॥ नतूहः । नापिपितृपदरहितःप्रजोज्यइतिशूलपाणिः ॥ अर्थांतरंचोक्तंप्राक् **बह्वृचकारिकापि** अर्घ्यप्रदानमंत्रेतुमात्रादिपदमावपेत् । शुंधंतामितिपित्रादौमात्रादिपदमावपेत् ॥ मातृश्राद्धेपिंडदानेयेचत्वामत्रान्वित्यत्रनोहइतिवृत्तिकृतः **तथा** मातुः श्राद्धेप्यनूहेनकुर्यात्पिंडानुमंत्रणम् । दशदानमुपस्थानं तद्वत्कार्यमितिस्थितिः ॥ प्रवाहणमनूहेनतद्वत्प्राशनमिष्यते **तथा** आयंतुनस्तिलोसीतिउशंतस्त्वेतियानितु॥अनूह्यःपितृशब्दोत्रपितृसामान्यवाचकः **आपस्तम्बानांतुवक्ष्य ते । हेमाद्रौमार्कण्डेयः** स्नातःस्नातान्समाहूतान् स्वागतेनार्चयेत्पृथक् **कलिकायांनारदीये** प्रायश्चित्तविशुद्धात्मातेभ्योऽनुज्ञांप्रगृह्यच । दद्याद्ब्रह्मदण्डार्थंहिरण्यंकुशमेवच **तत्रैवसंग्रहे** तिथिवारादिकंज्ञात्वा संकल्प्यचयथाविधि । प्राचीनावितिनाकार्य्यसर्वंसंकल्पनादिकम् ॥ सम्बन्धंप्रथमंब्रूवान्नामगोत्रेतथैवच । वस्वातवादिरूपतांचापिस्वपितॄणामनुक्रमात् **पृथ्वीचन्द्रोदयेनारदीये** श्राद्धार्थंसमनुप्राप्तान्विप्रान्भूयोनिमंत्रयेत् ॥ आपस्तंबस्तुपूर्व्वेद्युर्निमंत्रणंपरेद्युर्द्वितीयंतृतीयमामंत्रणमित्याह ॥ यूयंमयानिमंत्रणीयाइति

निवेदनरूपंआद्यम् **तद्विधिमाहशौनकः** गृहीत्वामुकसंज्ञस्यागोत्रस्यचामुकेः श्राद्धेतुवैश्वदेवार्थंकरणीयःक्षणस्त्वया ॥ इत्येवंश्राद्धकृद्ब्रूयाद्दैतथेतिवदेत्तुसः । श्राद्धस्यकर्तासंब्रूयात्तंप्राप्नोतुभवानिति ॥ सवदेत्प्राप्नवानीतिइतरस्तंप्रतिद्विजः ॥ देवौपार्वणेपुरूरवार्द्रवौवाच्यौ ॥ पित्रादेरप्यनेनैववृणीतविधिनाद्विजान् । ततःकर्ताबह्वृचोऽनाहिताग्निःपिण्डपितृयज्ञंपरिस्तरणादीध्माधानांतंकुर्यात् ॥ अर्धाधानिनोप्येवमितिप्रयोगपारिजातेपरिशिष्टेच ॥ भाष्यकारमतेआब्दिकेप्येवम् ॥ वृत्तिकारमतेनेदम् **हेमाद्रौशम्भुः** संमार्जितोपलिप्तेतुद्वारिकुर्वीतमण्डले ॥ उदक्प्लवमुदीच्यंस्याद्दक्षिणंदक्षिणाप्लवम् **व्याघ्रः** उत्तरेक्षतसंयुक्तान्पुर्वाग्रान्विन्यसेत्कुशान् । दक्षिणेदक्षिणाग्रांस्तुसतिलान्विन्यसेत्कुशान् **तत्रैवबौधायनः** चतुरस्रंत्रिकोणंचवर्तुलंचार्धचन्द्रकम् ॥ कर्तव्यमानुपूर्वेणब्राह्मणादिषुमण्डलम् **तत्रैवलौगाक्षिः** हस्तद्वयमितंकार्यंवैश्वदेविकमंडलम्॥ दक्षिणेचचतुर्हस्तंपितृणामंघ्रिशोधने **कलिकायांसंग्रहेतु** प्रादेशमात्रंदेवानां चतुरस्रन्तुमण्डलम् ॥ त्यक्त्वाषडंगुलंतस्माद्दक्षिणेवर्तुलन्तथेत्युक्तम् **स्मृत्यन्तरे** गर्तःपञ्चांगुलोविप्रेजानुमात्रोमहीभुजे । प्रादेशमात्रोश्यवैच साधिकःसतुशूद्रके ॥ तिर्य्यगूर्ध्वप्रमाणेनव्याख्यातोदैवपित्र्ययोः । चतुरस्रंवर्तुलञ्चकथितंगर्तलक्षणम् ॥ पादप्रक्षालनंप्रोक्तमुपवेश्यासनोद्विजान् । तिष्ठंचेत्क्षालनंकुर्य्यान्निराशाःपितरोगताइति तत्समूलत्वेमण्डलाग्रेपृथक्ज्ञेयम् **तत्रगोमयेहेमाद्रौभृगुः** अत्यंतजीर्णदेहाया वन्ध्यायाश्चविशेषतः । आर्त्तायानवसूताया नगोर्गोमयमाहरेत् **मात्स्ये** अक्षताभिःसपुष्पाभिस्तदभ्यर्चापसव्यवत् । विप्राणांक्षालयेत्पादानभिवन्द्यपुनःपुनः प्रत्यङ्मुखःस्थितः कुर्य्याद्विप्रपादाभिषेचनम् **तत्रैव भविष्ये** प्रक्षालयेद्विप्रपादान् शन्नोदेवीरितित्वृचा **पृथिवीचन्द्रोदयेवृद्धवसिष्ठः** नकुशग्रन्थिहस्तस्तुपाद्यंदद्याद्विचक्षणः **कलिकायांसंग्रहे** ततःप्रक्षालयेत्पादौभार्यास्रावितवारिणा **तथा** श्राद्धकालेयदापत्नीवामेनोरप्रदाभवेत् ॥ आसुरन्तद्भवेच्छ्राद्धंपितृणांनोपतिष्ठते **तत्रैव** नाधःप्रक्षालयेत्पादौकर्त्तापित्रा

दिकर्मसु॥पाद्यानंतरमर्घ्यमपिदद्यादितिहेमाद्रिः **तत्रैवलौगाक्षिः** मंडलादुत्त रेदेशेदद्यादाचमनीम्यकत् **तत्रैव** विधायक्षालनंतेषांद्विराचमनमिष्यते। स्वयं चापिद्विराचामेद्विधिज्ञःश्रद्धयन्वितः **हेमाद्रौनारदीये** यत्राचमनवारीणिपा दप्रक्षालनोदकैः। संगच्छंतेबुधाःश्राद्धमासुरंतत्प्रचक्षते **हेमाद्रौव्यासः** सव्ये नैवासनंधृत्वादक्षिणेदक्षिणंकरम्॥व्याहृतीभिःसमस्ताभिरासनेषूपवेशयेत् ॥ समाध्वमितिचैवोक्त्वादक्षिणंजानुसंस्पृशन् । आस्यतामिति तान्ब्रूयादासनं संस्पृशन्नपि **हेमाद्रौशातातपः** द्वौदैवेथर्वणोविप्रौप्राङ्मुखावुपवेशयेत् । पित्र्येतूदमुङ्खस्त्रिश्चबह्वृचाध्वर्युसामगान् **याज्ञवल्क्यः** द्वौदैवेप्राक्त्रयःपि त्र्येउदगेकैकमेववा **यत्तुहेमाद्रौहारीतः** दक्षिणाग्रदर्भेषुप्राङ्मुखान्भोजये दुदङ्मुखानित्येकेइतितन्मैत्रायणीयविषयम् ॥ प्राङ्मुखान्भोजयेदुदङ्मु खानित्येकेइतितत्परिशिष्टात् ॥ विकल्पइतिहेमाद्रिः **माधवीयेयमः** भिक्षु कोब्रह्मचारीवाभोजनार्थमुपस्थितः । उपविष्टेष्वनुप्राप्तःकामंतमभिभोजयेत् **कौर्मे** अतिथिर्यस्यनाश्नातिनतच्छ्राद्धंप्रचक्षते **विप्रनियमोमाधवीये** पवि त्रपाणयःसर्वेतेचमौनव्रतान्विताः ॥ उच्छिष्टोच्छिष्टसंस्पर्शंवर्जयंतःपरस्पर म् **तत्रासनानिपृथ्वीचंद्रोदयेयमः** आसनंकुतुपंदद्यादितरद्वापवित्रकम् **हेमाद्रौचमत्कारखंडे** पितॄणांघटितंहैमंराजतंवापिचासनम् ॥ येनताम्रमयं दत्तमासनंपितृकर्मणि ॥ सवैदिव्यासनारूढोनहिप्रच्यवतेदिवः **हेमाद्रौना गरखंडे** अयःशंकुमयंपीठंप्रदेयंनोपवेशने **कलिकायांसंग्रहे** क्षौमंदुकूलंनै पालमाविकंदारुजंतथा ॥ तार्णपार्णबृसींचैवविष्टरादिचविन्यसेत् ॥ अग्नि दग्धान्यायसानिभग्नानिचविवर्जयेत् **हेमाद्रौछागलेयः** पश्चाद्भागादुपक्रम्य प्राच्यांपंक्तिर्यथाभवेत् ॥ दक्षिणासंस्थिताह्येषापितॄणांश्राद्धकर्मणि **पुलस्त्यः** श्रीपर्णीवारुणीक्षीरीजंबुकाम्रकदंबकम् । सप्तमंवाकुलंपीठंपितॄणांदत्तमक्षयं **संग्रहे** शमीचकाश्मरीशेलुःकदंबोवारुणस्तथा । पंचासनानिशस्तानिश्रा द्धेदेवार्चनेतथा **कारिका** द्वौदैवेप्राङ्मुखौपित्र्येत्रीन्विप्रानुदगाननान् **पैठी नसिः** कुतपःश्राद्धवेलायांश्रोत्रियोयदिदृश्यते **आश्वलायनः** नीवीवासो

दशांतेनस्वरक्षार्थंप्रबंधयेत् **वृद्धयाज्ञवल्क्यस्तु** दक्षिणेकटिदेशेतुतिलैःसह कुशत्रयम् **यस्तुकातीयम्** नीवीकार्यादशागुप्तिर्वामकुक्षौकुशैःसहेतितद्वद्धिश्राद्धे ॥ पितॄणांदक्षिणेपार्श्वेविपरीतातुदैविकइतिस्मृत्यंतरात् ॥ वामेदक्षिणेवेत्याचाराद्व्यवस्थेतिमदनपारिजाते **आचार्यः** प्राणायामत्रयंकृत्वागायत्रीस्मरणंतथा । श्राद्धंकर्तास्मीतिवदेद्विप्रैर्वाच्यंकुरुष्वच **ब्राह्मे** ततस्तिलान् गृहेतस्मिन्विकिरेच्चप्रदक्षिणम् । श्रद्धयापरयायुक्तोजपेदपहताइति **स्मृत्यर्थसारे** अपहताइतितिलान्विकीर्यउदीरतामित्यृचाप्रोक्षेत् **पराशरः** तद्विष्णोरितिमंत्रेणगायत्र्याचप्रयत्नतः । प्रोक्षयेदन्नजातंतुशूद्रदृष्ट्यादिशुद्धये **हेमाद्रौब्रह्मांडे** श्राद्धभूमौगयांध्यात्वाध्यात्वादेवंगदाधरम् । वस्वादींश्च पितॄन्ध्यात्वाततः श्राद्धंप्रवर्तते ॥ देवताभ्यःपितृभ्यश्चमहायोगिभ्यएवच । नमःस्वाहायैस्वधायैनित्यमेवनमोनमः ॥ आदिमध्यावसानेषुत्रिरावृत्तंजपेद्बुधः । पितरःक्षिप्रमायातिराक्षसाःप्रवदंतिच **तत्रैवस्कांदे** तिलारक्षंत्वसुरान्दर्भारक्षंतुराक्षसान् । पंक्तिवैश्रोत्रियोरक्षेदतिथिःसर्वरक्षकः **वसिष्ठः** शुद्धवतीभिःकूष्मांडीभिःपावमानीभिश्चपाकादिप्रोक्षयेत् **अथदेवार्चा** तत्रप्रत्युपचारमाद्यंतयोरपोदद्यादित्युक्तंवृत्तौस्मृत्यर्थसारेच **हेमाद्रौब्राह्मे** आसनेष्वासनन्दद्याद्धामेवादक्षिणेपिवा । पितृकर्मणिवामेचदैवेदद्यात्तुदक्षिणे **प्रचेताः** आसनेष्वासनंदद्यान्नतुपाणौकदाचन । धर्मोसीत्यथमंत्रेणगृह्णीयुस्तेतुतान्कुशान् ॥ धर्मोसिविश्वराजाप्रतिष्ठितइतिमंत्रः **गालवः** दर्भानादायहस्ताभ्यां गृहीत्वादक्षिणेकरे । दैवेक्षणःक्रीयतांतुनिरंगुष्ठंकरंततः । ओंतथेतिद्विजाब्रूयुस्तेप्राप्नोतुभवानिति ॥ कर्ताब्रूयात्ततोविप्रःप्राप्नवानीतिवैवदेत् **पृथ्वीचन्द्रोदयेबृहन्नारदीये** यवैर्दर्भैश्चविश्वेषांदेवानामिदमासनम् । दत्वेतिभूयोद्याद्वैदेवेक्षणइतिक्षणम् ॥ तच्चषष्ठ्याचतुर्थ्यावाकार्यमितिसएव ॥ ततोर्घ्यं कल्पयेदितिमन्वादयः ॥ शौनकजयंताभ्यामर्घ्यरहितस्यदेवार्चनस्योक्तेः आश्वलायनानांदैवेर्घ्यदानंबोपदेवस्तन्न ॥ परिशिष्टप्रयोगपारिजातविरोधात् ॥ वृद्धिश्राद्धेतुदैवेप्यर्घ्यंदद्यात् ॥ देवेभ्योपिपृथङ्न्द्यादित्याहार्घ्यश्रुति

चोदनादिति शौनकोक्तेः **अथार्घ्यपात्रंपृथ्वीचन्द्रोदये**मात्स्यपाद्मयोः पात्रंवनस्पतिमयंतथापर्णमयंपुनः । जलजंवापिकुर्वीततथासागरसंभवम् **ब्राह्मे** सौवर्णताम्ररौप्याश्मस्फाटिकंशंखशुक्तयः । भिन्नान्यपिहियोज्यानि पात्राणिपितृकर्मणि **हेमाद्रौप्रजापतिः** सौवर्णराजतंताम्रम् खड्गंमणिमयं तथा । यज्ञियंचसमंवापिअर्घ्यार्थंपूरयेद्बुधः ॥ अत्रविप्रैकत्वद्वित्वच्चचतुष्ट्वादावर्घ्यपात्रेद्वेएव ॥ मानवसूत्रेतुद्वेवैश्वदेविकेत्रीणिपित्र्येएकैकमुभयत्रचेत्युक्तंतदेकविप्रपरम् ॥ पात्रालाभपरंचेतिहेमाद्रिः ॥ मदनरत्नेतुदैवेएकपात्रमुक्तम् ॥ पृथ्वीचन्द्रोदयेपित्रीणिपैतृकपात्राणि द्वेदेवे वैश्वदेविकइति बृहत्पराशरोक्तेर्द्वेएवेत्याह ॥ बह्वृचानांतुदैवेविप्रद्वित्वेप्येकमर्घ्यपात्रमर्घशोदद्यादित्युक्तंपरिशिष्टेप्रयोगपारिजातेच **कलिकायांहारीतः** दत्तमक्षय्यतां यातिखड्गेनार्घ्यंतुयत्कृतम **वृद्धमनुः** मृन्मयंदारुजंपात्रमयःपात्रंचयद्भवेत् । राजतन्दैविकेकार्येशिलापात्रंचवर्जयेत् **पुराणसमुच्चये** मृत्स्नाभवंतथाकांस्यमारक्तंजतुसंभवम् । त्रपु सीसलोहभवंसदापात्रंविवर्जयेत् **तत्रैव** अष्टांगुलंभवेत्पात्रंपितॄणांराजतंशुभम् । दशांगुलंतुदेवानांसौवर्णशक्तितःकृतम् ॥ स्थापयेदर्घ्यपात्रेद्वेन्युब्जेतत्रकुशोपरि । द्वेद्वेपवित्रेविधिवत्पात्रयोश्चोपरिक्षिपेत् **यज्ञपार्श्वः** पवित्रस्येतिमंत्रेणपवित्रेछेदयेत्तुते । ओषधीमंतरेकृत्वाअंगुष्ठांगुलिपर्वणोः । स्फ्येनकाष्ठेनलोहेनमृन्मयेननखादिभिः **वसिष्ठः** तूष्णीं प्रोक्ष्यांभसापात्रेकुर्यादूर्ध्वंबिलेततः । पूरयेत्पात्रयुग्मंतुकृत्वोपरिपवित्रके **वृद्धपराशरः** पात्रद्वयमथार्घ्यार्थंतैजसंचैकवस्तुनः । प्राङ्मुखोमरतीर्थेनशन्नोदेव्योदकंक्षिपेत् । यवोसीतियवांस्तत्रतूष्णींपुष्पाणिचंदनम् **मानवसूत्रे** सुमनसःप्रक्षिप्योत्पूययवान्प्रक्षिप्येति **यवोसीतिमंत्रःपाद्मे** यवोसिधान्यराजोवावारुणोमधुमिश्रितः । निर्णोदःसर्वपापानांपवित्रमृषिभिः स्मृतः ॥ राजोवावारुणोमधुसंयुतइतिपरिशिष्टपाठः ॥ गोभिलेनतुयवोसिसोमदैवत्यइतितिलमंत्रोत्रस्वाहायुक्तउक्तः **हेमाद्रौयमः** यत्रहस्तस्ततोदेवान्विज्ञाप्यावाहनंप्रति । आवाहयेत्यनुज्ञातोविश्वेदेवासइत्यृचा **वृद्धपराशरः** ततःसव्य

करंन्यस्यविप्रदक्षिणजानुषु । देवानावाहयिष्येहमितिवाचमुदीरयेत् ॥ आवाहयेत्यनुज्ञातो विश्वेदेवासआगतः। विश्वेदेवाःशृणुतेममितिमंत्रद्वयंपठेत् **श्राद्धविशेषेविश्वेदेवानामज्ञाने हेमाद्रौबृहस्पतिः** उत्पत्तिनामचैतेषांन विदुर्येद्विजातयः । अयमुच्चारणीयस्तैर्मंत्रःश्रद्धासमन्वितैः ॥ आगच्छंतु महाभागाविश्वेदेवामहाबलाः। येअत्रविहिताःश्राद्धेसावधानाभवंतुते॥इदंचा वाहनमर्घ्यपात्रासादनात्प्राक्हेमाद्रिणोक्तम् ॥ तत्रकातीयैःप्राक्कार्यंतथैवत त्सूत्रात् ॥ अन्यैस्तदुत्तरम् **पृथ्वीचंद्रोदयेशंखः** सयवंपुष्पमादायचरणादि शिरोंतिकम्। अर्चतेत्यर्चनंकुर्यादंतरेचोदकंतथा। पित्र्येतुमूर्द्धादिपादांतम् ॥ पादप्रभृतिमूर्द्धांतंदैविकेपूजनंभवेत् । शिरःप्रभृतिपादांतंनमोवइतिपैतृके इतिमदनरत्नेप्रचेतसोक्तेः **कलिकायांसंग्रहे** तिष्ठन्कृतांजलिर्भूत्वापठेन्मं त्रंसमाहितः । विश्वेदेवाःशृणुतेइत्यागच्छत्वपरंततः **हेमाद्रौजातूकर्ण्यः** ततोर्घ्यपात्रसंपत्तिंवाचयित्वाद्विजोत्तमान् । तदग्रेचार्घ्यपात्रंतुस्वाहार्घ्याइति विन्यसेत् **गार्ग्यः** दत्वाहस्तेपवित्रंचकृत्वापूजांचपादतः । यादिव्याइतिमं त्रेणहस्तेष्वर्घ्यंविनिक्षिपेत् **संग्रहे** विश्वेदेवाइदंवोर्घ्यमितिदानंसमादिशेत् । तदंतेस्वाहानमइतिवाच्यम् ॥ यादिव्याइतिमंत्रेणस्वाहाकारंनमोंतकमिति **हेमाद्रौनागरखंडात् आथर्वणसूत्रेतु** पाद्यमर्घ्यमाचमनीयमितिद्विजकरे निनयेदित्यस्यैवत्रयमुक्तम् **गर्भास्तिः** अर्घ्यंचपिंडदानंचस्वस्त्यक्षय्येतथैव च । गंधपुष्पादिकंसर्वंहस्तेनैवतुदापयेत् ॥ प्रतिविप्रंयादिव्येत्यावृत्तिः ॥ बह्वृचानांत्वनेनदत्ताघ्यानुमंत्रणम् ॥ ततःपात्रंदक्षिणेदेवेभ्यःस्थानमसीतिन्यु ब्जमुत्तानंवाकार्यमितिगारुडेउक्तम् ॥ एतदापस्तंबानांनियतमन्येषान्न **हे माद्रौविष्णुधर्मे** गंधैःपुष्पैश्चधूपैश्चवस्त्रैश्चप्यथभूषणैः । अर्चयेद्ब्राह्म णान्शक्त्याश्रद्दधानःसमाहितः **पृथ्वीचंद्रोदयेमार्कंडेयः** चंदनागरुकर्पू रकुंकुमानिप्रदापयेत् **विष्णुः** चंदनकुंकुमकर्पूरागरुपद्मकान्यनुलेपनायैति **यासः** अपवित्रकरोगंधैर्गंधद्वारेतिपूजयेत् **कलिकायांस्मृतिः** गंधद्वारे तिवैगंधमायनेतेचपुष्पकम् । धूरसीत्यमुनाधूपमुद्दीप्यस्वेतिदीपकम् ॥ युवं

वस्त्राणिमंत्रेणवस्त्रंदद्यात्प्रयत्नतः । आसनेस्वासनंब्रूयादर्घ्येस्वर्घ्यंद्विजोत्तमः ॥ सुगंधिश्चसुपुष्पाणिसुमाल्यानिसुधूपकः सुज्योतिश्चैवदीपेतुस्वाच्छादनमितिक्रमः ॥ विप्राणागंधेनवर्तूलंत्रिपुंड्रं वानकार्यम् **हेमाद्रौ** देवलः ललाटेपुंड्रकंदृष्ट्वास्कंधेमालांतथैवच । निराशाः पितरोयांतिदृष्ट्वाचवृषलीपतिम् ॥ पुंड्रंवर्तुलमित्यपरकैमदनरत्नेच । पुंड्रंत्रिपुंड्रंवर्तुलमर्धचंद्रंच ॥ ऊर्ध्वंचतिलकंकुर्यान्नकुर्याद्वैत्रिपुंड्रकं ॥ ऊर्ध्वंचतिलकंकुर्याद्वैवेपित्र्येचकर्मणि । निराशाः पितरोयांतिदृष्ट्वाचैवत्रिपुंड्रकमितिवृद्धपराशरोक्तेस्तिर्यग्लेपोभवत्येव ॥ वर्जयेत्तिलकंभालेश्राद्धकालेच सर्वदा । तिर्यगप्यूर्ध्वपुंड्रंवाधारयेत्तुप्रयत्नतइतिव्यासोक्तेरितिपृथ्वीचंद्रः **यत्तुबृहन्नारदीये** ऊर्ध्वपुंड्रंचतुलसीश्राद्धेनेच्छंतिकेचनेतितत्कर्तृपरम् **हेमाद्रौब्राह्मे** पूतिकंमृगनाभिंचरोचनंरक्तचंदनम् । कालेयकंतूग्रगंधंतुरुष्कंचापिवर्जयेत् ॥ कस्तूर्यौविकल्पइतिहेमाद्रिः **वृद्धशातातपः**पवित्रंतुकरेकृत्वायःसमालभतेद्विजान् । राक्षसानांभवेच्छ्राद्धंनिराशैःपितृभिर्गतैः **पुष्पंतुब्राह्मे** जातीचंपकलोध्राश्वमल्लिकाबाणबर्बरी । चूताशोकाठरूषंचतुलसीशतपत्रकं ॥ कुब्जकंतगरंचैवभृंगमारण्यकेतकी । यूथिकामतिमुक्तंचश्राद्धेयोग्यानिभोद्विजाः ॥ कमलंकुमुदंपद्मंपुंडरीकंचयत्नतः ॥ इंदीवरंकोकनदंकह्लारंचनिवेदयेत् **हेमाद्रौवायुभविष्ययोः** सुकुमारैःकिसलयैर्यवदूर्वाकुरैरपि । संपूजनीयाःपितरःश्रेयस्कामेनसर्वदा **स्कांदे** जातिश्चसर्वादातव्याम ल्लिकाश्वेतयूथिका । जलोद्भवानिसर्वाणिकुसुमानिचचंपकम् **तत्रैववृद्धमनुः** ननियुक्तःशिखावर्ज्यमाल्यंशिरासिधारयेत् **वर्ज्यानिपृथ्वीचंद्रोदयेभविष्ये** केतकीतुलसीपत्रंबिल्वपत्रंचवर्जयेत् । द्रौणंचकरवीरंच धत्तूरंकिंशुकंतथा **माधवीयेस्मृत्यर्थसारेतुलसीनिषिद्धा** तुलसीनिषेधोनिर्मूलइतिहेमाद्रिः समूलत्वेपिपिंडपरः ॥ तुलसीगंधमाघ्रायपितरस्तुष्टमानसाः । प्रयांतिगरुडारूढास्तत्पदंचक्रपाणिनइतिप्रयोगपारिजातेपाद्मोक्तेरितिबोपदेवः **वृद्धपराशरः**नजातीकुसुमैर्विद्वान्बिल्वपत्रैश्चनार्चयेत् । जपादिकुसुमंझिंटीरू

षिकासकुरंटिका॥पुष्पाणिवर्जनीयानिश्राद्धकर्मणिनित्यशः **हेमाद्रौशंखः** उ
ग्रगंधीन्यगंधीनिचैत्यवृक्षोद्भवानिच पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच॥
जलोद्भवानिदेयानिरक्तान्यपिविशेषतः **अंगिराः** नजातीकुसुमानिदद्यान्न
कदलीपत्रमितिजात्यांविकल्पइतिहेमाद्रिः ॥ निषेधःपिंडविषयः ॥ कुंदंशं
भौचनोदद्यान्नोन्मत्तंगरुडध्वजे । पिंडेजांतीचनोदद्याद्देवीमर्केणनार्चयेदिति
वृद्धयाज्ञवल्क्योक्तेरितिबोपदेवः **स्मृतिसारे** आगस्त्यंभृंगराजंचतुलसीशत
पात्रिका । चंपकंतिलपुष्पंचषडेतेपितृवल्लभाः ॥ केतकींकरवीरंचबकुलंकुंद
कंतथा । पाटलांचैवजातींचश्राद्धेयत्नेनवर्जयेत् **केचित्पिंडेतुलसीमाहुः**
पितृपिंडार्चनंश्राद्धेयैःकृतंतुलसीदलैः ॥ प्रीणीताःपितरस्तैस्तुयावच्चंद्रार्कमे
दिनीति मार्कंडेयोक्तेः **धूपस्तत्रैवविष्णुधर्मे** धूपस्तुगुग्गुलुर्देयस्तथाचंदनसा
रजः । अगरुश्चसकर्पूरस्तुरुष्कस्त्वक्तथैवच **विष्णुः** घृतमधुयुक्तंगुग्गुलुं
श्रीखंडदेवदारुसरलादिदद्यादिति **तत्रैवदेवलः** येहिप्राण्यंगजाधूपाहस्तवा
ताहताश्चये ॥ नतेश्राद्धेनियोक्तव्यायेचकेचोग्रगंधयः ॥ घृतंनकेवलंदद्याद्दृ
ष्ट्वातृणगुग्गुलुम् **दीपमाहविष्णुः** घृतेनदीपोदातव्यस्तिलतैलेनवापुनः ।
वसामेदोद्भवंदीपंप्रयत्नेनविवर्जयेत् **वस्त्रंब्राह्मे** कौशेयंक्षौमकार्पासंदुकूलम
हतंतथा । श्राद्धेष्वेतानियोदद्यात्कामानाप्नोतिचोत्तमान् **हेमाद्रौब्रह्मवैवर्ते**
यज्ञोपवीतंदातव्यंवस्त्राभावेविजानता । पितृभ्योवस्त्रदानस्यफलंतन्नाश्नुतेखि
लम् **तत्रैवपाद्मे** निष्क्रयोवायथाशक्तिवस्त्राभावेप्रदीपयते । अन्यान्यपिच
देयानि **तत्रैवकालिकापुराणे** धात्वादिनिर्मितारम्यादीपिकाःश्राद्धक
र्मणि । पितॄनुद्दिश्ययोदद्यात्सभवेद्राजनांश्रियः ॥ योधूपदानपात्रंतु पात्र
मारार्तिकस्यच । दद्यात्पितृभ्यःप्रयतस्तस्यस्वर्गेक्षयागतिः **विष्णुधर्मे** यः
कंचुकंतथोष्णीषंपितृभ्यःप्रतिपादयेत् । ज्वरोद्भवानिदुःखानिसकदाचिन्न
पश्यति । स्त्रीणांश्राद्धेतुसिंदूरंदद्युश्चंडातकानिच ॥ निमंत्रिताभ्यःस्त्रीभ्योये
तेस्युःसौभाग्यसंयुताः **हेमाद्रावादित्यपुराणे** नकृष्णवर्णंदातव्यंनापिकार्पा
ससंभवम् । पितृभ्योनापिमालिनंनोपयुक्तंकदाचन ॥ नच्छिद्रितंनापदशं

नधौतंकारुणापिच । कार्पासनिषेधोन्यसंभवे **तत्रैव** पितॄन्सत्कृत्यवासो भिर्दद्याद्यज्ञोपवीतकम् । यज्ञोपवीतदानेनविनाश्राद्धंतुनिष्फलम् ॥ एतद्य तिस्त्रीशूद्रश्राद्धेपिदेयमितिहेमाद्रिः **तत्रैवनृसिंहपुराणे** कमंडलुंताम्रमयंश्रा द्धेषुप्रददातियः ॥ काष्ठेननिर्मितंवापिनारिकेलमथापिवा ॥ दद्यात्कमंडलुं श्राद्धेसःश्रीमानभिजायते । योमृत्तिकाविरचितान्श्राद्धेषुचघटान्शुभान् ॥ प्र दद्यात्करकान्वापिसोऽक्षयंविंदतेसुखम् **तत्रैव** उपानच्छत्रवस्त्राणिभुक्तिपात्रं कमंडलुम्।शयनासनयानानिदर्पणव्यजनानिच॥अन्नंसुसंस्कृतंगंधांस्तांबूलं दीपचामरम्।पितृभ्योयःप्रयच्छेत्तुविष्णुलोकंसगच्छति **सौरपुराणे** चामरंता लवृन्तंचश्वेतच्छत्रंचदर्पणम् दत्वापितॄणामेतानिभूमिपालोभवेदिह **तत्रैवनं दिपुराणे** अलंकाराःप्रदातव्यायथाशक्तिहिरण्मयाः ॥ केयूरहारकटकमुद्रि काकुंडलादयः **तथा** स्त्रीश्राद्धेषुप्रदेयाःस्युरलंकारास्तुयोषिताम् । मंजीर मेखलादामकणिकाकंणादयः ॥ आदर्शव्यजनच्छत्रशयनासनपादुकाः ॥ मनोज्ञाःपट्टवासाश्चसुगंधाश्चूर्णदृष्टयः । अंगारधानिकाःशीतेयोगपट्टाश्चदृष्ट यः ॥ कटिसूत्राणिरौप्याणिमेखलाश्चैवकंबलाः ॥ कर्पूरादेश्चभांडानितांबू लायतनंतथा ॥ भोजनाधारयंत्राणिपतद्ग्राहांस्तथैवच । तथांजनशलाकाश्च केशानांचप्रसाधनम् ॥ एतान्दद्यात्तुयःसम्यक्सोश्वमेधफलंलभेत् **स्कांदे** सौवर्णीराजतंवापिकांस्येनाप्यथनिर्मितम् । दत्वाभोजनपात्रंतुसम्राट्भवति भूतले ॥ **वामनपुराणे** बंदीकृतास्तुयेकेचित्स्वयंवायदिवापरैः ॥ येनकेना नाप्युपायेनयस्तान्मोचयतेनरः ॥ पितरस्तस्यगच्छंतिशाश्वतंपदमव्ययम् **पराशरः** वाचयेत्परिपूर्णत्वंवासोदत्वाविधानतः **नारदीये** देवैश्चसमनुज्ञातो यजेत्पितृगणंत्वथ ॥ तत्रपित्र्येआसनाद्यशेषमर्चनकांडेवैश्वदेविकंज्ञेयम् **वि शेषस्तूच्यते ॥ तत्रासनेद्विगुणभुग्नाःकुशाः** अत्रावाहनमासनात्पूर्ववार्घ्य पूरणोत्तरंवाग्नौकरणोत्तरंवेतिस्मृतिषुपक्षाउक्ताः॥एषांशाखाभेदेनव्यवस्था॥ द्वितीयपक्षएवबहुसंमतः **तत्रार्घ्यमाश्वलायनः** तैजसाश्ममयमृन्मयेषुत्रि षुपात्रेष्वेकद्रव्येषुवादर्भातर्हितेष्वपःप्रसिच्य शन्नोदेवीरित्यनुमंत्र्यतिलाना

वपति । तिलोसिसोमदेवत्योगोसवेदेवनिर्मितः । प्रत्नवद्भिः प्रत्तस्वधयापितृ निमांल्लोकान्प्रीणयाहिनःस्वधानमइति ॥ अश्ममयंस्फाटिकादिमृन्मयंहस्त कृतमेव ॥ कुलालचक्रनिष्पन्नमासुरंदैविकंनतत् ॥ तदेवहस्तघटितंदैविकं केवलंतथेतिछंदोगपरिशिष्टात् ॥ **अन्यान्यपिपात्राणिपूर्वमुक्तानिमनुः** अन्नाभावेद्विजाभावेयद्येकोब्राह्मणोभवेत् ॥ पात्राण्यासादयेत्रीणिनतुब्राह्मण संख्यया ॥ दत्तकादेःकर्तुर्द्वैपितृत्त्वादावपिवचनात् ॥ त्रीण्येवपात्राणीतिहारि हरः **माधवीयेवैजवापः** अर्घ्येपितृणांत्रीण्येवकुर्य्यात्पात्राणिधर्म्मवित् ॥ एकस्मिन्वाबहुषुवाब्राह्मणेषुयथाविधि ॥ हेमाद्रावप्येवम् ॥ अत्रानुमंत्रणंस कृत् ॥ तिलोसीत्यस्यप्रतिपात्रमावृत्तिःपितृशब्दस्यानूहश्चेतिवृत्तिकृत ॥ द र्भश्चत्रिगुणंपवित्रम् ॥ तिस्रः तिस्रःशलाकास्तुपितृपात्रेषुपार्वणे । एकोद्दिष्टेश लाकैकां निधायोदकमाहरेदिति हेमाद्रौचतुर्विंशतिमतात् **तत्रैवविष्णुः** द क्षिणाग्रदर्भैषुदक्षिणापवर्गचमसेषुपवित्रांतर्हितेष्वपआसिंचेच्छन्नोदेवीतिमंत्रे णजलसेचनंबह्वृचभिन्नविषयम् ॥ अत्रास्मिन्पक्षेप्रतिपात्रंमंत्रावृत्तिः **कारि कायाम्** गंधपुष्पाणिचैतेषुपात्रेषुप्रक्षिपेदथ **ब्राह्मे** जलंक्षीरंदधिघृतंतिलतंडुल सर्षपान् । कुशाग्रमधुपुष्पाणिदत्वाचामेत्ततःस्वयम् **जातूकर्ण्यः** ततोर्घ्य पात्रसंपत्तिंवाचयित्वाद्विजोत्तमान् ॥ तदग्रेचार्घ्यपात्राणिस्वधार्घ्याइतिवि न्यसेत् ॥ ततस्तिलहस्तोविप्रसव्यजानौदक्षिणकरंन्यस्यावाहनंपृच्छेत् ॥ अ त्रगोत्रसम्बन्धनामानिद्वितीयांतत्त्वंचप्रागुक्तम् **वैजवापगृह्ये** तिष्ठन्पितृना वाहयिष्यामीत्यामंत्र्य **कौर्मे** अपसव्यंततःकृत्वापितृणांदक्षिणामुखःआवाह नंततःकुर्यादुशंतस्त्वेत्यृचाबुधः ॥ आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः । अत्रसव्यस्यापिप्रागुक्तेर्विकल्पः ॥ अत्राद्यमंत्रावृत्त्याऽस्मत्पितरममुकशर्म्मा णममुकगोत्रंवसुरूपमावाहयामीत्युक्त्वामूर्धादिपादांतंतिलान्विकीर्यायंतुनइ तिसर्वांतेसकृज्जपेदितिनिबंधाः ॥ अत्रोपवेशनसंवेशनपाद्यार्घ्याचमनीयान्य पिहेमाद्रिणोक्तानितान्यथर्ववेदिनानियतानिनान्येषाम् ॥ तेषांचप्रपितामहा दिपित्रंतंप्रातिलोम्येनसर्वःप्रयोगः **वाराहे** गंधपुष्पार्चनंकृत्वादद्याद्धस्तेति

लोदकम् **गार्ग्यः** शिरस्तःपादतोवापिसम्यगभ्यर्चयेत्ततः ॥ ततःस्वधार्घ्या इतिपितृपितामहादिविप्राग्रेप्रत्येकंनिवेदयेदितिकारिकायांवृत्तौच **आश्वालायनः**प्रसव्येनेतरपाण्यंगुष्ठांतरेणोपवीतित्वादक्षिणेनवासव्योपगृहीतेनपितरिदंतेअर्घ्यंपितामहेदंतअर्घ्यप्रपितामहेदंतेअर्घ्यमित्यप्पूर्वंताः प्रतिग्राहयिष्यन् सकृत्सकृत्स्वधाअर्घ्याइतिप्रसृष्टाअनुमंत्रयीत ॥ यादिव्याआपःपृथिवीसंबभूवुर्याअंतरिक्ष्याउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियास्तानआपःशंस्योनाभवंतु ॥ अर्घ्यादिप्राग्गंधादेर्यज्ञोपवीतमेव ॥ अर्घ्यदानात्प्रागन्याअपोदद्यात् ॥ यद्यप्यत्रसव्येनदक्षिणेनवार्घ्यंदद्यादित्युक्तं तथापिदक्षिणेनेत्यभिमतोर्थः ॥ कारिकायांवृत्तौचैवम् ॥ पित्रादेस्त्रिभिःपात्रैर्दद्यात् ॥ पितुःस्थानेविप्रत्रयंचेदेकार्घ्यंविभज्यदद्यात् ॥ त्रयाणांस्वधाअर्घ्याइतिसकृन्निवेदनम् ॥ एवंपैतामहादापि ॥ अन्यजलदानमर्घ्यमंत्राश्चप्रतिविप्रमावर्तंते ॥ तेषुगंधादौच प्रतिविप्रंपदार्थानुसमयः काण्डानुसमयोवापित्रादित्रयाणामेकविप्रपक्षेत्रिभिः पात्रैरेकस्यैवार्घ्यंदद्यादितिवृत्तिः **कारिकापि** स्वधाऽर्घ्याइत्यपोर्घ्यास्ताउपवीतीनिवेदयेत् ॥ निवेदनात्प्राक्प्राचीनावीतमेवेत्यर्थः ॥ अर्घ्यसशेषमादायदक्षिणेनतुपाणिना । सव्यहस्तगृहीतेननिनयेत्पितृतीर्थतः ॥ दत्वादत्वानितीतास्तायादिव्यार्चानुमंत्रयेत् **यत्तु** यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेदिति **यच्चवाराहे** तिलांबुनाचापसव्यंदद्यादर्घ्यादिकंद्विजइति **यच्च व्यासः** गोत्रसंबंधनामानिपितृणामनुकीर्तयन् । एकैकस्यतुविप्रस्यअर्घ्यपात्रंविनिक्षिपेदितितद्धह्वृचातिरिक्तविषयम् ॥ ततआचामेत् ॥ एवंमातामहेष्वपि **आश्वलायनः** संस्रवान्समवनीयताभिरद्भिःपुत्रकामोमुखमनक्ति । संस्रवशेषः । संस्रवोहिपरिशिष्टोभवतीतिशतपथश्रुतेः ॥ केचित्तुहस्तगलितांबुवदंति ॥ समवनीयांत्येद्वेपात्रेपितृपात्रंआसिंचेतिवृत्तिः प्रथमेपात्रेसंस्रवान्समवनीयेति कातीयसूत्राच्च ॥ ब्राह्मेतुप्रतिबिंबावलोकनमुक्तम् ॥ स्कांदेत्वायुःकामस्यनेत्रासेचनमुक्तम् ॥ पित्र्यविप्रैःप्राङ्मुखस्यकर्तुरभिषेकःकार्यइतिकेचित् **आश्वलायनः** नोद्धरेत्प्रथमंपात्रंपितृणामर्घ्यपातितम् । आ

365

वृतास्तत्रतिष्ठंतिपितरःशौनकोऽब्रवीत् ॥ यावद्विप्रविसर्जनमितितुर्यपादेय मीयःपाठः **अत्रवृत्तिः** पितृपात्रंसमवनयनदेशान्नचालयेदाश्राद्धसमाप्तेः । यस्मात्तत्रतृतीयपात्रेणावृत्ताइति ॥ यद्वा । प्रथमपात्रमेवन्यग्बिलंकुर्यादिति ॥ कामाभावेपीदमेवशेषप्रतिपादनम् **हेमाद्रौकौर्मे** संस्रवांश्चततःसर्वान्पा त्रेकुर्यात्समाहितः । पितृभ्यःस्थानमसीतिन्युब्जंपात्रंनिधापयेत् **शूलपाणौ यमस्तु** पैतृकंप्रथमंपात्रंतस्मैपैतामहंन्यसेत् । प्रपितामहंततोन्यस्यनोद्धरे न्नचचालयेदित्याह ॥ अथसंस्रवानानीयतृतीयेनाच्छाद्यन्युब्जीकुर्यादितिस र्वैकवाक्यतयार्थइति केचित् **अत्रिः** गंधादिभिस्तदभ्यर्च्यतृतीयेनापि धापयेत् । पितृभ्यःस्थानमसीतिशुचौदेशेऽर्चितेऽर्चयेत् ॥ अर्चनंन्युब्जीकृ तेपितुल्यंन्युब्जमुत्तरतोन्यसेदितिप्रचेतसोक्तेः ॥ सर्वविप्रोत्तरतोन्यसेदिति हेमाद्रिकल्पतरुः ॥ विप्रवामेइतिहलायुधः ॥ कर्तुर्वामेइतिशूलपाणिः ॥ उ त्तानंविवृत्तंवापिपितृपात्रंनतद्भवेदित्युशनसोक्तेर्न्युब्जतैवसाधुः ॥ मातामहा दिसंस्रवानपिपितृपात्रएवगृहीत्वाप्रयाजवतन्त्रेणन्युब्जीकुर्यादिति शूलपाणिः एकोद्दिष्टेतूहेनन्युब्जतेतिपितृभक्तौश्रीदत्तः **यमोपि** स्पृष्टमुत्तानमन्यत्रनीत मुद्धाटितंतथा ॥ पात्रंदृष्ट्वाव्रजंत्याशुपितरस्तंशपंतिच **वैश्वदेवेउत्तानमिति मदनपारिजातःवैजवापः** तस्योपरिकुशान्दत्वाप्रदद्याद्देवपूर्वकंगंधपुष्पा णिधूपंचदीपंवस्त्रोपवीतके ॥ अत्रगंधादेर्दैवेपित्र्येचपदार्थानुसमयस्ययाज्ञव ल्क्योक्तकांडानुसमयेनविकल्पोज्ञेयः ॥ बह्वृचानांतुसूत्रेदैवानुक्तेःकांडानु समयएव ॥ अत्रप्राचीनावीतीनामगोत्रसंबुद्ध्याद्युक्तंप्राक् ॥ अन्यद्दैववत्त दंतेआचमनंच **हेमाद्रौकालिकापुराणे** निर्वर्त्यब्राह्मणादेशात्क्रियामेवंयथा विधि । भाजनानिततोदद्याद्धस्तशौचंपुनःक्रमात् ॥ आदेशात्पात्राणिदद्या दित्यन्वयः ॥ तेनतत्रापिप्रश्नानुज्ञेज्ञेये । **तत्रैवब्राह्मे** मंडलानिचकार्याणि नैवारैश्चूर्णकैःशुभैः । गौरमृत्तिकयावापिभस्मनागोमयेनवा **भृगुः** भस्मना वारिणावापिकारयेन्मंडलंततः । चतुःकोणंद्विजाग्र्यस्यत्रिकोणंक्षत्रियस्य तु । मंडलाकृतिवैश्यस्यशूद्रस्याभ्युक्षणंस्मृतं ॥ **बह्वृचपरिशिष्टेतु** दैवेच

तुरस्रंपित्र्ये वृत्तंमंडलंकृत्वा क्रमेणसयवान्सतिलांश्चदर्भान्दद्यादित्युक्तम् **मार्कंडेयः** यातुधानाःपिशाचाश्चक्रूरायेचैवराक्षसाः । हरंतिरसमन्नस्यमंड लेनविवर्जितम् **हेमाद्रौहारीतः** भूमावेवनिदध्यान्नोपरिपात्राणीति **तानि चहेमाद्रावत्रिराह** भोजनेहैमरौप्याणिदैवेपित्र्येयथाक्रमम् **हारीतः** राज तपार्णताम्रकांस्यपात्राणिभोजनेइति **तत्रैववाराहे** सौवर्णानीहरौप्याणिकां स्यानितदसंभवे । अन्यान्यपिहिकार्याणिदारुजान्यपिजानता ॥ नायसा न्यपिकार्याणिपैत्तलानिनतुक्वचित् । नचसीसमयानीहशस्यंतेत्रपुजान्यपि **अत्रिः** पंचाशत्पलिकंकांस्यंद्व्यधिकंभोजनायवै । गृहस्थैस्तुसदाकार्यम भावेहेमरौप्ययोः ॥ पालाशेभ्योविनानस्युःपर्णपात्राणिभोजने **पृथ्वीचंद्र स्तु** कांस्यपात्रेहविर्दृष्ट्वानिराशाःपितरोगताइतिब्राह्मोक्तेः कांस्यपात्रनिषेध माह **बोपदेवस्तुस्मृतिसंग्रहमुदाजहार** श्राद्धेपलाशपात्राणिमधुकोदुंबरा णिच । पारिकाकूटजप्लक्षक्रकचानिक्रमाज्जगुः ॥ कदलीचूतपनसजंबुपु न्नागचंपकाः । अलाभेमुख्यपात्राणांग्राह्यास्युःपितृकर्मणीति **हेमाद्रौ तुकदलीपात्रनिषेधमाहांगिराः** नजातीकुसुमानिदद्यान्नकदलीपत्रमिति क्रतुः असुराणांकुलेजातारंभापूर्वपरिग्रहे ॥ तस्यदर्शनमात्रेणनिराशाःपित रोगताः ॥ एवंपात्राण्यासाद्यभस्ममर्यादांकृत्वाविप्रहस्तशोधनंकुर्यात् ॥ त त्रापिशंगरक्षणोइतिमंत्रद्वयंकेचित्पठंति **मात्स्ये** अकृत्वाभस्ममर्यादांयःकु र्यात्पाणिशोधनम् । आसुरंतद्भवेच्छ्राद्धंपितॄणांनोपतिष्ठते **तत्रैवब्रह्मांडे** प्रक्षा ल्यहस्तपात्रादिपश्चादाद्भिर्विधानवत् प्रक्षालनजलंदर्भैस्तिलैर्भिश्रंक्षिपेच्छु चौ ॥ मंडलोपरीतिहेमाद्रिः **अथाग्नौकरणं ॥ हेमाद्रौमार्कंडेयः** आहिता ग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितःअनाहिताग्निश्चौपासनेऽग्न्याभावेद्विजेषुवा॥ **वायवीये** आहृत्यदक्षिणाग्नितुहोमार्थंवैप्रयत्नतः अग्न्यर्थंलौकिकेवापिजुहु यात्कर्मसिद्धये ॥ आहिताग्निःसर्वाधानी ॥ अर्धाधानीतुगृह्यएवेतिचंद्रिका परार्कमिताक्षरामाधवादयः ॥तस्यापिदक्षिणाग्नौलौकिकोगृह्यइतिहेमाद्रिःक ल्पतरुश्च ॥ आद्यपक्षएवतुयुक्तोबहुसंमतश्च ॥ यद्यपिस्मार्ताग्नौकरणंश्रौतेद

क्षिणाग्नौनयुक्तंतथापिवचनाद्भवतीतिहेमाद्रिचंद्रिकादयः॥इदंदर्शश्राद्धएव। आब्दिकादिषुतुसर्वाधानी पाणौअर्धाधानीगृह्येकुर्यादितिहेमाद्रिमाधवादयश्च ॥ पक्षांतंकर्मनिर्वर्त्यवैश्वदेवंचसाग्निकः ॥ पिंडयज्ञंततःकुर्यात्ततोन्वाहार्यकंबुधइतिलौगाक्ष्यादिभिःक्रमोक्तेर्विहृतदक्षिणाग्निसत्त्वात् ॥ अतएवात्रवचनेसाग्निकआहिताग्निरुक्तोहेमाद्रिणा॥ एतदापस्तंबादीनामेव॥ आश्वलायनस्याहिताग्नेःपाणावेवेतिवृत्तिः ॥ अर्धाधानिनोगृह्येएवव्यतिषंगेणेतिप्रयोगपारिजातेपरिशिष्टेच ॥ वोपदेवस्त्वाहहोमशब्दःपिंडपितृयज्ञपरःपितृयज्ञेतुजुहुयाद्दक्षिणाग्नौसमाहितः ॥ श्राद्धेत्वौपासनाग्नौतुनिरग्निर्लौकिकेनले ॥ अनग्निर्दूरभार्यश्चपार्वणेसमुपस्थिते । संध्यायाग्निंततःकुर्याद्धोममग्निंसमुत्सृजेदितित्रिकांडमंडनोक्तेः ॥ श्राद्धेगृह्याग्नावेवेतिलौकिकाग्न्यादिविधानंचतैत्तिरीयादिविषयम् ॥ बह्वृचस्यत्वनग्नेरपिपाणिहोमएवअग्निपाणींविनासूत्रेविधानांतरानुक्तेः॥ अग्न्यभावेतुविप्रस्यपाणावेवोपपादयेदितिमनूक्तेश्च ॥ वृत्तावप्येवम् ॥ क्वचित्साग्नेरपिपाणिहोमउक्तोगृह्यपरिशिष्टे ॥ अन्वष्टक्यंचपूर्वेद्युर्मासिमास्यथपार्वणम्। काम्यमाभ्युदयेष्टम्यामेकोद्दिष्टेतथाष्टमम्॥ चतुर्ष्वाद्येषुसाग्नीनांवह्नौहोमोविधीयते॥ पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुर्ष्वपीति ॥ एकोद्दिष्टंसपिंडीकरणंशुद्धेतन्निषेधात् ॥ बह्वृचभाष्यकारास्तुसर्वैकोद्दिष्टेषुपाणिहोममाहुः ॥ इदंबह्वृचानामेव ॥ अत्रेदंतत्त्वम्। स्थालीपाकेनसहर्पिंडार्थमुद्धृत्येतिसूत्रेनात्रपूर्वःस्थालीपाकश्चोद्यते ॥ सर्वश्राद्धेषुप्रसंगात्तेनानुवादोयमितिवृत्तिकारोक्तेः॥ पार्वणेआर्थिकस्यानंगस्यव्यतिषंगस्यवार्त्तिकादिष्वनीतिदेशादर्धाधानिनोपिपाणिहोमएवेतिवृत्तिस्वरसः॥ एवंमासिकादावपि॥ षोडशेमासिकेश्राद्धे सपिंडीकरणेतथा । पाणावेवतुहोतव्यमन्यत्राग्नौतुहूयते इतिबोपदेवोदाहृतवचनाच्च भाष्यकारमतेतु सूत्रेस्थालीपाकेनेतिकरणत्वान्नित्यवच्छ्रवणाच्चपार्वणेसांगम् ॥ ततःकाम्यादिषुतदभावेकार्यस्यपिंडदानस्याप्यभावः ॥ एतदेवानुसृत्यविकृतावपिवार्षिकादौव्यतिषंगउक्तःप्रयोगपारिजातेपरिशिष्टेच ॥ तेनैतन्मतेऽर्धाधानिनोग्नावेव ॥ वस्तुतस्तुस्थालीपाके

सहशाखयाप्रस्तरंप्रहरतीतिवत्सहभावमात्रश्रुतेः ॥ पत्नीवतेत्वष्टुरुपलक्षण मिवनांगत्वम् ॥ तत्त्वेवानांगानुरोधेनप्रधानभूतपिंडदानत्यागोयुक्तः ॥ ते नव्यतिषंगाभावेष्यग्नौहोमोभवतीतिबोपदेवः ॥ अनाहिताग्नेर्गृह्याग्निमतस्तु सर्वमतेग्नावेव ॥ वार्षिकादौवृत्तिमतेव्यतिषंगोन ॥ अन्यमतेत्वस्ति ॥ अत्र यथाचारमनुष्ठेयम् ॥ **आश्वलायनः** उद्धृत्यघृताक्तमन्नमनुज्ञापयत्यग्नौकरिष्ये । करवैकरवाणीतिवाप्रत्यनुज्ञा । क्रियतांकुरुष्वकुर्वित्यथाग्नौजुहोतिय थोक्तंपुरस्तादिति ॥ व्यतिषंगपक्षेइदमितिवृत्तिः ॥ करवैकरवाणीत्यत्राग्ना वित्यनुषंगःपुरस्तात्पिंडपितृयज्ञे ॥ तच्चैवम् ॥ मेक्षणेनावदायावदानसंपदा जुहुयात्सोमायपितृमतेस्वधा नमोग्नयेकव्यवाहनायस्वधानमइति स्वाहाकारेणवाग्निंपूर्वंयज्ञोपवीतीमेक्षणमनुप्रहरति ॥ अवदानसम्पदाउपस्तरणाद्यपेक्षयेत्यर्थः ॥ व्यतिषंगपक्षेअतिप्रणीतेयंहोमोन्यथामुख्येअतिप्रणीतेग्नाविध्ममुपसमाधायेतिबह्वृचपरिशिष्टात्॥केचित्तस्यरक्षोनिबर्हणार्थत्वान्मुख्येवदंति ॥ तदेतद्विरोधाच्चिंत्यम् प्रयोगपारिजातेप्येवम् **शौनकः** स्वाहाकारेणहोमेतु भवेद्यज्ञोपवीतवान्तत्रप्रागग्नयेहुत्वापश्चात्सोमायहूयते ॥ अग्नौयज्ञोपवीत्येवप्रक्षिपेन्मेक्षणंततः **छंदोगपरिशिष्टे** अग्नौकरणहोमश्चकर्तव्यउपवीतिना । अपसव्येनवाकार्योदक्षिणाभिमुखेनच ॥ कातीयानांत्वपसव्यमेवपिंडपितृयज्ञवद्धुत्वेतिसर्वातिदेशात् ॥ सव्यंतुछंदोगपरम् ॥ गोभिलेनैतदुक्तरमेवापसव्योक्तेः ॥ छंदोगाजुहुयुःसव्येनापसव्येनयाजुषाइतिवृद्धयाज्ञवल्क्योक्तेश्च **अथपाणिहोमः ॥ आश्वलायनः** अभ्यनुज्ञायांपाणिष्वेति ॥ पिंडपितृयज्ञकल्पाभावेनाग्न्याभावेकाम्यादिष्वित्यर्थः ॥ तेनबह्वृचानामेकोद्दिष्टेपाणिहोमोभवत्येव ॥ निषेधोऽन्यपरः ॥ पाणिष्वितिबहुवचनात्सर्वेविप्रपाणिषुहोमइतिवृत्तिः ॥ एवंमातामहेपि **शौनकोपि** सवेषामुपविष्टानां विप्राणामथपाणिषु । विभज्यजुहुयात्सर्वेसोमायेत्यादिमंत्रतः **यत्तुहेमाद्रौ कात्यायनः** पित्र्येयःपंक्तिमूर्धन्यस्तस्यपाणावनग्निकः ॥ हुत्वामंत्रवदन्येषांतुष्णींपात्रेषुनिक्षिपेदितिबह्वृचातिरिक्तानाम् **यत्तुतत्रैवमात्स्ये** अग्न्यभावे

तुविप्रस्यपाणौवाथजलेपिवा ॥ अजकर्णेश्वकर्णेवागोष्ठेवाथशिलान्तिकइति तत्तीर्थश्राद्धविषयम् ॥ तद्यदापांसमीपेस्याच्छ्राद्धंज्ञेयोविधिस्तदेतित्रैवकात्यायनोक्तेः ॥ निर्जलेत्वजकर्णादौ **यत्तुचन्द्रोदयेयमः** देवविप्रकरेऽग्निःकृत्वाग्नौकरणंद्विजइतितदभार्यपरम् ॥ अपत्नीकोयदाविप्रःश्राद्धंकुर्वीतपार्व्वणम् ॥ पित्र्यविप्रैरनुज्ञातोविश्वेदेवेषुहूयते इतित्रैवकात्यायनोक्तेः ॥ हूयते इतिच्छान्दसोव्यत्ययः **हेमाद्रौवायवीये** विधुरोदैविकेकुर्याच्छेषंपित्र्येनिवेदयेत **दैवविप्रानेकत्वेतत्रैव** विश्वेदेवेयदैकस्मिन् भयेयुद्वर्यादयोद्विजाः ॥ तदैकपाणौहोतव्यंस्याद्विधिर्विहितस्तदा ॥ सोप्याद्यःप्रथमंवानियम्यते तिन्यायात् ॥ तेनमृतभार्य्यस्यदैवेहोमः ॥ अनुपनीतब्रह्मचार्यादेस्तुपित्र्ये ॥ अग्न्याभावःस्मृतस्तावद्यावद्भार्यांनविन्दतीतिहेमाद्रौजातूकर्ण्योक्तेः ॥ सभार्यनष्टाग्नेरपिपित्र्यविप्रकरेइतिपृथ्वीचन्द्रः ॥ उपवीतित्वेनदैवेहोमः प्राचीनावीतेनपित्र्ये ॥ यद्वासर्व्वत्रदैवपित्र्यकरयोर्व्विकल्पइति हेमाद्रौ मदनरत्नेपारिजातेच ॥ यदातुपितृमातामहयोर्दैवपित्र्यविप्रभेदस्तदाभेदेन पाणिहोमइत्यपरार्कचन्द्रिकादयः ॥ यदातुदैवन्तंत्रंतदातंत्रेणसकृदेवपाणिहोमइतिकेचित् हे**माद्रिस्तु** मातामहस्यभेदेपिकुर्यात्तन्त्रेणसाग्निक इतिकातीयस्मृतेर्भेदमाह ॥ एवंपित्र्येपि ॥ माधवीयेप्येवम् ॥ एवंसाग्नेरपिविदेशादौपाणिहोमोज्ञेयः ॥ यत्तुकर्केणाग्निंविनाश्राद्धमेवनास्तीत्युक्तंतत्सपिंडीकरणवार्षिकाद्यकरणापत्तेर्यत्किंचिदेव **यत्तुबृहन्नारदीये** अनग्निर्दूरभार्यश्च पार्वणेसमुपस्थिते । भ्रातृभिःकारयेच्छ्राद्धंसाग्निकैर्विधिवद्द्विजाः ॥ क्षया हदिवसेप्राप्तेस्वस्याग्निर्दूरगोयदि । तथैवभ्रातरःस्युश्चेल्लौकिकाग्नाविति स्थितिः ॥ औपासनाग्नोदूरस्थेसमीपेभ्रातरिस्थिते । यद्यग्नौजुहुयाद्वापिपाणौवासहिपातकी ॥ औपासनाग्नौदूरस्थेकेचिदिच्छंतिसत्तमाः ॥ पाणावेवतुहोतव्यमितिनैतत्समंजसमितितद्वृद्धानादरादुपेक्ष्यम् **हेमाद्रौयमः** अग्नौकरणवत्तत्रहोमोविप्रकरेभवेत् । पर्युक्ष्यदर्भानास्तीर्यपरिसमोद्विजः ॥ मेक्षणेनकरेणवाहोमः ॥ मेक्षणप्रहरणंनेतिवृत्तिः ॥ **स्मृतिरत्नावल्याम्**

नानुज्ञापाणिहोमेस्यान्नस्तःपर्यूहनोक्षणे । नाग्नेतमद्यादितिचनस्यातामिध्म मेक्षणे ॥ कर्काचार्योप्येवमाह ॥ माधवीयेचंद्रिकायांचानुज्ञादिसर्वंभवती त्युक्तं **पाणिहोमेप्रभाद्याहापरार्केशौनकः** अनग्निश्चेदाज्यंगृहीत्वाभव त्स्वेवाग्नौकरणमितिपूर्ववत्तथास्त्विति **आश्वलायनः** यदिपाणिष्वाचांते ष्वन्यदन्नमनुदिशत्यन्नमन्नेसृष्टंदत्तमध्रुवमिति ॥ पाणौहुतपात्रे निधायवि प्रैराचम्यभोजनार्थमन्नेपरिविष्टेहुतशेषंपात्रेषुदद्यादित्यर्थः ॥ सृष्टंप्रभूतं ॥ नैमित्तिकंचेदमाचमनंनहुतभक्षणनिमित्तम् । अन्नंपाणितलेदत्तंपूर्वमश्नंत्य बुद्धयः । पितरस्तेनतृप्यंतिशेषान्नंनलभंतिते ॥ यच्चपाणितलेदत्तंयच्चान्यदु पकल्पितम् ॥ एकीभावेनभोक्तव्यंपृथग्भावोनविद्यतइतिबह्वृचपरिशिष्टात् हेमाद्रावप्याचमनेहेत्वर्थवादउक्तःपाण्यास्योहिद्विजःस्मृतइति ॥ भाष्येत्वा चांतेषुभक्षितेषु ॥ चमुभक्षणेइति ॥ भक्षणोत्तरंचनाचमनमग्निसाम्यात् ॥ पूर्वनिषेधस्तुसपिंडीकरणेज्ञेयः ॥ ददातिचोदितत्वान्नत्वत्रजुहोतिचोदितत्वा दित्युक्तं॥नत्वेतद्बहुसंमतम् **यत्तुबौधायनेन** तस्मिंस्तुप्राशितेदद्याद्यद्यन्नंप्र कृतंभवेदितिभक्षणमुक्तंतत्तच्छाखीयानामेवेतिहेमाद्रिः ॥ **तत्रैवयमः** पित्र्य पाणिहुताच्छेषंपितृपात्रेषुनिक्षिपेत् । अग्नौकरणशेषंतुनदद्याद्वैश्वदेविके ॥ एतदग्निहोमेपिसमम् ॥ तथाकर्कस्तुसूत्रेहुतशेषंदत्वेत्यविशेषात्सर्वविप्रेषुद द्यादित्याह **तत्रैववृद्धवसिष्ठः** पित्र्यविप्रकारेहुत्वाशेषंपात्रेषुनिक्षिपेत् । पिं डेभ्यःक्षेपयेत्किंचिन्नदद्याद्वैश्वदेविके **अथापस्तंबानांसूत्रे** उद्धीयतामग्नौच क्रियतामित्यामंत्रयते ॥ कांममुद्धीयतांकाममग्नौचक्रियतामित्यातिसृष्टउद्धरे ज्जुहुयाच्च **नष्टाग्निविधुरादेर्विशेषोबृहन्नारदीये** नष्टाग्निर्दूरभार्यश्चपार्वणे समुपस्थिते ॥ संधायाग्निंततोहोमंकृत्वातंविसृजेत्पुनः ॥ अयाश्चेतितत्काले ग्निंसंधायहुत्वात्यजेदित्यर्थः ॥ एतदापस्तंबानामेव ॥ पाणिहोमस्तुछंदो गादीनाम् **विश्वप्रकाशेपि** साग्निरौपासनेनाग्निरग्नौकुर्वीतलौकिके ॥ पाणौ होमंप्रशंसंतिनत्वापस्तंबशाखिनाम् ॥ स्नातकाविधुरावास्युर्यदिवाब्रह्मचारि णः । अग्नौकरणहोमंतुकुर्युस्तेलौकिकेनले ॥ अयाश्राग्नेमनोज्योतिरुद्बुध्य

व्याहृतीर्हुनेत् ॥ ततोनुज्ञातोऽग्नींधनाद्याज्यभागांतेयन्मेमातेत्याद्यैर्जुहुयात् ॥ तत्रसप्तान्नाहुतयःषडाज्यस्येतित्रयोदशः व्यत्ययोवा यथा यन्मेमाताप्रलुलोभतन्मेरेतःपितावृंक्तांयास्तिष्ठंतीतिद्वाभ्याममुष्मैस्वाहेतिपितुर्नाम्नाद्यौहोमौ ॥ यन्मेपितामहीप्रलुलोभतन्मेरेतःपितामहोवृंक्तामंतर्दधेइतितन्नाम्नापितामहायद्यौ ॥ यन्मेप्रपितामहीप्रलुलोभतन्मेरेतः प्रपितामहोवृंक्तामंतर्दधेऋतुभिरितितन्नाम्नाप्रपितामहायद्यौ मातामह्येषुतूहः यन्मेमातामहीतन्मेमातामहोवृंक्तां ॥ अन्यमातामहाद्वृद्धमित्यादौ ॥ यन्मेमातुः पितामहीप्रलुलोभतन्मेरेतोमातुः पितामहोवृंक्तां ॥ अन्यंमातुःपितामहाद्वृद्धम् ॥ यन्मेमातुःप्रपितामहीप्रलुलोभतन्मेरेतोमातुःप्रपितामहोवृंक्तां । अन्यंमातुःप्रपितामहाद्वृद्धम् सर्वत्राप्यमुष्याइत्यत्रङेंतंतन्नामयोज्यम् तत्गृह्यसंग्रहे योज्यःपित्रादिशब्दानांस्थानेमातामहादिकः । अन्नहोमेतथास्पर्शेजलपिंडादिदानके ॥ यन्मेमातामहीत्यादितत्रोदाहरणंभवेत् । ततोयेकेचेत्येकान्नाहुतिः ॥ ततःस्वाहापित्र्येइत्याद्यैराज्यंहुत्वास्विष्टकृतंहुत्वा सर्वभक्ष्यंकिंचिदादायोदगुष्णं भस्मापोद्यतत्रतूष्णीम्स्वाहाकारेणजुहोति ॥ परिषेचनांतंस्थालीपाकवत् ॥ अयमग्नौकरणहोमोमासिकश्राद्धएव ॥ तच्चस्मार्ताग्न्यभावेनकार्यमितिकेचित् ॥ कार्यमेवेतिबहवः ॥ अतएवसर्वाधानिनोहोमवर्ज्यंमासिकश्राद्धमुक्तंसुदर्शनभाष्ये॥ महालयेतद्वदित्येके ॥ प्रकरणांतरत्वात् ॥ कर्मांतरत्वेनस्मार्तपार्वणवत्कार्यमितित्वस्मद्गुरवः ॥ आब्दिकादिषुतुस्मार्तपार्वणविधिरेव ॥ एवंमातृवार्षिकादिषु ॥ मासिश्राद्धविकृतावष्टकायांमातृश्राद्धेवैकृतहोमेनप्राकृतहोमबाधः ॥ अन्वष्टकासुमातृश्राद्धंनेतिभाष्ये ॥ तत्रापिश्राद्धांतरवत् ॥ क्रियमाणेतुयन्मेमातेत्यादौगुणत्वेपिमातृप्राधान्यंविवक्षितं ॥ मासिश्राद्धेनकल्पोव्याख्यातइतिसूत्रात् ॥ आग्नेय्येवमनोताकार्यमितिवचनादग्निशब्दस्यैववैकृतदेवताभिधायित्वम् ॥ तेनामुष्याइत्यत्रामुकशर्मभ्यांपितृभ्यामित्याद्यूहःकार्यः ॥ तच्चमासिश्राद्धंजीवत्पित्रादीनांव्युत्क्रममृतपित्रादीनांचकार्यमित्युक्तंसुदर्शनभाष्ये ॥ तत्प्रकारस्तुवक्ष्यते ॥ मातापित्रोर्द्वि

त्वादौतुनोहः ॥ तस्मादृचंनोहेदितिनिषेधात् ॥ प्रकृतावूहाभावाच्चपत्नी सन्नह्येतिवत् ॥ उपदेशिमतेतूहः ॥ यथायन्मेमातरौप्रलुलोभतुश्चरत्यावन नुव्रतेइत्याद्यस्मत्पितृकृतमासिश्राद्धनिर्णयेज्ञेयमितिदिक् ॥ अन्यत्प्राग्वत् **अथपरिवेषणं** तच्चौपवीत्येवाज्येनदेवपूर्वमामासुपक्वमितिपात्राण्युपस्तीर्यकुर्यादितिहेमाद्रिः **भारतेदानधर्मेपि** आज्याहुतिंविनानैवयत्किंचित्परिविष्यते। दुराचारैश्चयद्भुक्तंभागंरक्षसांविदुः **तत्रैवशौनकः** विधिनादेवपूर्वंतुपरिवेषणमाचरेत् **तत्रैवधर्मः** फलस्यानंततोक्तास्वयंचपरिवेषणे **तत्रैववायुभविष्ययोः** भार्यायाःश्राद्धकालेतुप्रशस्तंपरिवेषणम् **ब्रह्मांडे** नापवित्रेणनैकेनहस्तेननविनाकुशम्। नायसेनायसेनैबश्राद्धेतुपरिवेषयेत् **वसिष्ठः** आयसेनतुपात्रेणयदन्नंसंप्रदीयते। भोक्ताविष्ठासमंभुंक्तेदाताचनरकंव्रजेत् **पैठीनसिः** सीसकायसरीतीपात्राण्ययज्ञियानि **तत्रैवहारीतः** सौवर्णराजताभ्यांच खड्गनौदुंबरेणवा । दत्तमक्षय्यतांयातिफल्गुपात्रेणवापुनः । **काष्णाजिनिः** दर्व्यादेयंघृतंचान्नंसमस्तव्यंजनानिच। उदकंचैवपक्वान्नंनोदर्व्यातुकदाचन **यमः**पंक्त्यांविषमदातुश्चनिष्कृतिर्नैवविद्यते **पृथ्वीचन्द्रोदयेपराशरः** सर्वदाचतिलाग्राह्यःपितृकृत्येविशेषतः। भोज्यपात्रेतिलान्दृष्ट्वानिराशाःपितरोगताः **चन्द्रिकायांवृद्धशातातपः** हस्तदत्तास्तुयेस्नेहालवणव्यंजनादयः पितृणांनोपतिष्ठंतिभोक्तामुंजीतकिल्बिषम् **घृतपात्रेविशेषोग्रन्थांतरे** ओदनेपरमान्नेच पात्रमासाद्यमुग्धधीः। घृतेनपूरयेत्पात्रं तद्घृतंरुधिरंभवेत् ॥ घृतादिपात्राणिभूमौस्थापयेन्नभोजनपात्रे इतिमदनरत्ने **संग्रहे** हस्तदत्तंतुनाश्नीयाल्लवणव्यंजनादिकम् ॥ अपक्वंतैलपक्वंच हस्तेनैवप्रदीयते **पात्रालंभनमुक्तंचतुर्विंशतिमते** उत्तानंदक्षिणंसव्यंनीचंपात्राण्युपस्पृशेत् **याज्ञवल्क्यः** दत्वान्नंपृथिवीपात्रमितिपात्राभिमंत्रणम् । कृत्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेत् **बौधायनः**विप्रांगुष्ठेनानखेनानुदिशति ॥ पृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृतंजुहोमि ॥ ब्राह्मणानात्वाविद्यावतांप्राणापानयोर्जुहोम्यक्षितमसिमामेपितृणांक्षेष्ठाअत्रामुष्मिन्लोकइति॥अद्यजुहोम्य

ग्नेस्वाहाशब्दःकातीयसूत्रेउक्तः ॥ मैत्रेःस्वधाशब्दः **अंगुष्ठविशेषमाहहेमा द्रौधौम्यः** परिवृत्यनवांगुष्ठंद्विजस्थानेनिवेशयेत् **तथा** उत्तानेनतुहस्तेनाद्वि जांगुष्ठनिवेशनम् । यःकरोतिद्विजोमोहात्तद्वैरक्षांसिभुंजते **तत्रैवयमः** विष्णो र्हव्यंचकव्यंचब्रूयाद्रक्षस्वचक्रमात् ॥ दैवेपित्र्येचेत्यर्थः **तत्रैवात्रिः** सम्ब न्धनामगोत्राणिइममन्नंततःस्वधा । पितृक्रमादुदीर्येतिस्वसत्तांविनिवर्तयेत्॥ हस्तेनाभुक्तमन्नाद्यमिदमन्नमुदीरयेत । अत्रान्नदानेचतुर्थीस्यादित्यादिविशे षाःपूर्वमुक्ताः ॥ अत्रपूर्वोक्तमंत्रांते पुरूरवार्द्रवसंज्ञकाविश्वेदेवादेवता इदम न्नंसपरिकरं हव्यंअयंब्राह्मणस्त्वाहवनीयार्थेदत्तंदास्यमानंचातृप्तेः । गयेयं भूःगदाधारोभोक्ताइदमन्नंब्रह्मसौवर्णपात्रस्थमन्नमक्षय्यवटच्छायास्थं अमुके भ्योविश्वेभ्योदेवेभ्यइदमन्नममृतंरूपंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेःस्वाहा नमो नममेति बह्वृचपरिसिष्टहेमाद्याद्यनुमतःप्रयोगः ॥ एवंपित्र्येअमुकगोत्र व सूरूपादितत्तन्नामज्ञेयम् ॥ ततोयेदेवास इति दैवेयेचेहपितर इति पित्र्येकेचि ज्जपंति ॥ततोच्छिद्रंवाचयेत् **तत्रैवप्रचेताः** आपोशानकरेविप्रेसंकल्प्याच्छि द्रभाषणात् । निराशाःपितरोयांति देवैःसहनसंशयः **पारस्करः** संकल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः । श्राद्धंनिवेद्यापोशानंजुषप्रैषोथभोजनम् ॥ निवेद्येतिब्रह्मार्पणंकृत्वेत्यर्थः ॥ अतएवबृहन्नारदीयेन्नत्यागमुक्त्वोक्तम् ॥ दत्तंहविश्चतत्कर्मविष्णवेवैसमर्पयेदिति **यत्तुकृत्यरत्नेकार्ष्णाजिनिः** अपस व्येनकर्तव्यं पितृकृत्यमशेषतः । अन्नदानादृतेसर्वमेवंमातामहेष्वपि **तच्च** ब्रह्मार्पणंब्रह्महविः हरिर्दाताहरिर्भोक्ताचतुर्भिश्चेतिकेचित्पठंति **धर्मप्रदीपे** ततोऽन्नंपितृदेवेभ्यःसंकल्प्यचयथाविधि । दत्तंयद्दास्यमानंच आतृप्तेर्नममेति च तथा श्राद्धीयान्नस्यसंकल्पोभूमावेवप्रदीयते॥हस्तेषुदीयमानंतुपितृणांनोप तिष्ठते ॥ वैश्वदेवस्यवामेतुपितृपात्रस्यदक्षिणे । संकल्पोदकदानेस्यान्नित्यश्रा द्धेयथारुचि **प्रचेताः** आपोशानंप्रदायाथसावित्रींत्रिर्जपेदथ । मधुवाता इतितृचंमध्वित्येतत्त्रिकंतथा **मिताक्षरायांपारस्करः** संकल्प्यपितृदेवेभ्यः सावित्रीमधुमज्जपः । श्राद्धंनिवेद्यापोशानंजुषप्रैषोथभोजनम् ॥ गायत्रींत्रिः

सकृद्वापिजपेद्व्याहृतिपूर्विकाम् । मधुवाताइतितृचंमध्वित्येतत्त्रिकंतथा **याज्ञवल्क्यः** सव्याहृतिकांगायत्रीं मधुवाताइतितृचम् । जप्त्वायथासुखंवा च्यंभुंजीरंस्तेपिवाग्यताः ॥ यथासुखंजुषध्वमितिवाच्यम् **आत्रिः** असंकल्पि तमन्नाद्यंपाणिभ्यांयद्युपस्पृशेत् । अभोज्यंतद्भवेदन्नंपितृणांनोपतिष्ठते ॥ अ न्नंदत्तंनगृह्णीयाद्यावत्तोयंनसंपिवेत् **आपोशानेविशेषमाहस्मृतिसमुच्चये** आपोशानंवामभागे सुरापानसमंभवेत् । दक्षभागेतुयःकुर्यात्सोमपानसमंभ वेत् **तथा** पुनरापूर्यापोशानंसुरापानसंभवेत् **हेमाद्रावत्रिः** दत्त्वाप्यथवा दत्तेभूमौयोनिक्षिपेद्बलिम् । तदन्नंनिष्फलंयातिनिराशैःपितृभिर्गतैः ॥ के चिदाज्येनकुर्वंतितन्न । पायसेनतथाज्येन माषान्नेनतथैवच । नकुर्याद्बलि दानंतुओदनेनप्रकल्पयेदितिस्मृतिसारेनिषेधात् **शंखः** श्राद्धेनियुक्तान्मुं जानान्नपृच्छेल्लवणादिषु । उच्छिष्टाःपितरोयांतिपृच्छतोनात्रसंशयः **का त्यायनः** अक्षवत्सुजपेत्सव्याहृतिकांगायत्रींसकृत्त्रिर्वाराक्षोघ्नी पौरुषंसूक्त मप्रतिरथमिति **हेमाद्रौसौरपुराणे** ऐंद्रञ्चपौरुषंसूक्तंश्रावयेद्ब्राह्मणांस्ततः **मात्स्यपाद्मयोः** ब्रह्मविष्ण्वर्करुद्राणांस्तोत्राणिविविधानिचाइंद्रेशसोमसूक्ता निपावमानीश्चशक्तितः ॥ मंडलंब्राह्मणंतद्वत्प्रीतिकारिचयत्पुनः । अभा वेसर्वविद्यानांगायत्रीजपमाचरेत् **पृथ्वीचंद्रोदयेब्राह्मे** वीणांवंशध्वनिंचाथ विप्रेभ्यःसंनिवेदयेत् ॥ जपेच्चपौरुषसूक्तंनाचिकेतत्रयंतथा ॥ त्रिमधुत्रिसुपर्णंच पावमानीर्यजूंषिच **हेमाद्रावत्रिः** हुंकारेणापियोब्रूयाद्भस्ताद्यापिवदेद्गुणान् । भूतलाच्चोद्धरेत्पात्रंमुंचेद्धस्तेनवापिवेत् ॥ प्रौढपादोबहिःकच्छोबहिर्जानु करोपिवा । अंगुष्ठेनविनाश्नातिमुखशब्देनवापुनः ॥ पीतावशिष्टतोयानिपुन रुद्धृत्यवापिवेत् । खादितार्धात्पुनःखादेन्मोदकानिफलानिच ॥ मुखेनवा धमेदन्नंनिष्ठीवेद्भाजनेपिवा । इत्थमश्नन्द्विजःश्राद्धंहत्वागच्छत्यधोगतिम् **जाबालिः** इष्टमुष्णहविष्यंचदद्यादन्नंशनैशनैः **वृद्धशातातपः** अपेक्षितं याचितव्यंश्राद्धार्थमुपकल्पितम् । नयाचतेद्विजोमूढःसभवेत्पितृघातकः **यमः** श्राद्धेद्विजोनैवदद्यान्नयाचेनैवदापयेदितितदसंपादितवस्तुविषय

मितिहेमाद्रिः **हारीतः** ऊर्ध्वपाणिश्चविहसन्सक्रोधोविस्मयान्वितः । भुग्न पृष्ठश्चयद्भुक्तेनतत्प्रीणातिवैपितॄन् **प्रचेताः** नस्पृशेद्वामहस्तेन भुंजानोन्नं कदाचन । नपादोनशिरोबस्तिनपदाभाजनंस्पृशेत् **शंखः** श्राद्धपंक्तौतुभुंजा नोब्राह्मणोब्राह्मणांस्पृशेत् ॥ तदन्नमत्यजन्भुक्त्वागायत्र्यष्टशतंजपेत् **उश नाः** भोजनंतुनिःशेषंकुर्यात्प्राज्ञःकथंचन ॥ अन्यत्रदध्नः क्षीराद्वा क्षौद्रात्सक्तुभ्यएवच **ब्राह्मे** नचाश्रुपातयेज्जातुनशुष्कांगिरमीरयेत् ॥ नचो द्वीक्षेतभुंजानान्नचकुर्वीतमत्सरम् **यमः** स्वाध्यायंश्रावयेत्सम्यग्धर्मशास्त्रा णिचैवहि **प्रचेताः** भुंजानेषुतुविप्रेषुऋग्यजुःसामलक्षणम् । जपेदभिमुखो भूत्वापित्र्यंचैवविशेषतः ॥ यजूंषिचैवरुद्रंचराक्षोघ्नीर्ऋचएवच । राक्षो घ्नीकृणुष्वरक्षोहणमित्याद्याः **तत्रैवनिगमः** भुंजत्सुजपेत्पावमानीरुदी रतामध्वन्नवतीश्च ॥ अन्नवत्यःपितुंनुस्तोषमिति **पृथ्वीचंद्रोदयेभरद्वाजः** भुंजानेषुतुविप्रेषुप्रमादात्स्रवतेगुदम् । पादकृच्छंततःकृत्वाअन्यंविप्रंनियो जयेत् । क्षणपाद्यादिदत्त्वेत्यर्थः **विप्रवमनेतत्रैवदक्षः** निमंत्रितस्तुयःश्राद्धे भोजनेमुखनिःसृते । तदैवहोमंकुर्वीतस्वाग्नौविप्रःसमाहितः ॥ प्राणादिपंच भिर्मंत्रैर्यावत्तद्वाप्रिंशसंख्यया ॥ ब्राह्मणस्तुततःकृत्वाघृतप्राशनमाचरेत् ॥ **ऋग्विधानेतु** इंद्रायसोमसूक्तेनश्राद्धविघ्नोयदाभवेत् । अग्न्यादिभिर्भो जनेनश्राद्धंसंपूर्णमेवहीत्युक्तम् ॥ अग्न्यादिभिरितिलौकिकाग्निस्थापनचरु निर्वापाज्यभागांतेनामगोत्रपूर्वमग्नौपितॄनावाह्यसंपूज्यान्नत्यागंकृत्वाप्राणा दिभिर्द्वात्रिंशदाहुतीर्हुत्वेदित्यर्थः ॥ भोजनेनपुनःश्राद्धेन ॥ तेनहोमःपुनः श्राद्धंचेतिपक्षद्वयमुक्तम् ॥ सूक्तजपस्तूभयानुगतः **स्मृतिसंग्रहे** प्राधान्यं पिंडदानस्यभोजनस्यतदंगता । अतोभुक्तिक्रियाहानौ श्राद्धवृत्तिंनमन्वते ॥ पिंडदानोत्तरंवांतौहोमएवनावृत्तिः ॥ पिंडदानात्प्राग्वांतौतद्दिनेउपवासंकृ त्वापरेद्युःपुनःश्राद्धंकार्यमित्यर्थः **तत्रैव** श्राद्धपंक्तौतुभुंजानोब्राह्मणोवमते यदि ॥ लौकिकाग्नौप्रतिष्ठाप्यअर्चयेच्चहुताशनं **तथा** एकएवयदाविप्रोभो जनेछर्दितोयदि । तदैवाग्निंसमाधायहोमंकुर्याद्यथाविधि **द्वितीयपक्षेऋग्वि**

धाने भोजनोपक्रमादूर्ध्वंप्रक्रमात्पूर्वंतोयदि ॥ श्राद्धविघ्नेपुनःकार्यंजपहोमौ नतृप्तिदौ स्मृतिसंग्रहे अकृतेपिंडदानेतु भुंजानोब्राह्मणोवमेत् । पुनःपाकात्तुकर्तव्यंपिंडदानंयथाविधि पिंडदानंश्राद्धम् अकृतेपिंडदानेतुपितायदि वमेत्तदा । पुनःपाकंप्रकुर्वीतश्राद्धंकुर्याद्यथाविधीतितत्रैवोक्तेः तथा पित्रा र्थानांत्रयाणांचपिताचवमतेयदि । तद्दिनेचोपवासःस्यात्पुनःश्राद्धंपरेहनि ॥ वमनेवाविरेकेवातद्दिनंपरिवर्जयेत् ॥ एषुवचनेषुमूलंचिंत्यं ॥ इदंमासिकाब्दिकविषयम् ॥ दर्शादौतुवांतावानेनतदैवकार्यम् ॥ श्राद्धविघ्नेद्विजातीनामश्राद्धंप्रकीर्तितम् ॥ अमावास्यादिनियतंमाससंवत्सरादृतइतिमरीचिस्मृतेः॥श्राद्धेपिंडदानमेवप्रधानमितिकर्काचार्याः ॥ तन्मतेदक्षोक्तोहोमएवनावृत्तिः ॥ विप्रभोजनमितिमेधातिथिः ॥ भोजनपिंडदानाग्नौकरणानीतिकपर्दिधूर्तस्वामिहेमाद्र्यादयः ॥ श्राद्धस्यहोमदानोभयरूपत्वात्संपूर्णादानाभावाद्भोजनस्यांगत्वेपिसोमवमतेइतियुक्तम् ॥ तन्मतेपूर्वोक्तोनिर्णयः ॥ अन्नत्यागमात्रंप्रधानंभोजनंतुप्रतिपत्तिरूपमंगमतोवांतौतद्दानेपिनावृत्तिरितिगौडमैथिलादयः ॥ नैमित्तिकविधानमितियुक्तंप्रतीमः ॥ अत्रेदंतत्त्वम् । वैश्वदेविकस्यवमनेहोमएवनावृत्तिः । अंगत्वात् । तच्चरक्षार्थत्वादिष्टिश्राद्धेक्रतूदक्षावित्यादिस्मृतेश्च ॥ तत्रजयान्जुहुयादितिवत् । पितामहादेरपितथा । पितेत्युक्तेरितिकेचित् । तस्यापिप्रधानत्वात्पितृवदितितुयुक्तम् । सपिंडीकरणादौवार्षिकवत्सपिंडीकरणादीनियानिश्राद्धानिषोडश ॥ तत्रपिंडप्रधानत्वंप्रेतत्वविनिवर्तकमितिस्मृतेः॥महैकोद्दिष्टादौतूभयप्राधान्यादावृत्तिरेव । एकएवद्विजोभोज्यःपिंडोप्येकोविधीयतइतिस्मृतेः ॥ वृद्धिसंकल्पनित्यश्राद्धादौतुभोजनप्राधान्याद्वांतावावृत्तिरेव ॥ वृद्धिश्राद्धेविकल्पेनपिंडदानंवुधैःस्मृतम् । नित्यश्राद्धमदैवंस्यात्पिंडदानविवर्जितामितिस्मृतेः ॥ भुक्तिक्रियायाःप्राधान्यंश्राद्धेसंकल्पसंज्ञके । तत्रैवपितृविप्रस्यतूपघातेपुनःक्रियतेतिसंग्रहोक्तेश्च ॥ मघादावप्येवम् ॥ तीर्थमहालयादौदर्शवदित्याशाकार्क्यालोचनेनप्रतीमः आश्वलायनः तृतान्ज्ञात्वामधुमतीःश्रावयेदक्षन्नमीमदंतेति चसंपन्नंस्पृष्ट्वा

यद्यदन्नमुपभुक्तंतत्तत्स्थालीपाकेनसह पिंडार्थमुद्धृत्यशेषंनिवेदयेत् ॥ अभिमतेनुमतेचेति ॥ अत्रगायत्रीमध्वितित्रिकजपोपिज्ञेयःतृप्तान्बुध्वान्नमादायसतिलंपूर्ववज्जपेदितिप्रचेतसोक्तेः **व्यासः** तृप्ताःस्थेतितुपृष्टास्तेब्रूयुस्तृप्ताःस्म इत्यर्थः । अभिमतेविप्रैःस्वीकर्तुमीष्टे **शौनकोपि** अन्नशेषैश्चकिंकार्यमितिपृच्छेततांस्ततः । तेइष्टैःसहभोक्तव्यमितिप्रत्युक्तिपूर्वकम् । प्रदद्युःसकलंतस्मैकुर्युर्वायथारुचि **श्राद्धविशेषेप्रश्नभेदमाहहेमाद्रौविष्णुः** पित्र्येस्वदितमितिगोष्ट्यांसुश्रुतंसंपन्नमित्यभ्युदयेदैवेरोचतइतिआयुष्यमितिस्वैरिषु । स्वैरमिच्छाश्राद्धम् **याज्ञवल्क्यः**अन्नमादायतृप्ताःस्थशेषंचैवानुमान्यच । तदन्नंप्रकिरेद्भूमौदद्यादापःसकृत्सकृत् । इदंचात्रविकिरदानमन्यशाखिनाम् ॥ आश्वलायनानांतुपिंडांतएवसूत्रकृतोक्तम् **कात्यायनस्तु** विकिरोत्तरंगायत्र्यादिजपंतृप्तिप्रश्नंचाह **हेमाद्रौदेवलः** ततःसर्वाशनंपात्रेगृहीत्वाविविधंबुधः । तेषामुच्छेषणस्थानेविकिरंभुविनिक्षिपेत् **माधवीयेप्रचेताः** सार्ववर्णिकमादाययेअग्नीतिभुविक्षिपेत् । सचकुशेकार्यः ॥ दर्भेषुविकिरश्चयइत्युक्ते ॥ मंत्रःकात्यीयः ॥ अग्निदग्धाश्चयेजीवायेप्यदग्धाःकुलेमम । भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिमिति **अन्येतु** असोमपाश्चयेदेवायज्ञभागविवर्जिताः । तेषामन्नंप्रदास्यामिविकिरंवैश्वदेविकमितिहेमाद्रौगोभिलोक्तेनदैवे ॥ असंस्कृतप्रमीतायेत्यागिन्योयाःकुलस्त्रियः ॥ दास्यामितेभ्योविकिरमन्नंताभ्यश्चपैतृकमित्यग्निपुराणोक्तेनपित्र्येन्नंविकीर्य येअग्निदग्धाइत्युच्छिष्टपिंडंकुशोपरिपृथद्यादित्याहुः ॥ पृथ्वीचंद्रोदयेप्येमम् **ब्राह्मे** ततःप्रक्षाल्यहस्तौचद्विराचम्यहरिंस्मरेत् **माधवीयेगौतमः** विकिरमुच्छिष्टैः प्रतिपादयेत् ॥ **हेमाद्रौव्यासः** उच्छिष्टैरेवविकिरंसदैवप्रतिपादयेत् **भृगुः** पिंडवत्प्रतिपत्तिस्याद्विकिरस्येतितौल्वलिः **श्राद्धकारिकायाम्** यजमानस्यदासादीनुद्दिश्यद्विजसत्तम् । तस्मादन्नंत्यजेद्भूमौवामभागेषुपैतृके **मनुः** उच्छेषणंभूमिगतमजिह्मस्याशठस्यच । दासवर्गस्यतत्पित्र्येभागधेयंप्रचक्षते **विष्णुः** उदङ्मुखेष्वाचमनमादौदद्यात्ततःप्राङ्मुखेषुपित्र्येदेवेचेत्यर्थः **शातातपः** विश्वेदेवनिविष्टानांच

रमंहस्तधावनम् **हेमाद्रौवाराहे** हस्तंप्रक्षाल्ययश्चापःपिवेद्भुक्त्वाद्विजः सदा ॥ तदन्नमसुरैर्भुक्तंनिराशाःपितरोगताः **मरीचिः** हस्तंप्रक्षाल्यगंडूषंयः पिवेदविचक्षणः। आसुरंतद्भवेच्छ्राद्धंपितॄणांनोपतिष्ठते **तत्रैवसंग्रहे** पवित्र ग्रंथिमुत्सृज्यमंडलेभुविनिक्षिपेत् । हस्तादीन्क्षालयेद्विद्वान्शरावादौनकुत्र चित् **व्यासः** तांबूलोद्गिरणंचैवगंडूषोद्गिरणंतथा। कांस्यपात्रेतथाताम्रेनकुर्वीतकदाचन ॥ उष्णोदकैर्धान्यचूर्णैःकरौश्मश्रूणिशोधयेत् **अथपिंडदानम्** तच्चार्चनोत्तरमग्नौकरणोत्तरं विकिरोत्तरंस्वधावाचनोत्तरंविप्रविसर्जनोत्तरं चेतिहेमाद्रौस्मृतिषुचपक्षाउक्ताः ॥ तेषांशाखाभेदेनव्यवस्था ॥ प्रेतश्राद्धेषुपूर्वमन्येषुभोजनोत्तरमितिचंद्रिकामाधवौ ॥ सर्वत्रभोजनोत्तरमितिबहवः **आश्वलायनः** भुक्तवत्स्वनाचांतेषुपिंडांन्निदध्यादाचांतेष्वेके॥भुक्तवत्स्वितिपूर्वनिषेधार्थम्। साग्निरितिप्रणीतसमीपेऽनग्निर्द्विजसमीपे **हेमाद्रौजातूकर्ण्यः** व्याममात्रंसमुत्सृज्यपिंडांस्तत्रप्रदापयेत् । प्रसारितभुजांतरंव्यामः **संकटेतु व्यासः** अरत्निमात्रमुत्सृज्येति **यत्तुतत्रैव** सिकताभिर्मृदावापिवेदीदक्षिणनिम्नगेतितदन्यशाखिपरम् **देवलः** ततस्तैरभ्यनुज्ञातोदक्षिणांदिशमेत्यच **चंद्रिकायाम्** पिंडनिर्वापणंकार्यंकुशाभावेविचक्षणैः । काशेषुराजदूर्वासुपवित्रेपरमेहिते **आश्वलायनः** स्फ्येनरेखामुल्लिखेत् ॥ अपहताअसुरारक्षांसिवेदिषदइतितामभ्युक्ष्यसकृदाच्छिन्नैरवस्तीर्यप्राचीनावीतीरेखांत्रिरुदकेनोपनयेच्छुंधंतांपितरःशुंधंतांपितामहाःशुंधंतांप्रपितामहा इतितस्यांपिंडान्निपृणीयात्पराचीनपाणिःपित्रेपितामहायप्रपितामहायैतत्तेसौयेचत्वामन्वान्विति हे **मादौपारस्करः** कराभ्यामुल्लिखेत्स्फ्येन कुशैर्वापिमहींद्विजः बह्वृचाना करेणैवलेखाचाग्नेय्यभिमुखेतिवृत्तिः ॥ दक्षिणाप्राचींवेदिमुद्धृत्येत्यापस्तंबोक्तेश्च **देवलः** आवाहयित्वादर्भाग्रैस्तेषांस्थानानिकल्पयेत् । तेष्वासीनेषु पात्रेणप्रयच्छेत्सतिलोदकम् ॥ पराचीनेननिम्नापितृतीर्थेन **वायवीये** मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान्निर्वपेद्बुधः **त्रिस्थलीसेतौ** तिलमन्नंचपानीयंधूपंदीपं पयस्तथा। मधुसर्पिःखंडयुक्तंपिंडमष्टांगमुच्यते **याज्ञवल्क्यः** सर्वमन्नमुपाद

यसतिलंदक्षिणामुखः । उच्छिष्टसन्निवौपिंडान्दद्याद्वैपितृयज्ञवत् ॥ केचित् पिंडेषुमाषान्वर्जयति ॥ माषाःश्राद्धेषुवैग्राह्यावर्ज्याश्चैवाग्निपिंडयोः । ब्राह्मणेषुयथामद्यंतथामाषोग्निपिंडयोरितिस्मृतिसारात् ॥ माषान्सर्वत्रवैदद्यात्पिंडेम्नौचविवर्जयेदितिस्मृतेश्च ॥ अत्रमूलंचिंत्यम् ॥ हेमाद्रावपिसर्वशब्दस्य प्रकृतार्थत्वात्सर्वान्नग्रहणमुक्तम् ॥ अत्रशेषमन्नमनुज्ञाप्यसर्वमेकत्रोद्धृत्योच्छिष्टसमीपेदर्भेषुत्रींस्त्रीन्पिंडान्दद्यादितिगोभिलसूत्रे ॥ सर्वस्मात्प्रकृतादन्नात्पिंडान्मधुतिलान्वितानितिच ॥ शेषनियमात्तदभावेपिंडनिवृत्तिःप्राप्नोतीतिमैथिलवाचस्पती **तन्न** तुषोपवापवत्परप्रयुक्तद्रव्यत्वेप्यर्थकर्मत्वाद्गुणानुरोधेनप्रधानत्यागाच्चशेषलोपेपिद्रव्यांतरेणकार्यम् ॥ अतोनेयंप्रतिपत्तिः ॥ किंतुप्रधानमित्युक्तंप्राक् ॥ अन्यथासपिंडीकरणादौसंयोजनादेःप्रधानस्य लोपापत्तेरितिदिक् **अथपिंडप्रमाणम् हेमाद्रावंगिराः** कपित्थबिल्वमात्रान्वापिंडान्दद्याद्विधानतः । कुक्कुटांडप्रमाणान्वामलकैर्बदरैःपुमानिति **त्रैवधूम्रः** कपित्थस्यप्रणाणेनपिंडान्दद्यात्समाहितः । तत्समंविकिरंदद्यात् पिंडांतेतुषडंगुलैः **अंत्येष्टिपद्धतौभट्टास्तु** एकोद्दिष्टेसपिंडेतुकपित्थंतुविधीयते ॥ नारिकेलप्रमाणंतुप्रत्यब्देमासिकेतथा ॥ तीर्थेदर्शेचसंप्राप्तेकुक्कुटांडप्रमाणतः । महालयेगयाश्राद्धेकुर्यादामलकोपममित्याहुः **कलिकायामाचार्यः** यत्रस्युर्बहवः पिंडास्तत्रबिल्वफलोपमाः । यत्रचैकोभवेत्पिंडस्तत्रखर्जूरसन्निभः ॥ प्रेतपिंडस्तुदैर्घ्येणद्वादशांगुलउच्यतइति **वायवीये** पत्नीपिंडांस्तुमृद्नीयात्त्रिवर्गस्यसहायिनी **हेमाद्रौलौगाक्षिः** महालयेगयायांच प्रेतश्राद्धेदशाहिके ॥पिंडशब्दप्रयोगःस्यादन्नमन्यत्रकीर्तयेत् **शाठ्यायनिः** असावेतत्तइत्युक्त्वातदंतेस्वधानमः । असावित्यत्रसम्बन्धरूपगोत्रादिविशिष्टंपित्रादिनामसम्बुध्यंतमुक्त्वा पुनश्चतुर्थ्यंतंतदंतेयंपिण्डइदमन्नंवास्वधानमोनममेतिवदेदितिहेमाद्रिः **पित्रादीनामज्ञानेत्वापस्तम्बः** यदिनामानिनविन्द्यात्स्वधापितृभ्यःपृथिवीषद्भ्यइतिप्रथमंपिण्डंदद्यात् ॥ स्वधापितृभ्योंतरिक्षसद्भ्यइतिद्वितीयम्स्वधापितृभ्योदिविवद्भ्यइतितृतीयम् ॥ एवंमा

तामहेषुमातृषुच ॥ बह्वृचानांतूक्तंप्राक् **कलिकायांस्मृतिः** यावदेवोच्चरेन्मन्त्रंतावत्प्राणांनिरोधयेत् ॥ येषांतुगृह्योक्तेदर्शेमातुः श्राद्धंपृथगुक्तंतेषांपितृभ्यःपश्चिमेमातृभ्यस्ततःपश्चिमेमातामहीभ्यः पिण्डादिदेयमितिसांख्यायनः ॥ अस्मिन्पक्षेततःपश्चिमेमातामहीभ्योपिदद्यादितिहेमाद्रिः ॥ पूर्वासुपितृभ्योदद्यादपरासुस्त्रीभ्यइतिसूत्राच्च ॥ एवंयत्रतीर्थमहालयादौकेचिदिच्छन्ति ॥ नारीणांपृथक्श्राद्धंमहर्षयइतिचतुर्विंशतिमतात् ॥ पित्रादिनवदैवत्यंतथा द्वादशदैवत्यमित्यग्निपुराणाच्च ॥ मातृणांपृथगुक्तम् ॥ यत्रवा आचार्यगुरुशिष्येभ्यःसखिज्ञातिभ्यएवच ॥ततःपत्नीभ्यश्चसर्वाभ्यस्तथैवचजलांजलीन्॥ पिंडांस्तेभ्यः सदादद्यात्पृथग्भाद्रपदेनरः ॥ तीर्थेषुचैव सर्वेषु माघमासे मघासुचेतिचतुर्विंशतिमते ॥ दौहित्रपुत्रदाराश्चएकनिष्ठाःसहोदराः । निःसन्तानामृतायेचतेभ्योप्यत्रप्रदीयतइतिभविष्ये ॥ एकोद्दिष्टान्युक्तानितत्रापितत्पश्चिमेपिण्डदानज्ञेयम् ॥ येषांनपृथक्कैःसपत्नीकाःपित्रादयोवाच्याः ॥ अन्वष्टकागयामातृश्राद्धंचैवमृतेहनि एकोद्दिष्टंतथामुक्त्वास्त्रीषुनान्यत्पृथग्भवेदितिशंखोक्तेश्च **मनुः** तेषुदर्भेषुतंहस्तंनिमृजेल्लेपभागिनाम् ॥ हस्तलेपाभावेपिहस्तंनिमृज्यादेवेतिमेधातिथिः **विष्णुः** अत्रापितरोमादयध्वमितिदर्भमूलेकरावघमर्षणम् **कलिकायांसुमन्तुः** एकोद्दिष्टेषुवर्षासुदर्भलेपोनविद्यते । सपिण्डीकरणादौतुलेपःसर्वत्रशस्यते **मनुः** आचम्योदक्परावृत्यत्रिराचम्यशनैरसून् । षड्ऋतूंश्चनमस्कुर्यात्पितृनेवचमन्त्रवत् ॥ उदकंनिनयेच्छेषंशनैःपिण्डांतिकेपुनः । त्रिःप्राणायामंकृत्वेतिमेधातिथिः ॥ अमन्त्रंप्राणान्निरुध्येतिकर्काद्याः ॥ मन्त्रवत्वसन्तायनमः ॥ नमोवःपितरइत्याद्यैः । शेषंपूर्वविनयनशेषम् **आश्वलायनः** निपृताननुमन्त्रयेतात्रपितरोमादयध्वं यथाभागमावृषायध्वमिति सव्यावृदुदगवृत्य यथाशक्तिप्राणान्नासित्वाऽभिपर्यावृत्त्याऽमीमदंतपितरो यथाभागमावृषायीषतेतिचरोःप्राणभक्षंभक्षयेन्नित्यंनिनयनमिति ॥ नित्यग्रहणंशेषाभोवपि कुर्यादित्यर्थः **शौनकः** अथैषामत्रपितरइत्याद्येनानुमन्त्रणम् ॥ अमीम

दन्तेत्याद्येनमन्त्रेणाप्यनुमन्त्र्यताम् ॥ पिण्डशिष्टचरोरन्नंकिञ्चिदाघ्रायतस्य जेत् ॥ प्रक्षाल्याचम्यशुंधंतामित्याद्यैरेवपूर्ववत् । मन्त्रैःपिण्डेषुपानीयंनिर्षिचेत्पितृतीर्थतः **व्याघ्रः** अद्भिःप्रक्षाल्यतत्पात्रंतत्पिण्डंप्रतिपूर्ववत् । कृत्वावनेजनंकुर्यात्पिण्डपात्रमधोमुखम् ॥ एतत्कातीयादीनाम् **आचार्यः** ततःसम्यग्द्विराचम्यनीवींविस्रस्यवाग्यतः **आश्वलायनः** असावभ्यंक्ष्वासावंक्ष्वेतिपिण्डेष्वभ्यंजनांजनेवासोदद्यादशामूर्णास्तुकांवापंचाशद्वर्षतायाऊर्ध्वं स्वलोमैतद्वःतितरोवासोमानोतोऽन्यत्पितरोयुंङ्ध्वमिति **श्राद्धचिन्तामणौ ब्राह्मे** एतद्वःपितरोवासइतिजल्पन्पृथक् । अमुकामुकगोत्रेतत्तुभ्यंवासःपठेद्बुधः ॥ इदंकातीयानाम् ॥ एतद्वइतिसूत्राणिप्रतिपिण्डमितितत्सूत्रात् **हे माद्रौब्राह्मे** श्रेष्ठमाहुस्त्रैककुदमञ्जनंनित्यमेवहि । तैलंकृष्णतिलेभ्यश्चदद्याद भ्यंजनंहितम् । त्रैककुदंसुरपोइतिप्रसिद्धम् ॥ अञ्जनप्राथम्यमापस्तम्बादिविषयम् **तत्रैवव्याघ्रः** गन्धपुष्पाणिधूपंचदीपंचविनिवेदयेत् **देवलः** दक्षिणांसर्वभोगांश्चप्रतिपिण्डंप्रदापयेत् ॥ भक्ष्याण्यपूपानिक्षूंश्चव्यंजनान्यशनानिच त्रैवशंखः यत्किंचित्पच्यतेगेहेभक्ष्यंभोज्यमगर्हितम् । अनिवेद्यनभोक्तव्यं पिण्डमूलेकथंचन ॥ एतत्सव्येनेतिकेचित् ॥ युक्तंत्वपसव्येन **मनुः** अवजिघ्रेच्चतान्पिण्डान्यथान्युप्तान्समाहितः । ततोनमोवःपितरइषइत्यादिनोपस्थानम् **मात्स्ये** अथाचांतेषुचाचम्यवारिदद्यात्सकृत्सकृत् । तिलपुष्पाक्षतान्पश्चादक्षय्योदकमेवच ॥ अत्रदैवेसव्यंपित्र्येत्वपसव्यमितिकर्कः ॥ परिभाषोक्तवचनातसव्यमितियुक्तं ॥ अत्राशिवाआपःसन्तुः । सौमनस्यमस्त्वित्यादिप्रयोगोज्ञेयः **मात्स्ये** नत्वाशीःप्रतिगृह्णीयाद्द्विजेभ्यःप्राङ्मुखोबुधः । अघोराःपितरःसंतुसन्त्वित्युक्तेपुनर्द्विजैः ॥ गोत्रंतथावर्धतांनस्तथेत्युक्तःसतैःपुनः ॥ दातारोनोभिवर्धतामन्नंचैवेत्युदीरयेत् ॥ स्वस्तिवाचनकंकुर्यात्पिण्डानुद्धृत्यभक्तितः ॥ स्वस्तिवाचनात्प्राक्पात्रत्तालंकार्यम् **हेमाद्रौबृहस्पतिः** भोजनेषुचतिष्ठत्सुस्वास्तिकुर्वतियोद्विजाः तदन्नमसुरैर्भुक्तंनिराशैःपितृभिर्गतैः **जातूकर्ण्यः** पात्राणिचालयेच्छ्राद्धेस्वयंशिष्योऽथवासुतः । नस्त्रीभिर्नचबा

लेननासजात्याकथंचन **याज्ञवल्क्यः** स्वस्तिवाच्यन्ततःकुर्यादक्षय्योदकमेव च **तत्रैववृद्धशातातपः** पितृणांनामगोत्रेणकरेदेयंतिलोदकम् । प्रत्येकंपि तृतीर्थेनअक्षय्यमिदमस्त्विति ॥ अत्रषष्ठीप्रागुक्ता **तत्रैवनागरखण्डे** उक्ता नमर्घ्यपात्रंतुकृत्वादत्वाचदक्षिणाम् हिरण्यंदेवतानांचपितृणांरजतंतथा **बृहस्पतिः**तस्मात्पणंकाकिणींवाफलपुष्पमथापिवा ॥ प्रदद्याद्दक्षिणांयज्ञेतयास सफलोभवेत् ॥ अत्रपित्रुद्देशेनदक्षिणादानेअपसव्यम्विप्रोद्देशेनसव्यमिति माधवः **कलिकायामाचार्यः** दद्याद्यज्ञोपवीत्येवताम्बूलंदक्षिणांतथा **अत्रिः** वदेच्चतांस्ततोविप्रान्पित्रादिभ्यःस्वधोच्यताम् ॥ **गोभिलः** अघोराःपितरःसंत्वित्युक्तेस्वधांवाचयिष्यइतिपृच्छतिपितृभ्यःस्वधोच्यतामित्युक्तेऽस्तुस्वधेत्युच्यमानेधारांदद्यादूर्जंवहंतीति ॥ आपस्तम्बेनतुपुत्रान्पौत्रानभितर्पयंतीरित्यपिपरिषेचनेमंत्रउक्तः **आश्वलायनः** अथैतान्प्रवाहयेत् ॥ परेतनपितरःसोम्यासोगंभीरेभिःपथिभिःपूर्वणेभिः ॥ दत्तायास्मभ्यंद्रविणेहभद्रं रथिंचनःसर्ववीरंनियच्छतेति **मात्स्ये** वाजेवाजेइतिजपन्कुशाग्रेणविसर्जयेत् **प्रचेताः** स्वस्तिवाच्यंततःकृत्वापितृपूर्वंविसर्जयेत् **आश्वलायनः** अन्नंप्रकीर्योपवीत्योंस्वधेतिविसृजेदस्तुस्वधेतिवा **ब्रह्मवैवर्ते** आमावाजेतिमंत्रंतुपठित्वाच प्रदक्षिणाम् । द्वारोपांततःकृत्वासंयतः प्रविशेद्गृहम् ॥ प्रांजलिश्चततः प्राहतान्विप्रान्सत्यवादिनः ॥ दातारोनोभिवर्धतामन्नंचनइतिबह्विति ॥ एवमस्त्वितितेतंचकथयंतिसमाहिताः ॥ एतन्मण्डलदेशेकार्यमितिहेमाद्रिः **मनुः**दातारोनोभिवर्धतांवेदाःसन्ततिरेवच ॥ श्रद्धाचनोमाव्यगमद्बहुधेयंचनोस्त्विति **बौधायनः** अन्नंचनोबहुभवेदतिथींश्चलभेमहि ॥ याचितारश्चनःसंतुमाचयाचिष्मकंचनेति ॥ अत्रदातारोनोभिवर्धतांलभध्वंयाचिद्वमित्याद्यूहेनपठित्वाविप्रैःप्रतिवचनंकार्यमितिसुदर्शनभाष्ये॥ स्वादुषंसदइतिब्राह्मणासःपितरइतिचमंत्रद्वयंपठंति **शौनकः** ब्राह्मणानथनिर्यातान्परीत्यत्रिःप्रदक्षिणम् ॥ सस्त्रीकःस्वजनैःसार्द्धंप्रणमेद्रचितांजलिः ॥ कनिष्ठप्रथमाज्येष्ठचरमास्युःप्रदक्षिणे **हेमाद्रौबृहस्पतिः** अद्यमेसफलंजन्मभवत्पादाब्ज

न्दनात् ॥ अद्यमेवंशजाःसर्वेयातावोनुग्रहादिवम् ॥ पत्रशाकादिदानेनक्लेशि तायूयमीदृशाः ॥ ततक्लेशजातंचित्तात्तुविस्मृत्यक्षंतुमर्हथ **प्रचेताः** विसृजे द्भक्तिसंयुक्तःसीमांतेचाप्यनुव्रजेत् **अथपिण्डप्रतिपत्तिः** ॥ **हेमाद्रौब्रह्मा ण्डे** पिण्डमग्नौसदादद्याद्भोगार्थीप्रथमंनरः । पत्न्यैप्रजार्थीदद्याद्वैमध्यमंमंत्र पूर्वकम् ॥ उत्तमांगतिमन्विच्छन्गोषुनित्यंप्रयच्छति । आज्ञांप्रज्ञांयशःकी र्तिमप्सुपिंडंप्रवेशयेत् ॥ प्रार्थयन्दीर्घमायुष्यंवायसेभ्यःप्रयच्छति ॥ आका शंगमयेदप्सुस्थितोवादक्षिणामुखः **आश्वलायनः** वीरंमेदत्तपित्तरइतिपि ण्डानांमध्यमंपत्नींप्राशयेत् ॥ आधत्तपित्तरोगभैकुमारंपुष्करस्रजम् ॥ यथा यमरपाअसदितिभर्त्रादत्तस्याद्येनादायद्वितीयेनप्राशनम् **आपस्तम्बस्तुदा नेमंत्रमाह** अपांत्वोषधीनांरसंप्राशयामिभूतकृतंगर्भधत्स्वेतिमध्यमंपत्न्यैप्र यच्छतीति **प्राशनेपि** यथेहपुरुषोअसदितितत्द्वितीयःपाठोअन्येषांतत्त च्छाखायांज्ञेयः **तत्रैवशंखः** पत्नीवामध्यमंपिण्डमश्नीयादार्तवान्विता **कलि कायांछागलेयः** प्राचीनावीतिनाऽमंत्र्यपत्नीपिण्डोविभज्यते ॥ प्रतिपत्न्य स्यमंत्रस्यकर्तव्यावृत्तिरत्रतु **माधवीयेविष्णुधर्मे** तीर्थेश्राद्धेसदापिण्डान्क्षि पेत्तीर्थेसमाहितः **याज्ञवल्क्यः** पिण्डांस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा **बृ हस्पतिः** अन्यदेशगतापत्नी रोगिणीगर्भिणीतथा ॥ तदातंजीर्णवृषभश्छा गोवाभोक्तुमर्हति **अथपिण्डोपघातेहेमाद्रौप्रायश्चित्तकाण्डेदेवलः** श्वसृ गालखरैःपिण्डःस्पृष्टोभिन्नःप्रमादतः ॥ कर्तुरायुष्यनाशःस्यात्प्रेतस्तंनोपस र्पति **जातूकर्ण्यःपूर्वश्लोकांते** तद्दोषपरिहारार्थंप्राजापत्यंप्रकल्पयेत् ॥ पु नःस्नात्वातदाकर्त्तापिण्डंकुर्याद्यथाविधि ॥ काकस्पर्शेतुनदोषः ॥ पिण्डोप घातंप्रक्रम्य ॥ धनस्यतुविनाशःस्यात्काकस्पर्शादिकंबिनेतितत्रैवश्लोकेगौ तमोक्तेः **स्मृतिदर्पणेअत्रिः** मार्जारमूषकस्पर्शेपिंडेचद्विदलीकृते पुनःपि ण्डाःप्रदातव्यास्तेनपाकेनतत्क्षणात् **बौधायनः** श्वचांडालादिभिःस्पृष्टःपि ण्डोयद्युपहन्यते । प्राजापत्यंचरित्वाथ पुनःपिण्डंसमाचरेत् **बोपदेवोप्येव माह** अथदिनान्तरेतुप्राजापत्यमात्रम् ॥ शेषप्रतिपत्तित्वेनपिण्डावृत्तौमा

नाभावादितिमैथिलास्तन्न ॥ सपिण्डीकरणादौशेषनाशेसंयोजनादिलोपाप त्तेः ॥ तेनवचनाद्यमनइवात्रापितन्मात्रपिण्डदानावृत्तिः ॥ अतएवनचनक्तं श्राद्धंकुर्वीतारब्धेवा ॥ भोजनसमापनादित्यापस्तंबसूत्रम् ॥ रात्रौभोजन मात्रंपूर्वेद्युःकार्यम् ॥ श्राद्धसमाप्तिस्तुपरदिनेएव ॥ समाप्तिपर्य्यन्तंकर्तुरुप वासश्चेतिहरिदत्तेनव्याख्यातम् ॥ तस्मात्पाकान्तरेणपिण्डदानमात्रंकार्य्य म् ॥ अथपिण्डनिषिद्धकालः ॥ सचप्रायेणमहालयादिनिर्णयेपूर्वमुक्तः **हेमाद्रौबृहत्पराशरः** युगादिषुमघायांच विषुवत्ययनेतथा ॥ भरणीषुचकु र्वीत पिण्डनिर्व्वपणंनहि **स्मृतिरत्नावल्याम्** पुत्रेजातेव्यतीपाते ग्रहणेच न्द्रसूर्य्ययोः ॥ श्राद्धंकुर्यात्प्रयत्नेन पिण्डनिर्वपणाद्दते **तत्रैवकात्यायनः** वृद्धेरनन्तरंचैवयावन्मासःसमाप्यते ॥ तावत्पिण्डान्नैवदद्यान्नकुर्यात्तिलतर्प णम् **बौधायनः** संस्कारेषुतथान्येषु मासंमासार्द्धमेवच **तथा** भानौभौमेत्र योदश्यांनन्दाभृगुमघासुच ॥ पिण्डदानंमृदास्नानं नकुर्यात्तिलतर्पणम् **त्रिस्थलीसेतौकार्ष्णाजिनिः** विवाहव्रतचूडासुवर्षमर्धन्तदर्धकम् ॥ उ त्तरार्धप्राग्वत् ॥ वृद्धिमात्रेतथान्यत्र पिण्डदाननिराक्रिया ॥ कृतागर्गादि भिर्मुख्यैर्मासमेकन्तुकर्मणां **हेमाद्रौज्योतिःपराशरः** विवाहेविहितेमासां स्त्यजेयुर्द्वादशैवहि ॥ सपिण्डाः पिण्डनिर्वापं मौंजीबन्धेषडैवहि **तत्रैव** म हालयेगयाश्राद्धेमातापित्रोः क्षयेहनि ॥ यस्यकस्यापिमर्त्यस्यसपिण्डीक रणेतथा ॥ कृतोद्वाहोपिकुर्वीतपिण्डनिर्वपणंसदेति ॥ मातापित्रोरितिक्षया हविशेषणम् ॥ हविरुभयत्ववद्विवक्षितम् ॥ तेनभ्रातृपितृव्यादिवार्षिकेपि ण्डदानंकार्यमितिकेचित् ॥ सपिण्डीकरणंनवश्राद्धषोडशश्राद्धोपलक्षणार्थ मितिनिर्णयामृतेउक्तम् **क्षयाहेविशेषः संग्रहे** मातापित्रोराब्दिकेतुविवाहा दिषुसर्वदा ॥ तिलैः पिण्डाः प्रदातव्याअन्यश्राद्धेविवर्जयेत् ॥ अत्रमूलंचि न्त्यम् **रामकौतुके** नन्दाश्वकामरव्यारभृग्वग्निपितृकालभे ॥ गण्डवैधृ तिपातेचपिण्डास्त्याज्याः सुतेप्सुभिः **विश्वरूपनिबन्धे** तिथिवारप्रयु क्तोयोदोषोवैसमुदाहृतः ॥ सश्राद्धेतन्निमित्तेस्यान्नान्यश्राद्धेकदाचन ॥

अन्यत्तूक्तंप्राक् **उच्छिष्टोद्वासनमाहहेमाद्रौवसिष्ठः** श्राद्धेनोद्वासनीया निउच्छिष्टान्यादिनक्षयात् ॥ श्वोतन्तेवैसुधाधारास्ताःपिवन्त्यकृतोदकाः **व्यासः** उच्छिष्टंनप्रमृज्यात्तु यावन्नास्तमितोरविः ॥ इदंगृहान्तरसत्त्वे **एकगृहेतुमनुः**उच्छेषणंतुतत्तिष्ठेद्यावद्विप्राविसर्जिताः ॥ ततोगृहबलिंकुर्य्या दितिधर्म्मोव्यवस्थितः ॥ बलिंवैश्वदेवादिनित्यकर्मेतिमेधातिथिः **ब्रह्माण्डे** शूद्रायचानुपेताय श्राद्धोच्छिष्टंनदापयेत् **तथा** कामंदद्याच्चसर्व्वन्तु शिष्या यचसुतायच ॥ भोक्तुरितिशेषः **जातूकर्ण्यः** द्विजभुक्तावशिष्टन्तुशुचिभूमौ निखानयेत् **अथवैश्वदेवादि अत्रमामकःश्लोकः** श्राद्धेनग्निककर्तृकेग्निक रणात्पश्चाज्जुहोतिर्बलिस्त्वंतेस्यादथवाभवेद्विकिरतःपश्चात्पृथक्त्वेपचेः॥श्रा द्धान्तेत्वथवामहालयविधावूर्ध्वभुजेस्यात्क्षयेत्वन्तेमाऽसुचमध्यताशुभविधा वादौतथासाग्निके **अस्यार्थः** साग्नेः पृथक्पाकेनसर्वत्रादौवैश्वदेवः ॥ पक्षा न्तंकर्मनिर्वर्त्य वैश्वदेवंचसाग्निकः ॥ पिण्डयज्ञंततःकुर्याच्चतोन्वाहार्यकंबुधः ॥ पित्रर्थंनिर्वपेत्पाकंवैश्वदेवार्थमेवच ॥ वैश्वदेवंनपित्रर्थं नदर्शेवैश्वदेविक मिति लौगाक्षिस्मृतेः ॥ अत्रसाग्निकआहिताग्निरितिहेमाद्रिः ॥ श्राद्धात्प्रागे वकुर्व्वीत वैश्वदेवंतुसाग्निकः ॥ एकादशाहिकंभुक्त्वातत्रद्यन्तेविधीयतेइति हेमाद्रौशालंकायनोक्तेश्च **तत्रैवपरिशिष्टे** सम्प्राप्तेपार्वणश्राद्धे एकोद्दिष्टतथै वच ॥ अग्रतोवैश्वदेवः स्यात्पश्चादेकादशेहनि ॥ स्मार्त्ताग्निमतांतद्रहिता नांवाग्नौकरणोत्तरंविकिरोत्तरंवा॥होममात्रंपृथक्पाकेन ॥ भूतयज्ञादितुश्राद्धां तएव ॥ अत्रमूलंहेमाद्रिचन्द्रिकादौस्पष्टम् ॥ सर्वेषांश्राद्धांतेवातत्पाकेनवै श्वदेवनित्यश्राद्धादीतितृतीयः ॥ श्राद्धंनिर्वर्त्त्यविधिवद्वैश्वदेवादिकंततः ॥ कुर्याद्भिक्षांततोदद्याद्भन्तकारादिकन्तथेतिपैठीनसिस्मृतेः॥ ततःश्राद्धशेषात् श्राद्धाद्विश्राद्धशेषेण वैश्वदेवंसमाचरेदितिचतुर्विंशतिमताच्च ॥ एवंवैश्वदे वकालत्रयस्यआशार्केशांखायनपरिशिष्टमुदाहृत्यैवव्यवस्थोक्ता ॥ आदौवृ द्धौक्षयेचांते दर्शेमध्येमहालये ॥ एकोद्दिष्टेनिवृत्तेतु वैश्वदेवेविधीयतइति बहुस्मृत्युक्तत्वात्सर्वेषांश्राद्धांतेएवेतिमेधातिथिस्मृतिरत्नावल्यादयोबहवः ॥

बोपदेवस्तु वृत्तिकारेणविसर्जनांतंश्राद्धमुक्त्वाउच्छेषणंत्वितिपूर्वोक्तमनुवा क्योदाहरणाद्बह्वृचनां श्राद्धान्तएव ॥ मध्यपक्षस्त्वन्यशाखापरइत्याह ॥ हेमाद्रिस्तुवृद्धावप्यन्तेएववैश्वदेवमाह ॥ कातीयानांतुश्रौतस्मार्त्ताग्निमतामा दावेकेनैवपाकेनेतिकर्कः ॥ अन्येषांमतेतैत्तिरीयाणांतुसाग्निकानांसर्वत्रादौ वैश्वदेवः ॥ पंचयज्ञाश्चअंतेचेतिमुदर्शनभाष्येउक्तम् ॥ अस्यपक्षद्वयस्यपूर्व वद्व्यवस्था **हेमाद्रौमार्कंडेयः** ततोनित्यक्रियांकुर्याद्भोजयेच्च ततोतिथीन् ॥ ततस्तदन्नम्भुंजीत सहभृत्यादिभिर्नरः ॥ ततःश्राद्धशेषात् ॥ नित्यक्रियांनि त्यश्राद्धम् **तत्र** पृथक्पाकेननैत्यकमितितेनैवोक्तेः ॥ पाकैक्येविकल्पः **अथ नित्यश्राद्धम् ॥ हेमाद्रौव्यासः** एकमप्याशयेद्विप्रंषण्णामप्यन्वहंगृही ॥ अपीत्यनुकल्पः **प्रचेताः** नामंत्रणंनहोमंचनाह्वानंनविसर्जनम् ॥ नपिण्डदा नंविकिरंनदद्यादत्रदक्षिणाम् **अत्र** निर्दिश्यभोजयित्वातु किंचिद्दत्वाविस र्जयेदितितेनैवोक्तेर्दक्षिणाविकल्पः **यत्तु** नित्यश्राद्धंदैवहीनं नियमादिविव र्जितम् ॥ दक्षिणारहितंचैवदातृभोक्तृव्रतोज्झितमितिकाशीखण्डे ॥ तद्दि प्राभावपरमितिपृथ्वीचन्द्रः **भविष्ये** आवाहनंस्वधाकारं पिण्डाग्नौकरणादि कम् ॥ ब्रह्मचर्यादिनियमाविश्वेदेवानचैवहि ॥ दातृणामथभोक्तृणांनियमो नचविद्यते ॥ एतद्दिवासम्भवेरात्रावपिकार्यम् ॥ दिवोदितानिकर्माणिप्रमा दादकृतानिवै ॥ यामिन्याःप्रहरंयावत्तात्कर्माणिकारयेदितिबृहन्नारदीयो क्तेः ॥ रात्रौप्रहरपर्य्यंतंदिवाकृत्यानिकारयेत् ॥ ब्रह्मयज्ञंचसौरंच वर्जयि त्वाविशेषतइतिपृथ्वीचन्द्रधृतसंग्रहोक्तेश्च ॥ नचदार्शिकाब्दिकाद्यपिरात्रौ स्यादितिवाच्यम् ॥ इष्टापत्तेः ॥ तस्यतिथिसम्बन्धितत्त्वात् ॥ संध्यारात्रौ नकर्तव्यंश्राद्धंखलुविचक्षणैरितिविष्णवाद्यैरात्रौनिषेधात् ॥ **अतएवाल्पद्रा दश्यां** उषःकालेद्वयंकुर्यात् प्रातर्मध्याह्निकंतदेत्याद्यैर्वाक्यैस्त्रयोदशीश्रा द्धंनापकृष्यते ॥ भिन्नविषयत्वादित्युक्तंमदनरत्ने ॥ नित्यंत्वपकृष्यते ॥ अन्वहमित्युक्तेस्तिथिसवार्धिकाभावात् **यथाचसुदर्शनभाष्ये** परपक्षे पित्र्याणीतिनियमेपिनित्यश्राद्धत्वेसंवत्सरमित्यत्यंतसंयोगोद्वितीया ॥ बला

च्छुक्लपक्षेपीत्युक्तम् ॥ तथारात्रावपि ॥ तथाचमाधवेनप्रतिपत्प्रकरणेस्पष्ट मुक्तम् ॥ वयंचाग्रेवक्ष्यामः ॥ अस्यदिनेकरणेलोपएव ॥ रात्रौश्राद्धंनकुर्वी तेतिनिषेधादितिपृथ्वीचन्द्रोदयः **पात्राभावेकौर्मे** उद्धृत्यवायथाशक्तिकिं चिदन्नंप्रकल्पयेत् **तत्प्रतिपत्तिमाहविष्णुः** भिक्षुकाभावेअन्नंगोभ्योदद्या दग्नौवाप्रक्षिपेदिति **हेमाद्रौनागरखंडे** नित्यश्राद्धंनकुर्वीतप्रसंगाद्यत्रसिद्ध्य ति ॥ श्राद्धांतरेकृतेन्यत्रनित्यत्वात्तन्नहापयेत्॥षड्दैवतेपृथक्त्वेनेत्यर्थः **मा त्स्ये** ततस्तुवैश्वदेवांतेसभृत्यसुतबांधवः ॥ भुंजीतातिथिसंयुक्तःसर्वपितृनि षेवितम् ॥ सर्वपर्वनिषिद्धंमांसमाद्यपीत्यर्थः ॥ एवंकृष्णैकादश्यादौगृहि णोपिभोजनम् ॥ अस्यवैधत्वेननिषेधाप्रवृत्तेः ॥ एवंग्रहणवेधेपि ॥ यत्त्वना हिताग्नेरमाषममांसंव्रतयोदित्युक्तंतद्धेयमेव ॥ श्रौतत्वेनतस्यबलवत्त्वात् **दे वलः** श्राद्धंकृत्वातुयोमर्त्योनभुंक्तेऽथकदाचन ॥ देवाहव्यंनगृह्णंतिकव्या निपितरस्तथा ॥ शिवरात्र्यैकादश्यादौत्ववघ्राणमेवेत्युक्तंप्राक् ॥ यत्रतूपवा सोनावश्यकस्तत्रैकभक्तमयाचितंवाकार्यमितिहेमाद्रिः **जातूकर्ण्यः** अह न्येवतुभोक्तव्यंकृतेश्राद्धेद्विजन्मभिः ॥ अन्यथाह्यासुरंश्राद्धंपरपाकेचसेवि ते **श्राद्धशेषभोजनस्यक्वचिन्निषेधमाहहेमाद्रौप्रायश्चित्तकांडेमार्कंडेयः** पित्रादीनामथाऽन्येषांश्राद्धशेषान्नभोजनम् ॥ व्रतिनांविधवानांचयतीनांच विगर्हितम् ॥ अन्येभिन्नगोत्राः ॥ व्रतिनोब्रह्मचारिणः ॥ श्राद्धावशिष्टभो क्तारस्तेवैनिरयगामिनः ॥ सगोत्राणांसकुल्यानांज्ञातीनांचनदोषकृदितितत्रै वोक्तेः **तत्रैवजाबालिः** विप्रस्त्वन्यगृहेश्राद्धेशिष्टान्नंभोजनंचरेत् ॥ प्राजा पत्यविशुद्धिःस्याज्ज्ञातिगोत्रेनदोषकृत् ॥ यतीनांवपनंलक्षप्रणवजपश्चेतित त्रैवोक्तम् **अस्यापवादमाहसएव** श्वशुरस्यगुरोर्वापिमातुलस्यमहात्मनः ॥ ज्येष्ठभ्रातुश्चपुत्रस्यब्रह्मनिष्ठस्ययोगिनः ॥ एतेषांश्राद्धशिष्टान्नंभुक्त्वादो षोनविद्यते ॥ इतिकेचित्प्रशंसंतिमुनयस्तदसांप्रतम् ॥ विशेषांतरंतत्रैवज्ञे यम् **हेमाद्रौजाबालिः** तांबूलंदंतकाष्ठंचस्नेहस्नानमभोजनम् ॥ रत्यौषधि परान्नानिश्राद्धकर्त्तावित्रवर्जयेत् **पृथ्वीचन्द्रोदयेआचार्यः** नशूद्रंभोजयेत्त

स्मिन्गृहेयत्नेनतद्दिने ॥ श्राद्धशेषंनशूद्रेभ्यःप्रदद्यादखिलेष्वपि ॥ ७ ॥

इतिकमलाकरभट्टकृते निर्णयसिन्धौ पार्वणश्राद्धम् ॥

अथानुकल्पःतत्रविप्रालाभे भोजयेदथवाप्येकंब्राह्मणंपंक्तिपावनम् ॥ दैवेकृत्वातुनैवेद्यंपश्चात्तस्यतुनिर्वपेदितिशंखोक्तेरेकोविप्रःपूर्वमुक्तः ॥ विप्राभावेदर्भबटुः ॥ निधायवादर्भबटूनासनेषुसमाहितः ॥ प्रेषानुप्रेषसंयुक्तंविधानंप्रतिपादयेदितिदेवलोक्तेः ॥ अशक्तावामश्राद्धम् ॥ आपद्यनग्नौतीर्थेचप्रवासेपुत्रजन्मनि ॥ आमश्राद्धंप्रकुर्वीतभार्यारजसिसंक्रमेइतिकात्यायनोक्तेः **पृथ्वीचन्द्रोदये जमदग्निः** यावत्स्यान्नाग्निसंयुक्तउत्सन्नाग्निरथापिवा । आमश्राद्धंतदाकुर्याद्धस्तेग्नौकरणंभवेत् **कौर्मे** अनग्निरधनोवापितथैवव्यसनान्वितः । आमश्राद्धंद्विजःकुर्याद्वृषलस्तुसदंवहि ॥ आहिताग्नौप्रवासस्थेतत्पत्नीगृहेदर्शंऋत्विगादिनाकारयेत् ॥ अमावास्यादिनियतंप्रोषितेधर्मचारिणी ॥ पत्यौतुकारयेन्नित्यमन्येनाप्यृत्विगादिनेतिलघुहारीतोक्तेरितिपृथ्वीचन्द्रोदयः ॥ आदिपदमाब्दिकादिसर्वपार्वणपरमितिशूलपाणिः **सुमंतुः** पाकाभावेधिकारःस्याद्विप्रादीनांनराधिप । अपत्नीनांमहाबाहोविदेशगमनादिभिः ॥ सदाचैवतुशूद्राणामामश्राद्धंविदुर्बुधाः **प्रचेताः** स्त्रीशूद्रःस्वपचश्चैवजातकर्मणिचाप्यथ । आमश्राद्धंसदाकुर्याद्विधिनापार्वणेनतु । स्वयंपचतीतिस्वपचअपत्नीकः **विष्णूशनसौ** आत्मनोदेशकालाभ्यांविप्लवेसमुपस्थिते ॥ आपद्यनग्नौतीर्थेचप्रवासेपत्न्यसंभवे ॥ चंद्रसूर्यग्रहेचैवदद्यादामंविशेषतः । नपक्वंभोजयेद्विद्वान्सच्छूद्रोपिकदाचन ॥ भोजयन्प्रत्यवायीस्यान्नचतस्यफलंलभेत् ॥ अत्रप्रवासतीर्थग्रहणादावामहेमश्राद्धमेव ॥ पाकश्राद्धंतुनभवत्येवेतिहेमाद्रिरत्नावल्यादयः **अपरार्कविज्ञानेश्वरादयस्तु** पाकाभावेद्विजातीनामामश्राद्धंविधीयत इतिसुमंतूक्तेः ॥ साग्निकैर्निरग्निकैश्चप्रवासादौसर्वत्रपाकाभावेआमादिकार्यम् ॥ पाकसंभवेत्वन्नेनैवैत्याहुः अतएव पाकश्राद्धमुक्त्वा एतच्चानुपनीतोपिकुर्यात्सर्वेषुकर्मसु भार्या विरहितोप्येतत् प्रवासस्थोपिनित्यशइतिमात्स्येनिरग्नेरपिपाकेनोक्तमितिशूलपाणिकल्पतरुः

एतच्छब्दःश्राद्धमात्रपरइत्यन्ये एकोद्दिष्टंतुकर्तव्यंपाकेनैवसदास्वयमितिल घुहारीतीयमपिसाग्नेरेव निरग्नेर्महैकोद्दिष्टमप्यामेन शूद्रस्यतुदशाहपिंडाद्या मेनेतिहलायुधः ॥ उत्सन्नाग्नीनांत्वामश्राद्धमेवपूर्वोक्तजमदग्निवाक्यात् **म रीचिः** श्राद्धविघ्नेद्विजातीनामश्राद्धंप्रकीर्तितम् अमावास्यादिनियतंमा ससंवत्सराद्दते **स्मृतिदर्पणे** मृताहंचसपिंडंचगयाश्राद्धंमहालयम् । आप न्नोपिनकुर्वीतश्राद्धमामेनकर्हिचित् **हेमाद्रौव्यासः** आमंददतुकौंतेयदद्यादा मंचतुर्गणम् । द्विगुणंत्रिगुणंवापिनत्वेकगुणमर्पयेत् ॥ सिद्धान्नेतुविधिर्यःस्या दामश्राद्धेप्यसौविधिः ॥ आवाहनादिसर्वंस्यात्पिंडदानंचभारत ॥ दद्याच्च द्विजातिभ्यःशृतंवाशृतमेववा॥ तेनाग्नौकरणंकुर्यात्पिंडास्तेनैवनिर्वपेत् **पक्षां तरमाहसएव** आमंददन्हिकौन्तेयतदामंद्विगुणंचरेत् ।त्रिगुणंचतुर्गुणंचापि नत्वेकगुणमर्पयेत् **स्मृत्यर्थसारेसममप्युक्तं ॥ षट्त्रिंशन्मते** आमश्राद्धं यदाकुर्यात्पिंडदानंकथंभवेत् । गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा ॥ पिं डान्दद्याद्यथालाभंतिलैःसहाविमत्सरः **पृथ्वीचन्द्रोदयेव्यासः** आमश्राद्धं यदाकुर्याद्विधिज्ञःश्राद्धदःसदा । हस्तेनौकरणंकुर्याद्ब्राह्मणस्यविधानतः ॥ एतत्साग्नेर्निरग्नेःसदातत्सत्त्वात् **यत्तु** आमेनपिंडंदद्याच्चेद्विप्रान्पाकेनभोजये त् । पक्केनकुरुतेपिंडमामान्नंयःप्रयच्छति ॥ तावुभौमानुजौप्रोक्तौनरकार्हौ नसंशयइतितद्दर्शादिपरम् ॥ देशाचाराद्व्यवस्थेतियुक्तम् **मरीचिः** आवाह नेस्वधाकारेमंत्राऊह्याविसर्जने।अन्यकर्मण्यनूह्याःस्युरामश्राद्धविधिःस्मृतः ॥ आवाहनेहविषेअत्तवइत्यत्रस्वीकर्तवेइत्यूहः ॥ स्वधाकारेनमोवःपितरइषेइ त्यत्रइषेपदस्थानेआमद्रव्यायेत्यूहः ॥ विसर्जनेवाजेवाजेइत्यत्रतृप्ताइतिस्था नेतप्स्यततृप्यतेतिवोहः ॥ यद्यपितस्माद्दचंनोहेदितिऋच्यूहोनिषिद्धस्तथापि वचनाद्भवति ॥ तृप्तिप्रश्नोवगाहश्चजुषप्रश्नोयथासुखम् । आमश्राद्धेभवेन्नैत दपोशानंचपंचमम् ॥ अयंचानुवादः खलेवाल्यांछेदनादीनामिवार्थाभावाल्लो पसिद्धेः **धर्मप्रदीपेतु** आमंचतुर्गुणंदद्यादथवाद्विगुणंतथा । हेमंचाष्टगुणंत द्वदामेहैमेप्यसौविधिः ॥ आमेहैमेतथानित्येनांदीश्राद्धेतथैवच । व्यतीपाता

दिकेश्राद्धेनियमान्परिवर्जयेत् ॥ गृहपाकात्समुद्धृत्यसक्तुभिःपायसेनवा। पिं डदानंप्रकुर्वीतआमेहैमेकृतेसति ॥ आमश्राद्धेचवृद्धौचप्रेतश्राद्धेतथैवच। वि किरंनैवकुर्वीतमुनिःकात्यायनोऽब्रवीत्आमश्राद्धमनंगुष्ठमग्नौकरणवर्जितम्। तृपिप्रश्नविहीनंतुकर्तव्यंमानवैर्ध्रुवम् आवाहनाग्नौकरणंविकिरंपात्रपूरणम् । तृप्तिप्रश्नंनकुर्वीतआमेहैमेकदाचनेत्युक्तम् **एतच्च** आवाहनंभवेत्कार्यमर्घ्य दानंतथैवचेतिहेमाद्रौभविष्यादिविरोधाच्चिंत्यम् ॥ शाखांतरविषयंवास्तु ॥ विकिरोप्यामेनेतिहेमाद्रिः ॥ शूद्रस्यतुतत्रैवोक्तम्॥ अग्नौकरणमंत्रश्चनमस्का रोविधीयते। अग्नयेकव्यवाहनायनमः ॥ सोमायपितृमतेनमइत्ययंमत्रः **मात्स्ये** मंत्रवर्ज्जंहिशूद्रस्यसर्वमेवविधीयते । एवंशूद्रोपिसामान्यवृद्धिश्राद्धं चसर्ववेदा ॥ नमस्कारेणमंत्रेणकुर्यादामान्नवद्बुधः ॥ तच्चपूर्वाह्णेकार्यम् ॥ आम श्राद्धंतुपूर्वाह्णेएकोद्दिष्टंचमध्यतः । पार्वणंचापराह्णेतुप्रातर्वृद्धिनिमित्तकमिति हारीतोक्तेः ॥ एतद्द्विजविषयम् ॥ शूद्रकर्तृकंत्वपराह्णएव ॥ मध्याह्नात्पर तोयस्तुकुतुपःसमुदाहृतः । आमश्राद्धन्तुतत्रैव पितॄणांदत्तमक्षयमितिसुम न्तूक्तेरित्यपरार्केहेमाद्रौचोक्तम **तदभावेहेमश्राद्धमाहहेमाद्रौमरीचिः** अमान्नस्याप्यभावेतुश्राद्धंकुर्वीतबुद्धिमान् । धान्याच्चतुर्गुणेनैव हिरण्येनसु रोचिषा **धर्मः** आमन्तुद्विगुणंप्रोक्तं हेमन्तद्धच्चतुर्गुणम् **स्मृत्यर्थसारे** हिरण्यमष्टगुणंचतुर्गुणंसमंवादद्यात् **हेमाद्रौभविष्ये** अन्नाभावेद्विजाभावे प्रवासेपुत्रजन्मनि । हेमश्राद्धंसंग्रहेच तथास्त्रीशूद्रयोरपि **षट्त्रिंशन्मतेतु र्थपादे** वर्जयित्वाक्षयेहनीतिपाठः यस्यभार्यारजस्वलेतिचव्यासपाठः **पु त्रोत्पत्तौतुहेमानियममाहसंवर्त्तः** पुत्रजन्मनिकुर्वीत श्राद्धंहेम्नैवबुद्धिमा न् । नपक्वेननचामेनकल्याणान्यभिकामयन् **भविष्ये** गृहपाकात्समुद्धृत्य सक्तुभिःपायसेनवा । पिण्डदानंप्रकुर्वीतहेमश्राद्धेकृतेसति ॥ शूद्रस्तुगृह पाकेन तत्पिण्डान्निर्वपेत्तथा । सक्तुमूलंफलंतस्य पायसंवाभवेत्स्मृतम् ॥ हे मश्राद्धेपिंडदाननेतिदिवोदासः ॥ स्मृत्यर्थसारेतुविकल्पउक्तस्तदाशयंन विद्मः **षट्त्रिंशन्मते** नामंत्रणाग्नौकरणं विकिरोनैवदीयते । तृप्तिप्रश्नोपि

नैवात्र कर्त्तव्यःकेनचिद्भवेत् ॥ अत्रमरीचिनाआमाभावेहेमविधानेनस्थाना पत्याधर्मप्राप्तेःपूर्ववन्मंत्रोहः पूर्वाह्णकालताचज्ञेयेतिदिक् पूर्वोक्तधर्म्मप्रदीपो क्तेश्च व्यासः हिरण्यमामंश्राद्धीयं लब्धंयत्क्षत्रियादितः । यथेष्टंविनियो ज्यंस्याद्भुंजीयाद्ब्राह्मणांस्त्वयम् ॥ विप्रलब्धंभुंञ्जीयात् ॥ क्षत्रियादिलब्धेतुय थेष्टविनियोगः ॥ तेनापिश्राद्धवैश्वदेवादिनकार्यम् ॥ देवोद्देशेनत्यक्तस्यदेव तांतरायत्यागायोगादितिदेवयाज्ञिकःशूद्रलब्धेतूक्तंतत्रैवषट्त्रिंशन्मते आ मंशूद्रस्ययत्किंचिच्छ्राद्धिकंप्रतिगृह्यते ॥ तत्सर्वंभोजनायालं नित्यनैमित्ति केनचेति शुद्धितत्त्वेंगिराः शूद्रवेश्मनिविप्रेण क्षीरंवायदिवादधि । निवृत्ते ननभोक्तव्यंशूद्रान्नंतदपिस्मृतम्।शूद्राद्विप्रगृहेष्वन्नं प्रविष्टन्तुसदाशुचिःपरा शरः तावद्भवतिशूद्रान्नं यावन्नस्पृशतिद्विजः । द्विजातिकरसंस्पृष्टं सर्व्वंतन्न विरुध्यते विष्णुपुराणे संप्रोक्षयित्वागृह्णीयाच्छूद्रान्नंगृहमागतम् अंगिराः पात्रांतरगतंग्राह्यं दुग्धंस्वगृहमागतम् सपिण्डश्राद्धशक्तावाहहेमाद्रौसंव र्त्तः समग्रंयस्तुशक्नोति कर्तुनैवेहपार्वणम् । अपिसंकल्पविधिना कालेतस्य विधीयते ॥ पात्रेभोज्यस्यचान्नस्यत्यागःसंकल्पउच्यते व्यासः सांकल्पन्तु यदाकुर्यान्नकुर्यात्पात्रपूरणम् । नावाहनाग्नौकरणे पिण्डांश्चैवनदापयेत् ॥ पा त्रमर्घ्यस्य ॥ समंत्रकावाहनस्यनिषेधः । तूष्णींतुभवत्येवेतिहेमाद्रिः स्मृत्य र्थसारे विकिरन्तुनदातव्यमितितृतीयपादेपाठः स्मृत्यन्तरे त्यजेदावाहनं चार्घ्यमग्नौकरणमेवच । पिण्डांश्चविकिराक्षय्ये श्राद्धेसांकल्पसंज्ञके हेमद्रौ वृद्धशातातपस्तु पिण्डनिर्वापरहितं यत्तुश्राद्धविधीयते । स्वधावाचनलोपो त्र विकिरस्तुनलुप्यतइत्याह पृथ्वीचन्द्रोदयेवासिष्ठः आवाहनंस्वधाशब्दं पिण्डाग्नौकरणन्तथा । विकिरंपिण्डदानंच सांकल्पेषड्विवर्जयेत् विकिरेवि कल्पःस्मृत्यन्तरे अंगानिपितृयज्ञस्य यदाकर्तुनशक्नुयात् । सतदावाचये द्विप्रान् संकल्पात्सिद्धिरस्त्विति छागलेयः पिण्डोयत्रनिवर्तेत मघादिषुकथं चन । सांकल्पन्तुतथाकार्यं नियमाद्ब्रह्मवादिभिः कार्ष्णाजिनिः मौंजीब न्धाद्वत्सरार्धंवत्सरंपाणिपीडतात् । पिण्डान्सपिण्डानोदद्युः प्रेतपिण्डं वि

नात्रतु ॥ अस्यापवादःपित्रोराब्दिकादौपूर्वमुक्तः **त्यक्ताग्नेरपिसांकल्पमुक्तंषट्त्रिंशन्मते** अनग्निकोयदाविप्र उत्सन्नाग्निस्तथैवच। तथावृद्धिषुसर्वासु संकल्पश्राद्धमाचरेत् **अशक्तौपृथ्वीचन्द्रोदयेवृहन्नारदीये** द्रव्याभावेद्विजाभावे अन्नमात्रन्तुपाचयेत् पैतृकेनतुसूक्तेनहोमंकुर्याद्विचक्षणः देवलः पिण्डमात्रंप्रदातव्यमभावेद्रव्यविप्रयोः। श्राद्धीयाहनिसंप्राप्तेभवेन्निरशनोपिवा **वृद्धवसिष्ठः** किंचिद्दद्याशक्तस्तु उदकुम्भादिकंद्विजे। तृणानिवागवेदद्यात्पिण्डांवाप्यथनिर्वपेत् ॥ तिलदर्भैःपितॄन्वापि तर्पयेत्स्नानपूर्वकम् **हेमाद्रौभविष्ये** अग्निनावादहेत्कक्षंश्राद्धकालेसमागते। तस्मिन्वोपवसेद्द्विजपेद्वाश्राद्धसंहिताम् ॥ श्राद्धसंहितासमंत्रश्राद्धसंकल्पः **विष्णुवराहपुराणयोः** असमर्थोन्नदानस्यधान्यंमांसंस्वशक्तितः। प्रदास्यतितिलान्वापि स्वल्पांवापिचदक्षिणाम् ॥ सर्व्वाभावेवनंगत्वा कक्षामूलप्रदर्शकः। सूर्यादिलोकपालानामिदमुच्चैःपठिष्यति ॥ नमेस्तिवित्तंनधनंनचान्नंश्राद्धोपयोगिस्वपितॄन्नतोस्मि। तृप्यन्तुभक्त्यापितरोमयैतौभुजौकृतौवर्त्मनिमारुतस्य ॥ इत्येतत्पितृभिर्गीतं भावाभावप्रयोजनम् ॥ यःकरोतिकृतंतेन श्राद्धम्भवतिभारत **प्रभासखण्डे** गत्वारण्यममानुष्यमूर्ध्ववाहुर्विरौत्यदः। निरन्नोनिर्धनोदेवाः पितरोमानृणंकृथाः ॥ नमेस्तिवित्तंनधनंनभार्याश्राद्धंकथंवःपितरःकरोमि। वनंप्रविश्येहतुतन्मयोच्चैर्भुजौकृतौवर्त्मनिमारुतस्य ॥ श्राद्धर्णमेतद्भवतांप्रदत्तंमह्यंदयध्वंपितृदेवताद्याः। आख्यायचोत्क्षिप्यभुजौततोवै दिवाचरात्रिंसमुपोष्यतिष्ठेत्। भवेत्सवैतेनकृतेनतेषामृणोतमुक्तःपितृदेवतानाम् ॥ इत्यनुकल्पः **अथश्राद्धभोजनेप्रायश्चित्तम्** दर्शेषट्प्राणायामाः ॥ वृद्धौत्रयः ॥ संस्कारेषुजातकर्मादिचूडान्तेषुसांतपनम् ॥ आद्येचान्द्रंवा ॥ अन्यसंस्कारेषूपवासः ॥ सीमन्तेचान्द्रमितिविज्ञानेश्वरः ॥ आपदिनवश्राद्धैकादशाहेषु भोजनेकायः ॥ द्वादशाहेऊनमासेचपादोनः ॥ द्विमासेत्रिपक्षेऊनषष्ठोनाब्दयोश्चार्धकृच्छ्रः ॥ त्रिमासाद्याब्दिकान्तेषुसपिण्डनेचपादकृच्छ्रउपवासो वा ॥ गुरुद्रव्यार्थभोजनेऽर्धम् ॥ जपशीलेतदर्धम् ॥ अनापदितूनमासांते

षुचांद्रंकार्यंवा ॥ द्विमासादौपादोनं ॥ त्रिमासादावर्धकायः ॥ आब्दिकेपा दोनकायः ॥ पुनराब्दिकेएकाहः ॥ क्षत्रियादिश्राद्धेषुद्वित्रिचतुर्गुणानिज्ञे यानि ॥ चाण्डालसर्पश्वादिहतपतितक्लीबादिनवश्राद्धेचांद्रम् ॥ आद्यमासि कांतेचांद्रंपराकश्च ॥ द्वादशाहादौपराकः ॥ द्विमासादावतिकृच्छ्रः ॥ त्रिमा सादौकायः ॥ आब्दिकेपादः ॥ अभ्यासेसर्वंद्विगुणम् ॥ आमहेमसंकल्पश्रा द्धेषुतत्तदर्द्धानि ॥ यतिर्ब्रह्मचारीचोक्तंप्रायश्चित्तंकृत्वात्रीनुपवासान्प्राणाया मान्यृताशनंचाधिकंकृत्वाव्रतशेषंसमापयेत् ॥ अनापदिद्विगुणम् ॥ दर्शा दौदशगायत्रीमंत्रिताआपःपिवेत्षट्प्राणायामावा ॥ संस्कारेषुचौलेकृच्छ्रः ॥ सीमंतेचांद्रम् ॥ अन्येषूपवासइतिदिक् ॥ अत्रमाधवमिताक्षरादौ क्वचिद्विरो धोविषयभेदात्परिहार्यः ॥ एकादशाहेचांद्रंपुनःसंस्कारश्चेतिप्रायश्चित्तकांडे हेमाद्रिः **यत्तूशनाः** दशकृत्वःपिवेदापोगायत्र्याश्राद्धभुग्द्विजइतितदनुक्त प्रायश्चित्तश्राद्धपरमितिविज्ञानेश्वरः **अथक्षयाहश्राद्धम्** ॥ **तत्स्वरूपमाह हेमाद्रौव्यासः** मासपक्षतिथिस्पृष्टेयोयस्मिन्म्रियतेहनि । प्रत्यब्दंतुतथाभूतं क्षयाहंतस्यतंविदुः **नारदीये** पारणेमरणेनॄणांतिथिस्तात्कलिकीस्मृता । अ त्रचांद्रंमानंज्ञेयं ॥ आब्दिकेपितृकार्येचचांद्रोमासःप्रशस्यतइतिगर्गोक्तेः ॥ मलमासमृतस्यतुसौरम् ॥ मलमासमृतानांतुसौरंमानंसमाश्रयेदितिहेमाद्रा वुक्तेः ॥ एतन्मृतमासस्यैवाधिक्येज्ञेयम् **ब्राह्मे** प्रतिसंवत्सरंकार्यमातापित्रो र्मृतेहनि । पितृव्यस्याप्यपुत्रस्यभ्रातुर्ज्येष्ठस्यचैवहि ॥ अपुत्रस्येतिभ्रात्राप्य न्वयः ॥ ज्येष्ठस्येतिकनिष्ठस्यानावश्यकत्वार्थम् **मदनरत्नेभविष्ये** सर्वेषा मेवश्राद्धानांश्रेष्ठंसांवत्सरंमतम् ॥ **तथा** भोजकोयस्तुवैश्राद्धंनकरोतिखगाधि प ॥ मातापितृभ्यांसततंवर्षेवर्षेमृतेहनि ॥ सयातिनरकंघोरंतामिस्रंनामनाम तः ॥ तच्चनानास्मृतिष्वेकोद्दिष्टंपार्वणंचोक्तम् **आद्यमाहयमः** सपिंडीकर णादूर्ध्वंप्रतिसंवत्सरंसुतैः । मातापित्रोःपृथक्कार्यमेकोद्दिष्टंमृतेहति **व्यासः** एकोद्दिष्टंतुकर्तव्यंपित्रोश्चैवमृतेहनि । एकोद्दिष्टंपरित्यज्यपार्वणंकुरुतेनरः ॥ अकृतंतद्विजानीयाद्वेचपितृघातकः **अंत्यमाहशातातपः** सपिंडीकरणंकृ

त्वाकुर्यात्पार्वणवत्सदा ॥ प्रतिसंवत्सरंश्राद्धंछागलेनोदितोविधिः । यःस पिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत् । विधिघ्नस्तेनभवतिपितृहाचोपजायते ॥ अत्रौरसक्षेत्रयोःपार्वणंदत्तकादीनामेकोद्दिष्टमित्येकःपक्षः ॥ साग्नेःपार्वणंनि रग्नेरेकोद्दिष्टमित्यपरः ॥ तद्दूषणंमिताक्षरादौज्ञेयं **कल्पतरुस्तु** साग्न्योरौरस क्षेत्रजयोःपार्वणम् ॥ निरग्निकयोस्त्वेकोद्दिष्टमित्वाह ॥ अपरार्केप्येवम् ॥ द त्तकादयोदशपुत्रास्तुसाग्नयोनिरग्नयश्चैकोद्दिष्टमेवकुर्युः प्रत्यब्दंपार्वणेनैववि धिनाक्षेत्रजौरसौ । कुर्यात्तामितरेकुर्युरेकोद्दिष्टंसुतादशेतिजातूकर्ण्योक्तेः ॥ यदातुदत्तकस्यपितादर्शमहालयेवामृतस्तत्रपार्वणैकोद्दिष्टयोर्विकल्पः ॥ व स्तुतस्तुसर्वेषांपार्वणैकोद्दियोर्व्रीहियववद्विकल्पः ॥सचदेशाचारादव्यवस्थित इतिसर्वनिबंधसिद्धांतः **अतएवपृथ्वीचंद्रोदयेवृद्धपराशरः** मातापित्रोःपृथ क्कार्यमेकोद्दिष्टमृतेहनीत्युक्त्वाह ॥ देशधर्मसमाश्रित्यवंशधर्मंतथापरे । सूर यःश्राद्धमिच्छंतिपार्वणंचक्षयाह्नयपीति ॥ तच्चकेवलपितॄणांनसपत्नीकाना मितिहेमाद्रिः ॥ अत्रमातामहानकार्याः ॥ कर्षूसमन्वितंभुक्त्वातथाद्यंश्राद्ध षोडशं॥प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिरितिकात्यायनोक्तेः । कर्षू सममन्वितंसपिंडनंयैरेकोद्दिष्टंक्रियतेतेषामपिक्वचित्पार्वणमेवेतिशंखोक्तेः **ए वंसन्यासिनोपि** एकोद्दिष्टंयतेर्नास्तित्रिदंडग्रहणादिह । सपिंडीकरणाभा वात्पार्वणंतस्यसर्वदेतिप्रचेतसोक्तेः **वायवीये** संन्यासिनोप्याब्दिकादिपुत्र कुर्याद्यथाविधि । महालयेतुयच्छ्राद्धंद्वादश्यांपार्वणंहितत् **पृथ्वीचंद्रोदये वृद्धपराशरः** संग्रामेसंस्थितानांचप्रेतपक्षेशशिक्षये ॥ तेषांपार्वणमेवोक्तंक्षया हेपिचसत्तमैः ॥ चंद्रक्षयानाशकसंयुगेषुयःप्रेतपक्षेमृतवान्सपिंडः । सपिंडि तानामपिचाब्दिकानिभवंतितेषामिहपार्वणानि **तथा** भ्रातुर्ज्येष्ठस्यकुर्वीत ज्येष्ठोभ्रातानुजस्यच । दैवहीनंतुतत्कुर्यादितिधर्मविदब्रवीत् ॥ दैवहीनमेको द्दिष्टम् ॥ ज्येष्ठोभ्रातानाद्यगर्भजः **तथाचतत्रैवशातातपः** अनाद्यगर्भज्ये ष्ठोपिभ्रातासद्भिर्निगद्यते । ऋतेसपिंडनात्तस्यनैवपार्वणमाचरेत् ॥ आद्यगर्भे तुपार्वणमेकोद्दिष्टंवेत्यर्थः **मातुस्तुहेमाद्रौकात्यायनः** प्रत्यब्दंयोयथाकुर्या

त्पुत्रःपित्रेसदाद्विजः। तथैवमातुःकर्तव्यंपार्वणंचान्यदेववा **यत्तुतेनैवोक्तं** सपिंडीकरणादूर्ध्वंपित्रोरेवहिपार्वणम् । पितृव्यभ्रातृमातृणामेकोद्दिष्टंसदैवत्वितितत्सापत्नमातृपरम् **यत्तुवृद्धपराशरः** अपुत्रस्यपितृव्यस्यततत्पुत्रोभ्रातृजोभवेत्॥सएवास्यतुकुर्वीतपिंडदानादिकांक्रियाम् ॥ पार्वणंतेनकार्यस्यात्पुत्रवद्भ्रातृजेनतुपितृस्थानेतुतंकृत्वाशेषुंपूर्ववदुच्चरेदितितत् पितृवद्देशाचारवद्व्यवस्थितमितिपृथ्वीचंद्रः **श्राद्धदीपकलिकायांचतुर्विंशतिमतेतु** पितृव्यभ्रातृमातृणांज्येष्ठानांपार्वणंभवेत् ॥ एकोद्दिष्टंकनिष्ठानांदंपत्योःपार्वणंमिथः॥ अपुत्रस्यपितृव्यस्यभ्रातुश्चैवाग्रजन्मनः। मातामहस्यतत्पत्न्याःश्राद्धंपार्वणवद्भवेदित्युक्तंतत्पत्न्याःकतृत्वेपिपार्वणमेव ॥ सर्वाभावेस्वयंपत्न्याः स्वभ्रातृणाममंत्रकम् । सपिंडीकरणंकुर्युस्ततःपार्वणमेवचेतिलौगाक्षिस्मृतेः ॥ ततःपत्न्यपिकुर्वीतसापिंड्यंपार्वणंतथेतिसुमंतूक्तेश्चेतिनिर्णयामृतेउक्तम् ॥ अन्येत्वेतत्पाक्षिकपार्वणपरमाहुः ॥ अतएव भर्तुःश्राद्धंतुयानारीमोहात्पार्वणमाचरेत् । नतेनतृप्यतेभर्ताकृत्वातुनरकंव्रजेदितिवचनंक्षयाहेपाक्षिकैकोद्दिष्टप्रशंसार्थम् ॥ नपार्वणनिषेधार्थमित्युक्तंत्रिस्थलीसेतौभट्टचणैः ॥ स्वभर्तृप्रभृतित्रिभ्यइत्यनेनविरोधाच्च **अपुत्रणांचाहहेमाद्रावापस्तंबः** अपुत्रायेमृताःकेचित्स्त्रियोवापुरुषाश्चये । तेषामपिचदेयंस्यादेकोद्दिष्टंनपार्वम् ॥ मित्रबंधुसपिंडेभ्यःस्त्रीकुमारिभ्यएवच । दद्याद्वैमासिकंश्राद्धंसांवत्सरमतोऽन्यथा॥ **पारिजातेच** अन्यथापार्वणमित्युक्त्वासर्वत्रपार्वणमित्युक्तम् । एकोद्दिष्टवाक्यानितुतीर्थमहालयपराणीत्युक्तम् **पृथ्वीचंन्द्रोदयेवृद्धगार्ग्यः** मातुःसहोदरायाचपितुःसहभवाचया॥तयोश्चनैवकुर्वीतपार्वणंपिंडनाद्दते **प्रचेताः** सापिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते । अपुत्राणांचसर्वेषामपत्नीनांतथैवच ॥ अपत्नीनांब्रह्मचार्यादीनाम् **मार्कंडेयपुराणे** प्रतिसम्वत्सरंकार्यमेकोद्दिष्टंनरैःस्त्रियाःमृताहनियथान्यायंनृणांयद्वदिहोदितं ॥ नृणामितिदृष्टांताद्वोविप्रहतपाखंड्यादीनांसपिंडनाभावेपिसांवत्सरमेकोद्दिष्टंकार्यमेवेतिशूलपाणिः **अत्रिवृद्धवसिष्ठौः** सपिंडीकरणादूर्ध्वंयत्रयत्रप्रदीयते । भ्रात्रेभगिन्यैपुत्राय

स्वामिनेमातुलायच । पितृव्यगुरवेश्राद्धमेकोद्दिष्टंनपार्वणम् यत्तुजातूकर्ण्यः पितृव्यभ्रातृमातृणामपुत्राणांतथैवच । मातामहस्यासुतस्यश्राद्धादिपितृवद्भवेदितितदावश्यकत्वार्थनतुपार्वणार्थमितिहेमाद्रिः ॥ युक्तंत्वेवम् ॥ मातुः पितरमारभ्यत्रयोमातामहाःस्मृताः । तेषांतुपितृवच्छ्राद्धंकुर्युर्दौहित्रसूनवइति पुलस्त्योक्तेर्मातामहस्यपार्वणमेव ॥ तत्साहचर्यात्पितृव्यादौतथा ॥ पितृव्यभ्रातृमातृणामेकोद्दिष्टंचपार्वणमितिक्षयाहोक्तोपक्रमेपुलस्त्योक्तेश्चविकल्पः केचित्वापस्तंबादिवाक्यानि व्युत्क्रमाच्चप्रमीतानांनैवकार्यासपिंडतेत्यस्यपितृव्यादिपरत्वादकृतसपिंडनपितृव्यादिपराणीत्याहुः ॥ मातासपत्नमाता ॥ एकोद्दिष्टंतुकनिष्ठपरमिति पृथ्वीचंद्रोदयेप्येवम् ॥ विशेषस्त्वधिकारिनिर्णयेप्रागुक्तः ॥ केचित्पुत्रांतराभेवेपिपितामहवार्षिकमप्यावश्यकम् ॥ पुत्राभावेचतत्पुत्राःपत्नीमातातथापिता । वित्ताभावेपिसच्छिष्यःकुर्यात्तस्यौर्ध्वदेहिकमितिमार्कंडेयपुराणादित्याहुस्तन्न ॥ पौत्रेणैकादशाहादिकर्तव्यंश्राद्धषोडशमितिकातीयेविशेषोक्तेः अथक्षयाहद्वैधेनिर्णयः तत्रैकोद्दिष्टंमध्याह्नेकार्यम् ॥ मध्याह्नश्चपंचधाविभक्तदिनतृतीयभागइतिमाधवः ॥ आमश्राद्धंतुपूर्वाह्णेएकोद्दिष्टंतुमध्यमे । पार्वणंचापराह्णेतु प्रातर्वृद्धिनिमित्तकमितिहारीतोक्तौप्रातःशब्दसाहचर्यात् ॥ तत्रापिकुतुपादिषुमुहूर्तद्वितयेज्ञेयम् ॥ प्रारभ्यकुरुतेश्राद्धंकुर्यादारौहिणंबुधः । विधिज्ञोविधिमास्थायरौहिणंतुनलंघयेदितिगौतमोक्तेरेतत्परत्वात् ॥ रौहिणोनवमोमुहूर्तः ॥ मैथिलाःश्राद्धकौमुदीचैवम् ॥ अन्यथा उर्ध्वमुहूर्त्तात्कुतुपाद्यंमुहूर्तचतुष्टयम् । मुहूर्तपंचकंह्येतत्स्वधाभवनमिष्यतइत्यादिविरोधात् दीपिकापि एकोद्दिष्टमुपक्रमेतकुतपइति माधवीयेव्यासोपि कुतुपप्रथमेभागेएकोद्दिष्टमुपक्रमे । आवर्तनसमीपेवातत्रैवनियतात्मवान् ॥ पृथ्वीचंद्रोदयेप्येवम् ॥ तेनकुतुपादिरौहिणांतोमुख्यःकालः ॥ दिनद्वयेतद्व्याप्तौसमव्याप्तौचपूर्वा ॥ विषमव्याप्तावाधिक्येननिर्णयः ॥ अव्याप्तौपूर्वैव ॥ परविद्धायानिषेधात् ॥ साचपूर्वदिनेरौहिणलंघनापत्तेपरैवेतिगौडाः ॥ शुक्लकृष्णत्वशात्खर्वदर्पाद्यैर्वाव्यवस्थेत्यन्ते तन्न ॥ परविद्धानि

षेधप्राबल्यात् ॥ अत्रमूलंकालमाधवीयेज्ञेयम् ॥ पार्वणंत्वपराह्णैकार्यपूर्वोक्तवचनात् ॥ मध्याह्नव्यापिनीयास्यात्सैकोद्दिष्टेतिथिर्भवेत् । अपराह्णव्यापिनीयापार्वणेसातिथिर्भवेदितिपृथ्वीचंद्रोदयेवृद्धगौतमोक्तेश्च ॥ पूर्वेद्युरेवपरेद्युरेववापराह्णव्याप्तौसैवग्राह्या ॥ दिनद्वयेतद्व्याप्तौतदस्पर्शेऽशतःसमव्याप्तौचपूर्वैव ॥ विषमव्याप्तौत्वधिकाग्राह्या ॥ द्वयपराह्णव्यापिनीस्यादाब्दिकस्ययदातिथिः । महतीयत्रतद्विद्धांप्रशंसंतिमहर्षयइतिमरीचिस्मृतेः ॥ दर्शेचपूर्णमासंचपितुःसांवत्सरंदिनम् ॥ पूर्वविद्धामकुर्वाणोनरकंप्रतिपद्यतइत्यपरार्केनारदोक्तेः ॥ द्वयहेप्यव्यापिनीचेत्स्यान्मृताहस्ययदातिथिः । पूर्वविद्धाप्रकर्तव्यात्रिमुहुर्ताभवेद्यदीतिसुमंतूक्तेः ॥ पूर्वस्यांनिर्वपेत्पिंडानित्यांगिरसभाषितमितिहेमाद्रौपाठः **तत्रैववृद्धमनुः** नद्वयहव्यापिनीचेत्स्यान्मृताहस्यचयातिथिः । पूर्वविद्धैवकर्तव्यात्रिमुहुर्ताचयाभवेत् ॥ मदनरत्नेप्येवम् **यत्तु काष्णाजिनिव्यासौ** अह्नोस्तमयवेलायांकलामात्रायदातिथिः । सैवप्रत्याब्दिकेज्ञेयानापरापुत्रहानिदेतित्रिमुहुर्तस्तुतिः ॥ पूर्वेद्युःसायंत्रिमुहुर्ताभावेतुपरैव ॥ त्रिमुहुर्तानचेत्ग्राह्यापरैवकुतुपेहिसेतिकालादर्शेगोभिलोक्तेः ॥ कालादर्शेपि । प्रत्याब्दिकेप्येवमेवतिथिर्ग्राह्यापराह्णिकी । उभयत्रतथात्वेनविनिर्णयः **अन्यत्रापि** सायंतन्यपरत्रचेन्मृततिथिः सैवाब्दिकेमासिके ग्राह्यासाह्यपराह्णयोर्यदितदायत्राधिकासामता । तुल्याचेदुभयापराह्णसमयेपूर्वानचेत्तुद्वयेपूर्वैवत्रिमुहूर्तगास्तसमयेनोचेत्परैवोचिता **माधवपृथ्वीचंद्रौतु** दिनद्वयेपराह्णव्याप्तौअंशतःसमव्याप्तौचक्षयेपूर्वावृद्धौपरा ॥ खर्वदर्पौपरौपूज्यावित्युक्तेः ॥ अपराह्णद्वयव्यापिन्यतीतस्यचयातिथिः । क्षयेपूर्वाचकर्तव्यावृद्धौकार्यातथोत्तरेतिबौधायनोक्तेः ॥ क्षयाहस्यतिथिर्यातुअपराह्णद्वयेयदि । पूर्वाक्षयेतुकर्तव्यावृद्धौकार्यातथोत्तरेतिबृहन्नारदीयाच्चेत्याहुः ॥ वृद्धिक्षयौचात्रपरतिथेर्नतुग्राह्यतिथेः ॥ तस्याःक्षयेपराह्णद्वयव्याप्तेरसंभवात् **तदाहमाधवः** नग्राह्यतिथिगौवृद्धिक्षयावूर्ध्वतिथेस्तुताविति **यत्तुपृथ्वीचंद्रः** पूर्वोक्तवचनेषुयत्रसायाह्नास्तमययोगिनीतिथिरुक्तातत्रापराह्णव्यापिनीज्ञेया ॥ साया

ह्नस्त्रिमुहुर्तःस्यात्तत्रश्राद्धंनकारयेदितिमात्स्यादौसायाह्ननिषेधात् ॥ यच्चत्रि मुहुर्त्तादिग्रहणंतच्छ्राद्धार्हापराह्णरूपत्रिमुहुर्तपरमित्याह ॥ तद्धेमाद्रिमदनर त्नकालादर्शादिग्रन्थविरोधाल्लक्षणापत्तेश्चचिन्त्यम् ॥ तस्मात्पूर्वोक्तमेवसा धु ॥ यदाविघ्नवशाद्दिनेसांवत्सरश्राद्धंनकृतंतदारात्रावपिकार्यम् ॥ मृताहं समतिक्रम्य चण्डालेष्वभिजायतइतिमरीचिनामृताहातिक्रमेदोषोक्तेः ॥ न चनक्तंश्राद्धंकुर्वीतारब्धेवाभोजनसमापनमित्यापस्तंबेनगौणकालोक्तेश्चेति माधवः ॥ आरब्धेश्राद्धेविघ्नवशाद्रात्रिभागेपातेभोजनसमाप्त्यंतेरात्रौकार्य म् ॥ शेषसमाप्तिःपरदिनएवेतिहरदत्तः ॥ ग्रहणदिनेवार्षिकप्राप्तौतद्दिनए वान्नेनामेनहेम्नावाकुर्यात् ॥ नोत्तरदिनेइत्युक्तंप्राक्ग्रहणनिर्णये ॥ तच्चप्र थमाब्दिकंत्रयोदशेमलमासेकार्य्यम् अन्यथान ॥ प्रत्यब्दंद्वादशेमासिका र्यापिण्डक्रियासुतैः॥क्वचित्त्रयोदशेपिस्यादाद्यंमुक्त्मातुवत्सरमितिलघुहारी तोक्तेः ॥ इदमन्त्याधिकमासपरम् ॥ द्वादशेत्रयोदशेवातीतइत्यर्थः ॥ ते नयत्रद्वादशमासिकंशुद्धमासेभवति तत्रत्रयोदशेधिकेएवाब्दिकंकार्यम् ॥ यज्ञाधिकमध्येद्वादशंमासिकंतत्रतस्यद्विरावृत्तिंकृत्वा चतुर्दशेशुद्धेएवप्रथ माब्दिकमितिमाधवीये ॥ हेमाद्रौचैवम् ॥ द्वितीयाब्दिकन्तुशुद्धमासेएवना धिकेनाप्युभयोः ॥ मलमासमृतानांतुयदासएवाधिकःस्यात्तदातत्रैवकार्यम न्यथाशुद्धएवेतिप्रागुक्तम् ॥ दर्शेवार्षिकंचेत्तदापूर्ववार्षिकंकृत्वाततःपिण्डपि तृयज्ञोदर्शश्राद्धञ्चेति निर्णदीपेक्रमउक्तः **स्मृतिसारेपि** दर्शेक्षयाहेसम्प्राप्ते कथंकुर्व्वंतियाज्ञिकाः ॥ आदौक्षयाहंनिर्वर्त्य पश्चाद्दर्शोविधीयतइति ॥ यु क्तंत्वेवम् तद्वचनेमूलाभावात् ॥ पिण्डयज्ञंततःकुर्यात्ततोन्वाहार्य्यकम्बु ध इति दर्शश्राद्धे पिण्डपितृयज्ञानंतर्यात्तस्याब्दिकेप्यतिदेशात्प्राप्तेः ॥ पितृयज्ञानंतरंवार्षिकंततोदर्शश्राद्धमिति व्यतिषंगस्तुनभवत्येव ॥ तस्या र्थिकत्वात् **कालादर्शेपि** निमित्तानियतश्चात्रपूर्वानुष्ठानकारणमिति ॥ सर्वा न्प्रत्येकरूप्याभावात्क्षयाहनिमित्तस्य नियतत्त्वम् ॥ देवजानीयेप्येवम् ॥ **मृताहेवृषोत्सर्गउक्तोहेमाद्रौविष्णुधर्मे** अयनद्वितथेचैव मृताहेबांधवस्यच।

उत्सृजेन्नीलवृषभं कौमुद्याःसमुपागमे ॥ कौमुदीकार्तिकी **अथशुद्धिश्राद्ध म्।दिवोदासीये**सपिण्डीकरणादूर्ध्वंयावदब्दंत्रयंभवेत्।तावदेवनभोक्तव्यंक्ष येहनिकदाचन॥वर्षान्तसपिण्डनेप्येतत्तुल्यम् ॥ मृताहानितुसम्प्राप्तेयावदब्द चतुष्टयम्। बहिःश्राद्धम्प्रकुर्वीतनकुर्याच्छ्राद्धभोजनम् ॥प्रथमेस्थीनिमज्जाच्च द्वितीयेमांसभक्षणम् । तृतीयेरुधिरंप्रोक्तं श्राद्धंशुद्धंचतुर्थकमिति श्राद्धकारि कोक्तेः ॥ शुद्धंकिंचिदितिज्ञेयम् **स्मृत्यन्तरे** सप्तत्रिंशच्चयोमासान्श्राद्धेभुंक्ते तमोहतः । सपंक्तिदूषितःपापःप्रेताशीचभवेत्तुसः ॥ तत्रप्रथमेब्देवर्षातसपिं डनपक्षेमृताहात्पूर्वेह्निसपिण्डनमब्दपूर्तिश्राद्धञ्चकृत्त्वा परेद्युर्वार्षिकंकुर्य्या दितिस्मृत्यर्थसारेउक्तम् ॥ हेमाद्रिस्तुमृताहेसपिण्डीकरणेनैववार्षिकासिद्धिः॥ पूर्णेसंवत्सरेपिण्डःषोडशःपरिकीर्तितः । तेनैवचसपिण्डत्वंतेनैवाब्दिकमिष्य तइतिवचनादित्याह ॥ इदमेवयुक्तम् **अथक्षयाहाज्ञानेमरीचिः** श्राद्धविघ्ने समुत्पन्नेअविज्ञातमृतेहनि । एकादश्यान्तुकर्तव्यं कृष्णपक्षेविशेषतइत्युक्तेः **शुक्लैकादश्यामपिबृहस्पतिः** नज्ञायतेमृताहश्चेत् प्रमीतेप्रोषितेसति ॥ मा सश्चेत्प्रतिविज्ञातस्तद्दर्शेस्यादथाब्दिकम् ॥ दिनमासौनविज्ञातौ मरणस्य यदापुनः । प्रस्थानमासदिवसौग्राह्यौपूर्वोक्तयादिशा **मदनरत्नेभविष्ये** मृ ताहंयोनजानाति मानवोविनतात्मज । तेनकार्यममावास्यांश्राद्धंसांवत्सरंस दा ॥ दिनमेवतुजानातिमासंनैवतुयोनरः । मार्गशीर्षेतथाभाद्रेमाघेवातद्दिन म्भवेत् **निर्णयामृतेतु** यदामासोनविज्ञातोविज्ञातंदिनमेवतु । तदाचाषाढ केमासिमाघेवातद्दिनंभवेदितिबृहस्पतिस्मृतेराषाढोप्युक्तः **कालादर्शेपि** मा साज्ञानेदिनज्ञानेकार्यमाषाढमाघयोरित्युक्तम् **हेमाद्रौप्रभासखण्डे** मृताहंयो नजानातिमासंवापिकथंचन । तेनकार्यममावास्यांश्राद्धंमाघेथमार्गके **भवि ष्ये** मृतवार्ताश्रुतेर्ग्राह्यौतौपूर्वोक्तक्रमेणतु । पूर्वोक्तेतिप्रस्थानादिनाज्ञानेमास ज्ञानेचतद्दर्शे ॥ मासाज्ञानेदिनज्ञानेचमार्गादाविवच्छ्रवणादिनेपिज्ञेयामित्य र्थः ॥ श्रवणदिनेमासज्ञानेमाघमार्गदर्शेकार्यं पूर्वोक्तप्रभासखण्डात् ॥ अतो त्रलोपइतिशूलपाण्युक्तंहेयम् **तिथितत्त्वेयमः** गतस्यनभवेद्वार्तायावत्तद्वा

दशवार्षिकी ॥ प्रेतावधारणंतस्यकर्तव्यंसुतबांधवैः ॥ यन्मासियदहर्यातस्त न्मासितदहःक्रिया । दिनाज्ञानंकुहुस्तस्यआषाढस्याथवाकुहूः **अथश्राद्ध विघ्ननिर्णयः** तत्रविप्रस्यनिमन्त्रणोत्तरंसूतकेमृतकेचाशौचाभावः ॥ निमं त्रितेषुविप्रेषुप्रारब्धेश्राद्धकर्मणि । निमन्त्रणाद्विविप्रस्यस्वाध्यायादिरतस्य च ॥ देहेपितृषुतिष्ठत्सुनाशौचंविद्यतेक्वचिदितिब्राह्मोक्तेः **कर्तुस्तुविष्णुराह** व्रतयज्ञविवाहेषुश्राद्धेहोमेऽर्चनेजपे । आरब्धेसूतकंनस्यादनारब्धेतुसूतक म् ॥ श्राद्धेप्रारंभस्तेनैवोक्तः ॥ प्रारम्भोवरणंयज्ञेसंकल्पोव्रतसत्रयोः । नांदी मुखंविवाहादौश्राद्धेपाकपरिक्रियेति **माधवीयेब्राह्मेपि** श्राद्धादौपितृयज्ञेचक न्यादानेचनोभवेत् **मिताक्षरायांस्मृत्यंतरे।सद्यःशौचंप्रकृत्य** यज्ञेसम्भृतस म्भारेविवाहेश्राद्धकर्मणीति ॥ तिथितत्त्वादिगौडग्रंथास्तुनिमन्त्रणोत्तरंकर्तुर्भो क्तुश्चनाशौचम् ॥निमन्त्रणोत्तरंश्राद्धेप्रारम्भः स्यादितिस्मृतिरितिविष्णूक्तेः॥ यत्तुश्राद्धेपाकपरिक्रियेतितद्दर्शश्राद्धविषयमित्याहुः ॥ दातृगृहेमरणादौब्राह्मे उक्तम् ॥ भोजनार्हंतुसंभुक्तेविप्रैर्दातुर्विपद्यते ॥ गृहेइतिशेषः ॥ यदाकश्चि त्तदोच्छिष्टंशेषंत्यक्त्वासमाहितः । आचम्यपरकीयेनजलेनशुचयोद्विजाइ ति ॥ अस्यश्राद्धविषयत्वंहेमाद्रिणोक्तम् ॥ पृथ्वीचन्द्रोदयेप्येवम् ॥ ममतु प्रतिभातीदंविवाहादिविषयम् ॥ नतुश्राद्धविषयं तत्पदाभावात् **विवाहोत्स वयज्ञेष्वित्युपक्रम्य** भुंजानेषुतुविप्रेषुत्वन्तरामृतसूतके । अन्यगेहोदकाचां ताःसर्वेतेशुचयःस्मृताइतिषट्त्रिंशन्मतैकवाक्यात् ॥ निमंत्रितेषुविप्रेषु प्रा रब्धेश्राद्धकर्मणीतिपूर्वोक्तविरोधाच्च श्राद्धेतुयद्यपिविष्णुनापाकोत्तरमाशौचा भावउक्तस्तथापिकर्तुरेवसः ॥ भोक्तुर्दोषोस्त्येव॥अपिदातृगृहीत्रोश्चसूतकेमृत केतथा॥अविज्ञानेनदोषःस्याच्छ्राद्धादिषुकथंचन॥ विज्ञानेभोक्तुरेवस्यात्प्राय श्चित्तादिकंक्रमादितिमाधवीयब्राह्मोक्तेः।आदिशब्देनाशौचमुच्यते **तच्चाहवि ष्णुः** ब्राह्मणादीनामाशौचेयःसकृदेवान्नमश्नातितस्यतावदाशौचम् ॥ यावत्ते षामाशौचव्यपगमेप्रायश्चित्तंकुर्यादिति **यत्तु** देहेपितृषुतिष्ठत्सुनाशौचंविद्यते क्वचिदितिब्राह्मन्तच्छ्राद्धकालीनस्यनिषेधकम् नतदुत्तरकालीनस्य शुद्धि

दीपस्तुनिमन्त्रितेष्वित्यामश्राद्धपरम् ॥ भोजनार्धेष्वित्यादित्वन्नश्राद्धपरमित्याह **प्रायश्चितंत्वाहमार्कंडेयः** भुक्त्वातुब्राह्मणाशौचेचरेत्सांतपनंद्विजः॥ एतत्कामतः **अभ्यासेशंखः** ब्राह्मणस्यतथाभुक्त्वामासमेकंव्रतीभवेदिति **अज्ञानात्तुच्छागलेयः**एकाहंचत्र्यहंपंचसप्तरात्रमभोजनम्।ततःशुचिर्भवेद्विप्रः पंचगव्यंपिबेन्नरइतिवर्णक्रमेणेदम् ॥ अभ्यासेतुद्वैगुण्यमित्यादिमिताक्षरामाधवीयादौज्ञेयम् ॥ मिताक्षरामाधवादौतुश्राद्धेकर्तुर्भोक्तुश्चसर्वथादोषाभावउक्तः **आशौचमध्येश्राद्धदिनप्राप्तौतुमाधवीयेकालादर्शेचऋष्यशृङ्गः** देयेपितॄणांश्राद्धेतुआशौचंजायतेयदा । आशौचेतुव्यतिक्रांतेतेभ्यःश्राद्धंप्रदीयते **श्राद्धचिन्तामणौज्योतिषे** प्रतिसांवत्सरंश्राद्धमाशौचात्पतितंचयत् । मलमासेपितत्कार्यमितिभागुरिभाषितम् ॥ आशौचांत्यदिनत्वेननिमित्तत्त्वादित्यर्थः ॥ एतन्मासिकादिपरंनदार्शिकादौ अतएवसुदर्शनभाष्ये अपरपक्षेपित्र्याणीतिनियमात्कृष्णपक्षश्राद्धलोपेप्रायश्चित्तमेव ॥ नतुगौणकालेकरणं नचोपवासः ॥ वेदोदितानांनित्यानांकर्मणांसमतिक्रमे । स्नातकव्रतलोपेच प्रायश्चित्तमभोजनमितिमनूक्तेरित्युक्तम् ॥ आशौचेतुप्रायश्चित्तमपिन ॥ मुख्यकालेअनधिकारात् **आशौचांतेसम्भवेतुव्यासः** श्राद्धविघ्नेसमुत्पन्ने त्वंतरामृतसूतके । अमावास्यांप्रकुर्याद्वैशुद्धावेकेमनीषिणः **हेमाद्रौषट्त्रिंशन्मतेपि** मासिकेचाब्दिकेत्वह्निसंप्राप्तेमृतसूतके । वदन्तिशुद्धौतत्कार्यंदर्शे चापिविचक्षणाः **गोभिलः** देयेप्रत्याब्दिकेश्राद्धेअन्तरामृतसूतके । आशौचानंतरंकुर्यात्तन्मासेंदुक्षयेतथा **मरीचिः** श्राद्धविघ्नेसमुत्पन्नेप्यविज्ञातेमृतेहनि । एकादश्यांतुकर्तव्यंकृष्णपक्षेविशेषतः ॥ विशेषतइत्युक्तेःशुक्लैकादश्यामपि ॥ आशौचेतरविघ्नेएतदितिमाधवपृथ्वीचंद्रौ **यत्वत्रिः** तदहश्चेत्प्रदुष्येतकेनचित्सूतकादिना । सूतकानंतरंकुर्यात्पुनस्तदहरेवचेतितत्पूर्वकालाभावेज्ञेयम् ॥ एतदाब्दिकेतरश्राद्धपरम् **यच्चदेवलः** एकोद्दिष्टेतुसंप्राप्तेयदिविघ्नःप्रजायते । मासेन्यस्मिंस्तिथौतस्मिन्श्राद्धंकुर्यात्प्रयत्नतइति ॥ तदपिमासिकपरमितिमदनरत्नेहेमाद्रौच ॥ इदमपिपूर्वकालासंभवेव्याध्यादौविस्म

रणेचैवंज्ञेयम् **अथभार्यारजोदर्शने** तत्रदार्शिकमामेनकार्यम् ॥ श्राद्धविघ्ने द्विजातीनामामश्राद्धंप्रकीर्तितम् ॥ अमावास्यादिनियतंमाससंवत्सरादृतेइतिहेमाद्रौहारीतोक्तेः ॥ **व्याघ्रपादोपि** आर्तवेदेशकालानांविप्लवेसमुपस्थिते । आमश्राद्धंद्विजैःकार्यंशूद्रःकुर्यात्सदैवहीति **दीपिकापि** दर्शेतुभार्यार्तवेत्यामश्राद्धंविधिंप्रवासिविधुराद्याश्चाचरेयुर्द्विजाः ॥ वस्तुतस्तुपाकाभावेद्विजातीनामामश्राद्धंविधीयतइतिसुमंतूक्तेः ॥ पाककर्त्रंतरसत्वेऽन्नेनान्यथामेन युक्तम् ॥ मासिकानिसपिंडानिअमावास्यातथाब्दिकम् । अन्नेनैवतुकर्तव्यंयस्यभार्यारजस्वलेतिकलिकायांवचनाच्च ॥ कालादर्शेतुस्त्रियारजोदर्शनेदर्शश्राद्धंपंचमेहनीतिपक्षांतरमुक्तम् ॥पारिजातेप्येवम्॥एवंमहालययुगादावपि॥ आब्दिकंतुरजोदर्शनेपितद्दिनेएवकार्यम् ॥ पुष्पवत्स्वपिदारेषुविदेशस्थोप्यनग्निकः ॥ अन्नेनैवाब्दिकंकुर्याद्धेम्नावामेननकचिदितिमाधवीयेलौगाक्षिस्मृतेः **मरीचिरपि** अनग्निकःप्रवासीचयस्यभार्यारजस्वला । आमश्राद्धंप्रकुर्वीतन तत्कुर्यान्मृतेहनि **काष्णाजिनिः** आपन्नोप्याब्दिकंनैवकुर्यादामेनकुत्रचित्। अन्नेनतदमायांवाकृष्णेवाहरिवासरे **प्रयोगपारीजाते** रजस्वलायांभार्यायांक्षयाहंयःपरित्यजेत् । सवैनरकमाप्नोतियावदाभूतसंप्लवम् ॥ मासिकानिसपिण्डचअमावास्यातथाब्दिकम् । अन्नेनैवतुकर्तव्यंयस्यभार्यारजस्वला **देवयाज्ञिकनिबन्धेपि** भर्तुःश्राद्धंपंचमेह्निकुर्याद्भार्यारजस्वला ॥ पुत्रःपित्रोःप्रकुर्वीतमृताहनिशुचिर्यतः **कालादर्शेपि** रजस्वलांगनोनग्निर्विदेशस्थोथवाब्दिके ॥ दर्शादाविवनामेनत्वन्नेनश्राद्धमाचरेत् **अन्यत्रापि** विदेशकोवाविगताग्निकोवारजस्वलायामपिधर्मपत्न्यां । श्राद्धंमृताहेविदधीतपाकैर्नामेनहेम्नानतुपंचमेह्नि ॥ एवंमासिकेपि ॥ **यत्तुमरीचिः** आब्दिकेसमनुप्राप्तेयस्यभार्यारजस्वला । पंचमेऽहनितच्छ्राद्धंनततत्कुर्यान्मृतेहनि **माधवीये** श्राद्धंतदानकर्तव्यंकर्तव्यंपंचमेहनीत्युत्तरार्द्धंतदपुत्रकर्तृकश्राद्धविषयम् ॥ अपुत्रातुयदाभार्यासम्प्राप्तेभर्तुराब्दिके । रजस्वलाभवेत्सातु कुर्याच्चत्पंचमेहनीतिश्लोकगौतमोक्तेः ॥ दैवेकर्मणि पित्र्येवा पंचमेहनिशुद्ध्यतीतिप्रभासख

ण्डाच्च ॥ नन्वशुचित्वादेवतत्रपंचमेहन्यर्थात्श्राद्धंप्राप्तमितिवचनंव्यर्थम् मैवम् ॥ गर्भिणीसूतिकादिश्चकुमारीवाप्यरोगिणी । यदाशुद्धातदान्येनकारयेत्प्रयतास्वयमितिहेमाद्रौभविष्योक्तेः ॥ अनुपनीतस्त्रीशूद्राश्च श्राद्धमृत्विजावाकारयेयुः ॥ स्वयंवाऽमंत्रकंकुर्युरितिस्मृत्यर्थसाराच्चान्यद्वाराकरणनिवृत्यर्थत्वात्तस्य त्वदुक्तदिशाआशौचानंतरम्श्राद्धकर्तव्यताऽवेदवाक्यवैयर्थ्याच्च ॥ अतः प्रागुक्तमरीच्युक्तेः पत्नीपंचमेहनीतियुक्तम् यत्तु सप्ताहात्पितृदेवानांभवेद्योन्याव्रतार्चनेइतितद्रजोनिवृत्तिपरमितिहेमाद्रिभिन्नसर्वनिबन्धसिद्धांतःहेमाद्रिस्तुश्राद्धादौ स्त्रियासहैवाधिकारात्तस्यांरजोदुष्टायांतन्निवृत्तेरेकभार्येणपंपमेहनिकार्यम् प्रागुक्तमरीच्युक्तेः ॥ भार्यांतरसत्वेतुपुष्पवत्स्वपीतिवचनात्तद्दिनेएवेत्याह **दीपिकापि** भार्यातौसतिपंचमेचदिवसेस्याद्दार्षिकंमासिकंपक्कान्नैर्बहुभार्यकस्त्वधिकृतेपत्न्यंतरेतिष्ठतिकुर्यात्तत्तद्दितयं स्वमुख्यदिवसेइतितार्च्चित्यम् ॥ सहाधिकारःसहत्वश्रुत्यावाएकफलभाक्त्वेनवा पाककर्तृत्वेनवा नाद्यः तदभावात् । पाणिग्रहणाद्धि सहत्वंकर्मस्वित्यस्याग्निसाध्यकर्मविषयत्वात् ॥ आब्दिकस्यचनिरग्नेरपिपाकेनैवोक्तेः ॥ स्मार्ताग्निसाध्यत्वानियमात्तामपरुध्येतिपूर्वोक्तवचनसत्वाच्च ॥ कथंचभार्यांतरसत्वेधिकारः ॥ज्येष्ठायानविनेतरेति नियमात् ॥ ज्येष्ठापरत्वेचतेनैवसिद्धेर्वचनवैयर्थ्यात् **नद्वितीयः** अविभक्तभ्रातृष्वेकस्याऽशुचित्वेन्यस्याधिकारापत्तेः **नतृतीयः** प्रवासनिर्देशसूतिकारोगिण्यादिष्वप्यकरणापत्तेः ॥ आरभेतनवैःपात्रैरन्नारम्भंचबांधवैरिति देवलोक्तावात्मनेपदात्स्वस्यबांधवानांच पाककर्तृत्वोक्त्याविरोधाच्च ॥ ततस्तानिपपाचाशुसीताजनकनंदिनीतिपाद्मादिलिङ्गात्प्राशस्त्यंभार्यापाकस्योच्यते ॥ नततत्कस्याप्यनिष्टम्॥ तेनैतद्वचनंयुक्त्याद्यभावात् पूर्वोक्तवचोविरोधाच्चयत्किंचिदेव **यदपि** श्राद्धीयाहनिसंप्राप्तेयस्यभार्यारजस्वला। श्राद्धंतत्रनकर्तव्यंकर्तव्यंपंचमेहनीतिश्लोकगौतमपाठोन्यथादर्शितः ॥ माधवीयेचतद्वशात् पक्षांतरमुक्तम् ॥ तेनापिनाभिप्रेतार्थसिद्धिः ॥ यस्यप्रेतस्येत्यर्थात् ॥ तेनात्रहेमाद्रिर्बभ्रामेतिब

हुवक्तव्येपिनोच्यते **अथान्वारोहणेनिर्णयः। लौगाक्षिः** मृताहनिसमासे न पिण्डनिर्वपणंपृथक् ॥ नवश्राद्धञ्चदम्पत्योरन्वारोहणएवतु ॥ समासेनतु तंत्रेणद्विपितृकश्राद्धवत्द्वयोरेकःपिण्डोविप्रश्च ॥ पिंडशब्दःश्राद्धपरः ॥ नव श्राद्धम्पृथगितिहेमाद्रिपृथ्वीचन्द्रौ ॥ अत्रमृताहनीत्येकत्वात् ॥ दिनभेदे दिनैक्येवामृततिथेरेकत्वेकालैक्यंपाकैक्यंच ॥ एकचित्यधिरोहेतुतिथिरेकैव जायते । एकपाकेनपिण्डैक्ये द्वयोर्गृह्णीतनामनी इति इतिस्मृत्यन्तरा च्च ॥ अन्त्येष्टिपद्धतौभट्टैरप्युदाहृतम्॥अन्वारोहेतुनारीणां पत्युश्चैकोदकक्रि या । पिंडदानक्रियातद्वच्छ्राद्धम्प्रत्याब्दिकन्तथा ॥ नवश्राद्धानिसर्वाणि सपिंडीकरणंपृथक् । एकएववृषोत्सर्गो गौरेकातत्रदीयते इति ॥ तिथिभेदे तुवार्षिकंपृथगेव ॥ तथावार्षिकेसमासविधानादन्यत्रसर्वत्रपूर्वक्त्वेप्राप्तेनव श्राद्धमेवपृथगितिपरिसंख्ययान्यत्रपृथगुक्तेष्वपि वार्षिकषोडशश्राद्धतीर्थस पिंडान्वष्टक्यादिषुसमासएवेतिमदनपारिजातनिर्णयामृतादयः ॥ अतःसमा सविधिबलात्ज्येष्ठपुत्रस्यकर्तृत्वेसपत्नमातुरन्वारोहणेतत्पुत्रेसत्यपितद्वार्षि कादिकमविभक्तःसापत्नपुत्रएवज्येष्ठःकुर्यान्नौरसः ॥ वक्ष्यमाणपृथ्वीचंद्रा दिमतेतुऔरसएवमातुः पृथक्कुर्यात् ॥ एवंबहूवीष्वपिमातृषुज्ञेयम् ॥ त्रिस्थ लीसेतौपितामहचरणैरप्येवमुक्तम् **यत्तुगार्ग्यः** एकचित्यांसमारूढौदंपतीनि धनंगतौ । पृथक्श्राद्धंतयोःकुर्यादोदनंचपृथक्पृथक् ॥ ओदनंपिंडः ॥ त न्नवश्राद्धविषयं **यत्तुभृगुः** यासमारोहणंकुर्याद्भर्तुश्चित्यांपतिव्रता । तांमृता हनिसंप्राप्तेपृथक्पिंडेनियोजयेत् ॥ प्रत्यब्दंचनवश्राद्धंयुगपत्तुसमाचरेत् । तद्येषांवार्षिकमेकोद्दिष्टमुक्तंतद्विषयम् ॥ प्रत्यब्दंचमृताहनीत्यन्वयः ॥ नव श्राद्धंयुगपदितिदर्शेवर्गद्वयवदेकतंत्रेणपृथगित्यर्थमाहहेमाद्रिः ॥ एतन्मृत तिथेर्भेदविषयमितिपृथ्वीचंद्रनिर्णयामृताद्याः ॥ देवयाज्ञिकोप्येवम् **पराश रमाधवस्तु** गार्ग्यभृग्वादिवचनाल्लौगाक्षिवाक्येसमासेनपाकादितंत्रैक्येनद र्शेवर्गद्वयवत्पृथक्श्राद्धंकुर्यात् ॥ नवश्राद्धंचतथेत्याह **पृथ्वीचंद्रचंद्रिका दयस्तु** द्वयोरेकपिंडदानंलौगाक्षिवचनंचापद्विषयम् ॥ पृथक्पिंडदानंतुमु

ख्यःकल्पः **तदाहवृद्धपराशरः** आरुह्यभर्तुश्चितिरंगनायाःप्राप्नोतिमृत्युंखलु सत्वयुक्ता ॥ एकादशाहेतुतयोर्विधेयंश्राद्धंपृथक्स्वर्गमपेक्ष्यसद्भिः ॥ एक त्वमिच्छंतिमतिप्रहीणा एकादशाहादिषु येनृनार्योः ॥ तेस्वर्गमार्गंविनिह त्यकुर्युःस्त्रीसत्वघातान्नरकाधिवासं ॥ भर्त्रासहमृतायातुनाकलोकमभी प्सती सार्हेच्छ्राद्धंपृथक्पिंडान्नैकत्वंतुस्मृतंतयोः ॥ पृथगेवहिकर्तव्यं श्राद्धमेकाद शाहिकं । यानिश्राद्धानिसर्वाणितान्युक्तानिपृथक् पृथ क् **विश्वादर्शेपि** मातुर्गयाष्टकावृद्धिर्मृताहेषुमहालये । श्राद्धंकुर्य्यात्पृ थग्दैवंतंत्रंवानुगतावपि ॥ एकचित्यांसमारुह्यमृतयोरेकबर्हिषि । पित्रोःपिं डान्पृथग्दद्यात्पिंडंत्वापत्सुतत्सुतइत्यग्निस्मृतेरित्याहुः **यत्तुषट्त्रिंशन्मते** एकत्वंसागताभर्तुः पिंडेगोत्रेचसूतके । नपृथक्पिंडदानंतुतस्मात्पत्नीषुवि द्यतेइतितद्दर्शादिपरं **चंद्रप्रकाशेपि** एकचित्यांसमारूढौदंपतीप्रमृतौयदि । पृ थक्श्राद्धंप्रकुर्वीतपत्युरेवक्षयेहनि ॥ मृतानामपिभृत्यानांभार्याणांपतिनास ह । पूर्वकस्यमृतस्यादौद्वितीयस्यततःपुनः । तंत्रेणश्रपणंकृत्वाश्राद्धंस्वामि क्षयेहनि । तृतीयस्यततःकुर्यात्संनिपातेष्वयंक्रमइति । सहगमनेसर्वत्रश्रा द्धार्थमेकपाकइत्याह **मदनरत्नेप्रचेताः** एकचित्यांसमारूढौम्रियेतेदंपतीय दि । तंत्रेणश्रपणंकुर्यात्पृथक्पिंडंसमावपेत् ॥ पृथ्वीचंद्रोदयेप्येवम् ॥ अत्र भर्तुराशौचमध्येऽन्यदिनेस्त्रीमरणेपतिमरणदिनगणनयाऽऽशौचपिंडदानैका दशाहादिकार्यम् ॥ नात्रपक्षिणीवृद्धिः॥मृतंपतिमनुव्रज्यपत्नीचेदनलंगता। नतत्रपक्षिणीकार्यापैतृकादेवशुद्ध्यति ॥ पुत्रोन्योवाग्निदस्तस्यास्तावदेवाशु चिस्तयोः । नवश्राद्धंसपिंडंचयुगपत्तुसमापयेदितिषडशीतिमतात् ॥ यदाना रीविशेदग्निंप्रियस्यप्रियवांछया । तदाशौचंविधातव्यंभर्त्राशौचक्रमेणहीति लघुहारीतोक्तेश्च ॥ भर्त्राशौचोत्तरमन्वारोहणेतुत्र्यहमाशौचं ॥ ऋग्वेदवा दात्साध्वीस्त्रीनभवेदात्मघातिनी ॥ त्र्यहाशौचेतुनिर्वृत्तेश्राद्धंप्राप्नोतिशास्त्रत इतिब्राह्मोक्तीरितिपृथ्वीचंद्रापरार्कौ ॥ एतदन्वारोहणेएवनत्वेकचितौ **ऋग्वे दवादः** इमानारीरविधवेत्यादिः ॥ एतदसवर्णापरमित्यन्ये **स्मार्तगौडास्तु**

देशांतरमृतेपत्यौसाध्वीतत्पादुकाद्वयमित्युपक्रम्य ब्राह्मे त्र्यहाशौचेतुनिर्वृत्ते इत्युक्तेर्मात्राशौचोत्तरमन्वारोहणेत्र्यहः ॥ सहगमनेतुपूर्णदशाहादि ॥ पिंडास्तुदशापिसहैव **तथाचजनकशूलपाणिशुद्धितत्त्वधृतव्यासः** संस्थितंपतिमालिंग्यप्रविशेद्याहुताशनम् ॥ तस्याःपिंडादिकंज्ञेयंक्रमशःपतिपिंडवत् ॥ अन्वितापिंडदानंतुयथाभर्तुर्दिनेदिने । तदर्थारोहिणीयस्मात्तस्मात्सानात्मघातिनीतिविष्णूक्तेश्च ॥ पृथक्चितौतुभर्त्राशौचमध्येतदूर्ध्ववासत्र्यहेणदशपिंडाः ॥ अन्विताया:प्रदातव्यादशपिंडास्त्र्यहेणतु ॥ स्वाम्याशौचेव्यतीतेतुतस्याः श्राद्धंप्रदीयतइतितत्रैवपैठीनसिस्मृतेः ॥ भर्त्राशौचोत्तरंमृतौतुचतुर्थेऽह्निश्राद्धम् ॥ शूलपाणिनात्विदमग्निपुराणीयत्वेनोक्तम् ॥ युद्धहतस्य सद्यःशौचेत्वन्वारोहणेत्रिरात्रम् ॥ एकचितौतुसंस्थितपतिमितिप्रागुक्तव्यासोक्तेःसद्यःशौचमित्याहुः ॥ अन्यसपिंडाशौचमध्येविदेशमृतान्वारोहणंत्वनाशक्यमेव ॥ शुचितायाअंगत्वात् ॥ अन्येतुरजोवत्याःसूतिकायाश्चगमननिषेधादितराशौचस्यानिषेधः ॥ अन्यथाप्रत्यक्षभर्तृमरणेकागतिरित्याहुः ॥ तन्मूलवचनंविनाचिंत्यमेव **स्मृत्यर्थसारेपि** सहगमनेसर्वत्रश्राद्धपिंडादौपाकैक्यंकालैक्यैंकंत्रक्यंचेति ॥ यातुपतिमुद्दिश्याऽन्यकालेऽन्यतिथावन्वारूढातस्याःश्राद्धंतत्क्षयतिथौकार्यम् नभर्तृतिथौ ॥ पारणेमरणेनॄणांतिथिस्तात्कालिकीस्मृतेतिस्कांदात् ॥ तिथिरेकैवजायतइत्यादिवचनाच्चेतिमदनरत्नपारिजातपृथ्वीचंद्रादयः ॥ अन्येतुतस्याःपतिमरणेनमृतप्रायत्वात् ॥ सहाग्रतःपृष्ठतोवातद्भक्त्याम्रियतेयदि । तस्याःश्राद्धंप्रदातव्यंपृथक्पत्युःक्षयेहनीतिस्मृत्यन्तरात् अग्रतःपृष्ठतोवापितद्भक्त्याम्रियतेयदि । तस्याःश्राद्धं सुतैःकार्यंपत्युरेवक्षयेहनीतिपुराणसमुच्चयाच्चभर्तृतिथावेवेत्याहुः ॥ अत्रमूलं चिंत्यम् **अत्रविशेषोहेमाद्रौस्मृत्यंतरे** सतामंगलसूत्रेणम्रियतेयदितद्दिने । उद्दिश्यविप्रपंक्तौतांभोजयेच्चसुवासिनीम् **अथश्राद्धसंपातेनिर्णयः** अत्रपित्रोर्मृततिथ्यैक्यवेमरणक्रमेणदर्शेवर्गद्वयवर्त्तत्रेणश्राद्धंकुर्यात् ॥ पौर्वापर्याज्ञानेतुपितृपूर्व्वंकुर्य्यादितिहेमाद्रिः **माधवादयस्तु** पित्रोःश्राद्धेसमंप्राप्ते

नवेपर्युषितेपिवा । पितृपूर्वसुतःकुर्यादन्यत्रासतियोगतइतिकाण्वाजिनिस्मृतेः ॥ सर्वत्रापितृपूर्वमिन्नप्रयोगमाहुः **पार्वणेकोद्दिष्टयोःसंपातेमाधवीये जाबालिः** यद्येकत्रभवेद्यातामेकोदिष्टञ्चपार्वणं । पार्व्वणंत्वभिनिर्वर्त्यएकोदिष्टंसमाचरेत् **गृहदाहादिनायुगपन्मरणेभृगुः** एककालेगतासूनां बहूनामथवाद्वयोः । तंत्रेणश्रपणंकृत्वाकुर्याच्छ्राद्धम्पृथक् पृथक् ॥ पूर्वकस्यमृतस्यादौ द्वितीयस्यततःपुनः । तृतीयस्यततःकुर्यात्सन्निपातेष्वयंक्रमःऋष्यशृङ्गः भवेद्यदिसपिंडानांयुगपन्मरणंतदा । संबंधासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत् **गारुडे** एकेनैवतुपाकेनश्राद्धानिकुरुतेत्रहि । विकिरंत्वेकतःकुर्यात्पिण्डान्दद्यात्पृथक्पृथक् ॥ अत्रानुगमनेचदाहसपिण्डनादौविशेषंवक्ष्यामः **अत्रिः** बहूनामथवाद्वाभ्यांश्राद्धञ्चेत्स्यात्समेहनि । तंत्रेणश्रपणंकृत्वापृथक्श्राद्धानिकारयेत् **पुलस्त्यः** महालयेगयाश्राद्धेगतासूनांक्षयेहनि। तंत्रेणश्रपणंकृत्वाश्राद्धंकुर्यात्पृथक्पृथक् ॥ इदंचपृथक्पाकेनभिन्नश्राद्धाशक्तौपृथक्पाकेनसंबंधासत्त्याश्राद्धभेदस्तुमुख्यःपक्षः ॥ एकत्रैवदिनेश्राद्धंद्वयंप्राप्तंयदातदा । चरेदेवपुरावर्षात्पितुर्मातुश्चयस्सुतः ॥ एकस्मिन्यःकरोत्यद्धिद्वयोःश्राद्धंयदाद्विजः । तदापूर्व्वंमृतस्यादौकृत्वास्नात्वायथाविधि ॥ पश्चात्पश्चान्मृतस्यैवपृथक्पाकैःसमाचरेत्।नैकस्मिन्दिवसेश्राद्धंत्रयाणांकुत्रचित् द्विजः । एकःकुर्यात्तथाप्राप्तेअन्योभ्रातासमाचरेत् ॥ भ्रातर्यविद्यमानेतुतत्परेद्विसमाचरेत् । अन्यथाश्राद्धहंतास्याच्छ्राद्धसंकरकृद्भवेदित्याश्वलायनोक्तेरितिपृथ्वीचन्द्रः **कात्यायनः** द्वेबहूनिनिमित्तानिजायेरन्नेकवासरे ॥ नैमित्तिकानिकार्याणिनिमित्तोत्पत्त्यनुक्रमात् ॥ **जाबालिः** श्राद्धंकृत्वातुतस्यैवपुनःश्रद्धंनतद्दिने । नैमित्तिकंतुकर्तव्यंनिमित्तानुक्रमोदयम् **कालादर्शे** नित्यदार्शिकयोश्चोदकुंभंमासिकयोरपि । दार्शिकस्ययुगादेश्चदार्शिकालभ्ययोगयोः ॥ दार्शिकस्यचमन्वादेःसंपातेश्राद्धकर्मणः । प्रसंगादितरस्यापिसिद्धेरुत्तरमाचरेत् **अस्यदेवताभेदेऽपवादमाहसएव** नित्यस्यचोदकुंभस्यनित्यमासिकयोरपिदर्शस्यचोदकुंभस्यदर्शमासिकयोरपि ॥ नित्यस्यचाब्दिक

स्यापिदार्शिकाब्दिकयोरपि। युगाद्याब्दिकयोश्चैवमन्वाद्याब्दिकयोस्तथा॥ प्रत्याब्दिकस्यचालभ्ययोगेषुविहितस्यच। संपातेदेवताभेदाच्छ्राद्धयुग्मंसमाचरेत्॥ निमित्तानियतश्चात्रपूर्वानुष्ठानकारणं॥ पित्रोस्तुपितृपूर्वत्वंसर्वत्रश्राद्धकर्मणि **माधवीयेस्मृतिसंग्रहे** काम्यतंत्रेणनित्यस्यतंत्रंश्राद्धस्यसिद्ध्यति **अथश्राद्धांगतर्पणम्। पारिजातेपृथ्वीचंद्रोदयेचगर्गः** पूर्वंतिलोदकंकृत्वाआमश्राद्धंतुकारयेत्। प्रत्यब्देनभवेत्पूर्वंपरेऽहनितिलोदकम्॥ पक्षश्राद्धंहिरण्येनअनुव्रज्यतिलोदकम्॥ नचनित्यतर्पणस्यायंपरेह्युत्कर्षः॥ नतुश्राद्धांगतर्पणमस्तीतिवाच्यम्॥ यस्तर्पयतितान्विप्रःश्राद्धंकृत्वापरेहनिपितरस्तेनतृप्यंति नचेत्कुप्यंतिवैभृशमितिगर्गेणफलनिंदार्थवादाभ्यामंगत्वेनोक्तेः॥ श्राद्धप्रक्रमाद्वार्षिकम् **बृहन्नारदीयेप्याब्दिकंप्रक्रम्य** परेद्युःश्राद्धकृन्मर्त्योयोनतर्पयतेपितॄन्। तस्यतेपितरःक्रुद्धाःशापंदत्वाव्रजंतिहि॥ पितृशब्दश्चश्राद्धेज्यवर्गपरः॥ तेनतर्पणस्यपशुपुरोडाशयागवत्प्रस्तरप्रहरणवच्चेष्टदेवतासंस्कारकृता॥ तेनाब्दिकेदिनेनित्यंस्वपित्रादितर्पणंकार्यमेव॥ श्राद्धांगभूतस्यैवपरेद्युरुक्तेः **तदुक्तं** प्रत्यब्दांगंतिलंदद्यान्निषिद्धेपिपरेहनि। वर्गैकस्यवचोयेषामन्येषांतुविवर्जयेत् **क्वचिद्विशेषमाहगार्गः** कृष्णेभाद्रपदेमासिश्राद्धंप्रतिदिनंभवेत्। पितॄणांप्रत्यहंकार्यंनिषिद्धाहेपितर्पणम्॥ तर्पणंतिलतर्पणं निषिद्धाहेपीत्युक्तेः॥ सकृन्महालयेश्वःस्यादष्टकास्त्वंतएवहि॥ अत्रसप्तमीनिर्देशात्अंगितास्फुटैव॥ तत्रजयात्जुहुयात्॥ मंद्रंप्रायणीयायांमंद्रंप्रातःसवनेइत्यादिवत् **अस्यापवादोबृहन्नारदीये** वृद्धिश्राद्धेसपिंड्यांचप्रेतश्राद्धेनुमासिके। संवत्सरविमोकेचकुर्यात्तुतिलतर्पणम्॥ तदयमर्थः॥ दर्शेविप्रनिमंत्रणोत्तरंपाकारंभोत्तरंवाश्राद्धप्रयोगस्यारब्धत्वात्ब्रह्मयज्ञोत्तरंनित्यतर्पणं॥ नैवश्राद्धांगतर्पणस्यतंत्रेणप्रसंगेनवासिद्धिःततःपूर्वंवैश्वदेवोत्तरंवाब्रह्मयज्ञकरणेश्राद्धांगतर्पणंपृथक्कार्यम्॥ पित्रोर्वार्षिकेतुनित्यतर्पणंतिलवर्ज्यंकार्यम्॥ नैवश्राद्धदिनेकुर्यात्तिलैस्तुपितृतर्पणम्। श्राद्धंकृत्वापराह्णेचतर्पणंतुतिलैःसहेतिवचनात्॥ सप्तम्यांभानुवारेचमातापित्रोर्मृतेहनि।

तिलैर्यस्तर्पणंकुर्यात्सभवेत्पितृघातकइतिस्मृतिरत्नावल्यांवृद्धमनूक्तेश्च । अत्रनित्यतिलतर्प्पणे तिलमात्रनिषेधोनतुतर्प्पणस्य तिलैरित्यस्यवैयर्थ्यापत्तेः **यत्तुकात्तीयम्** उपरागेपितुःश्राद्धेपातेऽमायांचसंक्रमे । निषिद्धेपिहिसर्वत्रतिलैस्तर्पणमाचरेदितितत्परेद्युःश्रद्धांगतर्पणविषयमितिकेचित् ॥ श्राद्धाशक्तस्यतत्स्थानापन्नतर्पणविषयमितियुक्तम् ॥ सकृन्महालयेपरेद्युस्तर्पणं ॥ अष्टकासुतुसप्तम्यष्टमीश्राद्धयोरंतेतदैववर्गद्वयस्य ॥ अन्वष्टकेतुमातृवर्गस्यापितीर्थश्राद्धेदर्शवत् ॥ माघादिष्वष्टकावदंते अनेकश्राद्धसंपातेतुयदितत्प्रसंगसिद्धिस्तदातदीयमेवतर्पणम् ॥ तंत्रत्वेश्राद्धसमसंख्यत्वेआदावंतेवा ॥ विषमसंख्यायांबहूनुरोधइति ॥ तस्माच्छ्राद्धांगतर्पणंसिद्धम् **तद्विधिःसंग्रहे स्नात्वातीरंसमागत्यउपविश्यकुशासने ॥ संतर्पयेत्पितॄन्सर्वान्स्नात्वावस्त्रंचधारयेत् ॥ तर्पणोत्तरंनित्यस्नानंकृत्वेत्यर्थः ॥ अपसव्यंततःकृत्वासव्यंजान्वाच्यभूतले । नामगोत्रस्वधाकारैर्द्वितीयांतेनतर्पयेत् अत्रवस्त्रादिरूपतोक्ता स्मृत्यर्थसारे** वसुरुद्रादितिसुतान्श्राद्धार्थेतर्पयेत्पितॄन् ॥ तत्रबह्वृचानांदक्षिणेनैव ॥ अनादेशेदक्षिणंप्रतीयादितिसूत्रात् ॥ अत्रप्रत्यंजलिमंत्रावृत्तिः ॥ निर्वापवत्तत्संख्यार्घ्यदानवच्चद्रव्यभेदात् ॥ अवघातवेदिप्रोक्षणादौतुद्रव्यैक्यान्नमंत्रावृत्तिः केचित्तुपरिव्याणमंत्रवत्क्रियमाणानुवादित्वेनकरणत्वाभावात्सकृदिच्छंति ॥ तन्न ॥ तत्रापूपद्रव्यैक्यात्परवीरसीति करणीभूतमन्त्रांतरसत्वादन्येतरेणव्यवधानापत्त्योभयोःकारणत्वायोगात्कर्तृभेदेन विकल्पायोगाच्चक्रियमाणानुवादित्वम् नत्वत्रतथेतिबौधायनादिवचनात्करणत्वमेव तेनावृत्तिरेवयुक्ता एवंनित्येपि ॥ यत्तुसंग्रहेनाम्नापठंति ॥ पित्रोःक्षयाहेसंप्राप्तेयःकुर्यान्नित्यतर्पणम् । आसुरंतद्भवेच्छ्राद्धंतत्तोयंरुधिरंभवेत् ॥ सर्वदातर्पणंकुर्याद्ब्रह्मयज्ञपुरःसरं । मृताहेनैवकर्तव्यंकृतंचेन्निष्फलंभवेत् ॥ तत्समूलत्वेसतिफलविषयं ॥ यच्चपठंति **कपिलः** मन्वादिषुयुगाद्यासु दर्शसंक्रमणेषुच । पौर्णमास्यांव्यतीपातेदद्यात्पूर्वेतिलोदकं ॥ अर्कोदयेगजच्छाये षष्ठीषुचमहालये भरण्यांचमघाश्राद्धेतदंतेतर्पणंविदुः **शौनकः** मातापित्रो

मृताहेचपरेहनितिलोदकं। कारुण्यश्राद्धविषयेसद्योदद्यात्तिलोदकं॥ एत न्निर्मूलम् **अथतिलतर्पणनिषेधः गार्ग्यः** भानौभौमेत्रयोदश्यांनन्दाभृगु मघासुच। पिण्डदानंमृदास्नानंनकुर्यात्तिलतर्पणं **स्मृत्यर्थसारे** विवाहव्रतचू डासुवर्षमर्धतदर्धकं अर्धतदेव॥ वृद्धौसत्यांचतन्मासिनेत्याहुस्तिलतर्पणं **हेमाद्रौमरीचिः** सप्तम्यांरविवारेचगृहेजन्मदिनेतथा। निशासन्ध्यासुपुत्रा र्थीनकुर्यात्तिलतर्पणं **यत्तुसंग्रहे** नन्दायांभार्गवदिनेकृत्तिकासुमघासुच। भर ण्यांभानुवारेचगजच्छायाह्वयेतथा॥ अयनद्वितयेचैवमन्वादिषुयुगादिषु॥ पिण्डदानंमृदास्नानंनकुर्य्यात्तिलतर्प्पणमितितर्क्यं॥ पानीयमप्यत्रतिलै र्विमिश्रंदद्यातपितृभ्यःप्रयतोमनुष्यइत्यादिविरोधात् **अत्रापवादः पृथ्वीच न्द्रोदये** तीर्थेतिथिविशेषेचगयायांप्रेतपक्षके। निषिद्धेपिदिनेकुर्यात्तर्पणंति लमितिमश्र **स्मृत्यर्थसारेपि** तिथितीर्थविशेषेषुकार्यंप्रेतेचसर्वदेति **गोभि लः** तिलाभावेनिषिद्धाहेसुवर्णरजतान्वितम्। तदभावेनिषिद्धेचेत्तु दर्भमन्त्रे णवापुनः॥ पतितस्यतिलोदकंवक्ष्यामः॥ अथवृधिश्राद्धं **तन्निमित्तंपृथ्वी चन्द्रोदयेब्राह्मे** जन्मन्यथोपनयनेविवाहेपुत्रकस्यच। पितृन्नांदीमुखान्ना मतर्पयेद्विधिपूर्वकं॥ देवव्रतेषुचाधानयज्ञपुंसवनेषुच। नवान्नभोजनेस्नाने ऊढायाःप्रथमार्तवे॥ देवारामतडागादिप्रतिष्ठासूत्सवेषुच। राजाभिषेकेबा लान्नभोजनेवृद्धिसंज्ञकान्॥ वनस्थाद्याश्रमंगच्छन्पूर्वेद्युःसत्यएववा। पि तॄन्पूर्वोक्तविधिनातर्पयेत्कर्मासिद्धये **विष्णुपुराणे** यज्ञोद्वाहप्रतिष्ठासुमेख लाबंधमोक्षयोः॥ पुत्रजन्मवृषोत्सर्गेवृद्धिश्राद्धंसमाचरेत् **तत्रैव** नामकर्म णिबालानां चूडाकर्मादिकेतथेत्युक्तेर्निष्कमान्नप्राशनयोर्नश्राद्धमितिमैथि लाः पूर्वोक्तविरोधात्॥ नानिष्ट्वेतिविरोधात्॥ सुतोत्पत्तौतथाश्राद्धेअन्न प्राशनिकेतथेतिराजमार्तंडाच्च **यत्तुछन्दोगपरिशिष्टं** सूर्येंद्वोःकर्मणीयेचत योःश्राद्धंनविद्यते इतितत्तेषामेवेतिकल्पतरुः **बह्वृचकारिकायां** स्यादा भ्युदयिकंश्राद्धंवृद्धिपूर्तेषुकर्मसु। पुंसःसवनसीमंतचौलोपनयनेष्विह॥ विवा हेचानलाधेयप्रभृतिश्रौतकर्माणि। इदंश्राद्धंप्रकुर्वीतद्विजावृद्धिनिमित्तकम्

अन्यैःषोडशसंस्कारश्रावण्यादिष्वपीष्यते । वाप्याद्युद्यापनादौतुकुर्युःपूर्तं निमित्तकं **बोपदेवकालादर्शौ** सीमंतव्रतचौलनामकरणान्नप्राशनोपायन स्नानाधानविवाहयज्ञतनयोत्पत्तिप्रतिष्ठासुचा।पुंसूत्यावसथप्रवेशनसुताद्याच स्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयिताद्यर्तौचनांदीमुखं **यत्तुकामधे नौ** जलाशयप्रतिष्ठायांवृषोत्सर्गादिकर्मसु । वत्सराभ्यंतरेपित्रोर्वृषस्योत्सर्गक र्मणि ॥ वृद्धिश्राद्धंनकुर्वीततदन्यत्रसमाचरेदिति ॥ तत्रजलाशयेवृद्धिश्राद्धस्य निषेधोनतुकर्मांगस्येतिकेचित् ॥ अन्येत्वस्यनिर्मूलतामाहुः **श्राद्धकौमुद्यां निर्णयामृतेचमात्स्ये** अन्नप्राशेचसीमंतेपुत्रोत्पत्तिनिमित्तके ।पुंसवेचनिषेके चनवेवेश्मप्रवेशने ॥ देववृक्षजलादीनांप्रतिष्ठायांविशेषतः । तीर्थयात्रावृषो त्सर्गेवृद्धिश्राद्धंप्रकीर्तितम् ॥ इदंचावश्यकम् ॥ वृद्धौनतर्पितायेवैपितरोगृ हमेधिभिः । तद्धीनमफलंज्ञेयमासुरोविधिरेवसइतिशातातपोक्तेः ॥ अत्र श्राद्धत्रयंसएवाह ॥ मातृश्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरम् । ततोमातामहा नांचवृद्धौश्राद्धत्रयंस्मृतम् **तत्कालमाहपृथ्वीचंद्रोदयेगार्ग्यः** मातृश्राद्धंतु पूर्वेद्युःकर्माहनितुपैतृकम् । मातामहंचोत्तरेद्युर्वृद्धौश्राद्धत्रयंस्मृतम् **अत्रा प्यशक्तौसएव** पृथक्दिनेष्वशक्तश्चेदेकस्मिन्पूर्ववासरे । श्राद्धत्रयंप्रकुर्वीत वैश्वदेवंतुतांत्रिकमिति **वृद्धमनुरपि** अलाभेभिन्नकालानांनांदीश्राद्धत्रयं बुधः । पूर्वेद्युर्वैप्रकुर्वीतपूर्वाह्णेमातृपूर्वकम् ॥ अत्रमहत्सुपूर्वेद्युस्तदहरल्पेष्वि तिगृह्यपरिशिष्टाद्व्यवस्थाज्ञेया ॥ तच्चप्रातरेव ॥ पार्वणंचापराह्णेतुप्रातर्वृद्धि निमित्तकमितिशातातपोक्तेः ॥ अत्रप्रातःशब्दःसार्द्धप्रहरपरः ॥ प्रहरोप्य र्धसंयुक्तः प्रातरित्यभिधीयतइतिगार्ग्योक्तेरितिपृथ्वीचंद्रः ॥ इदंचपुत्रजन्मा तिरिक्तविषयम् **तदाहात्रिः** पूर्वाह्णेवैभवेद्वृद्धिर्विनाजन्मानिमित्तकम् । पुत्र जन्मनिकुर्वीतश्राद्धंतात्कालिकंबुधइति ॥ एतदनियतनिमित्तपरम् ॥ निय तेषुनिमित्तेषुप्रातर्वृद्धिनिमित्तकम् । तेषामनियतत्वेतुतदानंतर्यमिष्यत इ तिलौगाक्षिस्मृतेः ॥ आधानांगंनांदीश्राद्धंत्वपराह्णएव ॥ आमश्राद्धं तुपूर्वा ह्णेसिद्धान्नेनतु मध्यतः । पार्वणंवापराह्णेतुवृद्धिश्राद्धंतथाग्निकमितिनिर्णयामृ

तेगालवोक्तेः ॥ नांदीमुखाह्वयप्रातराब्दिकंत्वपराह्णतइतिविष्णूक्तेश्च ॥ इदं च मातृपितृमातामहादिक्रमेण नवदैवत्यंकार्यम् ॥ तत्रमातामहाः सपत्नीकाः वृद्धप्रमातामहप्रमातामहमातामहानांसपत्नीकानामितिपृथ्वीचंद्रोदये गारुडेगद्यरूपेणपाठात् **हेमाद्रौशंखः** नांदीमुखेसत्यवसूसंकीर्त्यौवैश्वदेविके **वृद्धपराशरः** नांदीमुखेभ्योदेवेभ्यःप्रदक्षिणकुशासनम् । पितृभ्यस्तन्मुखेभ्यश्चप्रदक्षिणमितिस्मृतिः**यत्तुवसिष्ठः** नांदीमुखेविवाहेचप्रपितामहपूर्वकम्। नामसंकीर्तयेद्विद्वानन्यत्रपितृपूर्वकम् **यच्चस्मृत्यर्थसारे** वृद्धमुख्यास्तुपितरोवृद्धिश्राद्धेषुभुंजतइति **यच्चगारुडे** व्युत्क्रमप्रतिपादनंतच्चशाखांतरविषयम् ॥ पितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइतिबह्वृचपरिशिष्टेकात्यायनेनचानुलोम्यान्नानात् ॥ पृथ्वीचंद्रोदयेप्येवम् ॥ यत्तुकेचिद्वृद्धिपदंपित्रादिषुप्रयुंजते तन्न ॥ अनस्मद्वृद्धशब्दानामरूपाणामगोत्रिणाम् । अनाम्नामतिलाद्यैश्चनांदीश्राद्धंतुसव्यवदितिपृथिवीचंद्रोदयेसंग्रहोक्तेः ॥नचनिषेधादेवविधिकल्प्यतइतिवाच्यम् ॥ प्रोष्ठपदीश्राद्धेप्रपितामहात्परेषांवृद्धापित्रादीनांदेवतात्वान्नांदीश्राद्धत्वसाम्येनेहापितत्प्राप्तौनिषेधात् **गोत्रनामानिनिषेधस्तु** शुभार्थीप्रथमातेनवृद्धौसंकल्पमाचरेदित्युपक्रम्यानस्मद्वृद्धशब्दानामभित्युक्तेःसंकल्पश्राद्धपरः ॥ सपिंडकेतुसर्वंभवतीतिप्रयोगपारिजातः ॥ गोत्रनामभिरामंत्र्यपितृभ्योर्ध्वंप्रदापयेदितिछंदोगपरिशिष्टेतद्विधानात् **यत्तुब्राह्मे** पितापितामहश्चैव तथैवप्रपितामहः । त्रयोह्यश्रुमुखाह्येतेपितरःपरिकीर्तिताः॥ तेभ्यःपूर्वतरायेचप्रजावंतःसुखैधिताः। तेतुनांदीमुखानांदीसमृद्धिरितिकथ्यत इति **यच्चमार्कंडेयपुराणे** येस्युःपितामहादूर्ध्वंतेतुनांदीमुखाःस्मृताइतित ज्जीवत्पित्रादित्रिककर्तृकवृद्धिश्राद्धविषयम् ॥ तेनतस्येदमावश्यकम् **यत्तुविष्णुः** पितरिपितामहेचजीवतिनैवकुर्यादितितद्दर्शादिविषयमितिकल्पतरुः ॥ मदनपारिजातेप्येवम् **हेमाद्रिस्तु** नांदीमुखानांश्राद्धंतुकन्याराशिगतेरवौ । पौर्णमास्यांतुकर्तव्यंवराहवचनंयथेति ॥ प्रौष्ठपदीश्राद्धैकवाक्यत्वात्तत्रैवपूर्वेषांदेवतात्वामित्याह ॥ अत्रसत्यवसुविश्वेदेवावित्युक्तंप्राग्वत् य

433

त्तुशातातपः मातुःश्राद्धंतुयुग्मैःस्यादेवंप्राङ्मुखैःपृथगितितद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वयेविश्वेदेवविकल्पार्थम् **प्रयोगैक्येतु** विश्वेदेवविहीनंतु केचिदिच्छंतिमानवाइतितद्भिन्नप्रयोगमातृश्राद्धभिन्नश्राद्धद्वयेविश्वेदेवविकल्पार्थम् ॥ प्रयोगैक्येतुदेवनियमइतिहेमाद्रिः ॥ एतच्चमातृपूजापूर्वकंकार्यम्॥ अकृत्वामातृयागंतुयःश्राद्धंपरिवेषयेत् । तस्यक्रोधतमाविष्टाहिंसामिच्छंतिमातरइतिशातातपोक्तेः**कौर्मेपि** पुष्पैर्धूपैःसनैवेद्यैर्गंधाद्यैर्भूषणैरपि । पूजयित्वामातृगणंकुर्याच्छ्राद्धत्रयंबुधइति **छंदोगपरिशिष्टे** कर्मादिषुतुसर्वेषुमातरः सगणाधिपाः । पूजनीयाःप्रयत्नेनपूजिताःपूजयंतिताः ॥ प्रतिमासुचशुद्धासु लिखितावापटादिषु ॥ अपिवाक्षतपुंजेषुनैवेद्यैश्चपृथग्विधैः ॥ कुड्यलग्नांवसोर्धारांसप्तधारांघृतेनतु । कारयेत्पंचधारांवानातिनीचांनचोच्छ्रिताम्॥आयुष्याणिचशांत्यर्थंजप्त्वातत्रसमाहितः।षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेत् ॥ अत्रसर्वेष्वितिग्रहणात्ग्रहयज्ञतद्विकारेष्वपिनित्यंश्राद्धम् ॥ नानिष्ट्वातुपितॄन्श्राद्धेकर्मकिंचित्समाचरेदितिशातातपोक्तेश्च ॥ इयंचवसोर्धारातच्छाखीयानांनियताअन्येषांत्वनियता ॥ बह्वल्पंवास्वगृह्योक्तमित्युक्तेःकरणेत्वभ्युदयः ॥ यन्नान्मातंस्वशाखायामित्युक्तेः ॥ आयुष्याणिआनोभद्राइत्यादीनि ॥ षड्भ्यइतिमात्रादित्रिकोपलक्षणमितिपृथ्वीचंद्रोदयः ॥ छंदोगानांषड्दैवत्यमन्येषांनवदैवत्यमित्याशार्कः ॥ ममतुमतंकोकिलमतानुसारिणांमातृमातामहप्रमातामहाइतिमात्रासहैवमातामहश्राद्धकरणात् ॥ तद्विषयमिदंषड्भ्यइति ॥ मातरस्तत्रैवोक्तः ॥ गौरीपद्माशचीमेधासावित्रीविजयाजया । देवसेनास्वधास्वहामातरोलोकमातरइतिसर्वविशेषणंतेनचतुर्दशत्वम् ॥ यदाषोडशेतिपाठस्तदादेवतांतरम् **चंद्रिकायांचतुर्विंशतिमतेत्वन्याउक्ताः** तिस्रःपूज्याःपितुःपक्षेतिस्रोमातामहेतथा । इत्येतामातरःप्रोक्तापितुर्मातुःस्वसाष्टमी ॥ आसांजीवनेप्रत्यक्षपूजनम् ॥ मृतानांत्वक्षतपुंजेष्वितिहेमाद्रिः॥ ब्राह्मण्याद्यास्तथासप्तदुर्गाक्षेत्रगणाधिपान् ॥ वृत्यादौपूजयित्वातुपश्चान्नांदीमुखान्पितॄन् ॥ मातृपूर्वान्पितॄन्पूज्यततोमातामहानपि मातामहीस्ततःके

चिद्युग्माभोज्याद्विजातयइति ॥ अत्रद्वादशदैवतस्यदेशाचाराद्व्यवस्था ब्राह्मण्याद्याः ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा । वाराहीचतथेंद्राणी चामुंडाःसप्तमातरइत्यपरार्केउक्ताः ॥ अत्रचौलादीनांयौगपद्येतंत्रतोक्तः छं दोगपरिशिष्टे गणशःक्रियमाणानांमातृभ्यःपूजनंसकृत् । सकृदेवभवेच्छ्राद्धमादौनपृथगादिषु ॥ मातृभ्यइतिषष्ठ्यर्थेचतुर्थी ॥ गणशःएकानेकपुत्राणांसंस्कारेष्वेकदिनेएकदेशकालकर्त्रैक्यादित्यर्थः तथा अत्रसकृद्यानिकर्माणिक्रियेरन्कर्मकारिभिः । प्रतिप्रयोगंनैवस्युर्मातरःसगणाधिपाःकर्मवृत्तावपिकुत्रश्राद्धंकार्यंक्वचित्युक्तंतत्रैव ॥ आधानेहोमयोश्चैववैश्वदेवतथैवच । बलिकर्मणिदर्शेचपूर्णमासेतथैवच । नवयज्ञेचयज्ञज्ञावदंत्येवंमनीषिणः ॥ एकमेवभवेच्छ्राद्धमेतेषुनपृथक्पृथक् ॥ एतेषुप्रतिप्रयोगंनावर्ततेकिंत्वादौ ॥ एतद्भिन्नेसोमयागादौप्रतिप्रयोगमावर्ततेएव श्राद्धमित्यर्थः ॥ क्वचिदादावपिनिषेधमाहसएव ॥ नाष्टकासुभवेच्छ्राद्धंनश्राद्धेश्राद्धमिष्यते । नसोष्यंतीजातकर्मप्रोषितागतकर्मसु ॥ विवाहादिःकर्मगणोयउक्तोगर्भाधानंशुश्रुमोयस्यचांते ॥ विवाहादावेकमेवात्रकुर्याच्छ्राद्धंनादौकर्मणःकर्मणःस्यात् । सोष्यंत्याआसन्नप्रसवायाः ॥ सोष्यंतीमभ्युक्ष्येत्युक्तंकर्म ॥ कात्यायनोक्तस्य श्राद्धस्यपाकस्यप्राधान्यात्तस्यच ॥ जातश्राद्धेनदद्यात्तुपक्वान्नंब्राह्मणेष्वपीतिनिषेधान्नजातकर्मणिनांदीश्राद्धमित्याशार्कःआमान्नेनवाकार्यमित्यपितेनैवोक्तं गौडास्तु जातकर्मण्येवनिषेधः ॥ पुत्रजन्मनिमित्तंकंतुकार्यमेव ॥ जन्मन्यथोपनयनेइत्युक्तेः ॥ नैमित्तिकमथोवक्ष्येश्राद्धमभ्युदयात्मकम् । पुत्रजन्मनितत्कार्यंजातकर्मसमंनरैरितिमार्कंडेयपुराणाच्चेत्याहुः ॥ हारलतायांश्राद्धविवेकेचैवम् ॥ एतेनजातकर्मणिकालांतरेश्राद्धनिषेधोनपुत्रजन्मदिनेइतिवाचस्पतिमतंपरास्तम् ॥ अत्रनिषेककालेइतिवचनात्गर्भाधानेननिषेधः॥ निषेककालोसोमेचसीमंतोन्नयनेतथा । ज्ञेयंपुंसवनेश्राद्धंकर्मांगंविधिवत्कृतमितिपारस्करः ॥ प्रोषितेति प्रोष्यैत्यगृहानुपतिष्ठतेपुत्रंदृष्ट्वाजपतीतिविहितंकर्मविवाहादिगर्भाधानांतोयोगृहप्रवेशश्चतुर्थीकर्मादिकर्मसमूहउक्तः

सूत्रकारेण तत्रापिप्रतिकर्मनेत्यर्थः ॥ अन्येपिहलाभियोगादयोअपवाद विषयास्तत्रैवज्ञेयाः ॥ तदेहऽप्रचाराान्नोच्यंते **अत्राधिकारिणः** ॥ **विष्णु पुराणे** जातस्यजातकर्मादिक्रियाकांडमशेषतः । पितापुत्रस्यकुर्वीतश्राद्धं चाभ्युदयात्मकम् ॥ अत्रकेचित् ॥ जीवत्पितुःसाग्नेरेववृद्धिश्राद्धेधिकारः ॥ नतुनिरग्नेः ॥ नजीवत्पितृकःकुर्याच्छ्राद्धमग्निमुखेद्विजः । येभ्यएवपितादद्यात्तेभ्यःकुर्वीतसाग्निकः ॥ पितामहेप्येवमेवकुर्याज्जीवतिसाग्निकः । साग्निकोपिनकुर्वीत जीवतिप्रपितामहेइतिचंद्रिकायांसुमंतूक्तेरित्याहुः ॥ प्रयोगपारिजातेप्यनाहिताग्निर्नकुर्यादितीदंव्याख्यातं तन्न ॥ अनग्निकोपिकुर्वीतजन्मादौवृद्धिकर्मणि । येभ्यएवपितादद्यात्तानेवोद्दिश्यतर्पयेदितिहारीतोक्तेः ॥ सौमंतवंतुवृद्धिश्राद्धभिन्नश्राद्धपरमित्युक्तंमदनरत्ने ॥ श्राद्धपदंपिंडपितृयज्ञपरमितिपृथ्वीचंद्रोदयः ॥ निर्णयामृतेतुहारीतीयेनाग्निकोनाहिताग्निरभिप्रेतः ॥ पूर्ववचनेतुसाग्निकःश्रौताग्निः स्मार्ताग्निश्चोच्यते ॥ तेनोभयाग्निहीनस्यनेत्युक्तं तन्न ॥ पूर्वोक्तदिशागतिसम्भवेनग्निपदस्यस्मार्त्ताग्निपरत्वेमानाभावात् ॥ वक्ष्यमाणनित्यानित्यसंयोगविरोधात् ॥ पितरोजनकस्येज्या यावद्व्रतमनाहितम् । समाहितव्रतःपश्चात्स्वान्यजेतपितामहानिति पृथ्वीचन्द्रोदयेयमवचो विरोधाच्च **अपरार्केपि** समावर्तनेब्रह्मचारीस्वयमेवनान्दीश्राद्धंकुर्यादित्याहुः ॥ अतःपूर्वमेवसाधु ॥ बोपदेवोप्येवमाह ॥ यत्तुमतं जीवत्पितुःपुत्रनामकर्मादौनवृद्धिश्राद्धंहारीतीये जन्मादावित्यादिशब्देनतत्प्राप्तावपिउद्वाहेपुत्रजनने पित्र्येष्ट्यांसौमिकेमखे । तीर्थेब्राह्मणआयाते षडैतेजीवतःपितुरिति मैत्रीयपरिशिष्टेउद्वाह एवतस्योपसंहारात् ॥ एवंयत्रतुसंस्कारादिपदंतदप्युद्वाहादिपरमेवेति तन्न ॥ उद्वाहपदस्यस्वविवाहपरत्वस्यापिसम्भवात् ॥ पुत्रविवाहपरत्वेमानाभावात् नामकर्मणिबालानांचूडाकर्मादिकेतथेत्यादिभिर्नित्यश्राद्धस्यचौलाद्यंगत्वावगतौनित्यानित्यसंयोगविरोधाच्च ॥ अतोजन्मादाविति सर्वसंस्कारसंग्रहः त**थाकात्यायनः** स्वपितृभ्यःपितादद्यात्सुतसंस्कारकर्मसु । पिण्डानोद्वाहनात्ते

र्णांतस्याभावेतुतत्क्रमात् ॥ सुतानांचौलादिसंस्कारेषुपितास्वापितृभ्यःपिण्डान् श्राद्धंपिण्डदोंशहरश्चैषामितिदर्शनादौद्वहनाद्विवाहपर्यंतंदद्यात् ॥ विवाह श्चप्रथमः ॥ नांदीश्राद्धम्पितःकुर्य्यादाद्येपाणिग्रहेबुधः । अतऊर्ध्वंप्रकुर्व्वीत स्वयमेवतुनान्दिकमितिस्मृतेः **तस्यपितुरभावेतत्क्रमात्** असंस्कृतास्तुसं स्कार्या भ्रातृभिःपूर्वसंस्कृतैरिति ॥ यःकर्तृकर्मस्तेनक्रमेणज्येष्ठभ्रात्रादिर्दद्या दितिचन्द्रिकादयः ॥ हेमाद्रिस्तुतस्यपितुरभावेयःपितृव्यमातुलादिः संस्कु र्यात्सतत्क्रमात्संस्कार्यपितृक्रमाद्दद्यान्नतुत्वपितृभ्यइतिव्याचख्यौ ॥ समावर्त नस्यापिविवाहप्राचीनसुतसंस्कारत्वात् पितैवनांदीश्राद्धंकुर्यात् ॥ तदभावे ज्येष्ठभ्रातादिभिः ॥ तदभावेस्वयमेवकुर्यात् ॥ उपनयनेनकर्माधिकारस्यजा तत्वात् ॥ एवमाद्यविवाहेपीतिपृथ्वीचन्द्रोदयचान्द्रिकादयः ॥ मदनरत्नेप्ये वम् ॥ यदातु पितरिसन्यस्तेप्रोषितेपतितेबाधर्मार्थंतत्पुत्रमन्यःसंस्कुर्यात्तदा संस्कार्यपितुःपित्रादिभ्योदद्यात् ॥ पितरोजनकस्येज्यायावद्व्रतमनाहितम् । समाहितव्रतःपश्चात्स्वान्यजेतापितामहानिति पृथ्वीचन्द्रोदयेयमोक्तेः **जीव त्पितृकस्यविशेषमाहकात्यायनः** वृद्धौतीर्थेचसंन्यस्तेतातेचपतितेसति ॥ येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइति **यत्तुबह्वृचपरिशिष्टे** जीवत्पि तासुतसंस्कारेषु मातृमातामहयोःकुर्यात् ॥ तस्यांजीवत्यांमातामहस्यैवेति त त्तच्छाखीयानामेवेतिदिक् ॥ स्मृतितत्वादिगौडग्रन्थेषुतुजीवन्मातृकःपिता महादिभ्यो वृद्धौदद्यात् ॥ जीवन्तमपिदद्याद्वाप्रेतायान्नोदकेद्विजइतिकात्या यनोक्तेः ॥ जीवेतस्मिन्सुताःकुर्युः पितामह्यासहैवतु । तस्यांचैवतुजीवत्यां त स्याश्चश्रेतिनियइतिहारीतोक्तेश्चेत्युक्तम् ॥ तस्मिन्भर्तरिदाक्षिणात्यास्तु पूर्वोक्तसपिण्डीकरणादिविषयत्वात्।जीवेत्तुयादिवर्गाद्यस्तंवर्गेतुपरित्यजेदिति वचनात्तद्वर्गस्यलोपएवेत्याहुः **यत्तुचन्द्रिकायांपारस्करः** निषेककालेसोमे त्यसीमन्तोन्नयनेतथा ॥ ज्ञेयंपुंसवनेश्राद्धं कर्मांगंवृद्धिवच्चतदिति तत्रगर्भा धानादौकर्मांगंजातकर्म्मादावुक्तंतुवृद्धिश्राद्धंपृथगेवविधिवदित्युक्तेः **गौड निबन्धेमात्स्ये** अन्नप्राशेचसीमन्ते पुत्रोत्पत्तिनिमित्तके । पुंसवेचनिषेकेच

नववेश्मप्रवेशने ॥ वेदव्रतजलादीनां प्रतिष्ठायांतथैवच । तीर्थयात्रावृषोत्सर्गे वृद्धिश्राद्धंप्रकीर्तितम् ॥ अत्रभूतनिमित्तानांवृद्धित्वम् ॥ भाविनिमित्तानामंगत्वम् ॥ वृद्धिशब्दस्तद्धर्मादिदेशार्थइतिगौडाः ॥ अन्येतुनिषेकादौ कर्मांगवृद्धिश्राद्धयोः समुच्चयमाहुः ॥ नांदीश्राद्धसंज्ञातूभयानुगता अथेतिकर्तव्यता । **पृथ्वीचन्द्रोदये वृद्धपराशरः** मालत्याःशतपत्रायाःमल्लिकाकुब्जयोरपि । केतक्याःपाटलायावा देयामालानलोहिता ॥ श्राद्धेमालानिषेधस्यायमपवादः **तथा** सुवेषभूषणैस्तत्रसालंकारैस्तथानरैः ॥ कुंकुमाद्यानुलिप्तांगैर्भाव्यन्तुब्राह्मणैःसह ॥ स्त्रियोपिस्युस्तथाभूतागीतनृत्यादिहर्षिताः **हेमाद्रौ ब्रह्माण्डे** कुशस्थानेचदूर्वाःस्युर्मंगलस्याभिवृद्धये । कुशा अपिवक्ष्यन्ते **छन्दोगपरिशिष्टे** प्रातरामंत्रितान्विप्रान्युग्मानुभयतस्तथा ॥ उभयतःदैवेपित्र्येच ॥ वैश्वदेवेद्वौविप्रौपित्रादीनामेकैकस्यद्वौद्वाविति विंशतिः ॥ त्रिकेवाहावित्यष्टौविप्राः **अत्रविप्रालाभेस्त्रियोपिभोज्याइत्याहाशार्के वृद्धवसिष्ठः** मातृश्राद्धेतुविप्राणामलाभेपूजयेदपि । पतिपुत्रान्विताभव्या योषितोष्टौकुलोद्भवाः ॥ मातृत्रिकेचतस्रः मातामहीत्रिकेचेत्यष्टावितिहेमाद्रिः ॥ अत्रपित्र्येप्राङ्मुखाविप्राः ॥ पाद्येपित्र्येचतुरस्रंमण्डलमिति जयन्तः **हेमाद्रौब्राह्मे** विप्रान्प्रदक्षिणावर्तप्राङ्मुखानुपवेशयेत् **छंदोगपरिशिष्टे** गोत्रनामभिरामंत्र्यपितृभ्योऽर्घ्यंप्रदापयेत् ॥ नात्रापसव्यकरणंनपिन्यंतीर्थमिष्यते ॥ ज्येष्ठोत्तरकरात्युग्मान्कराग्राग्रपवित्रकान्।कृत्वार्घ्यंसंप्रदातव्यंनैकैकस्यात्रदीयते । पित्रादेर्द्वौद्वौ विप्रौतयोर्दक्षिणहस्तौसंयोज्यप्रथमोपवेशितविप्रकरोपरितंत्रेद्वयोरर्घ्यंदद्यादित्यर्थः ॥ बह्वृचकारिकायांतुदत्तार्घ्यादेकदेशःस्यादर्घ्यदानंप्रतिद्विजम्।आवृत्तिरपिमंत्रस्यप्रतिब्राह्मणमिष्यते ॥ प्रतिद्विजंपृथक्कुर्यान्निवीत्यर्घ्यानुमंत्रणामित्युक्तम्॥ मधुमध्वितियस्तत्रत्रिर्जपोशितुमिच्छताम् । गायत्र्यानंतरंस्तोत्रं मधुमंत्रविवर्जितम्॥नचाश्नन्तुजपेदत्रकदाचित्पितृसूक्तकम् **तथा** संपन्नमितितृप्ताःस्थ प्रश्नस्थानेविधीयते । सुसंपन्नमितिप्रोक्ते शेषमन्नन्निवेदयेत ॥ अक्षय्योदकदानञ्च अर्घ्यदानवदिष्य

ते । षष्ठ्यैवनियतंकुर्यान्नचतुर्थ्यांकदाचन **चंन्द्रोदयेब्राह्मे** पठेच्छकुनिसूक्त न्तु स्वस्तिसूक्तंशुभन्तथा । नान्दीमुखान्पितॄन्भक्त्यासांजलिश्चसमाहृये त् **तथा** शल्यन्नन्दधिमध्वक्तं बदराणियवांस्तथा । मिश्रीकृत्वातुचतुरः पि ण्डान्श्रीफलसन्निभान् ॥ दद्यान्नान्दीमुखेभ्यश्च पितृभ्योविधिपूर्वकम् । द्रा क्षामलकमूलानि यवांश्चविनियोजयेत् ॥ तान्येवदक्षिणार्थंतु दद्याद्विप्रेषुस र्वदा **तत्रैवचतुर्विंशतिमते** द्वौद्वौचाभ्युदयेपिण्डावेकैकस्मैविनिःक्षिपेत् । एकंनाम्नापरंतूष्णीं दद्यात्पिण्डान्पृथक्पृथक् **वसिष्ठः** प्राङ्मुखोदेवतीर्थेन प्राङ्कुलेषुकुशेषुच । दत्वापिण्डान्नकुर्वीतपिण्डपात्रमधोमुखम् ॥ नान्दीमुखे पितृभ्यःस्वाहेतिवापिण्डदानमंत्रइतिवृत्तिः ॥ अत्रपिण्डाःकृताकृताइत्युक्त म् **तत्रैवभविष्ये** पिण्डनिर्वपणंकुर्यान्नवाकुर्याद्विचक्षणः । वृद्धिश्राद्धेमहाबा हो कुलधर्मानवेक्ष्यतु **छागलेयः** अग्नौकरणमर्घ्यंवा वाहनंचावनेजनम् । पिण्डःश्राद्धेप्रकुर्वीत पिण्डहीनेनिवर्तते ॥ तेनान्नभोजनस्यैवप्रधानत्वाद्यदि विप्रस्यवमनंतदातस्यैवपार्वणस्यपुनरावृत्तिरितिसिद्धम् ॥ अत्रसांकल्पे विशेषः प्रयोगपारिजातेसंग्रहे । शुभार्थीप्रथमान्तेन वृद्धौसांकल्पमाचरेत् ॥ नषष्ठ्यायदिवाकुर्यान्महादोषोभिजायते ॥ नामगोत्रादिनिषेधोप्यत्रैवनतुस पिण्डकश्राद्धेइतिसएव ॥ अत्रायंक्रमः ॥ नान्दीश्राद्धदैवेक्षणःक्रियतामिति द्वौयुगपन्निमंत्र्यओंतथेति विप्राभ्यांयुगपदुक्तेप्राप्नुतभवन्तौप्राप्नवावइतिवैश्व देववत् पित्र्येचद्विवचनान्तेनविप्रद्वयेप्रयोगंकुर्यात् **आहिताग्निस्तुहेमाद्रौ ब्राह्मे** योग्नौतुविद्यमानेपि वृद्धौपिण्डान्ननिर्वपेत् । पतन्तिपितरस्तस्यनरके सचपच्यते **बह्वृचपरिशिष्टे** द्वौदर्भौपवित्रेपवित्राणिचत्वारि ॥ शन्नोदेवीत्य नुमंत्रितासुयवानावपति ॥ यवोसिसोमदेवत्यो गोसवेदेवनिर्मितः । प्रत्नव द्भिःप्रत्तःपुष्ट्यानान्दीमुखान्पितॄनिमाल्लोकान्प्रीणयाहिनः स्वाहेतिस्वाहा र्घ्या इतिपृच्छति ॥ विश्वेदेवाइदंवोअर्घ्यनान्दीमुखाःपितरइतियथालिंगम र्घ्यदानंगन्धादिदानंद्विर्द्विः ॥ पाणौहोमोग्नयेकव्यवाहनायस्वाहा सोमायपि तृमतेस्वाहेत्यतोदेवाअवन्तुनोइत्यंगुष्ठग्रहणं ॥ पावमानीःशंवतीरैरप्रतिरथंच

श्रावयेन्मधुवाताऋचःस्थानेउपास्मैगायतेतिपंचमधुमतीःश्रावयेदक्षन्नमीमंदन्तेतिच षष्ठोभुक्तशेषेणैकैकस्यद्वौद्वौपिण्डौदद्यादिति चन्द्रिकायांवृद्धवसिष्ठः पितृपक्षेतु सम्पन्न दैवेरुचितमित्यपि । दधिकर्कंधुमिश्राश्च पिण्डाःकार्यायथाक्रमम् कात्यायनः त्यमूषुवाजिनमितिषिप्रांश्चविसर्जयेत् । नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थानेस्वधांवाचयिष्यइत्यस्यस्थानेनांदीमुखान्पितॄन्वाचयिष्येइति ॥ नस्वधांप्रयुंजीतेति ॥ अत्रसाग्निरनग्निर्वाआदौ वैश्वदेवंकुर्यात् ॥ आदौवृद्धौक्षयेचांतेमध्येश्राद्धेतुपार्वणे ॥ एकोद्दिष्टनिवृत्ते तुवैश्वदेवोविधीयतइत्याशार्केशांखयनपारिशिष्टात् हेमाद्रौतु शेषमन्नमनुज्ञाप्यवैश्वदेवक्रियान्ततः । श्राद्धानिश्राद्धशेषेण वैश्वदेवंसमाचरेदितिचतुर्विंशतिमतान्नान्दीश्राद्धेप्यन्तेवैश्वदेवउक्तः ॥ बह्वृचानामपिवृत्यालोचनात्तथैव ॥ पूर्वोक्तन्तुयेपरिशिष्टंतद्विषयमन्यविषयंवाज्ञेयम् ॥ अत्रश्राद्धांगतर्पणंनेत्युक्तंप्राक् ॥

इति निर्णयसिन्धौ वृद्धिश्राद्धम् ॥

अथजीवत्पितृकश्राद्धम् तत्रानेकपक्षादृश्यंते ॥ जीवंतंपितरंभोजयित्वापरयोःश्राद्धंकुर्यादित्येकः ॥ होमांतमेवकुर्यादित्यन्यः ॥ होमांतःपितृयज्ञःस्याज्जीवेपितरिजानतः । पितरंभोजयित्वावापिंडांनिपृणुयात्परावितियज्ञपार्श्वोक्तेः ॥ यदिजीवत्पितानदद्यादाहोमात्कृत्वाविरमेदित्यापस्तंबोक्तेश्च ॥ जीवतांपिंडानग्नौहुत्वा पश्चाभ्योदेयमित्यपरः ॥ जुहुयाज्जीवेभ्यइत्याश्वलायनोक्तेः जीवतामजीवतांचपिंडदानमितीतरः ॥ जीवतामजीवतांवादेयमेवेतिहिरण्यकेतुरितिनिगमात् ॥ तस्माज्जीवत्पिताकुर्यात्द्वाभ्यामेवनसंशयइतिभविष्योक्तेर्द्वाभ्यामेवेत्यन्यः ॥ एतेपक्षाःकलौनिषिद्धाः ॥ प्रत्यक्षमर्चनंश्राद्धेनिषिद्धं मनुरब्रवीत् । पिंडनिर्वपणंचापिमहापातकसंमितिमितिपृथ्वीचन्द्रोदयेभविष्योक्तेःचंद्रिकाप्येवं तस्मात्पितरिजीवतिश्राद्धानारंभएवेत्येकःपक्षः ॥ सपितुःपितृकृत्येषुअधिकारोनविद्यतइतिकात्यायनोक्तेः ॥ जीवेपितरिवैपुत्रःश्राद्धकालंविवर्जयेदितिहारीतोक्तेश्च ॥ पितुःपित्रादिभ्योदद्यादितिसिद्धांतः

म्रियमाणेतुपितरिपूर्वेषामेवनिर्वपेदितिमनूक्तेः ॥ पितुःपितृभ्योवादद्यात्सपिते त्यपराश्रुतिरितिकात्यायनोक्तेश्च॥अयंबहुसंमतःपक्षःअन्येशाखाभेदेनज्ञेयाः एवंजीवन्माताहनेनाप्यूहेनकार्यम् ॥ मातामहानामप्येवंश्राद्धंकुर्याद्विचक्षणः मंत्रोहेनयथान्यायंशेषाणांमंत्रवर्जितमितिविष्णूक्तेः ॥ एवंमात्रादिकस्यापितथामातामहादिकेइतिपृथ्वीचंद्रोदयेऽग्निपुराणाच्च ॥ पितरिजीवतितुस्वमातरिमृतायामपिपितुरेवमातामहयोःकुर्यात् ॥ येभ्यएवपितादद्यादितिवक्ष्यमाणवचनादितिपितामहचरणाः ॥ मदनरत्नेतुजीवत्पितास्वमातामहयोर्दद्यादित्युक्तं ॥ कालादर्शेप्येवम् ॥ मृतेतुपितरिजिवन्मातृकःपितामह्यादिभ्योवृद्धौदद्यादितिस्मृतितत्त्वादिगौडग्रन्थाः ॥ **दाक्षिणात्यास्तु** पितृवर्गेमातृवर्गे तथामातामहस्यच । जीवेत्तुयदिवर्गाद्यस्तंवर्गंतुपरित्यजेदितिवचनात्तद्वर्ग त्यागएवेत्याहुः । एवंपतितसंन्यस्तापितृकादेरपिज्ञेयं ॥ वृद्धौतीर्थेचसंन्यस्ते तातेचपतितेसति । येभ्यएवपितादद्यात्तेभ्योदद्यात्स्वयंसुतइतिषट्त्रिंशन्मतात् ॥ सन्यस्तेजीवतीत्यर्थःमृतेतुसंन्यस्तेतदाद्येएवदेयम् ॥ मृतेपिपरेभ्यएवेतिगौडाः **कात्यायनोपि** ब्राह्मणादिहतेतातेपतितेसंगवर्जिते । व्युत्क्रमाच्चमतेहेयंयेभ्यएवददात्यसौ ॥ अयंचसन्यस्तापित्रादेरपिशेषात्सर्वश्राद्धेधिकारः ॥ एतत्त्रिदंडिपरम्एकादशाहपार्वणवार्षिकाद्यपितस्यैव ॥ अहन्येकादशेप्राप्तेपार्वणंतुविधीयते । इत्युक्त्वा ॥ त्रिदंडग्रहणादेवप्रेतत्त्वंनैवजायतेइत्युशनसाविशेषोक्तेः ॥ ब्राह्मणादिहतेइत्यादिनिषेधस्त्वेकदंडादिपरः ॥ अतःपरमहंसानां वार्षिकादिकमपिनकार्यमितिशूलपाणिश्राद्धतत्त्वादयोगौडग्रन्थाः इदमेवतुयुक्तं ॥ **यत्तुहेमाद्रौकौंडिन्यः** दर्शश्राद्धंगयाश्राद्धंश्राद्धंचापरपक्षिकम् । नजीवत्पितृकःकुर्यात्तिलैस्तर्पणमेवचेतितत्संन्यस्तपित्राद्यतिरिक्तविषयम् **मैत्रायणीयपरिशिष्टे** उद्वाहेपुत्रजननेपित्र्येष्ट्यांसौमिकेमखे । तीर्थेब्राह्मणआयातेषड्डेतेजीवतःपितुः **तत्रैव** महानदीषुसर्वासुतीर्थेषुचगयामृते । जीवत्पितापिकुर्वीतश्राद्धंपार्वणधर्मवित् ॥ गयामृतेइतिमातृव्यतिरिक्तविषयम् ॥ अन्वष्टक्यंगयाप्राप्तौसत्यांयच्चमृतेहनि । मातुः श्राद्धंसुतःकुर्या

त्पितर्यपिचजीवतीतितत्रैवोक्तेः ॥ गयाप्राप्तौप्रासंगिक्याम् ॥ गयांप्रसंगतोग त्वामातुःश्राद्धंसमाचरेदितिवचनात्तेनमृतमातृकोगयायांतत्पार्वणमात्रंकुर्या त् । तज्जीवनेतुतीर्थश्राद्धमपिनेतिकालादर्शेस्मृतिदर्पणादयःअन्येतुगत्वा श्राद्धंनेतिनिषेधार्थः ॥ सामान्यतःप्राप्तंतीर्थश्राद्धंभवत्येवगयायामित्याहुः ॥ यदातुपितुःप्रतिनिधित्वेनगयांयाति तदायजमानस्यपितृपितामहप्रपितामह इत्येवंश्राद्धम् ॥ तत्रमातुःपितृपत्नीत्वेनैकोद्दिष्टंकृत्वामातृत्वेनपुनःपार्वणं कुर्यादितित्रिस्थलीसेतौ ॥ तच्चफल्गुविष्णुपदाक्षय्यवटेष्वेवेतिकेचित् ॥ आ द्यांतएवेत्यन्ये ॥ मध्यमांतइत्यपरे ॥ संकोचेहेत्वभावात्तत्रत्यसर्वश्राद्धा निमातुःकार्याणीत्युक्तंप्रतिभाति **यत्तुमदनपारिजाते** नजीवत्पितृकःकु र्याच्छ्राद्धमग्निमृतेद्विजः । येभ्यएवपितादद्यात्तेभ्यःकुर्वीतसाग्निकइतिसुमंतू क्तेः॥ साग्नेरेवजीवत्पितृकस्तत्तीर्थादिश्राद्धमुक्तं ॥ साग्नेरपिमैत्रायणीयशा खीयस्यैवनान्येषाम् ॥ षडेतेजीवतःपितुरितितत्परिशिष्टेएवोक्तेरितिरत्नाव लीदिवोदासाद्यास्तदयुक्तम् सौमंतवंपिंडपितृयज्ञविषयं संन्यस्तपित्राद्यति रिक्तविषयंवेतिपृथ्वीचंद्रोदयोक्तेः ॥ वृद्धौतीर्थेचेत्यादेःसाधारण्येनास्या पितथात्वाच्च ॥ तथानिरग्नेरपिनांदीश्राद्धमुक्तंप्राक् ॥ एवंपितामहजीव नेपिज्ञेयम् ॥ विशेषःपितृकृतजीवत्पितृकनिर्णयेज्ञेयः ॥ अथपितामहे जीवतिमृतेचपितरियद्यपिपितामहोवातच्छ्राद्धेभुंजीतेत्यब्रवीन्मनुरिति मनुना जीवतःपितामहस्यभोजनमुक्तम् । तथापिप्रत्यक्षार्चनस्यपूर्वंनिषिद्धत्वात्पि तामहंविहायपितृप्रपितामवृद्धप्रपितामहेभ्योदेयम् । पितायस्यतुवृत्तःस्या ज्जीवेच्चापिपितामहः । पितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहमितिमनूक्तेः॥ अयमेवसर्वसंमतःपक्षः **यत्तुछंदोगपरिशिष्टे** पितामहेम्रियमाणेपितुःप्रेतस्य निर्वपेत् ॥ पितुस्तस्यचवृत्तस्यजीवेच्चेत्प्रपितामहइतिएकपुरुषंद्विपुरुषंवापा र्वणमाहतत्तीर्थपितृयज्ञपरम् ॥ वृद्धौपूर्वोक्तमेव ॥ एवंपूर्वयोर्मृतयोःप्रपिता महेजीवतिपितृमात्रेमृतेपरयोर्जीवतोश्चवृद्धप्रपितामहादिभ्योज्ञेयं ॥ जीवंतम तिद्याद्यापेतायान्नोदकेद्विजइतिकात्यायनोक्तेश्च **एतत्सर्वंमनसिकृत्याऽह**

हेमाद्रौविष्णुः पितरिजीवतियःश्राद्धंकुर्याद्येषांपिताकुर्यात्तेषांपितरिपितामहे चजीवतियेषांपितामहः पितरिपितामहेप्रपितामहेचजीवतिनैवकुर्यात्। यस्य पिताप्रेतः स्यात्सपित्रेपिंडंनिधायपितामहात्पराभ्यांद्वाभ्यांदद्यात्। यस्य पिताप्रपितामहश्च प्रेतौस्यातां सपित्रे पिंडंनिधायपितामहात् पराभ्यांदद्यात् यस्यपितामहःप्रेतःस्यात्सतस्मैपिंडंनिधायप्रपितामहात्पराभ्यांदद्यात्॥यस्य पितापितामहश्चप्रेतौस्यातांसताभ्यां पिण्डौदत्वा पितामहप्रपितामहायदद्या त्॥ मातामहानामप्येवं श्राद्धंकुर्याद्विचक्षणः। मंत्रोहेनयथान्यायं शेषाणां मन्त्रवर्जितमिति॥ अत्रपितृवन्मातामहेजीवति तत्पित्रादिभ्यःयथातत्रत्रिषु जीवत्सुनैवकुर्यात्तथात्रापीत्यादिसर्वमतिदेश्यम्॥ एवंमातृजीवनेपीतिशूलपा णिकालादर्शौ **तन्न** येभ्यएवेत्यादौयच्छब्दादेर्व्यक्तिविशेषवाचित्वेनतदपिप्र संगादितिक्। उत्तरार्धंव्याख्यातंप्राक्॥ यत्वत्रविज्ञानेश्वरेणोक्तम्॥ पित्रे पिंडंनिधायेतिपितुरेकोद्दिष्टविधिनाश्राद्धंकृत्वा प्रपितामहादिभ्यःपार्वणंकुर्या त्॥ तद्व्युत्क्रममृतसपिंडीकरणाभावपक्षेसपिंडीकरणस्थानापन्नंज्ञेयं॥ व्यु त्क्रमात्तुप्रमीतानांनैवकार्यासपिंडतेतिवचनात्॥ दर्शादौतुपितुरेकोद्दिष्टमेव कार्यम्॥ नजीवंतमतिददातीतिश्रुतेः॥जीवेत्पितामहोयस्यपिताचांतरितोभ वेत्॥ पितुरेकस्यदातव्यमेवमाहुर्मनीषिणइतियज्ञपार्श्वोक्तेः॥ पितामहेजी वतिवैपितर्येसमापयेदितिहारीतोक्तेश्च **शिष्टास्तु** व्युत्क्रमात्तुप्रमीतानांनै वकार्यासपिंडता।यदिमातायदिपिताभर्तानैषविधिःस्मृतइति माधवीयेस्कांदो क्तेर्व्युत्क्रममृतसपिंडीकरणाभावःपितृव्यादिविषयइत्याहुः॥ एषविधिर्निषेधे रूपः त्रिषुजीवत्सुविष्णुराह॥ त्रिषुजीवत्सुनैवकुर्यादितितद्दर्शादिविषयं॥ नान्दीश्राद्धंतुपरेभ्यस्त्रिभ्योभवत्येवेतिकल्पतरुः **पृथ्वीचन्द्रोदयस्तु** दद्या त्रिभ्यःपरेभ्यस्तुजीवेच्चेत्त्रितयंयदीतिमनूक्तेः॥ सर्वत्रविकल्पः॥सचदेशा च्चाराद्यवतिष्ठतइत्याहुः॥ सुदर्शनभाष्येतुमासिकश्राद्धंजीवत्पित्रादिनाव्यु त्क्रममृतपित्रादिनाचकार्यमेवेत्युक्तं **मदनरत्नेक्रतुः** अष्टकादिषुसंक्रांतौ मन्वादिषुयुगादिषु। चंद्रसूर्यग्रहेपातेस्वेच्छयापूज्ययोगतः॥ जीवत्पित्रादौ

वकुर्याच्छ्राद्धंकाम्यंतथाखिलम् ॥ अन्येविशेषाःश्रीपितृकृतजीवत्पितृकनिर्णयेभट्टकृतन्त्रिस्थलीसेतौचज्ञेयाः ॥ ७ ७ ७ ७

इति निर्णयसिन्धौ जीवत्पितृकादिश्राद्धम् ॥

अथविभक्ताविभक्तानिर्णयः ॥ पृथ्वीचन्द्रोदयेमरीचिः बहवःस्युर्यदा पुत्राःपितुरेकत्रवासिनः । सर्वेषांतुमतंकृत्वाज्येष्ठेनैवतुयत्कृतं ॥ द्रव्येणचाविभक्तेनसर्वैरेवकृतंभवेत् ॥ ज्येष्ठस्यकर्तृत्वेपिसर्वेफलभागिनइत्यर्थः॥तेनयेब्रह्मचर्यादिनियमास्तेफलितसंस्कारत्वात्सर्वैःकार्याः ॥ एवंसंसृष्टिनामपितुल्यत्वात् **मिताक्षरायांनारदः** भ्रातृणामविभक्तानामेकोधर्मःप्रवर्तते। विभागेसतिधर्मोपिभवेत्तेषांपृथक्पृथक् **बृहस्पतिरपि** एकपाकेनवसतांपितृदेवद्विजार्चनं । एकंभवेद्विभक्तानां तदेवस्याद्गृहेगृहे ॥ अत्रयद्यप्यविशेषश्रवणात्ब्रह्मयज्ञसंध्यादिष्वप्यविभक्तानांपृथङ्निषेधःप्राप्नोति तथापिद्रव्यसाध्यश्राद्धवैश्वदेवादिष्वेवसःद्रव्यस्यानेकस्वामिकत्वेनैकस्यव्ययेनाधिकारात्॥ यानितुद्रव्यासाध्यानिमंत्रजपोपवाससंध्याब्रह्मयज्ञपारायणादीनिनित्यनैमित्तिककाम्यानितेषुपृथगेवाधिकारः द्रव्यव्ययाभावेनुमत्यनपेक्षणात्॥ द्रव्येणवाविभक्तेनेत्यास्याविषयत्वात्॥ पृथगप्येकपाकानांब्रह्मयज्ञोद्विजातिनाम्।अग्निहोत्रंसुरार्चाचसंध्यानित्यंभवेत्तथेतिप्रयोगपारिजातेआश्वलायनस्मृतेश्च ॥ अग्निहोत्रशब्दोग्निसाध्यश्रौतस्मार्तनित्यकर्मपरः तेष्वप्यन्यानुमतेवाधिकारेणन्यायसाम्यात् ॥ पितृश्राद्धादिषुतुल्यफलेषुनित्येष्वनुमतिंविनाप्येकस्याधिकारः ॥ एकोपिस्थावरेकुर्य्याद्दानाध्ययनविक्रयम् ।आपत्कालेकुटुम्बार्थेधर्मार्थेचविशेषतइतिवचनात् ॥ धर्मार्थेऽवश्यकर्तव्ये पितृश्राद्धादावितिविज्ञानेश्वरः॥केचित्त्वविभक्तानामपिपृथक्पाकत्वेदेशांतरेचद्वार्शिकाब्दिकयोःपृथक्त्वमाहुः ॥ भ्रातृणामविभक्तानांपृथक्पाकोभवेद्यदि। वैश्वदेवादिकंश्राद्धंकुर्युस्तेवैपृथक्पृथगिति हारीतोक्तेः ॥ अविभक्तेनपुत्रेण पितृमेधोमृताहनि ॥ देशान्तरेपृथक्कार्योदर्शश्राद्धन्तथैवचेतियमोक्तेश्चेतितत्रमूलंचिंत्यम् ॥ तदयमर्थः ॥ पंचमहायज्ञमध्येदेवभूतापितृमनुष्ययज्ञानन्यानुमत्याज्येष्ठएवकुर्यात् ॥ होमाग्र

दानरहितंनभोक्तव्यंकदाचन ॥ अविभक्तेषुसंस्पृष्टेष्वेकेनापिकृतंकृतमिति व्यासोक्तेश्च ॥ यस्यतुज्येष्ठेनाकृतेवैश्वदेवेऽन्नसिद्ध्येत्तेन तूष्णीमन्नौकिंचि त्क्षिप्त्वाभोक्तव्यम् ॥ यस्यत्वेषामग्रतोन्नंसिद्ध्येत्सनियुक्तमन्नौकृत्वाग्रंब्रा ह्मणायदत्वाभुंजीतेत्यविभक्ताधिकारेपृथ्वीचन्द्रोदयेगोभिलोक्तेः ॥ आश्व लायनस्तुपाकपार्थक्येपृथक्त्वंतदेकत्वेऽपृथक्त्वमाह ॥ वसतामेकपाकेनवि भक्तानामपिप्रभुः । एकस्तुचतुरोयज्ञान्कुर्याद्वाग्यज्ञपूर्वकान् ॥ अविभक्ता विभक्तावापृथक्पाकाद्द्विजातयः ॥ कुर्युःपृथक्पृथग्यज्ञान्भोजनात्प्राग्दिने दिनइति ॥ ब्रह्मयज्ञसंध्यास्नानतर्पणादितूक्तहेतोःपृथगेव ॥ देवपूजातूक्तव चनद्वयादेकत्रपृथग्वा ॥ दर्शग्रहणश्राद्धादित्वेकस्यैव ॥ तीर्थश्राद्धायपियु गपत्सर्वेषामविभक्तानांप्राप्तावेकस्यभेदेनप्राप्तोभिन्नं ॥ गयाश्राद्धेप्येवं ॥ ए ष्टव्याबहवःपुत्राःशीलवन्तोगुणान्विताः । तेषांतुसमवेतानांयद्येकोपिगयांव्र जेत् ॥ तारितास्मोवयंतेनसयातिपरमांगतिमितिहेमाद्रौकौर्मोक्तेः ॥ काम्ये पिदानहोमादावन्यानुमत्यैवाधिकारः ॥ द्रव्यासाध्यजपाद्रौतांविनापि **अप रार्केपैठीनसिः** विभक्तैस्तुपृथक्कार्यंप्रतिसंवत्सरादिकम् । एकेनैवाविभक्तेषु कृतेसर्वैस्तुतत्कृतम् ॥ सावत्सरात्पूर्वाणिमासिकान्येकत्रैव **तदाहलघुहा रीतः** सपिंडीकरणांतानियानिश्राद्धानिषोडश । पृथङ्नैवसुताःकुर्युःपृथक्द्र व्याअपिक्वचित् ॥ सपिंडनंमासिकोपलक्षणम् ॥ अर्वाक्संवत्सराज्ज्येष्ठःश्रा द्धंकुर्यात्समेत्यतु । ऊर्ध्वंसपिंडीकरणात्सर्वेकुर्युःपृथक्पृथगितिव्यासोक्तेः **उशनाः** नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडश । एकेनैवतुकार्याणिसंविभ क्तधनेष्वपि ॥ मघात्रयोदशीश्राद्धंत्वविभक्तानामपिपृथगित्युक्तंप्राक् **यत्तुवृ द्धवसिष्ठः** मासिकंचवृषोत्सर्गंसपिंडीकरणंतथा । ज्येष्ठेनैवप्रकर्तव्यमाब्दि कंप्रथमंतथेतितन्निर्मूलम् ॥ बह्वृचपरिशिष्टेनवश्राद्धं सहदद्युः ॥ **अथती र्थश्राद्धम्** ॥ तत्रयद्यप्यस्मत्पितामहकृतत्रिस्थलीसेतुरेवजागार्तितथापिकिंचि दुच्यते **तत्रयात्रायां** सहाग्निर्वासपत्नीकोगच्छेत्तीर्थानिसंयतः । प्राय श्चित्तीव्रजेत्तीर्थपत्नीविरहितोपिवा ॥ यज्ञेष्वनधिकारीवायश्चवामंत्रसाधकइ

तिकौर्मादिवचनात्साग्नेः सपत्नीकस्यैवाधिकारः **भारते** ब्राह्मणःक्षत्रियो वैश्यःशूद्रोवाराजसत्तम । नवियोनिंव्रजंत्येतेस्नानात्तीर्थेमहात्मनः **स्कांदे** विधवाधर्मेषु स्नानंदानंतीर्थयात्रांविष्णुनामग्रहंमुहुः । एतत्पुत्राद्यनुमत्यै व ॥ सधवायाःपत्यासहैवेतिप्रागुक्तम् **काशीखंडे** मातुःपितुःक्षेसुमनास्त थास्थिसुतस्तुकुर्यात्खलुतीर्थयात्राम् **तद्विधिःस्कांदे** तीर्थयात्रांचिकीर्षुःप्रा ग्विधायोपोषणंगृहे । गणेशंचपितॄन्विप्रान्साधून्शक्त्याप्रपूज्यच ॥ कृतपा रणकोहृष्टोगच्छेन्नियमधृक्पुनः । आगत्याभ्यर्च्यचपितॄन्यथोक्तफलभा ग्भवेत् ॥ उपवासात्प्राङ्मुंडनंचकार्यम् ॥ प्रयागेतीर्थयात्रायांपितृमातृवि योगतः । कचानांवपनंकुर्याद्यथानविकचोभवेदितिविष्णूक्तेः ॥ प्रायश्चित्ता र्थयात्रायांगयायांचेतदित्येके **केचित्तुहेमाद्रौभारते** केशमश्रुनखाशदीनां वपनंनचशस्यते ॥ अतोनकार्यवपनंगयाश्राद्धार्थिनासदा । येभारतेस्मिन् पितृकर्मतत्पराःसंधार्यकेशानतिभक्तिभाविताः ऋणक्षयार्थंपितृतीर्थमागता स्तेषामृणंसंक्षयमेष्यतिध्रुवमितिनिषेधात् ॥ गयायात्रांगंवपनंनकार्यमित्याहुः **वस्तुतस्तु** गयाधिकरणकस्यैवायंनिषेधः ॥ नतुयात्रांगस्यश्राद्धार्थिनेत्यु क्तेः ॥ विशालंविरजंगयामित्यनेनैकवाक्यत्वाच्च ॥ श्राद्धंचषण्णवद्वादश दैवतंवाघृतेनकार्यम् ॥ गच्छेद्देशांतरंयस्तुश्राद्धं कुर्यात्ससर्पिषेतिविष्णुपुरा णात् ॥ यात्रांगवृद्धिश्राद्धोक्तेश्च ॥ श्राद्धञ्चपारणादिनएव ॥ उपोष्यरजनी मेकांप्रातःश्राद्धंविधायच । गणेशंब्राह्मणान्नत्वाभुक्त्वाप्रस्थितवान्सुधीरिति स्कांदलिंगात् **गौडनिबंधेगौतमः** तीर्थयात्रासमारंभेतीर्थात्प्रत्यागमेपि च । वृद्धिश्राद्धंप्रकुर्वीतबहुसर्पिःसमन्वितम् ॥ वृद्धिपदंतद्धर्मार्थंश्राद्धोत्तरंया त्रासंकल्पइतिभट्टाः **वायवीये** उद्यतस्तुगगयांगंतुंश्राद्धंकृत्वाविधानतः । विधायकार्पटीवेषं ग्रामंगत्वाप्रदक्षिणाम् ॥ ततोग्रामांतरंगत्वाश्राद्धशेषस्य भोजनम् ॥ घृतस्यभोजनंतच्चक्रोशमध्येश्राद्धोत्तरंक्रोशगमननिषेधात् ॥ त तःप्रतिदिनंगच्छेत्प्रतिग्रहविवर्जितः । गयायामेवतन्नान्यत्रेतिकेचित् **हेमा द्रिस्तु** गयायांश्राद्धदिनेएवप्रस्थानं ॥ तीर्थांतरेतुश्राद्धोत्तरदिनइत्याहुः **प्रभा**

सखंडे यच्चान्यंकारयेच्छक्त्यातीर्थयात्रांनरेश्वरः । स्वकीयद्रव्ययानाभ्यांत स्यपुण्यंचतुर्गुणम् ॥ यात्रामध्येआशौचेरजसिवाशुद्धिपर्यंतंस्थित्वातदंतेग च्छेत् ॥ मार्गवैषम्येत्वदोषः ॥ यात्रामध्येतीर्थांतरप्राप्तौश्राद्धादिकार्यमेव ॥ वाणिज्याद्यर्थगतेनतु मुंडनोपवासादिनकार्यमितिप्रयागसेतौभट्टाः ॥ वस्तु तस्तुतत्रापिमुंडनोपवासश्राद्धादिकार्यम् ॥ अर्धतीर्थफलंतस्ययःप्रसंगेनग च्छतीतिब्राह्मोक्तेः स्कांदे द्विर्भोजनंतृतीयांशंहरेत्तीर्थफलस्यच । वाणिज्यं त्रींस्तथाभागान्हंतिसर्वप्रतिग्रहः ॥ यानंधर्मचतुर्थांशंछत्रोपानहमेवचेत्युक्त रार्धपाठांतरम् अत्रनदीषुविशेषः मार्गेतरानदीप्राप्तौ स्नानादिपरपारतः । अर्वागेवसरस्वत्या एषमार्गगतोविधिः यत्तु पितॄन्सन्तर्पयित्वातुनदीस्तरति योनरः । तस्यासृक्पानकामस्तेभवंतिभृशदुःखिताइतितत्सरस्वतीपरं शंखः तीर्थप्राप्यानुषंगेणस्नानंतीर्थेसमाचरेत् । स्नानजंफलमाप्नोतितीर्थयात्राकृतं नतु ॥ सएव नस्रवंतीमतिक्रामेत् अनवसिच्यतीर्थप्राप्तौतुप्रभासखंडे यानानितुपरित्यज्यभाव्यंपादचरैर्नरैः । लुठित्वालोठनींतत्रकृत्वाकार्पाटिका कृतिं ॥ कृत्वेतिगृहान्निर्गमसमयेकरणेइदं ॥ प्रथमंचालयेत्तीर्थप्रणवेनजलंशु चि । अवगाह्यततःस्नायाद्यथावन्मंत्रयोगतः मंत्रश्चप्रभासखंडे नमोस्तुदेवदे वायशितिकंठायदंडिने । रुद्रायचापहस्तायचक्रिणेवेधसेनमः ॥ सरस्वती चसावित्रीवेदमातागरीयसी । सन्निधात्रीभवत्वत्रतीर्थेपापप्रणाशिनीतिमंत्रव त्स्नानंचवपनोत्तरंकार्यम् ॥ पूर्वमावाहनंतीर्थेमुंडनंतदनंतरम् ॥ ततःस्नाना दिकंकुर्यात्पश्चाच्छ्राद्धंसमाचरेदित्युक्ते यत्तु गत्वास्नानंप्रकुर्वीतवपनंत दनंतरमितितन्मुशलस्नानपरम् काशीखंडे तीर्थोपवासः कर्तव्यः शि रसोमुंडनंतथा ॥ उपवासेतत्रैवोक्तम् ॥ यदाह्नितीर्थप्राप्तिस्यात्तदह्नःपूर्ववासरे । उपवासःप्रकर्तव्यःप्राप्तेह्निश्राद्धदोभवेत् अत्र उपवासंततःकुर्यात्तस्मिन्नहनि सुव्रतइतिप्राप्तिदिनेषूपवासोक्तेर्विकल्पः ॥ मुंडनेतुस्कांददेवलौ मुंडनंचोप वासश्चसर्वतीर्थेष्वयंविधिः । वर्जयित्वाकुरुक्षेत्रंविशालंविरजंगयां ॥ विरजंलो णारप्रसिद्धमहातीर्थपरःसर्वतीर्थशब्दः ॥ अत्रविशेषःस्मृत्यंतरे ऊर्ध्वमब्दा

द्द्विमासोनात्पुनस्तीर्थंव्रजेद्यदि । मुंडनंचोपवासंचततोयत्नेनकारयेत् ॥ त दातद्वपनंशस्तंप्रायश्चित्तमृतेद्विजेतिपाठः ॥ प्रयागेप्रतियात्रंतुयोजनत्रयइ ष्यते॥क्षौरंकृत्वातुविधिवच्चतःस्नायात्सितासिते **तथाचबृहस्पतिः** क्षौरंनैमि त्तिकंकार्यंनिषेधेसत्यपिध्रुवम्॥पित्रादिमृतिदीक्षासुप्रायश्चित्तेथतीर्थके **अपरा र्के स्कांदे** उदङ्मुखःप्राङ्मुखोवाऽपनंकारयेत्सुधीः । केशश्मश्रुलोमनखान्यु दक्संस्थानिवापयेत् ॥ इदंप्रयागेसधवानामपिसमूलंभवतीतिभट्टाः **युक्तंतु** सर्वान्केशान्समुद्धृत्यछेदयेदंगुलद्वयम् । एवमेवहिनारीणांशस्यतेवपनक्रिये तितच्चाकृतचूडानांनकार्यमितिकेचित् ॥ तत्त्वंतुनैमित्तिकवत्त्वात्पित्रादिमृत वत्कार्यमेवेति तदपिप्रयागेनित्यं ॥ नान्यत्र तच्चयतिभिस्तीर्थेपिक्ष तुसंधिष्वेवकार्यंनान्यदा।कक्षोपस्थशिखावर्जमृतुसंधिषुवाययेदितिस्मृतेः ॥ इ दंजीवत्पितृकेणापितीर्थेकार्यम्॥ नचमुंडनंपिंडदानंचेतिदक्षवचनेननिषेधः विनातीर्थंविनायज्ञंमातापित्रोर्मृतिंविना।योवापयतिलोमानिसपुत्रःपितृघातक इतिस्मृत्यातत्संकोचात् ॥ तदपिप्रयागेप्रतियात्रमन्यतीर्थेआद्ययात्रायामेवे तिशिष्टाः॥ ततःस्नानम् **परार्थेतुमार्कंडेयपुराणे** मातरंपितरंजायांभ्रातरंसुहृदं गुरुंयमुद्दिश्यनिमज्जेतअष्टमांशंलभेतसः **पैठीनसिः** प्रतिकृतिंकुशमयींतीर्थ वारिणिमज्जयेत् ॥ मज्जयेच्चयमुद्दिश्यसोष्टभागफलंलभेत्।ततस्तर्पणश्राद्धेपृ थ्वीचंद्रोदयेब्रह्मदेवीपुराणकाशीखंडादिषु अकालेप्यथवाकालेतीर्थश्राद्धंच तर्पणम् अविलंबेनकर्तव्यंनैवविघ्नंसमाचरेत् **मात्स्ये** पितॄणांचैवतर्पणमितितु र्यपादः॥तत्रदेवतामहालयेप्रागुक्ताः **शंखदेवलौ** तीर्थद्रव्योपपत्तौचनकाल मवधारयेत् । पात्रंचब्राह्मणंप्राप्यसद्यःश्राद्धंसमाचरेत् **हारीतः** दिवावाय दिवारात्रौभुक्तोवोपोषितोपिवा ॥ नकालनियमस्तत्रगंगांप्राप्यसरिद्वराम् **भारते** भुक्तोवाप्यथवाभुक्तोरात्रौवायदिवादिवा । पर्वकालेथवाकालेशुचि र्वाप्यथवाशुचिः ॥ यदैवदृश्यतेतत्रनदीचत्रिपथाप्रिय ॥ प्रमाणदर्शनंतस्मा न्नकालस्तत्रकारणं॥आशौचेपिकार्यम् ॥ विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदितिपैठीनसिस्मृतेः ॥ तदानीमकरणेत्वा

शौचांतेएवकुर्यात् **प्रभासखंडे** नवारंनचनक्षत्रंनकालस्तत्रकारणम्। यदैवदृश्यतेतीर्थतदापर्वसहस्रकम्॥ मलमासेपिकार्यं॥ नित्यनैमित्तिकेकुर्यात्प्रयतःसन्मलिम्लुचे। तीर्थश्राद्धंगजच्छायांप्रेतश्राद्धंतथैवचेतिबृहस्पतिस्मृतेः॥ एतच्चाशौचेप्रकृतभोजनस्यरात्रौवास्नानश्राद्धादिकमाकस्मिकतीर्थप्राप्तावामहेमश्राद्धविषयंग्रहणादिवत् नतुबुद्धिपूर्वमाशौचादौतीर्थप्राप्तिःकर्या॥ मलमासेतुमासद्वयेतीर्थश्राद्धंकार्यमितिचंद्रिकायांदेवीपुराणे॥ श्राद्धंचतत्रकर्तव्यमर्घ्यावाहनवर्जितम् **हेमाद्रौ** अर्घ्यमावाहनंचैवद्विजांगुष्ठनिवेशनम्। तृप्तिप्रश्नंचविकिरंतीर्थश्राद्धेविवर्जयेत् **भविष्ये** आवाहनंविसृष्टिश्चतत्रतेषांनविद्यते। आवाहनंनतीर्थेस्यान्नार्घ्यदानंतथाभवेत्॥ आहूताःपितरस्तीर्थेकृतार्घ्याःसंतिवैयतः॥ अग्नौकरणंचनेतिरत्नावल्यां॥ अत्रषट्दैवतेश्राद्धेपिमात्रादीनांपिंडमात्रंदेयम्। हविःशेषंततोमुष्टिमादायैकैकमाहृतः। क्रमशःपितृपत्नीनांपिंडनिर्वपणंचरेदितितीर्थोपक्रमदेवलोक्तेरिति पृथ्वीचंद्रः॥ ततःसामान्यपिंडंदद्यात्॥ ततःपिंडमुपादायहविषःसंस्कृतस्यच। ज्ञातिवर्गस्यसर्वस्यसामान्यंपिंडमुत्सृजेदितितेनैवोक्तेःपाद्मे तीर्थश्राद्धंप्रकुर्वीतपक्वान्नेनविशेषतः। आमान्नेनहिरण्येनकंदमूलफलैरपि **पिंडद्रव्याणिदेवीपुराणेहेमाद्रौब्राह्मेच** सक्तुभिः पिंडदानंच संयावैःपायसेनवा। कर्तव्यमृषिभिःप्रोक्तंपिण्याकेनगुडेनवा। पिण्डानांतीर्थप्रक्षेपएवनान्याप्रतिपत्तिरित्युक्तंप्राक्॥ एतच्चविधवयाऽपुत्रयाकार्यम् नसपुत्रयेत्युक्तंप्राक्॥ सपुत्रयानकर्तव्यंभर्तुःश्राद्धंकदाचनेतिस्मृतेश्च॥ अनुपनीतेनापिकार्यम्॥ एतच्चानुपनीतोपि कुर्यात्सर्वेषुपर्वस्वितिपाद्मेतीर्थश्राद्धमुपक्रम्योक्तेः॥ एतच्चजीवत्पितृकेणापिकार्यमित्युक्तंप्राक्॥ नकुर्यात्सूतकंभिक्षुःश्राद्धपिण्डोदककक्रियां। त्यक्तंसंन्यासयोगेनग्रहधर्मादिकंव्रतम्॥ गोत्रादिचरणंसर्वंपितृमातृकुलंधनमितिस्मृतेः **गयायांतूक्तंवायवीये** दण्डंप्रदर्शयेद्भिक्षुर्गयांगत्वानपिण्डदः। दण्डंप्रदर्शयन्भिक्षुःपितृभिःसहमुच्यते **कृत्यरत्नेप्रभासखण्डे** तीर्थेचेत्प्रति

गृह्णातिब्राह्मणोवृत्तिदुर्लभः ॥ दशांशमर्जितंदद्यादेवंकुर्वन्नहीयतेइति ॥ वि शेषांतराणिभट्टकृतत्रिस्थलीसेतौज्ञेयानीतिदिक् ॥

इति कमलाकर भट्टकृते निर्णयसिन्धौ तीर्थश्राद्धविधिःसमाप्तः ॥

अथ आशौचप्रकरणम्

श्री ॥ नारायणात्मजःश्रीमद्रामकृष्णस्यसूनुना । कमलाकरसंज्ञेनाशौचंनि र्णीयतेधुना १ **मरीचिः** आचतुर्थाद्भवेत्स्रावःपातःपंचमषष्ठयोः॥ अतऊर्ध्वंप्र सूतिःस्याद्दशाहंसूतकंभवेत् ॥ **बृहत्पराशरः** गर्भस्रावेतुनैरुक्तारात्रयोमास संमिताःस्रावंगर्भस्यविद्वांसोमासादर्वाक्चतुर्थका ॥ पातमूर्ध्ववदंत्येकेतत्रा धिकंतुसूतकम् । स्रावेमातुस्त्रिरात्रंस्यात्सपिण्डाशौचवर्जनम् । पातेमातुर्य थामासं सपिण्डानांदिनत्रयत् ॥ अत्रसर्वत्रमूलंमिताक्षरायांज्ञेयम् ॥ अत्रमा सत्रयेत्रिरात्रंस्यादित्यनुवादः ॥ रजस्वलात्वेनैवतत्सिद्धेः यद्यप्यनेनचतुर्थ मासेपित्रिरात्रप्राप्नोतितथापिषण्मासाभ्यन्तरंयावत् गर्भश्रावोभवेद्यदि । त दामाससमैस्तासां दिवसैःशुद्धिरिष्यते ॥ इत्यादिपुराणात् । रात्रिभिर्मास तुल्याभिर्गर्भस्रावेविशुद्ध्यतीतिमनूक्तेः॥गर्भस्रावेयथामासमचिरेतूत्तमेत्रयइ तिमरीच्युक्तेश्चतूरात्रंज्ञेयम् ॥ अचिरेत्रिमासमध्ये ॥ उत्तमेब्राह्मणे ॥ अत्रस पिण्डानांस्नानम् ॥ सद्यःशौचंसपिण्डानां गर्भस्यपतनेसतीतितत्रैवोक्तेः ॥ एतदाचतुर्थमासात्पातेत्रिदिनस्योक्तेः ॥ अकारणायाःशुद्धेरसम्भवात्सद्यःप दंस्नानपरम् एवमग्रेपि ॥ गर्भस्रावेस्नानमात्रंपुरुषस्येतिवृद्धवसिष्ठोक्तेः ॥ पु रुषस्येतिसापिण्डोपलक्षणम् पूर्वोक्तवचनात् ॥ आचतुर्थमासंसपिण्डानांन स्नानंकिन्तुपुंसएव॥पातेत्रिदिनंनिर्गुणपरम् **गुणवतस्तु** अजातदन्तेतनयेशि शौगर्भच्युतेतथा । सपिण्डानान्तुसर्व्वेषामेकरात्रमशौचकमितियमोक्तेरेकाह इतिमदनपारिजातः ॥ सप्तममासादिदशाहम् ॥ एतत्सर्व्ववर्णविषयम् तुल्यं वयसिसर्वेषामतिक्रान्तेतथैवचेतिव्याघ्रोक्तेः **पराशरः** जातेविप्रोदशाहेन द्वा

दशाहेनभूमिपः । वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यति **संवर्तः** जातेपुत्रे पितुःस्नानं सचैलन्तुविधीयते।माताशुद्ध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुः॥पुत्र पदात्कन्योत्पत्तौनपितुःस्नानमितिहारलतायाम् तन्न पुत्रपदस्यपौत्रीमातामहरतेनेतिकन्यायामपिप्रयोगात् **यच्चतत्रैवोक्तम्** सूतकेतुमुखंदृष्ट्वाजातस्यजनकस्ततः । कृत्वासचैलंस्नानन्तु शुद्धोभवतितत्क्षणादित्यादित्यपुराणान्मुखदर्शनोत्तरमेवपितुःस्नानमिति तन्न ॥ विदेशेमुखदर्शनावध्यस्पृश्यतापत्तेः मुखदर्शनोत्तरंपुनः स्नानार्थमिदमितिस्मार्तगौडाः तन्न ॥ मूलैक्येनज्ञानमात्रपरत्वात् ॥ इदंसर्ववर्णसमम् ॥ सूतिकासर्ववर्णेषु दशरात्रेणशुद्ध्यति ऋतौचनपृथक्शौचं सर्व्ववर्णेष्वयंविधिरितिहारलतायांप्रचेतसोक्तेः **यत्तुब्राह्मे** ब्राह्मणीक्षत्रियावैश्या प्रसूतादशभिर्दिनैः । गतैःशूद्राचसंस्पृश्या त्रयोदशभिरेवचेति **प्रयोगपारिजातेपारस्करः** द्विजातेसूतिकायास्यात्सादशाहेनशुद्ध्यति । त्रयोदशेह्निसंप्राप्ते शूद्राशुद्ध्यत्यसंशयइति तदस्पृश्यत्वपरम् **अंगिराः** सूतकेसूतिकावर्ज्यं संस्पर्शेननिषिद्ध्यते । संस्पर्शेसूतिकायास्तुस्नानमेवविधीयते ॥ नाशौचंसूतकेपुंसः संसर्गेचेन्नगच्छति रजस्तत्राशुचिज्ञेयं तच्चपुंसिनविद्यते॥संसर्गोमैथुनम् ॥ स्पर्शइत्यन्ये ॥ मातुरेवसूतकम् ॥ तांस्पृशतश्चेतिहारलतायांसुमन्तूक्तेरिति तन्न ॥ संस्पर्शेसूतिकायास्तु स्नानमेवविधीयत इति स्नानमात्रोक्तेः ॥ सौमन्तवचनस्यस्नानपर्यंतमस्पृश्यत्वमात्रबोधकत्वात् ॥ एवकारोबालस्पृश्यत्वार्थः **माधवस्तु** यस्तैःसहसपिण्डोपि प्रकुर्याच्छयनाशनम् । बान्धवोवापरोवापिसदशाहेनशुद्ध्यतीति बृहस्पतिस्मृतेः **शयनासनादिरूपसंसर्गमाहपराशरः** यदिपत्न्यांप्रसूतायांद्विजःसंपर्कमृच्छति । सूतकन्तुभवेत्तस्ययदिविप्रःषडंगवित्पितृवत्सापत्नमातुःप्राक्स्नानादस्पृश्यत्वम् ॥ सूतिकास्पर्शेतुयावदाशौचम् ॥ अन्याश्चमातरस्तद्वत्तद्गृहंन व्रजन्तिचेदितिब्राह्मोक्तेरिति शुद्धितत्त्वादयः तन्न ॥ तद्गेहंगत्वासूतिकांयदिनस्पृशन्तितदास्पृश्याः ॥ अन्यथानेतितस्यार्थः **कर्मानधिकारमाहपैठीनसिः** सूतिकांपुत्रवतींविंशतिरात्रेणकर्माणिकारयेन्मासेनस्त्रीजननीम्॥ इद

माशौचोत्तरं ॥ अन्यथाशूद्रस्याःसपिंडानामाशौचेतदभावः स्याद्विध्यनुवादविरोधश्च॥एतच्चसोमयागादिश्रौतभिन्नपरम् ॥ प्रजातायाश्चदशरात्रादूर्ध्वंस्नानादितिकात्यायनोक्तेः व्याप्तःप्रथमेदिवसेषष्ठेदशमेचैवसर्वदा। त्रिष्वेतेषुनकुर्वीतसूतकंपुत्रजन्मनि॥ पुत्रशब्दोपत्यमात्रपरः ब्राह्मे देवाश्चपितरश्चैवपुत्रेजातेद्विजन्मनाम्।आयांतितस्मात्तदहःपुण्यंषष्ठंचसर्वदा। जननेविशेषःप्रागुक्तः॥ अत्रप्रयोगपारिजातःपुंप्रसवेदशाहःस्त्र्यपत्येतुत्र्यहः ॥ पुंजन्मनिसपिंडानांदशाहाच्छुद्धिरिष्यते।त्र्यहादेकोदकानांचएकाहंसूतकंक्वचित्।स्त्रीजन्मनिसपिंडानांसोदकानांत्र्यहाच्छुचिः। स्त्रीषुत्रिपुरुषंज्ञेयंसपिंडत्वंद्विजोत्तमाइत्यग्निस्मृतेरित्याह मेधातिथिरपि अप्रत्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायते॥ इतिवासिष्ठमुक्त्वाशौचेएवैतद्विवाहेतुअवधिर्दर्शितएवेत्याह ॥ अन्येतुत्रिपुरुषसापिंड्यस्यकानीनकन्यापरत्वमाहुः॥अप्रत्तानांतथास्त्रीणांसापिंड्यंसप्तपौरुषम्। प्रत्तानांभर्तृसापिंड्यंप्राहदेवःप्रजापतिरितिकौर्मविरोधाच्च॥अत्रेदंतत्त्वम् ॥पंचमात्सप्तमाद्धीमान्यःकन्यामुद्वहेत्द्विजः॥गुरुतल्पीसविज्ञेयइत्यादिविरोधात्त्रिपुरुषंप्रकरणान्मरणाशौचपरम्॥वासिष्ठेतदग्रेउदकदानोक्तेः॥ तेनकन्याप्रसवेपिसप्तपौरुषंदशरात्रमेव ॥नचकन्यापुत्रकृतंप्रसवेबलाबलंक्वाप्युक्तं ॥ अनिस्मृतिस्त्वनुकल्पोत्रिगीतावितिसर्वसिद्धांतः॥ अन्यथात्रिपुरुषंसपिंडानामष्टमादिसोदकानांचत्र्यहंसाम्यायोगात ॥ चतुर्थादिसप्तमांतानांचकिमपिनस्यात् ॥ तेनकन्याप्रसवेदशाहएव किंच स्त्रीजन्मोद्देशेन त्रिपुरुषंसापिंड्यतेषांचत्रिरात्रिमित्यनेकार्थविधिःकथंस्यात् वाक्यभेदापत्तेः ॥ नचतुर्थादीनांसोदकत्वंक्वापिसिद्धम् ॥ तेनत्रिपुरुषंचतुर्थादीनांस्त्रीजन्मनिसोदकत्वंविधायपुनस्तेषांत्रिरात्राशौचविधौच विध्यनुवादविरोधोवाक्यभेदद्वयंचेत्यसंवादार्थाग्निस्मृतिर्हेया ॥ अथमृताशौचम् हारीतः जातमृतेमृतजातेवासपिंडानांदशाहमितिस्वाशौचपरम् ॥ जातमृतेनालच्छेदोर्ध्वम् यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकम्। छिन्नेनालेततःपश्चात्सूतकंतुविधीयतइतिजैमिन्युक्तेः ॥ नाड्यांछिन्नायामाशौचमितिहारीतोक्तेश्च ॥ नाडीछेदात्प्राक्मातुःस्पर्शेपिन

दोषइतिशुद्धितत्त्वोक्तिःपरास्ता **नाभिच्छेदात्प्राक्मृतौतुबृहन्मनुः** जीवन् जातोर्यदिततोमृतःसूतकएवतु । सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकम् ॥ इदंचप्रसवाशौचमेव ॥ शावनिमित्तंस्नानमात्रम् ॥ प्राक्नामकरणात्सद्यः शौचमितिशंखोक्तेः **अत्रकश्चिदाह** नामकरणमाशौचांतकालोपलक्षणम् । आशौचव्यपगमेनामधेयमितिविष्णूक्तेः ॥ आशौचेचव्यतिक्रांतेनामकर्मवि धीयतेइतिमनूक्तेश्चनाम्नोनियतकालत्वात् नच नामधेयंदशम्यांतुद्वादश्यां वापिकारयेत् । पुण्येतिथौमुहूर्तेवानक्षत्रेवागुणान्वितइतिमनूक्तेरनियतकाल त्वम् ॥ दशम्यामतीतायांविप्रः । द्वादश्यामतीतायांक्षत्रियः । वैश्यःषोडशे। शूद्रएकत्रिंशेइत्यपिज्ञेयम् ॥ पुण्यइत्याद्यनुकल्पः ॥ तेननाम्नःकालोपलक्ष णम् ॥ एवंदंतजनेपि ॥ दंतजन्मसप्तमेमासीत्युपनिषदिनियतकालत्वात् ॥ चौलेतुनकालोपलक्षणम् ॥ प्रथमेब्देतृतीयेवाकर्तव्यंश्रुतिचोदनादितिम नूक्तेः ॥ ततःसंवत्सरेपूर्णेचूडाकर्मविधीयते । द्वितीयेवातृतीयेवाकर्तव्यंस्मृ तिदर्शनादितियमोक्तेश्च ॥ तस्यानियतकालत्वादितितन्मंदम् ॥ चौलवन्ना मदंतजननयोरपिस्वरूपेण निमित्तत्वोपपत्तेस्तद्विशिष्टकालानुवादेवाक्यभे दात्तूसप्तममासादर्वाक्दंतजननेतदभावप्रसंगाच्च ॥ यस्तूपनिषद्दर्शनेननि र्णयंकुर्य्यात्सनूनंशतायुःपुरुषइतिश्रुतेरर्वाक्पितृमरणेतदंत्यकर्मापित्यजेत् ॥ ननुकालानुपलक्षणेनामोत्कर्षेतदभावेवास्नानमात्राच्छुद्धिस्यात् ततःकिम् अस्तु ॥ अतएवोक्तंआदंतजन्मनःसद्यइति ॥ साचविष्णुवचनाद्दाहाभाव विषयेतिवक्ष्यामः ॥ त्रिवर्षादावपिस्यादितिचेत्तदाहदंतादिनिमित्तैर्विशेषाशौ चेपूर्वस्यबाधात् **तदुक्तम्** पूर्वाबाधेननोत्पत्तिरुत्तरस्यहिसिद्ध्यतीति ॥ जन नादशरात्रेव्युष्टेशतरात्रेसंवत्सरेचेतिपरिशिष्टे ॥ द्वादश्यामपरेरात्र्यांमासेपू र्णेतथापरे । अष्टादशेहनितथावदंत्यन्येमनीषिणइति **भविष्येच** नाम्नः का लानियमाच्च ॥ नचप्राथम्याद्दशरात्रेतीतेइतिमुख्यःकालःअन्यस्त्वनुकल्पइ तिवाच्यम् ॥ चौलेपितथापत्तेः ॥ नचदंतजननकालानुपलक्षणेसदन्त जातमृतस्यदाहैकाहप्रसंगः दशाहेनबाधात् नामकरणोत्तरमेवदाहप्र

वृत्तेः दशाहाभ्यंतरेबालेप्रमीतेतस्यबांधवैः । शावाशौचंनकर्तव्यंसूत्या शौचंविधीयतेइतिबृहन्मनूक्तेश्च ॥ आशौचंदाहोपलक्षणम् ॥ सूतकवदिति पारस्करोक्तेः यत्तुविष्णुः अनिवृत्तेदशाहेतुपंचत्वंयदिगच्छति । सद्यएव विशुद्धिःस्यान्नप्रेतंनोदकक्रियेति तदपिप्रेताशौचनिषेधार्थंनतुसद्यस्त्वप रम् ॥ वाक्यभेदात किंच नामकालात्प्राक्मृतस्यस्नानम्॥ तदुत्तरंत्वेकाहा दिनामकालेत्वेकादशाहेमृतस्यनकिमपिस्यात् ॥ अथशंखवचनेल्यब्लोपे पंचमीतदाप्रागितिनोपपद्येत ॥ नाम्निवापिकृतेसतीतिमन्वादिविरोधात् ॥ कृतनाम्नइतिमाधवमिताक्षरादिविरोधाच्चनकालोपलक्षणंकापीतिदिक् ॥ ना मोत्तरंदंतोत्पत्तेःप्राग्दाहेसत्यहः अदंतजातेतनयेशिशोर्गर्भच्युतेतथा । स पिंडानांतुसर्वेषामहोरात्रमशौचकमितियमोक्तेः ॥ दाहाभावेतुस्नानमात्रम् ॥ अदंतजातेप्रेतेसद्यएवनारयाग्निसंस्कारइतिविष्णुनादाहाभावेतदुक्तेः ॥ आदं तजन्मनःसद्यइतियाज्ञवल्कीयाच्च दाहविकल्पंचाहलौगाक्षिः तूष्णीमेवोद कंकुर्यात्तूष्णींसंस्कारमेवच । सर्वेषांकृतचूडानामन्यत्रापीच्छयाद्वयम् ॥ अ न्यत्राकृतचूडे ॥ अत्रचूडाकरणंतृतीयवर्षरूपकालोपलक्षणार्थमितिमेधातिथि हरदत्तौ मनुरपि नत्रिवर्षस्यकर्तव्या बांधवैरुदकक्रिया ॥ जातदंतस्यवाकु र्युर्नाग्निवापिकृतेसतीति उदकंदाहोपलक्षणम् ॥ दंतोत्पत्त्यनंतरंप्राक्त्रिव र्षीतान्मृतेहः दंतजातेप्यकृतचूडेत्वहोरात्रेणशुद्धिरितिविष्णूक्तेः ॥त्रिवर्षोर्ध्व कृतचूडेऽकृतचूडेवाप्रागुपनयनात्त्र्यहः ॥ यद्यप्यकृतचूडोवैजातदंतस्तुसं स्थितः । तथापिदाहयित्वैनमाशौचंत्र्यहमाचरेदित्यंगिरसोक्तेः॥अकृतायाम पिचूडायांत्रिवर्षोर्ध्वदाहादिनियतम् ॥ नात्रिवर्षस्येतिवचनात् ॥ कृतायांवर्ष त्रयात्प्रागपितन्नियतंतूष्णीमेव ॥ अत्रजातदंतत्वमुद्देश्यविशेषणत्वादविवक्षि तंदाहयित्वेत्यप्पनुवादः ॥ उभयविधौवाक्यभेदात् ॥ त्रिवर्षात्प्राक्चूडाभा वेग्निदानेत्र्यहस्तदभावेविष्णूक्तेरेकाहइतिमाधवः यत्तुकश्चिदाह अत्रत्रिवर्ष विषयादस्मादेवार्थात् त्रिवर्षोर्ध्वमपितात्सिद्धिः ॥ विज्ञानेश्वरोक्तंचत्रिवर्षोर्ध्व मकृतचूडाविषयत्वंचिंत्यम् ॥ जातदंतपदवैयर्थ्यादितित्तुच्छम् ॥ दाहस्या

विधेयत्वात् ॥ नृणामकृतचूडानामशुद्धिर्नैशिकीस्मृतेतिमनूक्तेः ॥ स्त्रिवर्षोर्ध्व मेकाहापत्तेरर्थाच्यहासिद्धेः ॥ त्वयाप्यग्रेतथांगीकारात्पदवैयर्थ्यस्यसाम्या द्वाक्यार्थाज्ञानाच्चेत्यलंमिताक्षरार्थानभिज्ञदूषणेन ॥ प्रथमवर्षादौकृतचूडस्य सदाऽत्यहः ॥ निवृत्तचूडकानांतुत्रिरात्राच्छुद्धिरिष्यतइतिमनूक्तेः ॥ एतत्स र्वंप्रागुक्तंसपिंडानाम् ॥ मातापित्रोस्तुदशाहोर्ध्वंमृतेसर्वत्रत्रिरात्रम् ॥ बालना मजातदंतानांत्रिरात्रेणशुद्धिरितिकश्यपोक्तेः ॥ बैजिकादभिसंबंधादनुरुत्ध्या दाद्यंत्यहमितिमनूक्तेश्च **शुद्धितत्त्वादयोगौडास्तु** अजातदंतमरणेपित्रोरे काहमिष्यतेदंतजातेत्रिरात्रंस्याद्यदिस्यातांतुनिर्गुणाविति कौर्मात्काश्यपंशूद्र परम् ॥ अनूढानांतुकन्यानांतथावैशूद्रजन्मनामितिऽयहानुवृत्तौशंखोक्तेः ॥ त्रिरात्रंतुभवेच्छूद्रेषण्मासेपिशिशौमृतइतिमात्स्यसूक्ताच्च ॥ दंतजातेशूद्रेतु पंचाहः **यथाहांगिराः** शूद्रेत्रिवर्षान्यूनेतुमृतेशुद्धिस्तुपंचभिः । अतऊर्ध्वंमृ तेशूद्रेद्वादशाहोविधीयते ॥ षड्वर्षान्तमतीतोयःशूद्रःसंम्रियतेयदि । मासि कंतुभवेच्छौचमित्यांगिरसभाषितमिति ॥ यत्तुअनूढभार्यःशूद्रस्त्रितिशंखो क्तंमासाशौचंतत्सगुणशूद्रपरम् ॥ निर्गुणेत्वनूढभार्येशूद्रेत्रिवर्षोर्ध्वंद्वादशा हः ॥ षडब्दोर्ध्वंमासः ॥ षडब्दात्प्रागपिकृतोद्वाहेमासइत्याहुः ॥ एतत्तुल्ये वयसिसर्वेषामितिविरोधाच्छिष्टविगानान्नादर्तव्यमितिविज्ञानेश्वरादयः ॥ दा क्षिणात्यानांतथैव ॥ अन्यदेशेप्रागुक्तमितिगौडाः ॥ एवंकन्यास्वपि ॥ ता स्वप्यजातदंतासुमृतासुपित्रोरेकरात्रमितिमाधवः **यत्तुविज्ञानेश्वरेणोक्तं** ऊ नद्विवर्षउभयोःसूतकंमातुरेवहीति याज्ञवल्क्योक्तेः ॥ गर्भस्थेप्रेतेमातुर्दशा हंजातेउभयोः कृतनाम्निसोदराणां चेतिपैंग्योक्तेश्च पित्रोःसोदराणांचदशा हमस्पृश्यत्वमितितन्नेदानींप्रचरति ॥ अतएवस्मृत्यर्थसारेतन्नादृतम् ॥ क न्यासुचौलात्प्राङ्मृतौस्नानम् ॥ अचूडायांतुकन्यायां सद्यःशौचंविधीयतइ त्यापस्तम्बोक्तेः ॥ इदंत्रिपुरुषमध्ये ॥ अप्रत्तानांतुस्त्रीणांत्रिपुरुषोविज्ञायत इतिवसिष्ठोक्तेः ॥ इदंवाग्दानोत्तरमितिगौडाः ॥ तन्न ॥ अप्रत्तानांतथास्त्री णां सापिण्ड्यंसप्तपौरुषमितिवचनात् ॥ चौलोत्तरंवाग्दानात्पूर्वतास्वेका

हः ॥ अविशेषेणवर्णानामर्वाक्संस्कारकर्मणः । त्रिरात्रात्तुभवेच्छुद्धिः क न्यास्वह्नाविधीयतइत्यंगिरसात्त्रिरात्रविधानात् ॥ अतःशूद्रस्योपनयनस्थानी यविवाहात्पूर्व्वंत्रिरात्रम् ॥ विवाहोत्कर्षेतुषोडशाब्दमध्येत्रिरात्रमेवेत्यपरार्का द्याः ॥ शूद्रेनिर्गुणेतुत्र्यब्दोर्ध्वंपंचाहःषडब्दोर्ध्वंविवाहाभावेद्वादशाहमिति गौडाः ॥ सगुणानांषोडशाब्दोर्ध्वंतुविवाहाभावेपिपूर्णाशौचंवक्ष्यते तदुत्तरंप्रा ग्विवाहाद्ऋतूकुलेचसप्तपुरुषावधित्रिरात्रम् ॥ अवारिपूर्वप्रत्तातुयानैवप्रतिपा दिता । असंस्कृतातुसाज्ञेयात्रिरात्रमुभयोःस्मृतामितिमरीच्युक्ते **रत्नाकरेशु द्धितत्त्वेचशंखः** पितृवेश्मनियानारीरजःपश्यत्यसंस्कृता । तस्यांमृतायांना शौचं कदाचिदपिशाम्यति ॥ यावज्जीवमाशौचमितिवाचस्पतिमिश्राः ॥ अ थानुपनीतेकिंचिदुच्यते ॥ **नाम्नः**पूर्वंखननमेव ॥ तदूर्ध्ववर्षत्रयात्पूर्वंचौला भावेऽग्न्युदकदानविकल्पः ॥ नात्रिवर्षस्यकर्तव्याबांधवैरुदकक्रिया । जातदन्तस्यवाकुर्युर्नाग्निवापिकृतेसतीतिमनूक्तेः ॥ उदकक्रियासाहचर्याद्वा होपलक्षणम् ॥ खननेतुनान्यदौर्ध्वदेहिकम् ॥ ऊनद्विवर्षेनिखनेन्नकुर्यादु दकंततइतियाज्ञवल्क्योक्तेः ॥ उदकमंत्यकर्म्मपरमित्यपरार्कः **यमः** ऊन द्विवार्षिकंप्रेतंघृतात्कृंनिखनेद्भुवि । यमगाथांगायमानोयमसूक्तमनुस्मरन् **माधवीयेब्राह्मेपि** स्त्रीणांतुपतितोगर्भः सद्योजातोमृतोथवा । अजातद न्तोमासैर्वा मृतः षड्भिर्गतैर्बहिः ॥ वस्त्राद्यैर्भूषितंकृत्वा निक्षिपेत्तन्तुकाष्ठ वत् ॥ खनित्वाशनकैर्भूमौसद्यःशौचंविधीयते ॥ अलंकरणमपिवक्ष्यते ॥ कृत चूडस्यतुत्रिवर्षात्प्रागूर्ध्ववाग्न्युदकदानंनियतम् **यत्तुवसिष्ठः** ऊनद्विवर्षेप्रेते गर्भपतनेवासपिण्डानांत्रिरात्रमितितत्प्रथमाब्दचूडापरम् ॥ वर्षत्रयादूर्ध्वमकृ तचूडस्यापिनियतम् ॥ वर्षत्रयोर्ध्वंउपनयनात्पूर्व्वंचतूष्णीमग्न्युदकदानम् ॥ तूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमेवचेति पूर्वोक्तलौगाक्षिस्मृतेः पिण्डदा नमपिकार्यम् ॥ असंस्कृतानांभूमौपिण्डंदद्यात्संस्कृतानांकुशेष्वितिप्रचेत सोक्तेः ॥ उदकदानंसपिण्डैःकृतचूडस्येतिगौतमोक्तेः ॥ उदकग्रहणमौर्ध्व देहिकपरमितिहरदत्तः ॥ द्वादशाद्वत्सरादर्वाक् पौगण्डंमरणेसति ॥ सपि

ण्डीकरणंनस्यादेकोद्दिष्टानिकारयेदिति हरदत्तधृतदेवलोक्तेश्च **मरीचिरपि** प्रेतपिण्डंबहिर्दद्याद्दर्भमंत्रविवर्जितमित्येतदनुपनीतपरमितिविज्ञानेश्वरः॥ अ त्रचूडैवपूर्वावधिः॥ पूर्वबाक्येतुतद्ग्रहणात्॥ उदकग्रहणस्योपलक्षणत्वा द्दाहःपूर्वावधिरितिकेचित्॥ द्वादशाद्वत्सरादित्यनुपनीतद्विजानूढशूद्रविष यम् **त्र्यहाशौचेपिण्डदानविधिमाहपारस्करः** प्रथमेदिवसेदेयास्त्रयःपि ण्डाःसमाहितैः। द्वितीयेचतुरोदद्यादस्थिसंचयनंतथा॥ त्रींस्तुदद्यात्तृतीयेह्नि वस्त्रादिक्षालयेत्ततइति **अत्रदेवयाज्ञिकनिबन्धेविशेषः** शिशुरादन्तजन नाद्बालःस्याद्यावदाशिखः। कथ्यतेसर्वशास्त्रेषुकुमारोमौंजिबन्धनात्॥ आपंचवर्षात्कौमारंपौगण्डोनवहायनः **तथा** गर्भेनष्टेक्रियानास्तिदुग्धंदेयं शिशौमृते। परंचपायसंक्षीरंदद्याद्बालविपत्तितः॥ एकादशंद्वादशाहंवृषो त्सर्गविधिंविना **तथा** यत्रप्रमीयतेबालस्तत्रप्रायःप्रदीयते। किंचित्समान वयसांसंस्कृत्यान्नंयथाविधि॥ भक्ष्यंभोज्यंचदातव्यंतथाचसुखभक्षिका। त द्वस्त्राणिप्रदेयानिसोपानत्कानितत्समे॥ कुमाराणांचबालानांभोजनंवस्त्रवे ष्टनम्। यच्चोपजीवतेबालस्तद्विप्रायप्रदीयते **तथा** भूमिनिक्षेपणंबालेआव र्षद्वयमाशिखम्। ततःपरंखगश्रेष्ठदेहदाहोयथाविधि॥ आचूडेप्यूर्ध्वंखनन निवृत्त्यर्थमावर्षद्वयमिति॥ प्रागपिकृतचूडस्यतन्निवृत्त्यर्थमाशिखमिति **तथा** चूडाकर्मणिसंजातेविपत्तिस्तुयदाभवेत्। सूतकांतेप्रकर्तव्यंवृषस्योत्सर्जनंत था॥ तत्रदाहःप्रकर्तव्यउदकंतत्रनिश्चितम्॥ श्राद्धानिषोडशापिस्युःसपिं डीकरणंविना॥ इदंपंचवर्षोत्तरम्॥ जन्मतःपंचवर्षाणिभुंक्तेदत्तमसंस्कृत म्। पंचवर्षाधिकेबालेविपत्तिर्यदिजायते॥ वृषोत्सर्गादिकंकर्मकर्तव्यमुदकं ततः। अहन्यहनिसंप्राप्तेकुर्यात्श्राद्धानिषोडश॥ पायसेनगुडेनैवपिंडंद द्याद्यथाक्रमम्। उदकुंभप्रदानंचपददानानियानिच॥ दीपदानानियंत्कि चित्पंचवर्षाधिकेसदा। कर्तव्यंतुखगश्रेष्ठव्रतार्वाक्प्रेततृप्तये॥ स्वाहाकारेणै वकार्याण्येकोद्दिष्टानिषोडश। ऋजुदर्भैस्तिलैःशुक्लैःप्राचीनावीतिनातथेति तत्रैवोक्तेः॥ अत्रमूलंचिंत्यम्॥ वार्षिकादितुनभवत्येव॥ सपिंडनाभावेपितृत्वा

योगाद्वचनाभावाच्च **दिवोदासीये** अव्रतेनिधनंप्राप्तेविप्रादौशूद्रजातिवत् । क्रियाःसर्वाःसमुद्दिष्टाःसपिंडीकरणंविना ॥ उदकंपिंडदानंचकृतचूडेविधीयतइति ॥ स्त्रीणांतूद्वाहात्प्राक्उदकपिंडदानविकल्पः॥स्त्रीणांचैकेप्रत्तानामितिगौतमोक्तेः ॥ स्त्रीशूद्राश्चसधर्माणइतिवचनात्शूद्रेप्येवम् ॥ एतद्वयोर्निमित्ताशौचंसर्ववर्णसमम् ॥ तुल्यंवयसिसर्वेषामतिक्रांतेतथैवचेतिव्याघ्रपादोक्तेः **यानितु** निर्वृत्तचूडकेविप्रेत्रिरात्राच्छुद्धिरिष्यतेइति ॥ निवृत्तेक्षत्रियेषड्भिर्वैश्येनवभिरुच्यते । शूद्रेत्रिवर्षेन्यूनेतुमृतेशुद्धिस्तुपंचभिः ॥ अतऊर्ध्वंमृतेशूद्रेद्वादशाहोविधीयते ॥ षड्वर्षांतमतीतेतुशूद्रेमासमशौचकमित्यांगिरसादीनि तानिविशिष्टविगानान्नादर्तव्यानीतिविज्ञानेश्वरमदनपारिजातादयः ॥ तेनैतद्वशाच्छूद्राणांव्यवस्थाप्रागुक्ताहेयैव॥तुल्येवयसिसर्वेषामितिदाक्षिणात्यपरम् ॥ अन्यदेशेकौर्मोक्ताव्यवस्थेतिशुद्धितत्त्वे ॥ अथजात्याशौचम् ॥तच्चद्विजपुंसामुपनयनोर्ध्वंप्रवर्तते ॥ त्रिरात्रमाव्रतादेशाद्दशरात्रमतःपरम्।क्षत्रस्यद्वादशाहानिविशःपंचदशैवतु॥ त्रिंशद्दिनानिशूद्रस्यतदर्धन्यायवर्तिनइतियाज्ञवल्क्योक्तेः **यत्तुसएव** त्रिरात्रंदशरात्रंवाशावमाशौचमिष्यतइत्याह ॥ तत्रदशाहेत्रिरात्रमस्पृश्यत्वं॥एकदिनोत्पन्नेआशौचद्वयेदशाहमस्पृश्यत्वम्॥मरणंयदितुल्यंस्यान्मरणेनकथंचन । अस्पृश्यंतुभवेद्गोत्रंसर्वमेवसबांधवमित्यंगिरसोक्तेः ॥ दशाहाशौचपरत्वेदशरात्रमतःपरमित्यनेनपौनरुक्त्यापत्तेरितिशुद्धिविवेकादयः तन्न॥ स्मृतिभेदात्त्रिरात्रंदशरात्रंवेतिविकल्पायोगाच्च॥ यस्तुपुत्राणांवेदानध्याप्यवृत्तिंविदधाति **तत्राहाश्वलायनः** द्वादशरात्रंमहागुरुषुदानाध्ययनेवर्जयेरन्निति ॥ अत्रयावदुक्तनिषेधोवास्पृश्यत्वमात्रंवा ॥नतुकर्मानधिकारः॥ एकादशाहांतेवैश्वदेवोक्तेः ॥ एकादशाहिकमुक्त्वातत्रह्यंतेविधीयतइति **शुद्धितत्त्वेतु** त्रयःपुरुषस्यापिगुरवोभवंतिमातापिताचार्यश्चेतिविष्णूक्तेः ॥ पित्रादयोमहागुरवः **भर्तापुक्तोरामायणे** पतिर्बन्धुर्गतिर्भर्तादैवतंगुरुरेवच **शातातपः** पतिरेकोगुरुःस्त्रीणांसर्वस्याभ्यागतोगुरुः ॥ एकपदमूढानांपितृमातृनिषेधार्थम् ॥ सोदकानांत्रिरात्रम् ॥ त्र्यहात्तूदकदायिनइति

मनूक्तेः **अग्निपुराणे** सपिंडतातुपुरुषेसप्तमेविनिवर्तते । समानोदकभावस्तु निवर्तेतचतुर्दशे ॥ जन्मनामस्मृतेर्वैकेतत्परंगोत्रमुच्यते **बृहस्पतिः** दशा हेनसपिंडास्तुशुद्ध्यंतिप्रेतसूतके । त्रिरात्रेणसकुल्यास्तुस्नात्वाशुद्ध्यंतिगो त्रजाः ॥ स्त्रीशूद्रयोस्तुविवाहोर्ध्वंजात्याशौचम् ॥ वैवाहिकोविधिःस्त्रीणामौ पनायनिकःस्मृतइत्युक्तेः ॥ दत्तानांभर्तुरेवहि ॥ स्वजात्युक्तमशौचंस्यान्मृ तकेजातकेतथेति ॥ माधवीयेब्राह्माच्च ॥ शूद्रस्यविवाहाभावेपिषोडशवर्षो र्ध्वमासः ॥ अनूढभार्यःशूद्रस्तुषोडशाद्वत्सरात्परम् । मृत्युंसमधिगच्छेच्चे न्मासात्तस्यापिबांधवाः ॥ शुद्धिंसमधिगच्छंतिनात्रकार्याविचारणेत्यपरार्के शंखोक्तेः निर्णयामृतमदनपारिजातादौत्वन्यथोक्तम् **हारीतः** आमौंजीबंध नाद्विप्रःक्षत्रियश्चधनुर्ग्रहात् । आप्रतोदग्रहाद्वैश्यःशूद्रोवस्त्रद्वयग्रहात् ॥ धनुःप्रतोदावष्टमेब्देद्वादशेवस्त्रद्वयमिति **मेधातिथिस्तु** त्रिरात्रमाव्रतादेशा दित्यत्रव्रतंकालोपलक्षणार्थम् ॥ सचकालःस्वकीयःसर्वेषांचाष्टमवर्षरूपः॥ तेनचतुर्णामपिवर्णानामुपनयनाभावेप्यष्टमादूर्ध्वंपूर्णमेवाशौचम् ॥ तत्रापि प्रागष्टमाच्छिशवःप्रोक्ताइतिस्मृत्यंतरादूर्ध्वंसंपूर्णमर्वाक्त्रिरात्रम् ॥ येप्याषो डशाद्ववेद्वालइत्याहुस्तेषामप्यष्टमादूर्ध्वम् ॥ शूद्रेमासएव ॥ ऊर्ध्वमष्टभ्यो वर्षेभ्यःशुद्धिःशूद्रस्यमासिकीतिवचनादित्याह ॥ हारलताशुद्धितत्त्वादिगौ डग्रन्थेष्वप्युक्तम् **अनुपनीतोविप्रइत्युक्त्वा** म्रियतेयत्रतत्रस्यादाशौचंत्र्य हमेवहि । द्विजन्मनामयंकालस्त्रयाणांतुषडाब्दिकइत्यादिपुराणोक्तेरुपनय नंकालोपलक्षणम् ॥ षडब्दपदंमासत्रयाधिकपरम् ॥ गर्भाष्टमेष्टमेवाब्दइ त्युक्तेः **यत्तुजाबालः** व्रतचूडाद्विजानांचप्रतीतिषुयथाक्रमम् दशाहत्र्यह एकाहैःशुद्ध्यंत्यपिहिनिर्गुणाइति ॥ द्विजादंताः ॥ इदंप्रतीत्युक्तेः पं चाब्दोपनीतपरमिति ॥ तदेतन्नाद्रियंतेवृद्धाः **यानितुपराशरः** एकाहाद्ब्रा ह्मणःशुद्ध्येद्योग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तुद्विहीनोदशभिर्दिनैः ॥ केवलवेदःकेवलश्रौताग्नेरप्युपलक्षणम् ॥ अयंसंकोचोहोमाध्ययनपरएव नतुसंध्यादाविति हारलतायां **अंगिराः** सर्वेषामेववर्णानांसूतकेमृतकेतथा

दशाहाच्छुद्धिरेतेषामितिशातातपोब्रवीत् देवलः आशौचंदशरात्रंतुसर्वेषा मपरेविदुः । निधनेप्रसवेचैवपश्यंतःकर्मणःक्षयम् ॥ अत्यंतोत्कृष्टस्यकर्महा नौपीडावतोविप्रपरिचर्यापरम् ॥ शूद्रेदशरात्रमितिहारलतायाम् दक्षः स द्यःशौचंतथैकाहहरूयश्चतुरहस्तथा । षट्दशद्वादशाहश्चपक्षोमासस्तथैवच ॥ मरणांतंयथाचान्यद्दशपक्षास्तुसूतके मिताक्षरायांस्मृत्यंरे चतुर्थेदशरात्रं स्यात्षण्निशाःपुंसिपंचमे । षष्ठेचतुरहाच्छुद्धिःसप्तमेत्वहरेवतु ॥ इत्यादी नितान्यापदनापद्गुणवद्गुणवद्विषयाणिदेशांतरभेदाद्वाज्ञेयानि ॥ सद्यःशौ चादिषडहांताःपक्षायायावरादिपराः ॥ अत्रमरणांतंजननादिनिमित्ताद्विन्न म् ॥ शिष्टविगानान्नादर्तव्यानीतिविज्ञानेश्वरः ॥ अस्नात्वाचाप्यहुत्वाचअ दत्वाक्षंस्तथाद्विजः ॥ एवंविधस्यविप्रस्यसर्वदःसूतकंभवेदितिदक्षोक्ता ॥ अन्यपूर्वायस्यगेहेभार्यास्याप्तस्यनित्यशः । आशौचंसर्वकार्येषुदेहेभवतिस र्वेदेतिब्राह्मादिवशाद्यवस्थेत्यपरार्कमदनपारिजातादयः माधवस्तु वृत्त स्वात्ध्यायसापेक्षमद्यसंकोचनंतथेतिकलिवर्ज्येषूक्तेः दशाहएवविप्रस्यसपिं डेमरणेसति । कल्पांतराणिकुर्वाणःकलौभवतिकिल्विषीतिहारीतोक्तेश्चन्यू नाशौचपक्षायुगांतरविषयाः ॥ मरणांतादिपक्षास्तुनिंदार्थवादः अन्यथा ना मधारकविप्रस्तुदशाहंसूतकीभवेदितिविरोधःस्यादित्याह यत्तुदेवलः दशा हादित्रिभागेनकृतेसंचयनेक्रमात् । अंगस्पर्शनमिच्छंतिवर्णानांतत्वदर्शिन इतिपूर्णाशौचेस्पृश्यतामाह यच्चानुपनीतातिक्रांताशौचेत्रिरात्रादौतेनैवोक्तं स्वाशौचकालाद्विज्ञेयंस्पर्शनंतुत्रिभागइति तदपियुगांतरेषु अस्थिसंचयनादू र्ध्वमंगस्पर्शनमेवचेतिमाधवीयेकलौतन्निषेधात् यत्तुहारलतायाम् चतुर्थेह निकर्तव्यः संस्पर्शोब्राह्मणस्यत्वितिप्रचेतसोक्तेरूथहैकाहाशौचेपिचतुर्थाहए वांगस्पर्शइति तन्न देवलादिवशेनास्यदशाहगोचरत्वात् येतुवर्णसंकरजामू र्धावसिक्ताद्यास्तेषामाशौचविशेषःकलौनोपयुक्तइतिनोच्यते प्रतिलोमजानां नाशौचम्मलापकर्षणार्थंतुस्नानमात्रमितिविज्ञानेश्वरः माधवस्तु शौचाशौचे प्रकुर्वीरन्शूद्रवर्णस्यसंकराइतिब्राह्मोक्तेशूद्रवदाह हारलतायामप्येवम् दत्त

क्रीताकृत्रिमादिपुत्रेषुअहीनवर्णगासुस्त्रीषुच सपिंडत्वेपिप्रसवेमरणेचपूर्वापर पित्रोर्भर्तुश्चत्रिरात्रमेवनदशाहादि अनौरसेषुपुत्रेषुजातेषुचमृतेषुच परपूर्वासु भार्यासुप्रसूतासुमृतासुचेतित्रिरात्रानुवृत्तौविष्णूक्तेः ॥ सपिंडानांत्वेकाहः ॥ परपूर्वासुभार्यासुपुत्रेषुकृतकेषुच । भर्तृपित्रोस्त्रिरात्रंस्यादेकाहस्तुसपिंडतइ तिमाधवीयेहारीतोक्तेः ॥ सूतकेमृतकेचैवत्रिरात्रंपरपूर्वयोः । एकाहस्तुसपिं डानांत्रिरात्रंयत्रवैपितुरितिमरीच्युक्तेश्च **शंखः** अनौरसेषुपुत्रेषुभार्यास्वन्यग तासुच । परपूर्वासुचस्त्रीषुत्रिरात्राच्छुद्धिरिष्यते ॥ परपूर्वापुनर्भूः ॥ इदंसु वर्णासु **हीनवर्णासुतुशंखलिखितौ** परपूर्वासुभार्यासुपुत्रेषुकृतकेषुच । ना नध्यायोभवेत्तस्यनाशौचंनोदकक्रिया **ब्राह्मेपि** आशौचंतुत्रिरात्रंस्यात्समव र्णेषुनिश्चितम् **यत्तुषडशीतौ** अन्यपूर्वावरुद्धासुत्रिदिनाच्छुद्धिरिष्यते । ता स्वेवानन्यपूर्वासुपंचाहोभिर्विशुद्ध्यतीति ॥ तत्रपंचाहेमूलंचिंत्यम् **यत्तुया ज्ञवल्क्यः** अनौरसेषुपुत्रेषुभार्यास्वन्यगतासुचेत्येकाहमाह तदसन्निधौज्ञेय म् ॥ यदापितुरेकाहस्तदा सपिंडानांस्नानम् ॥ अन्याश्रितेषुदारेषुपरपत्नी सुतेषुच । गोत्रिणः स्नानशुद्धाःस्युस्त्रिरात्रेणैवतत्पितेतिप्रजापत्युक्तेः ॥ पि तेतिवोदुरुपलक्षणम् तथोपक्रमात् ॥ यत्तुदत्तकेपालकप्रतियोगिकपुत्र त्वात्पूर्वपितुर्नत्रिरात्रम् पूर्वसंबंधनिवृत्तेश्चनदशाहादितिकश्चित् ॥ तन्न **जनकेपि** बैजिकादभिसंबंधादनुरुध्यादधंत्र्यहमितिवाचनिकाशौचस्यानि वार्यत्वात् ॥ पितृमरणेपिदत्तकादीनांत्रिरात्रम् **शुद्धितत्त्वेब्राह्मे** दत्तकश्च स्वयंदत्तःकृत्रिमःक्रीतएवचेत्युपक्रम्य सूतकेमृतकेचैव त्र्यहाशौचस्यभा गिनइत्युक्तेः ॥ स्मृतिकौमुद्यांहारलतायामप्येवम् ॥ दत्तकस्यपुत्रपौत्राणां जननेमरणेवासपिंडानामेकाहः ॥ बीजिनश्चेतिगौतमेनसाप्तपौरुषसापिंड्यो क्तेः ॥ सपिंडानांचैकाहस्योक्तत्वात् ॥ सपिंडेतुपुत्रीकृतेसपिंडदत्तौरसयो र्भ्रात्रोस्तत्पुत्रयोर्दशाहएव ॥ तत्राकांक्षाभावात्सपिंडत्वेनदशाहप्राबल्याच्च ॥ पूर्वापरयोर्भर्तुरुत्पन्नयोःपुत्रयोस्त्वाह **माधवीयेमरीचिः** मातुरैक्यात्द्विपि तृकौभ्रातरावन्यगोत्रजौ । एकाहंसूतकेतत्रत्रिरात्रंमृतकेतयोरितिदिक् **ऊढ**

कन्यानांतुविष्णुराह संस्कृतासुस्त्रीषुनाशौचम् ॥ पितृपक्षेतत्प्रसवमरणेचेत् पितृगृहेस्यातांतदैकरात्रंत्रिरात्रंचेतिप्रसवेएकरात्रं मरणेत्रिरात्रमितिविज्ञानेश्वरापरार्कौ **माधवस्तु** प्रसवेपित्रिरात्रंपित्रोः ॥ एकरात्रंभ्रात्रादिबन्धुवर्गस्य ॥ दत्तानारीपितुर्गेहेसूयेताथम्रियेतवा । तद्बंधुवर्गस्त्वेकेनशुचिस्तज्जनकस्त्रिभिरितिब्राह्मोक्तेरित्याह **यत्तुकश्चिदाह** पक्षपदेनभ्रातरोगृह्यंते वाक्यांतरेणभगिनीमृतौत्रिरात्रोक्तेरितितच्चिंत्यम् ॥ तदभावेतद्विरोधाच्च ॥ भ्रातुःप्रसवेएकाहः ॥ मृतौत्रिरात्रमितिकेचित् ॥ युक्तातुपक्षिणी ॥ परस्परंमृतौभ्रातृभगिन्योःपक्षिणीभवेदितिब्राह्मात्॥भ्रातृभिन्नानामेकाहः वर्गोक्तेः इतरेषांतुयथाविधीतिवक्ष्यमाणवचनाच्च॥ यत्तुप्रधानगृहेमृतौपित्रोःपूर्णभ्रातुरूयहइतिकश्चित्सनिर्मूलत्वान्नाशौचम् ॥ पितृपक्षेइत्येतद्विरोधाच्चांतः ॥ दत्तानारीपितुर्गेहेप्रधानेसूयतेयदा । म्रियतेवासदातस्याःपिताशुध्येत्त्रिभिर्दिनैरितिकल्पतरौशुद्धितत्त्वेच ॥ पितृगृहेप्रसवेतुपित्रादीनामाशौचंनास्ति ॥ मृतौपित्रोस्त्रिरात्रमस्त्येव ॥ प्रत्ताप्रत्तासुयोषित्सुसंस्कृतासंस्कृतासुच । मातापित्रोस्त्रिरात्रंस्यादितरेषांयथाविधि ॥ अजातदंतासुपित्रोरेकरात्रमितिमाधवीयेशंखकाष्णाजिनिस्मृतेः ॥ बैजिकादभिसंबंधादित्युक्तेश्च ॥ स्मृत्यर्थसारेप्येवम् ॥ माधवस्तुइदंत्रिरात्रंजातदंतपरम् ॥ दंतोत्पत्तेःप्रागेकरात्रंपित्रोः सद्यस्त्वप्रौढकन्यायांप्रौढायांवासराच्छुचिः । प्रदत्तायांत्रिरात्रेणदत्तायांपक्षिणीभवेदितिपुलस्त्योक्तेः **अन्यत्रकन्यामृतौपित्रोःपक्षिणीत्याहषडशीतावपि** पितृगेहादतोन्यत्रयदिपुत्रीप्रमीयते। पक्षिणीतत्रपित्रोःस्यान्नान्येषामितिनिश्चयइति॥ ग्रामांतरेइयमितिस्मृत्यर्थसारे ॥ भ्रातुस्तुपक्षिणी ॥ श्वशुरयोर्भगिन्यांचमातुलायांचमातुले । पित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशामितिवृद्धबृहस्पतिस्मृतेः **शुद्धितत्त्वे कौर्मे** अदंतात्सोदरेसद्यआचूडादेकरात्रम् । आप्रदानात्त्रिरात्रंस्यादशरात्रमतःपरम् ॥ पित्रोर्मृतौस्त्रीणांत्रिरात्रम् ॥ पित्रोरुपरमेस्त्रीणामूढानांतुकथंभवेत् ॥ त्रिरात्रेणैवशुद्धिःस्यादित्याहभगवान्यमइतिमाधवीयेवृद्धमनूक्तेः ॥ इदं दशाहांतः ऊर्ध्वंतुपक्षिणी ॥ भ्रातुर्भगिनीगृहेतस्यावातद्गृहेमृतौत्रिरात्रम्

अन्यत्रतुपक्षिणीतिषडशीतावुक्तम् **ब्राह्मेपि** परस्परमृतौभ्रातृभगिन्योःपक्षिणीभवेत् । मातुलाशौचवत्पुत्र्याःपितृव्याशौचमिष्यतइति ॥ शिष्टास्त्वस्य निर्मूलत्वात्पितृव्येस्नानमात्रमाहुः **त्रिंशल्लोक्यां** प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्वस्त्रीयेषुत्रिरात्रंत्रिदिवसमशुचिःसोदकस्तूभयत्र। पक्षिण्याशौचमृत्विक्दुहितृसुतसहाध्यायिबंधुत्रयांतेवासिश्वश्रूसुमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे ॥ मातामह्यांचपित्रोःस्वसरिचविरतौमातुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथेचनष्टे । शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानश्रोत्रियेषुस्वगृहपरमृतौमातुलेचैकरात्रम् ॥ रात्रिंसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयुक्तेस्नानंबासोयुतंस्यादिदमपिसकलंसर्ववर्णेषुतुल्यमिति ॥ अत्रमूलंमिताक्षरादौस्पष्टं ॥ दौहित्रभगिनेययोरुपनीतयोस्त्रिरात्रं ॥ अनुपनीतयोःपक्षिणी ॥ संस्थितेपक्षिणीरात्रिं दौहित्रेभगिनीसुते । संस्कृतेतुत्रिरात्रंस्यादितिधर्मोव्यवस्थितइतिवृद्धमनूक्तेः॥ संस्कृतेदाहेन॥तेनदाहेत्रिरात्रंनान्यथेतिगौडाःतन्न विशेषवैयर्थ्यात्॥ मातुलादौसन्निधिविदेशाभ्यांपक्षिण्येकाहयोर्व्यवस्था **मनुः** त्रिरात्रमाहुराशौचमाचार्येसंस्थितेसति । तस्यपुत्रेचपत्न्यांचदिवारात्रमितिस्थितिः ॥ श्रोत्रियेस्वगृहेमृतेत्रिरात्रम् ॥श्रोत्रियेतूपसंपन्नंत्रिरात्रमशुचिर्भवेदितिस्मृतेरितिमाधवः ॥ एकग्रामीणेत्वेकाहः ॥ ऋत्विक्षुबह्वल्पकालश्रौतस्मार्तयाजनपरेत्रिरात्रैकरात्रेज्ञेये ॥ यद्यपिकर्मकुर्वतएषवाचकः शब्दोभवतीतिशंबराचार्यैःकर्ममध्येऋत्विक्त्वमुक्तंतथापिकर्मण्याशौचनिषेधात्तदुत्तरमेवैतत्ज्ञेयम् **गौडास्तु** एकोदकानांत्र्यहोगोत्रजानामहःस्मृतम् । मातृबंधौगुरौमित्रेमंडलाधिपतौतथेतिजाबालोक्तेर्मातृबंधुष्वेकाहमाहुः ॥ शिष्येस्वोपनीतेत्र्यहः ॥ शिष्यसतीर्थब्रह्मचारिषुक्रमेणत्रिरात्रमहोरात्रमेकाहइतिमाधवीयेबौधायनोक्तेः **अन्यत्रतुमनुः** मातुलेपक्षिणीरात्रिंशिष्यर्त्विक्बांधवेषुचेति ॥ **बंधुत्रयम्** आत्मपितृष्वसृमातुलपुत्राः ॥ पितुःपितृष्वसृमातृष्वसृमातुलपुत्राः ॥ मातुःपितृष्वसृमातृष्वसृमातुलपुत्राश्चेतिविज्ञानेश्वरः अत्रपक्षिणी ॥ पितृष्वस्रादि

कन्यामूढानांत्वेकाहः ॥ तद्बंधुवर्गस्त्वेकेनेतिपूर्वोक्तब्राह्मात् **यत्तुषडशीत्याम्** एवंपित्रोर्भगिन्यौयेयेपितामह्योस्तथा । येमातामह्योश्चैवभगिन्यौ तत्प्रजाश्चयाः ॥ मातुलाःस्वस्यपित्रोश्चपत्न्यश्चैषांप्रजाश्चयाः ॥ भ्रातरश्चे तिसर्वेषुपक्षिणीस्वगृहेत्र्यहम् ॥ एवंश्वशुरजामातृदौहित्रविपदिस्मृतम् **यच्च यमः** जामातरिमृतेशुद्धिस्त्रिरात्रेणोभयोःस्मृता ॥ पक्षिणीशालकानांस्या दितिशातातपोब्रवीदिति निर्मूलत्वान्मिताक्षरादिविरोधाच्चोपेक्ष्यम् **मद नपारिजातेविष्णुः** असपिंडेस्ववेश्मनिमृतेएकरात्रम् **अत्रहरदत्तः** अंतः शवेचेत्यापस्तंबसूत्रतःशवेग्रामेधनुःशतादर्वागन्नमभोज्यम् ॥ दीपमुदकुं भंवोपनिधायतुभुंजीत ॥ यदिसमानवंशंनगृहमेवंसूतिकायामित्याह **प्रधा नगृहमृतौतु** गृहेयस्यमृतःकश्चिदसपिंडःकथंचन । तस्याप्यशौचंविज्ञेयंत्रि रात्रंनात्रसंशयइत्यंगिरसोक्तमितिमाधवः ॥ एतेनत्रिरात्रमसपिंडेषुस्वगृहेसं स्थितेषुचेतिकौर्मव्याख्यातम् **शुद्धितत्त्वेबृहन्मनुः** श्वशूद्रपतिताश्चांत्यामृता श्वेत्द्विजमंदिरे । शौचंतत्रप्रवक्ष्यामिमनुनाभाषितंयथा । दशरात्राच्छुनि मृतेमासाच्छूद्रे भवेच्छुचिः ॥ द्वाभ्यांतुपतितेगेहमंत्येमासचतुष्टयात् ॥ अ त्यंतेवर्जयेद्गेहमित्येवंमनुरब्रवीत् ॥ अंत्योम्लेच्छः ॥ अत्यंतःश्वपाकइतिः वाचस्पतिः **तत्रैवयमः** द्विजस्यमरणेवेश्मविशुद्ध्यतिदिनत्रयात् **संवर्तः** गृहशुद्धिंप्रवक्ष्यामिअंतस्थशवदूषिते ।प्रोत्सृजन्मृन्मयंभांडंसिद्धमन्नंतथैवच॥ गौमयेनोपलिप्याथछागेनाघ्रापयेद्बुधः ॥ ब्राह्मणैर्मंत्रपूतैश्चहिरण्यकुशवारिभि सर्वमभ्युक्षयेद्वेश्मततः शुद्ध्यत्यसंशयम् **बृहद्विष्णुः** ग्राममध्यगतोयाव च्छवस्तिष्ठतिकस्यचित् । ग्रामस्यतावदाशौचंनिर्गतेशुचितामियात् ॥ गृहे पश्चादौमृतेप्वेवम् ॥ यत्तुमाधवीयेप्रचेतसामातृष्वस्रादिषुत्रिरात्रमुक्तम् ॥ मातृष्वसामातुलयोःश्वश्रूश्वशुरयोर्गुरोः ॥ मृतेचर्त्विजियाज्येचत्रिरात्रेणवि शुध्यतीति ॥ गुरुराचार्यः ॥ ऋत्विक्कुलागतः ॥ तत्स्वगृहमृतौज्ञेयम् श्वशुरयोरन्यत्रमृतावपिसन्निधौत्रिरात्रम् ॥ असन्निधौपक्षिणी ॥ देशांतरेए करात्रं ॥ वक्ष्यमाणविष्णूक्तेरितिमाधवगौडादयः ॥ अन्यत्रतुमातृष्वस्रादि

षु ॥ पित्रोःस्वसरितद्बन्धपक्षिणींक्षपयेन्निशामितिवृद्धमनूक्तेः **यत्तुवृद्धमनुः** भगिन्यांसंस्कृतायांतु भ्रातर्य्यपि च संस्कृते । मित्रेजामातरिप्रेतेदौहित्रे भगिनीसुते ॥ शालकेतत्सुतेचैवसद्यःस्नानेनशुद्ध्यतीतितत्भ्रातृदौहित्रादौदेशांतरे ॥ शालकसुतजामात्रोःस्वदेशेज्ञेयम् ॥ शालकेतुस्वदेशेएकाहः ॥ आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रू श्वशुर्यसहाध्यायिशिष्येष्वेकरात्रमिति माधवीयेविष्णूक्तेः ॥ हरदत्तीयेदशश्लोक्यामप्येपम् ॥ श्वशुर्यःशालकः देशांतरेस्नानम् ॥ श्वशुरयोर्देशांतरेएकाहः **जाबालः** एकोदकानांतुत्र्य होगोत्रजानामहःस्मृतम् । सर्वत्रमूल्याभावेपिक्रियाकर्तुर्दशाहतः ॥ गुरोःप्रेतस्यशिष्यस्तुपितृमेधंसमाचरेत् । प्रेताहारैःसमंतत्रदशरात्रेणशुद्ध्यतीतिमनूक्तेः ॥ शिष्यइत्युपलक्षणम्॥निरन्वयेसपिंडेतुमृतेसतिदयान्वितः । तदशौचं पुराचीर्त्वाकुर्यात्तुपितृवक्रियामिति माधवीयेब्राह्मोक्तेः **दिवोदासीये** सगोत्रोवासगोत्रोवायोग्निंदद्यात्सखेनरः । सोपिकुर्यान्नवश्राद्धंशुद्ध्येच्चदशमेहनि ॥ यत्रैकविषयेपक्षिण्येकाहापिपक्षद्वयमुक्तं तत्रसन्निधिविदेशमैत्र्यादिकृताव्यवस्था ॥ **त्रिंशच्छ्लोक्याम्** वानप्रस्थेयतौचोपरमतिकुलजेषंढकेबाप्लुवः स्याद्योषिद्वोविप्रगुर्य्यैमृतवतितुदिनंयुद्धविद्धेचसद्यः ॥ अत्रमूलमाकरेस्पष्टम् ॥ युद्धमूर्ध्निमृतस्यस्नानम् ॥ उद्यतैराहवेशस्त्रैःक्षत्रधर्महतस्यच । सद्यः संतिष्ठतेयज्ञस्तथाशौचमितिस्थितिरितिमनूक्तेः ॥यज्ञोत्यकर्म सर्वतदैवेत्यर्थः **यस्तुभारतेराजधर्मेषु** अशोच्योहिहतःशूरःस्वर्गलोकेमहीयते । नह्यत्रमुदकंतस्यनस्नानंनाप्यशौचकमिति ॥ श्राद्धादिनिषेधःसपुत्राद्यभावपरः ॥ अतएवतत्रकर्णादीनांश्राद्धमुक्तम्॥अन्येतुदशपिंडानिषेधमाहुर्यतिवत् **यत्तपराशरः** आहवेपिहतानांचएकरात्रमशौचकमितितद्युद्धक्षेतेनकालांतरस्मृतेर्ज्ञेयम् ॥ असन्निधौस्नानमितिमाधवः **शुद्धितत्त्वेग्निपुराणे** दष्ट्रिभिःशृङ्गिभिर्वापिहताम्लेच्छैश्चतस्करैः । येस्वाम्यर्थेहतायांतिराजन्स्वर्गेनसंशयः ॥ सर्वेषामेववर्णानांक्षत्रियस्यविशेषतः **यत्तुबृहस्पतिः** डिंबाहवेविद्युताचराज्ञांगोविप्रपालने । सद्यःशौचंमृतस्याहुस्त्रयंचान्येमहर्षयः ॥ तच्छस्त्रंविनापराङ्मु

खहतेचत्रिरात्रम् ॥ राज्ञावध्येहतेसद्यःशौचमन्यत्त्रिरात्रम् **तथैवव्याघ्रः क्ष** तेनम्रियतेयस्तुतस्याशौचंभवेद्द्विधा । आसप्ताहात्त्रिरात्रंस्याद्दशरात्रमतः परम् ॥ शस्त्राघातेऽन्यहादूर्ध्वंयदिकश्चित्प्रमीयते । आशौचंप्राकृतंतस्यसर्ब वर्णेषुनित्यशः **शस्त्राघातेक्षतंविनाशवस्पर्शेतुहारीतः** शवस्पृशोग्रामंनप्र विशेयुरानक्षत्रदर्शनाद्रात्रौचेदादित्यस्य **यत्तुमनुः** अह्नाचैकेनरात्र्याचत्रिरा त्रैरेवचत्रिभिः । शवस्पृशोविशुध्यंतित्र्यहात्तूदकदायिनइति ॥ अह्नारात्र्या चेत्यहोरात्रमित्युक्तम् ॥ त्रिभिस्त्रिरात्रैरितिनवरात्रमेवंदशरात्रमित्यर्थः ॥ तत्तदन्नाशनेतद्गृहवासेनापादिचज्ञेयम् **अंगिराः** आशौचंयस्यसंसर्गादाप तेद्गृहमेधिनः । क्रियास्तस्यनलुप्यंतेगृह्याणांचनतद्भवेत् ॥**अथनिर्हाराद्या शौचम्** ॥ स्नेहेनसवर्णनिर्हारेतदन्नाशनेतद्गृहवासेचदशाहः ॥ तदन्नानश नेतद्गृहवासेत्र्यहः ॥ गृहावासेन्नाभक्षणेचैकाहः ॥ भृतिग्रहणेननिर्हारेदा हेचतज्जात्याशौचम् ॥ यदिनिर्हरतिप्रेतंप्रलोभाक्रांतमानसः ॥ दशाहेन द्विजः शुत्ध्येद्द्वादशाहेनभूमिपः ॥ मासार्धेनतुवैश्यस्तुशूद्रोमासेनशुत्ध्य तीतिकौर्मोक्तेः ॥ विजातीयनिर्हारेतुशवजातीयमाशौचम् ॥ अत्रभृतिग्रहे द्विगुणम् ॥ अवरश्चेद्वरंवर्णंवरोवाप्यवरंयदि । वहेच्छवंतदाशौचंद्रव्यार्थंद्वि गुणंभवेदितिव्याघ्रोक्तेः ॥ कौर्ममेतदितिगौडाः ॥ दाहेप्येवम् **यत्तुब्राह्मे** यो सवर्णंतुमूल्येननीत्वाचैवदहेन्नरः । अशौचंतुभवेत्तस्यप्रेतजातिसमंनृपेतितदा परिज्ञेयम् ॥सोदकनिर्हारेतुदशाहइतिमाधवः **अलंकरणेतुशंखः** कृच्छ्रपादो सपिंडस्यप्रेतालंकरणेकृते । अज्ञानादुपवासःस्यादशक्तौस्नानमिष्यते ॥ धर्मा र्थमनाथसवर्णहरणेक्रियाकरणेचद्विजस्यानंतयज्ञफलम् ॥ स्नानंप्राणायामो ग्निस्पर्शश्चेतिमाधवीये ॥ अग्निदेप्येवम् ॥ प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणोनैवदुष्य ति । वोढाचैवाग्निदाताचसद्यःस्नात्वाविशुत्ध्यतीत्यपरार्केवृद्धपराशरोक्तेः ॥ मातुलत्वादिसंबंधेत्रिरात्रम् ॥असंबंधिद्विजान्वहित्वादहित्वाचसद्यःशौचम् ॥ संबंधेत्रिरात्रमितिपैठीनसिस्मृतेः **गौतममिताक्षरयांवृद्धात्रिः** सूतकात्द्विगु णंशावं शावात्द्विगुणमार्तवत् । आर्तवात्द्विगुणासूती ततोपिशवदाहकः ॥

अत्रपूर्वेणोत्तरनिवृत्तिरित्यर्थः **विष्णुः** मृतंद्विजंनशूद्रेणहारयेन्नशूद्रंद्विजेन **देवलः** ब्रह्मचारीनकुर्वीतशववाहादिकक्रियाम्। यदिकुर्याच्चरेत्कृच्छ्रंपुनः संस्कारमेवच **याज्ञवल्क्यः** आचार्यपित्रुपध्यायान्निर्हृत्यानिव्रतीव्रती। अनुगमनेतुसपिण्डेनदोषः॥ विहितंहिसपिण्डानांप्रेतनिर्हरणादिकम्। तेषांकरोतियःकश्चित्तस्याधिक्यंनविद्यतइतिदेवलोक्तेः॥ दोषस्यात्त्वसपिण्डस्यतत्रनात्रक्रियांविनेति हारीतोक्तेश्च **समोत्कृष्टवर्णेतुमाधवीयेकण्वः** अनुगम्यशवंबुत्थ्यास्नात्वास्पृष्ट्वाहुताशनम्। सर्पिःप्राश्यपुनःस्नात्वा प्राणायामैर्विशुत्थ्यतीति॥ हीनवर्णेतुक्षत्रियेऽहः॥ वैश्येपक्षिणी॥ शूद्रेत्रिरात्रम्॥ क्षत्रियस्यवैश्येऽहः। शूद्रेपक्षिणी वैश्यस्यशूद्रेऽहरितिविज्ञानेश्वरः **माधवस्तु** विप्रस्यवैश्येद्व्यहः॥ क्षत्रस्यशूद्रेप्येवम्॥ अन्यत्प्राग्वत्॥ स्नानाग्निस्पर्शघृताशनानिसर्वत्रेत्याह **हीनवर्णस्यदाहौर्ध्वदेहिककरणेतुब्राह्मे** ब्राह्मणोहीनवर्णस्यनकुर्यादौर्ध्वदेहिकम्॥ कामाल्लोभात्तथामोहात्कृत्वातज्ज्ञातितांव्रजेत् **मनुः** व्रात्यानांयाजनंकृत्वापरेषामन्त्यकर्मच। अभीचारमहीनंचत्रिभिःकृच्छ्रैर्व्यपोहति॥ परेषांसर्ववर्णानांहीनेषुतत्तद्गुण्यत्रैगुण्यचातुर्गुण्याद्यूह्यम् **अथरोदने** समोत्तमवर्णयोःसंचयनात्पूर्वंसचैलस्नानमूर्ध्वमाचमनम्॥ हीनवर्णेषुतुसंचयात्प्राक्सचैलमूर्ध्वं स्नानमात्रम् **विप्रस्यक्षत्रवैश्यविषयेतु ब्राह्मे** अस्थिसंचयनेविप्रो रौतिचेत्क्षत्रवैश्ययोः। तदास्नातःसचैलस्तुद्वितीयेहनिशुध्यति॥ कृतेतुसंचयेविप्रःस्नानेनैवशुचिर्भवेत्॥ क्षत्रस्यवैश्येप्येवम्॥ शूद्रेतुसंचयात्प्राक्विप्रस्यत्रिरात्रम्॥ क्षत्रवैश्ययोर्द्विरात्रम्॥ ऊर्ध्वंतुद्विजानामेकाहः॥शूद्रस्यशूद्रेस्पर्शेविनासंचयात्पूर्वमेकाहः॥ ऊर्ध्वंसञ्योतिरितिमाधवीयेज्ञेयम् **शुद्धितत्त्वेपारस्करस्तु** अस्थिसंचयनादूर्ध्वमासंयावत्द्विजातयः॥ दिवसेनैवशुध्यन्तिवाससासाक्षालनेनच॥ सजातेदिवसेनैवत्र्यहात्क्षत्रियवैश्ययोरित्युक्तम्॥ सापिण्डानांरोदननिर्हारादावदोषइत्युक्तम्प्राक् **विज्ञानेश्वरस्तु** मृतस्यबांधवैःसार्द्धं कृत्वातुपरिदेवनम्। वर्जयेत्तदहोरात्रं दानश्राद्धादिकर्मचेतिपारस्करोक्तेःसर्वत्रैकरात्रमाह **अथाशौचान्नभक्षणेविष्णुः** ब्रा

ह्मणादीनामाशौचे यःसकृदेवान्नमश्नातितस्यतावदाशौचम् ॥ यावत्तेषामा शौचव्यपगमेप्रायश्चित्तमिति **अज्ञानेत्वंगिराः** अन्तर्दशाहेभुक्त्वान्नंसूतकेमृ तकेपिवा ॥ अस्याशौचंभवेत्तावद्यावदन्नंव्रजत्यधः ॥ प्रायश्चित्तंत्वमत्यावि प्रस्यवर्णक्रमेणैकाहत्र्यहपञ्चाहसप्ताहोपवासः ॥ दशविंशतिःषष्टिःशतञ्चप्रा णायामाःपञ्चगव्याशनञ्च ॥ अभ्यासेद्विगुणम् ॥ आपदितुप्राणायामशतंप ञ्चशतमष्टशतमष्टसहस्रंगायत्रीजपश्च ॥ मत्यापदितुसवर्णशौचेत्रिरघमर्षणं गायत्र्यष्टसहस्रञ्च ॥ क्षत्रियाशौचेउपवासस्तच्चवैश्याशौचेत्रिरात्रोपवासश्च ॥ शूद्राशौचेकृच्छ्रः ॥ क्षत्रवैश्ययोःपञ्चशतमष्टशतंगायत्रीजपः ॥ उत्तमेषुशू द्रस्यसर्वत्रस्नानम् ॥ मत्यानापदिविप्रस्यवर्णेषुसांतपनकृच्छ्रमहासांतपनचां द्राणि ॥ अभ्यासेतुमासिकद्वैमासिकत्रैमासिकषाण्मासिकानीत्यादिमाधवी यादौज्ञेयम् ॥ अथदासस्यस्वदास्युत्पन्नस्यसपिण्डमृतौस्नानमात्रेणस्वामिका र्य्येस्पृश्यत्वम् ॥ भक्तदासस्यत्र्यहोर्ध्वम् ॥ सद्यःस्पृश्योगर्भदासोभक्तदा सस्त्र्यहाच्छुचिरितिस्मृत्यन्तरोक्तेः ॥ मूल्यकर्मकराःशूद्रदासीदासास्तथै वच ॥ स्नानेशरीरसंस्कारेग्रहकर्मण्यदूषिता इतिशातातपोक्तेश्च ॥ एतच्चा नन्यसाध्यतत्कार्यमात्रे ॥ अन्यत्रमासाद्याशौचमस्त्येव ॥ एवंदास्यामपि ॥ सूतिकायास्तस्याअस्पृश्यत्वमपिमासमात्रम् ॥ दासीदासश्चसर्वोवैयस्यव र्णस्ययोभवेत् । तद्वर्णस्यभवेच्छौचंदास्यामासस्तुसूतकमित्यंगिरसोक्तेःषड शीतावपि स्वामिशौचेनदासाद्याःस्पृश्यामासात्तुकर्म्मसु । योग्याःस्युर्मा सतोदासीसूतीचेत्स्पृश्यतामियात् ॥ दत्तदासादीनांस्वसपिंडमरणादौस्वा म्याशौचसमसंख्यदिनोर्ध्वं सत्यपिमासाद्याशौचेस्वामिकार्येस्पृश्यतेतिहरद त्तः ॥ दासांतेवासिभृतकाःशिष्याश्चैकत्रवासिनः । स्वामितुल्येनशौचेनशुध्यं तिमृतसूतकेइतिबृहस्पतिस्मृतेः **दासश्चात्र** गृहजातस्तथाक्रीतोलुब्धोदायादु पागतः । अन्नकालभृतस्तद्वदाहितःस्वामिनाचयः ॥ मोक्षितोमहतश्चर्णाद्युद्ध प्राप्तःपणेजितः । तवाहमित्युपगतःप्रव्रज्यावसितःकृतः ॥ भक्तदासश्चविज्ञेय स्तथैववडवाहृतः॥विक्रेताचात्मनःशास्त्रेदासाःपंचदशस्मृताइति॥नारदोक्तेषु

गर्भभक्तदासौविनाज्ञेयाः । वडवादासीतयाहृतस्तामुद्वाह्यदासोजातइत्यर्थः॥ अंतेवास्यपितेनैवोक्तः ॥ स्वशिल्पमिच्छन्नाहर्तुबांधवानामनुज्ञया । आचार्यस्यवसेदंतेकृत्वाकालंसुनिश्चितम् ॥ आचार्यःशिक्षयेदेनंस्वगृहेदत्तभोजनमिति ॥ शिष्यस्तत्तुल्योविद्यार्थी **दासादेःस्वामितत्सपिंडमरणेतुविष्णुः** पत्नीनांदासानामानुलोम्येनस्वामितुल्यमाशौचम् ॥ मृतेस्वामिन्यात्मीयमितिप्रतिलोमदासानामाशौचाभावः ॥ वर्णानामानुलोम्येनदास्यंनप्रतिलोमत इतियाज्ञवल्क्योक्तेः **अथरात्रौजननेमरणेवा** रात्रिंत्रिभागांकृत्वाऽद्यभागद्वयेचेत्पूर्वदिनमंत्येतूत्तरमितिमिताक्षरायाम् ॥ यत्तुप्रागर्धरात्रात्प्राक्वासूर्योदयात्पूर्वदिनमित्युक्तंतत्रदेशाचारतोव्यवस्था ॥ सर्वत्राशौचमाहिताग्नेर्दाहं तद्भिन्नस्यमरणमारभ्यज्ञेयम् ॥ अनग्निमतउत्क्रांतेराशौचादिद्विजातिषु । दाहादग्निमतोविद्याद्विदेशस्थेमृतेःसतीतिपैठीनसिस्मृतेः ॥ साग्निराहिताग्निः ॥ आहिताग्निश्चेत्प्रवसन्म्रियेतपुनः संस्कारंकृत्वाशववदाशौचमितिवसिष्ठविशेषोक्तेः ॥ दाहादेवतुकर्तव्यंयस्यवैतानिकोविधिरितिब्राह्माच्च **यत्तु** धूर्तस्वामिनारामांडारेणचोक्तमाहिताग्नेरपिमरणाद्येवदशरात्रं दशाहंशावमाशौचमिति मरणनिमित्तत्वात्तस्य ॥ यत्तुदाहादेवतस्याशौचमुक्तंतत्संस्कारनिमित्ताशौचंपृथगेव ॥ तेनगृह्याग्नेःसंस्कारांगंत्रिरात्रम्॥श्रौताग्नेस्तुदशरात्रम् ॥ मरणनिमित्तंतूभयोर्दशाहम् ॥ दाहात्प्रागपीतितद्वचनविरोधात्पूर्वस्यैवोत्कर्षान्मूलकल्पनालाघवाच्चचिन्त्यम् ॥ अथातिक्रान्ताशौचम् ॥ तत्राशौचमध्येजननादौज्ञातेतच्छेषेणशुद्धिः ॥ विगतंतुविदेशस्थंशृणुयाद्योद्यनिर्दशम् । यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेदितिमनूक्तेः ॥ अत्रकेचिदेतत्पुत्रातिरिक्तविषयम् ॥ तेषांत्वाशौचमध्येश्रवणेपितदाद्येवदशाहादि ॥ पितरौचेन्मृतौस्यातांदूरस्थोपिहिपुत्रकः । श्रुत्वातद्दिनमारभ्यदशाहंसूतकीभवेदित्यस्य सर्वापवादत्वादित्याहुस्तन्न ॥ ज्ञातमरणस्यनिमित्तत्वादनग्निमतउत्क्रांतेरित्यादिविरोधाच्च **स्मृत्यर्थसारेपि** जननेमरणेवाप्रथमदिनादूर्ध्वंज्ञातेपुत्रादीनांशेषेणैवशुद्धिरिति ॥ षडशीतावपरार्केचैवम् **दशाहादूर्ध्वंज्ञातेतुवृद्धवसिष्ठः**

मासत्रयेत्रिरात्रंस्यात्षण्मासेपक्षिणीतथा । अहस्तुनवमादर्वागूर्ध्वस्नानेनशुध्यति ॥ जननेत्वतिक्रांताशौचंनास्त्येव ॥ नाशुद्धिःप्रसवाशौचेव्यतीतेषु दिनेष्वपीतिदेवलोक्तेः ॥ पितुःस्नानंतत्रापिभवत्येव॥ निर्दशंज्ञातिमरणंश्रुत्वा पुत्रस्यजन्मच । सवासाजलमाप्लुत्यशुद्धोभवतिमानवइतिमनूक्तेः ॥ तच्चातिक्रांताशौचंदशाहादिजात्याशौचविषयम् ॥ नत्वनुपनीतादिनिमित्तत्रिरात्रादौ ॥ उपनीतेतुविषमंतस्मिन्नेवातिकालजामितिव्याघ्रोक्तेः ॥ निर्दशंज्ञातिमरणमतिक्रांतेदशाहेत्वितिमनूक्तेश्च **माधवीयेदेवलस्तु** आत्रिपक्षात्त्रिरात्रंस्यात्षण्मासात्पक्षिणीततः । परमेकाहमावर्षादूर्ध्वस्नातोविशुध्यतीत्याह ॥ तत्रापदनापद्विषयत्वेनव्यवस्था ॥ इदंचैकदेशे॥देशांतरेतुस्नानमात्रम् ॥ देशांतरमृतंश्रुत्वाक्लीबैवैखानसेयतौ । मृतेस्नानेनशुध्यंतिगर्भस्रावेचगोत्रिणइतिपराशरोक्तेरितिविज्ञानेश्वरः ॥ स्नानंवत्सरांते ॥ अर्वाक्त्रिपक्षात्त्रिनिशंण्मासाच्चदिवानिशम् । अहःसंवत्सरादर्वाग्देशांतरमृतेष्वपीतिविष्णूक्तेरितिमाधवः ॥ इदंसपिंडानांदेशांतरेस्नानंसोदकानामितियुक्तम् **लक्षणंत्वाहबृहस्पतिः** महानद्यंतरंयत्रगिरिर्वाव्यवधायकः । वाचोयत्रविभिद्यंतेतद्देशांतरमुच्यते ॥ देशांतरंवदंत्येकेषष्टियोजनमायतम्। चत्वारिंशद्वदंत्यन्येत्रिंशदन्येतथैवचेति ॥ एतत्सर्वंमातापितृभिन्नविषयम् ॥ तयोस्तुपितरौचेदितिपूर्वपैठीनसिवाक्यात्सदापूर्णमेवदशाहादि **स्मृत्यर्थसारेपि** मातापितृमरणेदूरदेशेपिसंवत्सरोर्ध्वमपिपुत्रोदशाहादिकंपूर्णमाशौचंकुर्यात् ॥ स्त्रीपुंसयोःपरस्परंसपत्नीषुचैवमिति **शुद्धितत्वादयोगौडास्तु** ऊर्ध्वसंवत्सरादाद्याद्वंधुश्चेच्छ्रुयतेमृतः । भवेदेकाहमेवात्रतच्चसंन्यासिनांनत्वितिदेवलोक्तेः ॥ पित्रोरब्दमध्येत्रिरात्रमूर्ध्वमेकाहः ॥ बंधुर्मातापिताभर्ताच ॥ पुर्वोक्तदशाहस्तुकलिंगादिदेशपरइत्याहुः ॥ तेबंधुपदस्यपुत्रादिपरत्वे मानाभावादुपेक्ष्याः **सापत्नमातुस्तुदक्षः** पितृपत्न्यामपेतायांमातृवर्जाद्विजोत्तमाः॥ संवत्सरेव्यतीतेपित्रिरात्रमशुचिर्भवेत् ॥ हीनवर्णमातृषुसपत्नीषुचैवमितिस्मृत्यर्थसारे ॥ केचित्पितुःपत्न्यांप्रमीतायामौरसेतनयेतथेतिब्राह्मोक्तेरौरसेपींदमाहुः ॥ षडशीतावप्येव

म् ॥ एतत्सर्ववर्णतुल्यम् ॥ तुल्यंवयसिसर्वेषामतिक्रांतेतथैवचेतिव्याघ्रोक्तेः ॥ अथाशौचसंपातेउच्यते ॥ तत्रशावेशावंसूतकेसूतकम् ॥ शावेसूतकंसूतके शावंवा ॥ तत्राप्युत्तरंकालतःपूर्वेणसमन्यूनमधिकंचेतिद्वादशभेदाः ॥ यदै कदिनेसमन्यूनमधिकंवाशौचद्वयंतत्रतंत्रेणान्यसिद्धिः ॥ द्वयोरेककालत्वा त् ॥ यदातुद्वितीयादिदिनेषूत्तरंसजातीयंशावेजननंवासमकालंन्यूनकालं वापरंस्यात्तदाषट्सुपक्षेषुपूर्वशेषेणशुद्धिः ॥ अंतराजन्ममरणेशेषाहोभिर्विशु ध्यतीतियाज्ञवल्क्योक्तेः॥ अंतराज्ञातेइत्यर्थः ॥ ज्ञातस्यैवजननादेर्निमित्त त्वात् ॥ पूर्वाशौचोत्तरंतन्मध्योत्पन्नेजातेतूत्तरमेवकार्यम् **शुद्धितत्त्वेप्युक्त म्** पूर्वाशौचांतरुत्पन्नंसमानंलघुवानिमित्तंतत्कालादुपरिश्रुतंस्वाशौचहेतुरेव ॥ अज्ञातंतु अविज्ञातेनदोषःस्याच्छ्राद्धादिषुकथंचनेत्यस्याशौचसांकर्येपिप्र वृत्तेः ॥ तेनाज्ञानाद्दृष्टोत्सर्गादौकृतेपश्चात्ज्ञातेपिनावृत्तिरिति **माधवीयेय मोपि** जननेजननंचेत्स्यान्मरणेमरणंतथा । पूर्वशेषेणशुद्धिःस्यादुत्तराशौ चवर्जनम् ॥ अत्रकेचिदंतर्दशाहेस्यातांचेत्पुनर्मरणजन्मनी । तावत्स्यादशु चिर्व्विप्रोयावत्तस्यादनिर्दशमिति ॥ मनुपराशरावैर्दशाहग्रहणात्पूर्णाशौचे एवपूर्वशेषेणशुद्धिः ॥ त्र्यहाद्यल्पाशौचसंपातेतूत्तरेणैवशुद्धिरित्यहुः ॥ हर दत्तोप्येवमाह ॥ गौडाअप्येवम् तन्न ॥ याज्ञवल्क्यादिवशेनदशाहस्य तुल्यकालाशौचोपलक्षणत्वात् ॥ समानाशौचसंपातेप्रथमेनसमापयेत् ॥ अ समानंद्वितीयेनधर्म्मराजवचोयथेतिमाधवीयेशंखोक्तेः ॥ अपरार्कमिताक्षरा दिविरोधाच्च ॥ यदातुसूतकेशावंसमन्यूनमधिकंवातदानपूर्वशेषाच्छुद्धिः **त दाहांगिराः** सूतकेमृतकचेत्स्यान्मृतकेत्वथसूतकम् । तत्राधिकृत्यमृतकंशौ चंकुर्यान्नसूतकं **षट्त्रिंशन्मते** शावाशौचेसमुत्पन्नेसूतकन्तुयदाभवेत् । शा वेनशुद्ध्यतेसूतिर्नसूतिःशावशोधिनी **चतुर्व्विंशतिमतेपि** मृतेनशुध्यतेजा तंनमृतंजातकेनतु ॥ अतोयदादशाहजननमध्येतदंतेवात्र्यहादिशावंतदापू र्वेणशुद्धावपितन्निमित्तमस्पृश्यत्वंभवत्येव ॥ मरणोत्पत्तियोगेतुगरीयोमर णंभवेदितिकौर्माच्च **गौतमव्याख्यायांवृद्धात्रिरपि** सूतकाद्द्विगुणंशावंशा

वात्द्विगुण मार्तवम् । आर्तवात्द्विगुणासूतिस्ततोपिशवदाहकः ॥ अत्रपू र्व्वपूर्व्वेणनोत्तरोनिवृत्तिरस्पृश्यत्वाधिक्यादित्यर्थः **शडशीतावपि** स्वभाव बहुसूतिस्तुन्यूनशावविशोधिनीति रात्रिशेषादौवर्धितद्वित्रिदिनैरागंतुकैःसूतै र्बहुत्वस्वभावेन ॥ अतस्तत्रन्यूनशावस्यापिनपूर्वेणशुद्धिरितिवक्तुंस्वभावेत्यु क्तम् **ब्राह्मेपि** नागंतुकैरथाहोभिराशौचमपनुद्यते । नच्चपातनिमित्तेनशाव स्यान्यस्यशोधनमिति ॥ एवंनवपक्षाः ॥ यदातुन्यहाद्यल्पाशौचमध्येसजा तीयंविजातीयंवादीर्घकालमुत्तरंतदाप्युत्तरंपूर्णकार्यम् ॥ नपूर्वेणशुद्धिः ॥ स्वल्पाशौचस्यमध्येतुदीर्घाशौचंभवेद्यदि । नपूर्वेणविशुद्धिःस्यात् स्वकाले नैवशुध्यतीत्युशनसोक्तेः ॥ तेनन्यहादिशावमध्येदशाहादिसूतकेपिनपुर्वे णशुद्धिरित्यपरार्कः ॥ शावनिमित्तमस्पृश्यत्वंचभवत्येव **शुद्धिविवेकेतु** शा वेनशुध्यतेसूतिरितिप्रागुक्तेस्तत्राप्युत्तराशौचनिवृत्तिरुक्ता तन्न ॥ उत्तर स्यकालाधिक्येनबलवत्त्वात् **माधवीयेयमोपि** अद्यवृद्धिमदाशौचंपश्चिमे नसमापयेत् । यथात्रिरात्रेप्रक्रांतेदशाहंप्रविशेद्यदि ॥ आशौचंपुनरागच्छेत्त त्समाप्यविशुध्यति **हारीतोपि** गुरुणालघुशुध्येत्तुलघुनानैवतद्भुर्विति गुरुत्वंलघुत्वंचकालकृतमेव पूर्वानुरोधात् ॥ एतच्चहरदत्तेनस्पष्टमुक्तम् ॥ मिताक्षरायामप्येवम् यत्तु आद्यानांयौगपद्येतुज्ञेयाशुद्धिर्गरीयसी । मरणोत्प त्तियोगेतुगरीयोमरणंभवेदितिहारीतकौर्मादितत्रास्पृश्यत्वाभिप्रायंस्यावश्य गुरुत्वंज्ञेयम् **क्वचिदल्पकालेनापिदीर्घकालाशौचनिवृत्तिमाहदेवलः** परतःपरतोशुद्धिरघवृद्धौविधीयते ॥ स्याच्चेत्पंचतमादह्नःपूर्वेणैवात्रशिष्यते॥ अस्यार्थः । अद्यवृद्धौदीर्घाशौचेपरतोशुद्धिःपरमाशौचम् ॥ यदिपूर्वाशौचमु त्तरस्यपंचमदिनात्परतोनुवर्ततेतदापूर्वेणैवशुद्धिः ॥ पूर्वस्योत्तराशौचार्धाधि ककालव्यापित्वेपूर्वशेषाच्छुद्धिरित्यर्थः ॥ यथाषष्ठमासेगर्भपातनिमित्तषड हाशौचमध्येदशाहपातेपूर्वेणोत्तरानिवृत्तिः ॥ यथावान्यहमध्येस्रावपातानिमि त्तचतुरहपंचाहयोरितिकश्चित् तन्न दशाहावधिपूर्वशेषशुद्ध्यावैदिकवा क्यविरोधात् ॥ षष्ठादिदिनेपूर्णाशौचमंत्यरात्रौतु द्व्यहइत्यनौचित्याच्च ॥

अस्मद्गुरवस्तुपंचतमादह्नआशौचंततोनूनंत्र्यहादिचेत्स्याद'स्मिन्विषयेपूर्वेणै वाशुद्धिःशिष्यते ॥ दशाहादिरात्रिशेषेत्र्यहादिपातेत्र्यहाद्यल्पाशौचानांपर स्परंरात्रिशेषेसंपातेच न द्व्यहादिवृद्धिरित्यर्थमाहुः **क्वचित्पूर्वशेषेणशुद्धे रपवादमाहगौतमः** रात्रिशेषेसतिद्वाभ्यां प्रभातेतिस्मृभिरिति ॥ प्रभातेत्य यामे रात्रिशेषेतुद्व्यहाच्छुद्धिर्यामशेषेशुचिरूयहादितिशातातपोक्तेः ॥ इ दंशावांतेसूतकपातेसजातीयेवातुल्यम् ॥ अत्रकेचित् ॥ रात्रिशब्दोऽहो रात्रपरः ॥ अहःशेषेद्वाभ्यांप्रभातिस्मृभिरितिशंखलिखितोक्तेः ॥ अथयदिद शरात्राःसन्निपतेयुराद्यंदशरात्रमाशौचमानवमाद्दिवसादतऊर्ध्वंद्विरात्रेणव्यु ष्टायांत्रिरात्रेणेतिबौधायनोक्तेः ॥ पुनःपातेदशाहात्प्राक्पूर्वेणसहगच्छति । दशमेह्निपतेद्यस्याहर्द्वयात्सविशुध्यतीति ॥ प्रभातेतुत्रिरात्रेणदशरात्रेष्वयं विधिरितिदेवलोक्तेश्च ॥ नवमदशमशब्दौचोपांत्यांत्यदिनपरौ ॥ तेनक्षत्रिया दावपितथेत्याहुः ॥ माधवीयेप्येवम् ॥ **अन्येत्वाहुः** अन्तर्दशाहेस्यातांचेत्पु नर्मरणजन्मनी । तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशमिति ॥ मनुपरा शराद्यैर्दशमदिनेनोत्तरस्यशुद्धेरुक्तत्वाद्विरोधःस्पष्टएव ॥ विरोधेच यद्वै किंचन्मनुरवदत्तत्तद्भेषजम् । कलौपाराशरस्मृतिरित्यनेनपूर्ववचसांबाधःअ तएववाचस्पतिनातेषामनाकरत्वमुक्तम् ॥ साकरत्वेपिजातिमात्रविप्रादिविष यंदेशांतरविषयंवायुगान्तरविषयंवास्तु ॥ तेनगौतमीयेरात्रिशब्दोनाहोरात्र परः ॥ रात्रिमात्रावशिष्टे इतिमिताक्षरोक्तेश्च ॥ नकुकविकृतिरिवान्यथाव्या ख्यायुक्ता **माधवस्तु** अनिर्गतदशाहमितिपूर्वस्वग्रन्थविरोधादुपेक्ष्यइति **अस्मत्पितृचरणास्तुबौधायनीये** आनवमाद्दिवसादितिद्वितीयाशौचस्यन वमंदिनंप्रथमस्यदशममेवाहः द्व्यहादिवृद्धेः पूर्वशेषापवादत्वात्तस्यच न्यायतोद्वितीयदिनादेवप्रवृत्तेः ॥ अतऊर्ध्वमितिदशमरात्रिपरम् ॥ शंखालि खितोक्तौदेवलोक्तौचाहःशेषेदशमेह्निचातीतेरात्रौपतेदित्यर्थः ॥ दशम्यांपि तानामकुर्य्यादितिवत् ॥ तेननमन्वाद्यैर्विरोधोनापिमिताक्षराद्यैरित्याहुः ॥ अ परार्केनिर्णयामृतस्वरसोप्येवम् **यत्तुतत्रैवब्राह्मे** आद्यम्भागद्वयंयावत्सूतक

स्यतुसूतके । द्वितीयेपतितेत्वाद्यात्सूतकाच्छुद्धिरिष्यते ॥ अतऊर्ध्वंद्वितीया त्तुसूतकान्ताच्छुचिस्मृतः ॥ एवमेवविचार्यस्यान्मृतकेमृतकान्तरे । मृतकस्या न्तरेयत्रसूतकंप्रतिपद्यते ॥ सूतकस्यान्तरेवाथ मृतकंयत्रविद्यते ॥ मृतकान्ते भवेत्तत्र शुद्धिर्वर्णेषुसर्वशइति ॥ अस्यार्थस्तत्रैवोक्तः ॥ पूर्वाशौचचरमाहो रात्रस्यदिनरूपेआद्यभागद्वयेऽन्याशौचपातेपूर्वेणशुद्धिः ॥ भागद्वयोर्ध्वंरात्रौ सूतकान्तरेद्वितीयात्पूर्वभिन्नात्सूतकांताद्यहादिरूपाच्छुद्धिरिति ॥ अपरा र्केत्वाशौचकालंत्रिधाविभज्यनिर्गुणविषयत्वेनेदमुक्तम् ॥ अस्यवचनस्यनि र्मूलत्वोक्तिरज्ञोक्तिरेव ॥ अतःपूर्वाशौचान्त्यरात्रामन्याशौचेहोरात्रद्वयम धिकंरात्रेरंत्ययामेतुदिनत्रयमिति भट्टचरणोपदिष्टःपन्थाः ॥ एतत्सम्पूर्णाशौ चसम्पातेएव ॥ रात्रिशेषेत्रिरात्रादिसम्पातेतुपूर्वशेषेणैवशुद्धिः ॥ द्विरात्रादि वृद्धेः पूर्ववाक्यैर्दशाहविषयत्वादपवादाभावे शेषशुद्धेरेवसामान्यतःप्रवृत्तेः॥ षडशीतौतुदशाहान्तेत्र्यहपातेपिद्वित्रिदिनवृद्धिरुक्ता ॥ रात्रिशेषेयदाशौचं पूर्वानधिकमापतेत् । ऊर्ध्वंदिनद्वयंपूर्वाद्यामशेषेदिनत्रयमिति ॥ अनधिकं समंन्यूनंवातत्तुच्छम् ॥ निर्म्मूलत्वादन्ते पक्षिण्यादिपातेपिद्विरात्रादिवृ त्ध्यापत्तेश्च ॥ पूर्व्वाशौचांतर्वर्धितद्वित्रिदिनमध्येऽधिकाशौचांतरपातेतुवर्धि तस्याल्पत्वादधिकेनैवशुद्धिः ॥ नचवर्धितस्यपूर्वशेषत्वंशंकनीयम् ॥रात्रिशे षपूर्वशेषशुत्थ्यपवादेनौमित्तिकावृत्तिन्यायोज्जीवनात् ॥ अपवादाभावेउत्स र्गस्यप्राप्तेः **अपवादांतरमाहशंखः** मातर्यग्रेप्रमीतायामशुद्धौम्रियतेपिता । पितुःशेषेणशुद्धिस्यान्मातुःकुर्यात्तु पक्षिणीम् ॥ पादत्रयंस्पष्टम् ॥ तुर्यस्यत्व यमर्थः ॥ पित्राशौचमध्येमातृमृतौपित्राशौचान्तेमातुःपक्षिणीमधिकांकुर्यादि ति ॥ अत्राशुद्धावित्युक्तेरात्महादेःपितुराशौचाभावान्मातृमरणेनपक्षिणी ॥ किन्तुपूर्णमेवाशौचम् ॥ इयंचपक्षिणीतृतीयादिदिनपरा ॥ नाद्यदिनद्वये ॥ प्रतिनिमित्तनैमित्तिकावृत्तिन्यायापवादपूर्वशेषापवादत्वादितिपितृचरणाः ॥ सपिण्डाद्याशौचेनमातापित्रोराशौचापगमोनास्त्येव ॥ एवंभर्तुरपि ॥ इयंच पक्षिणीदशमदिनात्पूर्वंमातृमरणेज्ञेया ॥ दशम्यांरात्रौतत्प्रभातेवामातृमरणे

द्व्यहत्र्यहसमुच्चितापक्षिणीतिकश्चित् तन्न संख्यांतरोपजननापत्त्यात्र्य हादिश्रुतिबाधापत्तेः ॥ अतएवैकादेयाषट्देयाइत्यादौ श्रुतसंख्याबाधापत्तेःस मुच्चयोनिरस्तोद्वादशे ॥ गुरुणिलघोरंतर्गतेः ॥ गुरुणालघुशुत्ध्येदित्युक्तेश्च ॥ मातुरन्वारोहणेतुनपक्षिणी ॥ यदानारीविशेदग्निंप्रियस्याप्रियवांछया । तदा शौचंविधातव्यंभर्त्राशौचक्रमेणहीति पृथ्वीचन्द्रोदयेलघुहारीतोक्तेः **तत्रैव षडशीतिमतेपि** मृतंप्रतिमनुव्रज्य पत्नीचेदनलंगता । नतत्रपक्षिणीका र्या पैतृकादेवशुत्ध्यति ॥ पुत्रोन्योवाग्निदस्तस्यास्तावदेवाशुचिस्तयोः । नव श्राद्धञ्चपिण्डंचयुगपत्तुसमापयेत् ॥ गृहीताशौचानांपुत्राणांपितुःसंस्कारेमा तुःसपिंडस्यवामरणेनायंनिर्णयः ॥ अतिक्रान्तकालाद्विद्यमाननिमित्तस्यबल वत्त्वात् ॥ द्वादशवर्षोत्तरंसंस्काराशौचमध्येसपिण्डमरणेप्येवम् **यत्तुअपरा र्केब्राह्मे** ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी । त्र्यहाशौचेतुनिर्वृत्तेश्रा द्धंप्राप्नोतिशास्त्रवदितितद्भर्तुराशौचोत्तरमन्वारोहणेत्रिरात्राशौचपरमिति पृ थ्वीचन्द्रः॥ब्राह्मणादेःक्षत्रियाद्यनुगमनेल्पाशौचपरमित्यपरार्कः**शुद्धितत्त्वा दयोगौडास्तु** भर्तुराशौचोत्तरमन्वारोहणेत्रिरात्रम् ॥ सहगमनेतुसम्पूर्णम् ॥ युद्धहतस्यसद्यःशौचेन्वारोहणेब्राह्मोक्तेस्त्रिरात्रत्वात् ॥ भर्तुरपित्र्यहेणपिण्ड दानम् ॥ एकचितौतुसद्यःशौचमित्याहुः ॥ अन्यत्प्रागुक्तम् ॥ पूर्वशेषेणशु द्धेरपवादांतरमुक्तंषडशीत्याम् ॥ पूर्वाशौचेनयाशुद्धिः सूतकेमृतकेचसा । सू तिकामग्निदंहित्वा प्रेतस्यचसुतानपि **निर्णयामृतेस्मृतिसंग्रहेपि** इयंविशु द्धिरुदितासूतिकामग्निदम्विना ॥ इदंमूल्येनदाहकरणेमातुलादिसम्बन्धेन दाहमात्रकरणेतुत्रिरात्रमेवेत्युक्तंप्राक् **वृद्धात्रिः** सूतकात्द्विगुणंशावं शावा त्द्विगुणमार्तवम् ॥ आर्तवात्द्विगुणासूतिस्ततोपिशवदाहकः ॥ तथाशौच संपातेपिनशावजननिमित्तकार्यप्रतिबन्धः ॥ आशौचेतुसमुत्पन्ने पुत्रजन्म यदाभवेत् । कर्तुस्तात्कालिकीशुद्धिः पूर्वाशौचेनशुत्ध्यतीति प्रजापतिस्मृतेः **आशौचेतुद्विविधेपिशातातपः** अन्तर्दाहेचजननात्पश्चात्स्यान्मरणंयदि । प्रेतमुद्दिश्यकर्तव्यं पिण्डदानंयथाविधि ॥ प्रारब्धेप्रेतपिण्डेतु मध्येचेज्जनन

म्भवेत् ॥ तथैवाशौचपिण्डांस्तुशेषान्दद्याद्यथाविधि ॥ मातुःपक्षिणी ॥ म ध्येपितुरेकादशाहंकुर्यात् ॥ आद्यंश्राद्धमशुद्धोपिकुर्यादेकादशेहनीइतिस्मृ तेः ॥ केचित्त्विदंक्षत्रियादिपरम् ॥ विप्रादेस्त्वाशौचांतरएकादशाहश्राद्धंने त्याहुः **अतएवविज्ञानेश्वरेण** दशमंपिण्डमुत्सृज्यरात्रिशेषेशुचिर्भवेदितिशु चित्वंमहैकोद्दिष्टांगविप्रनिमंत्रणपरमितिवदतातत्रशुद्धेरंगत्वंदर्शितम् ॥ ए वंवृषोत्सर्गशय्यादानादावपिदेवयाज्ञिकेनत्वाशौचांतरेपिभवेत्युक्तम् ॥ **अ थाशौचापवादः** ॥ सचपञ्चधा ॥ कतृतःद्रव्यतःमृतदोषतःविधानाच्च ॥ आ द्योब्रह्मचारीइत्यादिषु नैष्ठिकानांवनस्थानां यतीनांब्रह्मचारिणां ॥ नाशौ चंकीर्तितंसद्भिःपतितेचतथामृतइतिकौर्मोक्तेः ॥ तुर्यपादेशावेवापितथैवचेति देवलपाठः ॥ आशौचमन्त्यकर्म्मोपलक्षणम् ॥ ब्रह्मचारीनकुर्वीत शववाहा दिकःक्रियाः । यदिकुर्य्याच्चरेत्कृच्छ्रम्पुनः संस्कारमेवचेतिदेवलोक्तेः ॥ एत त्पित्राद्यतिरिक्तविषयम् ॥ आचार्यस्वमुपाध्यायंमातरंपितरंगुरुम् । निर्हृत्य तुव्रतीप्रेतंनव्रतेनवियुज्यतइतिमनूक्तेः **हारीतः** आचार्यस्वमुपाध्यायंपितरं मातरंगुरुम् । निर्हृत्यतुव्रतीप्रेतंनव्रतेनवियुज्यते ॥ मातापित्रोस्तुयत्प्रोक्तंव्रत चारीतुपुत्रकः । व्रतस्थोपिहिकुर्वीतपिंडदानोदकक्रियाम् ॥ भवत्यशौचंनैवा स्यनवाग्निस्तस्यलुप्यते । स्वाध्यायंचप्रकुर्व्वीतपूर्ववद्विधिदर्शितम् **संवर्तः** अन्यगोत्रोपसंबंधःप्रेतस्याग्निंददातियः । पिंडंचोदकदानंचसदशाहंसमाचरे त् ॥ निर्हरणमंत्यकर्मपरम् ॥ एवंमातामहस्य यथाव्रतस्थोपिसुतःपितुःकुर्या त्क्रियांनृप । तथामातामहस्यापिदौहित्रःकर्तुमर्हतीत्यपरार्केभविष्योक्तेः ॥ मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकम् ॥ कुर्वन्मातामहस्यापिव्रतीनभ्रश्य तेव्रतादितिकालादर्शाच्च ॥तत्रांत्यकर्मनिमित्तमस्पृश्यत्वंदशाहमस्त्येव॥सगो त्रोवासगोत्रोवायोग्निंदद्यात्सखेनरः । सोपिकुर्यान्नवश्राद्धंशुद्ध्येत्तुदशमेहनीति दिवोदासोक्तवचनात् ॥ अतएवब्रह्मचारिणःशवकर्मिणोव्रतान्निवृत्तिरन्यत्रमा तापित्रोर्गुरोश्चेतिगौतमीयेव्रतनिवृत्तेरेवपर्युदासोनाशौचस्य ॥ संध्यादिकर्मलो पस्तुनास्ति ॥ नत्यजेत्सूतकेकर्मब्रह्मचारीस्वकंक्वचिदितिछंदोगपरिशिष्टात् ॥

पित्रोर्गुरोर्विपत्तौतुब्रह्मचार्यपियःसुतः। सुव्रतश्चापिकुर्वीतअग्निपिंडोदकक्रियाम्॥ तेनाशौचंनकर्तव्यंसंध्याचैवनलुप्यते। अग्निकार्यंचकर्तव्यंसायंप्रातश्चनित्यशइतिचंद्रिकायांसंवर्तोक्तेश्च॥ अत्रकर्मानधिकाररूपाशौचनिषेधएव **अपरार्कमाधवादयस्तु** एकाहमाशौचमाहुःआचार्यंवाप्युपाध्यायंगुरुंवापितरंचवा॥मातरंवास्वयंदग्ध्वाव्रतस्थस्तत्रभोजनम्॥ कृत्वापततिनोतस्मात्प्रेतान्नंतत्रभक्षयेत्अन्यत्रभोजनंकुर्यान्नचतैःसहसंवसेत्॥ एकाहमशुचिर्भूत्वाद्वितीयेहनिशुध्यतीतिब्राह्मोक्तेः॥ तदन्नभोजनेतुप्रायश्चित्तंपुनरुपनयनमाशौचंच॥ दिवोदासादयस्तुब्राह्मोक्तेःप्रथमेह्निसंध्यादिलोपः॥ ब्रह्मचारीयदाकुर्यात्पिंडनिर्वपणंपितुः। तावत्कालमशौचंस्यात्पुनःस्नात्वाविशुद्ध्यतीतिप्रजापतिवचनात्॥ द्वितीयाहादौपिंडदानकालेएवास्पृश्यत्वमात्रंनान्यदेत्याहुः॥ दशाहमस्पृश्यत्वेपिकर्मांगस्नानविधानार्थमेतादितियुक्तम्॥ अंत्यकर्माकरणेतुब्रह्मचारिणःपित्रादिमरणेप्याशौचाभावएव॥ सोपिब्रह्मचार्यकालएव॥ समावर्तनोत्तरंतुपूर्वमृतानांत्र्यहाशौचंभवत्येव॥ आदिष्टीनोदकंकुर्यादाव्रतस्यसमापनात्। समाप्तेतूदकंदत्वा त्रिरात्रमशुचिर्भवेदितिमनूक्तेः॥ तत्रापिविकल्पः॥ पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित्। आशौचंकर्मणोंतेस्यात्त्र्यहंवाब्रह्मचारिणामितिछंदोगपरिशिष्टात्॥ तथाकृतजीवच्छ्राद्धेनकिमप्याशौचंनकार्यमितिहेमाद्रिः **शुद्धितत्त्वेकौर्मे** सद्यः शौचंसमाख्यातंदुर्भिक्षेचाप्युपद्रवे। डिंबाहवहतानांचविद्युतापार्थिवैर्द्विजः॥ उपद्रवेत्यंतमरके॥ उपसर्गमृतेचैवसद्यःशौचंविधीयतइतिपराशरोक्तेः॥ उपसर्गोत्यंतमरकइतिशूलपाण्यनिरुद्धभट्टादयः **याज्ञवल्क्योपि** आपद्यपिचकष्टायांसद्यःशौचंविधीयतइतिमरणसमयेपिनाशौचम् **तथाचशुद्धिरत्नाकरेदक्षः** स्वस्थकालेत्विदंसर्वंसूतकंपरिकीर्तितम्। आपद्गतस्यसर्वस्यसूतकेपिनसूतकम्॥ अतःसतिवैराग्येसंन्यासोप्यातुरस्यभवतीतिकेचित् **अथकर्मतःत्रिंशच्छ्लोक्यां** तत्तत्कार्येषुसत्रिव्रतिनृपनृपवद्दीक्षितार्त्विक्स्वदेशभ्रंशापत्स्वप्यनेकश्रुतिपठनभिषक्कारुशिल्पातुराणाम्॥संप्रारब्धेषुदानोपनयनयजनश्राद्धयुद्धप्र

तिष्ठाचूडातीर्थार्थयात्राजपपरिणयनाद्युत्सवेष्वेतदर्थे ॥ नाशौचमितिशेषः ॥ सत्रीअन्नसत्रवान् ॥ मुख्यसत्रस्यदीक्षितपदात्सिद्धेः ॥ व्रतीअनंतव्रतादिनियमवान् ॥ नव्रतिनांव्रतेइतिविष्णूक्तेः **प्रचेताः** कारवःशिल्पिनोवैद्यदासीदासास्तथैवच । राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताः ॥ कारवःसूपकाराद्याः ॥ शिल्पिनश्चैलनिर्णेजकाद्याः ॥ आतुरस्यव्याधिनाशार्थेदानादौतुलादानादेः ॥ प्रारंभोनांदीश्राद्धंसंकल्पोवा ॥ यजनंतडागोत्सर्गकोटिहोमादिः **लघुविष्णुः** व्रतयज्ञविवाहेषुश्राद्धेहोमेऽर्चनेजपे ॥ आरब्धेसूतकंनस्यादनारब्धतुसूतकम् ॥ प्रारम्भोवरणंयज्ञेसंकल्पोव्रतसत्रयोः । नांदीश्राद्धंविवाहादौश्राद्धेपाकपरिक्रियेति ॥ पाकस्यपरिसमंतात्क्रिया ॥ पाकप्रोक्षणमितिशुद्धिप्रदीपस्तन्मंदं ॥ रूढेर्योगाद्बलवत्त्वात् ॥ तीर्थेति आशौचेआकस्मिकतीर्थप्राप्तौविवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि । नतत्रसूतकंतद्वत्कर्मयज्ञादिकारयेदितिपैठीनसिस्मृतेः ॥ अत्रविशेषःप्रागुक्तः ॥ जपःपुरश्चरणादिःस्तोत्रपाठः ॥ अविच्छेदेनसंकल्पितहरिवंशश्रवणादिश्च **अतएवोक्तंब्राह्मे** गृहीतनियमस्यापिनस्यादन्यस्यकस्यचिदिति ॥ एवंदेवपूजादि **मदनपारिजाते यमोपि** शिवविष्णवर्चनंदीक्षायस्यचाग्निपरिग्रहः । श्रौतकर्माणिकुर्वीतस्नातःशुद्धिमवाप्नुयात् **गौडशुद्धितत्त्वेमंत्रमुक्तावल्यां** जपोदेवार्चनविधिःकार्यादीक्षान्वितैर्नरैः । नास्तिपापंयतस्तेषांसूतकंवायतात्मनाम् **राघवभट्टीयेनारदः** अथसूतकिनःपूजांवक्ष्याम्यागमचोदिताम् । स्नात्वानित्यंचनिर्वर्त्यमानस्याक्रियायातुवै ॥ बाह्यपूजाक्रमेणैवध्यानयोगेनपूजयेत् ॥ यदिकामोनचेत्कामीनित्यंपूर्ववदाचरेत् **यत्तुनृसिंहकल्पे** सदामंत्रजपंमुक्त्वायदिस्यादशुचिर्नरः । मनसाविहितस्तत्रस्मरेन्मन्त्रंनतूच्चरेत् ॥ तन्मूत्राद्याशौचपरम् **रामार्चनचन्द्रिकायाम्** अशुचिर्वाशुचिर्वापिगच्छन्तिष्ठन्स्वपन्नपि । मंत्रैकस्मरणोविद्वान्मनसैवसदाभ्यसेत् ॥ कालनियमाभावेतुस्तोत्रहरिवंशादिहेयमेव ॥ उत्सवोरथयात्रादिः एषुनाशौचम् अयंचाशौचाभावोनन्यगतित्वेआर्तौच ज्ञेयः ॥ अत्रमूलमाकरेस्पष्टम् अत्रदीक्षितस्यअवभृथात्पूर्वमेवाशौचाभावः ॥

तदादित्वाशौचमस्त्येव ॥ तेनवैतानोपासनाःकार्याइतिवैतानत्वेप्यवभृथादि नभवत्येव **अतएवोक्तंमाधवीयेब्राह्मे** तद्वद्गृहीतदीक्षस्यत्रैविद्यस्यमहाम खे।स्नानेत्ववभृथेयावत्तावत्तस्यनसूतकमिति ॥ वैतानोपासनाःकार्याइत्यने नैवसिद्धेऋत्विजांदीक्षितानांचेतिपुनर्दीक्षितग्रहणंयजमानेस्वयंकर्तृत्वार्थस्ना नप्राप्त्यर्थवेतिविज्ञानेश्वरः ॥ वस्तुतस्तुदीक्षयासंस्कृतस्यप्रागवभृथात्कर्मप्रा प्त्यर्थदीक्षितग्रहणम्॥तेनततःपूर्वनिषेधएव।यत्तुप्रारभ्मोवरणंयज्ञेइतितद्दत्वि क्परम् **तथाचछंदोगपरिशिष्टे** नदीक्षिण्याःपरंयज्ञेनकृच्छ्रादितपश्चरन्निति ॥ शुद्धितत्त्वेप्येवम् ॥ ऋत्विजांचमधुपर्कोत्तरमाशौचाभावः ॥ गृहीतमधुप र्कस्ययजमानात्तुऋत्विजः । पश्चादशौचेपतितेनभवेदितिनिश्चयइतिब्राह्मा त् ॥ **अतएवराभांडारः** चतुर्णांवरणपक्षेऽन्येषामाशौचेऽन्यआगमयितव्यइ त्याहएवंस्मार्तेपि ॥ तुलाकोटिहोमादौमधुपर्केसतिदोषाभावोज्ञेयः ॥ यत्तुप्रार म्भोवरणंयज्ञइतितत्रापिमधुपर्कोतंज्ञेयम् ॥ तेनाधानेष्टिपशुबन्धादौतदभा वादन्येभवंतीतिसिद्धम् **अपवादांतरमाहयाज्ञवल्क्यः** वैतानोपासनाःका र्याःक्रियाश्चश्रुतिचोदनात् ॥ तत्रत्यागमात्रेस्नानोत्तरंस्वयंकर्तृत्वम् ॥ श्रौतेक र्मणितुकालंस्नातःशुद्धिमवाप्नुयादितिस्मृतेः ॥ त्यागातिरिक्तेतुश्रौतेस्मार्तेचा न्यस्यैवकर्तृत्वम् ॥ सूतकेमृतकेचैवअशक्तौश्राद्धभोजने । प्रवासादिनिमित्ते षुहावयेन्नतुहापयेदितिबृहस्पत्युक्तेः ॥ नित्यानिनिवर्तेरन्वैतानवर्ज्यम् ॥ शा लाग्नौचैकेऽन्यएतानिकुर्युरितिपैठीनसिस्मृतेश्चेतिविज्ञानेश्वरः ॥ एकग्रहणंपू जार्थं ॥ तेनस्मार्तकार्यमेवेतिहारलतायाम् ॥ दाक्षिणात्यास्तुविकल्पमाहुः **अपरार्कादिनिबन्धास्तु** श्रौतंसर्वंस्वयंकार्यं ॥ स्मार्तेतुत्यागातिरिक्तेऽन्यस्यै वकर्तृत्वम् **त्यागमात्रेतुस्वस्य** कर्मवैतानिकंकार्यस्नानोपस्पर्शवान्स्वयमि तिहारीतोक्तेः ॥ दर्शंचपूर्णमासंचकर्मवैतानिकंचयत् । सूतकेपित्यजेन्मोहा त्प्रायश्चित्तीपतेत्द्विजइति मरीच्युक्तेः ॥ जन्महान्योर्वितानस्थकर्म त्यागोनविद्यते । शालाग्नौकेवलोहोमःकार्यएवान्यगोत्रजैरितिजाबालोक्तेश्चे त्याहुः ॥ आशार्कैप्येवम् ॥ याज्ञिकाअप्येवम् ॥ सूतकेतुसमुत्पन्नेस्मार्तक

र्मकथंभवेत् । पिण्डयज्ञंचरुंहोममसगोत्रेणकारयेदितिजातूकर्ण्योक्तेश्च ॥ च रुःस्मार्तस्थालीपाकः ॥ श्रवणाकर्मादिश्चेतिविज्ञानेश्वरः प्रारब्धंतुसपिंडेना पिकार्यम् ॥ नचतत्कर्मकुर्वाणः सनाभ्योप्यशुचिर्भवेदितिमनूक्तेः छन्दोग परिशिष्टेपि होमःश्रौतेतुकर्तव्यः शुष्कान्नेनफलेनवा । अकृतंहावयेत्स्मा र्तेतदभावेकृताकृतम् ॥ अकृतंव्रीह्यादि ॥ कृताकृतंतंदुलादि ॥ स्मार्तहोमा दौतुविकल्पोज्ञेयः ॥ शालाग्नौचैकइतिप्रागुक्तेः ॥ यदाकरणंतदान्यद्वारा अत्रेदंतत्त्वम् ॥ येषांबह्वृचादीनांद्वादशरात्रमहोमेपि नाग्निविच्छेदस्तैर्न कार्यम् ॥ तैत्तिरीयाद्यैःकार्यम् ॥ त्रिरात्रमहूयमानोग्निर्लौकिकःसंपद्यतेइति सुदर्शनभाष्येवचनात् ॥ समारूढेत्वग्नौतेनापिनकार्यम् ॥ किंतुपुनराधानमे व ॥ समारोपप्रत्यवरोहयोराशौचापवादाभावादनन्यकर्तृत्वाच्च ॥ अन्यथा पुनराधानमपिस्यात् यत्त्वाश्वलायनः तौचापिसूतकेशावपर्वणीष्टिंमहापदि। पुष्पवत्यांचभार्यायांनकुर्यात्तांकदाचन॥स्मार्ताग्निःसूतकेशावेस्वयंनजुहुयात् द्विजः । श्रौताग्निस्तुसकृच्छ्रुत्वासमाप्तेवास्वयंहुनेदितितदपिसमारूढपरम् तदाहसएव स्मार्ताग्निरात्मनोन्येषामभावेसूतकादिषु । समारोप्यतदंतेषुवि हृत्यजुहुयात्स्वयमिति तथाचमनुः प्रत्यूहेन्नाग्निषुक्रियाइतिवैश्वदेवस्वत्वग्नि साध्यत्वेपिवचनान्निवृत्तिः ॥ विप्रोदशाहमासीतवैश्वदेवविवर्जितइतिसंव र्तोक्तेः यद्यपि पंचयज्ञविधानंतुनकुर्यान्मृतजन्मनोरितितेनैवोक्तेः पूर्वनि षेधोव्यर्थस्तथाप्यापस्तंबादीनांवैश्वदेवस्यपंचयज्ञभिन्नत्वात्पृथङ्निषेधः ॥ हरदत्तस्त्वाशौचेपिबह्वृचैर्वैश्वदेवःकार्यः ॥ तस्यद्यावनध्यायौयदात्माशुचि र्यद्देशइतिब्रह्मयज्ञस्यैवाशौचेविशिष्यनिषेधात् संध्यादीनामप्यपवादमा हापरार्केपुलस्त्यःसंध्यामिष्टिंचरुंहोमंयावज्जीवंसमाचरेत्। नत्यजेत्सूतकेवा पित्यजन्गच्छेदधोद्विजः ॥ सूतकेमृतकेचैव संध्याकर्मसमाचरेत् । मनसो च्चारयेन्मंत्रान्प्राणायाममृतेद्विजः यत्तुचंद्रिकायांजाबालः संध्या पंचमहा यज्ञानैत्यकंस्मृतिकर्मच । तन्मध्येहापयेत्तेषांदशाहांतेपुनःक्रियेति यच्चसंव र्तः सूतकेकर्मणांत्यागःसंध्यादीनांविधीयते यच्चविष्णुपुराणम् सर्वकालमु

पासातुसंध्ययोःपार्थिवेष्यते । अन्यत्रसूतकाशौचविभ्रमातुरभीतितइतितत्पू र्णसंध्यापरम्अर्घ्यांतामानसीसंध्याकुशवारिविवर्जितेतिशुद्धिदीपेच्यवनोक्तेः पैठीनसिस्त्वर्घ्येमंत्रोच्चारणमाह ॥ सूतकेसावित्र्यांजलिंप्रक्षिप्यसूर्यंध्यायन्नम स्कुर्यात् **प्रयोगपारिजातेभारद्वाजोपि** सूतकेमृतकेकुर्यात्प्राणायाममंत्र कम् ॥ तथामार्जनमंत्रास्तुमनसोच्चार्यमार्जयेत् ॥ गायत्रींसम्यगुच्चार्यसूर्या यार्घ्यानिवेदयेत् । मार्जनंतुनवाकार्यमुपस्थानंनचैवहि **ग्रहणेश्राद्धादावप्या शौचापवादमाहव्याघ्रः** स्मार्तकर्मपरित्यागोराहोरन्यत्रसूतकेइति **लैंगेपि** सूतकेमृतकेचैवनदोषोराहुदर्शनेतावदेवभवेच्छुद्धिर्यावन्मुक्तिर्नदृश्यते **प्रयो गपारिजातेबृहस्पति** :कन्याविवाहेसंक्रान्तौसूतकंनकदाचन **वृद्धशातात पः** यदाभोजनकालेतु अशुचिर्भवतिद्विजःभूमौनिक्षिप्यतंग्रासंस्नात्वाविप्रोवि शुत्ध्यतिभक्षयित्वातुतंग्रासमहोरात्रेणशुत्ध्यतिअभित्वासर्वमेवान्नंत्रिरात्रेणवि शुत्ध्यति।इदमविशेषात्सूतकादिपरमपीतिशुद्धितत्त्वेशूलपाणौचअथद्रव्यतः **मरीचिः**लवणेमधुमांसेच पुष्पमूलफलेषुच । शाककाष्ठतृणेष्वप्सुदधिसर्पिःप यःसुच ॥ तिलौषधाजिनेचैवपक्वापक्वेस्वयंग्रहः ॥ पुण्येषुचैवसर्वेषुनाशौचेमृ तसूतके । स्वयमेवस्वाम्यनुज्ञयाग्राह्यंनतद्धस्तादित्यर्थः ॥ क्रयेतुतद्धस्ता दपिनदोषः ॥ पक्वंलड्डुकादि ॥ अपक्वंतंडुलादि ॥ एतदन्नसत्रपरम् ॥ अन्न सत्रेप्रवृत्तानामामभन्नमगार्हितम् । भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुव्रतीभवेदि त्यंगिरसोक्तेः ॥ पक्वान्नमोदनादि ॥ नतुभक्ष्यम् **षट्त्रिंशन्मते** उभाभ्या मपरिज्ञातेसूतकंनैवदोषकृत्एकेनापिपरिज्ञातेभोक्तुर्दोषमुपावहेत् ॥ विवाहो त्सवयज्ञेषुत्वंतरामृतसूतके । परैरन्नंप्रदातव्यंभोक्तव्यंचद्विजोत्तमैः ॥ भुंजा नेषुतुविप्रेषुत्वंतरामृतसूतके । अन्यगेहोदकाचान्तःसर्वेतेशुचयःस्मृताः **बृह स्पतिः** विवाहोत्सवेत्याद्युक्त्वापूर्वसंकल्पितान्नेषुनदोषःपरिकीर्तितः **षडशी तौ** संसर्गाद्यस्यवाशौचंयस्यातिक्रांतकालता । तदीयस्यपदार्थस्यनाशौचं विद्यतेक्वचित् **शुद्धितत्त्वे** शुद्धेदित्यनुवृत्तौविष्णुः ॥ प्रोक्षणेनपुस्तकमिति **अथमृतदोषेहेमाद्रौषट्त्रिंशन्मतेकौर्मेच** व्यापादयेद्यआत्मानंस्वयमग्न्यु

दकादिभिः । विहितंतस्यनाशौचंनापिकार्योदकक्रिया ॥ शवदर्शनंयावदा शौचमस्त्येव ॥ हतानांनृपगोविप्रैरन्वक्षंचात्मघातिनामितियाज्ञवल्क्योक्तेः **शुद्धितत्त्वेकौर्मे** सद्यःशौचंसमाख्यातंशापादिमरणेतथा । आदिपदादभिचारहते **भविष्ये** स्वेच्छयामरणंविप्राच्छृंगिदंष्ट्रिसरीसृपैः । अंत्यांत्यजविषोद्बंधैरात्मनाचैवताडनैः । पाखंडमाश्रिताश्चैवमहापातकिनस्तथा ॥ स्त्रियश्च व्यभिचारिण्यआरूढपतितास्तथा ॥ नतेषांस्नानसंस्कारौनश्राद्धंनसपिंडनम् **गौतमः** प्रायोनाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छतामिति ॥ नाशौचमितिशेषः **अंगिराः** चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्चमरणंपापकर्मणाम् ॥ उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते । नोपतिष्ठतितत्सर्वमंतरिक्षेविनश्यति ॥ षट्त्रिंशन्मतेप्येवम् **ब्राह्मेपि** शृङ्गिदंष्ट्रिनखव्यालविषवह्निक्रियाजलैः ॥ व्यालोगजः ॥ सुदूरात्परिहर्तव्यःकुर्वन्क्रीडांमृतस्तुयः ॥ नागानांविप्रियंकुर्वन्हतश्चाप्यथविद्युता । निगृहीतःस्वयंराज्ञाचौर्यदोषेणकुत्रचित् । परदारान्हरंतश्चद्वेषात्तुपतिभिर्हताः ॥ असमानैश्चसंकीर्णैश्चंडालाद्यैश्चविग्रहात् ॥ कृत्वातैर्निहतास्तद्वच्चंडालादीन्समाश्रिताः ॥ शस्त्राग्निगरदाश्चैवपाखंडाः क्रूरबुद्धयः । क्रोधात्प्रायंविषंवह्निं शस्त्रमुद्बंधनंजलम् ॥ गिरिवृक्षप्रपातंचयेकुर्वंतिनराधमाः । कुशल्यजीविनोयेचसूनालंकारधारिणःमुखेभगास्तुयेकेचित्क्लीबप्रायानपुंसकाः ॥ ब्रह्मदंडहतायेचयेचापिब्राह्मणैर्हताः । महापातकिनोयेचपतितास्तेप्रकीर्तिताः ॥ पतितानांनदाहःस्यान्नांत्येष्टिर्नास्थिसंचयः । नचाश्रुपातःपिंडोवाकार्यश्राद्धादिकंक्वचित् ॥ एतानिपतितानांतुयःकरोतिविमोहितः । तस्यकृच्छ्रद्वयेनैवतस्यशुद्धिर्नचान्यथा ॥ एतद्बुद्धिपूर्वं **सर्वेषांकरणेतुमाधवीयेवसिष्ठःयआत्मत्यागिनांकुर्यात्स्नेहात्प्रेतक्रियांद्विजः।सतस्यकृच्छ्रसहितंचरेच्चांद्रायणव्रतम् ॥** अज्ञानेतुकृत्वाग्निमुदकंस्नानसंस्पर्शंवहनंकथां ॥ रज्जुच्छेदाश्रुपातंचतस्यकृच्छ्रेणशुद्ध्यतीतिज्ञेयम्प्रत्येकंबुद्धिपूर्वेएतदितिमदनपारिजातः॥ प्रत्येकंतुस्पर्शाश्रुणोर्मिताक्षरायाम्॥तच्छवंकेवलंस्पृष्टमश्रुवापतितंयदि पूर्वोक्तानामकारी

च्चेदेकरात्रमभोजनम्॥एकरात्रंतुनाश्नीयात्त्रिरात्रंबुद्धिपूर्वकमितिमाधवीयेउ त्तरार्द्धम् **अन्येतुसंवर्तः** एषामन्यतमंप्रेतंयोवहेतदहेतवा॥कटोदकक्रियांकृ त्वाकृच्छ्रंसांतपनंचरेत् ॥ अज्ञानेत्वर्धम् ॥ एतदनाहिताग्नेः ॥ आहिताग्नेः कृच्छ्रएवेतिमाधवः **मिताक्षरायां** आत्मनस्त्यागिनांनास्तिपतितानांतथाक्रि या । तेषामपितथागंगातोयेसंस्थापनंहितम् **आहिताग्नेस्तुविशेषोहेमाद्रौ भविष्ये** वैतानंप्रक्षिपेदप्सुआवसथ्यंचतुष्पथे । पात्राणितुदहेदग्नौसाग्निके पापकर्माणि **छंदोगपरिशिष्टेपि** महापातकसंयुक्तोदौरात्म्यादग्निमान्य दि । पुत्रादिःपालयेदग्नीन्युक्तआदोषसंक्षयात् ॥ प्रायश्चित्तंनकुर्याद्यः कुर्व न्वाम्रियतेयदि । गृह्यंनिर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदम् ॥ पात्राणि दद्याद्विप्रायदहेदप्स्वेववाक्षिपेत् **माधवीयेपराशरः** आहिताग्निर्मृतोविप्र श्चंडालेनात्मघातकः । दहेतब्राह्मणंविप्रोलोकाग्नौमंत्रवर्जितं ॥ प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात् । दग्ध्वास्थीनिपुनर्गृह्यक्षीरेणक्षालयेत्ततः॥ स्वेनाग्निनास्वमंत्रेणपृथगेनंपुनर्दहेत् **हेमाद्रौतु** दाहयित्वाशवंतेषांशूद्रैरवि धिपूर्वकमित्युक्तम् ॥ एतद्दर्पादिनामरणेज्ञेयम् ॥ तांस्तेप्रेत्याभिगच्छंतिये केचात्महनोजनाइतिश्रुतावात्महननेएवदोषोक्तेः ॥ प्रमादमरणे त्वाशौचा दिसर्वंभवत्येव **तदाहांगिराः** अथकश्चित्प्रमादेनम्रियेताम्युदकादिभिः । तस्याशौचंविधातव्यंकर्तव्याचोदकक्रिया **ब्राह्मेपि** प्रमादादपिनिःशंकस्त्व कस्माद्विधिचोदितः । शृङ्गिदंष्ट्रिनखिव्यालविषविद्युज्जलादिभिः । चंडालै रथवाचौरैर्निहतोवापिकुत्रचित् ॥ तस्यदाहादिकंकार्यंयस्मान्नपतितस्तुसइ ति ॥ प्रमादमरणेत्रिरात्रमाशौचमितिगौडाःशुद्धितत्त्वादयः ॥ दशाहादी तिदाक्षिणात्याः **अस्यापवादोहेमाद्रौभविष्ये** प्रमादादिच्छयावापिनकुर्या त्सर्पतोमृते । नागपूजांविनानकुर्यादित्यर्थः **बौधायनोपि** बुद्धिपूर्वात्महंनृ णांक्रियालोपोविधीयते ॥ क्रियान्त्यकर्म्म ॥ तत्रदुर्म्मरणनिमित्तंदानादिका र्य्यम् ॥ तच्चविश्वप्रकाशादौशातातपीयेच ॥ व्याघ्रेणनिहतेविप्रेविप्रकन्यां विवाहयेत् । सर्पदष्टेनागबलिर्देयःसर्पश्चकांचनः ॥ चतुर्निष्कमितंहैमंगजं

दद्याद्वजैर्हते । राज्ञाविनिहतेदद्यात्पुरुषंतुहिरण्मयं ॥ चौरेणनिहतेधेनुंवैरि णानिहतेवृषम् । वृषेणनिहतेदद्याद्यथाशक्त्यातुकांचनं ॥ शय्यामृतेप्रदात व्याशय्यातूलीसमन्विता । निष्कमात्रसुवर्णस्यविष्णुनासमधिष्टिता ॥ शौ चहीनेमृतेचैवद्विनिष्कंस्वर्णजंहरिम् । संस्कारहीनेचमृतेकुमारमुपनाययेत् । निष्कत्रयंस्वर्णमितंदद्यादश्वंहयाहते । शुनाहतेक्षेत्रपालंस्थापयेन्निजश क्तितः ॥ सूकरेणहतेदद्यान्महिषंदक्षिणान्वितं । कृमिभिश्चमृतेदद्याद्गोधूमा न्पंचखारिकाः ॥ वृक्षंवृक्षहृतेदद्यात्सौवर्णवस्त्रसंयुतंश्रृङ्गिणानिहतेदद्याद्वृषभं वस्त्रसंयुतं । शकटेनहतेदद्यात्द्रव्यंसोपस्कारान्वितम् ॥ भृगुपातमृतेचैवप्र दद्याद्धान्यपर्वतम् । अग्निनानिहतेकार्यमुदपानंस्वशक्तितः ॥ दारुणानिह तेचैवकर्तव्यासदनेसभा । शस्त्रेणनिहतेदद्यान्महिषींदक्षिणान्विताम् ॥ अ श्मनानिहतेदद्यात्सवत्सांगांपयस्विनीं ॥ विषेणचमृतेदद्यान्मेदिनींहेमनि र्मितां ॥ उद्बन्धनेनचमृतेकपिंकनकनिर्मितम् । मृतेजलेनवरुणंहैमंदद्याद्वि निष्कंजम् ॥ विषूचिकामृतेस्वादुभोजयेच्चशतंद्विजान् । घृतधेनुःप्रदातव्याकं ठान्नकवलेमृते ॥ कासरोगेणचमृतेअष्टकृच्छ्रंव्रतंचरेत् । अतिसारमृतेलक्षंगा यत्र्याःप्रयतोजपेत् ॥ शाकिन्यादिग्रहग्रस्तेजपेद्रुद्रंयथोदितम् । विद्युत्पाते ननिहतेविद्यादानंसमाचरेत् । अन्तरिक्षमृतेकार्य्यंवेदपारायणंतथा ॥ स च्छास्त्रपुस्तकंदद्यादस्पृश्यस्पर्शतोमृते । पतितेचमृतेकुर्यात्प्राजापत्यांस्तुषोड श ॥ मृतेचापत्यरहितेकृच्छ्राणांनवतिंचरेत् ॥ एवंकृतेविधानेतुविदध्यादौ र्ध्वदेहिकं ॥ तथावेधमरणेपिनदोषः **तदाहतुर्मनुवृद्धगार्ग्यौ** वृद्धःशौचमृ तेलुप्तप्रत्याख्यातभिषक्क्रियः । आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः॥ तस्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः । तृतीयेतूदकंकृत्वाचतुर्थेश्राद्धमा चरेदिति **हेमाद्रौविष्णुधर्मेपि** नरस्तुव्याधिरहितोनत्यजेदात्मनस्तनुम् ॥ असूर्यानामतेलोकाअंधेनतमसावृताः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोज नाः ॥ अरिष्टैरात्मनोज्ञात्वामृत्युकालमुपस्थितम् । व्याधितोभिषजात्यक्तः पूर्णेवायुषिचात्मनः ॥ यथायुगानुसारेणसंत्यजेदात्मनस्तनुं । तस्मिन्काले

तनुत्यागाद्यथेष्टंफलमाप्नुयात् ॥ आयुषस्तुपुराद्दृष्टंमरणंब्रह्मणस्यच नेतिगौडानामपपाठः ॥ उत्तरार्धेऽसंगतेः ॥ क्षत्रियस्यतुसंग्रामेमृतेभर्तरियोषितः **अपरार्केब्रह्मगर्भः** योजीवितुंनशक्नोतिमहाव्याध्युपपीडितः । सोम्युदकंमहायात्रांकुर्वन्नात्रनदुष्यति । अत्रोक्तवक्ष्यमाणवचोनिचयात्प्रयागातिरिक्तेऽचिकित्स्यरोगाद्युपहतानामधिकारः ॥ सोपिजीर्णवानप्रस्थस्यैवेति विज्ञानेश्वरदेवयाज्ञिकादयः ॥ अतएवमिताक्षरादौभृगुपातानशनादिकंवानप्रस्थस्यैवोक्तम् **मनुरपि** आसांमहर्षिचर्याणांत्यक्त्वान्यतमयातनुम् । वीतशोकभयोविप्रो ब्रह्मभूयायकल्पतइति ॥ तेनान्यत्रापितद्विषयतैवामूलैक्यादितिकेचित् तन्न ॥ वानप्रस्थमरणंआशौचनिषेधात् ॥ तेनग्रहस्थादिपरमेवेदं ॥ तेनयतेर्नाधिकारः काम्येऽनधिकाराच्च ॥ नैमित्तिकत्वेत्वकरणेदोषोनित्यताचस्यात् । प्रयागेत्वरोगिणांरोगिणाञ्च **यत्तु** शूद्राश्चक्षत्रियावैश्याअंत्यजाश्चतथाधमाः । एतेत्यजेयुःप्राणान्वैवर्जयित्वाद्विजंनृप ॥ पतित्वाब्राह्मणस्तत्रब्रह्महाचात्महाभवेदितितन्निर्मूलमितिभट्टाः ॥ तत्त्वंतुहेमाद्रौव्रतकांडेऽलिखनान्निर्मूलत्वंचिंत्यमेव ॥ प्रक्रमात्तुपतित्वेपिभृगुपातमात्रपरंयुक्तम् ॥ ब्राह्मणस्याप्यनुज्ञातमितिवक्ष्यमाणविरोधाच्च **यत्त्वादित्यपुराणे** अब्राह्मणोवास्वर्गादिमहाफलजिगीषया । प्रविशेज्ज्वलनंतोयंकरोत्यनशनंतथेति ॥ तत्प्रयागातिरिक्तपरमितिकेचित् ॥ हेमाद्रौत्वेतदग्रे प्रयागवटशाखाग्रादित्युक्तेर्ब्राह्मणस्यप्रयागेपिनेतिप्रतीयते **माधवीयेऽपरार्केचादित्यपुराणे** दुश्चिकित्स्यैर्महारोगैःपीडितस्तुपुमानपि । प्रविशेज्ज्वलनंदीप्तंकरोत्यनशनंतथा ॥ अगाधतोयराशिंचभृगोःपतनमेवच । गच्छेन्महापथंवापितुषारगिरीमादरात् ॥ प्रयागवटशाखाग्राद्देहत्यागंकरोतिच । स्वयंदेहविनाशस्यकालेप्राप्तेमहामतिः ॥ उत्तमान्प्राप्नुयाल्लोकानात्मघातीभवेत्कचित् ॥ महापापक्षयात्स्वर्गेदिव्यान्भोगान्समश्नुते ॥ एतेषामधिकारस्तुसर्वेषांसर्वजंतुषु ॥ नराणामथनारीणांसर्ववर्णेषुसर्वदा ॥ ईदृशंमरणंयेषांजीवतांकुत्रचिद्भवेत् । आशौचंस्यात्त्र्यहंतेषांवज्रानलहतेतथा ॥ वाराण

स्यांम्रियेद्यस्तुप्रत्याख्यातभिषक्क्रियः । काष्ठपाषाणमध्यस्थोजाह्नवीजलमध्यगः ॥ अविमुक्तोन्मुखस्तस्यकर्णमूलगतोहरः । प्रणवंतारकंब्रूतेनान्यथा कुत्राचित्कचित् ॥ हेमाद्रौचैवम् ॥ अत्रप्राप्तेकालेइत्युक्तेरप्राप्तमरणकालायाःस्त्रियाःअन्वारोहणेसम्पूर्णमेवाशौचम् ॥ पृथ्वीचन्द्रस्त्वत्रापित्र्यहमाह॥ शुद्धितत्त्वादिगौडग्रन्थेष्वप्येवम् ॥ एतच्चवृद्धादिमरणंकलौनिषिद्धम् ॥ भृग्वग्निपतनैश्चैववृद्धादिमरणंतथेति ॥ माधवेनपृथ्वीचन्द्रेणचकलिवर्ज्येषूक्तेः नचात्रयावदुक्तनिषेधः ॥ विशिष्टोद्देशेवाक्यभेदात् ॥ नचकलौवानप्रस्थाश्रमनिषेधादेवसिद्धेर्मरणनिषेधोव्यर्थइतिवाच्यम् ॥ सर्ववर्णेष्वित्यादिभिस्तद्विहितस्यापिप्राप्तेःकाम्यंभवत्येव ॥ येवैतन्वांविसृजंतीतिश्रुतेःस्मृत्यासंकोचायोगात् ॥ नचेयंस्वाभाविकमृत्युपराधीरपदोक्तेः **मात्स्यभारतादिषु** नलोकवचनात्तातनवेदवचनादपि । मतिरुत्क्रमणीयातेप्रयागमरणंप्रतीत्युक्तेः ॥ अतएवविष्णुधर्मैरोग्यादिमरणमुक्तोक्तम् ॥ यथायुगानुसारेणसंत्यजेदात्मनस्तनुमितिकाश्यामप्युक्तं **मात्स्ये** अग्निप्रवेशंयेकुर्युरविमुक्तेविधानतः प्रविशंतिमुखंतेमेनिःसंदिग्धंवरानने **हेमाद्रौविवस्वान्** सर्वेन्द्रियविमुक्तस्य स्वव्यापाराक्षमस्यच । प्रायश्चित्तमनुज्ञातमग्निपातोमहापथः ॥ धर्मार्जनासमर्थस्यकर्तुःपापांकितस्यच । ब्राह्मणस्याप्यनुज्ञातंतीर्थेप्राणविमोक्षणम् ॥ अपरार्केचैवम् ॥ सहगमनंकलौभवत्येव ॥ कलौनान्यागतिःस्त्रीणांसहानुगमनादृतइतिब्रह्मवैवर्तात् ॥ एतेनमरणांतिकप्रायश्चित्तंकाशीखण्डादौ चातुर्वर्ण्यस्य तनुत्यागविधयश्चयुगांतरपराएव **प्रयागेपित्रिस्थलीसेतौस्कांदे** यथाकथंचित्तीर्थेस्मिन्प्राणत्यागंकरोतियः । तस्यात्मघातदोषोनप्राप्नुयादीप्सितान्यपि **पाद्मेविष्णुः** देहत्यागंतथाधीराःकुर्वंतिममसन्निधौ । मत्तनुं प्रविशंत्येवनपुनर्जन्मनेनराः **कौर्मे** व्याधितोयदिवादीनःक्रुद्धोवापिभवेन्नरः । गङ्गायमुनमासाद्ययस्तुप्राणान्परित्यजेत् ॥ ईप्सितान्लभतेकामान्वदंतिमुनिपुंगवाः **तथा** यागतिर्योगयुक्तस्यसत्वस्थस्यमनीषिणः । सागतिस्त्यजतःप्राणान्गंगायमुनसंगमे **वाराहे** तत्रयोमुंचतिप्राणान्वटमूलेषुसुंदरि ।

सर्वलोकानतिक्रम्यममलोकंप्रपद्यते **तथा** अकामोवासकामोवावटमूलेषुमुंदरि ॥ शीघ्रंप्राणान्प्रमुंचेतयदीच्छेत्परमांगतिम् **तथा** पंचयोजनविस्तीर्णेप्रयागस्यतुमण्डले । व्यतीतान्पुरुषान्सप्तभविष्यांश्चचतुर्दश ॥ नरस्तारयतेसर्वान्यस्तुप्राणान्परित्यजेत् । **ब्राह्मे** ध्यात्वाविष्णुपदाम्भोजंप्रयागेविष्णुतत्परः । तनुंत्यजतिवैमाघेतस्यमुक्तिर्नसंशयः ॥ दुष्कृतोपिदुराचारोब्रह्महत्यादिपातकी । हरिंध्यात्वात्यजेद्देहंप्रायशोमुक्तिमान्भवेत् **भविष्योत्तरे** समासहस्राणितुसप्तवैजलेदशैकमग्नौपतनेचषोडश । महाहवेषष्टिरशीतिगोग्रहेअनाशकेभारतचाक्षयागतिः ॥ इतिसामान्यतोपिफलम् ॥ एवमन्येपिविधयोज्ञेयाः॥यत्तुगौडाः प्रयागादिमरणंब्राह्मणभिन्नविषयमित्याहुस्तद्दूषणंपितामहचरणैः प्रयागविधौकृतमितिनात्रोच्यते ॥ अत्रदशाहमाशौचम् ॥ त्रिरात्रस्थप्राप्तकालगोचरत्वादितिभट्टाः ॥ युक्तंतुरात्रित्रम् दिवोदासीयेप्येवम् **शुद्धितत्त्वेपिकाश्यपः** अनशनमृतानामशनिहतानामग्निजलप्रविष्टानां भृगुसंग्रामदेशांतरमृतानांजातदन्तानांचत्रिरात्रमिति ॥ एतंमरणांतप्रायश्चित्तेपि॥पूर्वोक्तश्रात्महादेर्दाहाशौचादिनिषेधस्तदानीमेव ॥ वत्सरांतेतुसर्वमौर्ध्वदेहिकंकुर्यात्॥गोब्राह्मणहतानांचपतितानांतथैवच ॥ ऊर्ध्वसंवत्सरात्कुर्यात्सर्व्वमेवौर्ध्वदेहिकमितिहेमाद्रौषट्त्रिंशन्मतात् ॥ एवंम्लेच्छीकृतानामपि गयाश्राद्धमपिकार्य्यम्॥ब्रह्महाचकृतघ्नश्चगोघातीपंचपातकी । सर्वेतेनिष्कृतिंयातिगयायांपिण्डपातनादित्यग्निपुराणात् **एवंब्राह्मेपि** क्रियतेपतितानांतुगतेसंवत्सरेक्वचित् ।देशधर्मप्रमाणत्वाद्गयाकूपेस्वबंधुभिः ॥ मार्तंडपादमूलेवाश्राद्धंहरिहरौस्मरन् ॥ सूर्यपदइत्यर्थः॥ **तत्रवर्षमध्येकृत्यमुक्तमपरार्केवायुपुराणे** शुक्लपक्षेतुद्वादश्यांकुर्यात्श्राद्धन्तुवत्सरम् । द्वादशाहनिवाकुर्याच्छुक्लेचप्रथमेहनि **छागलेयः** नारायणबलिः कार्योलोकगर्हाभयान्नरैः । तथातेषांभवेच्छौचं नान्यथेत्यब्रवीद्यमः **व्यासः** नारायणंसमुद्दिश्य शिवंवायत्प्रदीयते । तत्स्यशुद्धिकरंकर्म तद्भवेन्नैतदन्यथेति ॥ सचात्मघातादिप्रायश्चित्तंकृत्वाकार्यः **तदुक्तंहेमाद्रौषट्त्रिंशन्मते** कृत्वाचांद्रायणंपूर्वंक्रियाकार्यायथाविधि ।

नारायणबलिःकार्योलोकगर्हाभयान्नरैः ॥ पिण्डोदकक्रियाःपश्चाद्वृषोत्सर्गा दिकंचयत् । एकोद्दिष्टानिकुर्वीत सपिण्डीकरणन्तथा **दिवोदासीयेवृद्धशातातपस्तु** पतितेचमृतेशुद्धौ प्राजापत्यांस्तुषोडश. मृतेचापत्यरहितेकृच्छ्राणां नवतिञ्चरेदित्याह ॥ इदंप्रायश्चित्तार्हपित्रादिविषयम् ॥ इन्द्रियैरपरित्यक्ता येचमूढाविषादिनः ॥ घातयन्तिस्वमात्मानंचाण्डालादिहताश्चये ॥ तेषांपुत्राश्चपौत्राश्च दययासमभिप्लुताः । यथाश्राद्धंप्रतन्वन्ति विष्णुनामप्रतिष्ठितम् ॥ तथातेसंप्रवक्ष्यामिनमस्कृत्यस्वयम्भुवइतिहेमाद्रौतेनैवोक्तेः **तत्रैवबौधायनोपि** नारायणबलिं व्याख्यास्यामोऽभिशस्तपतितसुरापात्मत्यागिनां ब्राह्मणहतानाञ्चद्वादशवर्षाणित्रीणिवा कुर्व्वीतेति **गृह्यपरिशिष्टेतु** चाण्डालादित्याद्युक्त्वा दग्ध्वाशरीरंप्रेतस्य संस्थाप्यास्थीनियत्नतः । प्रायश्चित्तन्तुकर्तव्यं पुत्रैश्चांद्रायणत्रयमित्युक्तम् **मदनरत्नेब्राह्मे** प्रमादादपिनिःशङ्कस्त्वकस्माद्विधिचोदितः । चाण्डालैर्ब्राह्मणैश्चौरैर्निहतोयत्रकुत्रचित् ॥ तस्यदाहादिकंकार्ययस्मान्नपतितस्तुसः । चांद्रायणंतप्तकृच्छ्रद्वयंतस्यविशुद्धये ॥ यद्वाकृच्छ्रान्पञ्चदशकृत्वातुविधिनादहेत् । बुद्धिपूर्वंमृतानांतुत्रिंशत्कृच्छ्रंसमाचरेदित्युक्तम् **स्मृतिरत्नावल्यान्तु** द्विगुणंप्रायश्चित्तंकृत्वार्वागप्यब्दात्सर्व्वंकार्यमित्युक्तं ॥ आत्मनोघातशुध्यर्थंचरेच्चांद्रायणद्वयं । तप्तकृच्छ्रचतुष्कंच त्रिंशत्कृच्छ्राणिवा पुनः ॥ अर्वाक्संवत्सरात्कुर्याद्दहनादियथोदितम् । कृत्वानाराणबलिमनित्यत्वात्तादायुषइति ॥ इदञ्चात्मवधनिमित्तमतज्जातिवधप्रायश्चित्तेनसमुचितंकार्यम् ॥ अतएवबौधायनेनोक्तं द्वादशवर्षाणित्रीणिवेति **मदनपारिजातेस्मृत्यर्थसारेच** ब्रह्महादीनांतद्योग्यंप्रायश्चित्तंकृत्वानारायणबलिःकार्यइत्युक्तम् ॥ एवंम्लेंछीकृतानामपि **यत्तुकश्चिदाह** पुत्रकृतेनप्रायश्चित्तेनपितुःपापनाशेमानाभावः ॥ आत्मघातेतुवचनादस्तु ॥ महापातकेतुकथंस्यादिति सःस्वयमेवात्मवधप्रायश्चित्तस्यजातिवधनिमित्तेनसमुच्चयंवदन्हृदयशून्यएव ॥ नाहिजातिवधनिमित्तम्पुत्रैःकार्यमितिवचनमस्ति ॥ पुत्रकर्तृकसर्वप्रायश्चित्तादिविप्लवापत्तेः ॥ प्रागुक्तबौधा

यनवचनाच्चेतिदिक् ॥ इदंप्रायश्चित्तार्हाणामेव ॥ प्रायश्चित्तानर्हाणान्तुप तितोदकमात्रंकार्य्यमितिकेचित् ॥ मदनपारिजातादिस्वरसोप्येवम् ॥ व स्तुतस्तु ॥ तदर्हानर्हयोर्वचनेनुपादानादविशेषात्तत्रापिनारायणबलिर्गया श्राद्धञ्चेतियुक्तम् ॥ पतितोदकविधिस्तुपित्राद्यतिरिक्तविषयइत्यपरे **सयथा हेमाद्रौब्राह्मे** पतितस्यतुकारुण्याद्यस्तृप्तिंकर्तुमिच्छति । सहिदासींसमाहूय सर्वगांदत्तवेतनाम् ॥ अशुद्धघटहस्तांतां यथावृत्तम्ब्रवीत्यपि । हेदासिगच्छ मूल्येन तिलानानयसत्वरम् ॥ तोयपूर्णघटञ्चेमं सतिलंदक्षिणामुखी । उप विष्टातुवामेन चरणेनततःक्षिप ॥ कीर्तयेःपातकीसंज्ञांत्वं पिबेतिमुहुर्वदेः । निशम्यतस्यवाक्यंसालब्धमूल्याकरोतितत् ॥ एवंकृतेभवेत्तृप्तिः पतिता नाञ्चनान्यथेति इदंचमृताहेकार्यम् ॥ पतितस्यदासीमृताह्नियदाघटमप वर्जयेदेवतावतायमुपचरितोभवतीति मदनरत्नेविष्णूक्तेः ॥ इदंचात्मत्या गिविषयम् ॥ आत्मत्यागिनःपतितास्तेनाशौचोदकभाजःस्युरित्युपक्रम्य विष्णुनाएतस्याभिधानादितिगौडाः ॥ यत्तुकश्चिदाह ॥ यःपतितोघटस्फो टेनबान्धवैर्ब्बहिष्कृतस्तद्विषयाणि क्रियानिषेधवाक्यानि ॥ जीवत्येवत स्मिन्नंत्यकर्म्मणःकृतत्वात्तत्पुनःकरणाभावादिति ॥ सबन्धुत्यागेनजात वैराग्यस्यकृतप्रायश्चित्तस्याप्यकरणापत्तेर्म्मिताक्षरादिविरोधमपश्यन् मूर्ख इत्युपेक्षणीयः ॥ नचकृतघटस्फोटस्यसंग्रहविधिर्नेतिवाच्यम् ॥ मनुनाकृ तघटस्फोटस्यत्यागमुक्त्वा प्रायश्चित्तेतुचरिते पूर्णकुम्भमपांनवम् । तेनै वसार्धप्रास्येयुःस्नात्वापुण्येजलाशयइत्युक्तेः ॥ अन्यथाप्रायश्चित्तमात्रेएत त्प्रसंगात् ॥ अतोघटस्फोटेनबहिष्कृतस्यापिपित्रादेरब्दांतेनारायणबलिः निषेधास्तुपितृव्यादिपराइतितत्त्वम् ॥ केचित्तुनारायणबलौकृतेप्यंत्यकर्म सपिंडनवर्जंकार्यम् ॥ गोब्राह्मणहतानांचपतितानांतथैवच । व्युक्रमाच्चप्र मीतानांनैवकार्यासपिंडतेतिवचनात् ॥ ब्राह्मणादिहतेतातेपतितेसंगवर्जित इतिश्राद्धप्रकारोक्तेश्चेत्याहुस्ते हेमाद्रिस्थपूर्वोक्तषट्त्रिंशन्मतविरोधान्निर्मूल त्वाच्छ्राद्धप्रकारस्यवृद्धिश्राद्धविषयत्वादुपेक्ष्याः ॥ नारायणबलिस्तुहेमाद्या

ष्यनुसारेणोच्यते ॥ तत्रादौक्रियानिबंधेगारुडेतर्पणमुक्तम् ॥ कार्यपुरुषसू क्तेनमंत्रैर्वावैष्णवैरपि । दक्षिणाभिमुखोभूत्वा प्रेतंविष्णुमितिस्मरन् ॥ अ नादिनिधनोदेवः शंखचक्रगदाधरः । अक्षय्यःपुंडरीकाक्षः प्रेतमोक्षप्रदोभ वेति ॥ शुक्लैकादश्यांदेशकालौसंकीर्त्यामुकगोत्रस्यामुकस्य दुर्मरणात्मघात जदोषनाशार्थं और्ध्वदेहिकसंप्रदानत्वयोग्यतासिध्यर्थं नारायणबलिंकरि ष्यइतिसंकल्प्य ॥ ब्रह्माणंविष्णुंशिवंयमंप्रेतंचपंचकुंभेषु ॥ विष्णुःस्वर्णमयः कार्योरुद्रस्ताम्रमयस्तथा । ब्रह्मारौप्यमयस्तत्रयमोलोहमयोभवेत् ॥ प्रेतो दर्भमयःकार्यइतिदेवप्रकल्पनेतिगारुडोक्तासुसर्वासु हैमीषु वाप्रतिमासुषोड शोपचारैः पुरुषसूक्तेनाभ्यर्चाग्निंप्रतिष्ठाप्य चरुंपुरुषसूक्तेनप्रत्यृचंनारायणा येदमितिहुत्वा ॥ देवानामग्रेदक्षिणाग्रदर्भेषुविष्णुरूपंप्रेतंस्मरन्नामगोत्रा भ्यांमधुघृततिलयुतान्दशपिंडान् यज्ञोपवीत्येवामुकगोत्रामुकशर्मन् प्रेतवि ष्णुरूपायतेपिंडउपतिष्ठतामितिदत्वापुरुषसूक्तेनाभिमंत्र्य तेनैवशंखोदकेना भिषिच्याभ्यर्चामुकशर्माणममुकगोत्रंविष्णुरूपंप्रेतंतर्पयामीतिपुरुषसूक्तेनप्र त्यृचंतर्पयित्वा ॥ एकमामान्नंब्रह्मादिपंचभ्योदद्यात् **मंत्रस्तु** ब्रह्मविष्णुमहा देवायमश्चैवसकिंकरः । बलिंगृहीत्वाकुर्वंतुप्रेतस्यचशुभांगतिमिति ॥ मि ताक्षरायांतुहोमबल्यादिनोक्तम् ॥ ततःप्रतिदैवतंत्रिविधंफलंशर्करामधुगुड घृतानिचनिवेद्यपिंडानभ्यर्चनद्यांक्षिप्त्वारात्रौनवसप्तपंचवाविप्रान्निमंत्र्योपो षितोजागरंकृत्वाश्वोभूतेपुनर्विष्णुंयमंसंपूज्यैकोद्दिष्टविधिना श्राद्धपंचकंकरि ष्यइत्युक्त्वाविष्णुंयमप्रेतान्स्मरन् विप्रानुप्रवेश्यप्रेतस्थानेचैकंविष्णुंस्मरन् पाद्यावाहानार्घ्ययुतं तृप्तिप्रश्नांतंकृत्वोल्लेखनादिकृत्वान्नशेषेणविष्णवेब्रह्मणे शिवाययमायसपरिवारायचतुरः पिंडान्दत्वाप्रेतनामगोत्रेस्मृत्वाविष्णुनाम्ना पंचमंदत्वाभ्यर्च्याचांतेभ्यो दक्षिणांदत्वैकंप्रेतंस्मृत्वा विशेषतः संतोष्यवि प्रैःप्रेतायेदंतिलोकमुपतिष्ठतामिति सतिलमुदकंदापयित्वाभुंजीतेति ॥ अ त्रविशेषांतरंभट्टकृतांत्योष्टिपद्धतौज्ञेयम् सर्पहतेतुवर्षपर्यंतंपूर्वेह्युरेकभक्तंपूर्वं शुक्लपंचम्यामुपवासंनक्तंवाकृत्वा पिष्टमयंनागमनंतवासुकिशंखपद्मकंबल

कर्कोटकाश्वतरधृतराष्ट्रशंखपालकालियतक्षककपिलेतिनामभिः प्रतिमासं संपूज्य पायसेनविप्रान्संभोज्य वत्सरांतेहैमन्नागंगांचदत्वानारायणबलिंकुर्यात् ॥ एतन्मूलंतुहेमाद्रौज्ञेयम् ॥ बौधायनसूत्रेसर्पमृतानांनमोस्तुसर्पेभ्यइतितिस्रआहुतीर्हुत्वोदकेमृतानां समुद्रायवयुनायहुत्वेतिक्रियांकुर्यादितिशेषः **व्यासः** सौवर्णभारनिष्पन्नंनागंकृत्वातथैवगाम् । व्यासायदत्वाविधिवत्पितुरानृण्यमाप्तवान् **हेमाद्रौभविष्ये** पंचम्यांपन्नगंहैमंस्वर्णेनैकेनकारयेत् । क्षीराज्यपात्रमध्यस्थंपूज्यविप्रायदापयेत् ॥ प्रायश्चित्तमिदंप्रोक्तंनागदुष्टस्य शंभुनेति **अपरार्केस्मृत्यंतरेपि** तदैवशुद्ध्यतिप्रेतोनारायणबलौकृते । यो ददातिक्रियापिंडंतस्मैप्रेतायवैसुतः ॥ तस्यैवाशौचमुद्दिष्टंत्र्यहमेवनसंशयः । विष्णुश्राद्धसमाप्तौतुत्रयोदश्यांदिनत्रयम् ॥ आशौचंपिंडदःकुर्यान्नतुतद्बंधुगोत्रजाः ॥ यस्यवैमृत्युकालेतुव्युच्छिन्नासंततिर्भवेत् ॥ सवसेन्नरकेनित्यंपंकमग्नःकरीयथेत्युपक्रम्य बलिंनारायणं कुर्यात्तस्योद्देशेनभक्तिमानितिगारुडोक्तेरपुत्रस्यापिपत्न्याद्यैःकार्यइत्युक्तंदेवयाज्ञिकेन॥अथविधानादाशौचाभावः **यथायतिशुद्धमृतादिषु** त्रयाणामाश्रमाणांचकुर्याद्दाहादिकाःक्रियाः । यतेःकिंचिन्नकर्तव्यं नचान्येषांकरोतिस इतिब्राह्मात् **उशनाः** एकोद्दिष्टंन कुर्वीतयतीनांचैवसर्वदा । अहन्येकादशेप्राप्तेपार्वणंतुविधीयते ॥ सपिण्डीकरणंतेषांनकर्तव्यंसुतादिभिः । त्रिदंडग्रहणादेवप्रेतत्वंनैवजायते ॥ अथतत्संस्कारंवक्ष्यामः **दत्तात्रेयः** एकोद्दिष्टंजलंपिण्डमाशौचंप्रेतसत्क्रिया । न कुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे ॥ वार्षिकादितिपूर्व्वभाविमासिकादिनिषेधोनतुदर्शादेः ॥ संन्यासिनोप्याब्दिकादिपुत्रःकुर्य्याद्यथाविधीतिवायवीयोक्तेः **पृथ्वीचंद्रोदयेप्रजापतिः** अहन्येकादशेप्राप्तेपार्व्वणंतुविधीयते । सपिंडीकरणंतस्यनकर्तव्यंसुतादिभिः ॥ एषुसपिण्डनादिनिषेधानुवादेनपार्व्वणोक्तेस्तत्स्थानापन्नत्वंपार्वणस्यगम्यते ॥ नगिरागिरेतिब्रूयादैरंकृत्वोद्वेयमितिवत् ॥ इदंवार्षिकादिविधानंचत्रिदंडनामेव ॥ एकदंडिपरमहंसादीनांतुनाकिमपिकार्यम् ॥ पूर्वोक्तोशनोवाक्येत्रिदंडिग्रहणादिति शूलपाण्या

दयोगौडाः ॥ त्रिदंडीशब्देनमनोदंडादिदण्डत्रयोक्तेः ॥ यस्यैतेनियतादण्डा सत्रिदंडीतिचोच्यतइतिस्मृतेः **बौधायनः** नारायणबलिश्चास्यकर्तव्योद्वाद शेहनि ॥ अस्यपार्वणेनसमुच्चयोज्ञेयः **तंचसएवाह** कृत्वाविष्णोर्महापूजांपा यसंविनिवेदयेत् । अग्नौकृत्वातुतच्छेषंव्याहृतीभिःसमाहितः॥यतीन्गृहस्था न्साधून्वानिमंत्र्यद्वादशावरान् । अभ्यर्च्यगंधपुष्पाद्यैर्मंत्रैर्द्वादशनामभिः ॥ संभोज्यहव्येनान्येनदक्षिणांचनिवेदयेत्।त्रयोदशंद्विजश्रेष्ठमात्मज्ञंसंयतेंद्रिय म् ॥ विष्णुंयथातथाभ्यर्च्यपाद्याद्यैश्चविधानतः । दद्यात्पुरुषसूक्तेनगंधपुष्पा दिकंक्रमात् ॥ वस्त्रालंकरणादीनियथाशक्तिप्रदापयेत् । उच्छिष्टसन्निधौतस्य दर्भानास्तीर्यभूतले ॥ भूर्भुवःस्वःस्वधायुक्तैस्तस्मैदद्याद्बलित्रयम् । अश्वमेध सहस्रस्यवाजपेयशतस्यच ॥ तत्फलंलभतेदेवयःकरोतियतिक्रियाम् **शौन कस्तु** शौनकोहंप्रवक्ष्यामिनारायणबलिंपरम् । चण्डालादुदकात्सर्पाद्ब्राह्म णाद्वैद्युतादपि ॥ दंष्ट्रिभ्यश्चपशुभ्यश्चरज्जुशस्त्रविषाश्मभिः । देशांतरमृतानांच मृतानांवान्यसाधनैः ॥ जीवच्छ्राद्धमृतानांचकनिष्ठानांतथैवच । यतीनांयोगि नांपुंसामन्येषांमोक्षकांक्षिणाम्॥पुण्यायाघक्षयार्थायद्वादशेहनिकारयेत्॥द्वाद श्यांश्रवणेब्दांतेपंचम्यांपार्वणोस्तुवेत्युक्त्वापूर्वोक्तंसर्वविधिमुक्त्वाअतोदेवेति षड्भिः पुरुषसूक्तेनप्रत्यृचंपायसंहुत्वाकेशवादिद्वादशनामभिस्तद्रूपिणेपित्रेद्वा दशविप्रान्संभोज्यतैरेवद्वादशपिंडान्दद्यादित्यधिकमाह ॥ युद्धमृतेतुप्रागुक्त म् ॥ कृतजीवच्छ्राद्धमृतेसपिंडैराशौचादिकार्यनवा **तदुक्तंहेमाद्रौलैंगे** मृते कुर्यान्नकुर्याद्वाजीवन्मुक्तोयतःस्वयम् ॥ कालंगतेद्विजेभूमौखनेद्वापिदहेत वा ॥ पुत्रकृत्यमशेषंचकृत्वादोषोनविद्यते ॥ जीवत्यपिविशेषस्तत्रैवोक्तः ॥ नित्यंनैमित्तिकंयत्तुकुर्याद्वासंत्यजेतवा । बांधवेपिमृतेतस्यनैवाशौचंविधीय ते ॥ सूतकंचनसंदेहः स्नानमात्रेणशुद्ध्यति एतद्योगिविषयम् ॥ योगमार्ग रतोपिचेतितस्याप्युक्तेः ॥ तथाऽहिताग्नौप्रोषितमृतेतदस्थिदाहात्पूर्वंपित्रादी नामाशौचंसंध्यादिकर्मलोपश्चनास्ति । अनग्निमतऊर्ध्वंतेराशौचादिद्विजा तिषु । दाहादग्निमतोविद्याद्विदेशस्थेमृतेसतीतिस्मृतेः ॥ आहिताग्नेर्दाहात्प्राग

पिदशाहः॥ संस्कारांगंचभिन्नोदशाहइतिधूर्तस्वामिरामांडारश्च तच्चिंत्यम् ॥ मूलैक्याद्वचोविरोधाच्च ॥ एतत्प्रागुक्तम् ॥ अत्रदेहस्यैवसंभवेदाहः ॥ आहिताग्नौविदेशस्थेमृतेसतिकलेवरम् ॥ निधेयंनाग्निभिर्यावत्तदीयैरपिदह्यत इतिब्राह्मोक्तेः **तदभावेछंदोगपरिशिष्टे** विदेशमरणेस्थीनिआहृत्याभ्यज्य सर्पिषा। दाहयेद्वार्हिषाच्छाद्यपात्रन्यासादिपूर्ववत् ॥ अस्थ्नामलाभेपर्णा निशकलान्युक्तयावृता ॥ दाहयेदस्थिसंख्यानिततःप्रभृतिसूतकम् **हेमाद्रौषदत्रिंशन्मते** कुर्य्याद्दर्भमयंप्रेतंदर्भैस्त्रिंशतिषष्टिभिः । पालाशिभिः समिद्भिर्वासंख्याचैवंप्रकीर्तिता **भविष्ये** चत्वारिंशच्छिरस्थानेग्रीवायांचदशैवतु। बाह्वोश्चैवशतंदद्याद्विंशतिंचतथोरसि ॥ उदरेविंशतिंदद्यात्त्रिंशतंकटिदेशयोः ॥ ऊर्वोश्चैवशतंदद्यात्त्रिंशतंजानुजंघयोः ॥ पादांगुलीषुदशवैएषाचप्रेतकल्पना **मदनरत्नेयज्ञपार्श्वः** शिरस्यशीत्यर्धंदद्यात्ग्रीवायांतुदशैवतु। बाह्वोश्चैकशतंदद्याद्दशचैवांगुलीषुच ॥ उरसित्रिंशतंदद्याद्विंशतिंजठरोदरे । द्वादशार्द्धवृषणयोरष्टार्धंशिश्नएवतु ॥ ऊर्वोश्चैकशतंदद्यात्त्रिंशतंजंघयोर्द्वयोः। पादांगुलीषुद्वेदद्यादेतत्प्रेतस्यकल्पनम् ॥ मस्तकेनारिकेरंतुअलाबुंतालुकेतथा। पंचरत्नंमुखेन्यस्यजिह्वायांकदलीफलम्। चक्षुषोस्तुकपर्दौद्वौनासिकायांतुकालकम्। कर्णयोर्ब्रह्मपत्राणिकेशेवटप्ररोहकाः ॥ नालकंकमलानांतुअंत्रस्थानेविनिक्षिपेत् । मृत्तिकातुवसाधातुर्हरितालकगंधकौ ॥ शुक्रेतुपारदंदद्यात्पुरीषेपित्तलंतथा। संधीषुतिलपिष्टंतुमांसंस्याद्यवपिष्टकम्॥ मधुस्याल्लोहितस्थानेत्वचास्थानेमृगत्वचा। स्तनयोर्जर्जकेदेयेनासायांशतपत्रकम् ॥ कमलंनाभिदेशेस्याद्वृन्ताकेवृषणाश्रिते। लिंगेचरक्तमूलंतुपरिधानंदुकूलकम् ॥ गोमूत्रंगोमयंगंधंसर्वौषध्यादिसर्वतइति ॥ इदंनिरग्नेरपि **तत्रैववृद्धमनुः** प्रोषितस्यतथाकालोगतश्चेत्द्वादशाब्दिकः ॥ प्राप्तेत्रयोदशेवर्षेप्रेतकार्याणिकारयेत् **बृहस्पतिः** यस्यनश्रूयतेवार्तायावत्द्वादशवत्सरात् ॥ कुशपुत्रकदाहेनतस्यस्यादवधारणा **भविष्ये** पितरिप्रोषितेयस्यनवार्तानैवचागमः। ऊर्ध्वंपंचदशाद्वर्षात्कृत्वातत्प्रतिरूपकम् ॥ कुर्याच्च

स्यतुसंस्कारंयथोक्तविधिनाततः । तदादीन्येवसर्वाणिप्रेतकर्माणिकारयेत् ॥ द्वादशाब्दप्रतीक्षापितृभिन्नविषयेतिमदनरत्नेउक्तम् **गृह्यकारिकायांतु** तस्य पूर्ववयवयस्कस्यविंशत्यब्दोर्ध्वतःक्रिया । ऊर्ध्वंपंचदशाब्दात्तुमध्यमेवयसि स्मृता ॥ द्वादशाद्वत्सरादूर्ध्वमुत्तरेवयसिस्मृता । चांद्रायणत्रयंकृत्वात्रिंशत् कृच्छ्राणिवासुतैः ॥ कुशैःप्रतिकृतिंदग्ध्वाकार्याःशौचादिकाःक्रिया इत्युक्तं **पराशरः** देशांतरगतोनष्टस्थितिर्नज्ञायतेयदि ॥ कृष्णाष्टमीह्यमावास्याकृष्णा चैकादशीचया ॥ उदकंपिंडदानंचतत्रश्राद्धंचकारयेत् । इदंमासज्ञाने ॥ तत्राहिताग्नेःपूर्णाशौचम् ॥ अनाहिताग्नेस्तुत्रिरात्रम् ॥ अनाहिताग्नेर्देहस्तु दाह्योगृह्याग्निनास्वयम् । तदभावेपलाशानांवृन्तैःकार्यःपुमानपि ॥ वेष्टित व्यस्तथायत्नात्कृष्णसारस्यचर्मणा ऊर्णासूत्रेणबत्ध्वातुप्रलेसव्योयवैस्तथा ॥ सुपिष्टैर्जलसंमिश्रैर्दग्धव्यश्चरथाग्निना । असौस्वर्गायलोकायस्वाहेत्युक्त्वा सबांधवैः ॥ एवंपर्णशरंदग्ध्वात्रिरात्रमशुचिर्भवेदितिब्राह्मोक्तेः ॥ इदंत्रिरा त्रंनदशाहमध्येदाहे ॥ तत्रप्रोषितेकालशेषःस्यादित्युक्तेः ॥ किंतुतदूर्ध्वम् तत्रपत्नीपुत्रयोःपूर्वमगृहीताशौचयोर्दशाहाद्येव ॥ गृहीताशौचयोस्तुत्रिरात्र म् ॥ पत्नीमृतौभर्तुश्चैवं ॥ सपत्न्योश्चैवमितिस्मृत्यर्थसारे ॥ अन्यसपिंडानां तुसर्वत्रपर्णशरदाहेत्रिरात्रम् **तदाहांगिराः** देशांतरमृतंश्रुत्वानाशौचंचेत्कथं चन ॥ गृहीतमितिशेषः ॥ कालात्ययेपिकुर्वीतदाहकालेदिनत्रयमिति **स्मृ त्यर्थसारेतु** गृहीताशौचानांस्नानमात्रमुक्तंबह्वृचपरिशिष्टेपि **अथातीतसं स्कारः** सचेदंतर्दशाहंस्यात्तत्रैवसर्वंसमापयेदूर्ध्वमाहिताग्नेर्दाहात्सर्वमाशौचं कुर्यादन्येषुपत्नीपुत्रयोः पूर्वमगृहीताशौचयोःसर्वमाशौचं । गृहीताशौचयोः कर्मांगमितित्रिरात्रम् ॥ षडशीतावप्येवं ॥ विश्वादर्शेतुप्रतिकृतिदहनेत्वग्नि देस्यात्त्रिरात्रमित्युक्तम् ॥ द्वादशवर्षादिप्रतीक्षोत्तरंदाहेतुपुत्रादीनांसर्वेषांत्रि रात्रमितिकल्पतरुदिवोदासादयः **अथप्रेतसंस्कारेकालः हेमाद्रौगार्ग्यः** प्रत्यक्षशवसंस्कारेदिनंनैवविशोधयेत् । आशौचमध्येसंस्कारेदिनंशोध्यंतुसं भवे ॥ आशौचविनिवृत्तौचेत्पुनःसंस्क्रियतेमृतः । संशोध्यैवदिनंग्राह्यमूर्ध्वं

संवत्सराद्यदि ॥ प्रेतकार्याणिकुर्वीतश्रेष्ठंतत्रोत्तरायणम् ॥ कृष्णपक्षश्चतत्रा पिवर्जयेत्तुदिनत्रयम् **वाराहे** चतुर्थाष्टमगेचंद्रेद्वादशेचविवर्जयेत् । प्रेतकृ त्यंव्यतीपातेवैधृतौपरिघेतथा ॥ करणेविष्टिसंज्ञेचशनैश्चरदिनेतथात्रयोदश्यां विशेषेणजन्मतारात्रयेतथा । जन्मदशमैकोनविंशानिजन्मतारा: ॥ **भारते** नक्षत्रेतुनकुर्वीतयस्मिन्जातोभवेन्नरः॥ नप्रौष्ठपदयोःकार्यतथाग्नेयेचभारत॥ दारुणेषुचसर्वेषुप्रत्यारेचविवर्जयेत् **काश्यपः** भरण्यार्द्रामघाश्लेषामूलंद्विच रणानिच । प्रेतकृत्येतिदुष्टानिधनिष्ठाद्यंचपंचकम् ॥ फाल्गुनीद्वितयंरोहिण्य नुराधापुनर्वसू । आषाढेद्वेविशाखाचभानिद्विचरणानिच **ज्योतिर्नारदः** चतुर्दशीतिथिंनंदांभद्रांशुक्रारवासरौ । सितेज्ययोरस्तमयंद्वयंघ्रिभंविषमांघ्रि भं ॥ शुक्लपक्षंचसंत्यज्यपुनर्दहनमुत्तमम् । वसूत्तरार्धतःपंचनक्षत्रेषुत्रिजन्म सु ॥ पौष्णब्रह्मर्क्षयोश्चैवदहनात्कुलनाशनम् **अस्यापवादमाहतत्रैववैजवा पः** प्रेतस्यसाक्षाद्दग्धस्यप्राप्तेत्वेकादशेहनि । नक्षत्रतिथिवारादिशोधनीयं नकिंचन ॥ युगमन्वादिसंक्रांतिदर्शेप्रेतक्रियायदि । दैवादापतितातत्रनक्षत्रा दिनशोधयेत् **विश्वप्रकाशेपि** गुरुभार्गवयोर्मौढ्येपौषेमासेमलिम्लुचे।नाती तःपितृमेधःस्याद्वयांगोदावरींविना **दानमपितत्रैवोक्तम्** भद्रायांभूमिदानं स्यात्रिपादर्क्षेहिरण्यदः। वारेषुतत्तद्वर्णंतुवासोदानंविधीयते॥ धनिष्ठापंचकमृते पंचरत्नानिदापयेत्।एकाशीतिपलंकांस्यंतदर्धंवातदर्धकम्॥ नवषट्त्रिपलंवा पिद्यद्विप्रायशक्तितइत्यलंप्रसंगेन **हेमाद्रौवृद्धमनुः** अमृतंमृतमाकर्ण्यकृ तंयस्यौर्ध्वदेहिकम् । प्रायश्चित्तमसौस्मार्तंकृत्वाग्नीनादधीतच । जीवन्यदि समागच्छेत्घृतकुंभेनिमज्यतम् ॥ उद्धृत्यस्नापयित्वास्यजातकर्मादिकारये त् । द्वादशाहंव्रतचर्यात्रिरात्रमथवास्यतु ॥ स्नात्वोद्वहेततांभार्यामन्यांवातद भावता । अग्नीनाधायविधिवत्व्रात्यस्तोमेनवायजेत् ॥ अर्थेद्वाग्नेनपशुनागि रिंगत्वाचतत्रतु । इष्टिमायुष्मतींकुर्यादीप्सितांश्चक्रतूंस्ततः ॥ अनाहिताग्नेस्तु चरुः **मृतवार्ताश्रवणेत्वाश्वलायनः** सुरभयएवयस्मिन्जीवेमृतशब्दइति॥ यस्यतुजीवतएवमृतिवार्ताश्रुत्वास्त्रियासहगमनंकृतंतदातद्वैधमेव ॥ भर्तुर्म्म

रणज्ञानस्यैवनिमित्तत्वात् ॥ प्रमात्वस्यगौरवेणायुक्तत्वाच्चेतिकेचित् तन्न मरणज्ञानस्यनिमित्तत्वेतीतानागतयोरपितत्त्वापत्तेः ॥ भर्तुर्वैधदाहाभावेनत स्याःसहगमनाभावाच्च ॥ तस्मादाशौचवज्ज्ञातमरणस्यैवनिमित्तत्वं ॥ नचा त्रतदस्ति ॥ परंकाम्यंमरणमस्तु ॥ अतआत्महननदोषोस्तीतितातपादाः ॥ तथासर्प्पसंस्कारेकृतेत्रिरात्रमाशौचंतद्विधिंचाह **शौनकः** अथवक्ष्यामिसर्प्प स्य संस्कारविधिमुत्तमम् ॥ सिनीवाल्यांपौर्णमास्यां पञ्चम्यांवापिकारयेत् ॥ कृतसर्प्पवधोविप्रःपूर्व्वजन्मनिवायदि । वधंप्रख्यापयेत्पापी चरेत्कृच्छ्रांश्चतु र्दश ॥ विप्रायलोहदण्डञ्च तन्मूल्यंवापिदापयेत् **मूल्यमाह** निष्कत्रयंद्विनि ष्कंवा निष्कमेकंकनीयसं अनुमत्यादिकर्तृणांनिष्कमर्धंतदर्धकं ॥ इदंस्वर्ण रूप्ययोःशक्त्याज्ञेयम् **संस्कारमाह** प्रियंगुव्रीहिगोधूमतिलपिष्टेनवापुनः । कृत्वासर्पाकृतिंशूर्प्पेनिधायप्रार्थयेदहिं ॥ एहिपूर्वमृतःसर्पअस्मिन्पिष्टेसमा विश ॥ संस्कारार्थमहंभक्त्याप्रार्थयामिसमासतः ॥ वस्त्रोपवीतगंधाद्यैःसंपू ज्यचहरेद्बहिः । कुर्यात्संस्कारसंकल्पंप्राणायामपुरःसरं॥ यज्ञोपवीतिनाकार्यं सर्प्पसंस्कारकर्मतु । लौकिकाग्निंप्रतिष्ठाप्यसमिदाधानमाचरेत् ॥ ततोग्नेरग्नि दिग्भागे भूमिंसंप्रोक्ष्यवारिभिः । चितिंकृत्वाथसंस्तीर्य्यकुशैराग्नेयकाग्रकैः ॥ पर्य्युक्ष्याग्निंपरिस्तीर्यपरिषिच्यसमर्चयेत् । कृत्वेध्माधानमाधारौचक्षुषीचयथा विधि ॥ सर्प्पंगृहीत्वायत्नेनचितिमारोपयेत्सुधीः ॥ स्रुवेणजुहुयादाज्यमग्नौ व्याहृतिभिस्त्रिभिः ॥ सर्पास्येजुहुयादाज्यंव्याहृत्याचसमग्रया । आज्यशेषंस्रु वेणैवसर्पदेहेनिषेचयेत् ॥ चमसस्थैर्जलैःसर्पंव्याहृत्याभ्युक्ष्यपाणिना । अग्ने रक्षाणइत्यनयासर्पायाग्निंप्रदाप्रयेत् । उपतिष्ठेद्दह्यमानंनमोस्तुसर्पमंत्रतः ॥ ज्ञानतोज्ञानतोवापिकृतःसर्पवधोमया । पूर्वजन्मनिवासर्पतत्सर्वंक्षंतुमर्हसि ॥ क्षीराज्येनततश्चाग्निंप्रोक्ष्यव्याहृतिभिर्ज्जलैः। नास्थिसंचयनंकुर्य्यात्स्नात्वाच म्यगृहंव्रजेत् ॥ ब्रह्मचर्य्यादिकंकार्यंत्रिरात्राशौचमिष्यते ॥ सचैलंतुचतुर्थे ह्निस्नात्वाविप्रान्समर्चयेत् ॥ सर्पोनंतस्तथाशेषःकपिलोनागएवच । कालि कःशंखपालश्चभूधरश्चेतिनामभिः ॥ गंधपुष्पाक्षतैर्धूपदीपाद्यैरर्चयेत्तद्विजान्

घृतपायसभक्ष्यैश्चद्विजानष्टौतुभोजयेत् ॥ एवंकृतेविधानेनसर्पसंस्कारकर्मणि ॥ सर्पहिंसाकृतात्पापान्मुच्यतेनात्रसंशयः ॥ इतिसर्पसंस्कारः ॥ क्वचित्तु जीवतोप्येत्यकर्माशौचंचकार्यम् **यथा । प्रायश्चित्तानिच्छोः पतितस्यघटस्फोटे** पतितस्योदकंकार्यसपिंडैर्बांधवैःसह । निंदितेहनिसायाह्नेज्ञात्यृत्विग्गुरुसन्निधौ ॥ दासीघटमपांपूर्णपर्यस्येत्प्रेतवत्तदा । अहोरात्रमुपासीरन्नाशौचंबांधवैःसहेतिमनूक्तेः ॥ निंदितेरिक्तादौ **अपरार्केवसिष्ठोपि** वेदविप्लावकशूद्रयाजकोत्तमवर्णवर्गपतितास्तेषांपात्रनिनयनमपात्रसंस्कारादकृत्स्नंपात्रमादाय दासोसवर्णपुत्रोवाबंधुरसदृशोवागुणहीनः सव्येनपादेनप्रवृत्ताग्रान्दर्भान्लोहितान्वोपस्तीर्यापःपूर्णपात्रमस्मैनिनयेन्निनेतारं चास्यप्रकीर्णकेशाज्ञातयोन्यालभेरन्नपसव्यंकृत्वागृहेषुस्वैरमापद्येरन्नतऊर्ध्वंतेनतंधर्मयेयुस्तद्धर्माणस्तंधर्मयंतइति ॥ उत्तमवर्णाब्राह्मणादयः ॥ तेषांवर्गःसमूहस्तस्मात्पतिताब्रह्महादयः ॥ अपात्रसंस्कारःकुत्सितपात्रसमूहः ॥ प्रवृत्ताग्राःछिन्नाग्राः ॥ स्वैरंयथेच्छंधर्मादिकार्यंकुर्युः ॥ अस्माद्वचनसामर्थ्यात्पात्रनिनयनात्प्राक्पतितज्ञातीनां धर्मकार्येष्वधिकारोनास्तीत्यपरार्कः ॥ तस्यविद्यागुरुयोनिसंबंधांश्चसन्निपात्यसर्वाण्युदकानिप्रेतकार्याणिकुर्य्युः पात्रंचास्यविपर्यस्येयुर्दासः कर्मकरोवावकरादमेध्यंपात्रमानीयदासीघटात्पूरयित्वादक्षिणामुखः पदाविपर्यस्येदमनुदकंकरोमिति । नामग्राहंसर्वेन्वालभेरन् ॥ प्राचीनावीतिनोमुक्तशिखाअपउपस्पृश्यग्रामंप्रविशेयुरितिगौतमोक्तेश्च ॥ उदकादीत्युक्तेर्दाहनिवृत्तिः ॥ प्रेतकार्याण्येकादशाहश्राद्धांतानिदास्याहृतोबुघटोदासीघटः ॥ तेनोदकेनामेध्यपात्रंपूरयित्वादासादिर्न्युंजंवामपादेनकुर्यादितिहरदत्तः ॥ अत्रनामग्राहवचनमुदकादिप्रेतकार्येतद्भर्जनत्वार्थं ॥ तेनतत्तूष्णींभवति एतच्चप्रायश्चित्तानिच्छोः तस्यगुरोर्बांधवानांराज्ञश्चसमक्षंदोषानभिख्याप्येतमनुभाष्यपुनःपुनराचारंलभस्वेति सपद्येवमप्यनवस्थितमतिः स्याच्चतोऽस्यपात्रंविपर्यस्येदितिशंखोक्तेः ॥ जीवंतमेवोद्दिश्यपिंडोदकश्राद्धानिनाम्नादद्यादित्यपरार्कः ॥ कृतप्रायश्चित्तस्यघटस्फोटेकृतेऽ

पिसंग्रहविधिमाहगौतमः ॥ यस्तुप्रायश्चित्तेनशुद्ध्येत्तस्मिन्शुद्धेशातकुंभम यंपात्रंपुण्यहृदात्पूरयित्वास्रवंतीभ्योवा ततएनमुपस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्संप्रतिगृह्यजपेच्छांताद्यौःशांतापृथिवीशांतंविश्वमंतरिक्षं योरोचनस्त मिहगृह्णामीत्येतैर्यजुर्भिःपावमानीभिस्तरत्समंदीभिःकूष्मांडैश्चाज्यंजुहुयाद्धि रण्यंदद्याद्गांचाचार्याय ॥ यस्यतुप्राणांतिकंप्रायश्चित्तंसमृतःशुद्ध्येत्सर्वाण्ये वतस्मिन्नुदकादीनिप्रेतकर्माणिकुर्युरेतदेवशांत्युदकसर्वेषूपपातकेष्विति घ टस्फोटोत्तरंप्राणांतिकप्रायश्चित्तेकृतेतुमृतएवशुद्ध्येन्नतत्रसंग्रहविधिः ॥ अ तस्तेनविनापिप्रेतकर्मकुर्यादित्यर्थः ॥ उपपातकेष्वपिघटस्फोटेकृतेएवंकार्य मित्यर्थः **याज्ञवल्क्यः** चरितव्रतआयातेनिनयेरन्नवंघटम् । जुगुप्सेरन्नचा प्येनंसंवसेयुश्चसर्वशः ॥ कृतस्फोटस्यैवायंपरिग्रहविधिरितिमिताक्षरायामप रार्केच । अन्यथाप्रायश्चित्तमात्रेएतत्प्रसंगात् **मनुरपिघटस्फोटमुक्त्वा** नि वर्त्तेरंस्ततस्तस्मात्संभाषणसहासनैरित्युक्त्वा ॥ प्रायश्चित्तेतुचरितेपूर्णकुंभम पानवम् ॥ तेनैवसार्द्धंप्रास्येयुःस्नात्वापुण्येजलाशयेइतितच्छब्दंप्रायुंक्त **अ परार्केवसिष्ठोपि** पतितानांचरितव्रतानांप्रत्युद्धारोऽथाप्युदाहरंति ॥ अग्रेऽ भ्युद्धरतांगच्छेत्क्रीडन्निवहसन्निव । पश्चात्पातयतांगच्छेच्छोचन्निवरुदन्निवे त्याचार्यमातृपितृहंतारस्तत्प्रसादादपगतपापाएतेषांप्रत्यापत्तिः ॥ पूर्णहृदात्प्र वृत्ताद्वा सकांचनंपात्रंमाहेयंवाद्भिः पूरयित्वापोहिष्टीयाभिरेनमद्भिरभिषिंचे युः ॥ सर्वएवाभिषिक्तस्यप्रत्युद्धारःपुत्रजन्मनाव्याख्यातइति ॥ प्रत्युद्धारः परिग्रहः ॥ तत्रोद्धरतांहसन्निवाग्रेसरःस्यात् ॥ पातयतांघटस्फोटंकुर्वतांशो चन्निवपश्चाद्गच्छेत् ॥ मातापित्रादिहंतॄणांपरिग्रहोनकार्यः ॥ तत्प्रसादेस तिचीर्णव्रतानांकार्यः ॥ प्रवृत्तंनिर्झरः ॥ पुत्रजन्मनेत्यभिषेकोत्तरंजातकर्मा दयःसंस्काराःपुत्रजन्मवत्कार्याइत्यपरार्कोव्याचख्यौ ॥ अतएवविज्ञानेश्वरो घटेपवर्जितेज्ञातिमध्यस्थोयवसंगवाम् ॥ प्रदद्यात्प्रथमंगोभिःसत्कृतस्यहिस त्क्रियेत्यत्रगवांभक्षणाभावेपुनर्व्रतंचरेदित्येतत्प्रकृते एवंचरितव्रतविधौवि शेषोयमितिवदन्घटस्फोटोत्तरंपरिग्रहएवैतन्नसर्व्वत्रेत्याह ॥ तस्मात्कृतेपिघ

टस्फोटेप्रायश्चित्तंपरिग्रहविधिःपुनःसंस्काराभवंतीतिसिद्धम् **तथाजीवच्छ्रा द्धेकृतेहेमाद्रौबौधायनः** तत्राशौचंदशाहंस्यादित्यलंप्रसंगेन ॥ एवंसापवा देआशौचेउक्तेप्रतिशाखंभिन्नेप्यंत्यकर्मणिसाधारणंकिंचिदुच्यते ॥ तत्राधि कारिणःप्रागुक्ताः ॥ सर्वाभावेधर्मपुत्रोवाकार्यः ॥ अपुत्रेणसुतःकार्योयाट्टक् ताट्टक्प्रयत्नतः ॥ पिंडोदकक्रियाहेतोर्नामसंकीर्तनायचेतिव्यासवचनात् **गृह्यपरिशिष्टे** असगोत्रःसगोत्रोवायदिस्त्रीयदिवापुमान्।प्रथहेऽहनियःकुर्या त्सदशाहंसमापयेत्॥दद्यात्पिंडमितिशेषः **भविष्ये** यत्राद्योदीयतेपिंडस्तत्रस र्व्वंसमापयेत् **ब्राह्मेपि** प्रथमेहनियोदद्यात्प्रेतायान्नंसमाहितः । अन्नंनवसु चान्येषुसएवप्रददात्यपि **विज्ञानेश्वरादयस्तु** केचित्तुअग्निंदद्यादितिव्याच क्षते ॥ सगोत्रोवाऽसगोत्रोवायोग्निंदद्यात्सखेनरः । सोपिकुर्यान्नवश्राद्धंशुद्धे त्तुदशमेऽहनीति दिवोदासीयेवचनाच्च **तत्रैव** दृष्ट्वास्थानस्थमासन्नधर्म्मो न्मीलितलोचनम् ॥ भूमिष्ठंपितरंपुत्रोयदिदानंप्रदापयेत् ॥ तद्विशिष्टगया श्राद्धादश्वमेधशतादपि **तानियथा** मोक्षंदेहिहृषीकेशमोक्षंदेहिजनार्दन । मोक्षधेनुप्रदानेनमुकुंदःप्रीयतांममेतिमोक्षधेनुमंत्रः ॥ ऐहिकामुष्मिकंयच्चस ञ्जन्मार्जितंऋणम् ॥ तत्सर्वंशुद्धिमायातुगामेतांददतोममेतिऋणधेनोः ॥ आजन्मोपार्जितंपापंमनोवाक्कायकर्मभिः ॥ तत्सर्वंनाशमायातुगोप्रदानेनके शवेतिपापधेनोः **भारते** शुक्लपक्षेदिवाभूमौगंगायांचोत्तरायणे । धन्या स्तातमरिष्यंतिहृदयस्थेजनार्दने **हेमाद्रौवाराहे** व्यतीपातोथसंक्रांतिस्तथै वग्रहणंरवेः ॥ पुण्यकालास्तदासर्व्वेयदामृत्युरुपस्थितः **व्यासः** आसन्न मृत्युनादेयागौःसवत्सातुपूर्ववत् । तदभावेतुगौरेवनरकोत्तारणायवै ॥ तदा यदिनशक्नोतिदातुंवैतरिणींतुगाम् । शक्तोन्योरुक्तदादत्वादद्याच्छ्रेयोमृतस्य तु **मदनरत्नेजातूकर्ण्यः** उत्क्रांत्यादीनिदानानिदशदद्यान्मृतस्यतु । गोभू तिलहिरण्याज्यवासोधान्यगुडानिच॥ रौप्यंलवणमित्याहुर्दशदानान्यनुक्रमा त् ॥ एतानिदशदानानिनराणांमृत्युजन्मनोः॥ कुर्यादभ्युदयार्थतुप्रेतेपिहिप रत्रवै **ब्राह्मे** ताम्रपात्रंतिलैःपूर्णंप्रस्थमात्रंद्विजायतु ॥ सहिरण्यंचयोदद्याच्छ्

द्धाविचानुसारतः ॥ सर्वपापविशुद्धात्मालभतेगतिमुत्तमाम् ॥ उत्क्रांतवैतारिण्यौचदशदानानिचैवहि । प्रेतेपिकृत्वातंप्रेतंशवधर्मेणदाहयेत् **तत्रैवपरिशिष्टे** म्रियमाणस्यकर्णेतुपुण्यमंत्रान्जपेत्ततः **क्रियानिबंधेगारुडेत्वष्टौदानान्युक्तानि** तुलसीसंनिधौकृत्वाशालग्रामशिलांतथा । तिललोहंहिरण्यंचकार्पासंलवणंतथा ॥ सप्तधान्यंक्षितिर्गावएकैकंपावनंस्मृतमिति ॥ दशदानवैतरिणीधेनूत्क्रांतधेनुदानादिभट्टकृतांत्येष्टिपद्धतौज्ञेयम् ॥ कृतांऽत्यकर्म्माधिकारार्थंत्रीन्कृच्छ्रान्कुर्यादितितत्रैवोक्तम् ॥अत्रदेवयाज्ञिकेनमुमूर्षोर्मधुपर्कदानमुक्तम् **तदुक्तंवाराहे** दृष्ट्वासुविह्वलंह्येनंयममार्गानुसारिणम् । प्रयाणकालेतुनरोमंत्रेणविधिपूर्वकम् ॥ मधुपर्कंत्वरन्गृह्यइमंमंत्रमुदाहरेत् ॥ ओंगृहाणचेमंमधुपर्कमाद्यंसंसारनाशनकरंह्यमृतेनतुल्यम् । नारायणेनरचितंभगवत्प्रियाणांदाहेचशांतिकरणंसुरलोकपूज्यम् ॥ अनेनैवतुमंत्रेणदद्याच्चमधुपर्ककम्। नरस्यमृत्युकालेतुपरलोकसुखावहम् **अथदुर्मरणेदिवोदासीये** चंडालादिमृतेविप्रेत्वंतरिक्षमृतेपिवा । कृच्छ्रतिकृच्छ्रचांद्रैस्तुशुद्धिस्तत्रप्रकीर्तिता **देवजानीयेजाबालिः** शूद्रेणदग्धोयोविप्रोनलभेच्छाश्वतींगतिम् । प्रायश्चित्तं प्रकुर्वीतब्राह्मणःपापशुद्धये ॥ चांद्रायणंपराकंचप्राजापत्यंविशोधनम् **गृह्यकारिकायाम्** उदक्यासूतिकावापियदिप्रेतंस्पृशंतिहि । तस्यैषविधिरादिष्टो वात्स्येनैवमहात्मना ॥ एषसूतिकोक्तः **मदनरत्नेस्मृत्यंतरे** ऊर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छिष्टस्तथैवच । अस्पृश्यस्पर्शनेचैवखट्वादिमरणेपिच । श्वानक्रव्यादसंस्पर्शेकृमिकीटोद्भवोपिच एतद्दोषानुसारेण प्रायश्चित्तंसमाचरेत् ॥ कृच्छ्रांस्त्रिषट्पंचदशांश्चांद्रत्रयमथापिवा । शुद्ध्यैतदानीं संपाद्य शवधर्म्मेणदाहयेत् **गृह्यकारिकायाम्** खट्वायांमरणेचैव त्रींस्त्रीन्कृच्छ्रान्प्रकल्पयेत् । सप्तांत्यजैस्तुसंस्पृष्टोमृतोदैवात्कथञ्चन ॥ एकत्रिंशताकृच्छ्रैस्तुशुद्धिरुक्तामनीषिभिः । कुणपेत्वर्धदग्धेतुचितास्पृष्टांत्यजातिभिः । तत्स्पर्शनेदूषणञ्चत्रिभिःकृच्छ्रैर्व्विशुध्यति **धर्म्मप्रदीपे** चाण्डालसूतिकोदक्यास्पृष्टेप्रेतेतथैवच । तस्यपापविशुध्यर्थंकृच्छ्रान्पञ्चदशाचरेदि

त्युक्तम् **मनुः**अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंपर्कदूषिता ॥ अत्रापिकृच्छ्रत्रयम् ॥ अस्पृश्यस्पर्शनेचैवेत्युक्तेः **तत्रैवकर्म्मप्रदीपे** रात्रौवारात्रिशेषेवाग्नियंतेचेत्द्विजायतः । दाहंकृत्वायथान्यायंद्वौपिण्डौनिर्व्वपेत्सुतः ॥ रजस्वलागर्भिण्यादिमृतौतुवक्ष्यामः **निर्णयामृतेपारिजातेयमः** संध्यायांवातथारात्रौदाहःपाथेयकर्मच। नवश्राद्धंचनोकुर्यात्कृतंनिष्फलतांव्रजेत्॥एतद्दिनमृतस्यरात्रिनिषेधार्थम् **यत्तुस्कांदे** यदिरात्रौदहेत्तस्यसमाप्तिर्दहनस्यतु । परेऽह्न्युदितेसूर्येकार्यातस्योदकक्रिया ॥ दग्धस्यतुनवैकार्यारात्रौजातूदकक्रियेति॥ तन्निर्मूलं **रात्रिमृतस्यतुतत्रैवसंग्रहे** रात्रौदग्ध्वातुपिंडांतंकृत्वावपनवर्जितम् वपनंनेष्यतेरात्रौश्वस्तनीवपनक्रियेति ॥ वपनंतुप्रातः तच्चसर्वैःपुत्रैःकार्यम् ॥ गंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृतौ ।आधानेसोमयागेचवपनंसप्तसुस्मृतमितिमिताक्षरयांस्मृतेः मरणस्याऽनंगित्वान्नैमित्तिकमिदम् तदेवसंग्रहवचनेनपरेद्युरुत्कृष्यतेतीर्थवत् ॥ तेनकस्यचिद्दाहांगत्वोक्तिश्चिंत्या **मदनरत्नेगालवः**प्रथमेऽहनिकर्त्तव्यंवपनंचानुभाविनाम्।प्रेतस्यकेशश्मश्वादिवापयित्वाऽथदाहयेत् ॥ आशौचांतेतुपुनःकार्यंविधिबलात् ॥ मदनपारिजातेऽप्येवम् ॥ तेनसर्वस्याऽस्यनिर्मूलत्वोक्तिरज्ञोक्तिरेव **स्मृतिरत्नावल्याम्** शवंरात्र्युषितं चेत्त्रीन्कृच्छ्रान्कृत्वादहेत्सुतः **मदनरत्नेऽंगिराः** ऊर्ध्वोच्छिष्टाधरोच्छिष्टे ह्यंतरिक्षमृतेपिवा । कृच्छ्रत्रयंप्रकुर्वीतआशौचेमरणेपिच ॥ अथसाग्नेर्विशेषः **कारिकायाम्** कृष्णपक्षेप्रमीयेतयद्यह्निप्रातराहुतीः । शेषास्तुजुहुयाद्दर्शपर्यंताःपक्षहोमवत् ॥ प्रतिपत्प्रातर्होमांताइत्यर्थः ॥ यद्याहिताग्निरपरपक्षेम्रियेताहुतिभिरेनंपूर्वपक्षेहरेयुरित्याश्वलायनोक्तेः ॥ तदानीमेवजुहुयात्सायंकालाहुतीरपि । सायंम्रियेतचेत्सायमाहुतीर्जुहुयादथ । तदानीमेवजुहुयात्प्रातःकालाहुतीरपि । सकृद्गृहीतमंत्रेष्टंभिन्नतत्रचहोमयोः॥दार्शचापिप्रकुर्वीत स्थालीपाकंतदैवतु **छंदोगपरिशिष्टे** हुतायांसायमाहुत्यांदुर्बलश्चेद्गृहीभवेत् । प्रातर्होमस्तदैवस्यात्जीवेच्चसपुनर्नवा ॥ इदंशुक्लपक्षपरम् ॥ दुर्बलोमुमुर्षुः **त्रिकांडमंडनः** दर्शेष्टिंचतदाकुर्यादिष्टिर्यदिनसंभवेत् । देवतानांप्रधा

नानामेकैकस्यहुनेत्पृथक् ॥ पुरोनुवाक्ययाज्याभ्यांचतुराज्याहुतीः तथा अग्नावरण्योरारूढेप्रमीयेतपतिर्यदि । प्रेतंस्पृष्ट्वामाथित्वाग्निं जप्त्वाचोपाव रोहणमघृतञ्चद्वादशौपाक्षंतूष्णींहुत्वाशवक्रिया ॥ विच्छिन्नश्रौताग्नेर्मृतौतुप्रे ताधानंतत्रैवोक्तम् ॥ प्रेतंस्वाम्यालयेक्षिप्त्वामाथिताग्न्यानलेरणी।सन्निधायार णींमंथेत्तयस्येतियजुषाततः ॥ यस्याग्नयोजुहुतोमांसकामाःसंकल्पयंतेयज मानमांसम् ॥ जायंतुतेहविहषेसादितायस्वर्गलोकमिमंप्रेतंनयंत्विातिमंत्र तः ॥ प्राणीयपावकंतूष्णींद्वादशोपाक्षसर्पिषा । तूष्णींहुत्वततःकुर्यात्प्रेतेमा त्याइतिक्रियाम् ॥ नष्टेष्वग्निष्वथारण्योर्नाशेस्वामीम्रियेतचेत् । आहरेदर णीद्वंद्वंमनोज्योतिर्ऋचाततः यज्ञपार्श्वः यजमानेचितारूढेपात्रन्यासकृते सति । वर्षाद्यभिहतेवह्नौकथंकुर्वंतियाज्ञिकाः ॥ तदर्धदग्धकाष्ठेनमंथनंतत्र कारयेत् । तच्छेषालाभतोन्येनदग्धशेषेणवापुनः ॥ हुत्वाज्यंलौकिकेवह्नौहु तशेषंदहेत्तुवा । अत्राग्निषुसत्सुपर्णशरैःशरीरोत्पत्तिः ॥ शरीरेवासतिप्रेताधा नेनाग्न्युत्पत्तिः ॥ उभयाभावेतुप्रेताधानेनाधिकाराद्दाहादिसंस्कारलोपः ॥ उ दकदानाद्येवकार्यमितिकेशवीकारशतद्वयीप्रमुखाः तन्न ॥ निषेकाद्याः श्मशानांतास्तेषांवैमंत्रतःक्रियाइतिविरोधात् ॥ क्रियालोपगताचेतिनिषेधा त्तदभावेपलाशानावृंतैःकार्यः ॥ पुमानपीत्यभावेविधानस्याग्न्यभावेपिसा म्याच्च । तेनप्रेताहुत्यभावेपिस्विष्टकृद्व्यांतरोक्तेरदृष्टार्थत्वात् ॥ प्रेताधानंदा होपिभवत्येव ॥ प्रतिकृतेरग्नीनांचप्रेताधानप्रयोजकत्वात्क्षतेः ॥ पत्न्याअप्ये वम् ॥ दाहयित्वाग्निहोत्रेणस्त्रियंव्रतवतींपतिरितियाज्ञवल्क्योक्तेः यत्तु द्वि तीयांचैवयोभार्य्यां दहेद्वैतानिकाग्निभिः ॥ जीवंत्याप्रथमायांतुसुरापानसमं स्मृतमितितदाधानेसहानधिकृताविषयमितिविज्ञानेश्वरः मदनरत्नेब्राह्मेपि आहिताग्न्योश्चदंपत्योर्यस्त्वादौम्रियतेभुवि । तस्यदेहःसपिण्डैश्च दग्धव्य स्त्रिभिरग्निभिः ॥ पश्चान्मृतस्यदेहस्तुदग्धव्योलौकिकाग्निना । अनाहिताग्नि देहस्तुदाहोगृह्याग्निनाद्विजैः त्रिकांडमंडनस्तुविकल्पमाह ज्येष्ठायांविद्य मानायांद्वितीयायैस्वयोषिते । काम्यंनित्याग्निहोत्रंवानकथंचित्प्रयच्छति ॥

स्त्रीमात्रमविशेषेणदग्ध्वान्यैर्वैदिकादिभिः । विवाह्यादधतेयद्वाधानमेवास्ति चेद्वधूरिति ॥ अत्रेदंत्तत्वम् ॥ साग्नेःपत्नीमृतौद्वौपक्षौ ॥ पुनर्विवाहेछायां पूर्वाग्निभिर्दहेदित्येकःपक्षः ॥ भार्यायैपूर्वसारिण्यैदत्वाग्नीनंत्यकर्मणि । पुनर्दारक्रियांकुर्यात्पुनराधानमेवचेतिमनूक्तेः ॥ दाहयित्वाग्निहोत्रेणस्त्रियंवृत्तवतींपतिरिति याज्ञवल्क्योक्तेश्च ॥ पुनर्व्विवाहाशक्तौनिर्म्मथ्येनतांदग्ध्वा पूर्वाग्निष्वेवाग्निहोत्रेष्ट्यादिकार्यमित्यर्थः ॥ आहार्येणाहिताग्निपत्नीचेत्याश्वलायनोक्तेः **भरद्वाजोपि** निर्मथ्येनपत्नीमिति ॥ पूर्वाग्न्येकदेशेनदहेदितियज्ञपार्श्वदेवयाज्ञिकादयः **यानिच** तस्मादपत्नीकोप्यग्निहोत्रमाहरेदितिश्रुतिः **विष्णुःछन्दोगपरिशिष्टंच** मृतायामपिभार्यायांलौकिकाग्निनहित्यजेत् । उपाधिनापितत्कर्मयावज्जीवंसमाचरेत् ॥ उपाधिर्हेमकुशपत्न्यादिः ॥ अन्येकुशमयींपत्नींकृत्वातुगृहमेधिनः । अग्निहोत्रमुपासंतेयावज्जीवमनुव्रताइत्यपरार्केस्मृत्यंतरात् **कात्यायनोपि** रामोपिकृत्वासौवर्णींसीतां पत्नींयशस्विनीं । ईजेबहुविधैर्यज्ञैःसहभ्रातृभिरच्युतइत्यादीनि ॥ तानिपूर्वाग्निष्वेवाग्निहोत्रादिपराणि । नत्वपत्नीकस्याधानार्थानि ॥ क्रतुविधीनामाधानाप्रयोजकत्वात् ॥ अपत्नीकस्याधानाप्रवृत्तिरितिमानवपरिशिष्टाच्च ॥ सोमोनभवत्येव ॥ अपत्नीकोप्यसोमपइतिश्रुतेः **यत्तुभरद्वाजापस्तंबसूत्रम्** दारकर्मणियद्यशक्तआत्मार्थमग्न्याधेयमिति ॥ अस्यार्थः ॥ पुनर्विवाहाशक्तौयदग्न्याधेयंपूर्वकृतमस्तिततदात्मार्थमेव ॥ नपत्न्यैदद्यादिति ॥ ब्राह्मणभाष्यापरार्कशार्करामाण्डारादितत्वमप्येवम् ॥ त्रिकाण्डमण्डनस्तुपक्षद्वयमाह ॥ अन्येप्यपत्नीकस्याधानमाहुस्तदाशयंनविद्मः **वृद्धयाज्ञवल्क्यः** आहिताग्निर्य्यथान्यायंदग्धव्यस्त्रिभिरग्निभिः । अनाहिताग्निरेकेनलौकिकेनापरोजनः **क्रतुः** एवंवृत्तांसवर्णांस्त्रींद्विजातिःपूर्वमारिणीं । दाहयेदग्निहोत्रेणयज्ञपात्रैश्चधर्मवित् **कारिकायाम्** पत्नीमपिदहेदेवंभर्तुःपूर्वंमृतायदि । अनग्निकांदहेदेवंकपालेनहविर्भुजा **आशौचप्रकाशेक्रतुः** विधुरं विधवांचैवकपालस्याग्निनादहेत् । ब्रह्मचारिणंयतिंचैवदहेदुत्तपनाग्निना ॥

तुषाग्निनाचदग्धव्यः कन्यकाबालएवच । अग्निवर्णकपालन्तु कृत्वातत्रवि निक्षिपेत् ॥ कारीषादिततोवह्निर्जातोयः सकपालजः । अनुपनीतेयद्यपिजा तारण्याग्निः कैश्चिदुक्तस्तथापितस्यकलौनिषिद्धत्वोक्तेरयमेवज्ञेयः **स्मृत्यन्तरे** गृहस्थोब्रह्मचारीचविधुरोविधवाः स्त्रियः॥औपासनश्चोत्तपनस्तुषाग्निस्तुकपा लजः॥**उत्तपनस्तु** दर्भाग्रेग्निन्तुप्रज्वाल्य पुनर्दर्भैस्तुसंयुतः पुनर्दर्भैस्तितीये ह्निरेषउत्तपनस्मृः **यमः** यस्यानयतिशूद्रोग्निं तृषाकाष्ठहवींषिच । प्रेतत्वंचस दातस्यसचाधर्मेणलिप्यते **देवलः** चण्डालाग्निरमेध्याग्निः सूतिकाग्निश्चक हिंचित् । पतिताग्निश्चिताग्निश्च नाशिष्टग्रहणोचितः **मनुः** दक्षिणेनमृतंशूद्रं पुरद्वारेणनिर्हरेत् । पश्चिमोत्तरपूर्व्वैस्तु यथासंख्यंद्विजातयः ॥ अत्रप्रातिलो म्येनक्रमः ॥ पूर्वामुखस्तुनेतव्योब्राह्मणोबांधवैर्गृहात् । उत्तराभिमुखोराजा वैश्यःपश्चान्मुखस्तथा ॥ दक्षिणाभिमुखःशूद्रोनिर्हर्तव्यःस्वबांधवैरित्यादिपुरा णादित्यपरार्कः ॥ तेनत्रिंशच्छ्लोक्युक्तोनुलोमक्रमोहेयः **आश्वलायनः** ज्येष्ठप्रथमाःकनिष्ठजघन्यागच्छेयुः ॥आधानोत्तरंद्वितीयविवाहेकृतेयजमान मरणेश्रौतस्मार्ताग्न्योःसंसर्गः **बौधायनसूत्रे** अथयद्याहिताग्निर्द्वेभार्ये विंदेतप्रक्संयोगान्प्रीयेतौपासनंसंपरिस्तीर्याज्यंविलाप्य चतुर्गृहीतंगृहीत्वा समिद्धत्यग्नौजुहोति ॥ संमितंसंकल्प्येथामितिमिंदाहुतीव्याहृतीश्चहुत्वाथै तमग्निमयंतेयोनिर्ऋर्त्विजइतिसमिधिसमारोप्य गार्हपत्येसमिधमभ्यादधाति भवतनःसमनसाविितिगार्हपत्यआज्यंविलाप्यचर्तुगृहीतंगार्हपत्ये जुहोत्यग्ना वग्निश्चरतिप्रविष्टइत्यपरंचतुर्गृहीत्वाचित्तिःस्रुगितिसग्रहं जुहोत्यथगार्हपत्येस्रु वाहुतीर्जुहोति ब्राह्मणएकहोतेतिदशभिरथप्राचीनावीत्यन्वाहार्यपचनेजुहो ति येसमानायेसजाताइतिद्वाभ्यामथतत्रैवस्रुवाहुतिं जुहोत्यग्नयेकव्यवाह नायस्विष्टकृतेस्वधाममःस्वाहेत्यथयज्ञोपवीती द्वादशगृहीतेनस्रुचंपूरयित्वा पुरुषसूक्तेनाहवनीये जुहोत्यथस्रुवाहुतीर्जुहोत्यग्नयेविविचयेस्वाहाग्नयेव्रतप तयेग्नयेपवमानायाग्नयेपावकायाग्नयेशुचयेस्वाहाग्नये पथिकृतेस्वाहाग्नयेतंतु मतेग्नयेवैश्वानरायेत्यथचतुर्गृहीतंजुहोति मनोज्योतिरित्यतऊर्ध्वंपैतृकंकर्मप्र

तिपद्येतेइति ॥ आहिताग्नौविदेशमृतेपथिकृतीष्टिर्मृताग्निहोत्रंतद्दाहः पात्रयो जनंचकल्पसूत्रादिभ्योस्मत्पितामहकृतपद्धतेश्चज्ञेयमिति बहुवक्तव्येप्यु परम्यते स्मार्ताग्निसूत्रेमदनरत्नेछंदोगपरिशिष्टेच दुर्बलंस्नापयित्वातुशु द्धचैलाभिसंवृतम्। दक्षिणाशिरसंभूमौबर्हिष्मत्यांनिवेशयेत् ॥ घृतेनाभ्य क्तमाप्लाव्यशुद्धवस्त्रोपवीतिनम् । चंदनोक्षितसर्वांगंसुमनोभिर्विभूषयेत् ॥ हिरण्यशकलान्यस्यक्षिप्त्वाछिद्रेषुसप्तसु । मुखेष्वथापिधायैनंनिर्हरेयुःसुता दयः ॥ आमपात्रेग्निमादायप्रेतमग्निपुरःसरम् । एकोनुगच्छेत्तस्यार्धमर्धप थ्युत्सृजेद्भुवि ॥ ऊर्ध्वमादहनंकार्यमासीनोदक्षिणामुखः। सव्यंजान्वाच्यश नकैःसतिलंपिंडदानवत् ॥ अथपुत्रादिराप्लुत्यकुर्याद्दारुचयंमहत्। तत्रोत्ता नंनिपात्यैनंदक्षिणाशिरसंमुखे ॥ आज्यपूर्णस्रुवंदद्याद्दक्षिणाग्रांनसिस्रुचम्। पादयोरधरांप्राचीमरणीमुरसीतराम् ॥ पार्श्वयोःशूर्प्पचमसौसव्यदक्षिणयोः क्रमात्। सुसमेतुन्यसेन्न्युब्जमंतरूर्व्वोरुलूखलम् ॥ चात्रोविलीढमत्रैवअ ग्नयेरप्ययंविधिः। अपसव्येनकृत्वैतद्दाग्यतःपितृदिङ्मुखः। अथाग्निंसव्य मावृत्कोदद्याद्दक्षिणतःशनैः ॥ अस्मात्त्वमधिजातोसित्वदयंजायतांपुनः। अ सौस्वर्ग्गायलोकायस्वाहेतिपरिकीर्तयेत् तथा एवमेवाहिताग्नेश्चपात्रन्यासा दिकंभवेत्। कृष्णाजिनादिकंचात्रविशेषोध्वर्युचोदितः तत्रैव अनयैवावृता नारीदग्धव्यायाव्यवस्थिता । अग्निप्रदानमंत्रोस्यानप्रयोज्यइतिस्थितिः इदंछन्दोगानामेव पात्रन्यासोक्तेरुत्तानदेहत्वंसाग्निपरम् ॥ निरग्निस्तुपु मानधोमुखास्त्रीतूत्तानादाह्या ॥ सगोत्रजैर्गृहीत्वातुचितामारोप्यतेशवः। अ धोमुखोदक्षिणादिक्चरणस्तुपुमानिति। उत्तानदेहानारीतुसपिंडैरपिबंधुभि रित्यादित्यपुराणादितिशुद्धितत्त्वहारलतादयः ॥ उत्तरशिरस्त्वंसामगेतरपर म् ॥ वाराहेत्वग्निदानेऽन्योमंत्रः॥ कृत्वातुदुष्कृतंकर्म्मजानतावाप्यजानता॥ मृत्युकालवशंप्राप्यनरंपंचत्वमागतम् ॥ धर्म्माधर्म्मसमायुक्तंलोभमोहसमा वृतम्। दहेयंसर्वगात्राणिदिव्यांल्लोकान्सगच्छतु ॥ ज्वलमानंमहावह्निंशि रःस्थानेप्रदापयेत् ॥ चतुर्वर्णेषुसंस्थानमेवंभवतिपुत्रके अत्रक्रियानिबंधे

गारुडेषट्पिंडदानमुक्तं मृतस्योक्रांतिसमयेषट्पिंडान्क्रमशोददेत् । मृतिस्थानेतथाद्वारिचत्वरेताक्ष्यकारणात् ॥ विश्रामेकाष्ठचयनेतथासंचयनेचषट् **तथा** आदौदेयास्तुषट्पिंडादशदेयादशाहिकाः । स्थानेचार्धपथेतीतेचितायांशवहस्तके ॥ श्मशानवासिभूतेभ्यःषष्ठंसंचयनेतथा **ततः** त्वंभूतकृज्जगद्योने त्वंलोकपरिपालकः ॥ उक्तःसंहारकस्तस्मादेनंस्वर्गमृतं नयेत्यग्निदत्वाऽस्मात्वमितिमंत्रेणार्धदग्धेआज्याहुतिरुक्ता **आहिताग्नौपराशरः** शम्यांशिश्नेविनिक्षिप्यअरणीमुष्कयोरपि । जुहूंचदक्षिणेहस्तेवामेतूपभृतंन्यसेत् ॥ शिश्नेतूलूखंदद्यात्पृष्ठेचमुसलंन्यसेत् ॥ उरसिक्षिप्यदृषदंतण्डुलाज्यतिलान्मुखे । श्रोत्रेचप्रोक्षणींदद्यादाज्यस्थालींचचक्षुषोः ॥ कर्णेनेत्रेमुखेघ्राणे हिरण्यशकलंन्यसेत् । अग्निहोत्रोपकरणमशेषंतत्रनिक्षिपेत् **प्रचेताः** स्नानंप्रेतस्यपुत्राद्यैर्वस्त्राद्यैःपूजनंततः । नग्नदेहंदहेन्नैवकिंचिद्देयंपरित्यजेत् **यमः** प्रेतंदहेच्छुभैर्गंधैःस्रपितंस्रग्विभूषितम् **आश्वलायनसूत्रे** संस्थितेप्रेतालंकारान्कुर्वंति केशश्मश्रुलोमनखानिवापयंति नलदेनानुलिंपंतिनलदमालांप्रतिमुंचंतीति **माधवीयेब्राह्मे** दरिद्रोपिनदग्धव्योनग्नःकस्यांचिदापदि **तथा** निःशेषस्तुनदग्धव्यःशेषंकिंचित्त्यजेन्नरः **दाहकालेऽग्निनाशेतु मदनरत्नेयज्ञपार्श्वः** यजमानेमृतेकापिचितादौवाप्रवेशिते । वर्षाद्यभिहते मौतुकथंप्रेताविकल्पना ॥ शेषंदग्ध्वाप्रदग्धेषुनिर्म्मथ्यैवतुकारयेत् **अथपर्णशरादिदाहेनाग्निनाशेपश्चात्तद्देहालाभेमदनरत्नेब्राह्मे** अथपर्णशरेदग्धेपात्रन्यासेकृतेसति । गतेष्वग्निषुतद्देहोयदूर्ध्वंलभ्यतेक्वचित् ॥ तदार्धदग्धकाष्ठानितानिनिर्मथ्यतंदहेत् ॥ यद्यर्धदग्धकाष्ठंतुतदीयंवैनलभ्यते ॥ तदातदस्थिखंडंतुनिक्षेप्तव्यंमहाजले **दंपत्योरेकदामृतौविशेषमाहापस्तंबः** तथैवप्रेतेसहैवपितृमेधोद्विवचनलिंगान्मंत्रान्संधारयंति ॥ पितृमेधोदाहांतं कर्म ॥ दाहांतमेकतंत्रत्वमितिबौधायनोक्तेः ॥ अस्थिसंचयनमप्येवम् ॥ उदकपिण्डदानादिपृथगेव ॥ सहगमनेप्येवम् **तदाहमदनरत्नेभाष्यार्थसंग्रहकारः** एककालमृतौभार्या भर्त्ताचयदिचेत्द्वयोः ॥ तंत्रेणदहनंकुर्य्या

तिपिण्डश्राद्धंपृथक्पृथक् ॥ एककालेमृतौजायां पतीयदितदापितुः । विभ ज्याग्निक्रियांकुर्य्यादितियत्तदसांप्रतम् ॥ दाहान्तमेकतंत्रत्वमितियाज्ञिकसं मतम् ॥ मृतंपतिमनुव्रज्य यानारीज्वलनंगता । अस्थिसंचयनांतोस्या भर्तुः संस्कारएवहि ॥ कीकसानान्तुसंस्कारो न्यायसिद्धोपियोमतः । एककाले मृतेप्येवं कीकसानांविधिःस्मृतः ॥ नवश्राद्धंसपिण्डांतं भिन्नकालमृतौयथा **कर्पर्दिकारिकापि** मृतेभर्तरितद्दाहात्प्राक्पत्नीम्रियतेयदि । पत्न्यांवाप्राक् प्रमीतायांदाहादर्वाक्पतिर्मृतः ॥ तत्रतंत्रेणदाहः स्यान्मंत्रेषुद्वित्वमूह्यते । कीकसानान्तुसंस्कारः पृथगेवतयोर्भवेत् ॥ एकाहमृत्यौयुगपन्नवश्राद्धादिकं तयोः । मृतंपतिमनुव्रज्यपत्नीचेदनलंगता ॥ तत्रापिदाहस्तंत्रेण पृथगस्थि क्रियाभवेत् ॥ अस्थिसंचयनपृथक्त्वेविकल्पः **सहगमनेसर्वत्रपाकैक्यमाह प्रचेताः** एकचित्यांसमारूढौ म्रियेतेदम्पतीयदि । तंत्रेणश्रपणंकुर्यात्पृथक् पिण्डंसमाचरेत् **अथोदकदानंवसिष्ठः** शरीरमग्नौसंयोज्यानवेक्षमाणाअपो भ्यवयन्तिसव्योत्तराभ्यांपाणिभ्यामुदकक्रियांकुर्व्वत्ययुग्मम **आपस्तंबः** मा तुश्चयोनिसंबंधेभ्यः पितुश्चासप्तमात्पुरुषाद्यावतांवासंबंधोज्ञायतेतेषांप्रेतेषूद कक्रियेति **याज्ञवल्क्यः** सप्तमाद्दशमाद्वापि ज्ञातयोभ्युपयंत्यपः । अपनः शोशुचदघमनेनपितृदिङ्मुखाः ॥ सकृत्प्रसिंचंत्युदकं नामगोत्रेणवाग्यताः । सप्तमाद्दशमाद्वादिवसादातदन्तमिति विज्ञानेश्वरः ॥ कातीयास्तुसप्तमा द्दशमाद्वापुरुषादित्याहुः ॥ सप्तमाद्दशमाद्वापुरुषात्समानग्रामवासे यावत्स म्बन्धमनुस्मरेयुरितिपारस्करोक्तेः ॥ मंत्रस्नानांगमेवेतिहेमाद्रिः **प्रचेताः** प्रेत स्यबांधवायथावृद्धमुदकमवतीर्य्य नोर्द्धर्षयेयुरुदकांतेप्रसिंचेयुरपसव्ययज्ञोप वीतवाससोदक्षिणामुखाब्राह्मणस्योदङ्मुखाप्राङ्मुखाश्च राजन्यवैश्ययोः ॥ सएव नदीकूलं ततोगत्वेत्युक्त्वा॥ सचैलस्तुततःस्नात्वा शुचिःप्रयतमानसः। पाषाणन्ततआदायविप्रेदद्याद्दशांजलीन्॥ द्वादशक्षत्रियेदद्याद्वैश्येपंचदशस्मृ ताः ॥ त्रिंशच्छूद्रायदातव्या ततस्तुप्रविशेद्गृहम् ॥ ततःस्नानंपुनःकार्यं गृहशौ चंचकारयेत् ॥ प्रेतस्नानेविशेषः **शुद्धितत्त्वेआदिपुराणे** आदौवस्त्रंचप्रक्षा

ल्यतेनैवाच्छादितस्ततः । कर्तव्यंतैःसचैलन्तुस्नानंसर्वमलापहम् ॥ पूर्वप रिहितंवस्त्रंप्रक्षाल्यपुनःपरिधायस्नायादित्यर्थः ॥ अपनइतिमंत्रेणवामहस्ता नामिकयाजलालोडनम् ॥ अवतरणेवृद्धपुरःसरत्वोक्तेर्यथाबालंपुरस्कृत्येति बौधायनीयम् ॥ जलादुत्थानपरामितिहारलतादयः **आश्वलायनः** सव्या वृतोव्रजन्त्यनीक्षमाणायत्रोदकमवहन्नवतितत्प्राप्यसकृदुन्मृज्यैकांजलिमुत्सृ ज्यतस्यगोत्रंनामगृहीत्वेति ॥ प्रचेतसाऽन्वहमंजलित्रयमप्युक्तं ॥ त्रिःप्रसे कंकुर्य्युःप्रेतस्तृप्यत्विति **तथा** दिनेदिनेऽजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात् । तावद्वृद्धिश्चकर्तव्यायावत्पिण्डःसमाप्यते ॥ एकवृद्धिस्त्रिकवृद्धिर्वेत्यर्थः ॥ मदनरत्नेभरद्वाजगृह्येतुद्विकवृद्धिरप्युक्ता ॥ आशौचान्तेप्रदद्यात्तुप्रेतपुत्रास्ति लांजलीन् । प्रथमेह्निसकृद्दद्यात्पिण्डयज्ञावृताादिवा ॥ त्रींश्चदद्याद्द्वितीयेऽ ह्नितृतीयेपंचएवच । चतुर्थेसप्तसंख्यांस्तु पंचमेनवचोत्सृजेत् ॥ षष्ठेह्निचैकाद शकाःसप्तमेतुत्रयोदश । अष्टमेपंचदशका नवमेदशसप्तच ॥ एकोनविंश तिंचाग्रेशतांजलिमतंस्मृतम् केचिद्दशांजलीन्प्रोचुः केचिदाहुःशातांजली न् । पंचपंचाशतंचान्ये स्वशाखोक्तव्यवस्थया **छंदोगपरिशिष्टे** अथानवे क्षयेत्पापःसर्वेचैवशवस्पृशः । गोत्रनामपदान्तेतुतर्प्पयामीत्यनन्तरम् ॥ द क्षिणाग्रान्कुशान्कृत्वा सतिलन्तुपृथक्पृथक् **विष्णुपुराणे** सपिण्डीकरणं यावद्दजुदर्भैःपितृक्रिया । सपिण्डीकरणादूर्ध्वंद्विगुणैर्विधिवद्भवेत् **रामायणे** इदंपुरुषशार्दूल विमलंदिव्यमक्षयम् ॥ पितृलोकेषुपानीयं मद्दत्तमुपतिष्ठता म् ॥ दानवाक्येविकल्पः **याज्ञवल्क्यः** कामोदकंसखिप्रत्ता स्वस्त्रीयश्वशुर र्त्विजाम् ॥ कामइच्छा ॥ प्रेततृप्तीच्छायांदेयमन्यथानेत्यर्थः **शंखपारस्करौ** आचार्यैश्चैवम् ॥ मातामहयोश्चस्त्रीणांचाप्रत्तानांकुर्वीरंस्ताश्चतेषामिति ॥ द्वि वचनात्मातामह्याअपि**शंखलिखितौ**उदककियाकामंश्वशुरमातुलयोःशिष्ये सहाध्यायिनिराजनिचेति वृद्धमनुः क्लीवाद्यानोदकंकुर्य्युस्तेनाव्रात्याविधर्मि णः । गर्भभर्तृद्रुहश्चैवसुराप्यश्चैवयोषितः **याज्ञवल्क्यः** नब्रह्मचारिणःकुर्युरु दकंपतितास्तथा **षडशीतौ** स्वीयाचारादपिभ्रष्टाः पतितायेचदूषिताः । न

कुर्युरुदकंतेवै तेभ्योप्यन्नेनचैवहि **मदनरत्नेहारीतः** पतितामपवृद्धानांचरन्तीनांचकामतः। प्रत्तानांचैवकन्यानांनिर्वर्त्यसलिलक्रिया **अपरार्केशंखलिखितौ** अपपात्रितस्यारिक्थपिण्डोदकानिव्यावर्तते॥ अपपात्रितःकृतघटस्फोटः तस्यापिसंग्रहविधौकृते आशौचोदकादिकुर्यादेवेत्याशौचप्रकाशः **अथाशौचेनियमाःयाज्ञवल्क्यः** इतिसंश्रुत्यगच्छेयुर्गृहंबालपुरःसराः॥ विदश्यनिम्बपत्राणिनियताद्वारिवेश्मनः॥ आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान्। प्रविशेयुःसमालभ्य कृत्वाश्मनिपदंशनैः॥ प्रवेशनादिकंकर्म्म प्रेतसंस्पर्शिनामपि। क्रीतलब्ध्वाशनाभूमौस्वपेयुस्तेपृथक्क्षितौ॥ इदंचाद्येह्नि **वसिष्ठः** अद्यप्रस्तरेगृहमनश्नंतआसीरन्क्रीतोत्पन्नेनवावर्तेरन् **शुद्धितत्त्वेवैजवापः** शमीमालभन्तेशमीपापंशमयंत्विति अश्मानमश्मेवस्थिरोभूयासमिति॥ अग्निमग्निर्नःशर्म्मयच्छत्विति॥ ज्योतित्यंतरागामजमुपस्पृशन्तःक्रीत्वालब्ध्वावान्यगेहादेकान्नमलवणमेकरात्रम्॥ दिवाभुंजीरंस्त्रिरात्रंचकर्म्मोपरमणम्॥ क्रीताद्यशनमुपवासाशक्तस्य **आश्वलायनस्तु** नैतस्यांरात्र्यामन्नंपचेरंस्त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रंचेत्याह **अशक्तौरत्नाकरेआपस्तंबः** भार्याःपरमगुरुसंस्थायांचाकालभोजनानिकुर्वीरन्॥ यदामृतिःपरदिनेतावत्कालमित्यर्थः **बृहस्पतिः** अधःशय्यासनादीनामलिनाभोगवर्जिताः। अक्षारालवणान्नाः स्युर्लब्धक्रीताशनास्तथा॥ भोगोभ्यंगताम्बूलादिः॥ क्षाराःपरिभाषायामुक्ताः **यत्तुमार्कंडेयपुराणे** तैलाभ्यंगोबान्धवानामंगसंवाहनंचयत्। तेनचाप्यायतेज्यंतुर्यच्चाश्नन्तिस्वबान्धवाः॥ प्रथमेह्नितृतीयेच सप्तमेनवमेतथा। वस्त्रत्यागंबहिःस्नानं कृत्वादद्यात्तिलोदकमिति॥ तदन्त्यदिनपरम्॥ आशौचान्तेतिलकल्कैः स्नातागृहंप्रविशेयुरितिविष्णूक्तेः॥ विष्णुपुराणेत्वस्थिसंचयोर्ध्वंभोगाप्युक्तः॥ शय्यासनोपभोगस्तु सपिण्डानामपीष्यते। अस्थिसंचयनादूर्ध्वंसंयोगस्तुनयोषिताम् **भारते** तिलान्ददतपानीयंदीपंददतजाग्रतः। ज्ञातिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्लभम् **मनुः** मांसाशनंचनाश्नीयुःशयीरंश्चपृथक्क्षितौ

देवजानीयेकारिकायाम् लवणक्षीरमाषान्नापूपमांसानिपायसम् । वर्जये दाहृतान्नेषु बालवृद्धातुरैर्विना ॥ उपवासोगुरौप्रेते पत्न्याःपुत्रस्यवाभवेत् मरीचिः प्रथमेह्नितृतीयेच सप्तमेदशमेतथा । ज्ञातिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्लभम् ॥ भोजनंचदिवैव ॥ दिवाचैवतुभोक्तव्यममांसमनुजर्षभेतिविष्णुपुराणात् ॥क्रीत्वालब्ध्वावादिवान्नमश्नीयुरितिपारस्करोक्तेश्च मदनरत्नेहारीतःपाणिषुमृन्मयेषुपर्णपुटकेषुवाश्नीरन् देवजानीयेब्राह्मेशुद्धितत्त्वेआदिपुराणे आशौच मध्येयत्नेनभोजयेच्चस्वगोत्रजान् अन्त्यदिनेतुमदनरत्नेब्राह्मे यस्ययस्यतुवर्णस्य यद्यत्स्यात्पश्चिमंत्वहः । सतत्रगृहशुद्धिंच वस्त्रशुद्धिं करोत्यपि ॥ अन्त्यकर्म्मकालीनवस्त्रयोस्तुतंत्रेणैवोक्तम् ॥ ग्रामाद्बहिस्ततोगत्वाप्रेतपृष्ठेतुवाससी ॥ अंत्यानामाश्रितानांचत्यक्त्वास्नानंकरोत्यथेति शंखः दानंप्रतिग्रहोहोमःस्वाध्यायःपितृकर्मच । प्रेतपिंडक्रियावर्ज्जमाशौचेविनिवर्तते काठकगृह्ये यत्रप्राणोक्रमस्तत्रान्वहंमहाबलिंकुर्यादिति पारस्करः तदासीमेववस्त्रंतंडुलंदीपकांस्यभाजनंप्रेतायदद्यात् आशौचप्रकाशेभरद्वाजः वासोन्नंचजलंकुम्भेप्रदीपंकांस्यभाजनम् । नग्नप्रच्छादनेश्राद्धेब्राह्मणायनिवेदयेत् भृगुः तिलोदकंतथापिंडान्नग्नप्रच्छादनादिकम् । रात्रौनकुर्यात्संध्यायांयदिकुर्यान्निरर्थकम् अथप्रेतपिंडःयद्यपिहेमाद्रौपारस्करेण ब्राह्मणे दशपिंडांस्तुक्षत्रियेद्वादशस्मृताः । वैश्येपंचदशप्रोक्ताःशूद्रेत्रिंशत्प्रकीर्तिताः इत्युक्तंतथापि प्रेतेभ्यःसर्ववर्णेभ्यःपिंडान्दद्याद्दशैवत्वितितेनैवोक्तेः ॥ सर्वेषांदशैवज्ञेयामदनरत्नेप्येवम् तथाचहेमाद्रौब्राह्मपाद्मयोः जात्युक्ताशौचतुल्यांस्तुवर्णानांक्वचिदेवहि।देशधर्मान्पुरस्कृत्यप्रेतपिंडान्वपंत्यपीत्युक्त्वा ॥ विप्राज्ञेषुदशमपिंडोत्कर्षउक्तः ॥ देयस्तुदशमःपिंडोराज्ञांवैद्वादशेहनि । वैश्यानांवै पंचदशेदेयस्तुदशमस्तथा ॥ शूद्रस्यदशमःपिंडोमासेपूर्णेह्विदीयते ॥ इतियुद्धमृतादेःसद्यःशौचेत्र्यहादौचतेनैवोक्तम् सद्यःशौचेप्रदातव्यःसर्वेपियुगपत्तथा । त्र्यहाशौचेप्रदातव्यःप्रथमेह्नचेकएवहि । द्वितीयेहनिचत्वारस्तृतीयेपंचचैवहि । त्र्यहेप्रकारांतरंप्रागुक्तम् शातातपः आशौचस्यचह्रासेपि

पिण्डान्दद्याद्दशैवतु । तत्रैकपात्रेसकृत्त्यक्त्वादशपिंडान्दद्यात् । उत्तरयि शिलापात्रकर्तृद्रव्यविपर्यये । पूर्वदत्तांजलीन्दद्यात्पूर्वपिंडांस्तथैवचेति ॥ गृह्यकारिकायांपात्रविपर्ययेदोषोक्तः ॥ शिलाविपर्ययेघटस्फोटादेर्नावृत्तिः ॥ अक्षाभ्यंजनादिपदकर्मणएकहायनिनयनवदप्रयोजकत्वात् ॥ तद्वच्चात्रालौकिकग्रहणम् **केचित्तु** नवान्यादायभाण्डानिआरुकञ्चरुकन्तथेति प्रचेतसोक्तेःपात्रानेकत्वमाहुः । क्रियाकर्तुर्नाशेऽन्येनशेषःसमापनीयः ॥ एवंक्रियाप्रवृत्तानांयदिकश्चिद्विपद्यते । तद्बंधुनाक्रियाकार्यासर्वैर्वासहकारिभिरितिशुद्धितत्त्वेबृहस्पतिस्मृतेः ॥ पत्न्याःकर्तृत्वेरजोदर्शनेचतदंतेकुर्यात् ॥ शावातद्विगुणमार्तवमित्युक्तेः ॥ आशौचांतेआर्तवेकर्तुरस्वास्थ्येवान्येनक्रियासर्वानिवर्तनीयाकर्तुर्विपर्ययात्कालातिक्रमयोगाच्च **वाराहे** स्थंडिलेप्रेतेभागंतुदद्यात्पूर्वाह्णएवतु । कृत्वातुपिंडंसंकल्पंनामगोत्रेणसुन्दरि **मरीचिः** प्रेतपिण्डंबहिर्दद्याद्दर्भमंत्रविवर्जितम् । प्रागुदीच्यांचरुंकृत्वास्नातःप्रयतमानसः ॥ दर्भवर्जनमनुपनीतपरम् ॥ असंस्कृतानांभूमौपिंडंदद्यात्संस्कृतानांकुशेष्वितिप्रचेतसोक्तेः **मिताक्षरायांस्मृत्यंतरे** भूभौमाल्यंपिंडंपानीयमुपलेवादद्युः ॥ शुनःपुच्छः फलमूलैश्चपयसाशाकेनचगुडेनच । तिलमिश्रन्तुदर्भेषुपिंडंदक्षिणतोहरेत् ॥ तूष्णींप्रसेकंपुष्पंचधूपंदीपंतथैवच । शालिनासक्तुभिर्वापिशाकैर्वाप्यथनिर्वपेत् ॥ प्रथमेहनियत्द्रव्यंतदेवस्याद्दशाहिकम् **मदनरत्नमात्स्ये** तैजसंमृन्मयंवाथपात्रंसंशोध्ययत्नतः । लौकिकाग्न्यावधिश्रित्यपचेदन्नंघृतप्लुतम् ॥ स्नात्वाथतिलसंमिश्रंप्रदद्याद्दर्भसंस्तरे **शुद्धितत्त्वेदेवजानीयेचब्राह्मे** प्रथमेहनियोदद्यात्प्रेतायान्नंसमाहितः अन्नंनवसुचान्येषुसएवप्रददात्यपि ॥ मृन्मयंभांडमादायनवंस्नातःसुसंयुतः । तंडुलप्रसृतिंतत्रत्रिःप्रक्षाल्यपचेत्स्वयम् ॥ सपवित्रैस्तिलैर्म्मिश्रंकृमिकेशविवर्जितम् द्वारोपांतेततःक्षिप्त्वाशुद्धांवागौरमृत्तिकाम् ॥ भूपृष्ठेसंस्तरेदर्भान्याम्याग्रान्देशसंभवान् ॥ ततोवनेजनंदद्यात्संस्मरन्गोत्रनामनी ॥ तिलसर्पिर्मधुक्षीरैःसंसिक्तंतप्तमेवहि ॥ दद्यात्प्रेतायपिंडंतुदक्षिणाभिमुखःस्थितः ॥ अर्घ्यैःपुष्पैस्तथाधूपै

दीपैस्तोयैश्चशीतलैः ।ऊर्णातंतुमयैःशुद्धैर्वासोभिःपिंडमर्च्चयेत् ॥ दिवसेदिवसे देयःपिंडएवंक्रमेणतु । सद्यःशौचेप्रदातव्याःसर्वेपियुगपत्तथा ॥ त्र्यहाशौचे पिदातव्यस्त्रयःपिंडाःसमाहितैः ॥ द्वितीयेचतुरोदद्यादस्थिसंचयनंतथा ॥ त्रींस्तुदद्यात्तृतीयेह्निवस्त्रादिक्षालयेत्ततः । दशाहेपिचदातव्यःप्रथमेत्वेकएव हि ॥ एकस्तोयांजलिस्त्वेवंपात्रमेकंचदीयते ॥ द्वितीयेद्वौतृतीयेत्रीनित्याद्युक्त्वाएवंस्युःपंचपंचाशत्तोयस्यांजलयःक्रमात् ॥ तोयपात्राणितावंतिसंयुक्ता नितिलादिभिरिति ॥ पात्रंकुंभः ॥अत्राहःपदमहोरात्रपरम् ॥ तेनरात्रावपि देयइतिगौडाः ॥ दिवसपदाद्रात्रौनेतिमैथिलाः ॥ सएवेत्युक्तेसपिंडेनदशपिंडे प्रक्रांतेपुत्रागमेपिसनदद्यात् असगोत्रःसगोत्रोवेतिप्रागुक्तेः ॥ दाहकर्तैवद शाहंकुर्य्यादितिमिताक्षरायाम् **शुद्धितत्त्वेवायवीयेपि** असगोत्रः सगोत्रो वायदिस्त्रीयदिवापुमान् । यश्चाग्निदाताप्रेतस्यपिंडंदद्यात्सएवहीति **तत्रैव** पू रकेणतुपिंडेनदेहोनिष्पाद्यतेयतः । कृतस्यकारणायोगात्पुनर्नावर्ततेक्रिया **शुद्धिप्रकाशेवायवीयेपि** निवर्तयतियोमोहात्क्रियामन्यनिवार्तिताम् ॥ विधिघ्नस्तेनभवतिपितृहाचोपजायते ॥ तस्मात्प्रेतक्रियायेनकेनापिचकृता यदि । नतांनिवर्तयेत्प्राज्ञःसतांधर्ममनुस्मरन्निति **आदिपुराणे** पितृशब्दं स्वधांचैवनप्रयुंजीतकार्हीचित् । अनुशब्दंतथाचेहप्रयत्नेनाविवर्जयेत् ॥ उप तिष्ठतामर्यांपिंडःप्रेतायेतिसमुच्चरेत् **क्रियानिबंधेव्यासः** प्रेतायपिंडंदत्वातुत तोश्नीयाद्दिनात्यये **भविष्ये** ओदनामिषसक्तूनांशाकमूलफलादिषु । प्रथमे हनियद्दद्यात्तद्दद्यादुत्तरेहनि ॥ गृहद्वारिश्मशानेवातीर्थेदेवगृहेपिवा ॥ य त्राद्येदीयतेपिंडस्तत्रसर्वंसमापयेत् **ब्राह्मे** शिरस्त्वाद्येनपिंडेनप्रेतस्यक्रियते सदा । द्वितीयेनतुकर्णाक्षीनासिकाश्चसमासतः ॥ गलांसभुजवक्षांसितृतीये नयथाक्रमम् ॥ चतुर्थेनतुपिंडेननाभिर्लिंगगुदानिच ॥ जानुजंघेतथापादौपं चमेनतुसर्वदा । सर्वमर्माणिषष्ठेनसप्तमेनतुनाडयः ॥ दंतलोमान्यष्टमेनत्री र्यंतुनवमेनच । दशमेनतुपूर्णत्वंतृप्तताक्षुद्विपर्ययइति **याज्ञवल्क्येनतु** पिंड यज्ञावृतादेयंप्रेतायान्नंदिनत्रयमित्युक्तम् ॥ अत्रफलतारतम्यंज्ञेयमितिविज्ञा

नेश्वरः ॥ तेनत्र्यहाशौचपरत्वंदेवयाज्ञिकोक्तंचिंत्यम् ॥ आशौचस्यह्रासेपि पिंडान्दद्याद्दशैवत्वितिवचनाच्च ॥ दिनत्रयावश्यकत्वार्थमितिहारलतादयः **शातातपः** जलमेकादशाहमाकाशेस्थाप्यंक्षीरंचमृन्मये **पारस्करः** मृन्मये तांरात्रिक्षीरोदकेविहायसिनिदध्युः ॥ प्रेतात्रस्वाहीत्युदकंपिबचेदमितिक्षीरम् ॥ इदंरात्रावेतिगौडाः **गारुडेतु** अपक्केमृन्मयेपात्रेदुग्धंदद्याद्दिनत्रयमित्युक्तम् **हेमाद्रौपाद्मेतुदशाहमुक्तम्** तस्मान्निधेयमाकाशेदशरात्रंपयोजलम्। सर्वतापोपशांत्यर्थमध्वश्रमविनाशनं **देवजानीयेकारिकायाम्** तत्रप्रेतोपकृतयेदशरात्रमखंडितम्। कुर्यात्प्रदीपंतैलेनवारिपात्रंचमार्तिकम्। भोज्यात्भोजनकालेतुभक्तमुष्टिंचनिर्वपेत् ॥ नामगोत्रेणसंबुध्याधरिन्यांपितृयज्ञवत् **शातातपः** भूलोकात्प्रेतलोकंतुगंतुंश्राद्धंसमाचरेत् ॥ तत्पाथेयंहिभवतिमृतस्यमनुजस्यतु **अथदशाहमध्येदर्शपातेनिर्णयः। भविष्ये** प्रवृत्ताशौचतंत्रस्तुयदिदर्शप्रपद्यते। समाप्यचोदकंपिण्डन्स्नानमात्रंसमाचरेत् **ऋष्यशृंगः**आशौचमन्तरादर्शोयदिस्यात्सर्ववर्णिनाम्। समाप्तिप्रेततंत्रस्य कुर्यादित्याहगौतमः **पैठीनसिः** आद्येदावेवकर्तव्या प्रेतपिण्डोदकक्रिया। द्वितैरैदवेतुकुर्वाणः पुनःशावंसमश्नुते **मातापित्रोस्तु**। **श्लोकगौतमः** अन्तर्दशाहेदर्शश्चेत्तत्रसर्वसमापयेत्। पित्रोस्तुयावदाशौचं दद्यात्पिण्डान्जलाञ्जलीन् ॥ इदमपित्र्यहमध्येदर्शपाते ॥ तदूर्ध्वंदर्शेतुपित्रोरपितंत्रंसमाप्यमेव पित्रोराशौचमध्येतु यदिदर्शःसमापतेत्। तावदेवोत्तरंतंत्रंपर्यवस्येत्त्र्यहात्परमितिगालवोक्तेः ॥ अन्येषान्तुत्र्यहमध्येपिसमाप्तिरितिपराशरमाधवीयेनिर्णयामृतेचोक्तम् **कालादर्शेपि** दर्शोदशाहमध्येस्यादूर्ध्वंतंत्रंसमापयेत्। त्रिरात्रादुत्तरंपित्रोर्मृतावितिविनिश्चयः ॥ मदनपारिजातेतुगालवीयमापदनौरसपुत्रादिविषयम् ॥ त्र्यहोर्ध्वमपिपित्रोर्नतंत्रसमाप्तिरित्युक्तम् ॥ मदनरत्नेप्येवम् ॥ ममतुदेशाचाराद्व्यवस्थेतिप्रतिभाति।**अथास्थिसंचयः** तत्राश्वलायनेनचकृष्णपक्षेएकादशीत्रयोदशीदर्शेषुआषाढी फाल्गुनीप्रौष्ठपदीभिन्नर्क्षेउक्तम्॥ तदाशौचमध्येऽसम्भवेतदूर्ध्वंचप्रागब्दात्करणेज्ञेयम् **आ**

शौचमध्येतुमदनरत्नेसंवर्तःप्रथमेह्नितृतीयेवासप्तमेनवमेतथा अस्थिसंचयनं कार्यदिनेतद्गोत्रजैःसह **छंदोगपरिशिष्टेतु** अपरेद्युस्तृतीयेवाअस्थिसंचयनंभवेदितिद्वितीयेप्युक्तम् ।विष्णुकात्यायनौसंचयनंचतुर्थ्यामिति **माधवीयेयमः** भौमार्कमंदवारेषुतिथियुग्मेविवर्जयेत् वर्जयेदेकपादर्क्षेद्विपादर्क्षेस्थिसंचयम् प्रदातृजन्मनक्षत्रेत्रिपादर्क्षेविशेषतः **ब्राह्मे** चतुर्थेब्राह्मणानांतुपंचमेहनिभूभृताम् । नवमेवैश्यजातीनांशूद्राणांदशमात्परम् दशमेहनीतिवापाठः **शौनकः**पालाशेष्वस्थिदाहेचसद्यःसंचयनंभवेत् ॥ काम्यमरणेतुतस्यत्रिरात्रमाशौचम् ॥ द्वितीयेत्वस्थिसंचयइत्युक्तम् **अंगिराः** प्रेतोभूतंतथोद्दिश्ययःशुचिर्नकरोतिचेत् । देवतानांतुयजनंतंशपत्यथदेवताः ॥ तद्विधिःस्वस्वसूत्रेभट्टकृतौज्ञेयः **हेमाद्रौनागरखंडे** त्रीणिसंचयनस्यार्थेतानिवैश्नृणुसांप्रतम् । यत्रस्थानेभवेन्मृत्युस्तत्रश्राद्धंप्रकल्पयेत् ॥ एकोद्दिष्टंततोमार्गेविश्रामोयत्रकारितः ॥ ततःसंचयनस्यार्थेतृतीयेश्राद्धमिष्यते **अपरार्केमदनरत्नेचब्राह्मे** सद्यःशौचेतथैकाहेसद्यःसंचयनंभवेत् । त्र्यहाशौचेतृतीयेह्निकर्तव्यस्त्वस्थिसंचयः **तत्रैव** श्मशानदेवतायागंचतुर्थेदिवसेचरेत् । मृन्मयेषुचभांडेषुकुंभेषुरुचकेषुवा ॥ सुपक्वैर्भक्ष्यभोज्यैश्चपायसैःपानकैस्तथा । फलैर्मूलैर्वनोत्थैश्चपूज्याःक्रव्याददेवताः ॥ धूपोदीपस्तथामाल्यमर्घ्यंदेयंत्वरान्वितैः । तत्रपात्राणिपूर्णानिश्मशानाग्नेःसमंततः ॥ निवेदयद्भिर्वक्तव्यंतैःसर्वैरनहंकृतैः ॥ नमःक्रव्यादमुख्येभ्योदेवेभ्यइतिसर्वदा ॥ येत्रश्मशानेदेवाःस्युर्भगवंतःसनातनाः । तेस्मत्सकाशाद्बलिंतुबलिमष्टांगमक्षयं ॥ प्रेतस्यास्यशुभान्लोकान्प्रयच्छंतुचशाश्वतान् ॥ अस्माकमायुरारोग्यंसुखंचददतांचिरम् ॥ एवंकृत्वाबलीन्सर्वान्क्षीरेणाभ्युक्ष्यवाग्यतः । एवंदत्वाबलिंचैवदद्यात्पिंडत्रयंबुधः ॥ एकंश्मशानवासिभ्यःप्रेतायैवतुमध्यमम् । तृतीयंतत्सखिभ्यश्चदक्षिणासंस्थमादरात् ॥ ततोयज्ञियवृक्षोत्थांशाखामादायवाग्यतः ॥ प्रेतस्यास्थीनिगृह्णातिप्रधानांगोद्भवानिच ॥ शिरसोवक्षसोःपाण्योःपार्श्वाभ्यांचैवपादतः। पंचगव्येनसंस्नाप्यक्षौमवस्त्रेणवेष्टयच ॥ प्रक्षिप्यमृन्मयेभांडेनवेसाच्छादने

शुभे॥अरण्येवृक्षमूलेवाशुद्धेसंस्थापयत्यपि। गृहीत्वास्थीनितद्भस्मनीत्वातोये विनिक्षिपेत्॥ ततःसंमार्जनंभूमेःकर्तव्यंगोमयांबुभिः। पूजांचपुष्पधूपाद्यैर्बलि भिःपूर्ववत्क्रमादिति **अथतीर्थेस्थिक्षेपविधिःतत्रैव** ततस्थानाच्छनकैर्नीत्वा कदाचिज्जाह्नवीजले।कश्चित्क्षिपतिसत्पुत्रोदौहित्रोवासहोदरः॥मातुःकुलंपि तृकुलंवर्जयित्वानराधमः। अस्थीन्यन्यकुलस्थस्यनीत्वाचांद्रायणंचरेत् **तत्रै वब्रह्मांडपुराणे** अस्थीनिमातापितृपूर्वजानांनयंतिगंगामपियेकथंचित्। स ह्यांधवस्यापिदयाभिभूतास्तेषांतुतीर्थानिफलप्रदानि॥ स्नात्वाततःपंचगव्ये नसिक्त्वाहिरण्यमध्वाज्यतिलैश्चयोज्य। ततस्तुमृत्पिंडपुटेनिधायपश्यन्दिशं प्रेतगणोपरूढां॥ नमोस्तुधर्मायवदेत्प्रविश्यजलंसमेप्रीतइतिक्षिपेच्च। उ त्थायभास्वंतमवेक्ष्यसूर्यसदक्षिणांविप्रमुखायदद्यात्॥ एवंकृतेप्रेतपुरस्थित स्यस्वर्गेगतिःस्यात्तुमहेंद्रतुल्या **यमः** गंगातोयेषुयस्यास्थिक्षिप्यतेशुभकर्म णः नतस्यपुनरावृत्तिर्ब्रह्मलोकात्सनातनात् **तथा** अस्तंगतेगुरौशुक्रे तथा मासेमलिम्लुचे। गंगायामस्थिनिक्षेपंनकुर्यादितिगौतमः॥ दशाहांतर्नदो षः॥ दशाहस्यांतरेयस्यगंगातोयेस्थिमज्जति। गंगायांमरणंयाद्दक्तादृक् फलमवाप्नुयादितिमदनरत्नेवृद्धमनूक्तेः **शौनकः** शौनकोऽहंप्रवक्ष्यामि अस्थिक्षेपविधिंक्रमात्। आदौग्रामाद्बहिर्गत्वास्नानंकुर्य्यात्सचैलकं॥ प्रो क्षयेत्पंचगव्येनभुवंमंत्रैर्विचक्षणः। गायत्र्याद्यैःपंचगव्यमंत्रैर्निखातास्थिभू मिंप्रोक्षेदित्यर्थः॥ उपसर्पादिभिर्मंत्रैःप्रार्थनंखननंतथा। मृत्तिकोद्धरणं चास्थ्नाग्रहणंचयथाक्रमम्॥ उपसर्पेतिचतुर्भिर्मंत्रैःक्रमेणप्रार्थनादिज्ञेयम्॥ स्नात्वास्थिशुद्धिंकुर्वीतएतोन्विंद्रेतिसूक्ततः। स्पृष्ट्वास्पृष्ट्वाततःस्नानंपञ्चग व्येनशुध्यति॥ दशस्नानानिकुर्व्वीततत्तन्मंत्रैर्विचक्षणः। गोमूत्रंगोमयं क्षीरंदधिसर्पिःकुशोदकम्। भस्ममृन्मधुआदीनिमंत्रतस्तानिवैदश॥ कुशैः संमार्ज्जयेदस्थिन्यतोदेवेतिमंत्रतः। एतोन्विंद्रंशुचिर्व्वेतिनतमंहइतीतिच॥ पावमानीर्ममाग्नेश्चरुद्रसूक्तंयथाक्रमम्॥ एतैःकुशैर्मार्ज्जनम्॥ हेमश्राद्धंत तःकुर्य्यात्पितॄनुद्दिश्ययत्नतः। पिण्डदानंप्रकुर्व्वीततताश्रतिलतर्पणम्॥

अस्थिक्षेपांगंचेदम् ॥ अजिनंकंबलादर्भागोकेशाःशाणमेवच । भूर्ज्यपत्रंतालपत्रंसप्तधावेष्टनंस्मृतम् ॥ हेमञ्चमौक्तिकंरौप्यंप्रवालंनीलकन्तथा । निक्षिपेदस्थिमध्येतुशुद्धिर्भवतिनान्यथा ॥ ततोहोमंप्रकुर्वीत तिलाज्येनविचक्षणः । उदीरतेतिसूक्तेनहुनेदष्टोत्तरंशतम् ॥ ततोगत्वाक्षिपेत्तीर्थेस्पर्शेदोषोन विद्यते ॥ मूत्रंपुरीषाचमनंकुर्वन्नस्थीनिधारयेत् । अत्रदशदानंवैतरणीऋणमोक्षपापधेनुदानमुक्तम् दिवोदासीयेकाशीखण्डे धनंजयोपिधर्मात्मा मातृभक्तिपरायणः । आदायास्थीन्यथोमातुर्गंगामार्गंस्थितोभवत् ॥ पंचगव्येन संस्नाप्यतथापंचामृतेनवै । यक्षकर्दमलेपेनक्षिप्त्वापुष्पैःप्रपूज्यच । आवेष्टच्य नेत्रवस्त्रेणततःपट्टांबरेणच ॥ततःसुरसवस्त्रेणततोमांजिष्ठवाससा ॥ नेपालकंबलेनाथमृदाचाथविशुद्धया ॥ताम्रसंपुटकेकृत्वामातुरंगोन्यथोवहेत् व्यासः पट्टवस्त्रंचकौशेयंमांजिष्ठंश्वेतवस्त्रकम् । कंबलंशाणपट्टंचअजिनंचतथोत्तरम् ॥ एषांविकल्पः ॥ अन्यश्चात्रविशेषस्त्रिस्थलीसेतौदिवोदासीयेचज्ञेयः संचयनोत्तरंश्राद्धमाहाश्वलायनः श्राद्धमस्मैदद्युरितिस्मृत्यर्थसारे ॥ संचयनेकृतेमनुष्यलोकंगच्छतःपाथेयश्राद्धमामेनकार्यमिति ॥ अनुपनीतस्यनसंचयनम् अथनवश्राद्धंपृथ्वीचंद्रोदयेंगिराः प्रथमेह्नितृतीयेचपंचमेसप्तमेतथा।नवमैकादशेचैवतन्नवश्राद्धमुच्यतेशिवस्वामिःनवश्राद्धानिपंचाहूराश्वलायनशाखिनः । आपस्तंबाःषडित्याहुर्विभाषात्वितरेषुहि ॥ पंचएकादशाहिकंविना ॥ मरणाद्विषमेषुदिनेष्वेकैकंनवश्राद्धंकुर्यादानवमाद्यदिनमेवच्छिद्यतेकादशेतत्कुर्यादितिमदनरत्नेबौधायनोक्तेः ॥ भविष्ये नवसप्तविंशांराज्ञां नवश्राद्धान्यनुक्रमात् । आद्यंतयोर्वर्णयोस्तुषडित्याहुर्महर्षयः हेमाद्रौ वृद्धवसिष्ठः अलब्ध्वातुनवश्राद्धं प्रेतत्वान्नवमुच्यते । अर्वाक्तुद्वादशाहस्यलब्ध्वातरतिदुष्कृतम् ॥ अतःषडेव ॥ एतान्येवविषमश्राद्धानीत्युच्यंते नागरखंडेतु पंचमेसप्तमेतद्वदष्टमेनवमेतथा । दशमैकादशेचैवनवश्राद्धानितानिचेत्युक्तम् कात्यायनस्तु चतुर्थेपंचमेचैवनवमैकादशेतथा । यदत्रदीयतेजंतोस्तन्नवश्राद्धमुच्यते ॥ प्रथमेसप्तमेचैवेत्याद्यपादेव्यासपाठः बह्

वृचानांतु नवश्राद्धदशाहानि नवमिश्रंतूषड्ऋतुनित्युक्तंनारायणवृत्तौ **दीपिकायाम्** अथतनुयादाद्ये चतुर्थेदिनेश्राद्धं ॥ पंचमसप्तमाष्टनवदिग्युग्मेषु युग्मद्विजैः ॥ प्रथमेह्नितृतीयेह्निपंचसप्तनवस्वपि । द्वौद्वौपिंडौप्रदातव्यौशेषेवेकंतुविन्यसेत् ॥ एकोविषमश्राद्धेवयवपिंडश्चैकइति द्वावित्यर्थः ॥ अत्रशाखाभेदाद्वचवस्था **अपरार्केभविष्ये** नवश्राद्धंत्रिपक्षंचषण्मासंमासिकानिच । नकरोतिसुतोयस्तुतस्याधःपितरोगताः **वाराहे** गतोसिदिव्यलोकंत्वं कृतांतविहितात्पथः । मनसावायुभूतेनविप्रेत्वाहंनियोजये । पूजयिष्यामिभोगैस्त्वामेवंविप्रंनिमंत्रयेत् **आवाहनेपितत्रैव** इहलोकंपरित्यज्यगतोसिपरमांगतिम् । मनसावायुभूतेनविप्रेत्वाहंनियोजयइति **तत्रैवबह्वृचपरिशिष्टे** अनूदकंमधूपंचगंधमाल्यविवर्जितम् ॥ नवश्राद्धममंत्रञ्चपिण्डोदकविवर्जितम् ॥ उदकमर्घ्यः ॥ पिण्डोदकंशुंधंतांपितरइत्यवनेजनादि ॥ एकोद्दिष्टेषुसर्व्वेषुनस्वधानाभिरम्यताम् । नान्नौकरणमंत्रश्च एकंवात्रतिलोदकम् ॥ अनपत्येषुसर्व्वेषु नस्वधानाभिरम्यताम् । स्वस्त्यस्तुविसृजेदेवं सकृत्प्रणतवर्ज्जितम् ॥ एकोद्दिष्टस्यपिण्डेतु अनुशब्दोनविद्यते । पितृशब्दंनकुर्व्वीत पितृहाचोपजायते ॥ सपिण्डनात्प्रागितिहेमाद्रिः । तेनस्वधांप्रयुंजीत प्रेतश्राद्धेदशाहिके ॥ इति ऋष्यशृङ्गोक्तौदशाहिकोक्तेरेकादशाहेस्वधाप्रयोगएवेति हारलतापरास्ता **रत्नावल्याम्** आशिषोद्विगुणादर्भाजयाशीः स्वस्तिवाचनम् । पितृशब्दःस्वसंबद्धःशर्म्मशब्दस्तथैवच ॥ पात्रालंभोवगाहश्चउल्मुकोल्लेखनादिकम् । तृप्तिप्रश्नश्चविकिरःशेषप्रश्नस्तथैवच ॥ प्रदक्षिणाविसर्ग्गश्चसीमांतगमनंतथा । अष्टादशपदार्थाश्चप्रेतश्राद्धेविवर्जयेत् ॥ अत्रस्वधापितृतमःशब्दानांतिलोसीतिमंत्रेप्रेतशब्दोहेनतूष्णींवातिलदानम् ॥ तूष्णीमर्घ्यदानम् ॥ अमुष्मैस्वाहेतिप्रेतनाम्नापाणिहोमः ॥ नाम्नाएकःपिण्डः ॥ निनयनमंत्रेऊहः ॥ अनुमंत्रणादित्वमंत्रकम् ॥ अभिरम्यतामितिविसर्ज्जनम् ॥एवंनवश्राद्धवर्ज्जैकोद्दिष्टेषु ॥ नवश्राद्धेत्वमंत्रकंसर्वमितिनारायणवृत्तिः **क्रियानिबंधेः** उत्तानंस्थापयेत्पात्रमेकोद्दिष्टेसदाबुधः।न्युब्जंतुपार्वणेकुर्यात्तस्यो

पारिकुशान्यसेत्॥नवश्राद्धंगृहेकुर्याद्भार्यायत्राग्नयोपिवा॥सपिंडीकरणातानिप्रे तश्राद्धानियानिवै॥तानिस्युर्लौकिकेवह्नावित्याहत्वाश्वलायनः॥इदंसंभवेन्नेन कार्यम्।नवश्राद्धेषुयच्छिष्टंगृहपर्युषितञ्चयत्।दंपत्योर्भुक्तशेषञ्चनतद्भुंजीतक र्हिचिदित्यंगिरोवचनलिंगात्॥द्वाभ्यांतदातुकृच्छ्राभ्यांशुद्धिस्यात्तुविवेकिना मितिब्राह्मेउक्तम् **विष्णेतुनिर्णयामृतेकण्वः** नवश्राद्धंमासिकंचयद्यदंतरितंभ वेत्तत्तदुत्तरसातंत्र्यादनुष्ठेयंप्रचक्षतेहेमाद्रौगालवःशावेतुसूतकंचेत्स्यात्तनि शायांचमृतौतथा।नवश्राद्धानिदेयानियथाकालंयथाक्रमम्॥निशायामाशौचां तेद्यहवृद्धौ **अन्वारोहणेतु** नवश्राद्धानिसर्वाणिसपिंडीकरणंपृथक्। एकएव वृषोत्सर्गोगौरेकातत्रदीयते **आशौचांत्यदिनेकार्यमुक्तंब्राह्मे** यस्ययस्यतुव र्णस्ययद्यत्स्यात्पश्चिमंत्वहः। सतत्रवस्त्रशुद्धिंचगृहशुद्धिंकरोत्यपि॥ समा प्यदशमंपिंडंप्रेतस्पृष्टेतुवाससी। अंत्यानामाश्रितानांचत्यक्त्वास्नानंकरोति च॥ श्मश्रुलोमनखानांचयत्स्याज्यंतज्जहात्यपि। गौरसर्षपकल्केनतिलक ल्केनसंयुतम्॥ शिरःस्नानंततःकृत्वातोयेनाचम्यवाग्यतः। वृषभंगांसुवर्णंच स्पृष्ट्वाशुद्धोभवेन्नरः **क्रियानिबंधेगृह्यकारिकायाम्** अत्रपिंडत्रयंदद्युस्तत्स खिभ्यस्तथादिमम्॥ प्रेतायमध्यमंतद्वत्तृतीयंचयमायवै **तथा** कर्त्रात्रप्रार्थि ताःसंतोज्ञातिसंबंधिबांधवाः। दद्यूरभ्यंगतःपूर्वैस्त्रींस्त्रीन्धर्मोदकाञ्जलीन्॥ पू र्ववन्नामगोत्राभ्यांनियमोनेहकश्चन **मदनरत्नेविष्णुहारीतौ** आशौचांते कृतश्मश्रुकर्माणस्तिलकल्कैः सर्षपकल्कैर्वास्नाताः शुक्लवाससोगृहंप्रविशेयु स्तत्रशांतिकंकृत्वाब्राह्मणपूजनंकुर्युरितिदेवलःदशमेहनिसंप्राप्तेस्नानंग्रामाद्ब हिर्भवेत्। तत्रत्याज्यानिवासांसिकेशश्मश्रुनखानिच **अपरार्केबृहस्पतिः** नवमेवाससांत्यागोनखरोम्णांतथांतिमे **तत्रैवव्यासः** आशौचांत्यदिनेक्षौरंज नन्यांचगुरौमृते॥ एतत्प्रेताल्पवयसामित्याहापस्तंबः॥अनुभाविनांचपरि वापनमिति॥ अनुभाविनःकनिष्ठाइतिविज्ञानेश्वररत्नाकरादयः॥ आशौ चमनुभवतांपुंसांसर्वाशौचेतुमुंडनम्॥ आज्ञयानरपतेर्द्विजन्मनांदारकर्म्म मृतसूतकेषुच। बंधमोक्षमखदीक्षणेष्वपिक्षौरमिष्टमखिलेषुचोडुषु॥ इतिर

त्नमालोक्तेर्जननाशौचेपीतिशुद्धितत्त्वादयः ॥ अत्रदेशाचारतोन्यवस्था ॥ परंशिखावर्ज्यम् ॥ केशश्मश्रुनखलोमानिवापयीतशिखावर्ज्यमितिगोभिलोक्तेः **यत्वापस्तंबः** नसमावृत्तावपेयुरन्यत्रविहारादित्येके ॥ विहारोदर्शादियागः ॥ तेनविनासमावृत्तागृहस्थानवपेयुरित्यर्थः **यच्च** वृथाछिनत्तियः केशान्तमाहुर्ब्रह्मघातिनमितितत् ॥ केशश्मश्रुधारयतामग्र्याभवतिसंततिरितिदानधर्मोक्तंकाम्यपरम् ॥ अनुभाविनःपुत्रादयइत्येके ॥ पुत्रः पत्नीचवपनंकुर्यादंतेयथाविधि । पिंडदानोचितोन्योपिकुर्यादित्थंसमाहितइत्यपरार्केव्यासोक्तेः **यत्तुमिताक्षरायाम्** द्वितीयेहनिकर्तव्यंक्षुरकर्मप्रयत्नतः । तृतीयेपंचमेवापिदशमेवाप्रदानतइति ॥ आप्रदानतइतिचतुर्थादीनि तत्प्रथमादिनेसम्भवेज्ञेयम् ॥ अलुप्तकेशोयःपूर्व्वं सोत्रकेशान्प्रवापयेत् । द्वितीयेद्वितृतीयेद्विपञ्चमेसप्तमेपिवा ॥ यावच्छ्राद्धंप्रदीयेततावदित्यपरंमतमितिमाधवीयेमदनरत्नेचबौधायनोक्तेः ॥ मदनपारिजातेतुदशमेप्रथमेचसमुच्चयउक्तः **यत्तु** दशमंपिण्डमुत्सृज्य रात्रिशेषेशुचिर्भवेदिति ॥ तदेकादशाहश्राद्धांगविप्रनिमंत्रणार्थज्ञेयम् **अथैकादशाहःमनुः** विप्रःशुध्यत्यपःस्पृष्ट्वाक्षत्रियोवाहनायुधैः । वैश्यःप्रतोदंरश्मीन्वायष्टिंशूद्रःकृतक्रियः **शुद्धितत्वेदेवलः** आद्याहःसुनिवृत्तेषु सुस्नाताःकृतमंगलाः । आशौचात्द्विजमुच्यन्तेब्राह्मणान्स्वस्तिवाच्यच **याज्ञवल्क्यः** आद्यमेकादशेहनिक्षत्रियाद्यैराशौचेप्येकादशेह्निश्राद्धंकार्य्यम्॥आद्यंश्राद्धमशुद्धोपि कुर्य्यादेकादशेहनि ॥ कर्तुस्तात्कालिकीशुद्धिरशुद्धिःपुनरेवसइति हेमाद्रौशंखोक्तेः **पैठीनसिः** एकादशेह्नियच्छ्राद्धंतत्सामान्यमुदाहृतम् । चतुर्णामपिवर्णानांसूतकंतुपृथक्पृथक्पृथक् **यत्तुमरीचिः** आशौचांतेततःसम्यक् पिण्डदानंसमाप्यते । ततःश्राद्धंप्रदातव्यंसर्व्ववर्णेष्वयंविधिरिति ॥ तत्सर्व्ववर्णानांदशाहाशौचपरम् **यत्तुविष्णुः** अथाशौचापगमइति **यच्चगौडग्रंथेहारीतः** श्वोभूतेएकोद्दिष्टंकुर्य्यात् **यच्च वैजवापः**ऊर्ध्वंदशम्याअपरेद्युरितितद्विप्रविषयम्॥एतेनदशमपिंडापकर्षपक्षेअवयवपिंडासमाप्तौकथमेकादशाहेश्राद्धमितिमूर्खोक्तिःपरास्ता ॥ वचनादा

शौचमध्येइवतत्राप्यविरोधात् **भविष्ये** एकादशम्योविप्रेभ्योदद्यादेकादशेहनि । भोजनंतत्रवैकस्मैब्राह्मणायमहात्मने **यत्तुमात्स्ये** एकादशेहनितथा विप्रानेकादशौवतु।क्षत्रादिःसूतकांतेतुभोजयेदयुजीद्विजानिति॥तद्रुद्रगणश्राद्धपरिमितिमदनपारिजातः॥गौडास्त्वस्माद्वचनात्क्षत्रियादीनामाशौचान्तएवेत्याहुः **रामायणेपि** समतीतेदशाहेतुकृतशौचोयथाविधि । चक्रेद्वादशिकंश्राद्धंत्रयोदशिकमेवच।द्वादशिकंद्वादशाहेननिवर्त्यंत्रयोदशाहश्राद्धंत्रयोदशिकंचतुर्दशाहविधेयंसपिण्डनपाथेयादि क्षत्रियाणांद्वादशाहाशौचेत्रयोदशेमहैकोद्दिष्टंचतुर्दशेसपिण्डनम् ॥ द्विविधवाक्यादेकादशाहाशौचांतयोर्व्विकल्पइत्येके ॥ सद्यः शौचादौयुद्धहतादेरेकादशाहः ॥ अन्येषांआशौचांतइतिवयम् **कौर्मे** एकादशेह्निकुर्व्वीतप्रेतमुद्दिश्यभावतः । द्वादशेवाह्निकर्तव्यमनिंद्येप्यथवाहनि ॥ निंद्यंप्रेतक्रियाकालयुक्तम् ॥ एकादशेतुनिषेधइत्युक्तंप्राक् **बृहस्पतिः** वस्त्रालंकारशय्यादिपितुर्यद्दाहनादिकम् ॥ गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्तेतदर्पयेत् ॥ श्रोत्रियाभोजनीयास्तुनवसप्ततत्र योदश । ज्ञातयोबांधवानिःस्वास्तथाचातिथयोपरे **देवयाज्ञिकनिबन्धे** एकादशसुविप्रेषुप्रेतमावाह्यभोजयेत् ॥ तत्राद्यायचशय्यादिदद्यादाद्यमितिस्मृतम् **विष्णुः** एकवन्मंत्रानूहेनैकोद्दिष्टेबहुवचनांतानेकवचनांतान्वदेदित्यर्थः ॥ एतत्तद्दृष्टार्थत्वे **अस्यविघ्नेगौणकालमाहहेमाद्रौबौधायनः** एकोद्दिष्टंश्वएवस्यात्द्वादशेहनिवापुनः ॥ अतऊर्ध्वमयुग्मेषुकुर्वीताहःस्वशक्तितः ॥ अर्धमासेथवामासिक्रतौसंवत्सरेपिवेति **तत्रैवलघुहारीतः** एकोद्दिष्टंतुकुर्वीतपाकेनैवसदास्वयम् । अभावपाकपात्राणांतदहःसमुपोषणम् **गोभिलः** ब्राह्मणंभोजयेदाद्येहोतव्यमनलेथवा । पुनश्चभोजयेदेकंद्विरावृत्तिर्भवेदिति ॥ एतदाद्यमासिकाद्याब्दिकयोःसित्यर्थमितिभट्टाः । तेनमहैकोद्दिष्टंषोडशश्राद्धान्निन्नमेव ॥ अतएवाद्यंसर्वैकोद्दिष्टप्रकृतिभूतमेकादशइतिविज्ञानेश्वरः ॥अन्येत्वाद्यमासिकाब्दिकयोराद्यमेकादशेहनीतिनियमादभेदमाहुः ॥ द्वयोस्तंत्रत्वबाधार्थंगालवीयमित्यन्ये **युद्धहतादौतुहेमाद्रौपृथ्वीचंद्रोद**

येपैठीनसिः सद्यःशौचेपिदातव्यंप्रेतस्यैकादशेहनि । सएवदिवसस्तस्यश्रा द्धशय्यासनादिषु ॥ एवमेकादशाहादौ ॥ अतोत्रद्वितीयेह्येकादशाहंवदन् ढौढूः शूलपाणिःस्मार्तगौडश्चपरास्तः ॥ एतेनाद्यमेकादशेहनीत्याशौचानं तरदिनपरमितिविष्णूक्तेः ॥ प्रागुक्तशंखादिवचनानांचानाकरत्वादितिवदं तःकल्पतरुवाचस्पतिप्रमुखाः सर्वमहानिबंधविरोधादुपेक्ष्याः **उशनाः** श्य हाशौचेपिकर्तव्यमाद्यमेकादशेहनि । अतीतविषयेसद्यस्त्र्यहोर्ध्ववातिदिष्य ते **याज्ञवल्क्यः** एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकम् । आवाहनाग्नौकर णरहितंत्वपसव्यवत् ॥ उपतिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जनेअभिर म्यतामितिवदेयुस्तेभिरताःस्महेइति । अग्नौकरणनिषेधोन्यपरः ॥ बह्वृचा नांसर्वैकोद्दिष्टेषुतद्भवत्येवेत्युक्तंप्राक् ॥ स्वदितमितितृप्तिप्रश्नइतिकात्याय नः ॥ प्रथमेपात्रेसंस्रवानित्यस्य तृतीयेनापिधानस्यच बाधान्नपात्रन्युब्ज तेतिशूलपाणिः **प्रचेताः** नात्रपात्रालंभोनाशिषःप्रार्थयेत् **अत्रविशेषोहेमा द्रौवाराहे** श्मश्रुकर्मतुकर्तव्यंनखच्छेदस्तथैवच । स्नपनाभ्यंजनंदद्याद्विप्रा यविधिपूर्वकम् ॥ **तथा** उपवेश्यासनेभद्रेछत्रंतत्रप्रकल्पयेत् । पश्चादुपान हौदद्यात्सर्वाण्याभरणानिच **विष्णुः** दक्षिणांतंश्राद्धमुक्त्वादत्ताक्षय्योदकेषु चतुरंगुलपृथ्वीस्तावदंतरालस्तावदधःखातावितस्त्यायतास्तिस्रःकर्षूःकुर्यात् ॥ कर्षूणांसमीपेऽग्निमाधायपरिस्तीर्यैकैकस्मिन्नाहुतित्रयंजुहुयात् ॥ सोमाय पितृमतेस्वधानमोग्नयेकव्यवाहनाययमायांगिरस्वतेइति स्थानत्रयेप्राग्व पिंडानिर्वपणंदधिमधुघृतमांसैःकर्षूत्रयंपूरयित्वैतत्तइतिजपेत् ॥ शेषंनवश्रा द्धवत् ॥ अत्रसाग्नेरप्यंतेवैश्वदेवइत्युक्तंप्राक् ॥ इदंदशाहकर्त्रापुत्रेणवाकार्यमित्युक्तंक्रियानिबंधे **गृह्यकारिकायां** तिलोसिप्रेतदेवत्यःप्रेतलोकाद्धितोतकम् । मंत्रमुक्त्वातिलानेवंप्रक्षिपेदर्घ्यपात्रतः ॥ दक्षिणामुदकुंभंचसान्नं दत्वातथैवगाम् । तस्मैदद्याद्भुक्तशेषंतद्भाण्डान्यपिभाजनम् ॥ विप्राभावे भावेकोद्दिष्टम् ॥ अग्नौपायसंश्रपयित्वाज्यभागांतेतदग्रे श्राद्धप्रयोगंकृत्वा मौप्रेतमावाह्यगंधाद्यैः संपूज्यपृथिवीतेपात्रमित्यादिनान्नं संकल्प्योदीरतामव

रङ्त्यष्टाभिश्चतुरावृत्ताभिर्द्वात्रिंशदाहुतीर्हुत्वापिंडदानादिश्राद्धंसमापयेदिति **याज्ञवल्क्यः** एतत्सपिंडीकरणमेकोद्दिष्टंस्त्रियामपि **अथवृषोत्सर्गः** सचनित्यःकाम्यः ॥ नकरोतिवृषोत्सर्गसुतीर्थेवाजलांजलिम् ॥ नददाति सुतोयस्तुपितुरुच्चारएवसः ॥ उच्चारःपुरीषं ॥ एष्टव्याबहवःपुत्रायद्येकोपि गयांव्रजेत् । यजेतवाश्वमेधेननीलंवावृषमुत्सृजेदितिमत्स्यकौर्मोक्तेः ॥ एकादशोद्भिप्रेतस्ययस्यनोत्सृज्यतेवृषः । प्रेतत्वंसुस्थिरंतस्यदत्तैः श्राद्धशतैरपीतिषट्त्रिंशन्मतोनिंदाश्रुतेः ॥ एवंकृत्वाह्यवाप्नोतिफलंवाजिमखोदितम् । यमुद्दिश्योत्सृजेन्नीलंसलभेत्परमांगतिम् ॥ वृषोत्सृष्टःपुनात्येवदशतीतान्दशापरानिति देवीपुराणे भविष्यादौफलश्रुतेश्च **अयंद्वादशाहेउक्तो भविष्ये** चैत्र्यांवापितृतीयायांवैशाख्यांद्वादशेह्निवेति विष्णुधर्मेतुमृताहेप्युक्तः ॥ विषुवद्वितयेचैवमृताहेबांधवस्यचेति ॥ अयंगृहेनकार्यः ॥ नगृहेमोचयेन्नीलंकामयन्पुष्कलंफलमितिकालिकापुराणात् **कामधेनौ** वत्सराभ्यंतरेपित्रोर्वृषस्योत्सर्गकर्मणि । वृद्धिश्राद्धंनकुर्वीततदन्यत्रसमारभेत् **तल्लक्षणंतुब्राह्मे** लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः । श्वेतःखुरविषाणाभ्यांसनीलोवृषउच्यते ॥ श्वेतवर्णस्यमुखादीनिश्यामस्यवाश्वेतानियस्यसोपिनीलउक्तोमात्स्यादौ **देवीपुराणे** चतस्रोवत्सिकाभद्रा द्वेमासंभवतोपि वा ॥ यत्तुपठंति ॥ वृषोत्सर्जनवेलायांवृषाभावःकथंचन । मृद्भिःपिष्टैश्चदर्भैर्वावृषंकृत्वाविमोचयेत् ॥ नशक्यतेवृषोत्सर्गोहोमंवातत्रकारयेदितितन्निर्मूलम् ॥ तद्विधिर्हेमाद्रौभट्टकृतौचज्ञेयः ॥ अत्रदेवयाज्ञिकेनवृषोत्सर्गात्पूर्वं पुरुषसूक्तेनविष्णुरूपिप्रेतोद्देशेनविष्णुतर्पणमुक्तम् ॥ तत्रमूलंचिंत्यम् **पारस्करः** सव्येनपाणिनापुच्छंसमालंब्यवृषस्यतु । दक्षिणेनापआदायसतिलाःसकुशास्ततः ॥ प्रेतगोत्रंसमुच्चार्यअमुकस्मैइतिब्रुवन् । वृषएवमयादत्तस्तंतारयतुसर्वदा ॥ सहेमसतिलंभूमावित्युच्चार्यविनिक्षिपेत् **तथा** विधारयेन्नतंकश्चित् नचकश्चनवाहयेत् ॥ नदोहयेच्चताधेनूर्नचकश्चनबंधयेत् **स्त्रीषुविशेषःसंग्रहे** पतिपुत्रवतीनारी भर्तुरग्रेमृतायदि । वृषोत्सर्गनकुर्वीतगांदद्या

च्चपयस्विनीम् ॥ पतिपुत्रयोःसाहित्यंविवक्षितम् ॥ अन्वारोहणेपिगोदानमे वेत्युक्तंप्राक् ॥ आशौचांतरेपिवृषोत्सर्गाद्यमासिकश्राद्यादिदद्यादेवेत्युक्तम् **क्रियानिबंधेस्मृत्यंतरे** सूतकेमृतकेचैव द्वितीयंमृतकंयदि ॥ पिंडदानंप्रकुर्वीतवृषोत्सर्गंतथैवच ॥ नहन्यात्सूतकेकर्मद्वादशैकादशाहिकम् । शुद्धो वायदिवाशुद्धःकुर्यादेवाविचारयन्निति **अत्रपददानमुक्तंदेवजानीयेगारुडे। एकादशाहंप्रक्रम्य** तदह्निदीयतेसर्वंद्वादशाहेविशेषतः पदानिसर्ववस्तूनिवरिष्ठानित्रयोदशे ॥ योददातिमृतस्येहजीवतोप्यात्महेतवे । सुखीभूत्वा महामार्गे वैनतेयसगच्छति **तथा** आसनोपानहौछत्रंमुद्रिकाचकमंडलुः । भाजनंभाजनाधारोवस्त्राण्यष्टविधंपदम् **तथा** भाजनासनदानेनमुद्रिकाभोजनेनच । आज्ययज्ञोपवीतेनपदंसंपूर्णतांव्रजेत् ॥ महिषीरथगोदानात्सुखी भवतिनिश्चितम् । सर्वोपस्करयुक्तानिपदान्यत्रत्रयोदश ॥ योददातिमृतस्येहजीवन्नप्यात्महेतवे । सगच्छतिपरंस्थानंमहाकष्टविवर्जितः ॥ त्रयोदशपदानीत्थंप्रेतायैकादशेहनि । दातव्यानियथाशक्तितेनासौप्रीणितोभवेत् ॥ अन्नंचैवोदकंचैवोपानहौचकमंडलुः।छत्रंवस्त्रंतथायष्टिंलोहदंडंतथाष्टमम् ॥ अग्नीष्टिकांचदीपंचतिलांस्तांबूलमेवच । चंदनंपुष्पदानंचोपदानानिचतुर्दश ॥ योश्वंरथंगजंवापिब्राह्मणेप्रतिपादयेत् । स्वमहिम्नोनुसारेणतत्तत्सुखमवाप्नुयादिति अत्रमूलंचिंत्यम् ॥ **अथशय्यादानम् ॥ हेमाद्रौभविष्ये** तस्माच्छय्यांसमासाद्यसारदारुमयींदृढाम् । दंतपत्रचितांरम्यांहेमपट्टैरलंकृताम् ॥ हंसतूलीप्रतिच्छन्नांशुभदंडोपधानिकाम् ॥ प्रच्छादनपटीयुक्तां गन्धधूपादिवासिताम् । तस्यांसंस्थापयेद्धैमंहरिंलक्ष्म्यासमन्वितम् ॥ अत्रहरिस्थानेप्रेतम् ॥ उच्छीर्षकेघृतभृतंकलशंपरिकल्पयेत् ॥ ताम्बूलंकुंकुमक्षोदकर्पूरागरुचन्दनम् ॥ दीपिकोपानहौछत्रंचामरासनभाजनम् । पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानिचैवहि ॥ शयनस्थस्यभवति यदन्यदुपकारकम् । भृङ्गारकरकाद्यंतु पंचवर्णवितानकम् **मंत्रस्तु** यथानकृष्णशयनं शून्यंसागरजातया ॥ शय्याममाप्यशून्यास्तुतथाजन्मनिजन्मनि ॥ यस्माद्

शून्यंशयनंकेशवस्यशिवस्यच । अर्धंतदेव ॥ दत्वैवंतस्यसकलं प्रणिपत्य विसर्जयेत् । एकादशाहेपितथा विधिरेषःप्रकीर्तितः ॥ विशेषंचात्रराजेन्द्रक थ्यमानंनिशामय।तेनोपभुक्तंयत्किंचिद्वस्त्रवाहनभाजनम्॥ यद्यदिष्टंचतस्या सीत्तत्सर्वंपरिकल्पयेत् । तमेवपुरुषंहैमंतस्यांसंस्थापयेत्तदा ॥ पूजयित्वाप्रदा तव्या मृतशय्यायथोदिता **पाद्मे** मृतकांतेद्वितीयेह्निशय्यांदद्यात्सलक्षणाम्॥ कांचनंपुरुषंतद्वत्फलवस्त्रसमन्वितम् । संपूज्यद्विजदांपत्यंनानामणिविभूषित मुपवेश्यतुशय्यायां मधुपर्कंततोवदेत्॥ रजतस्यतुपात्रेणदधिदुग्धसमन्वित म् । अस्थिलालाटिकंगृह्यसूक्ष्मंकृत्वासपायसम्॥भोजयेद्द्विजदांपत्यं विधिरे षःसनातनः॥एषएवविधिर्दृष्टःपार्व्वतीयैर्द्विजोत्तमैः **एतत्प्रतिग्रहेत्रैवोक्त म्** गृहीतायांतुतस्यांवैपुनःसंस्कारमर्हति ॥ **शय्यादानफलंभविष्ये** स्वर्गेपुर न्दरपुरेसूर्यपुत्रालयेतथा।सुखंवसत्यसौजन्तुशय्यादानप्रभावतः॥आभूतसंप्ल वंयावत्तिष्ठत्यातंकवर्ज्जितइति **अथोदकुम्भः** । **हेमाद्रौस्मृतिसमुच्चये** एका दशाहात्प्रभृतिघटस्तोयान्नसंयुतः । दिनेदिनेप्रदातव्यो यावत्संवत्सरंसुतैः **लौगाक्षिः** यस्यसंवत्सरादर्वाक् सपिण्डीकरणम्भवेत् । मासिकंचोदकुम्भ चदेयंतस्यापिवत्सरम् **उत्तरार्धे** तस्याप्यन्नंसोदकुम्भन्दद्यात्संवत्सरंद्विजे इ ति याज्ञवल्क्यपाठः ॥ सपिण्डनापकर्षेऽस्यापकर्षप्राप्तेबाधकमिदमिति शूल पाणिःतन्न ॥ प्रकृतिविकाराभावेनतदन्तन्यायविषयत्वात् **मात्स्ये** यावद ब्दञ्चयोदद्यादुदकुम्भंविमत्सरः । प्रेतायान्नसमायुक्तं सोश्वमेधफलंलभेत्॥ केचिन्नयोदशाहमारभ्याहुस्तन्निर्मूलम् **देवयाज्ञिकः** सपिण्डनापकर्षेसंव त्सरंयावदुदकुम्भंअर्वागेवदद्यान्नोर्ध्वंप्रेतलोकगतस्यान्नंसोदकुम्भं प्रयच्छते तिगोविन्दराजधृताविष्णूक्तेः ॥ अन्नंचैवस्वशक्त्यातुसंख्यांकृत्वाब्दिकावधि । दातव्यंब्राह्मणेस्कन्द घटादौनिष्क्रयन्तुवा ॥ अपिश्राद्धशतैर्दत्तैरुदकुम्भं विनानराः । दरिद्रादुःखिनस्तात भ्रमन्तिचभवार्णवे ॥ तेनापकृष्यदातव्यं प्रेतस्याप्युदकुम्भकमितिगोभिलभाष्येस्कांदाच्चसपिण्डनात्प्रागेवतस्यविधा नादूर्ध्वंनिषेधादित्याह तन्न ॥ उदकुम्भेपार्वणविधिनानुपपत्तेरेवंव्याख्या

यांमानाभावान्मिताक्षरादिविरोधाच्च ॥ वचनञ्चयदिसमूलंतदावृद्धावपक र्षेविधत्ते ॥ प्रेतश्राद्धानिसर्वाणिसपिंडीकरणन्तथेतिहेमाद्रौशाठ्यायनोक्तेः॥ तस्याप्यन्नंसोदकुम्भमिति याज्ञवल्क्यविरोधाच्च **मदनरत्नेगौतमः** अदैवं पार्वणंश्राद्धं सोदकुम्भमधर्मकम्। कुर्यात्प्रत्याब्दिकाच्छ्राद्धात्संकल्पविधि नान्वहम् ॥ अधर्मकंब्रह्मचर्यादिनियमहीनम् ॥ एतन्मासिकवदेकोद्दिष्टंपा र्वणंकार्यम् ॥ अपरार्कस्तुसापिण्डीकरणेवृत्तेपृथक्त्वेनोपपद्यते। पृथक्त्वेतु कृतेपश्चात्पुनःकार्यासपिण्डनेति **लघुहारीतोक्तावपि** तस्याप्यन्नंसोदकुम्भं देयंसंवत्सरंद्विजेइति ॥ याज्ञवल्कीयेतस्येत्येकत्वोक्तेःसपिण्डनोत्तरमप्येको द्दिष्टमेवेत्याह ॥ अत्रपिण्डदानंकृताकृतम् ॥ अहरहरन्नमस्मैब्राह्मणायोद कुम्भञ्चदद्यात्पिण्डमप्येकेनिपृणंतीतिहेमाद्रौपारस्करोक्तेः ॥ श्राद्धाशक्तौपि ण्डमात्रमितिगौडाः तन्न ॥ अपिशब्दबाधापत्तेः **हारीतः** मृतेपितरिवैपुत्रः पिण्डमब्दंसमाचरेत्। अन्नंकुम्भंचविप्राय प्रेतनिर्देशधर्मतःप्रेतशब्दोच्चारणे नेतिहलायुधः ॥ यद्वाप्रेतस्यनिर्देशोयत्रतदेकोद्दिष्टं तद्धर्म्मकमित्यर्थः ॥ अ त्राशौचांतदिनाद्यब्दांतंयावद्वत्सरापूर्तेःशौचंनाधिकारीविशेषणम् ॥ तेनमृत दिनमारभ्यैतत्कार्य्यमितिकेचित् नन्न ॥ हेमाद्रिधृतवचोविरोधात् ॥ मध्येआ शौचादिनाबाधेतुलोपएवदार्शवत्॥ तथाप्रथमाब्देदीपदानमुक्तम् **देवजानी येगारुडे** प्रत्यहंदीपकोदेयोमार्गेतुविषमेनरैः। यावत्संवत्सरंवापिप्रेतस्यसुख लिप्सया॥प्राङ्मुखोदङ्मुखंदीपंदेवागारेद्विजालये । कुर्याद्याम्यमुखंपित्र्ये अद्भिःसंकल्प्यसुस्थितम् **अथमासिकानि** तानिचकृत्वैवसपिण्डनंकार्यम् ॥ तथागोभिलगौगाक्षिःश्राद्धानिषोडशादत्वानैवकुर्य्यात्सपिंडनम्।श्राद्धानिषो डशाप्याथ विदधीतसपिण्डनम् **तानित्वाहजातूकर्ण्यः** द्वादशप्रतिमास्या नि आद्यषाण्मासिकन्तथा । त्रैपक्षिकाब्दिकेचेति श्राद्धान्येतानिषोडश ॥ आद्यषाणमासिकाब्दिकशब्दा ऊनमासिकोनषष्ठोनाब्दिकपराः ॥ हेमाद्रौतु सपिण्डीकरणंचैवइत्येतत्श्राद्धषोडशमित्युत्तरार्द्धेपाठः ॥ तदाआद्यमूनमासि कंद्वादशाहे ॥ षाण्मासिकंऊनषष्ठेनाब्दिकेइत्यर्थः कात्यायनस्त्वन्यथाह ॥

द्वादशप्रतिमास्यानि आद्यषण्मासिकेतथा । सपिण्डीकरणञ्चैवइत्येतच्छ्राद्ध षोडशम् ॥ एकाहेनतुषण्मासायदास्यूरपिवात्रिभिः । न्यूनाः संवत्सराश्चैव स्यातांषण्मासिकेतदा ॥ द्विवचनादूनषष्ठोनाब्दिकेइत्यर्थमाहपृथ्वीचन्द्रः ॥ व्यासस्त्वन्यथाह ॥ द्वादशाहेत्रिपक्षेचषण्मासेमासिकाब्दिके ॥ श्राद्धानि षोडशैतानिसंस्मृतानिमनीषिभिः ॥ द्वादशाहपदमूनमासिकपरम् ॥ तस्यद्वा दशाहेप्युक्तेरितिकालादर्शः ॥ मदनरत्नेब्राह्मेत्वन्यथोक्तम् ॥ नृणान्तुत्यक्त देहानां श्राद्धाःषोडशसर्व्वदा । चतुर्त्थेपञ्चमेचैव नवमैकादशेतथा ॥ ततो द्वादशभिर्मासैः श्राद्धाद्वादशसंख्येति ॥ चतुर्त्थादीनिदिनानि ॥ भविष्येत्व न्यथोक्तम् ॥ अस्थिसञ्चयनंश्राद्धंत्रिपक्षेमासिकानितु । रिक्तयोश्चतथातिथ्योःप्रेतश्राद्धानिषोडशेति ॥ रिक्तयोस्तिथ्योरितिन्यूनषष्ठोनाब्दिकपरमि तिहेमाद्रिः ॥ अत्रदेशकुलशाखाभेदायद्यवस्थेतिसर्व्वनिबन्धाः **गालवः** ऊ नषाण्मासिकंषष्ठे मासेवान्यूनमासिकम् ॥ त्रैपक्षिकंत्रिपक्षेस्यादूनाब्दंद्वादशे तथा **ऊनमासिकेतुगोभिलः** मरणात्द्वादशाहेस्यान्मास्यूनेचोनमासिक म् **मदनरत्नेकालादर्शेचश्लोकगौतमः** एकद्वित्रिदिनैरूने त्रिभागेनोनए ववा । श्राद्धान्यूनाब्दिकादीनि कुर्य्यादित्याहगौतमः **क्रियानिबन्धेक्रतुस्तु** सार्द्धएकादशेमासे सार्द्धेवैपञ्चमेतथा । ऊनाब्दमूनषण्मासम्भवेतांश्राद्धक र्म्मणीत्युक्तम्॥ तत्रमूलंचिन्त्यम् **ऊनेषुवर्ज्यान्याहमरीचिः** द्विपुष्करेचनंदा सुंसिनीवाल्यांभृगोर्दिने । चतुर्दश्यांचनोनानिकृत्तिकासुत्रिपुष्करे **ज्योतिषे** त्रिपादर्क्षेतिथिर्भद्राभौमेज्यरविभिःसह । तदात्रिपुष्करोयोगो द्वयोर्योगेद्विपु ष्करः **गालवः** त्रिभिर्वादिवसेरूनेत्वेकेनद्वितयेनवा ॥ आद्यादिषुचमासेषु कुर्यादूनाब्दिकादिकम् ॥ एकन्यूनपक्षेपंचम्यांमृतस्यतृतीयायांत्रिभिर्न्यूनेप्र तिपदिद्यूनेद्वितीयायामितिकेचित् **माधवस्तु** षाण्मासिकाब्दिकेश्राद्धेस्यातां पूर्वेद्युरेवते । मासिकानिस्वकीयेतुदिवसेद्वादशेपिचेतिपैठीनासिवाक्येऊन षण्मासिकंसप्तममासगतमृतात्पूर्वेद्युःकार्यम् ॥ ऊनाब्दिकंतुद्वितीयाब्देमृत हदिनात्पूर्वेद्युःकार्यमित्यर्थमाह ॥ मासिकानिस्वकीयेतुदिवसेइत्युक्तेः ॥ इद

मेवयुक्तम् ॥ मदनरत्नेप्येवम् **याज्ञवल्क्यः** मृतेहनितुकर्तव्यं प्रतिमासंतुव त्सरम् । प्रतिसंवत्सरंचैवमाद्यमेकादशेहनि ॥ अत्राद्यमासिकमाब्दिकंचैका दशेह्नीतिनिर्णयामृतादयः ॥ ब्राह्मणंभोजयेदाद्येहोतव्यमनलेथवा ॥ पुनश्च भोजयेद्विप्रंद्विरावृत्तिर्भवेदितिगोभिलीयंचतद्विषयमाहुः ॥ अन्येतुमासपक्ष तिथिस्पृष्टइत्यादिविरोधादाब्दिकंवर्षांतमेव ॥ मासिकंतुमासादौ ॥ द्विरावृत्ति स्तुएकादशाहिकाद्यमासिकपरा ॥ देवयाज्ञिकोप्येवमाह **लौगाक्षिरपि** मा सादौमासिकंकार्यमाब्दिकंवत्सरेगते ॥ आद्यमेकादशेकार्यमधिकेत्वधिकंभ वेत् **दीपिकायांतु** आद्यंरुद्रमितेर्कसंमितदिनेवास्यादित्युक्तम् ॥ गौडास्तुमृ ततिथ्यवधिकेएकदिनाधिकेमाससंवत्सरपदंगौणं ॥ पूर्णेब्देइतिईषद्समाप्तप रत्वमितिशूलपाणिः ॥ तेनद्वितीयमासादावाद्यमासिकादीनितन्मौर्ख्यकृतं **अशक्तौतुहारीतः** मुख्यंश्राद्धंमासिमासिअपर्याप्तावृतुंप्रति । द्वादशाहेनवा भोज्याएकाहेद्वादशापिवा ॥ ऋतुंप्रतिद्वेद्वेइत्यर्थः ॥ यदापितुर्मरणात्रयोविं शतितमेदिनेदर्शोवृद्धिर्वास्यात्तदाद्वादशदिनेषुद्वादशमासिकानिकार्याणीत्य र्थः ॥ त्रैपक्षिकंतुत्रिपक्षेऽतीतेमृताहेकार्यम् ॥ त्रैपक्षिकंभवेद्वृत्तेत्रिपक्षेतदनं तरमितिभविष्योक्तेरितिमदनरत्नेउक्तम् **पृथ्वीचन्द्रकालादर्शनिर्णयामृ तादयस्तु** ऊनान्यूनेषुमासेषु विषमाहेसमेपिवा । त्रैपक्षिकंत्रिपक्षेस्यान्मृता हेत्वितराणित्वितिकार्ष्णाजिनिस्मृतेः ॥ पूर्वत्रवृत्तेप्रवृत्तेइत्यर्थमाहुस्तेतदनन्त रशब्दविरोधात् त्रैपक्षिकद्वितीयमासिकयोःसंकरापत्तेरेवंव्याख्यायांमाना भावाच्चोपेक्ष्याः ॥ त्रिपक्षसपिण्डनेत्वेवंशब्दाभावादधिकरणत्वेवज्ञेयम् **य त्तु क्रियानिबंधेगारुडे** त्रैपक्षिकंत्रिपक्षेतुप्रवृत्ते विषमेदिने । मासिकान्य पिचोनानिअष्टाविंशतिमेदिनेइतितन्निर्मूलम् **स्मृतिरत्नावल्याम्** द्वादशा हेयदाकुर्यात्पितुःपुत्रःसपिण्डनम् । एकादशेह्निकुर्वीतप्रेतश्राद्धानिषोडश **पैठीनसिः** सपिण्डीकरणादर्वाक् कुर्वन्श्राद्धानिषोडश । एकोद्दिष्टविधाने नकुर्यात्सर्वाणितानितु ॥ सपिण्डीकरणादूर्ध्वं यदाकुर्यात्तदापुनः । प्रत्य ब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपि **मदनरत्नेकात्यायनः** श्राद्धमग्निमतः

कार्यदाहादेकादशेहनि । ध्रुवाणितुप्रकुर्वीत प्रमीताहनिसर्वदा ॥ ध्रुवाणित्रैप क्षिकादूर्ध्वानि क्रियानिबंधेगारुडे त्रिपक्षात्पूर्वतःसाग्नेर्भवेत्संस्कारवासरे । ऊर्ध्वंमृतदिनेऽनग्नेःसर्वाण्येवमृताहतः ॥ एतानिचयदासपिण्डनात्पूर्वंयुगप त्कुर्यात्तदादेशकालकर्त्रैक्यतंत्रत्वादेकःपाकइतिकेचित् ॥ पाकभेदइतिभ ट्टचरणाः ॥ अत्रकेचिदाहुः ॥ देशकालदैवतैक्येतंत्रत्वात्श्राद्धकालातिक्र मापत्तेः ॥ द्वादशाहेथसर्वाणिसंक्षेपेणसमापयेत् । तान्येवतुपुनःकुर्यात्प्रेत शब्दंनकारयेदितिकात्यायनोक्तेः ॥ नैवश्राद्धद्वयंकुर्यात्समानेहनिकुत्रचि दित्यस्यदैवतैक्यपरत्वेप्यत्रतत्सत्वात्॥श्राद्धंकृत्वातुतस्यैवपुनःश्राद्धंनकारये दितिजाबाल्युक्तेः षोडशसंख्यायाश्चवाजपेयेप्राजापत्ययागसप्तदशत्ववत्सा न्नाय्ययागद्वित्ववच्च दर्शपातसंक्रांतिश्राद्धत्वद्युगपदनुष्ठानेप्युपपत्तेराद्यमासि काद्यूनाब्दिकांतेषुषोडश श्राद्धेषुचक्षणःक्रियतामित्येवंप्रयोगेणैकोविप्रःपिं डोर्ध्वश्चेति ॥ विरुद्धविधिध्वंसेप्येवंतन्मंदम् ॥ द्वादशायेनवाभोज्याएकाहेद्वा दशापिवेतिहेमाद्रौहारीतवचोविरोधात् तेन विप्रभेदात्पिण्डाद्यर्घाद्यापिभिन्न मितिसिद्धम् ॥ एतानिद्वादशाहादौसपिण्डनात्पूर्वंकृतान्यपिवृद्धिंविनापक र्षेपुनःस्वकालेकार्याणि ॥ यस्यसंवत्सरादर्वाक्सपिण्डीकरणंकृतम् । मासि कंचोदकुंभंचदेयंतस्यापिवत्सरमितिमदनरत्नेंगिरसोक्तेः ॥ नचेदंमासिका नामपकर्षविधत्ते किन्तुसपिण्डनोर्ध्वस्वकालेनुष्ठानमेवेतिवाच्यम् ॥ श्राद्धा निषोडशादत्वानतुकुर्यात्सपिण्डतामितिविरोधात् ॥ यस्यसंवत्सरादर्वाक्वि हितातुसपिण्डता । विधिवत्तानिकुर्वीतपुनःश्राद्धानिषोडशेतिमाधवीयगो भिलोक्तेश्च ॥ अर्वाक्संवत्सराद्यस्यसपिण्डीकरणंकृतम् । षोडशानांद्विरा वृत्तिं कुर्यादित्याहगौतमइतितत्रैवगालवोक्तेः ॥ षोडशत्वंचैकादशाहसपिं डनपक्षे ॥ तत्राद्यमासिकस्यकालसत्त्वादन्यपक्षेषुयथासंभवंज्ञेयम् यत्तुदी पिकायाम् अनुमासिकानितुचरेत्तान्येवसापिंड्यतःपश्चात् । द्वादशेत्युक्ते रूनानांनपुनःकृतिरित्युक्तंतदेतद्विरोधाच्चिंत्यम् यत्तु गौडाः सपिंडीकरणां तातु ज्ञेयाप्रेतक्रियाबुधैरितिशातातपोक्तेर्मासिकानांप्रेतत्वविमोक्षार्थत्वात्स

पिंडनापकर्षे तदंतन्यायेनतेषामप्यपकर्षान्मासिकानांनपुनःकृतिःयत्तुमासिकंचोदकुंभंचेतिलौगाक्ष्यादिवचनंतन्निर्मूलम् ॥ समूलत्वेपिदार्शपरंचेत्याहुः ॥ तेउक्तवक्ष्यमाणवचोनिबंधविरोधान्मूर्खाइत्युपेक्ष्याः ॥ यत्तु मिताक्षरायां सपिंडनोर्ध्वं स्वकालेएवकार्याणिअपकर्षस्त्वनुकल्पइत्युक्तं तदपिपूर्वविरोधाच्चिंत्यम् ॥ तेनवृद्धिविनापकर्षेपुनःकृतिः । अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् ॥ प्रेतत्वमिहतस्यापिज्ञेयंसंवत्सरंनृपेत्यग्निपुराणात् ॥ वृद्धिनिमित्तापकर्षेत्वस्त्येवतन्निवृत्तिः ॥ अन्यथावृद्धासंभवादितिशूलपाणिः **काष्णाजिनिः** सपिंडीकरणादर्वागपकृष्यकृतान्यपि । पुनरप्यपकृष्यंतेवृत्त्युत्तरनिषेधनात् **निषेधंचाहकात्यायनः** निर्वर्त्यवृद्धितंत्रंतुमासिकानिनतंत्रयेत् ॥ अयातयामंमरणंनभवेत्पुनरस्यत्विति ॥ द्विरनुष्ठानंचोत्तरेषामेवनपूर्वेषांस्वस्वकालकृतानाम् **तदाहमाधवीयेकाष्णाजिनिः** अर्वागब्दाद्यत्रयत्रसपिंडीकरणंकृतम् । तदूर्ध्वंमासिकानांस्याद्यथाकालमनुष्ठितिः **हेमाद्रौशाठ्यायनिः** प्रेतश्राद्धानिशिष्टानि सपिण्डीकरणंतथा । अपकृष्यापिकुर्वीतकर्तुनांदीमुखंद्विजः **वृद्धिंविनापकर्षेदोषमाहोशनाः** वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानियश्चरेत् सश्राद्धीनरकेघोरे पितृभिःसहमज्जतीति **आधानेपकर्षमाहहेमाद्रावुशनाः** पितुःसपिण्डीकरणं वार्षिकेमृतिवासरे । आधानाद्युपसंप्राप्तावेतत्प्रागपिवत्सरात् **विशेषस्तूक्तोविवाहनिर्णयेकण्वः** नवश्राद्धं मासिकंचयद्यदंतरितंभवेत् ॥ तत्तदुत्तरमातंत्र्यादनुष्ठेयंप्रचक्षते **गारुडेपि** आपदाद्यकृतंयत्तुकुर्य्यादूर्ध्वंमृताहनि ॥ अथसपिण्डीकरणम् **माधवीयेहारीतः** यातुपूर्वममावास्या मृताहादशमीभवेत् ॥ सपिण्डीकरणंतस्यां कुर्य्यादेवसुतोऽग्निमान् ॥ मृताहादूर्ध्वंदशमीएकादशीत्यर्थः सपिण्डीकरणं कुर्य्यात्पूर्ववच्चाग्निमान्सुतः । परतोदशरात्राच्चेत्कुहूरब्देपरेतर इति काष्णाजिनिस्मृतेः आहिताग्नेस्तेनविनाश्रौतपिंडपितृयज्ञासिद्धेः **तदाहगालवः** सपिंडीकरणात्प्रेते पैतृकंपदमास्थिते । आहिताग्नेःसिनीवाल्यांपितृयज्ञःप्रवर्तते **मदनरत्नेप्रजापतिः** नासपिंड्याग्निमान्पुत्रः पितृयज्ञंसमाचरेत् **अपरा**

कैकात्यायनः एकादशाहंनिर्वर्त्य पूर्वेद्युर्दर्शाद्यथाविधि । प्रकुर्वीतोऽग्निमान्विप्रो मातापित्रोःसपिंडताम् । आशौचांतप्रथमदर्शयोर्मध्येकस्मिंश्चिदह्नीत्यर्थः ॥ पित्रादीनांसपत्नीकानांदेवतात्वेनमातुरपिप्राग्दर्शात्सपिंडनंयुक्तमित्यपरार्कः एवंपितामहादेरपिसपिंडनंप्राक्दर्शात्कार्यम् ॥ तेनविनापार्वणायोगात्द्वादशाहेवाकार्यम्॥साग्निकस्तुयदाकर्तांप्रेतश्चानग्निमान्भवेत् ।द्वादशाहेभवेत्कार्यसपिंडीकरणंसुतैरितिगोभिलोक्तेः ॥ साग्नेःप्रेतस्यतुत्रिपक्षे ॥ प्रेतश्चेदाहिताग्निःस्यात्कर्तानाग्निर्यदाभवेत् । सपिंडीकरणंतस्यकुर्यात्पक्षेतृतीयकइतिसुमंतूक्तेः **मदनरत्नेलघुहारीतोपि** अनग्निस्तुयदावीर भवेत्कुर्य्यात्तदागृही ॥ प्रेतश्चेदग्निमांस्तुस्यात्त्रिपक्षेवैसपिण्डनम् ॥ द्वयोःसाग्नित्वेद्वादशाहएवसाग्निकस्तुयदाकर्त्तांप्रेतोवाप्यग्निमान्भवेत् ॥ द्वादशाहेतदाकार्यंसपिंडीकरणंपितुरितितेनैवोक्तेः **द्वयोरनग्नित्वेतुभविष्ये** सपिंडीकरणंकुर्याद्यजमानस्त्वनग्निमान् ॥ अनाहिताग्नेःप्रेतस्यपूर्णेब्देभरतर्षभ ॥ द्वादशाहनिषण्मासेत्रिपक्षेवा त्रिमासिवा ॥ एकादशेपिवामासिमंगलस्याप्युपस्थितौ **कात्यायनगोभिलौ** यदहर्वावृद्धिरापद्यतेतिवाचस्पतिः तन्न॥प्रातर्वृद्धिनिमित्तकमितिनियमात् सपिंडनस्यचापराह्णकालीनत्वेनपूर्वत्वबाधापत्तेः ॥ वृद्धिदिनेतत्पूर्वदिनेचेतिश्रीदत्तः **स्मार्तगौडास्तु** वृद्धिपूर्वोवर्षात्यश्वक्षणाःसपिंडनस्यप्रेतत्वनाशेसहकारी ॥ तेनपरेद्युर्विघ्नाद्वृत्त्यभावेपितत्कर्तव्यतानिश्चयसहितमेवकालांतरक्रियमाणवृद्धिपूर्वक्षणसहकृतंप्रेतत्वनाशकमित्याह तन्न ॥ अकालेकृतस्यफलाजनकत्वात् ॥ एतेननिमित्तनिश्चयवतएवाधिकाराद्वृत्त्यभावेपिनक्षतिरितिमिश्रोक्तिःपरास्ता॥वृद्धिपूर्वदिनस्यचकालस्यांगत्वेनानिमित्तत्वाभावात्तेनपुनःकार्यमित्यन्ये **मदनरत्नेपुलस्त्यः** निरग्निकःसपिंडत्वंपितुर्मातुश्चधर्मतः ॥ पूर्णेसंवत्सरेकुर्य्याद्वृद्धिर्व्वायदहर्भवेत् **चतुर्विंशतिमते** सपिण्डीकरणंचाब्देसंपूर्णेभ्युदयेपिवा । द्वादशाहेतुकेषांचिन्मतंचैकादशेतथा **पृथ्वीचन्द्रोदयेबौधायनः** अथसपिण्डीकरणं त्रिपक्षेवा तृतीयेवामासिषष्ठेचैकादशेवाद्वादशेवा द्वादशाहेचेति **एतत्प्रक्रमेविष्णुः** मासिकार्थंद्वाद

शाहं श्राद्धंकृत्वात्रयोदशेह्निवाकुर्यान्मंत्रवर्ज्यंहिशूद्राणां ॥ द्वादशेह्निसं वत्सराभ्यंतरेयद्यधिमासोभवेत्तदा मासिकार्थंदिनमेकंवर्धयेदिति ॥ आशौ चोत्तरंद्वादशस्वहस्सुमासिकानितेष्वेवाद्यषष्ठद्वादशदिनेषुमासिकादीनिकृ त्वात्रयोदशेद्वादशेह्निसपिण्डनंकुर्य्यात् ॥ अधिमासेतुचतुर्दशेह्निकुर्य्यात् ॥ शूद्रस्त्रयोदशेद्वादशेह्नीत्यस्यमासिकांत्यदिनपरत्वादितिपृथ्वीचन्द्रः पैठीन सिः संवत्सरांतेसंसर्जनंनवमेमासीत्येके ॥ अत्रसाग्नेरनग्नेर्व्वोक्तकालाभा वेत्रिपक्षादिसंवत्सरांताअनुकल्पाज्ञेयाः ॥ कल्पतरुस्त्वग्रेवृद्धिनिश्चयएवस र्व्वेपकर्षऽप्रकाराइत्याह ॥ नन्न यदहर्व्वेतिस्वातंत्र्यश्रुतेः ॥ यद्यपिवृद्धि निमित्तोपकर्षोनिरग्नेरेवोक्तस्तथापिसाग्नावपिज्ञेयः ॥ उक्तकालासंभवेवर्षी तादिगौणकालवद्गृह्येरपिप्राप्तेः ॥ वक्ष्यमाणगोभिलवचनात् ॥ अयातया मंमरणंनभवेत्पुनरस्यत्वितिदोषश्रुत्यविशेषाच्च ॥ अपरार्कपृथ्वीचंद्रादिस्वर सोप्येवम् ॥ अत्रवृद्धिपदंचूडोपनयनविवाहमात्रपरम् ॥ सीमंतादौतुवृद्धि श्राद्धलोपएवेत्याचार्यचूडामणिः ॥ पुंसवनाद्यन्नप्राशनांतेष्वावश्यकेष्वपकर्ष इतिश्राद्धविवेकः श्रुतिसागरेपिबृहस्पतिः प्रत्यवायोभवेद्यस्मिन्नकृतेवृद्धि कर्मणि । तन्निमित्तंसमाकृष्यपित्रोःकुर्यात्सपिंडनम् ॥ गर्भाधानस्यत्वंतरे पिसंभवात् ॥ अन्यश्राद्धंपरान्नंचगंधमाल्यंचमैथुनमितिदेवलेप्रथमाब्देमैथु ननिषेधाच्चनतत्रापकर्षइतिश्राद्धकौमुद्यादयस्तन्न ॥ ऋतुस्नातांतुयोभार्यांमि तिनिषेधाद्ब्रह्मचार्येवपर्वाण्याद्याश्चतस्रश्च वर्जयेदितिमैथुनेदोषाभावाच्चपि तामहमरणेपौत्रस्यवृद्धौनापकर्षः ॥ तस्यमहागुरुत्वाभावात् ॥ तत्रतदूर्ध्वं भ्योवृद्धिश्राद्धमितिश्राद्धचंद्रिका ॥ तन्न भ्राताचेत्यादौतदभावेप्यपकर्षो क्तेः ॥ तेननिर्देशोप्युलक्षणम् व्याघ्रः आनंत्यात्कुलधर्माणांपुंसांचैवायुषःक्ष यात् । अस्थितेश्चशरीरस्यद्वादशाहःप्रशस्यते ॥ एतदशौचांतोपलक्षणम् ॥ सर्वेषामेववर्णानामाशौचांतेसंपिंडनमितिनिर्णयामृतेकात्यायनोक्तेः ॥ सर्वेषा मितित्रैवर्णिकपरम् ॥ शूद्राणांत्वाशौचमध्ये ॥ मंत्रवर्ज्यंहिशूद्राणांद्वादशे हनिकीर्तितामितिविष्णूक्तेः ॥ एतद्दर्शश्राद्धकारिशूद्रविषयमित्यपरार्केकल्प

तरौच वृद्धमनुः द्वादशेहनिविप्राणामाशौचांतेतुभूभुजाम् । वैश्यानांतुत्रि पक्षादावथवास्यात्सपिण्डनम् **निर्णयामृतेगोभिलः** द्वादशाहादिकालेषु प्रमादादननुष्ठितम् । सपिण्डीकरणंकुर्यात्कालेषूत्तरभाविषु ॥ इदंसाग्नेरुक्त कालासम्भवेगौणकालविधानार्थमितिमदनपारिजातः ॥ मदनरत्नेप्येवम् **ऋष्यशृङ्गः** सपिण्डीकरणंश्राद्धमुक्तकालेनचेत्कृतम् । रौद्रेहस्तेचरोहिण्यां मैत्रभेवासमाचरेत् **कालादर्शेपि** एकादशेद्वादशेह्नि त्रिपक्षेवात्रिमासिवा । षष्ठेचैकादशेवाब्दे सम्पूर्णेवाशुभागमे ॥ सपिण्डीकरणस्येत्थमष्टौकालाःप्र कीर्तिताः । साग्नौकर्तुर्युभावाद्यौ प्रेतेसाग्नौतृतीयकः ॥ अनग्नेस्तुद्वितीयाद्यः सप्तकालामुनीरिताः । रोहिणीरौद्रहस्तेषु मैत्रभेवापितच्चरेत् **नारदसंहिता यांतु** सपिण्डीकरणंकार्यं वत्सरेवार्धवत्सरे । त्रिमासेवात्रिपक्षेवा मासिवाद्वा दशेह्निवेत्युक्तम् ॥ वत्सरेतीतेपिज्ञेयम् ॥ ततःसपिण्डीकरणंवत्सरात्परतः स्थितमितिभविष्योक्तेः ॥ पितुःसपिण्डीकरणंवत्सरादूर्ध्वतःस्थितमितिनाग रखण्डोक्तेः ॥ पितुःसपिण्डीकरणंवार्षिकेमृतवासरेइत्युशनसोक्तेश्च ॥ पूर्णे संवत्सरेपिण्डः षोडशःपरिकीर्तितः । तेनैवचसपिण्डत्वं तेनैवाब्दिकमिष्य तइतिहेमाद्रौवचनाच्च ॥ अस्यानाकरत्वोक्तिर्मूर्खोक्तिरेव **यत्तु** पूर्णेसंवत्सरे कुर्यात् सपिण्डीकरणंसुतः । एकोद्दिष्टंचतत्रैव मृताहनिसमापयेदिति धव लनिबन्धेजाबाल्युक्तेः ॥ पुत्रःसपिण्डनंकृत्वाकुर्यात्स्नानंसचैलकम् । एको द्दिष्टंततःकुर्यात कुतुपंनविचारयेदिति स्वल्पमात्स्योक्तेश्चाब्दिकंतद्दिनेपुनः कार्य्यमितिकेचित् ॥ तेनिर्मूलत्वाद्धेमाद्रिविरोधाच्चोपेक्ष्याः ॥ षोडशत्वञ्चस पिण्डनस्यषोडशश्राद्धान्तर्भावपक्षे ॥ स्मृत्यर्थसारेतुवर्षात्यदिनेसंवत्सरविमोक्ष श्राद्धंसपिण्डनंचकृत्वापरेद्युर्मृताहेवार्षिकंकार्यमित्युक्तम् ॥ गौडाअप्येवमा हुः ॥ तत्पूर्वविरोधाच्चिन्त्यम् ॥ तच्चपुत्रेसतिनान्यःकुर्यात् श्राद्धानिषोड शादत्वा नतुकुर्यात्सपिण्डताम् । प्रोषितावसितेपुत्रःकालादपिचिरादपीति वायवीयोक्तेः ॥ षोडशश्राद्धानांवर्षादूर्ध्वंकालाभावेपितान्यदत्वानकुर्य्यात् ॥ किन्तुदत्वैव ॥ तानियदिकनिष्ठभ्रात्रादिनाकृतानितदासपिण्डनमेवकुर्यादि

त्यपरार्कः ॥ सपिण्डनेतुकनिष्ठानांनैवाधिकारइत्यर्थः **तत्रैव** अज्ञानादथवा मोहान्नकृताचेत्सपिण्डता । तत्रापिविधिवत्कार्या कालादपिचिरादपि ॥ तेष्वपिज्येष्ठस्यैवाधिकारः ॥ ज्येष्ठेनजातमात्रेण पुत्रीभवतिमानव इतिमनूक्तेः **अपरार्केप्रचेताअपि** एकादशाद्याःक्रमशोज्येष्ठस्तुविधिवात्क्रियाः । कुर्याच्चै कैकशःश्राद्धमाब्दिकंतुपृथक्पृथक् **मरीचिः** सर्व्वेषांतुमतंकृत्वा ज्येष्ठेनैवतु यत्कृतम् । द्रव्येणवाविभक्तेन सर्वैरेवकृतम्भवेत् ॥ यत्तुवाचस्पतिशूलपाणिभ्यामुक्तंद्रव्यदानानुमत्यभावेकनिष्ठैःपृथक्कार्य्यमिति ॥ तन्न ॥ एवकारस्यतदभावेपिपृथक्करणभावार्थत्वात् ॥ अन्धादेरिवज्येष्ठसतिकनिष्ठानामनधिकाराच्च ॥ अतस्तेषांप्रत्यवायमात्रम् ॥ आहिताग्निःकनिष्ठस्तुकुर्य्यादेव ॥ अन्यथापितृयज्ञासिद्धेः ॥ एवमावश्यकवृद्धावपिकनिष्ठोन्यःसपिण्डोवाकुर्यात् ॥ भ्रातावाभ्रातृपुत्रोवासपिण्डःशिष्यएवच ॥ सहपिण्डक्रियांकृत्वा कुर्यादभ्युदयन्ततः । तथैवकाम्यंयत्कर्म वत्सरात्प्रथमादृते इतिमदनरत्नेलघुहारीतवचनात् ॥ वृत्त्यनन्तरंप्रथमाब्दमध्येपिकाम्यंकुर्यात् ॥ वृत्त्यभावे तुप्रथमाब्दादूर्ध्वमेवेत्यर्थः ॥ काम्योक्तेरनावश्यकेइष्टापूर्तादौनापकर्षः ॥ एतद्भ्रातृपुत्रादिसंस्कारेप्राप्ताधिकारस्यनांदीश्राद्धाधिकारार्थम् ॥ अभ्युदयपदंचनांदीश्राद्धनिमित्तकर्म्ममात्रपरमितिहेमाद्रिः ॥ तेनज्येष्ठेदेशांतरस्थेकनिष्ठःसपिण्डनंविनैववृद्धिंकृत्वापुत्रसंस्कारंकुर्यादितिश्रीदत्तोक्तिःपरास्ता ॥ भ्रातृशिष्याद्युक्तेर्नान्दीश्राद्धेज्यदेवतामात्रपरापकर्षइत्यपास्तम् ॥ अस्यक्रममात्रपरत्वाद्वृद्धिकत्रैवसपिण्डनंकुर्यादितिननियमइतिगौडाः ॥ अतएवकन्यायामातृमरणेभ्रात्रासपिण्डनेकृतेपितुर्नाधिकारः **शूलपाणिस्तु** महागुरौ प्रेतभूतेवृद्धिकर्मनयुज्यतइतिनिषेधात् ॥ मृतस्यभ्रात्रादिःसपिण्डनंकृत्वात त्पुत्रकन्यादेरभ्युदयंकुर्यान्नतुस्वपुत्रसंस्कारेसंस्कार्यपितुःसपिण्डनंविनावृद्धौ देवतात्वाभावादित्याह ॥ तन्न ॥ विदेशस्थेनज्येष्ठेनपुनःकार्यम् ॥ यवीयसाकृतंकर्म प्रेतशब्दंविहायतु । तज्ज्यायसापिकर्तव्यंसपिण्डीकरणं पुनारिति स्मृतेः ॥ ज्येष्ठेनवाकनिष्ठेनसपिण्डीकरणेकृते । आद्यपादेमातापित्रोःकनि

ष्ठेनेतिवापाठः ॥ देशान्तरगतानाचपुत्राणांतुकथम्भवेत् । श्रुत्वातुवपनंकार्य्यं दशाहांतंतिलोदकम् ॥ ततःसपिण्डीकरणं कुर्यादेकादशेहनि । द्वादशाहेनकर्तव्यमितिशातातपोब्रवीदितिवचनाच्चेतिभट्टाः ॥ सिंगाभट्टीयेप्येवम् ॥ पूर्ववचनेत्रचमूलंचिन्त्यम् ॥ स्मृत्यर्थसारेतुविभक्ताऋद्धिकामाश्चेत्पुत्राःपृथक्सपिण्डीकरणंकुर्य्युरित्युक्तम् ॥ अत्रदत्तकस्यतत्पुत्रादीनांविशेषःप्रागुक्तः केचित्तुवृद्धिविनापिकनिष्ठस्यसपिण्डनमाहुः ॥ मातापित्रोर्मृतेकालेज्येष्ठेदेशांतरस्थिते । कनिष्ठेनप्रकर्तव्यं सपिण्डीकरणंतथेतिकार्ष्णाजिनिस्मृतेः ॥ गतेवारोधितेज्येष्ठे पित्रावाप्रेषितेसति । षण्मासान्ननिवर्तेत तदाकार्यंकनीयसा **संवर्त** पुनःसपिण्डीकरणं श्राद्धंपार्वणवच्चरेत् ॥ अर्घ्यसंयोजनंनैवपिण्डसंयोजनंनचेति ॥ तेषांवचसांनिर्मूलत्वात् ॥ प्रोषितावसितेपुत्र इत्यादिविरोधाच्चोपेक्ष्याः **व्युत्क्रममृतौतुहेमाद्रौब्राह्मे** मृतेपितरियस्याथविद्यन्तेचपितामहाः । तेनदेयास्त्रयःपिण्डाः प्रपितामहपूर्वकाः ॥ तेभ्यश्चपैतृकःपिण्डोनियोक्तव्यस्तुपूर्ववत् । मातर्यथमृतायांच विद्यतेचपिताही ॥ प्रपितामहीपूर्वस्तु कार्यस्तत्राप्ययंविधिः ॥ एवंप्रपितामहजीवनेतत्पित्रादिभिर्ज्ञेयम् **तदाह सुमन्तुः** त्रयाणामपिपिण्डानामेकेनापिसपिण्डने । पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितः **यत्तु** व्युत्क्रमात्तुप्रमीतानां नैवकार्यासपिंडतेतितन्मातापितृभर्तृभिन्नविषयम् ॥ व्युत्क्रमेणमृतानांनसपिंडीकृतिरिष्यते । यदिमातायदिपिताभर्तानैषविधिःस्मृतइतिमाधवीयेस्कांदोक्तेः ॥ मदनरत्नादौचैवम् ॥ अत्रप्रपितामहादिभिः पितुःसपिंडनेकृतेपितामहेमृतेतत्सपिंडनेसतिपुनस्तेन सहपितुःसपिंडनंकार्यमितिहेमाद्रिर्मतमाह ॥ अन्येनैवतन्मन्यंते ॥ तत्वंतु पितुःसपिंडनाभावेपितामहेनसहपुनःकार्यनतत्सत्वे ॥ त्रयाणामपिपिंडानामेकेनापिसपिंडने । पितृत्वमश्नुतेप्रेतइतिधर्मोव्यवस्थितइतिविष्णुधर्मोक्तेः॥ पितामहेप्रपितामहेवापुत्रांतरैरसंस्कृतेप्यसंस्कृताभ्यामेवपितुःसपिंडनंकुर्यात् ॥ असंस्कृतौनसंस्कार्यौपूर्वौपौत्रप्रपौत्रकौ ॥ पितरंतत्रसंस्कुर्यादितिकात्यायनोब्रवीदितिछंदोगपरिशिष्टात् ॥ असंस्कृतौदाहाद्यैरितिकेचित् ॥ असपिंडी

कृताविति तुतत्त्वं ॥ अतएवोक्तंतत्रैव ॥ पापिष्ठमपिशुद्धेनशुद्धंपापकृतापिवा पितामहेनपितरंसंस्कुर्यादितिनिश्चयः ॥ पापिष्ठमकृतसपिंडनंनतुपतितादि। अभिशस्तपतितभ्रूणघ्नास्त्रियश्चातिचारिणीर्नसंसृजेदितिवैजवापोक्तेः॥ पापकर्मिणोनसंसृजेरन्निति गौतमोक्तेश्चेत्युक्तंनिर्णयामृते॥पूर्वयोःपुत्राभावेतुपौत्रःकुर्यादेव ॥ पितामहःपितुःपश्चात्पंचत्वंयदिगच्छति । पौत्रेणैकादशाहादिकर्तव्यंश्राद्धशोडशम् ॥ नैतत्पौत्रेणकर्तव्यंपुत्रवांश्चेत्पितामहः । पितुःसपिंडतांकृत्वाकुर्यान्मासानुमासिकमितिकात्यायनोक्तेः ॥ अपरार्केशूलपाणौचैवम् ॥ तेनसपिण्डनस्यानित्यत्वादकृतसपिण्डनयोरेवपार्वणानुप्रवेशइतिमूर्खोक्तिः परास्ता ॥ कृतेसपिण्डीकरणेप्रेतःपार्वणभाग्भवेदितिहारीतविरोधाच्च ॥ केचित्पुत्रांतराभावेपितामहवार्षिकमप्याहुस्तन्न ॥ श्राद्धषोडशमिति नियमात् ॥ इच्छयाभवत्येव ॥ पितामहस्यचेद्द्यादेकोद्दिष्टंनपार्वणमिति वाचस्पतिधृतगर्गोक्तेः ॥ त्रयाणांयौगपद्येतुप्राधान्यात्पितुःसपिण्डनंकृत्वापूर्वयोःकुर्यात् ॥ पितामहेमृतेदशाहांतःपितुर्मृतौपितुःसंस्कारंकृत्वापितामहस्यपुनःसर्वमावर्तयेत् । वृत्तेदशाहेनैव ॥ अशक्त्यापित्रानुज्ञातनपौत्रेणपितामहश्राद्धेप्रक्रांतेपितृमृतौतदाशौचंवहन्नेवपौत्रः पितामहकर्मकुर्यात्प्रक्रांतत्वादितिमदनपारिजातपृथ्वीचंद्रौ **यत्तु** उत्तरात्रितयरौद्ररोहिणीयाम्यसर्पपितृभेषुचाग्निभे । श्मश्रुकर्मसकलंचवर्जयेत्प्रेतकार्यमपिबुद्धिमान्नरइति सपिण्डनप्रकरणेपाठान्मुख्यकालेनिषिद्धर्क्षेसपिण्डनापकर्षः ॥ सर्वकालेषुतद्वत्त्वेतद्वर्ज्यान्येव ॥ पूर्वोक्तब्राह्मोक्तालिषोडशश्राद्धानिकार्याणीतिवाचस्यतिमिश्रास्तन्न ॥ अस्यपरिभाषात्वेनवाक्यात्सावकाशकर्मपरत्वात् ॥ अस्यप्रेतमात्रदैवत्यभावाच्च **अतस्त्रीषूच्यते । हेमाद्रौबृहस्पतिः** भर्तृगोत्रेणनाम्नाचमातुःकुर्यात्सपिण्डनम् **यत्तुभविष्ये** पितृगोत्रंसमुत्सृज्यनकुर्याद्भर्तृगोत्रत इतितदासुरादिविवाहोढापरम् ॥ आसुरादिविवाहेषुपितृगोत्रेणधर्मविदिति वृद्धशातातपोक्तेः ॥ तच्चानेकवचनेषुपितामह्यापत्यामातामहेनवासहोक्तम् **तत्रव्यवस्थोक्ताभविष्ये** जीवत्पितापितामह्यामातुःकुर्यात्सपिण्डनम् । प्र

मीतपितृकःपित्रातत्पित्रापुत्रिकासुतः ॥ तत्पित्रामातुःपित्रा **लौगाक्षिः** पितामह्यादिभिःसार्द्धंमातरंतुसपिण्डयेत् । पितरिध्रियमाणेतुतेनैवोपरतेसति **शंखः** मातुःसपिण्डीकरणंकथंकार्यंभवेत्सुतैः । पितामह्यादिभिःसार्द्धंसपिण्डीकरणंस्मृतम् येनकेनापिमातुःसापिण्डचे यत्रान्वष्टकादौमातुःश्राद्धं पृथगुक्तंतत्रपितामह्यासहकार्यम् ॥ नांदीमुखेऽष्टकाश्राद्धेगयायांचमृतेऽहनि ॥ पितामह्यादिभिःसार्द्धंमातुःश्राद्धंसमाचरेदितिशातातपोक्तेः **अपुत्रायांतु पैठीनसिः**अपुत्रायांमृतायांतुपतिःकुर्यात्सपिंडनम् ।श्वश्वादिभिःसहैवास्याः सपिण्डीकरणंभवेत् **यत्तुलघुहारीतः** पुत्रेणैवतुकर्तव्यंसपिण्डीकरणंस्त्रिया । पुरुषस्यपुनस्त्वन्येभ्रातृपुत्रादयोपिये इति **यच्चमार्कंडेयपुराणे** सपिण्डीकरणंस्त्रीणांपुत्राभावेनविद्यतइति ॥ तत्पुत्रपत्यभावेज्ञेयम् ॥ अत्रसपत्नीपुत्रोपि ज्ञेयः॥ बह्वीनामेकपत्नीनामेकाचेत्पुत्रिणीभवेत् । सर्वास्तास्तेनपुत्रेणप्राहपुत्रवतीमनुरितिमनूक्तेरेतत्परत्वात्**यत्तुशातातपः** मृतेपितरिमातुस्तुनकार्यासहपिंडता ।पितुरेवसपिंडत्वेतस्याअपिकृतंभवेदितितदशक्तपरम् ॥ केषांचिद्वामतमितिहेमाद्रिः ॥ अन्वारोहणेतुभर्त्रैवसापिंड्यम्॥मृतायानुगतानाथंसातेन सहपिंडताम् । अर्हतिस्वर्गवासंचयावदाभूतसंप्लवमितिशातातपोक्तेः॥पत्याचैकेनकर्तव्यंसपिंडीकरणंस्त्रियः । सामृतापिहितेनैक्यंगतामंत्राहुतिव्रतैरितियमोक्तेश्च ॥ अत्रैकशब्दःपितामह्यादिपक्षनिवृत्त्यर्थः ॥ पतिपदंवर्गपरम् ॥ सपिंडनस्यपार्वणैकोद्दिष्टरूपत्वादितिमाधवकल्पतरुमदनरत्नादयः ॥ अन्येतुभर्त्रैवैकेनाहुः॥ स्वेनभर्त्रासहैवास्यात्सपिंडीकरणंभवेदित्येवकारश्रवणात्॥ पृथ्वीचंद्रोदयेपिविकल्पउक्तः ॥ इदंतुतत्त्वम् ॥ यदाहेमाद्यादिमतेद्वयोरेकःपिंडस्तदावर्गेणसह ॥ यदामाधवपृथ्वीचंद्रादिमतेपृथक्पिंडस्तदैकेनपत्यैकवचनाच्चैकेनापि ॥ अतोमातृपिंडमसपिंडीकृतेनैवपतिपिंडेनसंयोज्यैकीकृतं पिंडद्वयंतत्पित्रादिभिः संयोजयेत् ॥ अंत्यपक्षएवयुक्तः **स्मृत्यर्थसारेतु** अन्वारोहणेनैकदिनमरणेस्त्रियाःपृथक्सपिंडनंनास्ति ॥ भर्तुःकृतेस्त्रियाअपिकृतंभवतीत्युक्तम् ॥ तन्मतांतरमस्तु ॥ इदंब्राह्मादिविवाहेषुज्ञेयम्

आसुरादिषुतुशातातपः तन्मात्रातत्पितामह्यातच्छ्रवावासपिंडनम्।आसुरादिविवाहेषुविन्नानांयोषितांभवेत्॥मातामह्यामातुःपितामह्यातत्प्रपितामह्या चेत्यर्थः **सुमंतुः** पितापितामहेयोज्यःपूर्णेसंवत्सरेसुतैः। मातामातामहेतद्वदित्याहभगवान्शिवः॥ इदमासुरादिपरंपुत्रिकापुत्रपरंचोक्तंप्राक्॥ हेमाद्रिस्तुब्राह्मादिष्वपिसर्वत्रदेशभेदाद्विकल्पमाह।अतोगुर्जरेषुकोकिलमतानुसारिणांमातृमातामहप्रमातामहाइतिश्राद्धप्रयोगसपिंडनंचदृश्यते **हेमाद्रावाप स्तंबोपि** कोकिलस्ययथापुत्राअन्यसंचयजीविनः।पुष्टास्तेस्वकुलंयांतिएवंनारीमृतासती॥ यदापिविज्ञानेश्वरोमातामहेनमातुःसापिंड्येनपितृश्राद्धवन्मातृश्राद्धंनित्यमित्याह **यच्चवृद्धिश्राद्धेछंदोगपरिशिष्टम्** षड्भ्यःपितृभ्यस्तदनुश्राद्धदानमुपक्रमेदितितदेतद्विषयमेव॥ मातुःपृथक्श्राद्धाभावात् **अत एवहेमाद्रौभविष्ये॥ मातुःसपिंडनंप्रक्रम्य** उदितेनुदितेचैव होमभेदोयथाभवेत्। तथाकुलक्रमायातमाचारंचचरेद्बुधइत्युक्तम्॥ अस्यवृद्धावपवादमाहतत्रैवव्याघ्रपात्॥ कुर्यान्मातामहश्राद्धंसर्वदामातृपूर्वकम्। विधिज्ञोविधिमास्थायवृद्धोमातामहादिवत्॥ केचिदेतत्पुत्रिकापुत्रपरमाहुः **पत्युः सापिंड्यमाहलौगाक्षिः** सर्वाभावेस्वयंपत्न्यःस्वभर्तृणाममंत्रकम्। सपिंडीकरणंकुर्युस्ततःपार्वणमेवचेति **यत्तुवचनं** अपुत्रस्यपरेतस्यनैवकुर्यात्सपिंडतामिति **यच्चापस्तंबः** अपुत्रायेमृताकेचित्पुरुषावास्त्रियोपिवा। तेषांसपिंडनाभावादेकोद्दिष्टंनपार्वणमिति॥ तत्पुत्रोत्पादनविधिप्रशंसार्थमितिमाधवः॥ सपिंडीकरणादूर्ध्वमेकोद्दिष्टंविधीयते। अपुत्राणांचसर्वेषामपत्नीनांतथैवचेति हेमाद्रौप्रचेतसोक्तेश्च॥ अन्येतुद्विविधवाक्यदर्शनाद्विकल्पमाहुः **स्मृत्यर्थसारेपि** ब्रह्मचारिणामपत्यानांचसपिंडनंनास्तितेषांसदैकोद्दिष्टमेव॥ व्युत्क्रममृतानांसापिंड्यंकार्यंनवा॥ केचित्सर्वत्रसपिंडनमाहुरिति॥ अपुत्रेव्युत्क्रममृतेविशेषोरेणुकारिकायाम्॥ भ्रातावाभ्रातृपुत्रोवासपिंडःशिष्यएववा॥ सपिंडीकरणंकुर्यात्पुत्रहीनेमृतेसति॥ सर्वबंधुविहीनस्यपत्नीकुर्यात्सपिंडताम्॥ ऋत्विजंकारयेद्वापिपुरोहितमथापिवा। वसुरुद्रादितिसुतैःकार्यांते

533

षांसपिंडता । व्युत्क्रमाच्चप्रमीतायेतद्विनाप्रेतताध्रुवम् ॥ पुनःसपिंडनंतेषां कुर्यात्प्रेतेपितामहइति ॥ अत्रमूलंमृग्यम् ॥ यतीनांसपिंडनंनास्तिकिंत्वेकादशेह्निपार्वणंकार्यम् ॥ तदपित्रिदंडिनः ॥ एकदंड्यादीनांतदपिनेत्युक्तंप्राक् दंडग्रहणात्पूर्वंमृतेतुदाहादिसपिंडनांतंसर्वंकार्यमितिभट्टचरणाः **सपिंडनविधिमाहवैजवापः** समाप्तेसंवत्सरेचत्वार्युदपात्राणिप्रयुनक्त्येकंप्रेतायत्रीणि पितृभ्यःप्रेतपात्रंपितृपात्रेष्वासिंचतियेसमानाइति॥द्वाभ्यामेवंपिंडोथाभिमृशति एषवोनुगतःप्रेतःपितरस्तंददामिवः । शिवंभवतुशेषाणांजायंतांचिरजीविनः ॥ समानीवःसंगच्छध्वंसंवदध्वमिति **यद्यपि** तच्चापिदेवरहितमेकाग्र्यैकपवित्रकम् । नैवाग्नौकरणंतत्रतच्चावाहनवर्जितमितिमार्कंडेयेनोक्तंथापिसपिंडीकरणंश्राद्धंदैवपूर्वंनियोजयेदित्याद्विविरोधाद्विकल्पःप्रेतांशेवाज्ञेयं॥अत्रकामकालौवैश्वदेवावपीत्युक्तंप्राक् **मैत्रायणीयपरिशिष्टे** पित्र्यविप्रकरेहोमःसाग्नेरपिभवेदिह **यत्तुगोभिलः** अनुक्तकालेष्वपितु व्युक्रमेणमृतावपि । आमेनवापिसापिंड्यं हेम्नावापिप्रकल्पयेदिति तदायदिमातापितृभिन्नपरम् ॥ आपन्नोपिनकुर्व्वीतश्राद्धमामेनकर्हिचिदितितेनैवोक्तेः ॥ **शुद्धितत्त्वकामधेनौचलघुहारीतः** सपिण्डीकरणं यावत्प्रेतश्राद्धंतुषोडशम् । पक्वान्नेनैवकर्तव्यं सामिषेणद्विजातिभिः**विश्वप्रकाशे** प्रेतःसपिण्डनादूर्ध्वंपितृलोकेनुगच्छति । कुर्यात्तस्यतुपाथेयं द्वितीयेह्निसपिण्डनात् ॥ स्मृत्यर्थसारेप्येवम् ॥ ततोवृद्धिश्राद्धंकुर्यात् ॥ एतन्मलमासेपिकार्यम् ॥ अधिमासेनकर्तव्यंश्राद्धमाभ्युदयंतथा ॥ तथैवकाम्यंयत्कर्म्मवत्सरात्प्रथमादृतइतिहेमाद्रौहारीतोक्तेः ॥

इति भट्टकमलाकरकृते निर्णयसिंधौ सपिंडीकरणम्.

अथप्रथमाब्देनिषिद्धानि हेमाद्रौ स्नानंचैवमहादानंस्वाध्यायंचाग्नितर्पणम् । प्रथमेब्देनकुर्वीतमहागुरुनिपातने ॥ अग्नितर्पणंलक्षहोमादि ॥ नत्वाधानम् ॥ तत्तुप्रथमाब्देभवत्येव **तदाहहेमाद्रावुशनाः** पितुःसपिंडीकरणंवार्षिकेमृतवासरे । आधानाद्युपसंप्राप्तावेतत्प्रागपिबत्सरात् ॥ अन्यत

र्पणमितिशुद्धितत्त्वेपाठः ॥ आदिपदंवृद्धिनिमित्तनित्यकर्म्मपरम् **दिवोदासीये** महातीर्थस्यगमनमुपवासव्रतानिच । संवत्सरंनकुर्वीतमहागुरुनिपातने ॥ इदंश्राद्धकौमुद्यांदेवीपुराणस्थमुक्तम् **गौडनिबंधेमात्स्ये** सपिण्डीकरणादूर्ध्वंप्रेतःपार्व्वणभुग्भवेत् । वृद्धीष्टापूर्तयोग्यश्चगृहस्थश्चसदाभवेत् ॥ वर्षांतसपिंडनाभावेनाधिकारीत्यर्थः ॥ गृहस्थः ॥ सपिंडोपीत्यर्थःअतएवप्रेतकर्माण्यनिर्वर्त्यचरेन्नाभ्युदयक्रियाम् । आचतुर्थंततःपुंसिपञ्चमेशुभदंभवेदितिज्योतिषेउक्तम् **माधवीयेदेवलः**प्रमीतौपितरौयस्यदेहस्तस्याशुचिर्भवेत् । नदैवंनापिवापित्र्यंयावत्पूर्णोनवत्सरः ॥ इदंवर्षांतसपिंडनपरम् ॥ तथैवकाम्यंयत्कर्मवत्सरात्प्रथमादृतइतिलघुहारीताद्येकवाक्यत्वात् ॥वृद्धिनिमित्तापकर्षेतुकाम्यादिभवत्येवेतिगौडाः ॥ पित्र्यंसपिंडनम् **अतएवलौगाक्षिः** अन्येषांप्रेतकार्याणिमहागुरुनिपातने । कुर्यात्संवत्सरादर्व्वाक्श्राद्धमेकंतुवर्जयेत् । दाहाद्येकादशाहांतंकार्यमत्राशौचांतरस्याप्रतिबंधकत्वात् ॥ आद्यंश्राद्धमशुद्धोपि कुर्यादेकादशेहनीत्युक्तेश्च । एकंसपिण्डनम् **पत्न्यादौत्वपवादमाहमाधवीयेऋष्यशृङ्गः** पत्न्याःपुत्रस्यतत्पुत्रभ्रात्रोस्तत्तनयेषुच । स्नुषांस्वस्रोश्चपित्रोश्च संघातमरणंयदि ॥ अर्वागब्दान्मातृपितृपूर्वंसापिंड्यमाचरेत् **लौगाक्षिः** पत्नीपुत्रस्तथापौत्रोभ्रातातत्पुत्रकाअपि । पितरौचयदैकस्मिन्म्रियेरन्वासरेतदा ॥ आद्यमेकादशेकुर्यात्त्रिपक्षेतुसपिण्डनम् **धवलनिबंधे** महागुरुनिपातेतुप्रेतकार्ययथाविधि । कुर्यात्संवत्सरादर्वागेकोद्दिष्टंनपार्वणम् **भृगुः** माताचैवतथाभ्राताभार्यापुत्रस्तथास्नुषा । एषांमृतौचरेच्छ्राद्धमन्यस्यनपुनः पितुः ॥ एतदपिसपिंडनपरम्पितुर्मृतावन्यस्यश्राद्धंनचरेदित्यर्थः **शुद्धितत्त्वेदेवलः** अन्यश्राद्धंपरान्नंचगंधमाल्यंचमैथुनम् । वर्जयेद्गुरुपातेतुयावत्पूर्णोनवत्सरः **पारस्करभाष्येबृहस्पतिः** पितर्युपरतेपुत्रोमातुःश्राद्धान्निवर्तते । मातर्यपिचवृत्तायांपितृश्राद्धादृतेसमम् ॥ समंपितरंविनान्यश्राद्धंनेत्यर्थः **शुद्धितत्त्वेदेवलः** महागुरुनिपातेतुकाम्यंकिंचिन्नचाचरेत् । आर्त्विज्यंब्रह्मचर्यंचश्राद्धंदेवक्रियांतथा ॥ एतत्सपिंडनात्प्रागितिकेचि

त् ॥ तदुत्तरमपीत्यन्ये **श्राद्धकौमुद्याकालिकापुराणेपूर्वार्धे** विशेषतःशि वपूजांप्रमीतपितृकोनरः । यावद्वत्सरपर्यंतंमनसापिनचाचरेत् **केचित्तु** पि त्रोरब्दमशौचंस्यात्षण्मासंमातुरेवच । त्रैमासिकंतुभार्यायास्तदर्धंभ्रातृपुत्रयो रितिस्मृतेः ॥ सपत्नमातुरब्दार्धमाहुः **श्राद्धकौमुदीकारस्तु** द्वयोरेवमहा गुर्वोरब्दमेकमशौचकम् । नान्येषामधिकाशौचंस्वजातिविहितात्किलेतिस मूलजातूकर्ण्यविरोधान्निर्मूलमाह **हेमाद्रौभविष्ये** गयाश्राद्धंमृतानांतुपूर्णेत्व ब्देप्रशस्यते **त्रिस्थलीसेतौगारुडे** तीर्थश्राद्धंगयाश्राद्धंश्राद्धमन्यच्चपैतृकम् । अब्दमध्येनकुर्वीतमहागुरुविपत्तिषु ॥ इदंवृत्त्यर्थसपिंडनाभावे ॥ वृद्धौस पिंडनापकर्षेऽब्दमध्येपिदर्शादिकार्यमेव ॥ पितुःसपिंडानांकृत्वाकुर्यान्मासा नुमासिकमितिछंदोगपारिशिष्टात् ॥ सपिंडीकरणादूर्ध्वंप्रेतःपार्वणभुग्भवेदि तिमात्स्यात् ॥ ततःप्रभृतिवैप्रेतःपितृसामान्यमश्नुते । विंदतेपितृलोकंचत तःश्राद्धंप्रवर्ततेइतिहारीताच्चेतिशूलपाणिः **यत्तुकातीयं** सपिंडीकरणादूर्ध्वं नदद्यात्प्रतिमासिकम् । एकोद्दिष्टविधानेनदद्यादित्याहशौनकइतितत्रैकोद्दि ष्टविधिनानदद्यादित्यन्वयः ॥ तुर्यपादेनपार्वणेविकल्पउक्तः **ब्रह्मवैवर्ते** उ द्वाहश्चोपनयनंप्रथमेब्देमहीपते । कृतेसपिंडनेप्यूर्ध्वमस्थ्नांचोद्धरणंत्यजेत् तथापिकर्तुमिच्छंतित्रीणिचतौनिवैसुतः । मासिकान्यवशिष्टानिचापकृष्य चरेत्पुनः ॥ अत्रेदंतत्त्वम् ॥ वृद्धिविनावार्वागपिसपिंडनापकर्षेपितृत्वप्राप्तिर्व र्षांतएव॥कृतेसपिंडीकरणेनरःसंवत्सरात्परं प्रेतदेहंपरित्यज्यभोगदेहंप्रपद्यत इतिविष्णुधर्मोक्तेः ॥ अर्वाक्संवत्सराद्यस्यसपिंडीकरणंभवेत् । प्रेतत्वमपि तस्यापिविज्ञेयंवत्सरंनृपेत्यग्निपुराणाच्च ॥ तेनतत्सत्त्वेपिवृद्धिदैवपित्र्येष्वन धिकारः ॥ वृद्धिनिमित्तेत्वनंतरमेव ॥ अर्वाक्संवत्सराद्वृद्धौपूर्णेसंवत्सरेपिवा । येसपिंडीकृताःप्रेतानतेषांतुपृथक्क्रियेतिशातातपोक्तेः ॥ तथैवकाम्यमिति हेमाद्रिधृतहारीतादिवशाच्चैवमिति **तथा** अस्थिक्षेपंगयाश्राद्धंश्राद्धंचापरप क्षिकम् । प्रथमेब्देपिकुर्वीतयदिस्याद्भक्तिमान्सुतः ॥ भक्त्याख्यंश्राद्धंतद्वा नितिमदनपारिजातादयः ॥ अन्येयथाश्रुतमाहुः **तत्त्वंतु** यदीदंसमूलंतदावृ

द्विविनापकर्षेपूर्ववृद्ध्यर्थेतुपरमितियोज्यम् **पतितानांगयायांविशेषोब्राह्मे** क्रियतेपतितानांचगतेसंवत्सरेक्वचित् । देशधर्मप्रमाणत्वाद्गयाश्राद्धंस्व बंधुभिः ॥ अथविधानानि **तत्रपंचकमृतेमदनरत्नेगारुडे** आदौकृत्वाधनिष्ठार्धमेतन्नक्षत्रपंचकम् । रेवत्यंतंसदादूष्यमशुभंदाहकर्मणि ॥ शवस्यतुसमीपेतुक्षेप्तव्यापुत्तलास्तदा । दर्भमय्यास्तुचत्वारःक्षमंत्राभिमंत्रिताः ॥ ततोदाहःप्रकर्तव्यस्तैश्चपुत्तलकैःसह । सूतकांतेततःपुत्रैःकार्यंशांतिकपौष्टिकम् । पंचकेषुमृतोयोवैनगतिंलभनेनरः ॥ तिलांश्चैवहिरण्यंच तमुद्दिश्यघृतंदहेत् **क्रियानिबंधे** भाजनोपानहौछत्रंहैममुद्रांचवाससी । दक्षिणादीयतेविप्रेसर्वपातकमोचनी **मदनरत्नेगार्ग्यः**यदिभद्रातिथीनांस्याद्वानुभौमशनैश्चरैः । त्रिपादर्क्षैश्चसंयोगोद्वयोर्योगेद्विपुष्करः ॥ द्वित्रिपुष्करयोगेतुमृतिर्मृत्यंतरावहा । दहनेमरणेचैवत्रिगुणंस्याच्त्रिपुष्करे ॥ खननेप्येवमेवस्यादेतद्दोषोपशांतये । तिलपिष्टैर्यवैर्वापिशरीरंकारयेत्ततः ॥ शूर्प्पेनिधायालंकृत्य दाहयेत्पैतृकोपरि **तद्दाहेमंत्रमाहबौधायनः** अस्मात्त्वमितिमंत्रेण तिलपिष्टंप्रदाहयेत् । द्वित्रिपुष्करयोर्दोषस्त्रिभिःकृच्छ्रैर्व्यपोहति ॥ वासवेमरणंचेत्स्यात्गृहेवापिपुनर्मृतिः । सुवर्णंदक्षिणांदद्यात्कृष्णवस्त्रमथापिवा ॥ वासवं धनिष्ठा **ब्राह्मे** कुंभमीनस्थितेचंद्रेमरणंयस्यजायते।नतस्योर्ध्वगतिर्दृष्टासंततौनशुभंभवेत् ॥ नतस्यदाहःकर्तव्योविनाशास्त्रेषुजंतुषु । अथवातद्दिनेकार्योदाहस्तुविधिपूर्वकम् ॥ धनिष्ठापंचकेजीवोमृतोयदिकथंचन । त्रिपुष्करेयाम्यभेवाकुलजान्मारयेत्ध्रुवम् ॥ तत्रानिष्टविनाशार्थंविधानंसमुदीर्यते। दर्भाणांप्रतिमाःकार्याःपंचोर्णासूत्रवेष्टिताः ॥ यवपिष्टेनानुलिप्तास्ताभिःसहशवंदहेत् ॥ प्रेतवाहःप्रेनसखःप्रेतपःप्रेतभूमिपः । प्रेतहर्तापंचमस्तुनामान्येतानिचक्रमात् ॥ अत्रप्रतिमागंधपुष्पैःपूजयित्वा प्रथमांशिरसि । द्वितीयांनेत्रयोः । तृतीयांवामकुक्षौ । चतुर्थीं नाभौ । पंचमींपादयोर्न्यस्यतदुपारिनामभिर्घृतंहुत्वा । यमायसोमंत्र्यंबकमितिमंत्राभ्यांप्रत्येकंतास्वाज्यंहुनोदितिभद्दाः ॥ सूतकांतेततःपुत्रःकुर्याच्छांतिकपौष्टिकम् । कांस्यपात्रस्थितंतैलंवीक्ष्य

दद्याद्द्विजन्मने ब्रह्मविष्णुमहेशेंद्रवरुणप्रीतयेततः । माषमुद्गयवव्रीहिप्रियंग्वादिप्रयच्छति॥ स्वर्णदानंरुद्रजाप्यंलक्षहोमोद्विजार्चनम् । गोभूदानंषडंशेनकुर्याद्दोषोपशांतये **अपरार्के** धनिष्ठापंचकमृतेपंचरत्नानितन्मुखे । प्राश्याहुतित्रयंतत्रहुनेत्द्वहवपामिति। ततोनिर्हरणंकुर्यादेषसाग्नेर्विधिःस्मृतः । इतरंनिखनेदेवजलेवाप्रतिपादयेत् ॥ त्रिपादर्क्षमृतेतद्वद्धिरण्यशकलंमुखे। तस्यपिष्टमयंकुर्यात्पुरुषत्रितयंततः । होमःप्रतिमुखंकुर्यात्तथावहवपामिति ॥ काष्णायसंचकार्पासंकुसुंभंप्रतिपाद्यच । निर्यात्पराग्निंसंस्कुर्याद्धुव्यग्नौवान्यमुत्सृजेत् **तत्रैव** कनकंहीरकंनीलंपद्मरागंचमौक्तिकम् । पंचरत्नमिदंप्रोक्तमृषिभिःपूर्वदर्शिभिः ॥ रत्नानांचाप्यभावेतुस्वर्णकर्षार्धमेवच । सुवर्णस्याप्यभावेतुआज्यंज्ञेयंविचक्षणैः॥ मदनरत्नेप्येवम् **तथा** एकाशीतिपलंकांस्यंतदर्धंवातदर्धकम्।नवषट्त्रिपलंवापिदद्याद्विप्रायशक्तितः **तथान्यत्र** स्वगृह्योक्तविधानेनकृत्वाग्नेःस्थापनंततः । अन्वाधानंनिर्वपणंदेवतानांतथाहुतिःयमायधर्मराजायमृत्यवेचांतकायच।वैवस्वतायकालायसर्वभूतक्षयायच॥औदुंबरादध्वायनीलायपरमेष्ठिने वृकोदरायचित्रायचित्रगुप्तायवैक्रमात् ॥ विधिनाश्रपणंकृत्वाएकैकामाहुतिंहुनेत्।कृष्णांगांकृष्णवस्त्रांचहैमींनिष्कसमन्विताम्॥ दद्याद्विप्रायशांतायप्रीतोभवतुमेयमः ॥ त्रिपादर्क्षेप्येतदेव अपरार्के पुनर्वसूत्तराषाढाकृत्तिकोत्तरफाल्गुनी । पूर्वाभाद्राविशाखाचज्ञेयमेतत्त्रिपादभंमयूरचित्रेर्गगःमृतःश्मशानंयोनीतउपजीवतिमानवः । गृहेयस्यप्रविष्टोसौतिष्ठेदथकदाचन ॥अचिरान्मृत्युमायातिहृतदारपरिग्रहः।तत्रशांतिंप्रवक्ष्यामिधर्मराजमतंयथा ॥ सक्षीराणांघृताक्तानामग्नेर्हुत्वामुखेबुधः॥ औदुम्बरीणांविधिवत्ततःशांतिकृताभवेत् ॥ सावित्र्यष्टसहस्रेणक्षीरशांतिंचकारयेत् । कपिलांतिलकांस्यञ्च हुतान्तेभूरिदक्षिणेति **अथब्रह्मचारिमृतौशौनकः** ब्रह्मचारिमृतौरीतिं कथयामिसमासतः । तत्रावकीर्णदोषस्यप्रायश्चित्तम्प्रशान्तये ॥ द्वादशाब्दंषडब्दंवाब्यब्दंशक्त्याथवाचरेत् । स्नातकोब्रह्मचारीच निधनंप्राप्नुयाद्यदि ॥ संयोज्यचार्कविधिना संयोज्यौतौततःपरम् ॥ देशकालौस्मृ

त्वाऽमुकगोत्राऽमुकनाम्नोमृतस्यब्रह्मचारिणो व्रतविसर्गंकरिष्यइत्युक्त्वाहे म्नानांदीश्राद्धंकृत्वाऽग्निप्रतिष्ठाप्याघारान्तेचतसृभिर्व्याहृतिभिरग्नयेव्रतपतये व्रतानुष्ठानसम्पादनाय विश्वेभ्योदेवेभ्यश्चाज्यंहुत्वास्विष्टकृदादिसमाप्यपुनर्दे शकालौस्मृत्वार्केविवाहंकरिष्यइत्युक्त्वाहेम्नानान्दीश्राद्धंकृत्वार्कशाखांशव ञ्चहीरद्रयालिप्त्वापीतसूत्रेणवस्त्रयुग्मेनचावेष्टचाग्निप्रतिष्ठाप्याघारांतेग्नयेबृह स्पतयेविवाहविधियोजकायच यस्मैत्वंकामंकामायेतिकामायव्याहृतिभिश्चा ज्यंहुत्वास्विष्टकृदादिसमाप्यार्कशाखांशवंचदहेत् **विधानमालायाम्** येषां कुलेब्रह्मचारीनिधनंप्राप्नुयाद्यदि । तत्कुलंक्षयमाप्नोतिसोपिदुर्गतिमाप्नुयात् । मृतस्यम्रियमाणस्यषडब्दंव्रतमादिशेत् ॥ त्रिंशद्भ्योब्रह्मचारिभ्योदद्यात्कौपी नकान्नवान्हस्तमात्राःकर्णमात्रादद्यात्कृष्णाजिनानिच । पादुकाछत्रमाल्या निगोपीचंदनमेवच ॥ मणिप्रवालमालाश्चभूषणादिसमर्पयेत् । एवंकृतेवि धानेचविघ्नःकोपिनजायते ॥ अत्रमूलंमृग्यम् **कुष्ठिमृतौतुयमः** मृतस्यकुष्ठि नोदेहंनिखनेद्गोष्ठभूमिषु । वासरत्रितयंपश्चादुत्धृत्यान्यत्रतंदहेत् ॥ नगं गाप्लवनंकार्यंनिक्षेपेविधिरुच्यते । षडब्दव्रतपूर्णेनविधिनांत्यंकर्तुंचरेत् ॥ त तोस्थिसंचयंतस्यगंगायांप्रक्षिपेत्सुधीः । मासिमासिततः कुर्यान्मासिश्राद्धानि पार्वणात्॥इत्येतत्कुष्ठिमरणेकथितंशास्त्रकोविदैः **शुद्धितत्त्वेभविष्ये** शृणुकु ष्ठगणंविप्रउत्तरोत्तरतोगुरुम् । विचर्चिकातुदुश्चर्माचर्चरीयस्तृतीयकः । विक र्चूर्व्रणताम्रौचकृष्णश्वेतेतथाष्टकमित्युक्त्वामृतेतुप्रापयेत्तीर्थमथवातरुमूलक म् ॥ नपिंडंनोदकंकार्यंनचदानक्रियांचरेत्॥षण्मासीयत्रिमासीयमृतःकुष्ठीक दाचन । यदिस्नेहाच्चरेद्दाहंयतिश्चांद्रायणंचरेत् ॥ अकृतप्रायश्चित्तकुष्ठ्या दिदाहेइदंप्रायश्चितम् ॥ अतएवकुनख्यादिवत्कुष्ठिनोपिद्वादशरात्रंशूलपा णिनोक्तम् ॥ अतएवान्यदीयंकुष्ठिनोमरणांतमाशौचमुक्तं **कौर्मे** क्रियाहीन स्यमूर्खस्यमहारोगिणएवच । यथेष्टाचरणस्याहुर्मरणांतमशौचकम् **महारो गास्तु** वातव्याध्यश्मरीकुष्ठमेहोदरभगंदराः॥अर्शांसिग्रहणीत्यष्टौमहारोगाः प्रकीर्तिताइति **रजस्वलायास्तुवृद्धशातातपः** रजस्वलायाःप्रेतायाःसंस्कारा

दीनिनाचरेत्। ऊर्ध्वंत्रिरात्रात्स्नातांतांशवधर्मेणदाहयेत् ॥ अतःप्रक्षाल्यकाष्ठ वद्दग्ध्वाव्यहीध्वंदहेत **संकटेतुमदनरत्नेस्मृत्यंतरे** उदक्यासूतिकावापिमृ तास्याद्यादितांतदा॥आशौचेत्वनतिक्रांतेदाहयेदंतरायदि॥उद्धृतेनतुतोयेनस्ना पयित्वातुमंत्रतःआपोहिष्ठेतितिसृभिर्हिरण्यवर्णाश्चतसृभिः ॥ पवमानानुवाके नयदंतीतिचसप्तभिः । ततोयज्ञपवित्रेणगोमूत्रेणाथतेद्विजाः ॥ स्नापयित्वान्य वसनेनाच्छाद्यशवधर्मतः । दाहादिकंततःकुर्यात्प्रजापतिवचोयथा ॥ यज्ञ पवित्रमापोअस्मानितिमिताक्षरायाम् ॥ पंचभिःस्नापयित्वातुगव्यैःप्रेतांरज स्वलां । वस्त्रांतरावृतंकृत्वादाहयेद्विधिपूर्वकम् **गृह्यकारिकायां** अंतरिक्षमृ तायेचवह्नावप्सुप्रमादतः ॥ उदक्यासूतिकानारीचरेच्चांद्रायणत्रयम् ॥ त तोयवपिष्टेनानुलिप्याष्टोत्तरशतंशूर्पोदकैः संस्नाप्यभस्मगोमयमृत्कुशोदकपं चगव्यशुद्धोदकैरापोहिष्ठापावमानीभिः संस्नाप्यान्यवस्त्रेधृतेदहेदितिभट्टाः **अत्रप्रायश्चित्तमाहबौधायनः** उदक्यासूतिकामृत्यौचरेच्चांद्रायणत्रयमिति **सूतिकायास्तुमिताक्षरायाम्** सूतिकायांमृतायांतुकथंकुर्वंतियाज्ञिकाः । कुं भेसलिलमादायपंचगव्यंक्षिपेत्ततः॥पुण्यग्निभरभिमंत्र्याथोवाचशुद्धिंलभेत्तथा तेनैवस्नापयित्वातुदाहंकुर्याद्यथाविधि ॥ अलिंगाभिर्मंत्रिताभिर्वामदेव्याभिरे वच ॥ अन्यैश्चवारुणैर्मंत्रैःसंस्नाप्यविधिनादहेत् **गृह्यकारिकायाम्** सू तिकामरणेप्राप्ते सर्वौषध्यनुलेपनम् । असूतकीतुसंस्पृष्ट्वाशूर्पाणांतुशतंक्षि पेत् **प्रायश्चित्तेविशेषस्तत्रैव** सूतिकातुयदासाध्वीविस्नातामरणंगता । त्रिवर्षपूर्णपर्यंतंशुद्ध्येत्कृच्छ्रेणसर्वदा ॥ इदंचाद्यत्र्यहे ॥ सूतिकातुयदा नारीरजसातुपरिप्लुता । म्रियेतचेत्तुसानारीद्विवर्षंकृच्छ्रमाचरेत् ॥ इदं द्वितीयत्र्यहे ॥ सूतिकातुयदासाध्वीविस्नातामरणंगता । अब्दकृच्छ्रेणशु द्ध्येतव्यासस्यवचनंयथा ॥ इदंतृतीयत्र्यहे **अत्राशक्तौपक्षांतरमुक्तंतत्रैव** सूतिकातुयदानारीविस्नातामरणंगता । त्रिषण्णवदिनादर्वागेकाब्देनविशु द्ध्यति **ऊर्ध्वंतु** सूतिकातुयदानारीप्राणांश्चैवपरित्यजेत् । मासमेकावधिंया वत्त्रिभिःकृच्छ्रैर्विशुद्ध्यति **गर्भिणीमृतौतुमदनरत्नेशौनकः** गर्भिण्युद

क्यासंस्कारंशिशुसंस्कारमेवच । प्रवक्ष्यामिसमासेनशौनकोहंद्विजन्मनाम् ॥ गर्भिणीमरणेप्राप्तेगोमूत्रेणजलैःसह । आपोहिष्ठादिभिर्मंत्रैःप्रोक्ष्यभर्तासमास्थितः ॥ प्रेतंश्मशानेनीत्वाथोल्लिख्यसव्योदरन्ततः । पुत्रमादायजीवंश्चेत्स्तनंदत्वासुतायतु ॥ यस्तेस्तनःशशयइत्यृचाग्रामेनिधायच । उदरंचाव्रणं कुर्यात्पृषदाज्येनपूर्यच ॥ मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः । स्नाप्य चाच्छाद्यवासोभिः शवधर्मेणदाहयेत् ॥ तत्रैवषडशीतिमतेगद्यानि ॥ गर्भिण्यांमृतायांदक्षिणाशिरसंनिधायतस्यानाभिरंध्रात्सव्यमुदरंचतुरंगुलंहिरण्यगर्भःसमवर्ततेतिछित्वा गर्भश्चेदप्राणस्तंप्रक्षाल्यनिखनेत्सयदिजीवन् जीवत्वंममपुत्रकेत्युक्त्वाक्षेत्रियेत्वेतिपंचभिः स्नापयित्वाहिरण्यमंतर्धाय भूमौनिधायव्याहृतिभिरभिमंत्र्ययस्तेस्तनःशशयइतिस्तनंपाययित्वाशिशुंग्रामंप्रापयेत् ॥ गर्भच्छेदस्थलेशतायुधायेतिपंचाहुतीर्हुत्वाप्राणायस्वाहापूष्णेस्वाहेत्यनुवाकाभ्यांव्याहृत्यावाज्यंहुत्वाभिन्नमुदरंसूत्रेणसंग्रथ्यघृतेनानुलिप्यब्राह्मणायतिलान् गांभूमिंसुवर्णंदद्यादथयथोक्तेनकल्पनेनदहेत् बौध्रायनेनतुशतायुधायेतिपंचहोमानंतरं प्रयासाययासायवियासायसंयासायोद्यासायशुचेशोकायतप्यतेतपत्यै ब्रह्महत्यायैसर्वस्मैइतिस्वाहांतैराहुतयोप्यधिकाउक्ताः **गृह्यकारिकायाम्** यदागर्भवतीनारीसशल्यासंस्थिताभवेत् । कुक्षिंभित्वाततःशल्यंनिर्हरेद्यदिजीवति ॥ प्रमीतंनिखनेत्तंतुप्रायश्चित्तमतःपरम् । सात्रयस्त्रिंशताकृच्छ्रैःशुध्यतेशल्यदोषतः ॥ सगर्भदहनेतस्यावर्णजंवधपातकं । प्रायश्चित्तंचरित्वातुशुद्ध्यंतिपापकारिणः ॥ दग्ध्वातुगर्भसंयुक्तांत्रिरब्दंकृच्छ्रमाचरेत् । अथान्वारोहणंस्त्रीणामात्मनोभर्तुरेवच ॥ सर्वपापक्षयकरंनिरयोत्तारणायच । अनेकस्वर्गफलदंमुक्तिदंचतथैवच ॥ जन्मांतरेचसौभाग्यधनपुत्रादिवृद्धिदम् ॥ देशकालौस्मृत्वाऽरुंधतीसमाचरत्वस्वर्गलोकमहीयमानत्वमनुष्यलोमसंख्याब्दावच्छिन्नस्वर्गवासभर्तृसहितचतुर्दशेंद्रावच्छिन्नकालिककल्पीडमानत्वमातृपितृश्वशुरकुलत्रयपूतत्वब्रह्मघ्नमित्रघ्नकृतघ्न पतिपूतत्वपत्यवियोगकामाभर्तृज्वलच्चितारोहणंकरिष्ये ॥ अनुगमनेतुफलमुल्लिख्यान्वारोहणंकरिष्यइत्युक्त्वाहरिद्राकुंकुमांजनादियुतशूर्पाणिसुवासिनीभ्योदद्यात् मंत्रस्तु लक्ष्मीनारायणोदेवोबलसत्त्वगुणाश्रयः । गाढंसत्त्वंचमेदेयाद्वाणकैःपरि

तोषितः ॥ सोपस्कराणिशूर्पाणि वाणकैःसंयुतानिच । लक्ष्मीनारायणप्रीत्यैस त्त्वकामाददाम्यहम् ॥ अग्नेःसमीपमागत्यपंचरत्नानिपल्लवे । नीलांजनंतथाब ध्वामुखेमुक्ताफलंन्यसेत् ॥ ततोग्निप्रार्थनंकृत्वामंत्रेणानेनमिश्रितम् । स्वाहा संश्लेषनिर्विण्णसर्वगोत्रहुताशन ॥ सत्त्वंमार्गप्रदानेननयमांभर्तुरंतिकम् ॥ त तोग्नावाज्येनाग्नयेतेजोधिपतयेविष्णवेसत्वाधिपतये कालायधर्माधिपतयेपृथि व्यैलोकाधिपतयेरुद्रघोरसाधिष्ठात्रीभ्यः ।वायवेबलाधिपतयेआकाशायसर्वाधि पतयेकालायधर्माधिष्ठात्रेभ्यःसर्वसाक्षिणीभ्यः । ब्रह्मणेवेदाधिपतयेरुद्राय श्मशानाधिपतयेचहुत्वाग्निंप्रदक्षिणीकृत्यट्टषदमुपलांचसंपूज्यपुष्पांजलिंगृही त्वाग्निंप्रार्थयेत् ॥त्वमग्नेसर्वभूतानामंतश्चरसिसाक्षिवत्।त्वमेवदेवजानीषेनवि दुर्यानिमानुषाः ॥ अनुगच्छाभिभर्तारंवैधव्यभयपीडिता । सत्वमार्गप्रदानेन नयमांभर्तुरंतिकम् ॥ मंत्रमुच्चार्यशनकैःप्रविशेच्चहुताशनम् **गौडास्तु** इमाना रीरविधवाइति ॥ ॐइमाःपतिव्रतापुण्याःस्त्रियोयायाःसुशोभनाः । सहभर्तुः शरीरेणसंविशंतुविभावसुमितिचविप्रःपठेदित्याहुः **कातरांतु** प्रेतोत्तरेसुसांदे वरःशिष्योवाउदीर्ष्वेतिद्वाभ्यामुत्थापयेत् ॥ एतन्महिमामिताक्षरादौज्ञेयः **पृ थ्वीचंद्रोदयेस्कांदे** अनुव्रजतिभर्तारंगृहात्पितृवनंमुदा॥पदेपदेश्वमेधस्यफलं प्राप्नोत्यनुत्तमम् **यस्त्वंगिराः** यास्त्रीब्राह्मणजातीयामृतंपतिमनुव्रजेत् । सा स्वर्गमात्मघातेननात्मानंनपतिंनयेदिति **यच्चव्याघ्रपात्** नम्रियेतसमंभर्त्रा ब्राह्मणीशोककर्शिता । नब्रह्मगतिमाप्नोतिमरणादात्मघातिनीतिपृथक्चिति परम् ॥ पृथक्चितिंसमारुह्यनविप्रागंतुमर्हति । अन्यासांचैवनारीणांस्त्री धर्मोयंपरःस्मृतइत्युशनसोक्तेः ॥ पृथक्चितिंस्तुक्षत्रियादिपरा **तद्विधिर्ब्रा ह्मे** देशांतरेमृतेपत्यौसाध्वीतत्पादुकाद्वयम् । निधायोरसिसंशुद्धाप्रविशेज्जा तवेदसम् ॥ ऋग्वेदवादात्साध्वीस्त्रीनभवेदात्मघातिनी । त्र्यहाशौचेनिवृत्ते तुश्राद्धंप्राप्नोतिशास्त्रवत् ॥ इमानारीरविधवाइतिऋग्वेदवादः ॥ त्र्यहाशौ चमन्वारोहणपरमितिस्मार्ताः ॥ निषेधवाक्यानिप्रायश्चित्तार्थमृतेनपतितेन वासहमरणनिषेधपराणीत्यप्याहुः ॥ अस्थिदाहेपलाशदाहेवानपृथक्चिति दोषः ॥ अंगत्वेनस्थानापत्यावाशरीरतुल्यत्वात् **यत्तु** ब्रह्मघ्नोवाकृतघ्नोवा मित्रघ्नोवाभवेत्पतिः । पुनात्यविधवानारीतमादायमृतातुयेतिहारीतीयंतत्पति

तदाहादिनिषेधेनसहगमनस्यदूरतोपास्तत्वादर्थवादमात्रमितिपृथ्वीचंद्रः ॥ जन्मांतरीयपापवतासहमरणेनोद्धारइतिस्मार्तगौडाः **शुद्धितत्त्वेव्यासः** दिनैकगम्यदेशस्थासाध्वीचेत्कृतनिश्चया। नदहेत्स्वामिनंतस्यायावदागमनं भवेत् **तत्रैवभविष्ये** तृतीयेह्निउदक्यायामृतेभर्तरिवैद्विजाः। तस्यानुमरणार्थायस्थापयेदेकरात्रकम् ॥ एकांचितांसमासाद्यभर्तारंयानुगच्छति। तद्भर्तुर्यःक्रियाकर्तासतस्याश्चक्रियांचरेत् ॥ एतद्दशाहांतरम् ॥ यश्चाग्निदाताप्रेतस्यपिंडंदद्यात्सएवहीतिवायवीयोक्तेः **आपस्तंबः** चितिभ्रष्टातुयानारीमोहाद्विचलिताभवेत् ॥ प्राजापत्येनशुध्येततस्माद्वैपापकर्मणः **तथा** अन्वारोहेतुनारीणांपत्युश्चैकोदकक्रियां। पिण्डदानक्रियातद्वच्छ्राद्धंप्रत्याब्दिकंतथा ॥ अन्वारोहेकृतेपत्न्याःपृथक्पिंडांस्तिलांजलीन्। पृथक्शिलेनकुर्वीतदद्यादेकशिलेतथा ॥ अन्यत्प्रागुक्तम्। इदंगर्भिणीबालापत्यासूतिकारजस्वलाव्यभिचारिणीभिर्नकार्यं ॥ स्वैरिणीनांगर्भिणीनांपतितानांचयोषिताम्। नास्तिपत्याग्निसंवेशःपतितौहितथाउभाविति मदनरत्ने स्मृतिसंग्रहोक्तेः **मदनरत्नेबृहस्पतिः** बालसंवर्धनमुक्त्वाबालापत्यानगच्छति। व्रतोपवासनियतारक्षेद्गर्भंचगर्भिणी ॥ तृतीयपादेरजस्वलासूतिकाचेतिपृथिवीचंद्रोदयेगौडीयशुद्धितत्त्वेचपाठः **तत्रैवबृहन्नारदीयेपि** बालापत्याचगर्भिण्योह्यदृष्टऋतवस्तथा। रजस्वलाराजसुतेनारोहंतिचितांतुतांइति **अत्र** पतिव्रतासासंदीप्तं प्रविशेद्याहुताशनमितिभारताद्दग्वेदवादात्साध्वीस्त्रीतिब्राह्माच्च पतिव्रतानामेवाधिकारोनदुर्वृत्तानाम् **यत्तु** अवमत्यचयाःपूर्वंपतिंदुष्टेनचेतसा। वर्तंतेयाश्चसततंभर्तॄणांप्रतिकूलतः ॥ तत्रानुमरणंकालेयाःकुर्व्वंतितथाविधाः। कामाक्रोधाद्भयान्मोहात्सर्वाःपूताभवंत्युतेतिभारतं ॥ तत्कैमुतिकन्यायेनस्तावकमितिपृथ्वीचंद्रः ॥ ब्राह्मण्याएकचितिरेवनपृथक्चितिः ॥ क्षत्रियादीनांपृथगेकावेतिकल्पतरुरत्नाकरमदनपारिजातादयः ॥ शुद्धिचिंतामणौचैवम्॥ तत्रान्वारोहणेभर्तृशौचमध्ये ॥ तदूर्ध्ववाकृतेत्रिरात्रमध्येएवदशपिंडाः॥सहगमनेतुभर्तुराशौचतुल्यमाशौचंपिंडदानंच ॥ अन्विताया:प्रदातव्यादशपिण्डाश्रुयहेणतु। स्वाम्याशौचेव्यतीतेतु तस्याःश्राद्धंप्रदीयतइतिशुद्धितत्त्वेशूलपाणौचपैठीनसिस्मृतेः ॥ संस्थितंपतिमालिंग्य प्रविशेद्याहुताशनम् ।तस्याः

पिण्डादिकंदेयं क्रमशःपतिपिण्डवदिति शूलपाणिशुद्धितत्त्वधृतव्यासोक्तेः ॥ अन्यत्प्रागुक्तम् ॥ यदातुरजस्वलापिपत्नी मृतेपत्यौदेशकालवशात्तदै वानुगच्छतिनशुद्धिप्रतीक्षतेतत्रविधिः **देवयाज्ञिकनिबन्धे** यदास्त्रियामुद क्यायांपतिःप्राणान्समुत्सृजेत् । द्रोणमेकंतण्डुलानामवहन्याद्विशुद्धये । मु सलाघातैस्तदसृक्स्रवतेयोनिमण्डलात् । विरजस्कामन्यमानास्वेचित्तेतदसृ क्क्षयम् ॥ दृष्ट्वाशौचंप्रकुर्वीतपंचमृत्तिकयापृथक् । त्रिंशद्विंशतिर्दशचगवां दत्वात्वहःक्रमात् ॥ विप्राणांवचनाच्छुद्धासमारोहेद्धुताशनम् । नारीणां सरजस्काणामियंशुद्धिरुदाहृता ॥ अत्रश्राद्धादौनिर्णयाःपूर्वमुक्तः ॥

॥ इति श्रीभट्टकमलाकरकृते निर्णयसिंधावंत्यकर्मनिर्णयः ॥

अग्निप्रवेशाशक्तौतुविष्णुः मृतेभर्तरिब्रह्मचर्यंतदन्वारोहणंचेति **ब्रह्म वैवर्ते** सहानुगमनंशस्तंवैधव्यस्याथपालनम् **यत्तुतत्रैव** कलौनान्यागतिः स्त्रीणांसहानुगननादृतइतिब्रह्मचर्याशक्यत्वपरम् **तथाचमनुः** ब्रह्मचर्यंचरे द्वापिप्रविशेद्वाहुताशनम् **काशीखण्डेपि** पत्यौमृतेपियायोषिद्वैधव्यंपाल येत्क्वचित् । सापुनःप्राप्यभर्तारंस्वर्गलोकंसमश्नुते ॥ अनुयातिनभर्तारंयदि दैवात्कथंचन । तत्रापिशीलंसंरक्षेच्छीलभंगात्पतत्यधः॥ तद्वैगुण्यादपिस्वर्गा त्पपततिनान्यथा । तस्याःपिताचमाताचभ्रातृवर्गस्तथैवच **अथविधवाध र्माःमदनरत्नेस्कांदे** विधवाकबरीबन्धोभर्तृबन्धायजायते । शिरसोवपनं तस्मात्कार्यंविधवयासदा ॥ एकाहारःसदाकार्योनद्वितीयःकदाचन । मा सोपवासंवाकुर्याच्चांद्रायणमथापिवा ॥ पर्यंकशायिनीनारीविधवापातयेत्प तिम् । नैवांगोद्वर्तनंकार्यंस्त्रियाविधवयाक्वचित् ॥ गन्धद्रव्यस्यभोगोनैव कार्यस्तयापुनः । तर्पणंप्रत्यहंकार्यंभर्तुस्तिलकुशोदकैः ॥ तत्पितुस्तत्पितु श्चापिनामगोत्रादिपूर्वकम् ॥ इदमपुत्रापरमितिमदनपारिजातः ॥ ना धिरोहेदनड्वाहंप्राणैःकंठगतैरपि । कंचुकंनपरीदध्याद्वासोनविकृतंवसेत् ॥ वैशाखेकार्तिकेमाघेविशेषनियमंचरेत् **प्रचेताः** तांबूलाभ्यंजनंचैवकांस्य पात्रेचभोजनम् । यतिश्चब्रह्मचारीचविधवाचविवर्जयेत् **श्राद्धादौतुविशे षःप्रागुक्तः । यत्तुबौधायनः** संवत्सरंप्रेतपत्नीमधुमांसंविवर्जयेत् । अधः शयीतषण्मासानितिमौद्गल्यभाषितामितितदसवर्णापरमित्यपरार्कः**अथसंन्या**

सः । याज्ञवल्क्यः वनाद्गृहाद्वाकृत्वेष्टिंसार्ववेदसदक्षिणां । प्राजापत्यांतदं तेतानग्नीनारोप्यचात्मनि॥अधीतवेदोजयकृत्पुत्रवान्नदोग्निमान्।शक्त्याच यज्ञकृन्मोक्षेमनःकुर्यात्तुनान्यथा॥एतदाश्रसमुच्चयपक्षे॥जाबालश्रुतौत्वन्येपि पक्षाउक्ताः॥यदिचेतरथाब्रह्मचर्यादेवप्रव्रजेद्गृहाद्वनाद्वा ॥अथपुनरव्रतीवास्ना तकोवास्नातकोवोत्सन्नाग्निकोवायदहरेवविरजेत्तदहरेवप्रव्रजेदिति **अंगिराः** प्रव्रजेद्ब्रह्मचर्याद्वाप्रव्रजेद्वागृहादपि । वनाद्वाप्रव्रजेद्विद्वानातुरोवाथदुःखितः ॥आतुरोमुमूर्षुः॥दुःखितश्चौरव्याघ्रादिभीतः **भारते** आतुराणांचसंन्यासेनवि धिर्नैवचक्रिया । प्रेषमात्रंसमुच्चार्यसंन्यासंतत्रपूरयेत् **जाबालश्रुतावपि** य द्यातुरःस्यान्मनसावाचावासंन्यसेदिति ॥ अत्रविप्रस्यैवाधिकारः॥ ब्राह्मणाः प्रव्रजंतीतिजाबालश्रुतेः ॥ आत्मन्यग्नीन्समारोप्यब्राह्मणःप्रव्रजेत्गृहादिति मनूक्तेश्चेतिविज्ञानेश्वरादयः **वृद्धयाज्ञवल्क्योपि** चत्वारोब्राह्मणस्योक्ताआ श्रमाःश्रुतिचोदिताः । क्षत्रियस्यत्रयःप्रोक्ताद्वावेकोवैश्यशूद्रयोरिति **माध वस्तु** ब्राह्मणःक्षत्रियोवाथवैश्योवाप्रव्रजेद्गृहादितिकौर्म्माद्युक्तेर्व्वर्णत्रयस्या प्यधिकारः ॥ पूर्ववाक्यंतुकाषायदण्डादिनिषेधार्थं ॥ मुखजानामयंधर्मोय द्विष्णोर्लिंगधारणम् । राजन्यवैश्ययोर्नेतिदत्तात्रेयमुनेर्वचइतिबौधायनोक्ते रितिपक्षांतरमाह ॥ तत्त्वंतुकुटीचकादिपरमेतदिति ॥ योपिसंन्यासंपलपैतृ कमितिकलौनिषेधःसोपित्रिदण्डादिपरइत्युक्तंप्राक् ॥ सचसंन्यासश्चतुर्धेत्या **हहारीतः** कुटीचकोबहुदकोहंसश्चैवतृतीयकः । चतुर्थःपरमोहंसोयोयःप श्चात्सउत्तमः ॥ आद्यःपुत्रादिनाकुटींकारयित्वातत्रगृहेवावसन्काषायवा सःशिखोपवीतत्रिदण्डवान्बन्धुषुस्वगृहेवाभुंजानआत्मज्ञोभवेत् ॥ एतद लंताशक्तपरम् ॥ द्वितीयस्तुबन्धून्हित्वासप्तागाराणिभैक्षंचरन्पूर्वोक्तवेषः स्यात् ॥ हंसस्तुपूर्वोक्तवेषोप्येवदण्डः ॥ एकन्तुवैणवंदण्डंधारयेन्नित्यमादरा दितिस्कांदात् **विष्णुरपि** यज्ञोपवीतंदण्डंच वस्त्रंजन्तुनिवारणम् । तावान् परिग्रहःप्रोक्तोनान्योहंसपरिग्रहः **चतुर्थोपिस्कांदे** परहंसस्त्रिदंडंचरज्जुंगो वालनिर्मिताम् । शिखांयज्ञोपवीतंचनित्यंकर्मपरित्यजेत् ॥ अयमप्येकदंड एव ॥ येतुशिखोपवीतादित्यागनिषेधास्तेकुटीचकादिपराः **यत्तुमेधातिथिः** यावन्नस्युस्त्रयोदंडास्तावदेकेनवर्तयेदिति ॥ तदपितत्परमेव **यच्चात्रिः** चतु

र्धाभिक्षवःप्रोक्ताःसर्वेचैवत्रिदंडिनइति ॥ तद्वाक्दंडादिपरम् ॥ नयष्टिपर म् ॥ वाग्दंडोथमनोदंडःकर्मदंडस्तथैवच । यस्यैतेनियतादंडाःसत्रिदंडीति च्योच्यतेइतिमनूक्तेः ॥ तस्मात्परमहंसस्यैकदंडएव ॥ सोप्यविदुषः ॥ विदु षस्तुसोपिनास्ति ॥ नदंडंनशिखांनाच्छादनंचरतिपरमहंसइतिमहोपनिषदु क्तेः॥ज्ञानमेवास्यदंडइतिवाक्यशेषाच्च **यत्तुयमः**काष्ठदंडोधृतोयेनसर्वाशीज्ञा नवर्जितः।सयातिनरकान्घोरान्महारौरवसंज्ञितानितितद्वैराग्यंविनाजीवना र्थसंन्यासपरम्॥एकदंडंसमाश्रित्यजीवंतिबहवोनराः।नरकेरौरवेघोरेकर्मत्या गात्पतंतितइतिस्मृतेः **यच्चाश्वमेधिके** एकदंडीत्रिदंडीवाशिखामुंडितएववा। काषायमात्रसारोपियतिःपूज्योयुधिष्ठिरेतितस्यापिपूर्वोक्तव्यवस्थाज्ञेया **अथत द्विधिःबौधायनः**कृत्वाश्राद्धानिसर्वाणिपित्रादिभ्योष्टकंपृथक्॥वापयित्वाच केशादीन्मार्जयेन्मातृकाइमाः ॥ सर्वाणीतिस्वस्यनवश्राद्धषोडशश्राद्धादिकृ त्वेत्यर्थः**स्मृत्यर्थसारेपि** एकोद्दिष्टविधानेनकुर्याच्छ्राद्धानिषोडश॥अग्निमान्पा र्वणेनैवविधिनानिर्वपेत्स्वयमिति **कात्यायनः** कृच्छ्रांस्तुचतुरःकृत्वापावना र्थमनाश्रमीआश्रमीचेत्तप्तकृच्छ्रंतेनासौयोग्यतांव्रजेत् **बौधायनः**सदैवमार्षि कंदिव्यंपित्र्यंमातृकमानुषे। भौतिकंचात्मनश्चांतेअष्टौश्राद्धानिनिर्वपेत् **अत्र क्रममाहहेमाद्रौशौनकः**देवश्राद्धेब्रह्मविष्णुमहेश्वरादेवताः॥आर्षेदेवर्षिब्रह्म र्षिक्षत्रर्षयः ॥ देवर्षिक्षत्रर्षिमनुष्यर्षयोवा ॥ मरीच्यादिऋषयइतिसंन्यासपद्ध तौतच्चिंत्यम् ॥ दिव्येवसुरुद्रादित्याः ॥ मानुषेसनकसनंदनसनातनाः ॥ भूतश्राद्धेपृथिव्यादिभूतानिचक्षुरादिकरणानिचतुर्विधोभूतग्रामश्चेतितिस्रः ॥ पित्र्येपित्रादित्रयोमातामहाश्च ॥ मातृकेमात्रादयस्तिस्रः ॥ आत्मश्राद्धेआ त्मपितृपितामहादेवताः ॥ आत्मश्राद्धंपरमात्मदैवत्यमितिसंन्यासपद्धतौत च्चिंत्यम् ॥ सर्वत्रनांदीमुखत्वंविशेषणंज्ञेयम् ॥ सर्व्वत्रपिंडदानम् ॥ युग्मा विप्राः ॥ दक्षक्रतूसत्यवसूवाविश्वेदेवौ ॥ अन्यन्नांदीश्राद्धवदितिहेमाद्रिः **स्मृत्यर्थसारे** केशश्मश्रुलोमनखंवापयित्वोपकल्पयेत् । दंडंजलंपवित्रंच शिक्यंपात्रंकमंडलुम्॥ आसनंकौपीनमाच्छादनंकंथापादुकेइतिदशपंचवा॥ एतच्चपूर्वेद्युर्नांदीमुखंकृत्वापरेद्युः पुण्याहवाचनंकृत्वाकार्यमितिशौनकः **बौ धायनः** त्रीन्दंडानंगुलीस्थूलान्वैणवान्मूर्धसंमितान् । एकादशनवद्वित्रि

चतुःसप्तान्यपर्वकान् । वेष्टितान्कृष्णगोवालरज्ज्वातुचतुरंगुलान् । एको वाताद्दशोदंडोगोवालसदृशोभवेत् ॥ अनग्निरग्निमुत्पाद्यनित्येनविधिनात तः । पृष्टोदिविविधानेनेत्यर्थः ॥ स्वाग्नावेवाग्निमान्कुर्यादपवर्गोक्तमादितः । आज्यंपयोदधीत्येतत्त्रिवृद्वाजंलमेववा ॥ ओंभूरित्यादिनाप्राश्यरात्रिंचोप वसेत्ततः । अथादित्यास्तमयात्पूर्वमग्नीन्विहृत्यसः ॥ आज्यमग्नौगार्हपत्ये संस्कृत्यैतेनचस्रुचा ॥ पूर्णयाहवनीयेतुजुहुयात्प्रणवेनतत् । ब्रह्मान्वाधान मेतत्स्यादग्निहोत्रेहुनेत्ततः ॥ संस्तीर्यगार्हपत्यस्यदर्भानुत्तरतोव्रतु । पात्रा ण्यासाद्यदर्भेषुब्रह्मायतनएवतु ॥ जागृयाद्रात्रिमेतांतुयावद्ब्राह्मोमुहूर्त्तकः । अग्निहोत्रंस्वकालेतुहुत्वाप्रातस्तनंततः ॥ इष्टिंवैश्वानरींकुर्यात्प्राजापत्यमथा पिवा **जाबालश्रुतौ** तद्वैकेप्राजापत्यमेवेष्टिंकुर्व्वंतितदुतथानकुर्यादाग्नेयीमेव कुर्यात्पश्चात्त्रैधातवीयामेवकुर्यादित्युक्तम् ॥ तेनात्रविकल्पः **अत्राहुः** त्रे ताग्नेःप्राजापत्यातद्वाक्येशेषाग्नीनितिवहुत्वश्रुतेः ॥ एकाग्नेस्त्वाग्नेयीति ॥ अनाहिताग्नेरिष्टिस्थानेवैश्वानरआग्नेयोवाचरुरितिमाधवः **कात्यायनः** आ त्मन्यग्नीन्समारोप्यवेदिमध्यस्थितोहरिम् । ध्यात्वाहृदित्वनुज्ञातोगुरुणाप्रै षमीरयेत् **कपिलः** विधिवत्प्रैषमुक्त्वाथत्रिरुपांशुत्रिरुच्चकैः।अभयंसर्वभूतेभ्यो मत्तःस्वाहेत्यथोभुवि ॥ निनीयदंडशिक्यादिगृहीत्वाथबहिर्व्रजेत् **बौधा यनः** सखेमेत्यादिनादण्डंयेनदेवाःपवित्रकम् । यदस्यपारेशिक्यंतुपात्रंव्या हृतिभिस्तथा ॥ युवासुवासाःकौपीनंगृहीत्वाबांधवांस्त्यजेत् **अथक्रमः** तत्र संन्यासेधिकारसिध्यर्थंस्वस्यनवश्राद्धषोडशश्राद्धसपिण्डनानिसाग्निः पार्वणा न्यनग्निस्त्वेकोद्दिष्टविधिनाकृत्वाऽनाश्रमीचेत्कृच्छ्रचतुष्टयमन्यस्तुतप्तकृच्छ्रं कृत्वोदगयनेएकादश्यांद्वादश्यांवा साग्निरमावास्यायांपौर्णमास्यांचतुर्दश्यां वायथापर्वणिप्राजापत्यंस्यात् । तत्रदेशकालौस्मृत्वापरमहंसादिसंन्यासग्र हणंकरिष्यइतिसंवल्प्यगणेशंसम्पूज्यपुण्याहंवाचयित्वामातृकापूजांवृद्धिश्रा द्धंच कृत्वाऽस्तमयात्प्रागौपासंन समिध्याहिताग्निस्तुगार्हपत्ये ॥ विधुरोग्नि होत्रीतुत्रिकाण्डमण्डनोक्तदिशाकुशपत्न्यासह पवमानेष्टयन्तंपूर्णाहुत्यंतंवा धानंकुर्यात् ॥ ब्रह्मचारीचेल्लौकिकेविधुरश्चेद्व्याहृतिभिःप्रणवेनचाग्निमादा यान्वग्निरुषसामित्यानीयपृष्टोदिवीति निधायतेनैवसमिध्यतत्सवितुस्तांसवि

तुर्विंश्वानिनइतितिस्रःसमिधोभ्यादध्यात् ॥ एवमग्नौसिद्धेकक्षोपस्थवर्ज्यंवप
नंकृत्वापयोदधियुतमाज्यमपोवा ॥ ओंभूःसावित्रींप्रविशामितत्सवितुर्वरे
ण्यमितिप्राश्याचम्यपुनरादाय ॥ ओम् भुवः सावित्रींप्रविशामिभर्गोदेवस्य
धीमहीतिद्वितीयम् ॥ ओम् स्वः सावित्रींप्रविशामिधियोयोनः प्रचोदयादि
तितृतीयं ॥समस्तयाचतुर्थं ॥ ओम् भूर्भुवःस्वःसावित्रींप्रविशामि०तत्सवितु०
यात्इति॥संन्यासपक्षतौतुत्रिवृदसीतिप्रथमं प्रवृदसीतिद्वितीयंविवृदसीतितृ
यंप्राश्यापःपुनंत्वितिजलंप्राश्यसावित्रीप्रवेशउक्तः ॥ततआहवनीयंविहृत्यब्र
ह्माणमुपवेश्याज्यंसंस्कृत्यचतुर्द्दादशवागृहीत्वासमित्पूर्व्वामोंस्वाहापरमात्म
नइदमितिहुत्वोपवसेत् ॥ ततःसायंहोमंवैश्वदेवंचकृत्वाअग्नेरुदक्कुशानास्ती
र्यदंडादीनिदशपंचवासाद्यब्रह्मासनेकृष्णाजिनोपविष्टोरात्रौजागरंकृत्वाप्रात
र्होमानंतरंप्राजापत्यांवैश्वानरींवाकृत्वा ऋत्विग्भ्यःसर्व्वस्वंब्रह्मणेचमधुपूर्ण
तैजसपात्रंदत्वादारुपात्राण्याहवनीयेइममून्मयानिचजलेक्षिपेत् ॥ कृष्णाजि
नंत्वाददीत ॥ अनाहिताग्निस्तुवैश्वानरमाग्नेयंवाचरुंहुत्वापात्राण्यग्नौक्षिप्त्वा
भूर्भुवःस्वरित्यपः स्पृष्ट्वातरत्समंदीतिजप्त्वाविप्रान्संभोज्यपुण्याहंवाचयित्वा
अत्रवावपनंकृत्वाहैमरूप्यकुशजलैःस्नात्वापुरुषायचरुंकृत्वाप्राणायस्वाहेति
पंचाहुतीर्हुत्वापुरुषसूक्तेनप्रत्यृचमाज्यचरुंचजुहुयात् ॥ अत्रविरजाहोमंके
चिदाहुः **यथोक्तंशिवगीतासु** जुहुयाद्विरजामंत्रैःप्राणापानादिभिस्ततः। अ
नुवाकांतमेकाग्रःसमिदाज्यचरून्पृथक् ॥ आत्मन्यग्नीन्समारोप्ययातेअग्नेति
मन्त्रतः । भस्मादायाग्निरित्याद्यैर्विमृज्यांगानिसंस्पृशेत् ॥ पापैर्व्विमुच्यतेसत्यं
मुच्यतेनात्रसंशयः **यथा** प्राणापानव्यानोदानसमानामेशुत्ध्यताम् ज्यो
तिरहंविरजाविपाप्माभूयास ५स्वाहा॥ सर्वत्रलिंगोक्तदेवताभ्यइदमितित्यागः
वाङ्मनश्चक्षुश्रोत्रहिह्वाघ्राणरेतोबुत्ध्याकूतिःसंकल्पामेशुत्ध्यंताम् ॥ ज्योति०
त्वक्चर्ममांसरुधिरमेदोमज्जास्नायवोस्थीनिमेशुत्ध्यंताम् ॥ ज्योति०शिरःपा
णिपादपार्श्वपृष्टोरूदरजंघशिश्नोपस्थपायवामेशुत्ध्यंताम् ज्योतिरहं०उत्ति
ष्ठपुरुषहरितपिङ्गललोहिताक्षिदोहिदेहिदापयितामेशुत्ध्यंताम् ॥ पृथिव्याप
स्तेजोवायुराकाशंमेशुत्ध्यंताम् ज्योतिरहं०शब्दस्पर्शरूपरसगंधामेशुत्ध्यंता
म् ज्योति०मनोवाक्कायकर्म्माणिमेशुत्ध्यंतांज्योतिःअव्यक्तभावैरहंकारैर्ज्यो

तिः आत्मामेशुत्ध्यंताम् ॥ क्षुधेस्वाहा। क्षुत्पिपासायस्वाहा विवित्ध्यैस्वाहा। ऋग्विधानायस्वाहा। कषोत्कायस्वाहा ॥ क्षुत्पिपासामलंज्येष्ठामलक्ष्मीर्नाशयाम्यहम्। अभूतिमसमृद्धिंचसर्व्वान्निर्णुदमेपाप्मानꣳस्वाहा ॥ अन्नमयप्राणामयमनोमयविज्ञानमयमानन्दमयमात्मामेशुत्ध्यंताम्॥ज्योति०॥ततः स्विष्टकृदादिहुत्वाब्रह्मणेहिरण्यमाज्यपात्रंधेनुंचदत्वा समासिंचत्वित्युपतिष्ठेत् ॥ अत्रकेचिदनग्नेःसावित्रीप्रवेशंपूर्णाहुतिंचाहुः ॥ ततोयातेअग्नेयज्ञियात नूरितित्रिस्त्रिभिरेकैकांजिघ्रन्नात्मन्यग्नीन्समारोप्यगुरवेसर्व्वस्वंदत्वा ॥ योब्रह्माणंविदधातिपूर्व्वं योवैवेदांश्चप्रहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशं मुमुक्षुर्व्वैशरणमहं प्रपद्यइत्युपस्थाय ॥ दक्षिणंजान्वाच्यपादावुपयंगृह्याधीहि भगवोब्रह्मेतिवदेत् ॥ ततोगुरुरात्मानंब्रह्मरूपंध्यात्वाशंखंद्वादशप्रणवैरभिमंत्र्यतेनशिष्यमभिषिंच्य शन्नोमित्रइतिशांतिंपठित्वातच्छिरसिहस्तंदत्वापुरुषसूक्तंजप्त्वा ॥ ममव्रतेहृदयंतेदधामीतिचजप्त्वोदङ्मुखःप्रणवार्थमनुसंदधद्दक्षिणेकर्णे प्रणवमुपदिश्यतदर्थंचपंचीकरणाद्यवबोध्यअयमात्माब्रह्मतत्त्वमसिप्रज्ञानंब्रह्मेत्याद्युपदिशेत्तदर्थंचवदेत् ॥ ततोनामदद्यात्। ततःशिष्यस्तेनोपदिष्टोहरिंस्मरन्नूर्ध्वबाहुस्तिष्ठन्देवान्साक्षिणःकृत्वा ॥ ओम्भूर्भुवः स्वःसन्यस्तंमयेतित्रिरुपांशुत्रिरुच्चैस्त्रिरत्युच्चैश्चोक्त्वावा जलसमीपंगत्वास्नात्वा ॥ अभयंर्वभूतेभ्योमत्तःस्वाहेतित्रिरंजलीन्क्षिप्त्वा युवासुवासाइति काषायंकौपीनंवासश्चपरिधायसखामेगोपायेतिमुख्यवैणवंपालाशंबैल्वमौदुंबरंवादंडंगृह्णीयात् ॥ अत्रपुत्रकामोगृहस्थःशंखेनपुरुषसूक्तेनदण्डमभिषिच्य दद्यादित्याचारः ॥ तत्रशिखामुत्पाट्य ओम्भूःस्वाहेत्यग्नौजलेवाहुत्वातथैवोपवीतंहुत्वा ॥ येनदेवाःपवित्रेणेतिजलेपवित्रंयदास्यपारइतिशिक्यंसावित्र्याकमंडलुं सप्तव्याहृतिभिर्भोजनपात्रमिदंविष्णुरित्यासनंबृसींवागृहीत्वा ॥ ओम्भूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नमइतितर्पयित्वा ॥ भूःस्वधों स्वः स्वधों भूर्भुवःस्वर्म्महर्नमः स्वधेतिपितॄंस्तर्प्पयित्वोदुत्यंचित्रं तच्चक्षुर्हसः शुचिषन्नमोमित्रस्येति स्नात्वासुरभिमतीभिरापोहिष्टेतिहिरण्यवर्णाभिःपावमानीभिर्व्याहृतिभिश्च मार्जयित्वाष्टोत्तरशतवारमघमर्षणंप्राणायामांश्चकृत्वा ॥ ओम्भूर्भुवःसुवरितिचपठित्वा ॥ नमःसवित्रइतिसूर्यंचोपस्थायपुनःस्नात्वा

३११

जंघेक्षालयित्वा ॥ ओंमितिब्रह्मोमितीदंसर्वमोमितिब्रह्मवा एषज्योतिर्य एषवेदीयएषतपतिवेद्यमेवैतद्यएषवेदोयदवनमस्तीतिजपित्वाष्टसहस्रंगायत्रीं जपेदिति **अथयतिधर्माः** प्रातरुत्थायब्रह्मणस्पतेइतिजपित्वादंडादीनि मृदंचनिधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणंशौचंकृत्वाऽचम्यपर्वद्वादशीव र्ज्यप्रणवेनदंतधावनंकृत्वा तेनैवमृदाबहिः कटिंप्रक्षाल्यजलतर्पणवर्ज्यं स्नात्वापुनर्जघेप्रक्षाल्यवस्त्रादीनिगृहीत्वामार्जनांतंकृत्वाकेशवादि नमोंत नामभिस्तर्पयित्वा ॥ ओंभूतस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्ज नस्तर्पयामीतितर्पयेत् ॥ ओंभूः स्वाहेतिस्वाहाशब्दांतैः स्वधाशब्दांतैश्चे भिरेवपुनस्तर्पयेदितिकेचित् ॥ ततआचम्यांजलिनाप्रणवेनजलमादायव्याह तिभिरुद्धृत्यगायत्र्यात्रिःक्षिप्त्वागायत्रींजपेत् ॥ उदितेसूर्य्येप्रणवेनव्याहृति भिर्वार्घ्यंत्रिर्दत्वामित्रस्यचर्षणीत्याद्यैःपूर्व्वोक्तसौरीभिरिदंविष्णुस्त्रिर्देवोब्रह्मज ज्ञानमितिचोपस्थायसर्वभूतेभ्योनमइतिप्रदक्षिणमावर्तते ॥ ततोनत्वा ॥ आदित्यायविद्महेसहस्राक्षायधीमहि ॥ तन्नःसूर्य्यःप्रचोदयादितित्रिर्जपेत् ॥ एवंत्रिकालंविष्णुपूजांब्रह्मयज्ञंचकुर्यात् **अथभिक्षा** विधूमेसन्नमुसले व्यंगा रेभुक्तवज्जने । कालेपराह्णेभूयिष्ठेनित्यंभिक्षांयतिश्चरेदित्युक्तकाले ॥ उद्व यमितिचतसृभिरादित्यमुपस्थायतेनैक्यंध्यात्वा ॥ आकृष्णेनेतिप्रदक्षिणंकृ त्वायेतेपंथानइतिजप्त्वा ॥ योसौविष्ण्वाख्यआदित्ये पुरुषोंतर्हृदिस्थितः । सोहंनारायणोदेवइतिध्यात्वाप्रणम्यतम् ॥ त्रिदण्डंदक्षिणेत्वंगेततःसंधायबा हुना ॥ पात्रंवामकरेक्षिप्त्वाश्लेषयेद्दक्षिणेनत्विति बौधायनोक्तदिशात्रीन्पंच सप्तवागृहान्गत्वाभवत्पूर्वीभिक्षांयाचित्वा ॥ पूर्णमसिपूर्णमेभूयाइत्यागत्यशु चिरन्नंप्रोक्ष्य । ओंभूःस्वधानमइत्यादिव्यस्तसमतव्याहृतिभिःसूर्यादिदेवे भ्योभूतेभ्यश्चभूमौक्षिप्त्वाभुक्त्वाप्रणवेनषोडशप्राणायामान्कुर्यादितिसंक्षेपः **गौतमव्याख्यायांभृगुः** यतिहस्तेजलंदत्वाभैक्ष्यंदद्यात्पुनर्ज्जलम् । भैक्ष्यंप र्व्वतमात्रंस्यात्तज्जलंसागरोपमम् ॥ अत्रसर्वत्रमूलंमाधवापरार्कमदनरत्नस्मृ त्यर्थसारादौज्ञेयम् **कण्वः** एकरात्रंवसेत्ग्रामेनगरेपंचरात्रकम् । वर्षाभ्यो न्यत्रवर्षासु मासांस्तुचतुरोवसेत् **जाबालश्रुतौ** शून्यागारेदेवगृहतृणकुटी वल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थंडिले

ष्वनिकेतनइति **मात्स्ये** अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनाम् ॥ एकत्रचतुरोमासान्वार्षिकान्निवसेत्पुनः ॥ अविमुक्तप्रविष्टानांविहारस्तुन विद्यते **अत्रिः** भिक्षाटनंजपंस्नानंध्यानंशौचंसुरार्चनम् । कर्तव्यानिषडेता नि सर्व्वथानृपदण्डवत्मंचकंशुक्लवस्त्रंचस्त्रीकथांलौल्यमेवच । दिवास्वापंच यानंचयतीनांपतनानिषट् ॥ आसनंपात्रलोभश्चसंचयःशिष्यसंग्रहः । दि वास्वापोवृथाजल्पोयतेर्बंधकराणिषट् **दक्षः** नाध्येतव्यंनवस्तव्यंनश्रोतव्यंक थंचन । यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच **मदनरत्नेअत्रिः** पित्रर्थंक ल्पितंपूर्वमन्नंदेवादिकारणात् । वर्ज्जयेत्तादृशींभिक्षां परबाधाकरींतथा **बृहस्पतिः** नतीर्त्थवासीनित्यंस्यान्नोपवासपरोयतिः । नचाध्ययनशीलःस्या न्नव्याख्यानपरोभवेत् ॥एतद्भेदार्थभिन्नपरम् **अत्रिः** स्नानंसुरार्चनंध्यानंप्राणा यामोबलिस्तुतिः । भिक्षाटनंजपःसंध्यात्यागःकर्मफलस्यच ॥ एतेयतिधर्म्मा इत्यर्थः ॥ अन्येपिमाधवमिताक्षरादौज्ञेयाः **यतिधर्मसमुच्चये** नस्नानमा चरेद्भिक्षुः पुत्रादिनिधनेश्रुते । नपितृमातृक्षयंश्रुत्वास्नात्वाशुध्यतिसांबरः **अथयतिसंस्कारः । स्मृत्यर्थसारे** सर्व्वसंगनिवृत्तस्य ध्यानयोगरतस्यच । नतस्यदहनंकार्य्यमाशौचंनोदकंक्रिया **तथा** कुटीचकंतुप्रदहेत्पूरयेत्तुब हूदकम् । हंसोजलेतुनिक्षेप्यःपरहंसंप्रपूरयेत् ॥ पालाशमूलेनदीतीरेन्यत्र वागन्धपुष्पालंकृतंशवंवाद्यघोषेणनीत्वादण्ड मात्रंव्याहृतिभिःस्नात्वासप्तव्या हृतिभिस्त्रिःप्रोक्ष्य दर्भानास्तीर्यनवघटेपंचरत्नोदकं क्षिप्त्वानारायणःपरंब ह्मेत्यभिमंत्र्य तेनैवसंस्नाप्याष्टाक्षरेण वस्त्र गन्ध पुष्प धूपदीपादीन्दत्वा वि ष्णोहव्यं रक्षस्वेतिशवंगर्तेनिधायेदंविष्णुरितिदक्षिणहस्ते दण्डंयदस्यपारे इतिसव्येशिक्यंयेनदेवाःपवित्रेणेतिमुखेजलपवित्रं सावित्र्योदरे पात्रंभूमिः श्वभ्रेतिगुह्येकमण्डलुंनिधायचित्तिःस्रुगिति दशाहोत्राभिम्मंत्रयेदितिविश्वाद र्शटीकायांस्मृत्यर्थसारेच **बृहच्छौनकस्तु** यतिंपुरुषसूक्तेनस्नापयित्वावटं ततः । प्रणवेनाष्टवारंतंप्रोक्षयेदथसर्वतः ॥ विष्णोहव्यंरक्षस्वेतियजुषा प्रणवेनच । गर्तेप्रेतंविनिक्षिप्यचेदंविष्णुर्विचक्रमे ॥ इतिमंत्रेणदंडंतुदद्याद क्षिणहस्तकेमूर्धानंभूर्भुवःस्वश्चेत्युक्त्वाशंखेनभेदयेत् ॥ गर्तंपुरुषसूक्तेनल वणेनप्रपूरयेत् । सृगालश्वादिरक्षार्थंसम्यग्गर्तंप्रपूरयेदिति ॥ कुटीचकस्य

तुदाहःकार्यः ॥ यथासर्वंप्राग्वत्कृत्वाग्निंप्रज्वाल्यसामेर्दक्षिणकरेउपावरोहेत्यवरोह्यनिर्मथ्यवागर्तेचितिंकृत्वाग्निनाग्निः समिध्यतइत्यग्निंदत्वासावित्र्याप्रणवेनवादहेत् ॥ ततोष्टशतंप्रणवंनारायणःपरंब्रह्मेतिजप्त्वासशिरःप्रणवव्याहृत्यागायत्र्यातदस्मास्थीनितीर्थेक्षिप्त्वास्नानात्शुचिः नास्त्यन्यदौर्ध्वदेहिकम् ॥ त्रिदण्डग्रहणादेवप्रेतत्वंनैवजायतइतिउशनसः स्मृतेएकादशेह्निपार्वणंतदपित्रिदंडिनः ॥ हंसपरमहंसादीनांपार्वणादिकिमपिनकार्यमितिशूलपाणिः **श्राद्धचिंतामणौदत्तात्रेयः** एकोद्दिष्टंजलंपिंडमाशौचंप्रेतसत्क्रियाम् ॥ नकुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे ॥ प्रेतक्रिययैकोद्दिष्टनिषेधेसिद्धेपुनस्तद्ग्रहणमाब्दिकपरम् ॥ तेनतत्पार्वणमेवंत्रिदंडिनांद्वादशेनारायणबलिः ॥ तद्विधिरन्यश्चविशेषःप्रागुक्तः ॥ इत्यलंबहुना ॥ एवंनिरूपितमिदंगहनंतुधर्मतत्वंविचार्यवचनैश्चनयैश्चसम्यक् । तद्दोषदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मितेषु॥१॥ मयासद्वासद्वायदिहगदितंमंदमतिनाकिमेतच्छक्यंवाध्यवसितुमपि स्वल्पमतिना । तदेवंयत्किंचिद्वदितमिहविख्यातमहिमाप्रतापोयंसर्वोर्विकसतितुपित्रोश्चरणयोः॥ २ ॥ योभाट्टतंत्रगणनार्णवकर्णधारःशास्त्रांतरेषुनिखिलेष्वपिमर्मभेत्ता । पोत्रश्रमःकिलकृतःकमलाकरेणप्रीतोमुनास्तुसुकृतीबुधरामकृष्णः ॥ ३ ॥ श्रीभट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसूनोः ॥ श्रीरामकृष्णस्यसुतःकृतीमंव्यधान्निबंधंकमलाकराख्यः ॥ ४ ॥ नानानिर्णयवर्त्वान्निर्णयसिंधुःप्रोच्यतांविबुधाः । निर्णयसरोजवर्त्वान्निर्णयकमलाकरोप्यस्तु ॥ ५ ॥ वसुऋतुऋतुभूमितेगतेब्देनरपतिविक्रमतोथयातिरौद्रे । तपसिशिवतिथौसमापितोयंरघुपतिपादसरोरुहेर्पितश्च ॥ जगतिसकलविद्यासिंधुमुष्टिंधयानांपरभणितिपरीक्षायुज्यतेसज्जनानाम् । तदिहममनिबंधेदूषणंभूषणंवायदिभवतिविदग्धैस्तध्यवश्यंविमृश्यम् ॥

इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीण श्रीमद्रामेश्वरभट्टसूरिसूनु नारायण भट्टसुतविद्वन्मुकुटहीरांकुरश्रीरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतेनिर्णयसिंधौ तृतीयपरिच्छेदःसमाप्तः ॥

॥ समाप्तोयंग्रन्थः ॥

तिः आत्मामेशुत्ध्यंताम् ॥ क्षुधेस्वाहा। क्षुत्पिपासायस्वाहा विवित्ध्यैस्वा हा। ऋग्विधानायस्वाहा। कषोत्कायस्वाहा ॥ क्षुत्पिपासामलंज्येष्ठामलक्ष्मी र्नाशयाम्यहम्। अभूतिमसमृद्धिंचसर्व्वान्निर्णुदमेपाप्मानꣳस्वाहा ॥ अन्नम यप्राणामयमनोमयविज्ञानमयमानन्दमयमात्मामेशुत्ध्यंताम्॥ज्योति०॥ततः स्विष्टकृदादिहुत्वाब्रह्मणेहिरण्यमाज्यपात्रंधेनुंचदत्वा समासिंचत्वित्युपतिष्ठे त् ॥ अत्रकेचिदनग्नेःसावित्रीप्रवेशंपूर्णाहुतिंचाहुः ॥ ततोयातेअग्नेयज्ञियात नूरितित्रिस्त्रिभिरेकैकांजिघ्रन्नात्मन्यग्नीन्समारोप्यगुरवेसर्व्वस्वंदत्वा ॥ योब्र ह्माणंविदधातिपूर्व्वं योवैवेदांश्चप्राहिणोतितस्मैतंहदेवमात्मबुद्धिप्रकाशं मुमु क्षुर्व्वैशरणमहं प्रपद्यइत्युपस्थाय ॥ दक्षिणंजान्वाच्यपादावुपयंगृह्याधीहि भगवोब्रह्मेतिवदेत् ॥ ततोगुरुरात्मानंब्रह्मरूपंध्यात्वाशंखंद्वादशप्रणवैरभि मंत्र्यतेनशिष्यमभिषिंच्य शन्नोमित्रइतिशांतिंपठित्वातच्छिरसिहस्तंदत्वापु रुषसूक्तंजप्त्वा ॥ ममव्रतेहृदयंतेदधामीतिचजप्त्वोदङ्मुखःप्रणवार्थमनुसं दधद्दक्षिणेकर्णे प्रणवमुपदिश्यतदर्थंचपंचीकरणाद्यवबोध्यअयमात्माब्रह्मत त्त्वमसिप्रज्ञानंब्रह्मेत्याद्युपदिशेत्तदर्थंचवदेत् ॥ ततोनामदद्यात्। ततःशि ष्यस्तेनोपदिष्टोहरिंस्मरन्नूर्ध्वबाहुस्तिष्ठन्देवान्साक्षिणःकृत्वा ॥ ओम्भूर्भुवः स्वःसन्यस्तंमयेतित्रिरुपांशुत्रिरुच्चैस्त्रिरत्युच्चैश्चोक्त्वावा जलसमीपंगत्वास्ना त्वा ॥ अभयंर्वभूतेभ्योमत्तःस्वाहेतित्रिरंजलीन्क्षिप्त्वा युवासुवासाइति काषायंकौपीनंवासश्चपरिधायसखामेगोपायेतिमुख्यवैणवंपालाशंबैल्वमौदुंब रंवादंडंगृह्णीयात् ॥ अत्रपुत्रकामोगृहस्थःशंखेनपुरुषसूक्तेनदण्डमभिषिच्य दद्यादित्याचारः ॥ तत्रशिखामुत्पाट्य ओम्भूःस्वाहेत्यग्नौजलेवाहुत्वातथै वोपवीतंहुत्वा ॥ येनदेवाःपवित्रेणेतिजलेपवित्रंयदास्यपारइतिशिक्यंसावि त्र्याकमंडलुं सप्तव्याहृतिभिर्भोजनपात्रमिदंविष्णुरित्यासनंबृसींवागृहीत्वा ॥ ओम्भूस्तर्पयामीति व्यस्तसमस्ताभिर्महर्नमइतितर्पयित्वा ॥ भूःस्वर्धों स्वः स्वर्धों भूर्भुवःस्वर्म्महर्नमः स्वधेतिपितॄंस्तर्प्पयित्वोदुत्यंचित्रं तच्चक्षुर्हसः शु चिषन्नमोमित्रस्येति स्नात्वासुरभिमतीभिरापोहिष्टेतिहिरण्यवर्णाभिःपावमा नीभिर्व्याहृतिभिश्च मार्जयित्वाष्टोत्तरशतवारमघमर्षणंप्राणायामांश्चकृत्वा ॥ ओम्भूर्भुवःसुवरितिचपठित्वा ॥ नमःसवित्रइतिसूर्यंचोपस्थायपुनःस्नात्वा

जंघेक्षालयित्वा ॥ ओंमितिब्रह्मोमितीदंसर्वमोमितिब्रह्मवा एषज्योतिर्य एषवेदीयएषतपतिवेद्यमेवैतद्यएषवेदोयदवनमस्तीतिजपित्वाष्टसहस्रंगायत्रीं जपेदिति **अथयतिधर्माः** प्रातरुत्थायब्रह्मणस्पतेइतिजपित्वादंडादीनि मृदंचनिधाय मूत्रपुरीषयोर्गृहस्थचतुर्गुणंशौचंकृत्वाऽचम्यपर्वद्वादशीव र्ज्यंप्रणवेनदंतधावनंकृत्वा तेनैवमृदाबहिः कटिंप्रक्षाल्यजलतर्पणवर्ज्यं स्नात्वापुनर्जंघेप्रक्षाल्यवस्त्रादीनिगृहीत्वामार्जनांतंकृत्वाकेशवादि नमोंत नामभिस्तर्पयित्वा ॥ ओंभूतस्तर्पयामीत्यादिव्यस्तसमस्तव्याहृतिभिर्महर्ज नस्तर्पयामीतितर्पयेत् ॥ ओंभूः स्वाहेतिस्वाहाशब्दांतैः स्वधाशब्दांतैश्चे भिरेवपुनस्तर्पयेदितिकेचित् ॥ ततआचम्यांजलिनाप्रणवेनजलमादायव्याहृ तिभिरुद्धृत्यगायत्र्यात्रिःक्षिप्त्वागायत्रींजपेत् ॥ उदितेसूर्य्येप्रणवेनव्याहृति भिर्वार्घ्यंत्रिर्दत्वामित्रस्यचर्षणीत्याद्यैःपूर्व्वोक्तसौरीभिरिदंविष्णुस्त्रिर्देवोब्रह्मज ज्ञानमितिचोपस्थायसर्वभूतेभ्योनमइतिप्रदक्षिणमावर्तते ॥ ततोनत्वा ॥ आदित्यायविद्महेसहस्राक्षायधीमहि ॥ तन्नःसूर्य्यःप्रचोदयादितित्रिर्जपेत् ॥ एवंत्रिकालंविष्णुपूजांब्रह्मयज्ञंचकुर्यात् **अथभिक्षा** विधूमेसन्नमुसले व्यंगा रेभुक्तवज्जने । कालेपराह्णेभूयिष्ठेनित्यंभिक्षांयतिश्चरेदित्युक्तकाले ॥ उद्व यमितिचतसृभिरादित्यमुपस्थायतेनैक्यंध्यात्वा ॥ आकृष्णेनेतिप्रदक्षिणंकृ त्वायेतेपंथानइतिजप्त्वा ॥ योसौविष्ण्वाख्यआदित्ये पुरुषोंतर्हृदिस्थितः । सोहंनारायणोदेवइतिध्यात्वाप्रणम्यतम् ॥ त्रिदण्डंदक्षिणेत्वंगेततःसंधायबा हुना ॥ पात्रंवामकरेक्षिप्त्वाश्लेषयेद्दक्षिणेनत्विति बौधायनोक्तदिशात्रीन्पंच सप्तवागृहान्गत्वाभवत्पूर्वांभिक्षांयाचित्वा ॥ पूर्णमसिपूर्णमेभूयाइत्यागत्यशु चिरन्नंप्रोक्ष्य । ओंभूःस्वधानमइत्यादिव्यस्तसमत्तव्याहृतिभिःसूर्यादिदेवे भ्योभूतेभ्यश्चभूमौक्षिप्त्वाभुक्त्वाप्रणवेनषोडशप्राणायामान्कुर्यादितिसंक्षेपः **गौतमव्याख्यायांभृगुः** यतिहस्तेजलंदत्वाभैक्ष्यंदद्यात्पुनर्ज्जलम् । भैक्ष्यंप र्व्वतमात्रंस्यात्तज्जलंसागरोपमम् ॥ अत्रसर्वत्रमूलंमाधवापरार्कमदनरत्नस्मृ त्यर्थसारादौज्ञेयम् **कण्वः** एकरात्रंवसेत्ग्रामेनगरेपंचरात्रकम् । वर्षाभ्यो न्यत्रवर्षासु मासांस्तुचतुरोवसेत् **जाबालश्रुतौ** शून्यागारेदेवगृहतृणकुटी वल्मीकवृक्षमूलकुलालशालाग्निहोत्रगृहनदीपुलिनगिरिकुहरनिर्झरस्थंडिले

ष्वनिकेतनइति **मात्स्ये** अष्टौमासान्विहारःस्याद्यतीनांसंयतात्मनाम् ॥ एकत्रचतुरोमासान्वार्षिकान्निवसेत्पुनः ॥ अविमुक्तप्रविष्टानांविहारस्तुन विद्यते **अत्रिः** भिक्षाटनंजपंस्नानंध्यानंशौचंसुरार्चनम् । कर्तव्यानिषडेतानि सर्व्वथानृपदण्डवत्मंचकंशुक्लवस्त्रंचस्त्रीकथांलौल्यमेवच । दिवास्वापंच यानंचयतीनांपतनानिषट् ॥ आसनंपात्रलोभश्चसंचयःशिष्यसंग्रहः । दिवास्वापोवृथाजल्पोयतेर्बंधकराणिषट् **दक्षः** नाध्येतव्यंनवस्तव्यंनश्रोतव्यंकथंचन । यतिपात्राणिमृद्वेणुदार्वलाबुमयानिच **मदनरत्नेअत्रिः** पित्रर्थकल्पितंपूर्वमन्नंदेवादिकारणात् । वर्ज्जयेत्तादृशींभिक्षां परबाधाकरींतथा **बृहस्पतिः** नतीर्त्थवासीनित्यंस्यान्नोपवासपरोयतिः । नचाध्ययनशीलःस्यान्नव्याख्यानपरोभवेत् ॥एतद्वेदार्थभिन्नपरम् **अत्रिः** स्नानंसुरार्चनंध्यानंप्राणायामोबलिस्तुतिः । भिक्षाटनंजपःसंध्यात्यागःकर्मफलस्यच ॥ एतेयतिधर्म्माइत्यर्थः ॥ अन्येपिमाधवमिताक्षरादौज्ञेयाः **यतिधर्मसमुच्चये** नस्नानमाचरेद्भिक्षुः पुत्रादिनिधनेश्रुते । नपितृमातृक्षयंश्रुत्वास्नात्वाशुत्ध्यतिसांबरः **अथयतिसंस्कारः । स्मृत्यर्थसारे** सर्व्वसंगनिवृत्तस्य ध्यानयोगरतस्यच । नतस्यदहनंकार्य्यमाशौचंनोदकंक्रिया **तथा** कुटीचकंतुप्रदहेत्पूरयेत्तुबहूदकम् । हंसोजलेतुनिक्षेप्यःपरहंसंप्रपूरयेत् ॥ पालाशमूलेनदीतीरेन्यत्र वागन्धपुष्पालंकृतंशवंवाद्यघोषेणनीत्वादण्ड मात्रंव्याहृतिभिःस्नात्वासप्तव्याहृतिभिस्त्रिःप्रोक्ष्य दर्भानास्तीर्यनवघटेपंचरत्नोदकं क्षिप्त्वानारायणःपरंब्रह्मेत्यभिमंत्र्य तेनैवसंस्नाप्याष्टाक्षरेण वस्त्र गन्ध पुष्प धूपदीपादीन्दत्वा विष्णोहव्यं रक्षस्वेतिशवंगर्तेनिधायेदंविष्णुरितिदक्षिणहस्ते दण्डंयदस्यपारे इतिसव्येशिक्यंयेनदेवाःपवित्रेणेतिमुखेजलपवित्रं सावित्र्योदरे पात्रंभूमिःश्वभ्रेतिगुह्येकमण्डलुंनिधायचित्तिःस्रुगिति दशाहोत्राभिम्मंत्रयेदितिविश्वादर्शटीकायांस्मृत्यर्थसारेच **बृहच्छौनकस्तु** यतिंपुरुषसूक्तेनस्नापयित्वावटंततः । प्रणवेनाष्टवारंतंप्रोक्षयेदथसर्वतः ॥ विष्णोहव्यंरक्षस्वेतियजुषा प्रणवेनच । गर्तेप्रेतंविनिक्षिप्यचेदंविष्णुर्विचक्रमे ॥ इतिमंत्रेणदंडंतुदद्याद्दक्षिणहस्तकेमूर्धानंभूर्भुवःस्वश्चेत्युक्त्वाशंखेनभेदयेत् ॥ गर्तंपुरुषसूक्तेनलवणेनप्रपूरयेत् । सृगालश्वादिरक्षार्थंसम्यग्गर्तंप्रपूरयेदिति ॥ कुटीचकस्य

तुदाहःकार्यः ॥ यथासर्वंप्राग्वत्कृत्वाग्निंप्रज्वाल्यसाग्नेर्दक्षिणकरेउपावरोहे त्यवरोह्यनिर्मथ्यवागर्तेचितिंकृत्वाग्निनाग्निः समिध्यतइत्यग्निदत्वासावित्र्या प्रणवेनवादहेत् ॥ ततोष्टशतंप्रणवंनारायणःपरंब्रह्मे तिजप्त्वासशिरः प्रणवव्याहृत्यागायत्र्यातदस्मास्थीनितीर्थेक्षिप्त्वास्नानात्शुचिः नास्त्यन्य दौर्ध्वदेहिकम् ॥ त्रिदण्डग्रहणादेवप्रेतत्वंनैवजायतइतिउशनसः स्मृ तेएकादशेह्निपार्वणंतदपित्रिदंडिनः ॥ हंसपरमहंसादीनांपार्वणादिकिम पिनकार्यमितिशूलपाणिः **श्राद्धचिंतामणौदत्तात्रेयः** एकोद्दिष्टंजलंपिं डमाशौचंप्रेतसात्कियाम् ॥ नकुर्याद्वार्षिकादन्यद्ब्रह्मीभूतायभिक्षवे ॥ प्रेत क्रिययैकोद्दिष्टनिषेधेसिद्धेपुनस्तद्ग्रहणमाब्दिकपरम् ॥ तेनतत्पार्वणमेवंत्रि दंडिनांद्वादशेनारायणबलिः ॥ तद्विधिरन्यश्चविशेषःप्रागुक्तः ॥ इत्यलंबहु ना ॥ एवंनिरूपितमिदंगहनंतुधर्मतत्वंविचार्यवचनैश्चनयैश्चसम्यक् । तद्दो षदृष्टिमपहायविवेचनीयंविद्वद्भिरित्यविरतंप्रणतोस्मितेषु॥१॥ मयासद्वासद्वा यदिहगदितंमंदमतिनाकिमेतच्छक्यंवाध्यवसितुमपि स्वल्पमतिना । तदेवं यत्किंचिद्गदितमिहविख्यातमहिमाप्रतापोयंसर्वोर्विकसतितुपित्रोश्चरणयोः॥ २ ॥ योभाट्टतंत्रगणनार्णवकर्णधारःशास्त्रांतरेषुनिखिलेष्वपिमर्मभेत्ता । पो त्रश्रमःकिलकृतःकमलाकरेणप्रीतोमुनास्तुसुकृतीबुधरामकृष्णः ॥ ३ ॥ श्री भट्टरामेश्वरसूरिसूनुश्रीभट्टनारायणसूरिसूनोः ॥ श्रीरामकृष्णस्यसुतःकृतीमं व्यधान्निबंधंकमलाकराख्यः ॥ ४ ॥ नानानिर्णयवक्त्वान्निर्णयसिंधुःप्रोच्यतां विबुधाः । निर्णयसरोजवक्त्वान्निर्णयकमलाकरोप्यस्तु ॥ ५ ॥ वसुऋतुऋ तुभूमितेगतेब्देनरपतिविक्रमतोथयातिरौद्रे । तपसिशिवतिथौसमापितोयंर घुपतिपादसरोरुहेर्पितश्च ॥ जगतिसकलविद्यांसिंधुमुष्टिंधयानांपरभणितिप रीक्षायुज्यतेसज्जनानाम् । तदिहममनिबंधेदूषणंभूषणंवायदिभवतिविदग्धै स्तध्यवश्यंविमृश्यम् ॥

इतिश्रीमत्पदवाक्यप्रमाणपारावारपारीण श्रीमद्रामेश्वरभट्टसूरिसूनु नारायण भट्टसुतविद्वन्मुकुटहीरांकुरश्रीरामकृष्णभट्टात्मजार्दिनकरभट्टानुजक मलाकरभट्टकृतेनिर्णयसिंधौ तृतीयपरिच्छेदःसमाप्तः ॥

॥ समाप्तोयंग्रन्थः ॥